કવિશ્રેષ્ઠ શ્રી દેવવિમલ ગણી વિરચિત

હીર સૌભાગ્ય

મહાકાવ્ય

ભાગ: 3

ગુજરાતી અનુવાદ:

વિદુષી સાધ્વીજી સુલોચના શ્રીજી

શાંતિલાલ દોશી

કવીશ્વર શ્રી દેવવિમલગણિ-વિરચિત

હીરસૌભાગ્ય મહાકાવ્ય

સ્વોપજ્ઞ ટીકા સહિત

卐

ભાગ ત્રીજો

[સર્ગ ૧૪ થી ૧૭]

સંપૂર્ણ

卐

ગુજરાતી અનુવાદ
સ્વ. પૂજ્ય સાધ્વીજી શ્રી સુનંદાશ્રીનાં
અન્તેવાસિની વિદુષી સાધ્વી સુલોચનાશ્રી

પ્રકાશક :
કાન્તિલાલ ચીમનલાલ કોલસાવાળા
'ગુડલક' ૯ શ્રીમાળી સોસાયટી,
નવરંગપુરા, **અમદાવાદ** : ૩૮૦ ૦૦૯
ફોન : ૪૪૧૯૪૪.

પ્રાપ્તિસ્થાન : પત્રવ્યવહાર :
શાન્તિલાલ ભલાભાઈ
'દર્શન' ૨૯ શ્રીમાળી સોસાયટી,
નવરંગપુરા, **અમદાવાદ** : ૩૮૦ ૦૦૯
ફોન : ૪૪૨૧૦૪

બીજું પ્રાપ્તિસ્થાન :
સરસ્વતી પુસ્તક ભંડાર
હાથીખાના, રતનપોળ, **અમદાવાદ.**

* વિ. સં. ૨૦૩૫, શ્રાવણ સુદ : ૧૨

* સર્વ હક્ક અનુવાદિકાને સ્વાધીન છે.

* મૂલ્ય : રૂ. ૫૦ [પચાસ રૂપિયા]

મુદ્રક :
રતિલાલ અંબાલાલ પટેલ
અક્ષર પ્રેસ, આશિષ ઇન્ડ. એસ્ટેટ,
નાગરવેલ હનુમાન રોડ, રખિયાલ,
અમદાવાદ : ૩૮૦ ૦૨૩.

નિવેદન

કર્મોથી ઘેરાયેલા માનવીનું નહીં ધારેલું ઘણુંઘણું બને છે અને ધારેલું ઘણું નથી બનતું....છતાંય જ્યારે એક–બે વાત ધારેલી બની જાય છે ત્યારે એના આનંદનો પાર નથી રહેતો 'હીરસૌભાગ્ય'નો ગુજરાતી ભાષામાં અનુવાદ થઈ જવો....અને તેનું ત્રણ ભાગમાં પ્રકાશિત થઈ જવું....એ વાત મારા જેવી સાધ્વી માટે કેટલી બધી આનન્દદાયી છે....એ તો મારો આત્મા જ જાણે!

મારા જીવનની આ એક મહેચ્છા પૂર્ણ થઈ છે. **'સ્યાદ્વાદ મંજરી'**ના ગુજરાતી અનુવાદનું પ્રકાશન મારા જીવનની એક પ્રબળ ઇચ્છાની પૂર્ણાહુતિ હતી, તો **'હીરસૌભાગ્ય'**ના ગુજરાતી અનુવાદનું પ્રકાશન મારી એક મહેચ્છાની પૂર્ણાહુતિ છે.

મારા દ્વારા થયેલા આ અનુવાદનું કાળજીપૂર્વક સંશોધન કરી આપનારા એ અનામી પૂજ્યશ્રી પ્રત્યે મારી હાર્દિક કૃતજ્ઞતા પ્રદર્શિત કરું છું, આ અનુવાદને છપાવવાના કાર્યમાં (ભાગ : ૧–૨–૩) મન–વચન–કાયાથી સહયોગી બનનારા સુશ્રાવક **શાન્તિલાલ ભલાભાઈ**ને હાર્દિક અભિનંદન સિવાય બીજું શું આપું? છેલ્લે છેલ્લે તો તેઓની નાદુરસ્ત તબિયત હોવા છતાં પણ પ્રેસના ધક્કા છોડયા નહીં અને કામ પુરું કરાવીને જંપ્યા!

મારી સાહિત્યપ્રવૃત્તિમાં મને આર્થિક દૃષ્ટિએ ક્યારેય મુંઝાવા નહીં દેનારા અમદાવાદ–નિવાસી સ્વ. સુશ્રાવક **કીર્તિકરભાઈ**ના પુનિત આત્માને યાદ કર્યા વિના રહી શકતી નથી, તેઓના સ્વર્ગવાસ પછી તેમના સુપુત્રોએ પણ 'હીરસૌભાગ્ય'ના પ્રકાશનમાં સારો આર્થિક સહયોગ પ્રદાન કરેલો છે.

'હીરસૌભાગ્ય' મહાકાવ્ય જૈનપરમ્પરાનાં સંસ્કૃત મહાકાવ્યોમાં જ નહીં, પરંતુ સમગ્ર સંસ્કૃત સાહિત્યમાં ઉચ્ચતમ સ્થાન પ્રાપ્ત કરેલું મહાકાવ્ય છે. જેવી રીતે રઘુવંશ, કીરાતાર્જુનીય, શિશુપાલવધ, નૈષધીય આદિ મહાકાવ્યોનું અધ્યયન કરવામાં આવે છે, તેવી રીતે 'હીરસૌભાગ્ય' મહાકાવ્યનું પણ જો અધ્યયન કરવામાં આવે તો સંસ્કૃત કાવ્યોના બોધ સાથે પ્રાસંગિક અનેક તત્ત્વજ્ઞાનના વિષયોનો પણ બોધ પ્રાપ્ત થશે. આ અનુવાદથી અધ્યયન કરનારાઓને સરળતા રહેશે.

પ્રાન્તે, આ અનુવાદ કરવામાં, મારા ક્ષયોપશમની મંદતાથી, અજ્ઞાનતાથી ક્યાંય પણ ક્ષતિ રહી ગઈ હોય તો વિદ્વાનો મને ક્ષમા કરજો. આ મહાકાવ્યના અધ્યયન–આસ્વાદથી સહુ જીવો આનંદ અનુભવો!

જીરાવલાજી તીર્થ
(રાજસ્થાન)
શ્રાવણ સુદ : ૧૨. વિ.સં. ૨૦૩૫

— સાધ્વી સુલોચના

નૈવેદ્ય

મને આવી શ્રુતજ્ઞાનની ભક્તિ કરવાનો અવસર આપીને પૂજ્ય સાધ્વીજી શ્રી સુલોચનાશ્રીજીએ મારા પર અપાર ઉપકાર કર્યો છે. જ્યારે તેઓશ્રીએ અમારા નવરંગપુરા સંઘની વિનંતીથી નવરંગપુરામાં ચાતુર્માસ કર્યું ત્યારે મને તેઓશ્રીનો પરિચય થયો. તેઓ 'હીરસૌભાગ્ય' જેવા સંસ્કૃત મહાકાવ્યનો અનુવાદ કરતાં હતાં! એ જોઈને, એમની વિદ્વત્તા અને જ્ઞાનરસિકતા જોઈને મને તેઓશ્રી પ્રત્યે સદ્ભાવ જાગ્યો અને 'હીરસૌભાગ્ય'ના પહેલા ભાગનું પ્રકાશન અમારા સંઘના ઉપક્રમે કરવાનો નિર્ણય કર્યો....ભવ્ય પ્રકાશનસમારોહ સાથે પ્રથમ ભાગ બહાર પાડ્યો. તે પછી પાંચ વર્ષે બીજો ભાગ પ્રકાશિત થયો, અને ત્યારબાદ ત્રણ વર્ષે આ ત્રીજો ભાગ પ્રકાશિત થાય છે. આ રીતે ત્રણ ભાગમાં સંપૂર્ણ 'હીરસૌભાગ્ય' મહાકાવ્ય એની ટીકા અને ગુજરાતી અનુવાદ સાથે પ્રકાશિત થઈ ગયું....મારા જીવનકાળમાં આ મહત્ત્વનું કાર્ય સંપૂર્ણ કર્યાનો મને આનંદ છે.

પૂજ્ય સાધ્વીજી શ્રી સુલોચનાશ્રીજીનો જન્મ પાટણ (ઉ.ગુ.)માં વિ.સં. ૧૯૮૩માં થયેલો. વિ.સં. ૧૯૯૫માં માત્ર બાર વર્ષની વયે તેમણે પૂજ્ય સાધ્વીજી મ. સુનંદાશ્રીજી પાસે ચારિત્ર અંગીકાર કર્યું હતું. અલ્પવયમાં દીક્ષા લઈને તેઓએ વિવિધ તપશ્ચર્યાઓની સાથે સાથે ન્યાય, વ્યાકરણ, સાહિત્ય, જ્યોતિષ, કર્મસિદ્ધાન્ત, પ્રકરણો આદિનું તલસ્પર્શી જ્ઞાન મેળવ્યું ગુજરાત, સૌરાષ્ટ્ર અને રાજસ્થાનમાં હજારો માઈલોનો વિહાર કર્યો છે. 'સ્યાદ્વાદમંજરી' જેવા દાર્શનિક ગ્રંથનો ગુજરાતી ભાષામાં અનુવાદ કર્યો છે.

આજે તેઓને દીક્ષાજીવનમાં ૪૦ વર્ષ થયાં છે...છતાં જ્ઞાનરસિકતા તો તેવી જ ઉત્કટ છે. તેઓને છ શિષ્યાઓ છે. તેઓ સ્વયં શિષ્યાઓને અધ્યયન કરાવે છે. શ્રાવિકાઓને તત્વજ્ઞાન વર્ગોમાં તત્ત્વજ્ઞાન આપે છે. વિદ્વાનો સાથે તત્ત્વચર્ચાઓ પણ કરે છે. સ્વ–પર સમુદાયની સાધ્વીઓને સમાનભાવે અધ્યયન કરાવે છે.

પૂજ્ય સાધ્વીજી મ. હજુ પણ આવા બીજા ધર્મગ્રન્થોના અનુવાદ કરે, ધર્મગ્રન્થો ઉપર વિવેચનો લખે અને પોતાની જ્ઞાનપ્રતિભાનો સંઘ અને સમાજને લાભ આપે, એવી હું વિનમ્ર પ્રાર્થના કરું છું. આવી રીતે બીજાં પણ પ્રતિભાસંપન્ન સાધ્વીજી મહારાજો જ્ઞાનોપાસનના ક્ષેત્રે પ્રગતિ કરતાં રહે તો સંઘને કેવો મહાન્ લાભ થાય! પ્રાન્તે, આ ગ્રંથપ્રકાશનમાં જે કોઈ ત્રુટી રહી ગઈ હોય, તે બદલ ક્ષમા ચાહું છું.

અમદાવાદ
૧–૮–૭૯

—શાન્તિલાલ ભલાભાઈ

विषयानुक्रमणिका

विषय	श्लोकाङ्क	पृष्ठ
चतुर्दशः सर्गः		
१–साहिना सह सूरेःचित्रशालायां गमनम्	१–१६	४६१–४६८
२–सूरेः धर्मदेशनावर्णनम्	१७–२४	४६९–४७२
३–साहेः देवगुरुधर्माणां प्रश्नः	२५–३०	४७३–४७४
४–सूरिणा साहेः पुरः तत्त्वत्रयाराधना प्रोक्ता	३१–३७	४७५–४७८
५–पुनः सूरिणा पञ्चमहाव्रतादि–सप्तव्रतानि दर्शितानि	३८–६२	४७७–४९५
६–ज्योतिष्संबंधि साहिप्रश्ने सति गुरोर्निषेधवचनम्	६३–७१	४९३–४९६
७–शेखस्य पुरः साहिना वर्णिता गुरोर्गुणाः	७२–७९	४९६–५००
८–साहेः गुरून् प्रति शिष्यप्रश्नः, गुरुणा स्वयमेवोक्ता–शिष्यसंख्या	८०–८४	५०१–५०२
९–साहेः पुस्तकोत्पत्तिकथनं, पुस्तकदानाग्रहश्च सूरेर्निषेधवचनम्	८५–१०२	५०३–५१२
१०–शेखथानसिंह–विज्ञपनात् साहिपुस्तकग्रहणम्	१०३–११६	५१३–५१८
११· सूरेः साहिकृतमहोत्सवपूर्वकं वसतावगमनम्	११७–१२६	५१८–५२३
१२–आगरानगरे चतुर्मासकरणवर्णनम्	१२७–१३३	५२४–५२७
१३–चतुर्मासानन्तरं सूरेः शौर्यपुरागमनवर्णनम्	१३४–१४०	५२८–५३१
१४–शौर्यपुरात् पुनः फतेपुरागमनवर्णनम्	१४१–१५५	५३२–५३८
१५–साहिना गुरोः शेखगृहाकारणम्, गजाश्वादिदानविज्ञप्तिश्च	१५६–१६५	५३९–५४३
१६–दीयमानवस्त्वनुपादानाद् साहेः गुर्वेभ्यो ग्रहणाय पुनराग्रहः	१६६–१७४	५४४–५४८
१७–सूरेःबंन्दिमोचनार्थं पञ्जरपक्षिमोचनार्थं च प्रेरणा	१७५–१८२	५४९–५५२
१८–पर्युषणाद्द्वादशदिनामारिप्रवर्तनं डामरतडागकार्पणम् (फुरमान)	१८३–१९६	५५३–५६०
१९–मृगयानिषेधः 'नवरोजा'दिनेषु अमारिप्रवर्तनम् गुरोः'जगद्गुरु'–विरुदसमर्पणं च	१९७–२०६	५६१–५६४
२०–सूरिवचनात् स्वकीयराष्ट्रे बन्दिमोचनपक्षिमोचनामारिप्रवर्तनम्	२०७–२१४	५६५–५६८
२१–अभयमिलनाद् वनचरखेचरजलचरमिथुनानां परस्पर–संवादः	२१५–२४६	५६९–५८६
२२–थानसिंहकृतप्रतिष्ठामहोत्सवे शांतिचन्द्रस्योपाध्यायपदार्पणवर्णनम्	२४७–२५५	५८७–५९१
२३–नागपुर–चातुर्मासानन्तरं शिवपुर्यां प्रतिष्ठाद्वयपूर्वकचातुर्मासिकम्	२५६–२६८	५९२–५९८
२४–सूरेर्गुर्जरदेशागमनम्, शांतिचन्द्रोपाध्यायस्य फुरमानदानं, जेजीयाकर-मुक्तिः, विमलाचलकरमुक्तिश्च	२६९–२८५	५९९–६०७
२५–भानुचन्द्रस्योपाध्यायपदार्पणम् विजयसेनसूरेः "सवाई"–बिरुदार्पण वर्णनम्	२८६–२९५	६०८–६१२

२६–श्रीहीरविजयसूरेः प्रशंसावर्णनम्	२९६ ३०५	६९३–३१८
२७–सर्गसमाप्तिवर्णनम्	३०६–००	६१९–००

पञ्चदेशः सर्गः

१–सूरेः विमलाचलं प्रति प्रयाणकम्	१–३	६२०–६२१
२–श्रीशत्रुंजयपर्वतवर्णनम्	४–८२	६२२–६७०
३–सर्गान्तवर्णनम्	८२–००	६७१–००

षोडशः सर्ग

१–शत्रुंजयतलहट्टिकायांस्थितस्यपादलिप्तपुरस्यवर्णनम्	१–८	६७१–३७६
२–सूरेर्नगरप्रवेशमहोत्सववर्णनम्, अनेकसंघागमनवर्णनम्	१०–१९	६७७–६८२
३–सूरेः शत्रुंजयान्तिकशिवप्रासादे रजन्यामवस्थानम्	२०–२९	६८३–६९९
४–गुरोर्विमलाचलारोहणम्, गिरिमेखलावर्णनम्	३०–४०	६९०–६९७
५–प्रथमप्राकारे मरुदेवीशिखरवर्णनम्	४१–४५	६९८–७०१
६–द्वितीयप्राकारप्रासादेषु देववन्दनम्	४६–५०	७०२–७०४
७–सर्वाभ्यंतरप्राकारप्रतोलीसोपनावर्णनम्	५१–५६	७०५–७०८
८–मूलप्रासादवर्णनम्	५७–९२	७०९–७३२
९–श्रीऋषभदेवप्रतिमावर्णनम्	९३–९५	७३३–७३४
१०–श्रीहीरविजयसूरिकृता ऋषभदेवस्तुतिः	९६–११०	७३५–७४५
११–सूरिणा शत्रुंजयमाहात्म्यकथनम्	१११–१४०	७४६–७६४
१२–युगादिदेवदर्शनवंदनाद् जगद्गुरोरानंदाभिव्यक्तिः	१४१–००	७६५–००
१३–सर्गसमाप्तिवर्णनम्	१४२–००	७६६–००

सप्तदशः सर्गः

१–पादलिप्तपुराद् द्वीपबंदिरं प्रति प्रस्थानकम्	१–७	७६७–७७०
२–प्रस्थानावसरे सूरेः शत्रुंजयस्वरूपविचारणम्	८–१४	७७१–७७४
३–शत्रुंजयपरिसरभुवं विहायाग्रेतनप्रस्थानवर्णनम्	१५–२९	७७५–७८२
४–अजयपुर्यामजारापार्श्वनाथस्तुतिपूर्वकतन्माहात्म्यवर्णनम्	३०–६१	७८३–७९९
५–सूरेरजयपुर्यां प्रवेशमहोत्सववर्णनम्	६२–६३	८००–८०१
६–द्वीपोन्नतपुरादिसंघानामागमनस्य वर्णनम्	६४–७७	८०१–८०८
७–उन्नतपुरे चातुर्मासप्रवेशमहोत्सववर्णनम्	७८–८३	८०९–८११
८–नानाभिग्रहतपध्यानस्वाध्यायादिपूर्वकप्रथमचतुर्मासवर्णनम्	८४–८८	८१२–८१४
९–शरीरस्यापटुत्वाद् द्वितीयचातुर्मासमप्युन्नतपुरे कृतमित्यादिवर्णनम्	८९–९०	८१९–००
१०–श्रीहीरविजयसूरेः तपक्रियानुष्ठानादिवर्णनम्	९१–१०७	८१६–८२६
११–सूरेः परिवारस्यैवं संघयात्राप्रतिष्ठादिसत्कार्याणां वर्णनम्	१०८–११९	८२७–८३२
११–जगद्गुरोरंतिमसंलेखना, चतुःशरणवर्णनम्	१२०–१२७	८३३–८३६
१३–स्वकीयदुष्कृतनिंदनादिवर्णनम्	१२८–१४८	८३७–८४८

१४–सुकृतानुमोदनमेवं सर्वजीवक्षमापनम्	१४९–१५६	८४९–८५३
१५–स्वकीयश्रमणगणस्य समर्पणविधिः	१५७–१६३	८५४–८५७
१६–उन्नतपुरपार्श्वग्रामस्थभटस्य दिव्यविमानदर्शनम्	१६४–१६९	८५७–८६०
१७–पञ्चपरमेष्ठिध्यानपूर्वकं श्रीहीरविजयसूरिस्वर्गगमन	१७१–००	८६१–०००
१८–स्मशानयात्रावर्णनम्	१७२–१७५	८६२–८६३
१९–अग्निसंस्कारविकारविधिः	१७६–१८२	८६४–८६७
२०–सूरिनिर्वाणप्रस्ताववर्णनम्	१८३–१८६	८६८–८६९
२१–अकब्बरस्य स्वप्नं दिव्यदर्शनं च	१८७–००	८७०–००
२२–नागरनैगमस्य दिव्यानुभवाः	१८८–१८९	८७१–८७२
२३–माकन्दस्याकालफलनं, तत्फलग्रहणं साहेः प्रेषणंमू च	१९०–१९१	८७२–८७३
२४–स्तूपकरणं, तन्माहात्म्यवर्णनं च	१९२–१९८	८७३–८७६
२५–साहिराजसभायां वादे विजयसेनसूरिविजयवर्णनम्	१९९–२००	८७६–८७७
२६–विजयसेनसूरेर्गुरुसमीपे गमनम्	२०१–००	८७९–००
२७–गुरोः स्वर्गगमनं श्रुत्वाविजयसेनसूरेः विलापः	२०१–२०७	८७८–८८२
२८–विजयसेनसूरेऽभ्युदयवर्णनम्	२०८–२०९	८८३–८८३
२९–तत्पट्टधरविजयदेवसूरेर्वर्णनम्	२१०–२१२	८८४–८८५
३०–ग्रन्थावसाने श्रीमत्पार्श्वमितिमङ्गलाभिधानपूर्वं आशीर्वचनम्	२१३–२१४	८८६–८८७
३१ सर्गसमाप्तिवर्णनम्	२१४–००	८८७–०००
३२ प्रशस्ति	१–२२	८८८–८९२

शुभं भवतु
भद्रं दिशः
कल्याणमस्तु

शुद्धिपत्रक

अशुद्ध	शुद्ध	पृष्ठ	श्लोक
अदिद्युतत्	अदीद्युतद्	४६३	५ (टीका)
श्लाघत स्म	श्लाघते स्म	४६६	१० (टीका)
ज्ञातिमि	ज्ञातम्	४६७	१२ (टीका)
स्वय	स्वयं	४६७	१३ (टीका)
अनगार	अनगार	४६८	१४ (टीका)
भजन्द्रुवं	अभजत भुवं	४६८	१५ (टीका)
मुखद्वदनाग्द्गह	वदनाद्गरं	४७०	२० (टीका)
यद्थं	यदर्थं	४७१	२१ (टीका)
कामपिया	कामपिता	४७१	२१ (टीका)
महांसांहसं	महांहसां	४७२	२३ (मूल)
क्षेत्रोम्भूतां	क्षेत्रोद्भूतां	४७२	२३ (टीका)
नरकोभ्दूतां	नरकोद्भूतां	४७२	२३ (टीका)
सग्दगमन	सद्गमन	४७२	२४ (टीका)
गेरात्	गोचरात्	४७२	२४ (टीका)
मुम्दाव :	मुद्भाव :	५७८	३५ (,,)
ह्तधारणं	व्रतधारण	४७९	३७ (,,)
मरुग्दिरिं :	मरुदगिरि :	४८७	५४ (,,)
दुराकजनीय	दुराकेतनीय	४८८	५६ (,,)
गज इव	गजा इव	४८५	५७ (,,)
गवामवीशं	गवामधीशं	४५०	५५ (,,)
महेस्तेज	महस्तेज	४५०	५५ (,,)
हतेषा	एतेषां	४५०	५५ (,,)
मैत्यं	मैत्र्यं	४५०	५५ (,,)
पेपिवान्थ	पेपिवान्य	४५४	४५ (,,)
ज्ञानाणां	ज्ञानानां	४९५	६८ (टीका)
सम्दूताना	सद्भूतानां	४९६	७१ (,,)
फल्पितानात्य	कल्पितानल्प	४९६	७१ (,,)
महानुत्तजनः	महानुत्तमजनः	४९७	७३ (,,)
पात्यरे।	पात्पते	४९८	७४ (मूल)

अशुद्ध	शुद्ध	पृष्ठ	श्लोक संख्या
सन्नदा	सन्मुदा	५००	७८ (टीका))
कथ	अथ	५०७	९२ (टीका)
मामनुग्रह	मामनुगृह्य	५०८	९६ (टीका)
माद्यते	माधवौ	५१४	१०७ (टीका)
पुनर्पेन	पुनर्येन	५३३	५३३ (टीका)
पपौ	पपो	५३४	१४५ (टीका)
शम्कोति	शक्नोति	५४०	१५९ (टीका)
विद्यते	विधत्ते	५३३	१६५ (टीका)
गृपतेरकब्वरस्य	नृपतेरकब्बरस्य	५४४	१६६ (टीका)
आतिशायिन्न	अतिशायिनः	५४४	१६६ (टीका)
यस्त्राणि	शस्त्राणि	५४५	१६८ (टीका)
शशंप	शशंस	५४७	१७२ (टीका)
समुद्दता	समृद्धता	५५०	१७८ (टीका)
धाक्यं	वाक्यं	५५२	१८२ (टीका)
तुमुस्त्रं	तुमुखं	५५५	१८८ (टीका)
कोटि	कीट	५६३	२०२ (टीका)
ईति	इति	५७५	२२६ (डीका)
हनिण्य	हनिष्य	५७८	२३१ (मूल)
द्रमाणं	द्रुमाणां	५८५	२४३ (टीका)
सर्थथैव	सर्वथैव.	६०४	२७९ (,,)
इब	इव	६०६	२८३ (,,)
प्रव्रानयामास	प्रव्राजयामास	६१३	२९६ (,,)
त्रिताते	त्रितोतै :	६३७	२६ (,,)
नाष्टिमन्तो	वृष्टिमन्तो	६४४	३७ (र,)
सत्र	सत्रा	६४५	३९ (,,)
पानसे	मानसे	६५१	४९ (,,)
कूटंशिचरं	कूटंशिखरं	६५६	५७ (,,)
मात्माना	मात्मना	६६८	७७ (मूल)
ध्ययातां	ध्यायातां	६६८	७९ (,,)
पज्ञाप्ति	प्रज्ञप्ति	६६९	७५ (टीका)
तराजापुकैः	पराभावुकैः	६७६	४ (मूल)
पद्मनां	सद्मनां	६७३	४ (,,)
सष	जुष	६७३	४ (,,)
बसुते	वसते	६७३	४ (,,)
तम्नीलाम्	तत्तुलाम्	६७३	४ (,,)

अशुद्ध	शुद्ध	पृष्ठ	श्लोक संख्या
नचरी	नगरी	६७३	४ (,,)
अत्प्रेक्ष्यते	उत्प्रेक्ष्यते	६७४	५ (,,)
मूलाध्वन	मूलाध्वना	६७४	३ (मूल)
वधि	विधा	६७७	११ (मूल)
भ्राजिना	भ्राजिनी	६८१	१७ (,,)
क्रुद्व	क्रुद्ध	६८८	२७ (,,)
लक्षः	तक्ष	७७३	११ (,,)
हैनः	हेन्द्रः	७७३	११ (,,)
सच्चू	सर्त	८४१	१३५ (टीका)
सरयो	सूरयो	८८०	२०४ (टीका)
विलासितै	विलासितै	८८१	२०५ (मूल)

श्रीमद् देवविमलगणि-विरचितम्

હીરસૌભાગ્ય મહાકાવ્ય

स्वोपज्ञया व्याख्यया समलंकृतम्
गूर्जरभाषानुवाद-सुशोभितम्

तृतीय भागः

चतुर्दशः सर्गः।

अथ प्रदेशीव स केशिनामुना विधातुकामः सुकृतस्य संकथाम्।
इदं महीन्दुर्मुनिचन्द्रमब्रवीन्पुनन्तु पूज्या मम चित्रशालिकाम्॥ १॥

अथ साहिजातानामाशीर्वाददानानन्तरं स महीन्दुर्वसुधासुधांशुरकब्बरसाहिर्मुनिचन्द्र हीरविजयसूरिं प्रति इदमेतदग्रे वक्ष्यमाणमब्रवीद्बभाषे। किंभूतः सः। अमुना सूरिणा समं सुकृतस्य धर्मस्य संकथां वार्ताम्। धर्मगोष्ठीमित्यर्थः। विधातुंकामः कर्तुमिच्छन्। क इव। प्रदेशीव। यथा प्रदेशी नामा राजा केशिना श्रीपार्श्वनाथापत्यकेशिगणधरेण सार्धं धर्मसंकथां कर्तुकाम आसीत्। इदं किम्। हे पूज्या जगन्मान्या भगवन्तः, मम चित्रशालिकां पुनन्तु पवित्रीकुर्वन्तु॥

શ્લોકાર્થ

મુનિઓને વિષે ચન્દ્રસમાન શ્રીહીરવિજયસૂરિજીને અકબર બાદશાહે કહ્યું :— હે પૂજ્ય, જેમ પરદેશી રાજાએ કેશીગણધરની સાથે ધર્મગોષ્ઠી કરી હતી, તેમ આપ મારી સાથે ધર્મગોષ્ઠી કરવાને માટે મારી ચિત્રશાળાને પવિત્ર કરો ! ॥ ૧ ॥

ततः ककुद्मानिव भूमिमानसौ तमित्युदीर्य क्रमचर्ययाचरत् ।
सहामुना सूरिरपि व्यसीसृपद्बिडौजसा सूरिरिवामृतान्धसाम् ॥ २ ॥

ततः सूरेश्चित्रशालिकायामाकारणानन्तरं तं सूरिमिति पूर्वोक्तमाकारणलक्षणमुदीर्य कथयित्वा ककुद्मान्मत्तवृषभ इवासावकब्बरो भूमिमान क्षितिपतिः क्रमचर्यया चरणचङ्क्रमणेन अचल(र)त्पुरः प्रस्थितः । अपि पुनः सूरिर्गुरुरपि अमुना साहिना सह समं व्यसीसृपद्विसर्पति स्म जगाम । क इव । सूरिरिव । यथा अमृतान्धसां सुधाशनानां देवानामाचार्यः उपलक्षणादिन्द्रस्यापि । यदुक्तं नैषधे—'ईदृशीं गिरमुदीर्य बिडौजा जोषमासनविशिष्य बभाषे । नात्र चित्रमभिधाकुशलत्वे शैशवावधिगुरुर्गुरुरस्य ॥' इति बृहस्पतेरिन्द्रस्याचार्यत्वम् । सूरिः कलाचार्यो वाचस्पतिर्बिडौजसा शक्रेण समं कार्यवशात्प्रचलति ॥

શ્લોકાર્થ

તેમ કહીને પૃથ્વીને વિષે વૃષભ સમાન અકબર બાદશાહ આગળ વધ્યા, જેમ ઇન્દ્રની સાથે ગુરુ બૃહસ્પતિ જાય તેમ સૂરિજી પણ બાદશાહની સાથે ચાલ્યા. ॥ ૨ ॥

धरातुराषाट् शमिनां शशी पुनः पथि प्रयान्तौ श्रयतः परां श्रियम् ।
कथंचिदुर्व्यामिव केलिशालिनौ विभावरीवल्लभभानुमालिनौ ॥ ३ ॥

धरातुराषाट् भूमीन्द्रः । 'धरातुरासाहि मदर्थयाच्ञा कार्या न कार्यान्तरचुम्बि चित्त' इति नैषधे । पुनः शमिनां शशी साधूनां सुधाकरः सूरिः । द्वावपि पथि चित्रशालिका वर्त्मनि प्रयान्तौ गच्छन्तौ सन्तौ परां प्रकृष्टां श्रियं शोभां श्रयतो लभेते । उत्प्रेक्ष्यते— कथंचित्केनापि कुतूहलादिना प्रकारेण एकत्र मिलित्वा उर्व्यां भूमण्डले केलिभिः क्रीडाभिः शालते शोभते इत्येवंशीलौ विभावरीवल्लभभानुमालिनौ चन्द्रसूर्याविव । तस्मिन् समये सूरिदर्शनादतीव शान्तीभूतः साहिश्चन्द्रतुल्यः, सूरिस्तु पुण्यप्रतापात्तदधिकं दीप्यमानत्वात्सूर्यानूपमो दृश्यते ॥

શ્લોકાર્થ

માર્ગમાં ચાલતા ભૂમીન્દ્ર (રાજા) અને મુનીન્દ્ર અત્યંત શોભતા હતા, જાણે, કોઈક કૌતુકથી પ્રેરાઈને પૃથ્વી ઉપર આવેલા ચંદ્ર અને સૂર્ય ન હોય ! ॥ ३ ॥

विभुज्य कण्ठं क्षितिपाकशासननो दृशं दिदेश द्विरदद्विषन्निव ।
तथा स्थितानेष गवेषयंस्ततोऽनगारपारीन्द्रमुनीनजूहवत् ॥४ ॥

क्षितिपाकशासनो धात्रीसुत्रामा साहिः कण्ठं ग्रीवां विभुज्य वक्रीकृत्य पश्चाद्वाल-यित्वा दृष्टिं दृशं दिदेश दत्तवान् । क इव । द्विरदद्विषन्निव । यथा दन्तिनां प्रतिपक्षः सिंहः कण्ठं विभुज्य दृशं दत्ते । केसरी अग्रे गच्छन् पश्चाद्विलोकयतीति तत्स्वभाव एव । 'गिरा विभुग्नारि विभुज्य कण्ठम्' इति नैषधे । ततोऽग्रे कियद्दागत्य पश्चात् दृष्टिदानान्तरमेष साहिरनगारपारीन्द्रस्य साधुसिन्धुरारातेः सूरेः । अथ वा अनगारेषु मुनिषु पारीन्द्राः दुर्वादिवारणविश्रासकत्वेन कण्ठीरवाः । अथ वा यतिसु मुख्याः । 'स्युरुत्तरपदे व्याघ्रपुं-गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थगोचराः ॥' इति हैम्यामुक्तत्वात् । तादृशान् मुनीन् श्रमणानजूहवदाकारयामास । एष किं कुर्वन् । यत्र सूरिणा सार्धं । मिलितास्तत्रैव स्थितांस्तिष्ठतः अथ वा तत्रैवाधीभूय स्थितिं कुर्वतो गवेषयन्पश्यन् ॥

શ્લોકાર્થ

ચાલતા ચાલતા રાજાએ સિંહની જેમ પાછું વાળીને જોયું ! ત્યાં નીચે રહેલા મુનિપુંગવોને જોતાં બાદશાહે પોતાની પાસે બોલાવ્યા ॥ ४ ॥

सुरैरिवेन्द्रः कलभैरिव द्विपो ग्रहैरिवार्कश्च शशीव तारकैः ।
अदीद्युतद्वर्त्मनि सूरिवासवोऽनुगम्यमानो मुनिपुंगवैस्ततः ॥ ५ ॥

ततस्तेषां साहिनाकारणानन्तरं मुनिपुंगवैर्वाचंयमवृषभैरनुगम्यमानो वर्त्मनि तस्मि-न्नेव चित्रशालिकाध्वनि सूरिवासवः अदीधितद् । क इव । सुरैर्वृन्दारकैः इन्द्रः पुरंदर इव । पुनः क इव । कलभैः त्रिंशद्वर्षीयस्त वेरमैर्द्विपः षष्टिहायनयूथनाथ इव गजेन्द्र इव । पुनः क इव । ग्रहैर्मङ्गलादिभिरर्को भास्वानिव ग्रहपतित्वात् । ' ग्रहाक्जिनीगोद्युपति-

कर्तनः' इति हैम्याम् । तथा जीवाभिगमसूत्रवृत्तौ—'यावान् चन्द्रपरिवारस्तावान् सूर्यस्यापि परिवारः । परमतितेजस्त्वाद्भास्वत्पार्श्वे न च दृश्यते ।' पुनः क इव । तारकैर्ज्योतिर्भिः शशी चन्द्र इव अनुगम्यमानो दीप्यते ॥

श्लोकार्थ

देवोनी साथे ઇन्द्र, બાલહस्तिઓની સાથે ગજેન્દ્ર, ગ્રહોની સાથે સૂર્ય અને તારાઓની સાથે જેમ ચન્દ્ર શોભે તેમ મુનિપુંગવોની સાથે ચાલતા શ્રીહીરવિજયસૂરિજી શોભતા હતા ॥ ૫ ॥

अथाधिरुह्योर्ध्वधरां स किंचनात्मना न्यगादीत्पृथिवीपुरंदरः ।
दुलीचकारव्यास्तरणं व्रतीश्वराः पुनन्तु भूपीठमिव क्रमाम्बुजैः ॥ ६ ॥

अथ साधूनां सूरिसंनिधापाह्वानानन्तरमात्मना स्वेन किंचन स्तोकमात्रां सोपानत्रय-*मयीमुच्चैरूर्ध्वधरां सोपानत्रिकेणैव कृत्वा उच्चैर्भूमीमधिरुह्य अध्यास्याश्रित्य वा स* पृथिवीपुरंदरो भूपो न्यगादीद्बभाषे । तदेवाह—हे व्रतीश्वराः सूरयः, राज्ञामुपवेशनोचितं विचित्रचित्ररचनाचक्षुरमणीयं लोकप्रसिद्ध्या दुलीचा इत्याख्या नाम यस्य । स्वार्थे कः । दुलीचकाख्यप्रस्मत्सभागमनागमनभूमेः आस्तरणमाच्छादनं क्रमाम्बुजैर्निजचरणकमलन्यासैः पुनन्तु पवित्रीकुर्वन्तु । किमिव । भूपीठमिव । यथा क्षोणीमण्डलं स्वपादपद्मैः पवित्र्येते ॥

શ્લોકાર્થ

કંઈક ઊંચે ચિત્રશાલાની નજીક જઈને કહ્યું :–હે પૂજ્યો, આ બિછાવેલા ગાલીચાને પૃથ્વીમંડળની જેમ આપનાં ચરણકમલ વડે પવિત્ર કરો ! ॥ ૬ ॥

गुरुर्जगादेति कदापि कीटिका भवेदधोऽस्मिन्न पदं दधे ततः ।
नृपोऽभ्यधादत्र न कश्चनाप्सुमाभत्वेसुराणामिव मन्दिरे नरः ॥ ७ ॥

गुरुः सूरिरित्यग्रे वक्ष्यमाणं जगाद वदति स्म । इति किम् । हे साहे, अधो दुली-चकस्याधस्तात् भूप्रदेशे कदाचिदपि दैवयोगात्कीटिकापि चरन्ति तिष्ठन्ति वा भवेत् । ततो जन्तुजातपालनादिहेतोरहमस्मिन्दुलीचके एतावता दुलीचकास्तरणोपरि कदापि

कस्मिन्नपि प्रस्तावे पदं चरणं न दधे न मुञ्चामि । चक्षुरदृष्टभूमौ कथमपि क्रमं न निक्षिपामीत्यर्थः । ततः सूरिकथनानन्तरं साहिरभ्यधाद्वक्ति स्म । हे सूरयः, अत्र मच्चित्रशालिकायां दुलीचकाच्छादितायां च भूमौ कदापि कस्मिन्नपि समये वर्षाग्रीष्मादावपि कश्चन कोऽपि कीटकादिरसुमान् जीवो न भवेत् नैव स्यात् । क इव । यथा सुराणां मन्दिरे देवगृहे स्वर्गे भूचरो नरो मनुजो न स्यात् ॥

શ્લોકાર્થ

ત્યાર પછી ગુરુમહારાજે કહ્યું : હે રાજન્, આની નીચે કીડી આદિ ક્ષુદ્ર જંતુઓનો સંભવ હોય તેથી અમો તેના ઉપર પગ મૂકી શકીએ નહીં. ત્યારે રાજાએ કહ્યું : સૂરિજી, જેમ સ્વર્ગમાં મનુષ્યનો સંચાર ન હોય તેમ મારી આ ચિત્રશાલામાં કોઈ પણ જીવોનો સંભવ હોઈ શકે નહીં. ॥ ૭ ॥

गुरुर्जगावाचरणं तथाप्यदः पदं निभाल्यैव ददे परत्र नो ।
यतः स्वकीयाचरणं मुमुक्षुणा प्रयत्नतो रक्ष्यममर्त्यरत्नवत् ॥ ८ ॥

गुरुः सूरिः पुनर्जगौ जल्पति स्म—हे साहे, यद्यपि श्रीमच्चित्रशालिकायां रचनाचारिमदुलीचकस्य अध उपरि वा सर्वथापि कीटिकादिजन्तुर्न स्यात्, तथापि जीवाभावे सत्यपि ममाद एतदाचरणमाचारो वर्तते यदहं निभाल्य अग्रेतनां युगप्रमाणां भूमिकां नेत्राभ्यां विलोक्यैव पदं ददे स्थापयामि, न परत्र चक्षुरनवेक्षिते स्थाने सर्वथापि क्रमं न मुञ्चामि । 'दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं पिबेज्जलम् । सत्यपूतं वदेद्वाक्यं मनःपूतं समाचरेत् ॥' इति नीतिशास्त्रेऽपि । हे साहे, यतः कारणान्मुमुक्षुणा संसारकारागारात्स्वं मोचयितुमिच्छता यतिना स्वकीयाचरणं निजस्याचारः प्रयत्नतः प्रमादनिद्राकषायादीनां निराकरणाद्रक्ष्यं सम्यक्परिपालनीयम् । किंवत् । अमर्त्यरत्नवत् । यथा संतुष्टेन केनचिद्देवेन दत्तं चिन्तामणिं सम्यक्प्रयत्नेन कृत्वा रक्ष्यते ॥

શ્લોકાર્થ

આચાર્ય મહારાજે કહ્યું : રાજન્, યદ્યપિ ચિત્રશાલાના આ ગાલીચા નીચે જીવજંતુ ના હોય તો પણ અમારે જોઈને જ પગ મૂકવો જોઈએ. મુમુક્ષુ એવા સાધુપુરુષોએ ચિંતામણિ રત્નની જેમ પોતાની આચાર મર્યાદાનું સર્વથા રક્ષણ કરવું જ જોઈએ ॥ ૮ ॥

ततः स यावत्कुरुते तदुच्चकैर्बभूव तावत्प्रकटैव कीटिका ।
व्रतिप्रभोरप्रतिमां कृपालुतां पुरः क्षितीन्दोर्गदितुं किमात्मना ॥ ९ ॥

ततो गुरुगदितानन्तरं सोऽकब्बरो यावद्गुलीचकं करे गृहीत्वा पश्चादुच्चकैः करोति ऊर्ध्वमुत्पाटयति, तावत्तत्र प्रदेशे कीटिकैव प्रकटा साहिलोचनगोचरा बभूव संजाता नृपेण स्वदृष्टया दृष्टा। उत्प्रेक्ष्यते—क्षितीन्द्रोः पुरो राज्ञोऽग्रे व्रतिप्रभोः सूरेः अप्रतिमामसाधारणां कृपालुतां दयावत्तामात्मनैव स्वेन गदितुं कथयितुमिव प्रकटीकर्तुमिव ॥

श्लोकार्थ

त्यार पछी राजाए स्वयं गालीचाने ऊंचो करीने जोयुं तो असंख्य कीडीओ नजरे पडी. ते जाणे राजानी आगळ आचार्य महाराजनी निःसीम कृपालुताने कहेवा माटे आवी न होय ॥ ९ ॥

ततः क्षितौ स्वस्य यथैकभूपतां गुरोस्तथाद्वैतदयाधिनाथताम् ।
अवेत्य चित्तेऽतिचमत्कृतिं वहन्मुहुर्मुहुस्तं प्रशशंस भूमिमान् ॥ १० ॥

ततः कीटिकादर्शनानन्तरं स भूमिमानकब्बरसाहिर्मुहुर्मुहुर्वारंवारं तं सूरीन्द्रं प्रशशंस श्लाघते स्म। किं कुर्वन्। चित्ते मनस्यतिचमत्कृतिमतिशयेनाश्चर्यं वहन् दधत्। किं कृत्वा। क्षितौ क्षितिमण्डले स्वस्यात्मनो यथा येन प्रकारेण अन्यराजसु तादृक्स्फूर्तिमाहात्म्याद्यभावात् स्वस्यैव तदद्वैतत्वेन एकभूपतामद्वैतपातिसाहितां तथा तेन प्रकारेण गुरोरद्वैतामनन्यसामान्यां दयायाः कृपाया अधिनाथतां स्वामित्वम्। कृपालुतामित्यर्थः। चित्ते स्वमानसे अवेत्य ज्ञात्वा। चित्ते इत्युभयत्रापि योजनीयम् ॥

श्लोकार्थ

जगतमां जेम पोते एकछत्री साम्राज्यनो स्वामी छे तेम आचार्य महाराजने असाधारण दयाना स्वामी जाणीने मनमां आश्चर्य पामतो राजा वारंवार सूरिजीनी प्रशंसाने करतो हतो. ॥ १० ॥

कृपालुतां वः किमहो महीयसीमुत स्तुवे स्वाचरणप्रवीणताम् ।
पयोदवत्किं तु परोपकारितां निरूपकं वा भवतां शुचेः पथः ॥ ११ ॥

अहो सूरयः, अहं वो युष्माकं महीयसीमतिगुर्वी विश्वप्रशस्यां कृपालुतां सर्वजगज्जन्तुषु कृपावत्तां किमिति प्रश्ने स्तुवे श्लाघाविषयं नयामि। उताथ वा वो युष्माकं स्वाचरणे निजाचारविधिमार्गपालने प्रवीणतां नैपुण्यं सुशिक्षिततां किं स्तुवे प्रशंसामि। पुनरहं पयोदवद्वार्षिकघनाघन इव परोपकारितां परेषां निःशेषालघुलघुप्राणिनामुपकर्तृत्वं स्तुवे कथयामि। वाथ वा भवतां शुचेः पवित्रस्य विशुद्धस्य वा पथो मार्गस्य सद्धर्माचरणस्य वा निरूपकमुपदेष्टारं कथयितारं वा स्तुवे स्तुतिविषयीकरोमि। कं कं स्तुवे श्लाघे, सर्वमपि प्रशंसापरमास्पदमिति ॥

શ્લોકાર્થ

અહો ! સૂરિજી હું આપની વિશ્વશ્લાઘનીય કૃપાલુતા, પોતાના આચારની નિપુણતા, મેઘ જેવી પરોપકારિતા અથવા સન્માર્ગદેશકતા આદિ સદ્ગુણોની શું શું સ્તુતિ કરું ! ॥ ૧૧ ॥

जगत्यसाधारणता व्यतर्कि वः क्षणादनेनाचरणेन शासने ।
सुधाभुजां भूमिरुहीव कामितप्रदातृभावेन मुमुक्षुपुंगवाः ॥ १२ ॥

हे मुमुक्षुपुंगवाः सूरीश्वराः, अनेन समग्रजगज्जन्तुजातपालनलक्षणेन आचरणेन सदाचरणविधानेन कृत्वा क्षणादल्पकालात्तत्कालमेव मया वो युष्माकं शासने जैनदर्शने जगति विश्वे असाधारणता सर्वेभ्योऽद्वैतता एतावता पञ्चभ्यो दर्शनेभ्यो युष्माकं जैनशासनमसाधारणमेवेति व्यतर्कि मया विचारितम् । ज्ञातिमित्यर्थः । कस्मिन्निव । भूमिरुहीव । यथा कामितानामैहिकाशेषमनोभिलषितानां प्रकर्षेण दातृभावेन दायकत्वेन सुधाभुजाममृताशानानां पादपे असाधारणता वितर्क्यते, एतावता यथा सर्ववृक्षजातिभ्यः कल्पद्रुमा विशेषास्तथान्यशासनेभ्यः श्रीमच्छासनमिति ॥ इति सूरीन्द्रकृपालुताजैनशासनयोः प्रशंसा ॥

શ્લોકાર્થ

હે સૂરીન્દ્ર, સર્વવૃક્ષની જાતિમાં ઇષ્ટફલની પૂર્તિ વડે જેમ કલ્પવૃક્ષની અસાધારણતા છે તેમ આપના સત્ આચરણ વડે જગતમાં જૈનશાસનની અદ્વિતીયતા છે. ॥ ૧૨ ॥

कथीपकस्यास्तरणं ततः करद्वयेन दूरीकृतवान्स्वयं नृपः ।
मुनीन्द्रसङ्गादिव पापमात्मनः प्रभुः पुनाति स्म पुनः स तां क्षितिम् ॥ १३ ॥

ततः प्रभुकृपालुतावगमनप्रणीतप्रशंसानन्तरं नृपोऽकब्बरः स्वयं तत्रान्यसेवकाभावादात्मनैव करद्वयेन पाणिपद्मद्वन्द्वेन कथीपक इति नाम्नः परदेशोत्पन्नजातिविशेषपट्टसूत्रमयवस्त्रस्यास्तरणं दुलीचकापराभिधानं दूरीकृतवानपसारयति स्म । पश्चात्कृत इत्यर्थः । पृथक्चक्रे । उत्प्रेक्ष्यते—मुनीन्द्रस्य हीरसूरेः सङ्गादात्मनः स्वस्य पापमिव दूरीचकार । तस्य दूरीकरणात्प्रभुः सूरिस्तामास्तरणरहितां क्षितिं पुनाति स्म पवित्रयामासिवान् । उर्वंधरामारुरोहेत्यर्थः । चित्रशालिकात्रिसोपानभूमौ चढित इत्यर्थः ॥

સૂરીશ્વરજીના સંગથી પોતાના પાપને જાણે દૂર કર્યાં ન હોય તેમ રાજાએ સ્વયં પોતાના હાથે જ ગાલીચાને દૂર કર્યો ! ત્યાર પછી આચાર્યમહારાજે તે સોપાનભૂમિ પર પદાર્પણ કર્યું. ॥ ૧૩ ॥

धरेशधामाधरिताद्रिसूदनोपदीकृतास्थामिव चित्रशालिकाम् ।
विभूषयांचक्रतुरुर्वरावरानगाररात्रीरमणौ क्रमेण तौ ॥ १४ ॥

उर्वरायाः सर्वसस्याया भूमेः वरः स्वामी धनधान्यमणिप्रसवित्र्या धरित्र्याः पतिः । यदुक्तम्—'शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् । सुवर्णपुष्पां पृथिवीं चिन्वन्तु पुरुषास्त्रयः ॥' इति । तथा रघुवंशेऽपि—'क्षितिरिन्दुमतीच भामिनी पतिमासाद्य तमग्र्यपौरुषम् । प्रथमा बहुरत्नसूरभूदपरा वारमजीजनत्सुतम् ॥' इति । तथा अनगाररात्रीरमणः श्रमणचन्द्रः सूरिस्तौ क्रमेण चित्रशालिकां विभूषयांचक्रतुः अलंकुर्वाते स्म । उत्प्रेक्ष्यते-धरेशेन भूमिपतिना धाम्ना तेजसा बलेन वा अधरीकृतेन हीनीकृतेन । अभिभूयेति शेषः । अद्रिसूदनेन मघोना उपदीकृतां ढौकितामास्थां स्वीयां सौधर्मी सभामिव ॥

શ્લોકાર્થ

રાજાના તેજથી પરાભવ પામેલા ઇન્દ્રએ ભેટણારૂપે કરેલી જાણે સુધર્માસભા ન હોય તેવી ચિત્રશાલાને રાજા અને સૂરીશ્વરે પદાર્પણ વડે અલંકૃત કરી. ॥ ૧૪ ॥

अवग्रहं प्राप्य महीहिमांशोर्निषेदुषस्तत्र यतिक्षितिक्षितः ।
जलालदीनोऽपि पुरोऽभजद्भुवं सुहस्तिनः संप्रतिभूगभस्तिवत् ॥ १५ ॥

जलालदीनो यवनमुग्दलप्रसिद्धमिदं विशेषनाम साहिरपि यतिक्षितिक्षितः सूरिराजस्य । 'महीक्षित्पार्थिवो मूर्धाभिषिक्तो भूप्रजानृपः' इति हैम्याम् । पुरोऽग्रेतनां भुवं क्षोणीं अभजत् बभाज । भूमावेवोपविष्टो नासने । सूरेः किं चक्रुषः किंलक्षणस्य वा । निषेदुषः उपविष्टस्य । किं कृत्वा । महीहिमत्विषो भूमीसोमस्य अवग्रहमुपवेशनार्थमादेशं प्राप्याधिगत्य । किंवत् । संप्रतिभूगभस्तिवत् । यथा संप्रतेरनुज्ञामवाप्य निषण्णस्य सुहस्तिसूरेः पुरस्तात्संप्रतिनामा भूगभस्तिर्भूमीभास्वान् उपविशति स्म । 'मध्यंदिनावधि विधेर्वसुधाधिवस्वान्' इति नैषधे ॥ इति चित्रशालिकायामागत्य सूरिनृपावुपविष्टौ ॥

अथ धर्मकथारम्भः—

શ્લોકાર્થ

સમ્રાટ સંપ્રતિની અનુજ્ઞા પામીને બેઠેલા આર્યસુહસ્તિસૂરિજીની સામે જેમ રાજા સંપ્રતિ બેઠા હતા તેમ બાદશાહની અનુજ્ઞા પામીને બેઠેલા શ્રીહીરવિજયસૂરિજીની સામે જમીન ઉપર અકબર બાદશાહ બેઠા. ॥ ૧૫ ॥

स धर्मकिर्मीरितसंकथास्तथो मिथः प्रवृत्तासु तमित्यचीकथत् ।
धराविधो बीजमिवावनीरुहां वृषोऽस्त्युपादानमशेषसंपदाम् ॥ १६ ॥

अथो चित्रशालायां द्वयोरुपवेशानन्तरं स सूरिस्तमकब्बरसाहिमित्यमुना प्रकारेणाचीकथत कथयति स्म। कासु सतीषु। धर्मेण पुण्यप्रकाशनेन किर्मीरितासु मिश्रासु संकथासु वार्तासु मिथः सूरिभूपयोः परस्परं प्रवृत्तासु प्रारब्धासु। इति किम्। हे धराविधो पृथिव्या निष्कलङ्क चन्द्र हे साहे, अशेषाणां सर्वासामपि संपदां लक्ष्मीणामुपादानं मूलकारणं वृषो धर्म एवास्ते विद्यते। किमिव। बीजमिव। यथा अवनीरुहाणां वृक्षाणामुपादानं तत्तज्जातिजं बीजं योनेर्निबन्धनम्॥

શ્લોકાર્થ

બાદશાહની સાથે પરસ્પર ધર્મગોષ્ઠીને કરતા આચાર્યમહારાજે કહ્યું: હે રાજેન્દ્ર, જેમ વૃક્ષોનું ઉપાદાનકારણ બીજ છે તેમ સર્વસંપત્તિનું ઉપાદાનકારણ ધર્મ જ છે. ॥ ૧૬ ॥

अनक्षिलक्ष्यापि यथानुमीयते पयोदवृष्टिस्तटिनीपयःप्लवैः।
विचक्षणैश्चेतसि तर्क्यते तथा विभूतिभिः प्राक्सुकृतं पचेलिमम्॥ १७॥

हे साहे, यथा येन प्रकारेण तटिन्या नद्या पयःप्लवैः पानीयपूरैः। आगतैरित्यध्याहारः। अनक्षिलक्ष्या लक्षितुं द्रष्टुं योग्या लक्ष्या। 'लक्ष दर्शनाङ्कनयोः' इत्यस्य धातोः प्रयोगः। अक्ष्णोर्लक्ष्या अक्षिलक्ष्या, न अक्षिलक्ष्या अनक्षिलक्ष्या अदृग्गोचरा। अदृष्टापीत्यर्थः। पयोदानां घनानां वृष्टिर्विचक्षणैर्निपुणैरनुमीयते अनुमानविषयीक्रियते, तथा तेनैव प्रकारेण पण्डितैर्विभूतिभिर्विभवैः कृत्वा अदृष्टिविषयीकृतमपि पचेलिमं परिपाकं प्राप्योदयमागतं प्राक्सुकृतं पूर्वजन्मोपार्जितं पुण्यं तर्क्यते विचार्यते विज्ञायते वा॥

શ્લોકાર્થ

જેમ નદીના પૂર વડે અદૃશ્ય એવી પણ મેઘવૃષ્ટિનું અનુમાન કરાય છે તેમ પંડિત પુરુષો વડે વૈભવના દર્શનથી પૂર્વજન્મોપાર્જિત પુણ્યની પરિપક્વતાનું અનુમાન કરાય છે. ॥ ૧૭ ॥

अमर्त्यभोगाम्बुधिशंबरीयतां धरेश धर्मेण विना जनुष्मताम्।
अपार्थतामुद्वहते परं जनुर्विना फलौघैरवकेशिनामिव॥ १८॥

हे धरेश क्षितिपते, धर्मेण सुकृताचरणेन विना जनुष्मतां प्राणिनां परं केवलं जनुर्जन्म अपार्थतां निरर्थकत्वम् अपगतोऽर्थः धर्मप्रयोजनं यस्य। यदुक्तम्—'जे जिणधम्मबाहिरा ते जाणे याचारि। उग्या उरहिंप्पयगया संसारिया संसारि॥' इति। तस्य भावस्तत्ताम्। 'अर्थो हेतौ प्रयोजने। निवृत्तौ विषये वाच्ये प्रकारे द्रव्यवस्तुषु॥' इत्यनेकार्थः। परोद्वहते

बिभर्ति । तथा 'यस्य युधिष्ठिर इव न क्वचिदपार्थो वचनक्रमः' इति चम्पूकथायाम् । अनुष्मतां किमाचरताम् । अभङ्गा अनवच्छिन्नाः सततप्रवृत्ता ये भोगा विभववनिताराज्यादिसुखास्वादास्त एवाम्बुधिः समुद्रः तत्र शंबरीयतां मीनानामिवाचरताम् । 'शंबरो दानवान्तरे । मत्स्यैणगिरिभेदेषु' इत्यनेकार्थः । तथा 'शंबरोऽनिमिषस्तिमिः । मत्स्योऽथमीनः' इति हैम्याम् ॥

શ્લોકાર્થ

હે રાજન્, સતત ભોગરૂપી સમુદ્રમાં મીનરૂપે બનેલા (આસક્ત) ધર્મવિહોણા જીવોનું જીવન કેશુડાનાં પુષ્પોની જેમ નિરર્થક છે. ॥ ૧૮ ॥

कुरङ्गनाभीमपहाय भूषितुं स्ववर्ष्म गृह्णाति निषद्वरं करे ।
निकृत्य गेहोपवने प्ररोपितं सिताभ्रसालं वपतेऽर्कपादपम् ॥ १९ ॥

अपास्य पीयूषरसं जिजीविषुर्मुखादहीन्दोः स्वदते गरं पुनः ।
विमुच्य धर्मं नृप सार्वकामिकं विमुग्धधीर्यो विषयेऽनुरज्यते ॥ २० ॥

हे नृप, सर्वानैहिकामुष्मिकान् कामानभिलाषान् करोति पूरयतीति सार्वकामिकस्तम् । 'ऋतुं विधते यदि सार्वकामिकम्' इति नैषधे । तादृशं धर्मं विमुच्य त्यक्त्वा यो विशेषेण मुग्धा कृपा कृत्येष्वनभिज्ञा कार्याकार्यविचारविकला धीर्बुद्धिर्यस्यासाधज्ञानो विषये भोगसुखादावनुरज्यते अनुरक्तीभवति, स पुमान् कुरङ्गनाभीं कस्तूरिकाम् । मृगमदवाच्यपिनाभिशब्दो ह्रस्वो दीर्घोऽपि 'मृगनाभिर्मृगमदः' इत्यत्र हैम्यां ह्रस्वः । तथा 'गोरोचनाचन्दनकुङ्कुमैणनाभीविलेपात्पुनरुक्तयन्ती' इति नैषधे दीर्घोऽपि । अपहाय मुक्त्वा स्ववर्ष्म निजशरीरं मुखस्तनाद्यवयवं क्षौमधिकृत्य पुनरर्थे केवलं वपुरेव भूषितुं विलेपनादिना भाले तिलकादिना वा शोभां नेतुम् । यथा 'शोभन्ते स्थितिसौष्ठवेन कतिचित्कस्तूरिकाम्,' 'नेपालक्षितिपालभालफलके पङ्कं न शङ्केत कः' इति सूक्तपदद्वयी । निषद्वरं पङ्कं कचवरकं करे हस्ते गृण्हाति । पुनः गेहस्य स्वमन्दिरस्योपवने समीपवाटिकायां गृहारामे वा प्ररोपितं स्वयं पृथक् मनोरथैरुप्तं सिताभसालं कर्पूरपादपम् । 'छित्त्वा कर्पूरखण्डान्वृतिमिह कुरुते कोद्रवाणां समन्तात्' इति सिन्दूरप्रकरे । निकृत्य छित्त्वा । 'कृती छेदने' अय' धातुः । अर्कपादपम् 'आकडा' इति लोकप्रसिद्धं नामेति अर्कवृक्षम् । 'अर्काः किं फलसंचयेन भवतां किं वा प्रसूनैर्नवैः' इत्यपि सूक्तम् । वपते प्ररोपयति । वप्धातुरुभयपदी पुनः स पीयूषरसं तुष्टसुरदत्ताजरामरकृदमृतं संत्यज्य दूरे क्षिप्त्वा जीवितुमिच्छुर्जिजीविषुः सन् अहीन्दोः विषभासस्सहस्रभाजः शेषनागराजस्य । 'विषभारसहस्रेण वासुकिर्नैव गर्वितः । वृश्चिको विषमात्रेण स्वोर्ध्वं वहति कण्टकम् ॥' इति सूक्तम् । मुखाद्वदनाग्दरं गरलं स्वदते पिबति । 'संगरं गरमिवाकलयन्ति' इति नैषधे ॥ युग्मम् ॥

શ્લોકાર્થ

હે રાજન્, સર્વઇષ્ટની પૂર્તિ કરનારા ધર્મનો ત્યાગ કરીને જે કોઈ દુર્બુધિ વિષયોમાં ચકચૂર રહે છે તે ખરેખર શરીરની શોભા માટે આણેલી કસ્તૂરીનો ત્યાગ કરીને હાથમાં કચરાને ગ્રહણ કરે છે, પ્રાંગણમાં મનોરથોની સાથે રોપેલા કર્પૂરના વૃક્ષને ઉખેડીને આકડાના વૃક્ષનું રોપણ કરે છે અને જીવનનો અભિલાષી અમૃતરસનો ત્યાગ કરીને મહાભયંકર વિષધરના મુખથી વિષનું પાન કરે છે. ॥ १९ ॥ ॥ २० ॥

अनश्वरी श्रीर्युवता किमु ध्रुवा जरापि जीर्णा शमनः शशाम किम् ।
यदेष जन्तुर्विषयाभिलाषुको दधाति धर्मे न मनो मनागपि ॥ २१ ॥

हे नृप, श्रीर्लक्ष्मीरनश्वरी शाश्वती अस्थिरैव । यदुक्तम्—'सायरवप्पमुरारिपिय चन्दसरीसा भाय । लच्छी हीडइ घरि घरि महिला पह सहाय ॥' इति पुनर्युवता यौवनं ध्रुवा नित्या कदापि न यास्यति । 'यौवन जाइ वेगिनदीर्युजलहइ । इन्दुचन्दुनागिन्दु-कहो कुणथिररहर ॥' इत्युक्तः । पुनर्जरा विस्रसा यौवनवयोहानिलक्षणावस्था जीर्णा स्थविरीभूता स्थातुमुत्थातुमप्यशक्ता जाता किम् यज्जराशक्तभावान्नागमिष्यति । यदुक्तम्—'यौवनकेरेदीहडइ कीजइ मित्त दुच्चार । कालिज वडपण आवशइ को न विचार ॥' इति । पुनः शमनो यमः शशाम शान्तीभूतः । किंभूतः । यदथ कमपि न व्यापादयिष्यामि मृतो वा यत्कारणादेष जन्तुर्जीवो विषयानां कामभोगादिसुखानामभिलाषुकः कामयिपा कामुको लोलुपः सन् धर्मे सुकृताचरणे मनागीषन्मात्रमपि मनश्चित्तं न दधाति स्थापयति ॥

શ્લોકાર્થ

હે રાજન્, લક્ષ્મી શું સ્થિર છે! યૌવન શું નિત્ય છે! જરા શું જીર્ણ નથી! કે યમરાજ શું શાંત છે! જેથી વિષયાભિલાષીજીવ ધર્મમાં જરા પણ મન લગાવતો નથી! ॥ २१ ॥

प्रसृत्वरः शंबरवैरिविक्रमोऽचिरात्सृजेद्विक्रमिणोऽप्यविक्रमान् ।
उदीयतेऽस्मादपि राजयक्ष्मणा तमोभरेणेव तमस्विनीमुखात् ॥ २२ ॥

हे साहे, प्रसृत्वरः प्रसरणशीलः प्रवर्धमानः शंबरनामा दैत्यविशेषस्तस्य वैरी दस्युहन्ता स्मरस्तस्य विक्रमो वीर्यं प्रतापः स्मरी अपस्मारप्रसारः मदनोन्मादः अचिरादल्पकालादेव विक्रमिणोऽपि महाशक्तिमतोऽपि अविक्रमान् निर्वीर्यान् अबलान् सृजेत्

कुर्यात् अपि पुनरस्मान्मदातिरेकात् राजयक्ष्मणा क्षयरोगेण उदीयते प्रादुर्भूयते । केनेव । तमोभरणेव । यथा तमस्विनीमुखात्प्रदोषात्संध्यासमयादन्धकारेण स्फूर्यते ॥

શ્લોકાર્થ

હે રાજન, વધતા જતા કામના ઉન્માદથી મહાન શક્તિશાળી મહારથીઓને પણ અલ્પકાળમાં જ નિર્વીય બનાવી દે છે, અને સંધ્યા સમયથી જેમ અંધકાર ફેલાવો થાય છે તેમ શરીરમાં ક્ષયરોગ આદિ ભયંકર રોગોનો પ્રવેશ થાય છે. ॥ ૨૨ ॥

मनोभुवा मोहयमानमानसो महांसांहसंहतिमात्मनाचरन् ।
लभेत कश्चिन्नरकेषु कारणामिहैव शूलामिव पारिपन्थिकः ॥ २३ ॥

कश्चित्पापीयान् पुमान्नरकेषु कारणां सप्तस्वपि दुर्गतिषु परमाधार्मिकनिर्मितां क्षेत्रोद्भूतां महारोगशीतोष्णादिजनितां कासश्वासकठोदरादिकां तीव्रवेदनां लभेत प्राप्नुयात् । क इव । पारिपन्थिक इव । यथा परस्वापहर्ता तस्करो नरकेषु नारकित्वेन नरकोद्भूतां महतीं पीडां लभते । कामिव । शूलामिव । यथा इह लोके च शूलां मार्यमाणचौराधिरोपणतीक्ष्णतदादिकां महतीं व्यथां प्राप्नोति । जन्तुः किं कुर्वन् । मनोभुवा शत्रुभूतेन कामेन मोहयमानं मोहं मूर्छां सदसद्विवेचनचातुरीविकलतां नीयमानं मानसं मनो यस्य तादृशः सन्महांहसां प्रबलपापानां संहतिं श्रेणीमाचरन् । यदुक्तं नैषधे दमयन्त्याः पुरस्तात्— 'इधुना नलः पापभीरुरपि त्वत्प्रापकात्त्रस्यति नैनसोऽपि' इति ॥

શ્લોકાર્થ

કામના ઉદ્રેકથી મુંઝાયેલો પાપી જીવ પોતાના જીવનમાં અનેક પાપોને આચરતો આ લોકમાં પણ શૂળરોગ આદિ રોગો અને ચોરીની જેમ અનેક કષ્ટોને વેઠે છે અને પરલોકમાં નરકની ભયંકર યાતનાઓને ભોગવે છે. ॥ ૨૩ ॥

दुरन्तदुःखाद्विषयात्तु बिभ्यता विमुक्तसङ्गेन कृपानुषङ्गिना ।
वशेत्र सौभाग्यवता स्वकामुकीक्रियेत केनापि मरुद्गृहेन्दिरा ॥ २४ ॥

तु पुनः केनापि धार्मिकेण पुंसा मरुद्गृहेन्दिरा स्वर्गलोकलक्ष्मीः स्वकामुकी स्वस्मिन्निच्छा यस्याः स्वाभिलाषिणी । 'इच्छायुक्ता तु कामुका' । च्विप्रत्यये कामुकीक्रियते । अथ वा स्वस्यात्मनः कामुकी लालसाकलिता क्रियते । 'वृषस्यन्ती कामुकी स्यात्' इति हैम्याम् । केनेव । सौभाग्यवतेव । यथा 'सद्गमनसन्निरीक्षणसज्जल्पनमिति वदन्ति लावण्यम् । स्पृहणीयो रतिसुभगः स्पर्शगुणो भवति सौभाग्यम् ॥' इदं च द्वयमपि स्त्रीपुरुषयोः स्यात् । अत्र तु सुभगत्वभाजा वसुदेवेनेव सकलकामिनीजनकामेण वा पुरुषेण वशा वनिता

स्यकामुकीक्रियते । पुंसा किं कुर्वता । दुर्दुष्टोऽन्तोऽवसानं यस्य प्रान्ते कठिनः विपाको यस्य तादृशं दुःखं यस्यात्तद्विधाविषयाद्‌गोरात् शब्द-रूप-गन्ध-रस-स्पर्शलक्षणपञ्चसंख्यकाद् गुणाद्‌बिभ्यता संसारकारागारप्रपतनानन्तासातसहनादिमहाभीति बिभ्रता अत एव विगीतोऽपमानितो मुक्तः सङ्गः पुत्रकलत्रधनादिकः सकलसंसारिकानुषङ्गः संसारिकस्नेहो येन । पुनः किंभूतः । कृपानुषङ्गेन पृथ्वी-अप्-तेजो-वायु-वनस्पत्-त्रसरूपाणां षण्णां कायानां रक्षणलक्षणकरुणाकलितेन षट्कायगोकुलपालकेन समस्तयावज्जगच्चराचरजन्तुरक्षाक्षमेणेत्यर्थः ॥

શ્લોકાર્થ

જેનો અંત દુઃખરૂપ છે તેવા દુખાનુષંગી વિષયોથી દૂર રહેનારા, સર્વ સંગના ત્યાગી અને કરૂણાર્દ્ર હૃદયવાળા સજ્જન આત્માઓને સ્વર્ગલક્ષ્મી સૌભાગ્યવંતી સ્રીની જેમ આપોઆપ સ્વાધીન થાય છે. ॥ ૨૪ ॥

क्रमादुपक्रम्य समाधिना भवी भवं स मुञ्चन्भजते महोदयम् ।
स्वलोहतां सिद्धरसेन संत्यजन्सुवर्णतां धातुरिव प्रपद्यते ॥ २५ ॥

स विषयविमुखो भवी संसारी जीवः क्रमात्परिपाटीतः स्वर्गं गत्वा प्रशस्तमर्त्यजन्म संप्राप्य उपक्रम्य चारित्रादिविशिष्टधर्माचरणोपक्रमं कृत्वा समाधिना शुक्लध्यानयोगेन भवं संसारमुज्झन् मुञ्चन् सन् महोदयं मोक्षं निःसीमानमभ्युदयं भजते । संसारसागरं निस्तीर्य सिद्धो भवतीत्यर्थः । क इव । धातुरिव । यथा धातुर्लोहादिः सिद्धरसेन रसकूपिकादिपानीयविशेषेण स्वलोहतां कालायसभावं नीचधातुतां संत्यजन् मुञ्चन् सुवर्णतां प्रपद्यते ॥ इति धर्मदेशना ॥

શ્લોકાર્થ

જેમ સિદ્ધરસ વડે લોહધાતુ પોતાની લોહતાનો ત્યાગ કરીને સુવર્ણરૂપ બને છે તેમ વિષયપરાઙ્‌મુખી જીવ અનુક્રમે સ્વર્ગમાંથી આવી મનુષ્યભવ પ્રાપ્ત કરીને શુક્લધ્યાન વડે કર્મોને ભસ્મિભૂત કરી મોક્ષસુખનો ભોક્તા બને છે. ॥ ૨૫ ॥

अभाजि युष्माभिरिवानुगामिभिर्महीमहेन्द्रः परमेशिता स कः ।
अवद्यवन्ध्यां पदवीं प्ररूपयन्नुपासनामर्हति कीदृशो गुरुः ॥ २६ ॥

सुधाब्धिवद्यो ददतेऽमृतं पुनः स किंविधो धर्म इदं वदन्तु मे ।
महीमहेलादयितोदितामिमां गिरं निपीय प्रभुरप्यचीकथत् ॥ २७ ॥

इमां वृत्तापेक्षया पूर्वोक्तां मही भूमिरेव महेला कामिनी। 'यश्च परमहेलारतोऽप्य-पारदारिकः' इति चम्पूकथायाम्। तथा 'महिला स्यान्महेलया' इति शब्दप्रभेदे। तस्या दयितो भर्ता अकब्बरः तेनोदितां कथितां वाणीं निपीय सादरं श्रुत्वा प्रभुः सूरीन्द्रोऽप्य-चीकथत् वदति स्म। इमां काम्। हे सूरीन्द्राः, इदं मयैव निगद्यमानं पृच्छ्यमानं मे मम वदन्तु कथयन्तु। इदं किम्। यः परमेशिता परमेश्वरो युष्माभिः श्रीमद्भिरभाजि संसेव्यते स्म। कैरिव। अनुगामिभिरिव। यथा महीमहेन्द्रो नीतिमान् भूमान् सेवकैः सेव्यते। स कः परमेष्ठी किंनामा च पुनः किंगुणो गुरुरुपासनामर्हति सेवां कर्तुं योग्यो भवति सेवनीयः स्यात्। गुरुः किं कुर्वन्। अवद्येन पापेन वन्ध्याम्। 'अवद्यमुक्तेः पथि यः प्रवर्तते' इति सिन्दूरप्रकरे। सर्वथा पापनिर्मुक्तां पदवीं मार्गं प्ररूपयन्। गुरोर्गुरुरिति विशेषणमपि तत्त्वोपदेष्टा हिताहितनिरूपकः। च पुनः सुधाब्धिवत्क्षीरसमुद्र इव अमृतं सुधां मोक्षं च ददते विश्राणयति। अयं 'दद दाने' धातुरात्मनेपदी भ्वादिश्च। स धर्मः किंविधः कीदृक्प्रकारः॥ युग्मम्॥ इति साहेर्देवगुरून्प्रति देवगुरुधर्माणां प्रश्नः।

श्लोकार्थ

હે સૂરીન્દ્ર, જેમ સેવકોને સેવ્ય રાજા છે તેમ આપના ઉપાસ્ય પરમેશ્વર કોણ? નિષ્પાપ માર્ગના પ્રરૂપક ગુરુ કોણ? અને ક્ષીરસમુદ્રની જેમ નિરંતર સુધાને અર્પણ કરનાર આપનો ધર્મ કોણ? તે મને કહો. આ પ્રકારની પ્રજાપતિ અકબરની વાણીનું પાન કરીને ગુરુમહારાજે કહ્યું :— ॥ ૨૬ ॥ ॥ ૨૭ ॥

जगन्ति यस्यानुभवेऽनुबिम्बितामिवात्मदर्शे दधते धरापते।
जिगाय चाष्टादशदोषविद्विषो नवद्वयद्वीपभुवो जयीव यः॥ २८॥

तरङ्गिणीवेणिमिवाम्भसां प्रभुर्न चाङ्कपालीं नयते नितम्बिनीम्।
कचित्पुनर्यस्य न नर्मनर्मदाह्रदावगाहे द्विरदायितं हृदा॥ २९॥

बिभर्ति हेतीर्न तनूनपादिवाहितान्पुनर्यो न हिनस्ति हिंस्रवत्।
भवं भिनत्ति स्म करीव पञ्जरं दधाति देवः स नमस्क्रियार्हतीम्॥ ३०॥

हे धरापते, स दीव्यति क्रीडति त्रैलोक्यैश्वर्यलक्ष्म्या ब्रह्मश्रिया वा स देवः परमेश्वरो निखिलनरसुरासुराणामपि नायकः नमस्क्रियाया नमस्कृतेरार्हतीमौचितीं योग्यतां दधाति बिभर्ति। 'उडुपरिषदः किं नार्हन्ती निशः किमनौचिती' इति नैषधे। अत्र नुम्-विकल्पत्वेन रूपद्वयी आर्हन्ती आर्हती च। अर्हतो भाव आर्हती। 'अणूतृण ईप्' इतीप्प्र-त्ययः। इति सिद्धिरपि। स देवः प्रणामयोग्यः स्यात्। स कः। यस्य परमेशितुरनुभवे ज्ञाने जगन्ति त्रीणि-सप्त-चतुर्दश-एकविंशतिर्वा भुवनानि अनुबिम्बन्ति संक्रामन्तीत्ये-वंशीलानि अनुबिम्बीनि अनुबिम्बिनां भावोऽनुबिम्बितां प्रतिबिम्बशीलता दधते बिभ्रति।

कस्मिन्निव । आत्मदर्श इव । यथा निर्मलदर्पणमण्डले क्वापि भूधनधनिगृहचित्रशालिकादिभिरित्यादौ चित्रीकृतानि त्रीणि जगन्ति प्रतिफलन्ति । च पुनर्हे भूवल्लभ, यो देवो दानान्तराय—लाभान्तराय—वीर्यान्तराय—भोगान्तराय — उपभोगान्तराय — हास्यरति— अरति – भीति – जुगुप्सा – शोक– काम–मिथ्यात्व–अज्ञान–निद्रा–अविरति–राग–द्वेषनामानोऽष्टादशसंख्याका दोषा अपगुणास्त एव विद्विषो महावैरिणो जिगाय पराभूतवान् । क इव । जयीव । यथा परराजजित्वरो राजा नवसंख्याकानां द्वयं द्वन्द्वं नवद्वयं नवद्वयं च ते द्वीपाश्च नवद्वयद्वीपाः इति नैषधवृत्तिनरहरिकृतसमासः । तेषामष्टादशद्वीपानां भुवो भूमीप्रदेशान् जयति स्ववशीकुरुते । 'नवद्वयद्वीपपृथग्जयश्रियाम्' इति नैषधे । तथा 'अष्टादशद्वीपनिखातयूपः' इति रघौ । च पुनर्यः परमेष्ठी नितम्बिनीं कान्तामङ्कपालीमालिङ्गनं न नयते न प्रापयति । 'आलिङ्गनं परिष्वङ्गः संश्लेष उपगूहनम् । अङ्कपाली परीरम्भः' इति हैम्याम् । क इव । प्रभुरिव । यथा अम्भसां पानीयानां स्वामी समुद्रस्तरङ्गिणीवेणिं नदीप्रवाहं नदीपूरं नदीनां स्वपत्नीत्वेनाश्लेषणं नयते लम्भयति । पुनर्यस्य परमात्मनो हृदा हृदयेन क्वचित्कुत्रापि समये प्रदेशे वा रहसि वा प्रकटं वा नर्म क्रीडा तदेव नर्मदा मेकलाचलजाता नदी नर्मदानाम्नी तस्या हृदो द्रहस्तस्यावगाहे विलोडने जलकेलिविधौ वा न द्विरदायितं गजवदाचरितम् । प्रायो विन्ध्यपर्वतोत्पन्ना हस्तिनो विन्ध्योपकण्ठप्रवहन्नर्मदायामनिशं स्वैरं रमन्ते । यदुक्तम्—'कौपं वारि विलोक्य वारणपते किं विस्मितेनास्यते प्रायो भाजनमस्य संप्रति भवांस्तत्पीयतामादरात् । उन्मज्जच्छबरीपुलिन्दललनापीनस्तनास्फालनस्फालीभूतमहोर्मिनिर्मलजला दूरे धुनी नर्मदा ॥' इति गजाष्टके । पुनर्हे भूमण्डलाखण्डल, यो हेतीश्चापचक्रशूलगदाप्रमुखानि प्रहरणानि न बिभर्ति । क इव । तनूनपादिव । यथा 'वह्निहेतीर्ज्वाला धत्ते । 'हेतिः प्रहरणं शस्त्रम्,' तथा 'हेतिः कीलाशिखा ज्वाला' इति द्विकमपि हैम्याम् । पुनर्यः हिंस्रवत् घातुक इव अहितान्वैरिणो न हिनस्ति न घातयति । पुनर्यः भवं संसारं भिनत्ति भनक्ति । क इव । करीव । यथा हस्ती पञ्जरं काष्ठकोष्ठं भिनत्ति भेदयति । 'जयकोईमणकमेलभसलभयपंजरकुंजर' इत्यभयदेवसूरिकृतजयतिहुअणस्तोत्रे ॥ त्रिभिर्विशेषकम् ॥ इति देवस्वरूपम् ॥

શ્લોકાર્થ

હે પૃથ્વીપતિ, તે જ પરમાત્મા નમસ્કાર કરવાને યોગ્ય છે કે જેના જ્ઞાનમાં આરિસાની જેમ ત્રણે જગતના ચરાચર પદાર્થો પ્રતિબિંબરૂપે રહેલા છે અને જેમ રાજા અઢારદ્વીપ સુધીની પૃથ્વીને સ્વાધીન કરે છે તેમ દાનાંતરાય, લાભાંતરાય, ભોગાંતરાય, ઉપભોગાંતરાય, વીર્યાંતરાય, હાસ્ય, રતિ, અરતિ, ભય, શોક, જુગુપ્સા, કામ, મિથ્યાત્વ, અજ્ઞાન, અવિરતિ, નિદ્રા, રાગ અને દ્વેષરૂપ અઢાર અંતરંગ શત્રુઓનો જેણે નાશ કર્યો છે, તેમજ સમુદ્ર જેમ નદીઓના પ્રવાહને ઉત્સંગમાં ધારણ કરે છે તેમ જેણે સ્ત્રીઓને ઉત્સંગમાં સ્થાન આપ્યું નથી અને જેના હૃદયરૂપી નર્મદાના અગાધ જલમાં ક્રીડારૂપી હસ્તિઓનું સ્થાન નથી. વળી જેઓએ ખડગ, ભાલા, ચક્ર, ગદા આદિ તીક્ષ્ણ

શસ્ત્રોને ધારણ કર્યાં નથી અને કસાઈની જેમ કદીપણ કોઈ જીવની હિંસા કરતા નથી એવા પરમાત્માએ હસ્તિની જેમ સંસારરૂપી પિંજરાને છિન્નભિન્ન કરી નાખ્યું છે તે જ સાચા **આરાધ્યદેવ** છે. ॥ ૨૮ ॥ ॥ ૨૯ ॥ ॥ ૩૦ ॥

परिग्रहं यो जलमम्बुदाविलं मरालवन्मुञ्चति सद्म संसृतेः ।
प्रबोधशालीनिह यः प्ररोपयेत्कृपारसापूरितमानसावनौ ॥ ३१ ॥

प्रवर्तको यः सुगतेश्च दुर्गतेर्व्यनक्ति मार्गौ रविवच्छुभाशुभौ ।
भवात्तरन्स्वेन परांश्च तारयंस्तरीव वार्धौ गुरुरीदृशः स्मृतः ॥ ३२ ॥

हे साहे, यः संसृतेः संसारस्य सद्म गृहभूतं परिग्रहं धन-धान्य-क्षेत्र-वस्तु-रूप्य-सुवर्ण-कुप्य-द्विपद-चतुष्पदरूपं नवविधमपि स्वयमात्मना मुञ्चति जहाति। किंवत्। मरालवत्। यथा राजहंसः अम्बुदेन प्रावृषेण्यप्रबलजलधरवारिवर्षणेन जम्बालजलप्लवागमनेनाविलं पङ्किलीकृतं जलं सरसीसलिलं त्यजति। 'गङ्गानीरमपि त्यजन्ति कलुषं ते राजहंसा वयम्' इति सूक्ते। पुनर्यः कृपारसेन कारुण्यामृतेन पूरितायां भरितायां पूर्णीकृतायां वा मानसं भविजनमन एवावनिर्भूमिस्तस्यां प्रबोधाः सम्यग्ज्ञानानि त एव शालयः कलमास्तान्प्ररोपयेत् वपेत्। जलभूतभूमौ हि शालय उप्यन्ते इति स्थितिः। पुनर्यो रविवत्सूर्य इव शुभाशुभौ समीचीनासमीचीनौ मार्गौ पन्थानौ व्यनक्ति प्रकटयति। किंभूतौ मार्गौ। सुगतेः स्वर्गापवर्गस्य, तथा दुर्गतेर्नरकतिर्यक्त्वादिकुगतेः प्रवर्तकः। हे साहे, ईदृश ईदृग्लक्षणो गृह्णाति तत्त्वं सम्यग्मार्गं च स्वयं विज्ञाय भव्यजन्तूनुपदिशतीति गुरुः स्मृतः शास्त्रेषु कथितः। किं कुर्वन्। भवात्संसारात् स्वेनात्मना तरन्पारं प्राप्नुवन् च पुनः परानन्यान् भविकांस्तारयन्नुत्तारयन् परपारं प्रापयन्। केव। तरीव। यथा नौर्वार्धौ समुद्रे स्वेन तरति पारे गच्छति परान् स्वाश्रितान् लोकांश्च तारयति परतीरं लम्भयति॥ युग्मम् ॥ इति गुरुस्वरूपम् ।

શ્લોકાર્થ

હે રાજન્, જે ગુરુએ કાદવયુક્ત સરોવરને રાજહંસ જેમ ત્યાગ કરે તેમ સંસારના ઘરસમાન ધન, ધાન્ય, ક્ષેત્ર, વસ્તુ, ચાંદી, સુવર્ણ, કુપ, નોકરચાકર આદિ દ્વિપદ અને ગાયભેંસ આદિ ચતુષ્પદરૂપ નવ પ્રકારના પરિગ્રહનો ત્યાગ કર્યો છે. કૃપારસરૂપી જલથી પરિપૂર્ણ ભવ્યજીવોના મનરૂપી પૃથ્વીમાં સમ્યગ્જ્ઞાનરૂપી શાલિનું વપન કરે છે. સૂર્યની જેમ સુગતિ-દુર્ગતિરૂપ શુભાશુભ માર્ગને બતાવે છે અને જે ગુરુ નાવની જેમ સંસારરૂપ સમુદ્રને સ્વયં પાર કરે છે અને આશ્રિતોને પાર કરાવે છે તે જ સાચા ગુરુ છે. ॥ ૩૧ ॥ ॥ ૩૨ ॥

जिनास्यपद्मे मकरन्दविभ्रमं दधद्विपत्पूषसुताप्रलम्बभित् ।
महोदयस्वर्गितरोरिवाङ्कुरः कृपापयोराशितमस्विनीपतिः ॥ ३३ ॥

नरोरगस्वर्गृहसार्वभौमतादिमेन्दिरा यस्य वशंवदा सदा ।
पुनर्विधातेव भवान्तकारकः क्षितीन्द्र धर्मः पुनरीदृशः श्रिये ॥ ३४ ॥

हे क्षितीन्द्र धरित्रीसहस्रनेत्र, ईदृशो विश्वे ईदृग्लक्षणः संसारसमुद्रमध्यमज्जत्समस्तजनतानां धारणादुद्धारणाद्धर्मः श्रिये मोक्षलक्ष्म्यै भवति । किं कुर्वन् । जिनस्य रागद्वेषाद्यशेषविद्वेषितुः परमेश्वरस्यास्यपद्मे वदनकमले मकरन्दविभ्रमं मधुविलासं दधद्धारयन् । सर्वज्ञप्रणीत इत्यर्थः । किंलक्षणः । विपदापद्रूपा या पूषसुता सूर्यपुत्री यमुना तद्भिदायां प्रलम्बभिद्बलभद्रोपमः । 'हलिप्रलम्बयमुनाभित्' इति हैम्याम् । आपद्वल्लीनां मूलोन्मूलनकृदित्यर्थः । उत्प्रेक्ष्यते—महोदयो मोक्षः स एव स्वर्गितरुः कल्पद्रुमस्तस्याङ्कुरः प्ररोहः । यथाङ्कुरात्तरुर्जायते तथा धर्मादेव सर्वदुःखक्षयः स्यादिति । पुनः किंभूतः । कृपा जगज्जीवानुकम्पा सैव पयोराशिः समुद्रस्तद्वर्धने तमस्विनीपतिः विधुः । यथा चन्द्रात्समुद्रो वर्धते, तथा धर्मादपि दयापि वर्धमाना भवति । जीवदयामय इत्यर्थः । पुनर्यस्य धर्मस्य नरा मनुष्याः, उरगा नागाः, स्वर्गृहाः सुराः, तेषां सार्वभौमाश्चक्रवर्तिनस्तेषां भावो नरोरगस्वर्गृहसार्वभौमता नरेन्द्रता नागेन्द्रता असुरेन्द्रता देवेन्द्रता ता आदिमा यस्यास्तादृश्य इन्दिराः सर्वश्रियो लक्ष्म्यो यस्य सदा नित्यं वशंवदा आयत्ता यं ददाति तं श्रयन्ते पुनः विधाता ब्रह्मा इव भवस्य संसारस्यान्तकारकः घातुकः विधातापि भवान्तकृन्नामा ॥ युग्मम् ॥ इति धर्मस्वरूपम् ॥

શ્લોકાર્થ

હે રાજેન્દ્ર, જે ધર્મ જિનેશ્વર ભગવંતના મુખરૂપી કમલમાં મકરંદરૂપ છે, અર્થાત્ સર્વજ્ઞપ્રણીત છે. વિપત્તિરૂપી યમુનાના પ્રવાહને ભેદનાર, સ્વર્ગ અને અપવર્ગ (મોક્ષ) રૂપ વૃક્ષના અંકુર સમાન, નરેન્દ્ર, નાગેન્દ્ર, દાનવેન્દ્ર અને દેવેન્દ્રની સાર્વભૌમ સંપત્તિને સ્વાધીન કરી આપનાર, વિધાતાની જેમ સંસારનો અંત કરનાર અને સંસારરૂપી સમુદ્રમાં ડૂબતા જીવોને ધારણ કરનાર તે જ સાચો ધર્મ છે. ॥ ૩૩ ॥ ॥ ૩૪ ॥

जनुष्मतां शालिशया इवात्मनापुनर्भवोद्भावविधायिनोऽनिशम् ।
त्रयोऽप्यमी सन्ति समग्रमेदिनीधवावतंसीकृतपादपङ्कज ॥ ३५ ॥

समग्रा ये मेदिनीधवाः पृथिवीपतयो राजानस्तैरवतंसीकृतं शेखरी प्रणीतं पादपङ्कजं यस्य स तस्य संबोधने । अमी देवो गुरुर्धर्मश्च त्रयोऽपि जनुष्मतां जन्मभाजां भविकानां

शालिशयाः शोभनशीलाः पाणय इव आत्मना स्वयमपुनर्भवस्य न विद्यते पुनस्ततोऽत्रागत्य द्वितीयवारं भव उत्पत्तिर्यस्मात्तादृशो मोक्षः तस्य तथा पुनर्भवानामुद्भावः प्रकटीभवनं तं विदधते कुर्वते इत्येवंशीलाः मुक्तिकारिणो विद्यन्ते सन्ति ॥ इति सुधर्मदेवगुरुनिरूपणम् ॥

શ્લોકાર્થ

હે રાજેન્દ્ર, આ સુદેવ, સુગુરુ અને સુધર્મરૂપી તત્ત્વત્રયી ભવ્ય જીવોના હાથમાં નિરંતર મોક્ષરૂપી લક્ષ્મીને શોભાવનાર છે. ॥ ૩૫ ॥

शिवस्त्रिनेत्रीमिव भूमिमानिव त्रिशक्ति विद्यात्रितयीं सुधीरिव ।
अचालनीयां सुरशैलवत्सुरैस्तदर्हदादित्रितयीमहं वहे ॥ ३६ ॥

हे साहे, अहं तत्पूर्वव्यावर्णितस्वरूपामर्हदादीनां जिनगुरुधर्माणां त्रितयीं वहे स्वेन धारयामि । किंभूताम् । सुरैर्देवैरप्याचालनीयां चालयितुमशक्याम् । किंवत् । सुरशैलवत् यथा मेरुः केनापि न चाल्यते । अहं वहे । क इव । शिव इव । यथा ईश्वरस्त्रिनेत्रीं लोचनत्रितयं वहति । 'एकत्रिदृग्भालदृगेकपादः' इति हैम्याम् । यदुक्तं च—'गतियुगलकमेवोन्मत्तपुष्पोत्कराणां त्रिनयनतनुपूजा वाथ वा भूमिपातः' इति । पुनः क इव । भूमिमानिव । यथा राजा तिसृणां प्रभुत्व-उत्साह-मन्त्रलक्षणानां त्रिकसंख्याकानां शक्तीनां समाहारस्त्रिशक्ति शक्तित्रिकं धत्ते । 'शक्तयस्तिस्रः प्रभुत्वोत्साहमन्त्रजाः' इति हैम्याम् । 'त्रिसाधना शक्तिरिवार्थमक्षयम्' इति रघौ । पुनः क इव । सुधीरिव । यथा विद्वान विद्यानां व्याकरण-साहित्य-तर्कलक्षणानां त्रितयीं बिभर्ति । भुवनवलिवह्निविद्या संध्यागजवाजिनां भुवननेत्राणि' इति काव्यकल्पलतायाम् । त्रिसंख्याकानि ॥ इति साहेः पुरः सूरिभिः स्वस्य तत्त्वत्रयाराधनं प्रोक्तम् ॥

શ્લોકાર્થ

હે રાજન્, શંકર જેમ ત્રણ નેત્રને, રાજા પ્રભુત્વ, ઉત્સાહ અને મંત્રરૂપ ત્રણ શક્તિને અને પંડિત જેમ ન્યાય, વ્યાકરણ અને સાહિત્યરૂપ ત્રણ વિદ્યાને વહન કરે છે તેમ હું મેરૂની જેમ દેવો વડે કરીને પણ અચલ એવી સુદેવ, સુગુરુ અને સુધર્મરૂપ તત્ત્વત્રયીને વહન કરું છું. ॥ ૩૬ ॥

कति व्रतानीह वहध्वमात्मना परेण शक्यानि न वोढुमद्रिवत् ।
इदं नृपे पृच्छति भारती विभोर्मुखारविन्दे मधुपी बभूवुषी ॥ ३७ ॥

विभोर्हीरगुरोर्मुखारविन्दे वदनपद्मे भारती वाणी मधुपी बभूवुषी भ्रमरी संजायते स्म । प्रोवाचेत्यर्थः । कस्मिन् सति । नृपे अकब्बरे इदं निगद्यमानं पृच्छति प्रश्नं कुर्वति सति । इदं किम् । हे सूरयः, इह जगति संयममार्गे वा यूयमात्मना स्वेन कति कियत्संख्याकानि व्रतानि नियमविशेषान् वहध्वं धारयत पालयत वा यानि व्रतानि परेण असत्त्वेन क्लीबप्रायेण पुंसा वोढुं धारयितुं न शक्यानि न समर्थानि । किंवत् । अद्रिवत् । यथा विष्णुव्यतिरेकेणेत्यध्याहारः । पर्वतोऽन्येन केनचिद्वोढुं न शक्यते । 'सोमसिन्धुर्जगन्नाथो गोवर्धनधरोऽपि च' इति विष्णुनामसु हैम्याम् ॥ इति सूरीणां कियद्व्रतधारणविषये साहेः प्रश्नः ॥

શ્લોકાર્થ

હે પ્રભુ, કાયર પુરુષથી વહન કરવા માટે અશક્ય એવા પર્વત સમાન આપ કેટલાં વ્રતોને ધારણ કરો છો ! આ પ્રમાણે રાજાએ પૂછયું ત્યારે આચાર્યમહારાજ બોલ્યા. ॥ ૩૭ ॥

वसुंधराभोग इवामराचलान्सुपर्वसालानिव काञ्चनाचलः ।
अहं वहे पञ्चमहाव्रतानमून्स्वविक्रमाधःकृतपाकशासन ॥ ३८ ॥

हे स्वविक्रमेण निजभुजवीर्येण कृत्वा अधःकृतो हीनीकृतस्तिरस्कारं नीतो वा पाकशासनो वज्रपाणिर्येन तस्य संबोधनम् । अहममूनग्रे वक्ष्यमाणान्प्रोच्यमानान्पञ्चसंख्याकान्महाव्रतान् सर्वेभ्योऽप्यतिशायिनियमान्वहे बिभर्मि । व्रतशब्दः पुंनपुंसके । 'व्रतोपवीतौ पलिलिन्तौ वसन्त' इति लिङ्गानुशासने । क इव । वसुंधराभोग इव । यथा वसुंधराया सार्धद्वयद्वीपलक्षणमनुष्यक्षेत्रभूमेराभोगो विस्तारः पञ्चामराचलान्मेरून् बिभर्ति । एको जम्बूद्वीपे, द्वितीयो धातुकीखण्डपूर्वार्धे, तृतीयो धातुकीखण्डपश्चिमार्धे, चतुर्थः पुष्करार्धपूर्वार्धे, पञ्चमः पुष्करार्धपश्चिमार्धे, एवं पञ्च काञ्चनाचलान् धत्ते । पुनः क इव । काञ्चनाचल इव । यथा मेरुः कल्प-पारिजात-मन्दार-हरिचन्दन-संतानाभिधानान्पञ्च सुपर्वसालान् सुरद्रुमान् कलयति ॥

શ્લોકાર્થ

પોતાના પરાક્રમથી ઇન્દ્રનો જેણે તિરસ્કાર કર્યો છે એવા હે રાજન્, પૃથ્વી જેમ પાંચ મેરૂને, મેરૂપર્વતકલ્પ, પારિજાત, મન્દર, હરિચન્દન અને સંતાન એ પાંચ કલ્પવૃક્ષને ધારણ કરે છે તેમ હું પાંચ મહાવ્રતોને ધારણ કરું છું. ॥ ૩૮ ॥

क्षितीन्द्र तेषामिदमादिमं व्रतं समन्ततो मन्तुमुचोऽपि जन्तवः ।
न पञ्चतागोचरचारिणः क्वचित्त्रिधा क्रियन्ते निजनन्दना इव ॥ ३९ ॥

हे क्षितीन्द्र, तेषां पञ्चानां महाव्रतानां मध्ये इदमुच्यमानमादिमं प्रथमं व्रतं वर्तते। तदेवाह—यत्रक्वचित्प्रदेशे ग्रामे अरण्ये वा रहसि प्रकटं वा प्रमोदेन दर्पेण संकल्पेन वा त्रिधा मनोवाक्कायैः कृत्वा समन्ततः सापराधाः अपि पुनः मन्तुमपराधं मुञ्चन्ति त्यजन्ति ते निरपराधाः जन्तवः प्राणिनः पञ्चतायाः पञ्चत्वस्य मृतेर्गोचरे विषये चरन्ति व्रजन्तीति एवंशीलाः नैव क्रियन्ते सर्वथा नैव हन्यन्ते। के इव। निजनन्दना इव। यथा स्वपुत्राः पञ्चताया गोचराः केनचित्पित्रा न क्रियन्ते तथा सर्वेऽपि जगज्जन्तवः पाल्यन्ते एव॥

श्लोकार्थ

राजेन्द्र, आ पांच महाव्रतो पैकीना प्रथम व्रतमां-अपराधी के निरपराधी कोई पण जीवनी मन, वचन अने कायाथी हिंसा करवी नहीं परंतु पोताना पुत्रोनी जेम जीवोनुं रक्षण कराय छे. ॥ ३९ ॥

न देवदेवः परमेशितुः परः प्रतापवान्नापि पयोजिनीपतेः।
गुरुर्न मेरुर्न मरुन्मणेर्मणिस्तथा न धर्मोऽस्ति दयाविधेः परः ॥ ४० ॥

हे देवशब्देन राजभट्टारकादिरुच्यते। 'राजा भट्टारको देवः प्रयोज्याः पूज्यनामतः' इति हैम्याम्। तथा 'देव त्वद्भुजदण्डदर्पगरिमोग्दूर्णप्रतापानल–', 'देवे दिग्विजयोद्यते' इति खण्डप्रशस्तौ। तथा 'देव त्वं जय कासि लुब्धकवधूर्हस्ते किमेतत्पलम्' इत्यादि भोजप्रबन्धादावपि। तथा 'देवेन किं न श्रुतम्' इति चम्पूकथायाम्। यथा परमेशितुः परमेश्वरात्परो देवो नास्ति। अथ वा परमेश्वरादपरः देवानां भवनपतिवानव्यन्तरज्योतिष्कवैमानिकानां सुराणामपि देवः पूज्यः एतावता देवाधिदेवः। अपरे सर्वे हरिहरपुरंदरादयो देवाः, परमेश्वरस्तु देवदेवः, तथा यथा पयोजिनीपतेः सूर्यात्परः प्रतापवान्महस्वी तेजस्वी नास्ति। पुनर्यथा मेरोर्लक्षयोजनप्रमाणात्सुदर्शननाम्नः स्वर्णाचलात् कोऽपि गुरुर्महान्नास्ति। सर्वेऽप्यपरेऽप्युच्चाश्चतुरशीतियोजनमानाः, अयं तु शतसहस्रयोजनोच्चैस्तरः। पुनर्यथा मरुन्मणेश्चिन्तारत्नात्परो मणिर्नास्ति वज्रपद्मरागकर्केतनमरकतेन्द्रनीललोहिताक्षपुलिन्दाञ्जनहंसगर्भादयोऽनेकेऽपि मणयः सन्ति, परं चिंतामणिं विना सर्वकामकरः कोऽपि नास्ति। यथा दयानिधेः कृपाकरादपरो धर्मो न वर्तते। 'नास्ति धर्मो दयापरः' इति गीतायाम्॥ इति प्रथमं व्रतम्॥

श्लोकार्थ

परमेश्वर समान बीजो कोई देवाधिदेव नथी, सूर्य समान अन्य कोई प्रतापी नथी, मेरु समान बीजो कोई मोटो पर्वत नथी अने चिन्तामणिरत्न समान बीजुं कोई रत्न नथी तेम 'दयाधर्म' समान अन्य कोई धर्म नथी. ॥ ४० ॥

वदन्ति वाचंयमपुंगवास्त्रिधा मृषा न भाषामपि जीवितव्यये ।
इयं यदंहःपटलीव दुर्गतेर्विमानताया अतिशायि कारणम् ॥ ४१ ॥

हे साहे, वाचंयमपुंगवाः साधुसिन्धुराः जीवितव्यये प्राणत्यागेऽपि त्रिधा मनोवचनकायैः कृत्वा मृषा अलीकां भाषां वाचं न वदन्ति न ब्रुवन्ति । यत्कारणादियं मृषा भाषा विमानताया अवगणनायाः पदे पदे अपमानस्य अतिशयते सर्वेभ्योऽभ्यधिकीभवतीत्येवंशीलमतिशायि कारणं साधनं वर्तते । मिथ्याभाषी सर्वत्राप्यपमानं पराभवं च प्राप्नुयात् । केव । अंहःपटलीव । यथा अंहसां दुष्कृतानां पटली परम्परा दुर्गतेरतिशायि साधनमास्ते ॥

श्लोकार्थ

હે રાજન્, બીજા વ્રતમાં સાધુપુરુષો મનવચનકાયાથી પ્રાણાંતે પણ અસત્ય બોલતા નથી. જેમ પાપોની પરંપરા દુર્ગતિનું કારણ છે તેમ અસત્ય ભાષા અવશ્ય સર્વત્ર અપમાન અને તિરસ્કારનું કારણ બને છે. ॥ ૪૧ ॥

यशःसुधांशोरपिधायिका कुहूरिवादशालोलदृशः प्रियासखी ।
समूहनीवारजसामिवाङ्गिनां गुणावलीनामनृता हि भारती ॥ ४२ ॥

हे साहे, निश्चितमनृता असत्या भारती वाणी मृषा भाषा कुहूरमावास्येव यशः जगत्प्रसारिकीर्तिकलापः स एव सुधांशुश्चन्द्रमास्तस्यापिधायिका । 'व्रजति कुमुदे मोहं दृष्ट्वा दृशोरपिधायिका' इति नैषधे । पुनरुत्प्रेक्ष्यते—अत्र इवशब्दो घण्टालालान्यायेन उभयत्र योज्यते । अदृशा विरुद्धदृशा । तदन्यतद्विरुद्धतदभावेषु नञ् वर्तते सारस्वतोक्तेः । दुर्दशा सैव लोलदृक्कामिनी तस्याः प्रियसखी इष्टवयसीव । च पुनरुत्प्रेक्ष्यते—अङ्गिनां प्राणिनां गुणानां शीललज्जार्जवमार्दवादीनामावलीनां धोरणीनां समूहनी संमार्जनीव । लोके 'सारवणी' इति प्रसिद्धा । केषामिव । रजसामिव । यथा धूलीनां गृहादिकत्यवरकाणां प्रमार्जनकारिका । निष्काशयित्रीत्यर्थः ॥ इति द्वितीयं व्रतम् ॥

શ્લોકાર્થ

આ અસત્ય ભાષા, અમાવાસ્યાની કાજળઘેરી રાત્રિની જેમ યશરૂપી ચન્દ્રને આચ્છાદિત કરનારી છે, દુર્દશારૂપી સ્ત્રીની પ્રિય સખી છે, અને કચરાને દૂર કરનારી સાવરણીની જેમ પ્રાણીઓના સદ્ગુણોને દૂર કરનારી છે. ॥ ૪૨ ॥

तृणादि नोपाददते च किंचनाप्यदीयमानं मुनयो महीमणे ।
पदं किलाविश्वसितेरिवैकदक्ततेररिष्टः पृथिवीपुरंदर ॥ ४३ ॥

हे महीमणे भूमीरत्न, च पुनर्मुनयः साधवः तृणादि दन्तशोधनमात्रप्रमुखं किंचिदपि वस्तु अदीयमानं केनाप्यविश्राण्यमानं नोपाददते नैव गृह्णन्ति। हे पृथिवीपुरंदर मेदिनीमण्डलाखण्डल, किलेति निश्चितं श्रूयते वा। हेतोर्वा। 'किल संभाव्यवार्तयोः। हेत्वरुच्योरलीके च' इत्यनेकार्थः। अस्माकं तु सर्वथापि तत्काराणाभावात् लोके जने पवकर्ण्यते। अदत्तादानं वस्तु स्वामिना कथमप्यदीयमानवस्तुनो ग्रहणमविश्वसितेरविश्वासस्य पदं स्थानमास्ते। क इव। अरिष्ट इव। यथा निम्बतरुः। 'निम्बोऽरिष्टः पिचुमन्दः' इति हैम्याम्। एकदक्ततेः काकश्रेण्या निवासस्थानं स्यात्॥

श्लोकार्थ

त्रीजा व्रतमां-राजेन्द्र, मालिकना आप्या सिवायनी एक तृणमात्र वस्तुने पण मुनिओ ग्रहण करता नथी. जेम लीमडो कागडानुं निवासस्थान छे तेम अदत्त वस्तुने ग्रहण करवाथी खरेखर मनुष्यो अविश्वासनुं भाजन बने छे. ॥ ४३ ॥

अदत्तमादत्त न यस्त्रिधापि तं वृणोति विद्येव विनीतमिन्दिरा ।
मृगी मृगेन्द्रादिव दुर्गतिस्ततः प्रयाति दूरादवनीनभोमणे ॥ ४४ ॥

हे अवनीनभोमणे प्रतापवत्त्वाद्भूमीभानो, यः पुमान् त्रिधापि मनोवचनतनुभिः कृत्वा अदत्तं वस्तु स्वामिना न विश्राणितं यो नादत्त न जग्राह तं पुमांसं इन्दिरा लक्ष्मीः स्वयमागत्य वृणोति वरयति। भजते इत्यर्थः। कमिव। विनीतमिव। यथा विनयवन्तं शिष्यं विद्या निषेवते पुनस्ततस्तस्मान्निःस्पृहान्नरादुर्गतिर्नरकादिकुगतिर्दूरात्प्रयाति पालयते। क इव। मृगीव। यथा मृगेन्द्रान्मृगी कुरङ्गी दूरात्प्रयाति॥ इति तृतीयं व्रतम् ॥

શ્લોકાર્થ

હે રાજન્, વિનયી શિષ્યને જેમ વિદ્યા આપોઆપ સ્ફૂરે છે તેમ જે પુરુષ મન, વચન, કાયાથી અદત્ત વસ્તુને ગ્રહણ કરતો નથી તેને લક્ષ્મી સ્વયં આવીને વરે છે. અને જેમ મૃગલી સિંહથી દૂર દૂર ભાગી જાય છે તેમ તેનાથી દુર્ગતિ દૂર દૂર ચાલી જાય છે. ॥ ૪૪ ॥

पराङ्मुखी स्याद्विषयाद्व्रतिव्रजो निकुञ्जवासीव तदेकभूमिषु ।
क्षमाधरो येन महोदयंगमी वशास्वनीतिष्विव कोऽनुरज्यते ॥ ४५ ॥

हे साहे, व्रतिव्रजो मुनिगणो विषयात् शब्द-रूप-गन्ध-रस-स्पर्शलक्षणात्पञ्चप्रमाणाद्गोचरात्पराङ्मुखो स्यात् विमुखो विरक्तो भवेत् । क इव । निकुञ्जवासीव। यथा वने एव वसनशीलो जन्तुः श्वापदादिविषयाज्जनपदाद्विमुखः स्यात्कदाचिन्नगरग्रामादिषु नागच्छेत् । येन कारणेन क्षमायाः क्षान्तेः क्षमाया उपशमस्य वा धरो धर्ता पुनर्महोदयं मोक्षं गमिष्यति यास्यतीत्येवंशीलः साधुस्तदेकभूमिषु तेषां पञ्चानामपि विषयाणामेका अद्वैता भूमयो वासवेश्मानि । नहि वाणिनीं विना विषयाः सुखाय स्युः । तादृशीषु वशासु स्त्रीषु न अनुरज्यते अनुरक्तीभवति । काम्विव । अनीतिष्विव । यथा क्षमाधरो युवराजपदवीं प्रापितः सर्वराज्यधुरंधरः पुनर्महान्तं सर्वातिशायिनमुदयं राज्यैश्वर्यं गमिष्यति लप्स्यते इत्येवंशीलः । अथ वा क्षमाधरो जनकेन निजनिजराज्ये स्थापितः । पुनर्महान्तं सार्वभौमतादिलक्षणमुदयमाधिपत्यं प्राप्स्यते इत्येवंशीलः । तादृशः कः । अनीतिष्वन्यायेषु अनुरागवान् भवेत् । उदयाभिलाषी सर्वोऽपि न्यायेष्वेवानुरज्यते । यदुक्तम्—'न निमित्तद्विषां क्षेमं नायुर्वैद्यकविद्विषाम् । न श्रीर्नीतिद्विषामेतत्त्रयं धर्मद्विषां नहि ॥' इति ॥

श्लोकार्थ

ચોથા વ્રતમાં—વનવાસી જીવો શિકારી પશુઓથી જેમ દૂર રહે છે તેમ સાધુઓ શબ્દ, રૂપ, રસ, ગંધ અને સ્પર્શ એ પાંચે વિષયોથી પરાઙ્મુખ રહે છે. અને ન્યાયપ્રિય રાજા જેમ અનીતિમાં રક્ત નથી તેમ ક્ષમાશીલ અને મોક્ષાભિલાષી સાધુ પાંચેય વિષયોના સ્થાનરૂપ સ્ત્રીઓમાં આસક્ત હોતા નથી. (કહ્યું છે—જ્યોતિષના દ્વેષીને કુશળ નથી. ઔષધના દ્વેષીને જીવિત નથી, નીતિના દ્વેષીને લક્ષ્મી નથી અને ધર્મના દ્વેષીને ત્રણમાંથી કંઈપણ નથી.) ॥ ૪૫॥

यतः स शूरः सुदृशां भ्रुवं धनुः कटाक्षबाणाङ्कबरीकृपाणभृत् ।
नितम्बचक्रं भुजपाशमुत्कटं पुनर्वहन्येन जितः स्मरप्रभुः ॥ ४६ ॥

हे मुद्गलेन्द्र, स एव पुमान् शूरः सुभटः । कथ्यते इति शेषः । येन पुंसा स्मर एव प्रभुः त्रिजगज्जेतृत्वात्समर्थो राजा इन्द्रनागेन्द्रनरेन्द्राणामपि स्वसेवकीकरणाद्राजा जितो वशीकृतो हतो वा । किं कुर्वन् । सुदृशां चारुलोचनानां भ्रुवमेव धनुः कोदण्डम्, पुनः कटाक्षानपाङ्गदर्शनान्यक्षिविकूणितानि एव बाणान्नाराचान्, पुनर्नितम्बमारोहं स्त्रीकटीपश्चात्प्रदेशम् । येन कृत्वा नितम्बिनीत्यभिधानेन प्रसिद्धा । तदेव चक्रं रथाङ्गायुधम् । पुनरुत्कटं केनापि छेत्तुमशक्यं भुजौ बाहू एव पाशं द्विषद्बन्धनार्थं वज्ररज्जुमयग्रन्थिं वहन् धारयन् । किंभूतः । कबरीं वेणीमेव कृपाणं चन्द्रहासं बिभर्तीति भृत् । प्रभुः सकलसुरासुरोरगनरनायकनिर्जयेन सामर्थ्यवानिति साभिप्रायं प्रभुरिति पदम् ॥

શ્લોકાર્થ

હે મોગલપતિ, સ્ત્રીઓની ભ્રકુટિરૂપી ધનુષ્ય, કટાક્ષરૂપી બાણ, વેણીરૂપી કૃપાણ, કટીપ્રદેશરૂપી ચક્ર અને બાહુરૂપી પાશ વડે ત્રણે જગતમાં એકછત્રી સામ્રાજ્યને ધારણ કરનાર દુર્જય કામદેવને જેને જીતી લીધો છે તે જ પુરુષ ખરેખર ધન્ય છે, શૂરવીર છે. ॥ ૪૬ ॥

स भद्रवांस्त्रैणकुचाचलान्तिकप्ररूढरोमावलिसालगह्वरे ।
न दस्युवद्यस्य मनोभुवा शमश्रियो ह्रियन्ते शिवमार्गगामिनः ॥ ४७ ॥

हे साहे, स नरो भद्रवान् कुशली । स कः । शिवे निरुपद्रवे मार्गे पथि मोक्षमार्गे वा गच्छतीत्येवंशीलस्य यस्य महात्मनो दस्युवत्तस्करेणेव । 'दस्युस्तस्करविद्विषोः' इत्यनेकार्थः । मनोभुवा मदनेन शमश्रियः प्रशमविभवा न ह्रियन्ते नाच्छिद्य गृह्यन्ते । कस्मिन्विषये । स्त्रैणस्य स्त्रीसमूहस्य कुचाः प्रोत्तुङ्गपीनपयोधरास्त एवाचलाः पर्वतास्तेषामन्तिके समीपे प्ररूढा उद्गताः या रोमावल्यो लोमलेखास्ता एव साला विविधविटपवृक्षास्तेषां गह्वरे घननिकुञ्जे तस्करश्वापदादिभयंकरकानने ॥

શ્લોકાર્થ

સ્ત્રીઓનાં સ્તનરૂપી પર્વતની સમીપે ઊગેલા રોમરાજીરૂપી વૃક્ષોથી ગીચ ભયંકર અટવીમાં મોક્ષમાર્ગના પથિકની શમલક્ષ્મીને લુંટારાની જેમ કામદેવે લૂંટી નથી તે જ પુરુષ કુશલ છે. ॥ ૪૭ ॥

यशःप्रियामादयिते कलङ्कति द्विपेन्द्रति क्षीरधिसूनुवीरुधि ।
शमारविन्दे तुहिनोदबिन्दति व्रताम्बुवाहेष्वपि गन्धवाहति ॥ ४८ ॥

निदाघति व्रीडवहा पयःप्लवे महस्वगोत्रे च सहस्रनेत्रति ।
गुणद्रुमद्रोणिषु मन्त्रजिह्वति क्षितीश शीलं पुरुषेण खण्डितम् ॥ ४९ ॥

हे क्षितीश भूपते, पुरुषेण उपलक्षणाद्विशेषेण स्त्रिया वा शीलं ब्रह्मचर्यं स्वदारसंतोषलक्षणं परपुरुषत्यागलक्षणं यावज्जीवनियमपालनविधं वा खण्डितं त्यक्तं भग्नं सत् । तस्येति शेषः । यशः कीर्तिरेव प्रियामादयितः शारदीनचन्द्रस्तस्मिन्कलङ्कति लाञ्छनमिवाचरति । सकलङ्कः स्वयशो मलिनीकरोति । पुनः क्षीरधेः क्षीरसमुद्रस्य सूनुः पुत्रो नन्दनः । 'अङ्गहोऽङ्गात्मजः सूनुस्तनयो दारकः सुतः । पुत्रो दुहितरि स्त्रीत्वे' इति हैम्याम् । 'स्त्रीत्वे

स्त्रीलिङ्गे वाच्ये सति नन्दननामशब्दो दुहितरि पुत्र्यां स्युः' इति तद्वचरिः। लक्ष्मीस्तद्रूपा वीरुद्वल्ली तत्र। तदुन्मूलने इत्यर्थः। द्विपेन्द्रति ऐरावणोऽन्यो वा गजराजस्तद्वदाचरति। पुनः शमः प्रशान्तता स एवारविन्दं कमलं तस्मिंस्तुहिनोदवृन्दति हिमजलकणगण इवाचरति। हिमानीयतीत्यर्थः। अपि पुनर्व्रतानि पञ्चमहाव्रतानि द्वादशाणुव्रतानि वा अन्ये नियमविशेषा वा त एवाम्बुवाहाः पयोधरास्तेषु गन्धवाहति प्रबलप्रभञ्जन इवाचरति। पुनर्व्रीडो लज्जा स एव वहा सरित् तस्याः पयःप्लवे पानीयपूरे निदाघति ग्रीष्मकालति। 'जेणिदिनिपवनप्रचण्डलूअझलतापतडक्का। जिणिदिनिनदीनिवाणजाणवाविकूआ सवसुक्का॥' निदाघे हि प्रायोऽखिला जलाशयाः शुष्यन्ति। तथा व्रीडशब्दः अकारान्तोऽप्यस्ति। 'व्रीडनं व्रीडा चित्तसंकोचः व्रीडोऽपि' इती हैमीवृत्तौ। तथा 'त्वयि स्मरव्रीडसमस्ययानया' इति नैषधे। च पुनर्महत्त्वं महिमा तदेव गोत्रः पर्वतः तत्राचलच्छेदे सहस्रनेत्रति इन्द्र इवाचरति। पुनर्गुणः सदाचरणानि एव द्रुमा वृक्षास्तेषां द्रोणिषु श्रेणिषु। तज्ज्वालने इत्यर्थः। मन्त्रजिह्वति। अर्थाद्दावानल इवाचरति। 'भिल्ली पल्लवशङ्कया विचिनुते 'सान्द्रद्रुमद्रोणिषु' इति चम्पूकथायाम्। 'द्रुमद्रोणयो वृक्षश्रेणयः' इति तट्टिप्पनके। 'सर्वप्रातिपदिकेभ्यः क्विप् वाचारे इत्येके। कृष्ण इवाचरतीति कृष्णति। एवं स्वति स्वागास' इति प्रक्रियाकौमुद्याम्। तस्मादत्र सर्वत्रापि आचारार्थे क्विप्प्रत्ययः॥ युग्मम्॥

શ્લોકાર્થ

હે રાજન્, જે પુરુષ અથવા સ્ત્રી પોતાના બ્રહ્મચર્યનું ખંડન કરે છે તે ખરેખર પોતાના યશરૂપી ચંદ્રને કલંકિત કરે છે, લક્ષ્મીરૂપી વેલને ઉખેડી નાખવા માટે ગજેન્દ્ર રૂપ, શમરૂપી કમલને નાશ કરવામાં હિમસમાન વ્રતરૂપી મેઘને વિખેરી નાખવા માટે પવન સમાન, લજ્જારૂપી નદીના જલને શોષણ કરવામાં ગ્રીષ્મકાળસમાન, પોતાના માહાત્મ્યરૂપી પર્વતને ભેદવામાં ઇન્દ્રસમાન, અને ગુણોરૂપી વૃક્ષોના સમૂહને બાળી નાખવા માટે અગ્નિ સમાન બને છે. ॥ ૪૮ ॥ ॥ ૪૯ ॥

कृतप्रदोषा पितृसूरिवाशनिश्चला वनीवन्मदनावगाहिनी।
अहेर्महेलेव च जिह्मगामिनी वधूः पयोधेरिव निम्नगामिनी॥ ५० ॥

जलैर्विहाया इव मेघमालिका विवर्धिनी वा भवपद्धतेरधैः।
मनः शमाद्वैतसुखानुषङ्गिनां वशीकरोतीश वशा न योगिनाम्॥ ५१ ॥

हे ईश अर्थात् हे अवनीनायक, इह जगति वशा कामिनी योगिनां मनोवाक्काययोगभाजां वशीकृतात्मानां मुनीनां मनो मानसं न वशीकरोति न मोहयति न हरति। यदुक्तम्—'अकामस्य तृणं नारी निरीहस्य तृणं नृप। तृणं ज्ञानवतां सर्वं तृणं शूरस्य

जीवितम् ॥' इति वचनात्। किंभूतानां योगिनाम्। शमेन शान्तभावेनाद्वैतमसाधारणं यत्सुखं सातं तस्यानुङ्ग आस्वादो विद्यते येषाम्। किंभूता वशा। कृतप्रदोषा कृता उत्पादिताः प्रकर्षेण दोषा दम्भादयः। स्त्रीजातौ दाम्भिकता। तथा 'स्त्रीभ्यः शिक्ष्यते कैतवम्' इत्यादिसूक्तोक्तेः विविधा अपगुणा यया। केव। पितृसूरिव। यथा संध्या कृतः प्रदोषो यामिनीमुखं यया तादृशी स्यात्। पुनः किंभूता। चला अतिचञ्चलस्वभावा। केव। अशनिरिव। अत्र इवशब्दो लालाघण्टान्यायेन उभयत्रापि योज्यते। ततो यथा अशनिर्विद्युदतिचपला आकालिकी शतह्रदा। 'चञ्चला चपलाशनिः' इति हैम्याम्। 'अशनिर्वज्रविद्युतोः' इत्यनेकार्थः। पुनः किंभूता। मदनावगाहिनी। मदनं प्रबलकंदर्पमवगाहते। 'कुंकुमाग्निलदङ्गारी' इति वचनात्। धारयतीति। किंवत्। वनीवत्। यथा कान्तारं मदननामानं द्रुमम्। 'मीढुल' इति प्रसिद्धं लोके। अवगाहते विमर्दीति। 'स्ववनीसंप्रवदत्पिकापि का' इति नैषधे। पुनः किंभूता। जिह्मगामिनी जिह्मं वक्रं गच्छतीत्येवंशीला। केव। महेलेव। यथा अहेर्भुजंगमस्य महेला वनिता भुजंगी कुटिलचारिणी भवेत्। पुनः किंभूता। निम्नं नीचैर्हीनतमकर्मभिर्गच्छति विचरतीत्येवंशीला। अथ वा निम्नेषु नीचजातिषु गच्छन्ति सङ्गं कुर्वन्तीत्येवंशीला। 'कामिन्यो नीचगामिन्यः' इति वचनात्। नीचसक्ताः प्रायः स्युः। केव। वधूरिव। यथा पयोधेः समुद्रस्य वधूः पत्नी नदी निम्नगा नीचैर्वहा जलस्य निम्नगतित्वान्नाम्नापि च। पुनः किंभूता। अधः पापकर्मभिः कृत्वा भवपद्धतेः संसाररचनाया अथ वा संसारपरम्परायाः संसारमार्गस्य वा। 'पद्धतिः पथि पङ्क्तौ च' इत्यनेकार्थः। एतेषां समीचीना पद्धतिरित्यपि रूढ्या दृश्यते। पद्धतिराचरणं रचनापीति। तस्या विवर्धिनी विशेषेण वृद्धिकरणशीला च तत्र विवर्धिनी। केव। मेघमालिकेव। यथा कादम्बिनी जलैः पानीयैः वहाया नद्या वृद्धिकारणी। यदुक्तम्—'वर्षा नदीनां पतिरङ्गनानामर्थो नराणामृतुराट् तरूणाम्। स धर्मचारी नृपतिः प्रजानां लोकागतं यौवनमानयन्ति ॥' इति ॥ युग्मम् ॥

શ્લોકાર્થ

હે રાજન્, સંધ્યા જેમ દોષા (રાત્રિ)ને કરનાર છે તેમ દોષયુક્ત, વિદ્યુતની જેવી ચપળ, અટવીને જેમ મદન-(મીંઢલ)-કામને ધારણ કરનારી, નાગણ જેવી કુટિલ, નદી જેવી નીચગામિની અને મેઘ જેમ નદીઓના જલમાં વૃદ્ધિ કરનાર છે તેમ પાપો વડે સંસારની વૃદ્ધિ કરનારી 'સ્ત્રી,' શાંતરસમાં નિમગ્નયોગીઓના મનને વશ કરી શકતી નથી. ॥ ૫૦ ॥ ॥ ૫૧ ॥

पुरःसरास्तस्य सुरा मरुद्रवी गृहाङ्गणे पाणितले मरुन्मणिः।
पुरः सुरद्रुर्निकटे मरुद्भटः स्वयंवराः स्युर्भुवनत्रयीश्रियः ॥ ५२ ॥

प्रदक्षिणो दक्षिणवारिजः पुनः खलाः सखायः सविधे च शेवधिः।
न चित्रकृच्चित्रलता च सिद्धयः करेऽदधाद्योऽसिशिखोपमं व्रतम् ॥ ५३ ॥

हे साहे, यः पुमानसिशिखायाः खड्गधाराया उपमा सादृश्यं यस्य तादृशं व्रतं ब्रह्मचर्यमदधाद्धारयति स्म तस्य पुंसः सुरा देवाः पुरःसरा अग्रगामिनस्तदग्रे पदातिवद्गच्छन्ति। पुनर्मरुद्गवी कामधेनुः गृहप्रसूता क्रीतगृहीता वा गौरिव गृहाङ्गणे तिष्ठेत्। मरुन्मणिश्चिन्तारत्नं तस्य पाणितले करक्रोडे हस्तेलिकायामेव वसेत्। पुनः सुरद्रुमः कल्पवृक्षः पुरः पुरस्तात् छायाकारक इव तिष्ठेत्। पुनः मरुद्घटः कामकुम्भः निकटे समीपप्रदेशे पानीयपायक इव तिष्ठेत्। पार्श्ववर्तीव वा स्यात्। पुनर्भुवनत्रयीश्रियः त्रैलोक्यलक्ष्म्यः स्वयंवरा आत्मभिरेवागत्य तं वृण्वते। पुनः दक्षिणोऽपसव्यप्रदेशे आवर्तो यस्य स चासौ वारिजश्च। मध्यमपदलोपी समासः। दक्षिणावर्तशङ्खः प्रदक्षिणोऽनुकूलः मार्गितं विनैव सर्वं समीहितं पूरयति। 'कम्बुस्तु वारिजः' इति हैम्याम्। खला द्विजिह्वा दुर्जनाः सखायो मित्राणि भवन्ति। च पुनः शेवधिर्निधानं सविधे पृष्ठे अनुलग्नमिवायाति च। पुनश्चित्रलता चित्रकवल्ली न चित्रकृत्। अदृष्टीणामाश्चर्यकारिणी स्यात्तस्य तु पदे तत्प्राप्तित्वेन न विस्मयविधायिनी। तद्गृहे पवोद्गमनत्वेन वा भवेत्। च पुनः सिद्धयः लघिमा-वशिता-ऐश्वर्य-प्राकाम्य-महिमा-अणिमा-यत्र-कामावसायित्वम्-प्राप्तिः-इत्यैश्वर्यम्। अष्टावपि सांसारिका महासिद्धयः। करे हस्ते मनोनुगामिन्यः हस्ततलस्थायिन्यो वा। महत्त्वाद्बहुवचनम्। सिद्धयो मुक्तयोऽपि हस्ते ॥ युग्मम् ॥

શ્લોકાર્થ

હે રાજન્, જે પુરુષ, તલવારની ધાર સમાન બ્રહ્મચર્યવ્રતને ધારણ કરે છે તેની આગળ આવીને દેવો પણ નમસ્કાર કરે છે, કામધેનુ ઘરના આંગણામાં ફરે છે, ચિંતામણિ રત્ન હથેળીમાં રહે છે, કલ્પવૃક્ષ આગળ ને આગળ છાંયો કરે છે, કામઘટ સમીપે રહે છે, ત્રણે લોકની લક્ષ્મી સ્વયં આવીને વરે છે, દક્ષિણાવર્તશંખ પ્રદક્ષિણા કરે છે, દુર્જનો મિત્રો બને છે, નવેનિધાન પાછળ ને પછળ ફરે છે, તેને ચિત્રાવલિ આશ્ચર્ય પમાડતી નથી, અર્થાત્ સર્વપ્રકારની સિદ્ધિઓ કરતલમાં ક્રીડા કરે છે. ॥ ૫૨ ॥ ॥ ૫૩ ॥

गजोऽप्यजो गोष्पदमम्बुधिर्मृगो मृगाधिपः स्रग्भुजगस्तमी दिनम् ।
रणः क्षणश्चाल्पगिरिर्मरुद्गिरिस्त्रिधापि यो ब्रह्म बिभर्ति भूपते ॥ ५४ ॥

हे भूपते, यः पुमान् महिला वा त्रिधापि मनोवाक्कायैर्ब्रह्म शीलव्रतं परनारीसहोदरतां बिभर्ति धत्ते, तस्य पुंसस्तस्याः स्त्रियो वा गजो मदोद्धुरसिन्धुरोऽपि अजश्छागप्रायः स्यात्। पुनरम्बुधिः समुद्रोऽपि गोष्पदं गोखुरोत्खातभूमिस्थजलमिव तेन तया वोलङ्घ्यते। पुनर्मृगाधिपः पञ्चाननोऽपि मृगो हरिण इव तस्या दूरं पलायते। पुनर्भुजगो विषधरोऽपि तेन स्रगिव कुसुममालिकेव तया चाकरे गृह्यते। तमी सान्धकारा रात्रिर्दिनमिव तस्य तस्या वा जायते। रणो घोरोऽपि संग्रामः क्षण उत्सव इव बिभर्ति। पुनर्मरुद्गिरिः सुराचलोऽपि अल्पगिरिः किंचिदुच्चपाषाणभूमिरिवावरुह्यते ॥ इति चतुर्थं ब्रह्मव्रतम् ॥

શ્લોકાર્થ

હે રાજન્, જે પુરુષ અથવા સ્ત્રી મન વચન કાયાથી બ્રહ્મચર્યનું પાલન કરે છે તેની આગળ મદોન્મત હાથી બકરા તુલ્ય બને છે, સમુદ્ર ખાબોચિયારૂપ, સિંહ હરણીયા સમાન, ભયંકર વિષધર ફૂલની માળા સમાન, રાત્રિ દિવસ સમાન (પ્રકાશરૂપ), ભયંકર રણભૂમિ મહોત્સવ સમાન અને મેરૂપર્વત પાષાણના ટુકડા સમાન બને છે. ॥ ૫૪ ॥

परिग्रहः संयमिनापवादवत्त्रिधापि नाङ्गीक्रियते कदाचन ।
तमस्तमीनामुदयादिवोरगाद्विषं यतो दोषभरः परिस्फुरेत् ॥ ५५ ॥

हे भूपते, संयमिना चारित्रवता साधुना त्रिधापि मनोवचनतनुभिरपि अपवादोऽपयश इव । कदाचन कस्मिन्नपि प्रस्तावे सुखे दुःखे वा सुकाले दुःकाले वा सुखाजीविकायां कष्टाजीविकायां वा परिग्रहो धनधान्यक्षेत्रवस्तुसुवर्णरूप्यकुप्यद्विपदचतुष्पदलक्षणो नाङ्गीक्रियते नाद्रियते । यतो यस्मात्परिग्रहाद्दोषाणां निकेतानि दाक्षिण्यलोभाद्यपगुणानां भरो गणः परिस्फुरेत् । किमिव । तम इव । यथा तमीनां कृष्णपक्षक्षपाणामुदयात्प्रकटीभावात्परिभावाद्वा तमो घरोऽन्धकारं स्फुरेत् । परि समन्तात्सर्वविश्वान्तः स्फूर्तिमत्प्रयात । विश्वव्यापिस्फूर्तिमद्भवेत् । पुनः किमिव । विषमिव । यथा उरगाद्भुजंगमाद्गरलमाविर्भवेत् ॥

શ્લોકાર્થ

હે રાજન્, રાત્રિથી જેમ અંધકાર અને સર્પથી જેમ વિષ પ્રગટ થાય છે તેમ અનેક દોષોના ઉદ્ભવરૂપ પરિગ્રહનાભારને સંયમીસાધુઓ કદી પણ અંગીકાર કરતા નથી. ॥ ૫૫ ॥

गिरीन्द्रमारोहति लङ्घतेऽम्बुधीन्प्रयाति जन्यं गहनं च गाहते ।
असूंस्तृणानीव सृजेन्निजाञ्जनस्तदुल्लसल्लोभविजृम्भितं विभो ॥ ५६ ॥

हे विभो हे साहे, यज्जनो लोकः गिरीन्द्रं तुङ्गशैलमारोहति पर्वतोपरितलशिखरशिखायां चढति, पुनर्यदम्बुधीन् समुद्रान् लङ्घते यानपात्रादिभिः कथं कथंचिदतिक्रामति अपारं पारावारं प्रतीर्य पारपारं याति । पुनर्यज्जन्यं दुराकजनीयरणाङ्गणं प्रयाति प्रविशति । च पुनर्गहनं भयानकं काननं कान्तारं गाहते सर्वतः परिभ्राम्यति । पुनर्जनो निजानात्मीयानसून्प्राणान् तृणानीव तृणप्रायान् सृजेत् कुर्यात् । हे राजन्, तत् पूर्वोक्तं सर्वमपि उल्लसन् वर्धमानः प्रकटीभवन् वा यो लोभस्तृष्णा तस्य विजृम्भितं विस्फूर्जितं प्रभावः ॥ इति पञ्चमं व्रतम् ॥

શ્લોકાર્થ

હે રાજન્, લોભાન્ધ મનુષ્યો પર્વતના શિખર ઉપર આરોહણ કરે છે, સમુદ્રનું ઉલ્લંઘન કરે છે, ભયંકર જંગલોમાં પરિભ્રમણ કરે છે અને પોતાના પ્રાણોને પણ તૃણપ્રાયઃ ગણે છે તે બધું વધતી જતી લોભતૃષ્ણાને આભારી છે. ॥ ૫૬ ॥

वहन्ति पञ्च व्रतिनो महाव्रतान्यमूनि वक्त्राणि मृगाङ्कमौलिवत् ।
भजन्ति दन्तद्वितयीं गज इवापरामिमां देव पुनर्व्रतद्वयीम् ॥ ५७ ॥

हे साहे, व्रतिनो नियमवन्तः साधवः अमूनि प्राणातिपातविरमण-मृषावादविरमण-अदत्तादानविरमण—विषयभोगविरमण-परिग्रहविरमणलक्षणानि पञ्चसंख्याकानि महाव्रतानि मेरुवद्गुरुद्धराण्यतिशायिनो नियमान् वहन्ति धारयन्ति । किंवत् । मृगाङ्कमौलिवत् । यथा चन्द्रशेखरः शिवः पञ्चप्रमाणानि वक्त्राणि वदनानि बिभर्ति । 'पञ्चमुखोऽष्टमूर्तिः' इति हैम्याम् । अथ वा 'महामृगारिवत्' इति पाठः । यथा मृगाणां हस्तिनामरयः केसरिणः पञ्च वक्त्राणि बिभ्रति । 'पञ्चास्यो नखरायुध·' इति हैम्याम् । हे देव, पुनः साधवः इमामग्रे वक्ष्यमाणामपरां पञ्चमहाव्रतानि उपरितनीं व्रतद्वयीं भजन्ति श्रयन्ते । के इव । गजा इव । यथा हस्तिनो दन्तद्वितयी दन्तकोशयुगलं दधते ॥ इति पञ्चमहाव्रतस्वरूपम् ॥

શ્લોકાર્થ

રાજન્, જેમ શંકર પાંચમુખોને ધારણ કરે છે તેમ સાધુઓ, પ્રાણાતિપાત વિરમણ વ્રત, મૃષાવાદ વિરમણવ્રત અદત્તાદાન વિરમણવ્રત, મૈથુનવિરમણવ્રત અને પરિગ્રહ વિરમણ વ્રતરૂપ પાંચમહાવ્રતોને ધારણ કરે છે, અને તે ઉપરાંત જેમ હાથીઓ બે દંતશૂલને ધારે છે તેમ બીજા પણ બે વ્રતોને વહન કરે છે. ॥ ૫૭ ॥

निशाशनं नीतिजुषा निषिध्यते परिप्लुतापानमिवावनीपते ।
निशाशनेभ्योऽपि वरं विहंगमा निशि त्यजन्तो यतिवज्जलाशने ॥ ५८ ॥

हे अवनीपते, नीतिजुषा न्यायधर्मवता धर्मे सुनिष्ठावता पुरुषेण परिप्लुतापानं मदिरापानमिव । 'गन्धोत्तमाकल्पमिरापरिस्रुताः' इति हैम्याम् । निशानन रात्रिभोजनं निषिध्यते निवार्यते स्वयं नाद्रियते । हे नृपते, निशायां रात्रावशनं भोजनं येषां ते निशाशना रात्रिभोजनास्तेभ्यो जनेभ्यः सकाशात् विहंगमाः पक्षिणोऽपि वरं समीचीनाः । वरमिति समीचीनार्थेऽपि दृश्यते । यथा सिन्दूरप्रकरे—'वरं क्षिप्तो हस्तः कुपितफणिनो

वक्त्रकुहरे वरं झम्पापातो ज्वलदनलकुण्डे विरचितः। वरं प्रासप्रान्तः सपदि जठरान्तर्विरचितो न जन्यं दौर्जन्यं तदपि विपदां सद्म विदुषाम् ॥' इति। किं कुर्वन्तः। यतिवन्मुनय इव। निशि रात्रौ जलाशने पानीयान्ने त्यजन्तो मुञ्चन्तः न भुञ्जन्तः पिबन्तश्च ॥

શ્લોકાર્થ

હે રાજન્, જેમ ન્યાયનિષ્ઠપુરુષ મદિરાપાન કરતો નથી તેમ સાધુઓ રાત્રિભોજન કરતા નથી. ખરેખર રાત્રિભોજી મનુષ્યોથી પક્ષીઓ શ્રેષ્ઠ છે કે જેઓ સાધુઓની જેમ રાત્રે જલપાન પણ કરતા નથી. ॥ ५८ ॥

गवामधीशं भुवनोपकारिणं महस्विनं श्रीजिनपादसेवितम् ।
अवेत्य मित्रं विधुरं विधीयतेऽशनादि यत्सा कथमौचिती सताम् ॥ ५९ ॥

हे साहे, गवामधीशं राजानं पतिं भास्करं धेनूनामधीशं कृष्णं नन्दगोपाङ्गजत्वाद्गोकुलवासित्वाद्व्रजनाथत्वाच्च गवां वाचामधीशं वागीशत्वाद्गुरुं वाचस्पतिमध्येतारं विधुरमस्तप्राप्तं मृतम्। 'दिष्टान्तोऽस्तं कालधर्मः' इति हैम्याम्। अवेत्य ज्ञात्वा यदशनादि भोजनप्रमुखं रङ्गसुखकारणं विधीयते क्रियते, सा सतामुत्तमानां कथमौचिती केन प्रकारेण योग्यता। अपि तु नैव। किंभूतस्य। भुवनोपकारिणः। जगतो भूलोकस्य पालनादुपकारको राजा द्यावापृथिव्योरुद्द्योतकर्तृत्वात्सदसन्मार्गप्रकाशत्वान्मित्रत्वाच्चोपकर्ता भास्वान् जगदुपद्रवकृद्दैत्यनिवारकत्वात्पालकत्वात्सृष्टेरुपकर्ता कृष्णः अज्ञानान्धकारच्छेत्तृत्वात् ज्ञानविवेकदायकत्वाद्गुरुः। पुनः किंभूतम्। महस्विनं प्रतापवन्तं नृपं किरणमालिनं भानुमुत्सववन्तं कृष्णं विद्यावत्त्वात्सर्वदाप्युत्सववत्त्वाद्गुरुः। अथाप्युत्सवानां जायमानत्वेन विष्णोः। 'एनं महस्विनमुपैहि सदारुणोच्चैः' इति नैषधे। महस्शब्दः सकारान्तोऽप्युत्सववाची वर्तते। 'महस्तेज उत्सवश्च' इति तद्वृत्तिः। पुनः किंभूतः। श्रिया चतुस्त्रिंशदतिशयलक्ष्म्या तस्याः कादाचित्कत्वेन सदा केवलोत्पत्तिं मर्यादीकृत्य महानन्दनगरावाप्तिपर्यन्तमष्टमहाप्रातिहार्यलक्ष्म्या युक्तो जिनस्तीर्थकृदन्यतरः श्राद्धत्वेन तं सेवते इत्येवंशीलः नृपः, तथा श्रिया पाथोधिपुत्र्या युक्तस्तस्याः पतित्वाल्लक्ष्मीयुक्तत्वं जिनो विष्णुस्तत्पदसेवितं विष्णुपदे व्योम्नि स्थितिमत्त्वेन भानुः कमलाकलितकुण्ठवासिनः समुद्रशायिनो जिनस्य वैकुण्ठस्य पादमंशं शीलत्येवंशीलं कृष्णस्यांशावतारत्वेन न सर्वावतारित्वं किं तु दशानामप्यंशावतारित्वमेव। गुरोर्बृहस्पतेः स्वर्गस्थायुकत्वेन निजकृष्णस्य सेवनं सुकरमेव। गुरोस्त्वन्यतरः कश्चिज्जिनो बौद्धो विष्णुरर्हन्वा एतेषा मन्यतरशासनस्थत्वात्। पुनः किंभूतम्। मित्रं सखायं राजन्यपि कुत्रचित्सेवकादौ हितान्वेषित्वेन मैत्र्यं संभाव्यते न सर्वेऽपि नृपाः कृतघ्नाः। यदुक्तम्—'सुहृदि निरन्तरचित्ते गुणवति भृत्ये प्रियासु नारीषु। स्वामिनि सौहृदयुक्ते निवेद्य दुःखं सुखीभवति॥' इति सूक्तोक्तत्वात्। तथा भास्वान्मित्र-

नामा कुमोदत्वात् मित्रवत्सर्वजनानां दैत्याद्युपद्रवनिराकरणेनानन्दोत्पादत्वाद्विष्णोर्गुरोस्तु । प्राप्ते षोडशमे वर्षे पुत्रं मित्रमिवाचरेत्।' पुत्रमिव शिष्यमपीति । तत्त्वतस्तु सूर्यमेव विधुरं कष्टभाजमस्तंगतं मरणावस्थां प्रपन्नं सूर्यस्य वैधुर्यमस्तादेव ॥ इति षष्ठं रात्रिभोजनम् ॥

श्લોકાર્થ

કિરણોનો અધિપતિ, જગતનો ઉપકારી, મહાપ્રતાપશાલી અને આકાશને સેવનાર અર્થાત્ આકાશમાં પરિભ્રમણ કરનાર સૂર્યને જોઈને અર્થાત્ તેનો અસ્ત જાણીને સજ્જનોને રાત્રિભોજન કરવું શું યોગ્ય છે! અર્થાત્ સર્વથા રાત્રિભોજનનો ત્યાગ કરવો જ જોઈએ ॥ ૫૯ ॥

कदापि नैमित्तिकवत्तपस्विनो निमित्तमेते ब्रुवते न किंचन ।
यतश्चरित्रेण निमित्तभाषणात्तमिस्रपक्षाद्विधुनेव हीयते ॥ ६० ॥

हे साहे, एते पूर्वोक्तषड्व्रतपालकाः प्रत्यक्षा वा श्रीमदाकारितागताः पुर उपविष्टास्तपस्विनः साधवः कदापि कस्मिन्नपि व्यतिकरे नैमित्तिकवन्निमित्तज्ञा इव किंचन अङ्ग-स्वप्न-स्वर-भौम-व्यञ्जन-लक्षण-उत्पात-अन्तरिक्षम् एतेष्वष्टसु निमित्तेषु किमपि निमित्तं ग्रहचाराङ्गस्फुरणशकुनस्वरादिकं न ब्रुवते न कथयन्ति । अथ वा ज्यौतिषिका इव किमपि शुभाशुभादिग्रहविचारं न भाषन्ते। यतः कारणात्तस्य निमित्तस्य अष्टाङ्गनिमित्तानां वा ज्यौतिष्कादेर्वा भाषणात्कथनाच्चारित्रेण संयमेन हीयते क्षीयते । केनेव । विधुनेव । यथा तमिस्रा कृष्णात्पक्षात् विधुना चन्द्रेण क्षयः प्राप्यते क्षीणीभूयते । यदुक्तमुत्तराध्ययने—'जेलक्खणं च सुविणं च अंगविज्जं च जेपउं जंति न हुते समणावुच्चंति । एवमायरियेहिं अक्खायम् ।' इति ॥ इति सप्तमं निमित्ताद्यभाषणव्रतम् ॥

શ્લોકાર્થ

હે રાજન્, સાધુઓ ક્યારેય પણ જ્યોતિષીની જેમ અષ્ટાંગનિમિત્તને કહેતા નથી. કૃષ્ણપક્ષથી જેમ ચન્દ્રનો હ્રાસ થાય છે તેમ નિમિત્તના કથનથી સંયમીઓના સંયમનો હ્રાસ થાય છે. ॥ ૬૦ ॥

इति व्रतान्सप्त बिभर्ति संयतव्रजः शिवश्रीपरिरम्भलोलुपः ।
वसुंधराभोग इवाम्भसां प्रभूञ्छिखाः शिखीव द्युमणिर्हयानिव ॥ ६१ ॥

हे साहे, संयतानां सर्वविरतिभाजां साधूनां व्रजः समुदाय इत्यमुना प्रकारेण पूर्वव्यावर्णितस्वरूपान् सप्तसंख्याकान् व्रतान्नियमविशेषान् बिभर्ति धत्ते। किंभूतः। शिवश्रिया मोक्षलक्ष्म्या परिरम्भे आलिङ्गने लोलुपः लालसः। क इव बिभर्ति। वसुंधराभोग इव। यथा सप्तद्वीपाया वसुंधराया आभोगो विस्तारः। 'प्रपञ्चाभोगविस्तारः' इति हैम्याम्। सप्त लवण-क्षीर-दधि-घृत-सुरा-इक्षु-वारिनाम्नः अम्भसां प्रभून् समुद्रान्। 'यादःस्रोतोवार्नदीशः सरस्वान्' इति हैम्याम्। धत्ते। पुनः क इव। शिखीव। यथा वह्निः सप्त शिखा ज्वाला धत्ते। 'विभावसुः सप्तोदर्चिः स्वाहाग्राही' इति हैम्याम्। पुनः क इव। द्युमणिरिव। यथा नभोरत्नं सहस्ररश्मिः सप्त हयान् स्वरथे सप्ताश्वान् धारयति॥

શ્લોકાર્થ

સમસ્ત પૃથ્વી જેમ લવણ, ક્ષીર, દધિ, ઘૃત, સુરા, ઇક્ષુ અને વારિ એ સાત સમુદ્રને ધારણ કરે છે, અગ્નિ સાત જ્વાલાને ધારે છે, અને સૂર્ય સાત અશ્વોને વહન કરે છે તેમ મોક્ષલક્ષ્મીના લોલુપી સાધુ-પુરુષો ઉપર્યુક્ત સાત વ્રતોને ધારણ કરે છે. ॥ ६१ ॥

पुरातनैराचरितानि सूरिभिर्यथा तथा धर्तुमहं न तान्यलम्।
मतङ्गजप्रक्षरधारणक्षमा मतङ्गजा एव न यत्तुरङ्गमाः॥ ६२॥

हे नृपते, अहं स्वल्पमनःकायबलाकलितकलिकालोत्पन्नजनः तथा तेन प्रकारेण तानि सप्त व्रतानि धर्तुं धारयितुं नालं न समर्थोऽस्मि। तथा कथम्। यथा येन प्रकारेण संपूर्णाद्भितमनोवाक्कायबलशालिभिः सिद्धिसंप्राप्त्युचितं चारुसंहननैः सुषमासमयसंप्राप्तावतारैः पुरातनैः प्राचीनैः सूरिभिराचार्यैरुपलक्षणादुपाध्यायगणावच्छेदकसाधुभिरप्याचरितानि सम्यक्पालितानि यद्यस्मात्कारणान्मतङ्गजानां संनाह्यानां समरोचितानां दन्तिनां प्रक्षराणां 'पाखर' इति लोकप्रसिद्धानां धारणे उद्वहने परिधाने वा मतङ्गजा एव क्षमाः समर्थाः स्युः न पुनस्तुरङ्गमाः स्वयोग्यप्रक्षरधारणे समर्था अप्यश्वाः किं गजानामतिशायिभारदुर्वहां प्रक्षरां धारयन्ति। अपि तु न तथा। अहमपि पूर्वाचार्यानुष्ठितोत्कृष्टानुष्ठानं विधातुं समर्थोऽपि देशकालस्वमनोत्रपुर्बलानुरूपमनुष्ठानमाचराभिलोकोक्त्या खरग्रहणं निन्द्यम्। किं च तस्य मूलत एव प्रक्षरैव न भाति तद्ग्रहणमयुक्तमेव यानेषु रत्नत्वात्प्रक्षरधारित्वाच्च अश्वाभिधानं न्याय्यमेव॥

શ્લોકાર્થ

રાજન્, પૂર્વાચાર્યોએ આ સાત વ્રતોને જેવી રીતે આચર્યાં હતાં તેવી રીતનું આચરણ કરવામાં હું શક્તિશાળી નથી. ખરેખર હાથીની અંબાડીને હાથીઓ જ વહન કરી શકે છે પરંતુ તેમાં અશ્વો અશક્ત છે. ॥ ६२ ॥

श्रुतोक्तयावद्व्रतपालने ददाप्यलं न किंचित्तु तथापि शक्तितः ।
विधिं विभर्म्येष तरेन्न तारको नदीमपीशस्तरणेऽम्बुधेर्न यः ॥ ६३ ॥

हे नरेन्द्र, श्रुते शास्त्रे उक्तः प्ररूपितः कथितः यावान् समग्रः यावत्परिमाणमस्येति यावान् । 'यावज्जनरञ्जनव्रती' इति नैषधे । 'समग्रलोकानां रञ्जने प्रीणने व्रतमस्यास्तीति' इति तद्वृत्तिः । विधिः कर्तव्यार्थोपदेश आचारो वा तस्य पालने आचरणे यदापि यद्यपि नालं नाहं प्रभुः, तथापि तर्हि यथां शक्तितः स्वसामर्थ्यानुसारात् यादृशी व्रतपालनशक्तिस्तादृशमित्यर्थः । तु पुनः किंचित्किमपि अल्पमात्रं देशकालानुरूपमाचारमाचरामि पालयामि । युक्तोऽयमर्थः । यस्तारकः स्वकलया जलातिक्रामकः अम्बुधेः समुद्रस्य तरणे भुजाभ्यामुत्तरणे नेशः प्रभुर्न स्यात् स तारकः नदीं समुद्रापेक्षया स्वल्पपरिमितसलिलां सरितं किं न तरेन्नोल्लङ्घयेत परपारं न यायात् । अपि तु तरेदेव ॥ इति स्वस्य व्रतपालनसामर्थ्यमुक्तम् ॥

શ્લોકાર્થ

યદ્યપિ શાસ્ત્રોક્ત વિધિ પ્રમાણે વ્રત પાલનમાં હું અસમર્થ છું. છતાં શક્તિ મુજબ અંશતઃ તો પાલન કરું જ છું. તરવૈયો ભુજાથી સમુદ્રનું ઉલ્લંઘન કરી શકતો નથી છતાં નદીને તો પાર કરે છે જ. ॥ ૬૩ ॥

इदं निशम्य प्रमदं दधन्नृपः प्रणीय गोष्ठीमितरां च तात्त्विकीम् ।
परीक्षितुं रत्नपरीक्षको मणीनिवेहमानः पुनरित्यवोचत ॥ ६४ ॥

नृपो राजा विभुं सूरिं परीक्षितुं गुरोः पूर्वोक्तव्रतानां परीक्षां कर्तुमीहमानो निजहृदि वाञ्छनपुनर्व्याघुट्य इत्यग्रे वक्ष्यमाणप्रकारेणावोचत वदति । परीक्षितुं क इव । रत्नपरीक्षक इव । यथा माणिक्यपरीक्षाकारकः 'जवहरी' इति लोके प्रसिद्धः । स मणीन् परीक्षते रत्नगुणान् परीक्षयति । अल्पानल्पं वा तन्मूल्यं विधत्ते । नृपः किं कुर्वन् । इदं सूरिनिगदितव्रतस्वरूपं निशम्य आकर्ण्य प्रमदमानन्दं दधद्बिभ्रत् । किं कृत्वा । इतरां एतस्या वार्तायाः पृथग्वर्तिनीं तात्त्विकीं धर्मतत्त्वसंबन्धिनीं गोष्ठीं प्रणीय कृत्वा ॥

શ્લોકાર્થ

આ પ્રમાણેની આચાર્ય ભગવંતની વાણી સાંભળીને અને અન્ય અન્ય ધર્મગોષ્ઠી કરીને હર્ષ ધારણ કરતો રાજા, રત્નની પરીક્ષાનો અભિલાષી ઝવેરીની જેમ સૂરિજીની પરીક્ષા કરવાની ઇચ્છાથી બોલ્યોઃ ॥ ૬૪ ॥

पुरेऽनयीवावनिमानुपेयिवानथ एष मीने तरणेस्तनूरुहः ।
स मत्सरीवापकरिष्यति प्रभो क्षितेः पतीनामुत नीवृतां किमु ॥ ६५ ॥

हे सूरे, यः कृष्णविक्रमार्कादीनां संतापकारकः एष प्रत्यक्षतया लोकैर्दुष्टाशय इत्युच्यमानः मद्द्वादशराशौ समेतो वा तरणेर्भास्करस्य तनूरुहः पुत्रः शनैश्चरो मीने मीनराशौ उपेयिवानागतोऽस्ति । क इव । अवनिमानिव । यथा अनयी अन्यायकारको भूपतिः पुरे नगरे उपैति । हे प्रभो, स शनिर्मत्सरीव अमर्षयुक्त इव पिशुन इव वा । 'पिशुनः सूचको नीचो द्विजिह्वो मत्सरी खलः' इति हैम्याम् । किमु क्षितेः पतीनां राज्ञामुताथ वा किमु निवृतां देशानाम्, देशग्रहणेन देशवासिजनानां दुर्भिक्षडमरमरकपरचक्रादिकोपद्रवकरणादिना अपकरिष्यति दुष्टं विधास्यति । 'वितर्के किं किमूत च' इति हैम्याम् ॥

શ્લોકાર્થ

હે ભગવંત! અન્યાયી રાજા જેમ પ્રજાને સંતાપકારી છે તેમ સંતાપકારી શનિ મારી રાશિથી બારમી મીન રાશિમાં આવેલો છે તો મત્સરી શનિ મને અથવા મારા રાષ્ટ્રને શું શું ઉપદ્રવ કરશે! ॥ ૬૫ ॥

गुरुर्जगौ ज्यौतिषिका विदन्त्यदो न धार्मिकादन्यदवैमि वाङ्मयात् ।
यतः प्रवृत्तिर्गृहमेधिनामियं न मुक्तिमार्गे पथिकीबभूवुषाम् ॥ ६६ ॥

गुरुर्हीरसूरिर्जगौ पातिसाहिं प्रत्युवाच । अदः एतत् श्रीमत्पृच्छ्यमानं ग्रहादीनां चारशुभाशुभपरिज्ञानं ज्यौतिषिका ज्योतिःशास्त्रविदो विदन्ति जानन्ति । पुनरहं धार्मिकाद्धर्मसंबन्धिनो वाङ्मयात् शास्त्रादन्यत्परं वाङ्मयं नावैमि न वेद्मि । यतः कारणादियं ग्रहादीनां शुभाशुभपरिणतिकथनादिका प्रवृत्तिः प्रवर्तनं व्यापारः प्रकर्षेण वृत्तिराजीविका वा गृहमेधिनां गृहस्थानामास्ते । परं मुक्तिमार्गे मोक्षाध्वनि पथिकीबभूवुषां पान्थीभूतानां मोक्षमार्गे प्रवृत्तानामियं प्रवृत्तिर्न स्यात् ॥ इति परीक्षार्थं साहिप्रश्ने गुरोर्निषेधवाक् ॥

શ્લોકાર્થ

ગુરુભગવંતે કહ્યું: રાજન્ આ વિષય તો જ્યોતિષશાસ્ત્રીઓનો છે તેઓ જ જાણે; હું તો ધર્મશાસ્ત્ર સિવાય અન્ય કંઇપણ જાણતો નથી. ભવિષ્યકથનની પ્રવૃત્તિ ગૃહસ્થોની છે પરંતુ મોક્ષમાર્ગના પથિક સાધુ ભગવંતોની હોતી નથી. ॥ ૬૬ ॥

निपीय स श्रोत्रपुटैः सुधाशनः सुधां सुधांशोरिव तां प्रभोर्गिरम् ।
पुनर्महीमण्डलमत्स्यलाञ्छनश्चकार वाणीं वदनानुषङ्गिनीम् ॥ ६७ ॥

स साहिः पुनर्महीमण्डलस्य क्षोणीचक्रस्य मत्स्यलाञ्छनः अतिशायिरूपवत्त्वेन रतिपतिः । 'निषधवसुधामीनाङ्कस्य प्रियाङ्कमुपेयुषः' इति नैषधे । स साहिर्वाणीं वाचं वदनानुषङ्गिणीं मुखपद्मसंगतां चकार कृतवान् । उवाचेत्यर्थः । किं कृत्वा । श्रोत्रपुटैः स्वकर्णरूपपत्रपुटकैः प्रभोः सूरेः ताम् अहं धर्मशास्त्रादन्यन्न वेद्मीति लक्षणां गिरं वाणीं निपीय सादरमाकर्ण्य पीत्वा च । क इव । यथा अमृतपानकृद्देवः सुधांशोश्चन्द्रमसः सुधां निपीयते । 'पीङ् पाने' दिवादिरात्मनेपदी च ॥

श्लोकार्थ

જેમ દેવો ચન્દ્રથી સુધાનું પાન કરે તેમ ગુરુભગવંતની વાણીસુધાનું પાન કરીને ભૂમંડળમાં કામદેવ સ્વરૂપી રાજા બોલ્યો. ॥ ૬૭ ॥

द्युतामिवार्काः पयसामिवार्णवा यतः श्रुतीनां निधयः स्थ सूरयः ।
इदं न जानीथ ततः कथं भवेदगोचरः कश्चन सर्वविच्चिदाम् ॥ ६८ ॥

हे सूरयः, यतः कारणाद्यूयं श्रुतीनां सर्वशास्त्राणां निधयः स्थ निधानानि वर्तध्वे । के इव । अर्का इव । कविसमयोक्तद्वादशानामपेक्षया बहुत्वम् । यथा भास्करा द्युतां कान्तीनां निधयः । पुनः क इव । अर्णवा इव । अत्रापि कविसमयानुसरणात्सप्तानामपेक्षया बाहुल्यम् । यथा समुद्राः पयसां पानीयानां निधयः सन्ति । जैनसमयानुसारेण त्वसंख्यातास्तत्रापि बहुत्वमेव । ततस्तस्मात्कारणादिदं मदुक्तं शौरेर्मीनराशावागमनफलमन्यग्रहादिचारागमादिफलं वा कथं केन प्रकारेण न जानीथ वित्थ । युक्तोऽयमर्थः । उक्तमर्थमर्थान्तरेण वा द्रढयति—कविः सर्वं समस्तमतीतानागतवर्तमानरहोगतप्रकटभूतं विदन्ति जानन्तीति सर्वज्ञास्तेषां चिदां ज्ञानानां कश्चन पदार्थोऽगोचरः अविषयः अज्ञेयः । अपि तु सर्वमपि सर्वज्ञज्ञानगोचर एव । तस्माद्यूयं समस्तं स्वपरशास्त्राणि जानीथ एवेति सर्वज्ञज्ञानानां महत्त्वापेक्षया बहुत्वम् । अथ वा मतिश्रुतावधिमनः पर्यवकेवलाभिधानानां बहूनां ज्ञानानामप्यपेक्षया बहुत्वम् ॥

શ્લોકાર્થ

હે સ્વામિન્, સૂર્ય જેમ તેજનો ભંડાર છે, સમુદ્ર જેમ જલનો ભંડાર છે તેમ આપ સર્વશાસ્ત્રના નિધાન છો, આપ સ્વપરશાસ્ત્રોના જ્ઞાતા છો, તો સર્વજ્ઞના જ્ઞાનની જેમ આપના જ્ઞાનમાં શું કોઇપણ પદાર્થ અગોચર હોઇ શકે ! અર્થાત્ નહીં જ. ॥ ૬૮ ॥

प्रवृत्त्य वार्तास्वितरासु तत्फलं पुनः पुनः प्रश्नयति स्म भूधनः ।
यदा तदा स्यादपरं न धर्मतः शशाङ्कबिम्बादमृतादिवोदगात् ॥ ६९ ॥

भूधनोऽकब्बरः पुनः पुनर्वारं वारं तत्फलं तस्य मीनराशिगतस्य छायासुतस्य फलं प्रश्नयति स्म शुभाशुभविनिर्माणकारणं पृष्टवान् । किं कृत्वा । इतरासु स्वद्वाद-शराशिस्थमन्दफलप्रश्नाद्परासु वार्तासु किंवदन्तीषु प्रवृत्य प्रवृत्तिं कृत्वा मध्ये मध्ये अन्यां वार्तां विधाय । पुनर्मुहुस्तदेवानुयुनक्ति स्मेन्यर्थः । यदा यस्मिन्काले तदा स्यात् सूरिवक्त्रा धर्मतः अपरमन्यन्नोदगात् न प्रकटीभूतम् । कस्मादिव । शशाङ्कबिम्बादिव । यथा चन्द्रमण्डलादमृतात्पीयूषादन्यन्नोद्गच्छति ॥

श्લોકાર્થ

અકબર બાદશાહ જ્યારે બીજી બીજી અન્ય વાતોની મધ્યમાં પણ વારંવાર શનિના શુભાશુભ ફલને પૂછે છે ત્યારે ચન્દ્રથી જેમ અમૃત તેમ આચાર્ય ભગવંતના મુખમાંથી ધર્મ સિવાય અન્ય કોઈ પણ વાત પ્રગટ થતી નથી. ॥ ૬૯ ॥

तदा मुदोर्वीवलयोर्वशीवशो विधाय शेखं स्वसवेशदेशगम् ।
स बन्दिवृन्दारकवत्प्रणीतवान्पुरोऽस्य सद्भूतगुणस्तुतिं गुरोः ॥ ७० ॥

तदा तस्मिन् समये सूरिसम्यक्परीक्षाकरणानन्तरं प्रक्रमे स उर्वीवलयस्य मेदिनी-मण्डलस्य उर्वशीवशः पुरूरवाश्चक्रवर्ती । 'तमेनमुर्वीवलयोर्वशीवशः' इति नैषधे । तथा 'पुरूरवा बालपेल उर्वशीरमणश्च सः' इति हैम्याम् । अकब्बरो मुदा हर्षेण कृत्वा अस्य शेखस्य यवनजातिगुरुप्रायस्य पुरोऽग्रे गुरोः सूरीन्दोः सभूताना सतां वर्णनीयानां भूतानां विद्यमानानाम् । 'भूतैर्गुणैर्भुवि भवन्तमभिष्टुवन्तः' इति भक्तामरस्तवे । स्तुति-वर्णनां प्रणीतवान् चकार । किंवत् । बन्दिवृन्दारकवत् । यथा मङ्गलपाठकपुंगवो गुणानां स्तुतिं प्रणयति । वृन्दारकशब्देन प्राधान्यमपि दृश्यते । यथा चम्पूकथायाम्—'सोऽहं हंसायितुं मोहाद्बकः पङ्गुर्यथेच्छति । मन्दधीस्तद्वदिच्छामि कविवृन्दारकायितुम् ॥' इति । स्तुवति स्म । किं कृत्वा । शेखम् अबलफैजनामानं निजसामन्तीभूतं स्वस्यात्मनः सवेशदेशं समीपभूभागं गच्छतीति तादृशं विधाय । स्वकीयसंनिधावाकार्येत्यर्थः ॥

श्લોકાર્થ

ત્યારે અતિ આનંદપૂર્વક રાજાએ શેખ અબ્દુલફૈજી પાસે આવી તેમની આગળ મંગલપાઠકની જેમ સૂરિજીના સદ્ભુત ગુણોની ભૂરિ ભૂરિ પ્રશંસા કરી. ॥ ૭૦ ॥

मया विशेषात्परदर्शनस्पृशो गवेषिताः शेख न तेषु कश्चन ।
व्यलोकि वाचंयमचक्रिणः सदृङ्भृगेषु कोऽप्यस्ति मृगेन्द्रसंनिभः ॥ ७१ ॥

पराण्यन्यानि बौद्ध—नैयायिक-सांख्य-वैशेषिक-नास्तिक-जैमिनीयादीनि दर्शनानि स्पृशन्त्यनुभवन्त्याद्रियन्ते इति परदर्शनस्पृशः परपाक्षिका मया विशेषात् स्वप्रागल्भ्यप्रकल्पितानल्पप्रश्ननिर्वाहकरणप्रावीण्यप्रगुणीभवद्भूरितममन्दाक्षविलक्षीभवनपरिज्ञानान्नवेषिता दृष्टाः परं तेषु तत्तद्दर्शनेषु कश्चन वाचंयमचक्रिणः हीरसूरेः सदृक् तुल्यो न व्यलोकि न निरीक्षितः। युक्तोऽयमर्थः। मृगेषु हरिणेषु मध्ये कोऽपि कश्चिदपि मृगेन्द्रस्य केसरिणः संनिभः साधारणोऽस्ति। अपि तु न कोऽपि ॥

श्લોકાર્થ

મેં, બૌદ્ધ, નૈયાયિક, સાંખ્ય, વૈશેષિક, મિમાંસક અને નાસ્તિક એ દર્શનના વિશારદોને શોધ્યા પરંતુ તે બધામાં આ આચાર્યસમાન અન્ય કોઇ જોવામાં આવ્યો નહીં. ખરેખર હરણોમાં ક્યાંય સિંહનું દર્શન હોઈ શકે ! અર્થાત્ નહીં જ. ॥ ૭૧ ॥

स्ववासयोग्यां वसतिं न कुत्रचिन्निरीक्ष्यमाणैरवसादिभिर्गुणैः ।
स्वयंभुवाभ्यर्थ्य निवस्तुमात्मनां मणिर्मुनीनां किमकारि मन्दिरम् ॥ ७२ ॥

हे शेख, गुणैः शमदमार्जवमार्दवादिभिरभ्यर्थ्य बह्वीं प्रार्थनां कृत्वा आत्मनां स्वेषां निवस्तुं नितरां समकालं सर्वैरेकत्र संभूय वासं विधातुं स्थातुं स्वयंभुवा ब्रह्मणा कर्त्रा पार्श्वे। उत्प्रेक्ष्यते—मुनीनां मणिः सूरिरत्नं मन्दिरं वसतिः किमकारि निर्मापितेव। गुणैः किं कुर्वाणैः। कुत्रचित्कस्मिन्नपि स्थाने स्वेषामात्मनां वासस्य निवसनस्य योग्यामुचितां वसतिं वासवेश्म नैव निरीक्ष्यमाणैरपश्यद्भिः अत एव वासादिभिरेव मेदस्विभिः ॥

શ્લોકાર્થ

શેખ, મને લાગે છે કે શમદમાદિગુણોએ પોતાના નિવાસને યોગ્ય અન્ય કોઈ સ્થાન નહીં જોવાથી બધાએ એકત્ર થઈને બ્રહ્મા પાસે માગણી કરી હશે કે અમારું નિવાસસ્થાન આ આચાર્ય ભગવંત જ હો ! ॥ ૭૨ ॥

असौ मुहुर्मीनभुजः शनेः फलं मयानुयुक्तोऽपि न किंचिदूचिवान् ।
यतः क्वचिद्भङ्गुरसंगरो महान्भवेत्सुराणामचलोऽपि चाचलिः ॥ ७३ ॥

हे शेख, असौ हीरसूरिर्मया चतुर्दिक्चक्रचक्रिणा मुहुर्वारं वारं मीनभुजो मीनराशेर्भोक्तुः शनेः शनैश्चरस्य फलं भूपजनपदद्विपदचतुष्पदादीनां क्षेमाक्षेमनिर्माणलक्षणमनुयुक्तोऽपि पृष्टोऽपि सन् किंचित्किमप्यंशमात्रमपि नोचिवान्न बभाषे। यतः कारणान्महानुत्तजनः क्वचित् क्वाप्येकान्ते पर्षदि वा भङ्गुरसंगरो भञ्जनशीलप्रतिज्ञः निर्मुक्ताङ्गीकारः

स्यात्। 'प्रतिज्ञागूश्च संगरः' इति हैम्याम्। एतेन प्रागुक्तं यदहं ज्योतिर्निमित्तादि न वच्मि तत्परीक्षार्थमेव केवलं मया स्वमाहात्म्यभयाद्यपि दर्शयित्वा पृष्ठम्। पुनरेतेन सत्त्वमात्ममार्गं चानुसृत्य शनिफलं किमपि नोचे। इदं सत्यम्। सुराणामचलः मेरुः कथंचिच्चाचलिरतिशयेन चञ्चलः स्यात्, अपि तु न कदाचिदपि। न कम्पते चलनशील-श्चाचलिः। 'चलिपतिवदिसाहिभ्य इणिङ्कित्त्वं च, पापतिः वावदिश्चाचलिःसासहिः इति चत्वारः प्रयोगाः' इति प्रक्रियाकौमुद्याम् ॥

श्लोकार्थ

શેખ, મારા વડે મીન રાશિમાં આવેલા શનિનું ફલ વારંવાર પુછાયું તો પણ આ મહાત્માએ કંઇપણ કહ્યું નહીં. અરે, કોઇક જ ભગ્નપ્રતિજ્ઞ હોય છે. આ મહાત્મા તો મેરૂપર્વતથી પણ અચલ છે. ॥ ૭૩ ॥

यथा सुधाब्धेरपरो न वारिधिर्न सिद्धसिन्धोरपरा तरङ्गिणी।
न पादपः कश्चन कल्पपादपात्परो नृपः कोऽपि न चक्रवर्तिनः ॥ ७४ ॥

न धेनुरन्या सुरभेः सुधाभुजां पदं न चान्यत्परमेष्ठिनः पदात्।
परो न धर्मः करुणाविधेर्यथा तथास्ति कश्चिन्न वशी विभोः परः ॥ ७५ ॥

हे शेख, तथा तेन प्रकारेण विभोरस्मात्सूरेः परोऽन्यः कश्चिद्वशी जितेन्द्रियमनाः कथनकरणयोः सदृक्षो निजाङ्गीकृतप्रतिज्ञानिर्वाहको नास्त्येव। तथा कथम्। यथा सुधा-ब्धेर्यस्मिन् पीयूषप्रमुखचतुर्दशरत्नान्युत्पाद्यन्ते तस्मात्क्षीरसमुद्रादपरः कः श्लाघ्यो वारि-धिरस्ति। न कश्चिदपि। यथा सिद्धसिन्धोर्गङ्गाया अपरा इतरा जगत्यां चित्रकारिका त्रैलोक्येऽपि त्रिभिः प्रवाहैः वाहिनी निर्मलजला च तरङ्गिणी नास्ति। यथा कल्पपाद-पात्सुरतरोः परः कश्चन कामदायकः पादपो नास्ति। पुनर्यथा चक्रवर्तिनः षट्खण्डपृ-थिवीपतिरन्यः कश्चिन्नृपो नास्ति। पुनर्यथा सुधाभुजां निर्जराणां सुरभेः कामधेनोरपरा कामदुधा सकलकामप्रदा धेनुर्न विद्यते। पुनर्यथा परमेष्ठिनो जगन्नाथस्य पदात्पदव्या अन्यत् अपरं पदं न वर्तते। यत्र त्रैलोक्यैश्वर्यम्, यत्र च शिबिकावाहकाश्चतुः षष्ठिः सुरासुरेन्द्रा-श्चतुस्त्रिंशदतिशयाष्टमहाप्रातिहार्यादिलक्ष्मीस्तत्पदादपरं किमपि पत्। अपि तु न अथवा परमेष्ठिनः स्थानान्मोक्षादपरं पदमनन्तसुखानन्दज्ञानात्मकं परमपदमित्युच्यमानं निर्वर्तते। पुनर्यथा करुणाविधेर्दयापालनात्परो धर्मो नास्ति। यदुक्तम्—'नास्ति धर्मो दयापरः' इति ॥ युग्मम् ॥

श्लोकार्थ

શેખ, ક્ષીરસમુદ્રસમાન અન્ય કોઇ સમુદ્ર નથી, ગંગાસમાન અન્ય કોઇ નદી નથી, કલ્પવૃક્ષસમાન અન્ય કોઇ વૃક્ષ નથી, ચક્રવર્તીસમાન અન્ય કોઇ રાજા નથી, કામધેનુ

સમાન અન્ય કોઇ ગાય નથી, મોક્ષસ્થાન સમાન અન્ય કોઇ સ્થાન નથી, અને દયાધર્મ-સમાન અન્ય કોઇ ધર્મ નથી તેમ આ આચાર્ય સમાન અન્ય કોઇ જીતેન્દ્રિય સાધુ નથી. ॥ ૭૪ ॥ ૭૫ ॥

श्रवःपथातिथ्यमनायि यादृशो वशी दृशा दृश्यत एव तादृशः ।
इदंगुणौधान्गणयञ्जगद्गिरामगोचरान्किं स्थविरोऽभवद्विधिः ॥ ७६ ॥

हे शेख, यादृशो यादृक्प्रकारो मत्स्यदृश्यैः सम्यक् वर्ण्यमानः असौ वशी पञ्चेन्द्रियाणि मनश्च वशे स्वाधीनप्रचाराणि सन्त्यस्येति योगीन्द्रः श्रवःपथस्य श्रवणमार्गस्य आतिथ्यमातिथेर्यो प्राघुणतां वा अनायि मया नीतः । श्रुत इत्यर्थः । तादृशस्तादृग्गुणप्रकार एव दृशा लोचनेन दृश्यते विलोक्यते । हे अबलफैज शेख, जगतां विश्वजनानां गिरां वाचामगोचरान् अविषयान् सुरासुरनरैरपि संस्तोतुमशक्यान् कथयितुं वा इदंगुणौधान् अस्य सूरेर्गुणगणान् गणयन् संख्यां प्रापयन् । उत्प्रेक्ष्यते—विधिर्विधाता स्थविरो वृद्धः किमभवत्संजात इव तन्नामापि ॥

શ્લોકાર્થ

હે શેખ, આ આચાર્યને મેં જેવા પ્રકારના સાંભળ્યા હતા તેવા પ્રકારના જ સાક્ષાત બ્રહ્મા જ ન હોય! ॥૭૬ ॥

ददाति धाता गिरिशश्च शक्तिभृच्चतुर्मुखीं पञ्चमुखीं च षण्मुखीम् ।
भुजंगराजो द्विसहस्रजिह्वतां बिभर्ति संस्तोतुमिवोत्सुकीभवन् ॥ ७७ ॥

हे शेख, यं सूरिराजं संस्तोतुं वर्णयितुम् । उत्प्रेक्ष्यते—उत्सुकीभवन्नुत्कण्ठतां धारयन् सन् धाता जगत्कर्ता चतुर्णां मुखानां समाहारश्चतुर्मुखीमिव दधाति धत्ते । पुनर्गिरीशः शंकरः पञ्चमुखीं पञ्चवक्त्राणीव दधाति बिभर्ति । पुनः शक्तिभृत्स्वामिकार्तिकः षण्मुखीं षड् वदनानीव कलयति । पुनर्भुजंगराजो नागेन्द्रः शेषनागो द्विसहस्रजिह्वतां द्वे सहस्रे जिह्वा रसनाद्विसहस्रमिता वा जिह्वा रसज्ञा यस्य तस्य भावः जिह्वानां विंशतिशतीं बिभर्ति धारयति । 'प्रजापतिर्ब्रह्म चतुर्मुखो भवान्,' तथा 'मृत्युंजयः पञ्चमुखोऽष्टमूर्तिः,' तथा 'कुमारः' इति हैम्यां त्रयमपि। तथा 'यस्यासिन्नुरगप्रभोरिव भवेज्जिह्वासहस्रद्वयम्' इति चम्पूकथायाम् ॥

શ્લોકાર્થ

શેખ, મને લાગે છે કે સૂરિજીની સ્તુતિ કરવા માટે ઉત્સુક થયેલા બ્રહ્માએ ચારમુખને, શંકરે પાંચમુખને, કાર્તિકસ્વામીએ છમુખને અને શેષનાગે બે હજારજીભોને ધારણ કરી હશે! ॥ ૭૭ ॥

कलिं कृतीकर्तुमयं स्वयं वपुर्दधाति धर्मः किमिदंनिभाद्भुवि ।
गुणान्निशम्येति गुरोर्नृपस्तुतांश्चमत्कृतः स स्वपदं मुदागतः ॥ ७८ ॥

हे शेख, भुवि पृथिव्यामिदंनिभादस्य सूरेर्व्याजात् अयं प्रत्यक्षलक्ष्यः स्वयमात्मना धर्मो दयारूपः । उत्प्रेक्ष्यते—किम् । वपुः शरीरं दधाति । किं कर्तुम् । कलिं कलिनामानं युगं कृतीकर्तुं कृतयुगं विधातुं कृतयुगतां प्रापयितुं वा । स शेखः अबलफैजनामा इति पूर्वोक्तप्रकारे नृपस्तुतानकब्बरपातिसाहिना स्वनखेन वर्णितान् गुरोर्हीरविजयसूरेर्गुणान्निशम्य नितरां सोत्कण्ठं सरोमाञ्चं कञ्चुकं श्रुत्वा चमत्कृतो निजहृदये विस्मयं प्राप्तः सन्नदा प्रमोदेन स्वपदं साहिसभाया मध्ये यत्र सर्वेऽपि सामन्तभूपाला उर्ध्वा दमीभूयावतिष्ठन्ते, यत्र च स्वेनाप्यूर्ध्वीभूय स्थीयते तस्मिन् स्थाने जग्मिवान् ॥ इति शेखपुरः साहिवर्णिता गुरोर्गुणाः ॥

શ્લોકાર્થ

હે શેખ, પૃથ્વીમાં આ સૂરિજીના બ્હાને કલિયુગને કૃતયુગ કરવા માટે સાક્ષાત્ સદેહે દયાધર્મ આવ્યો ન હોય ! રાજા પાસેથી આ પ્રકારની સૂરિજીના ગુણોની પ્રશંસા સાંભળીને આશ્ચર્ય પામતો શેખ અબ્દુલ પોતાના સ્થાને આવ્યો. ॥ ૭૮ ॥

पिबन्मुनीन्द्रस्य शमामृतं दृशा मुदश्रुदम्भेन तदुद्गिरन्निव ।
अकब्बरो बब्बरवंशमौक्तिकं पुनः पुरस्तस्य गिरं गृहीतवान् ॥ ७९ ॥

अकब्बरसाहिस्तस्य सूरेः पुरोऽग्रे पुनः पुनरपि गिरं वाणीं गृहीतवाञ्जग्राह । उवाचेत्यर्थः । किंभूतः अकब्बरः । बब्बरोऽस्य पूर्वजः पातिसाहिस्तस्य वंशो गोत्रे वेणौ च मौक्तिकं मुक्ताफलोपमः । यदुक्तम्—'समुद्रस्ताम्रपर्णी च वंशः करिशिरस्तथा । उत्पद्यन्ते मौक्तिकानि प्रायोऽमीषु परत्र न ॥' इति वचनप्रमाणयतः । किं कुर्वन्नकब्बरः । दृशा स्वनयनेन कृत्वा मुनीन्द्रस्य हीरसूरेः शमामृतं शान्ततासुधारसं पिबन्नास्वादयन् हृदये एव स्वचमत्कारं वर्णयन् सादरं मुहुः पश्यन् । उत्प्रेक्ष्यते—तच्छमामृतपानं मुदश्रुदम्भेन प्रबलप्रादुर्भवदप्रतिमोदोदीतनयनबाष्पव्याजेन उद्गिरन्वमन्निव अतितृप्ततया बह्वमृतपानं हृदयान्तरादुबहिरुद्गिरन्निव ॥

શ્લોકાર્થ

બબ્બરકુલમાં મૌક્તિક સમાન બાદશાહ અકબર પોતાનાં નેત્રો વડે આચાર્યભગવંતના શાંતસુધારસનું પાન કરતો અને હર્ષાશ્રુના બ્હાને બ્હાર પ્રગટ કરતો વારંવાર સૂરિજીની વાણીને ગ્રહણ કરતો હતો. ॥ ૭૯ ॥

स्फुरन्ति शिष्याः कति वो व्रतीश्वराश्चरित्रदुग्धाम्बुधिनन्दना वराः ।
इभप्रभूणां कलभा इवावनीरुहां सुमानीव करा विवस्वताम् ॥ ८० ॥

हे व्रतीश्वराः सूरयः, वो युष्माकं चरित्रं सदाचरणमूलसंयमस्तदेव दुग्धाम्बुधिनन्दना क्षीरसमुद्रतनया लक्ष्मीः। 'सायमित्थमथ भीमनन्दनाम्' इति नैषधे। नन्दना नन्दिनी आकारेकारान्तौ द्वावपि शब्दौ दृश्येते। ते तस्या वरा भर्तारः संयमिनः। अथ या तया लक्ष्म्या कृत्वा वराः श्रेष्ठाः व्यवहारिणश्चारित्रिणः कति कियत्संख्याकाः शिष्या विनेयाः स्फुरन्ति वर्तन्ते। केषामिव। इभप्रभूणामिव यूथनाथगजराजानामिव। महत्त्वाद्बहुत्वाद्वा बहुत्वम्। कलभास्त्रिंशदब्ददेशीयाः सिन्धुरा भवेयुः। पुनः केषामिव। अवनीरुहामिव। 'रुट-रुहजन्मजैः' इति हैम्याम्। यथा वृक्षाणां सुमानि पुष्पाणीव भवेयुः। पुनः केषामिव। विवस्वतामिव। यथा मार्तण्डानां कराः किरणाः स्युः। इति साहेः गुरून्प्रति शिष्यप्रश्नः।

શ્લોકાર્થ

હે વ્રતીશ્વર, ગજરાજના બાલહસ્તિઓ સમાન, વૃક્ષોનાં પુષ્પો સમાન, સૂર્યનાં કિરણો સમાન અને ચારિત્ર નીરક્ષીરસમુદ્રના શ્રેષ્ઠ પુત્રો સમાન આપને સંયમી એવા કેટલા શિષ્યો છે? ॥ ૮૦ ॥

नृपं प्रति व्याहृतवानिति व्रतीशिता कियन्तो मम सन्ति भूपते ।
इदं मुनीन्द्राननपद्मसंभवं स भृङ्गवद्वाङ्मकरन्दमापपौ ॥ ८१ ॥

ततो व्रतीशिता सूरिर्नृपमकब्बरं प्रति इत्यमुना प्रकारेण व्याहृतवान् भाषते स्म। हे भूपते, मम शिष्याः कियन्तः कतिचिद्वर्तन्ते। परं संख्या नाख्यायि। यतः सन्तः उत्तमा निजगौरवं स्वमुखेनैव न ख्यापयन्ति। यदुक्तम्—'न सौख्यसौभाग्यकरा नृणां गुणाः स्वयं गृहीता युवतीस्तना इव। परैर्गृहीता द्वितयं वितन्वते न तेन गृह्णाति निजं गुणं महान् ॥' इति। ततोऽनन्तरं स भूमान् इदं स्वमदपरिहारद्वारा शिष्यसंख्याकथन-रूपं मुनीन्द्रस्य सूरेराननं मुखमेव पद्मं कमलं तस्मात्संभव उत्पत्तिर्यस्य तादृशं वाक् वचनमेव मकरन्दं मधु आपपौ सादरं श्रृणोति स्म। किंवत्। भृङ्गवत्। यथा भ्रमरकः कमलोद्भवं मकरन्दमापिबति। 'सुरासुरनराकारमधुपापीतपत्कजः' इति सारस्वतव्याक-रणप्रान्ते आपीत इति प्रयोगो दृश्यते॥

શ્લોકાર્થ

રાજાના પ્રશ્નના જવાબરૂપે ગુરુમહારાજે કહ્યું : રાજન્, મારે કેટલાક શિષ્યો છે. આ પ્રકારની સૂરિજીના મુખરૂપી કમલમાંથી ઉત્પન્ન થયેલી વાણીરૂપ મકરંદનું રાજાએ ભ્રમરની જેમ પાન કર્યું. ॥ ૮૧ ॥

जगाद गाजी गणपुंगवं पुनः पुरा मयेति श्रुतिगोचरीकृतम् ।
विलोचनानामिव भोगिनां विभोः सहस्रयुग्मं शमिनां समस्ति वः ॥८२॥

मुद्गलजनपदप्रसिद्धं महत्त्वख्यापकं यवनज्ञातेरभिधानं गाजीति । स गाजी अकब्बरसाहिः गणपुंगवं तपागच्छवृषभं मुख्यं वा प्रति जगाद गदति स्म । हे व्रतीश्वराः, पुरा पूर्वं मया जनवार्तया इति श्रुत्योः श्रवणयोर्गोचरीकृतं विषये विहितमास्ते वर्तते । इति किम् । वो युष्माकं शमिनां शिष्यीभूतानां साधूनां सहस्रस्य युग्मं युगलं द्विसहस्री । सम्यक् विद्यते इति समस्ति । केषामिव । विलोचनानामिव । यथा भोगिनां भुजंगमानां विभोः स्वामिनः शेषनागराजस्य नेत्राणां नयनानां सहस्रद्वयी आस्ते । 'शेषो नागाधिपोऽनन्तो द्विसहस्राक्ष आलुकः' इति हैम्याम् । सहस्रफणामण्डलैर्धरणीधारकत्वात् सहस्रफणानां सहस्रनेत्रद्वयभावात् ॥ इति साहिना स्वयमेवोक्तसूरिशिष्यसंख्या ॥

श्लोकार्थ

ગાજી અકબરે કહ્યું : પૂર્વે મેં સાંભળ્યું હતું કે શેષનાગનાં બે હજાર નેત્રોની જેમ આપને બે હજાર સંયમી શિષ્યો છે ! ॥ ૮૨ ॥

ततः क्षितीन्द्रः व्रतिनां व्रतीश्वर समीपभाजा ममिधाः स्म पृच्छति ।
परस्परं तस्य पुरस्त एव ताः महामणीनामिव तद्विदोऽवदत् ॥ ८३ ॥

ततः स्वयं सूरिशिष्यकथनानन्तरं क्षितीन्द्रः साहिः व्रतीश्वरं सूरिं प्रति समीपं भगवत्संनिधानं भजन्ति इति तत्समयसूरीसमीपस्थायुकानां व्रतिनां साधूनामभिधा नामानि पृच्छति स्म । ततस्तस्य नृपस्य पुरोऽग्रे परस्परमन्योन्यं तद्विदो व्रतिनामज्ञास्त एव व्रतिनो गीतार्था एव ताः पण्डितनामाभिधा अभिधानानि अवदन्कथयति स्म । केषामिव । महामणीनामिव । यथा तद्विदो महामणीगुणवेत्तारः परीक्षका महामणीमभिधा वज्रमरकतवैडूर्यपद्मरागादिनामानि कथयति ॥ इति यतिना परस्पराभिधाननिवेदनम् ॥

શ્લોકાર્થ

ત્યાર પછી રાજાએ આચાર્ય મહારાજની સમીપે રહેલા સાધુઓનાં નામ પૂછ્યાં ! રત્નોના પરીક્ષકો જેમ રત્નોના નામ કહે તેમ મુનિપુંગવોએ રાજાની આગળ પરસ્પરનાં નામ કહ્યાં. ॥ ૮૩ ॥

गृहादथानायितमङ्गजन्मना स खानखानेन च मुक्तमग्रतः ।
महीमरुत्वान्प्रमदादिवोपदां मुनीशितुर्ढौकयति स्म पुस्तकम् ॥ ८४ ॥

अथ गुरोः शिष्याणां नामावधारणानन्तरं महीमरुत्वान् भूमीन्द्रः । 'पृतनाषाडुग्रधन्वा मरुत्वान्मघवा' इति हैम्याम् । प्रमदादानन्दात् उपदां प्राभृतमिव मुनीशितुः सूरेः पुरोऽग्रे पुस्तकं ढौकयति स्म । किंभूतं पुस्तकम् । अङ्गजन्मना शेखूजीनाम्ना वृद्धपुत्रेण गृहात्स्वभवनमध्यादानायितं लोके 'अणाव्यु' इति प्रसिद्धं च पुनः खानखानेन मीयांखाननाम्ना साहिसामन्तेन साहेराप्तेन ततः संग्रामे गूर्जरपातिसाहिविजयविधानसमये श्रीमदकब्बरपातिसाहिरा स्वयं खानखान इति दत्तविरुदेन अग्रतो नृपपुरस्तात् आनीय मुक्तं साहिप्रतिशिष्टशेखूजासूनुना मन्दिरमञ्जूषाभ्यो निष्काश्य मीयांखानस्य हस्ते प्रदत्तं तेन च नृपाग्रे पुञ्जीकृतत् ॥

श्લોકાર્થ

બાદશાહના જ્યેષ્ઠપુત્ર શેખુજીએ ગૃહમંજૂષામાંથી કાઢીને પુસ્તક ખાનખાનને આપ્યું, અને ખાનખાને તે પુસ્તક બાદશાહની આગળ મૂક્યું. અતિઆનંદિત બનેલા બાદશાહે તે પુસ્તક સૂરિજીનાં ચરણકમલમાં ભેટણારૂપે કર્યું. ॥ ८४ ॥

ततस्तदुन्मुद्य पुरो धराविधोरवाचि वाचंयमपुंगवैर्गुरोः ।
रहस्यमेतस्य पुनर्न्यगादि तैरमुष्य सख्युः सखिवत्स्वचेतसः ॥ ८५ ॥

तत आनयनानन्तरं प्रभोः सूरेः वाचंयमपुंगवैर्यतिकुञ्जरैः पण्डिताखण्डलैः तत्पुस्तकमुन्मुद्य समस्ताः पुस्तिकाश्छोटयित्वा धराविधोर्मेदिनीन्दोः पुरोऽग्रे अवाचि वाच्यते स्म । पुनस्तैर्गीतार्थैरेतस्य साहेः पुरोऽमुष्य पुस्तकस्य मध्ये लिखितस्य शास्त्रस्य रहस्यम् इदं पुस्तकमेतन्नाम शास्त्रमत्र चैतद्वाच्यमित्यादि हार्दं न्यगादि कथितम् । किंवत् । सखिवत् । यथा सखिभिर्मित्रैः सख्युः स्वकीयनिरन्तरमनसः सख्युः पुनः स्वचेतसो निजहृदयस्य रहस्यं गुह्यं हार्दं निगद्यते प्रोच्यते ॥

શ્લોકાર્થ

આચાર્ય ભગવંતના પંડિત શિષ્યોએ તે પુસ્તક ખોલીને રાજાની આગળ વાંચ્યું અને મિત્ર જેમ મિત્રની આગળ હૃદયને કહે તેમ મુનિપુંગવોએ તે પુસ્તકના રહસ્યને રાજાને જણાવ્યું. ॥ ८५ ॥

उदीतमङ्गैरिह रुद्रविग्रहैरिवास्तपुष्पध्वजकालकेलिभिः ।
पुनस्तमस्तोमभिदाविदांवरैः परैरुपाङ्गैरिव पद्मिनीवरैः ॥ ८६ ॥

इह पुस्तकगञ्जकमध्ये रुद्रा एकादश तेषां विग्रहैरङ्गैरिव एकादशसंख्याकैः आचाराङ्ग-सूत्रकृदङ्ग-स्थानाङ्ग-समवायाङ्ग-विवाहप्रज्ञप्ती-ज्ञाताधर्मकथाङ्ग-अन्तकृद्दशान्त-उपासकदशा-

ङ्गअणुत्तरोपपातिकादशाङ्ग-प्रश्नव्याकरणाङ्ग–विपाकश्रुताङ्गलक्षणैरङ्गैरुदीतं प्रादुर्भूतम् । किंलक्षणैः अङ्गैः रुद्रविग्रहैश्च । अस्तः क्षिप्तो विनाशितः पुष्पध्वजः कंदर्पस्तथा कालः कलिकालो दैत्यविशेषस्तयोः केलिर्विलासो यैः । 'उदैतमातङ्कितवानशङ्कत' इति नैषधे । पुनरिह पुस्तके पद्मिनीवरैर्नलिनीनाथैर्भास्करैरिव परैरङ्गभ्योऽन्यैर्द्वादशभिः उपपत्तिका-राजप्रश्नीय-जीवाभिगमप्रज्ञापना-जम्बूद्वीपप्रज्ञप्तिका-चन्द्रप्रज्ञप्तिका-सूर्यप्रज्ञप्तिका–निरयावलिका–कल्पिका कल्पावतंसिका–पुष्पिता–पुष्पचूलिका–वृष्णिदशा–इति द्वादशसंख्याकैरङ्गानामेव वाच्य सूचकैरुपाङ्गैरुदीये । किंभूतैः उपाङ्गैः सूर्यैश्च । तमसामज्ञानानां दुष्कृतानां वा अन्धकाराणां स्तोमस्य समूहस्य भिदायां विदारणे विदांवरैः कुशलैः वेत्तृषु मुख्यैः ॥

श्लोकार्थ

આ પુસ્તકમાં કામદેવ અને કલિકાલરૂપી દૈત્યના નાશ અગિયાર રુદ્રો સમાન આચારંગ, સૂયડાંગ, ઠાણાંગ, સમવાયાંગ, વિવાહપ્રજ્ઞપ્તિ, જ્ઞાતાધર્મકથાંગ, અંતકૃતદશાંગ, ઉપાસકદશાંગ, અનુત્તરોપપાતિકદશાંગ, પ્રશ્નવ્યાકરણાંગ અને વિપાકશ્રુતાંગ અને અગિયાર અંગો છે, અને અજ્ઞાનરૂપી અંધકારને ભેદનાર બાર સૂર્ય સમાન ઉપપાતિક, રાયપસેણિય, જીવાભિગમ, જંબૂદ્વીપપ્રજ્ઞપ્તિ, ચંદ્રપ્રજ્ઞપ્તિ, સૂર્યપ્રજ્ઞપ્તિ, નિરયાવલિ કલ્પ, કલ્પાવતંસિક, પુષ્પિત, પુષ્પચૂલિકા અને વહ્નિદશા એ બાર ઉપાંગ છે. ॥ ૮૬ ॥

प्रकीर्णकैर्धर्मधरापतेरिव प्रकीर्णकैः प्रादुरभावि तत्र च ।
परश्वधैश्छेदकरैर्धरारुहामिवांहसां छेदवरागमैस्तथा ॥ ८७ ॥

चतुःप्रमाणैरपि मूलवाङ्मयैश्चतुर्गतीनां प्रतिषेधकैरिव ।
युगेन वा नन्द्यनुयोगशास्त्रयोर्दृशोरिव श्रीजिनशासनश्रिया ॥ ८८ ॥

च पुनस्तत्र पुस्तके चतुःशरण–आतुरप्रत्याख्यान-महाप्रत्याख्यान-भक्तपरिज्ञान-तंदुलवैकालिक-चन्द्राविध्वज-गणिविद्या-मरणविभक्ति-देवेन्द्रस्तव–संस्तारकप्रकीर्णक-इति नामभिर्दशप्रकीर्णकैः प्रादुरभावि प्रकटीभूतम् । उत्प्रेक्ष्यते—धर्मधरापतेः धर्मनाम्नो राज्ञः प्रकीर्णकैश्चामरैरिव । तथा पुनः निशीथ-महानिशीथ–व्यवहार-दशाश्रुतस्कन्ध–पञ्चकल्प–जीमूतकल्प–बृहत्कल्पनामभिः छेद इति संज्ञया वरैः प्रधानैः आगमैः सिद्धान्तैः आविर्भूयते स्म । किंभूतैः । अंहसां पापानां छेदकरैः खण्डशः कारिभिः । कैरिव । परश्वधैरिव । यथा कुठारैः धरारुहां वृक्षाणां शतसहस्रलक्षशः शकलकारकैः भूयते । अपि पुनश्चत्वारि प्रमाणानि येषां तैश्चतुःप्रमाणैः मूलवाङ्मयैः आवश्यकदशवैकालिक-उत्तरायन–पिण्डनिर्युक्तिरितिमूलाभिधानैराद्धान्तैराविरभावि । उत्प्रेक्ष्यते—चतुःप्रमाणत्वेन चतुर्णां नरक-तिर्यङ्–मानव-दानवाहितानां दुष्टानां निकृष्टानां भवभ्रमणहेतूनां नीचजातीनां वा गतीनां प्रतिषेधकैर्निवारकैरिव । वा पुनः नन्दी तथा अनुयोग इति नाम ययोस्तादृशयोः शास्त्रयोर्युगेन

ग्रन्थेन प्रकटीभूतम् । उत्प्रेक्ष्यते--श्रीजिनशासनश्रिया श्रीमन्महावीरार्हन्मतलक्ष्म्या दृशोर्द्वयं नयनयोर्यामलम् किमेतावता पञ्चचत्वारिंशदागमाः संजाताः ॥ युग्मम् ॥

श्लोकार्थ

વળી, આ પુસ્તકમાં ધર્મરાજાના ચામરસમાન ચઉશરણ, આઉરપચ્ચક્ખાણ, મહાપચ્ચક્ખાણ, ભક્તપરિજ્ઞા, તંદુલવૈકાલિક, ચન્દ્રવિદ્યા, ગણિવિદ્યા, મરણવિભક્તિ, દેવેન્દ્રસ્તવ અને સંસ્તારપ્રકીર્ણક એ દશપયન્ના છે. અને પાપોરૂપી વૃક્ષોને ઉખેડી નાખવા માટે કુઠારસમાન નિશીથ, મહાનિશીથી, વ્યવહારદશા શ્રુતસ્કંધ, પંચકલ્પ, જીભૂતકલ્પ અને બૃહતકલ્પ એ છ છેદસૂત્રો છે. વળી ચારગતિના પ્રતિબંધકરૂપ આવશ્યક, દશવૈકાલિક, ઉત્તરાધ્યયન, અને પિંડનિયુક્તિ એ ચાર મૂલસૂત્રો છે. તેમજ જૈનશાસનની લક્ષ્મીના બે નેત્રોસમાન નંદી અને અનુયોગદ્વાર સૂત્રો છે. ॥ ८७ ॥ ८८ ॥

अलंकृतिज्योतिषकाव्यनाटकप्रमाणवेदान्तसलक्षणागमान् ।
अदर्शयन्साधुसुधांशुसाधवो नृपस्य भावानिव भानुभानवः ॥ ८९ ॥

अथापरशासनसत्कशास्त्राणां नामान्याह—अलंकृतिः वाग्भटालंकार-काव्यानुशासन-छन्दोनुशासन-वृत्तरत्नाकरादयोऽलंकारग्रन्थाः, ज्यौतिषाणि नारचन्द्र-आरम्भसिद्धि-वाराहीसंहिता-खण्डखाद्य-कर्णकुतूहलादीनि ज्योतिःशास्त्राणि, काव्यानि रघुवंश-मेघदूत-कुमारसंभव-किरात-माघ-नैषध-चम्पू-कादम्बरी-पद्मानन्द-यदुसुन्दराद्यानि, नाटकानि पिङ्गलभरतादीनि तथा हनूमत्-दूताङ्गद-रघुभीमनाटकादीनि च नाटकशास्त्राणि, तथा प्रमाणं तर्कपरिभाषा-सप्तपदार्थी-मितभाषिणी-प्रमाणमञ्जूषा-शशधरचरदराजी-मणिकण्ठ-वर्धमान प्रशस्तपदभाष्य-वर्धमानेन्दु-किरणावली-चिन्तामणि-खण्डन-पूर्वमीमांसा-पञ्चाध्यायी-जैनप्रमाण-प्रमाणमञ्जरी-स्याद्वादमञ्जरी-रत्ना करावतारिका-संमिति-स्याद्वाद-रत्नाकरादीनि प्रमाणशास्त्राणि, वेदान्त उपनिषद्-ऋग्-यजुः-साम-अथर्वणाभिधवेदानां वृत्तिर्वा, सहलक्षणैः इन्द्र-चन्द्र-काशकृत्स्न-आपिशली-शाकटायन-पाणिनि-अमरचन्द्र-जिनेन्द्रौ इत्यष्टौ व्याकरणानि । अथ वा ऐन्द्र-पाणिनि-जिनेन्द्र-शाकटायन-वायने-चान्द्रं सरस्वतीकण्ठाभरणं बुद्धिसागरं विश्रान्तविद्याधरं च भीमासनकलापकं मुष्टिव्याकरणं शैवं गौडं नन्दिजयोत्पलं-'सारस्वतं सिद्धहैमं जयहैमं तथापरम् । इति व्याकरणं प्रोक्तं सिद्ध-प्राभृतसंभवम् ॥' इत्यष्टादशव्याकरणैः सह वर्तन्ते ये ते तादृशा आगमाः सिद्धान्ताः अङ्गोपाङ्गनिर्युक्तिचूर्णिभाष्यादयः सर्वेऽपि तत्पुस्तकान्तर्वर्तमाना ग्रन्थास्तान् साधुसुधांशोः सूरीन्द्रस्य साधवो गीतार्था नृपस्यादर्शयन् नामग्राहं दर्शयन्ति स्म । के इव । भानुभानव इव । यथा दिनकरकिरणा भावान् जगत्पदार्थमार्थान् दर्शयन्ति प्रकाशयन्ति ॥

श्लोकार्थ

સૂર્યનાં કિરણો જેમ પદાર્થોને પ્રકાશિત કરે છે તેમ આચાર્યના ગીતાર્થ શિષ્યોએ

રાજાને પુસ્તકમાં રહેલા અલંકાર, જ્યોતિષ, કાવ્ય, નાટક, પ્રમાણ, વેદાંત, વ્યાકરણ અને અંગ, ઉપાંગ, ભાષ્ય, ચૂર્ણિ, અને નિર્યુક્તિના ગ્રંથો બતાવ્યા. ॥ ૮૯ ॥

निभाल्य निःशेषमिदं स्वचक्षुषा हृदा दधत्प्रीतिमिवेन्दिरात्मजः ।
बभाण भूमीद्युमणिर्गणीश्वरं तृणीकृतानेकनरेन्द्रविक्रमः ॥ ९० ॥

भूमीद्युमणिः क्षोणीसहस्रकिरणः पातिसाहिः । 'मध्यंदिनात्रधिविधेर्वसुधाविवस्वान्' इति नैषधे । गणीश्वरमनूचानचक्रिणं प्रति बभाण वदति स्म । किंभूतः । तृणीकृतः अधरितस्तिरस्कृतः तृणप्रायो गणितः अनेकेषां परोलक्षाणां नरेन्द्राणां क्षोणीपालानां विक्रमो वीर्यं येन । किं कुर्वन् । हृदा हृदयेन प्रीतिं प्रमोदं स्नेहं च दधत् । क इव । इन्दिरात्मज इव । यथा कमलानन्दनो हृदा वक्षसा कृत्वा । 'ममासनार्धे भव मण्डनं ननु प्रिये मदुत्सङ्गविभूषणं भव । भ्रमाक्रमादालपमङ्गमृष्यतां विना ममोरः कररत्नवासनम् ॥' इति नैषधे । प्रीतिं प्रीत्या स्वपत्नीं धत्ते । किं कृत्वा । स्वचक्षुषा निजनेत्रेण निःशेषं समस्तमपि तत्पुस्तकं निभाल्य विलोकयित्वा ॥ इति यतिप्रोक्तपुस्तकरहस्यावबोधः ॥

શ્લોકાર્થ

પોતાના પરાક્રમ વડે અનેક રાજાઓને પરાસ્ત કરનાર પૃથ્વી સૂર્ય બાદશાહે પોતાનાં નેત્રો વડે આ સમસ્ત પુસ્તકને જોઈને કામદેવની જેમ હૃદયમાં પ્રીતિને ધારણ કરતાં સૂરીન્દ્રને કહ્યું : ॥ ૯૦ ॥

पुराभवत्प्रीतिपदं वयस्यवद्विशारदेन्दुर्मम पद्मसुन्दरः ।
न येन सेहेऽम्बुरुहामिवावली हिमर्तुना पण्डितराजगर्विताम् ॥ ९१ ॥

हे सूरे, पुरा पूर्वं मम वयस्यवन्मित्रमिव प्रीतिपदं स्नेहभाजनं पद्मसुन्दर इति नामा विशारदेन्दुः विचक्षणचन्द्रमाः अभवद्बभूव । येन पद्मसुन्दरेण पण्डितराजस्य कस्य-चिद्वाराणसीतः पठित्वा समेतस्य स्वगुरुणाप्यजेयतां स्वस्य प्रख्यापयतः पण्डितवि-शेषविप्रस्य पण्डितराजेत्यभिधानं प्रकटयतः गर्विता स्वचित्तकल्पितानल्पाहंकारित्वं न सेहे न सोढा । वादेनि(वि)र्जित्य सभासमक्षं तद्गर्वं निर्वासयामासेत्यर्थः । केनेव । हिम-र्तुनेव । यथा हेमन्तकालेन अम्बुरुहां पद्मानामावलिर्न सह्यते । हिमपातेन पद्मानि कोमल-त्वाद्विलित्वा यान्ति ॥

શ્લોકાર્થ

હે આચાર્ય, પૂર્વે મારા પ્રીતિપાત્ર મિત્રસમાન પદ્મસુંદર નામના પંડિતરાજ હતા. જે પદ્મસુંદરે હેમંતઋતુ જેમ કમલોને મ્લાન કરે તેમ સભાસમક્ષ પંડિતરાજોના ગર્વને વાદવિવાદમાં ગલાવી દીધા હતા. ॥ ૯૧ ॥

जगाम स स्वर्गिमृगीदृशां दृशामथातिथेयीं परिणामतो विधेः ।
मुहुर्मयाशोचि स वातपातिताजिरप्ररूढामरसालवद्विभो ॥ ९२ ॥

हे विभो हे सूरे, कथ पश्चात्कियता कालेन स पद्मसुन्दरो विधेर्दैवस्य परिणामतो वशात् स्वर्गिणां स्वर्गजन्मनां देवानां मृगीदृशां संत्रस्तहरिणनेत्राणामङ्गनानां दृशां लोचनानामातिथेयीं प्राघुणीभावं जगाम संप्राप । ततस्तस्य स्वर्गे गमनानन्तरं स मया मुहुर्वारंवारमशोचि शोचितः शोकगोचरतां प्रापितः । किंवत् । वातेन प्रचण्डपवनेन पातितो मूलादुन्मूल्य निक्षिप्तः अजिरे स्वगृहाङ्गणे प्ररूढ उद्गतः अमरसालवत्कल्पवृक्ष इव । यथा निजगृहाजिरोद्गतवातनिष्पातितरुः शोच्यते तथा मयासौ मुद्गलः शोच्यते इत्यर्थः ॥

શ્લોકાર્થ

હે પ્રભો, તે પદ્મસુંદર ભવિતવ્યતાના યોગે કેટલાક કાળે સ્વર્ગલોકના અતિથિ બન્યા. તેથી જેમ ઘરના આંગણે રોપેલું કલ્પવૃક્ષ કોઈ પ્રચંડ પવનથી નાશ પામે ને જે શોક થાય તેવો શોક મારા હૃદયમાં તેઓના સ્વર્ગગમનથી થયો હતો. ॥ ૯૨ ॥

अमुष्य शिष्येषु गवेषयन्नहं न साधिमानं बहुपात्फलेष्विव ।
चकार तत्पुस्तकमात्मसात्ततो यदिन्दिरा नीतिमुचं विमुञ्चति ॥ ९३ ॥

हे सूरे, ततः पद्मसुन्दरस्य स्वर्गगमनानन्तरं तस्य मद्वयस्यस्य पुस्तकं लिपीकृतसर्वशास्त्रचक्रमात्मसान्मया दत्तं चकार । उत्तमपुरुषैकवचनं णप् । मद्गृहे एवाहं रक्षितवानित्यर्थः । अहं किं कुर्वन् । अमुष्य मम सख्युः पद्मसुन्दरस्य शिष्येषु विनेयेषु साधोर्भावं साधिमानं साध्वाचारतां श्रीसमीचीनभावम् । 'त्वयाहतः किं नरसाधिमभ्रमः' इति नैषधे । न गवेषयन् अपश्यन् । केष्विव । बहुपात्फलेष्विव । यथा न्यग्रोधपादपफलेषु साधिमा चारुता न गवेष्यते गृहीतम् । कुतः । यतः कारणात् नीतिमुचं न्यायत्यागिनं स्वाचारहीनं नरमिन्दिरा श्रीर्विमुञ्चति जहाति । यदुक्तम्—'सत्यपि सुकृते कर्मणि दुर्नीतिरपान्तरे श्रियं हरति । तैलेऽनुपभुक्तेऽपि हि दीपशिखां किमु न वाताली ॥' इति । यस्तु सदाचारवांस्तमेवागत्य लक्ष्मीः श्रयते ॥

શ્લોકાર્થ

મારા મિત્ર પદ્મસુંદરના શિષ્યોમાં શોધતા મને વડવૃક્ષનાં ફળોની જેમ કોઇનામાં સાધ્વાચાર જોવામાં આવ્યો નહીં; તેથી પદ્મસુંદરનું લીપિબદ્ધ સર્વશાસ્ત્ર મેં સ્વાધીન કર્યું. કહ્યું છે:– દુરાચારીઓને લક્ષ્મી ત્યાગી દે છે. ॥ ૯૩ ॥

दिनान्तसंध्यासमयस्वधाशनाम्बुजाननाकोशमिवाखिलागमम् ।
इमं प्रदास्याम्यहमत्र कस्यचिन्महानुभावस्य हृदेत्यचिन्तयम् ॥ ९४ ॥

हे सूरे, अहं तत्समस्तपुस्तकं स्वसात्कृत्वा हृदि निजमनसि इत्यमुना प्रकारेणाचिन्तय विचारितवान् । इति किम् । यदहमत्र जगति मम मण्डले परजनपदे वा वासिनः कस्यचिदसाधारणाचारवत्तया सकलमहीमण्डलाखण्डविख्यातिभाजः महानुभावस्य साधोर्वा इमं पद्मसुन्दरसंबन्धिनमखिलागमं सर्वशास्त्रं प्रदास्यामि । उत्प्रेक्ष्यते—दिनान्तस्य संध्यासमयस्य पितृसूकालस्य स्वधा आहुतिविशेषः अशनं भोजनं यस्य स स्वधाशनस्तस्य अम्बुजानना पद्मवदना । सरस्वती देवतेत्यर्थः । 'दिनान्तसंध्यासमयस्य देवता' इति नैषधे । तस्याः कोशं भाण्डागारपुस्तकमिव । श्रूयते हि—नवव्याकरणं चिकीर्षता हैमाचार्येण सिद्धराजजयसिंहदेवजनाः स्वकीयश्राद्धाश्च काश्मीरे प्रेषिताः । ते च वाग्देवीवसतिं गत्वा ब्राह्मीं संपूज्यागुरुत्क्षेपपूर्वं व्याकरणपुस्तकं याचन्ते स्म । तदैव तया साक्षाद्भूय सन्मूर्तिरेका त्वत्पार्श्वे हेमाचार्यरूपास्तीति राज्ञो वाचिककथनपूर्वं व्याकरणपुस्तकानि समर्पितानि । अन्येषां पूजामार्गणादिविधिना प्रातः पुस्तकं दृश्यते न वाग्देवी । ततः काश्मीरे ब्राह्म्या भाण्डागारोऽस्तीति । तेषु सर्वाणि पुस्तकान्यपि सन्तीति ॥

શ્લોકાર્થ

હે સૂરિજી, સરસ્વતીના પુસ્તક ભંડારની જેમ આ સમસ્તપુસ્તક ભંડાર હું સ્વદેશી યા પરદેશી કોઈપણ સદાચારી મહાનુભાવને કેટલાય સમયથી અર્પણ કરવાની વિચારણામાં હતો. (પૂર્વે નવા વ્યાકરણની રચના કરવાની ઇચ્છાથી શ્રીહેમચંદ્રાચાર્યે અને સિદ્ધરાજ જયસિંહદેવે પોતાના માણસો અને શ્રાવકોને કાશ્મીર મોકલ્યા હતા; તે લોકો કાશ્મીરમાં રહેલા સરસ્વતી મંદિરમાં જઈને સરસ્વતીદેવીનું ધૂપ-દીપ વડે પૂજન કરીને પ્રાચીન વ્યાકરણના પ્રતની માગણી કરી ત્યારે સાક્ષાત્ સરસ્વતીદેવીએ પ્રત્યક્ષ થઈને કહ્યું: 'તમારી પાસે મારી બીજી મૂર્તિસમાન શ્રી હેમચંદ્રાચાર્ય છે' આ પ્રમાણે રાજાને મૌખિક સંદેશો કહેવડાવવા પૂર્વક વ્યાકરણનાં પુસ્તકો પોતાના ભંડારમાંથી અર્પણ કર્યાં હતાં. બીજા લોકોને તો અર્ચનપૂજન કરવાપૂર્વક માગણી કરવાથી પ્રભાતે પુસ્તક જ મલે પરંતુ સાક્ષાત્ સરસ્વતીદેવીનું દર્શન થતું નથી.") ॥ ૯૪ ॥

ततो गुणागण्यमणीमहार्णवा न वीक्षिताः केऽपि दृशा भवादृशाः ।
पदे पदे स्युः किमु निर्जराजुनीमणीमहीजन्मनिपात्रनीधराः ॥ ९५ ॥

हे सूरे, ततस्तत्पुस्तकप्रदानयोग्यापरपात्रानवेक्षणरक्षणकारणाद्गुणा एव गणयितुं प्रमाणीकर्तुमशक्याः गणनार्हा गण्या न गण्या अगण्या वा मेण्यो रत्नानि तेषां महा-

र्णवाः क्षीरनीराशयाः रत्नाकरत्वात् भवादृशाः श्रीमत्सदृशाः केऽपि परे दृशा मया लोचनेन न वीक्षिता दृष्टाः । युक्तोऽयमर्थः । हे गुरो, निर्जराणामर्जुनी सुरगवी कामधेनुः, मणी सुरमाणिक्यं चिन्तारत्नम्, महीजन्मानः सुरतरवः कल्पद्रुमाः, निपाः सुरकलशाः कामकुम्भाः, अवनीधराः सुरगिरयः मेरुपर्वताः । किमु इति प्रश्ने । पदे पदे स्थाने स्थाने किं स्युः । अपि तु न भवेयुः । निर्जरशब्दादग्रे अर्जुन्यादयः शब्दाः योज्याः । ततः कामधेन्वादीनि नामानि भवन्ति । यथा श्रीचिन्तामणिपार्श्वनाथस्तोत्रे– 'गीर्वाणद्रुमकुम्भधेनुमणयस्तस्याङ्गणेरिङ्गिणः' इति ॥

श्લોકાર્થ

તેથી હે પૂજ્ય, અગણિતગુણોરૂપી રત્નના સાગર સમાન આપના સિવાય અન્ય કોઈ સુપાત્ર મારી દ્રષ્ટિમાં આવ્યું નથી. શું સ્થાને સ્થાને કામધેનુ, ચિંતામણિરત્ન, કલ્પવૃક્ષ કે મેરૂપર્વત સંભવી શકે છે! ॥ ૯૫ ॥

इदं तदादत्तसमस्तपुस्तकं मुनीश्वरा मामनुगृह्य शिष्यवत् ।
यदत्र पात्रप्रतिपादनं नृणां भवाम्बुराशौ कलशीसुतीयते ॥ ९६ ॥

हे मुनीश्वराः सूरयः, तदुत्तमपात्रत्वादिकारणात् शिष्यवन्निजविनेयमिव स्वभक्तमित्र वा मामनुगृह्य ममोपरि अनुग्रहं प्रसादं विधाय इदं पद्मसुन्दरसत्कं श्रीमत्पुरो मया ढौकितं समस्तमपि पुस्तकं लिपीकृतशास्त्रजातमादत्त गृह्णीत। यतो हेतोरत्र जगति पात्रप्रतिपादनं साधुदानं नृणां भव्यजनानां भवाम्बुराशौ संसारसमुद्रे कलशीसुतीयते अगस्तमि(स्तिरि)वाचरति । भवसागरं निष्ठापयति । घटः कुम्भः कलशः त्रयोऽपि पुंस्त्रीलिङ्गे ॥

શ્લોકાર્થ

તેથી હે મુનીશ્વર, આ સમસ્ત પુસ્તકભંડાર શિષ્યની જેમ મારા ઉપર અનુગ્રહ કરીને આપ ગ્રહણ કરો! કહ્યું છે: કે આ લોકમાં કરેલું સુપાત્રદાન મનુષ્યોના સંસાર રૂપી સમુદ્રને અગસ્તઋષિની જેમ ચૂલુકરૂપે બનાવી દે છે. ॥ ૯૬ ॥

मतिं श्रुतिक्षीरधिपारदृश्वरीं यतो वहन्तः स्थ तपस्विशेखराः ।
इमं ततोऽलंकुरुतां मरालवद्भिरश्विपुत्र्या इव वः कराम्बुजम् ॥ ९७ ॥

हे तपस्विशेखराः, तपोरूपं स्वं स्वापतेयमस्त्येषामिति तपस्विनः । 'अस्य स्वं तपोयोगसमाधयः' इति हैम्याम् । एतावता श्रमणावतंसाः श्राम्यन्ति तपसा इति श्रमणा इति भगवद्विशेषणेन सार्थकं पूर्वोक्तं नाम । यतः कारणात् श्रुतयः शास्त्राणि ता एव

क्षीरधिर्दुग्धाम्भोनिधिस्तस्य पारं दृष्टवतीति पारगामिनी मतिं बुद्धिं वहन्तो धारयन्तः स्थ वर्तध्वे । ततोऽद्वैतबुद्धिमत्त्वहेतोरिदं पुस्तकं विरञ्चिपुत्र्याः 'दशमं ब्रह्मणः सुता' इत्युक्तत्वात् विधातुर्नन्दिन्याः सरस्वत्या इव वो युष्माकं कराम्बुजं पाणिपद्ममलंकरोतु । किंवत् । मरालवत् । यथा राजहंसः करतुलां रक्तत्वेन कोकनदमलंकुरुते । विरञ्चिपुत्र्या अपि करकमले पुस्तकमास्ते । 'पुस्तकव्यग्रहस्ता च' इति स्तोत्रे ॥ इति पुस्तकोत्पत्तितत्प्रदानकथनम् ॥

શ્લોકાર્થ

શાસ્ત્રરૂપી સમુદ્રના પારંગત અને અદ્વિતીય બુદ્ધિમત્તાને ધારણ કરનાર એવા હે તપસ્વીસૂરિ, આ પુસ્તક રાજહંસના હાથમાં જેમ રક્તકમલ શોભે છે તેમ સરસ્વતીની જેમ આપના હસ્તકમલમાં શોભાને પામો ! ॥ ૯૭ ॥

इदं तदाकर्ण्य स कर्णकेसरी गिरं न्यगादीत्तमसामवावरीम् ।
अवाप्ततृप्तेरशनैरिवामुना न कृत्यमास्ते बहुधीवरीवर ॥ ९८ ॥

स कर्णकेसरी पण्डितपञ्चाननः सूरिस्तदा पुस्तकदर्शनसमये इदं पुस्तकं यूयं गृह्णीत इति नृपतिनिगदितमाकर्ण्य श्रुत्वा तमसामज्ञानानां पाप्मनां वा अवावरीमपनेत्रीम् । 'ओणृ अपनयने' ओण् धातुः । 'अन्येभ्योऽपि दृश्यते' इति वनिप्प्रत्ययः । 'णोन्ताद्धातो ङीप्रौ' इति केचिदिति वनप्रत्ययस्य ङीप् आगमो नकारस्य राकारादेशः । 'विड्वनोरनुनासिकस्य' इति सूत्रेण धातोर्णकारस्याकारादेशः । ओकारस्यावादेशः । अवावरी इति सिद्धम्- इति प्रक्रियाकौमुद्याम् । दुरितहन्त्रीं गिरं वाणीं न्यगादीत् बभाषे । किमुवाच—बहवो धीमन्तो बुद्धिमन्तो वर्तन्ते यस्यां सा बहुधीवरी नगरी श्रीकरी तस्या वरः पतिस्तस्यां वरः श्रेष्ठः सर्ववेतृत्वात् सर्वाधिपतित्वात्तस्य संबोधनम् । बहुव्रीहौ वा ततो बहुधीवरी बहुधीवा इति प्रयोगद्वयं स्यात् । 'वनोर च' वनन्तात्स्त्रियां ङीप् रश्चान्तादेशादि सर्वं पूर्ववत् । अयमपि प्रयोगः प्रक्रियायामेव । पुस्तकेन कृत्वा मम किमपि कृत्यं कार्यं नास्ति न विद्यते । कस्येव । अवाप्ततृप्तेरिव । यथा अवाप्ता लब्धा तृप्तिः साहित्यं येन । एतावता आकण्ठमिच्छापूरणपर्यन्तं भुक्त्वोत्थितस्य पुंसः अशनैर्भोजनैः कृत्वा किमपि कार्यं न स्यात् ॥

શ્લોકાર્થ

રાજાની વાણી સાંભળીને પંડિતકેશરી આચાર્ય મહારાજ પાપકર્મોને હણનારી વાણી બોલ્યા. શ્રીકરી નગરીના સ્વામિ એવા હે રાજન ભોજન વડે તૃપ્ત થયેલા માણસની જેમ આ પુસ્તકનું મારે કંઈ પણ પ્રયોજન નથી. ॥ ૯૮ ॥

नरेन्द्र यावद्व्रतिनां विलोक्यते तदस्त्यमीषां क्रियतेऽधिकेन किम् ।
विभोरिमां दामवदुद्वहन्हृदा गिरं पुनः क्षोणिपुरंदरोऽवदत् ॥ ९९ ॥

हे नराणां मध्ये इन्द्र सहस्रलोचन साहे, व्रतिनां सर्वविरतिवतामनगाराणां यावत्प्रमाणमध्येतुं वाचयितुं विलोकयितुं विलोक्यते तावत्प्रमाणं पुस्तकममीषां यति(ती)नामस्ति विद्यते तर्हि मूर्छाकारिणा अधिकेन बहुना किं क्रियते । न किमपीत्यर्थः । पुनः क्षोणिपुरंदरो नृपोऽवदत जगाद । किं कुर्वन् । विभोः सूरेरिमां यावत्पुस्तकं विलोक्यते तावन्मात्रं तत्पुस्तकं वर्तते । साधूनामधिकेनाधिकरणभूतेन पुस्तकेन किं विधीयते न किंचिद्विधेयमित्यादिकां गिरं वाणी हृदा मनसा उद्वहन् । किंवत् । दामवत् । यथा कश्चिद्भोगी पुमान् हृदा वक्षसा कुसुममालिकामुद्वहते धारयति ॥

श्लोकार्थ

સાધુઓને પઠન પાઠન યોગ્ય પુસ્તક અમારી પાસે છે તો મૂર્છાકારી અધિક પરિગ્રહ શા માટે! સૂરિજીની આ પ્રકારની વાણીને પુષ્પમાલાની જેમ કંઠમાં ધારણ કરીને રાજા બોલ્યા. ॥ ૯૯ ॥

ब्रवीमि किं वो बहु येन निःस्पृहा महीधनाकिंचनतुल्यचक्षुषः ।
तथापि मन्त्राहुतिसिद्धदेववत्प्रसाद्य मे पिप्रतु यूयमीहितम् ॥ १०० ॥

हे सूरयः, वो युष्मान् प्रति बहु पुनः पुनरधिकं वा किं ब्रवीमि कथयामि । येन कारणेन यूयम् । बहुशब्द उभयत्रापि योज्यते । बहु अत्यधिकं निःस्पृहाः कुत्रापि सर्वैरप्यभिलषणीये रमणीयेऽपि वस्तुनि वाञ्छारहिताः । पुनः किंभूताः । महीधनाः भूपतयः तथा अकिंचना दरिद्राः तेषु लक्षणात्तृणे स्त्रैणे च अहौ हारे च दृषदि रत्ने च तुल्यं विशेषममत्वरहितं चक्षुर्येषाम् । यद्यप्येवंविधाः स्थ यूयम्, तथापि प्रसाद्य मयि प्रसादं कृत्वा मे मम ईहितं पुस्तकादानलक्षणमभिलषितं यूयं पिप्रतु पूरयन्तु । किंवत् । मन्त्राहुतिसिद्धदेववत् । यथा प्रणवमायाबीजवाग्बीजकामबीजादियुक्तेन कृतपूर्वसेवोत्तरसेवाविधिना मन्त्रेण आहुत्या गुग्गुलागुरुफलावलीपञ्चामृतादिहवनं तेन च सिद्धः प्रसन्नीभूतः प्रत्यक्षीभूतश्च देवो मन्त्राधिष्ठाता सुसाधकस्य मनोवाञ्छितं पूरयति ॥ इति साहेः पुस्तकदानाग्रहः सूरेर्निषेधवचः ॥

श्लोकार्थ

સૂરિજી, વધુ હું શું કહું! યદ્યપિ આપ નિસ્પૃહી છો. રાજા રંક, રત્ન પાષાણ બધામાં દ્રષ્ટિ છે તો પણ પ્રસન્ન થયેલા મંત્રાધિષ્ઠાતા દેવની જેમ આપ મારી આ ઇચ્છાને પૂર્ણ કરો! ૧૦૦ ॥

यदाददे नैष मुहुर्वहूदितस्तदा हृदा भूपतिनेत्यचिन्त्यत ।
विधीयते किं बहुनिःस्पृहा अमी इवानुरागा न च विक्रमोचिताः ॥ १०१ ॥

यदा एष सूरिः भूपतिना मुहुर्वारंवारं बहु अत्यभ्यधिकमुदितो विज्ञप्तोऽपि नाददे ज्ञातिपुस्तकं न गृहीतवान्, तदा भूपतिना अकब्बरेण हृदा मनसा इत्यग्रे वक्ष्यमाणमचिन्त्यत विचारितम् । अहो किं विधीयते क्रियते । अमी सूरयो निःस्पृहा निरीहाः महानुभावा मुक्तिं विना क्वपि वस्तुनि न साभिलाषाः च पुनर्महत्त्वेन विक्रमस्य बलात्कारस्यापि नोचिता नार्हाः । क इव । अनुरागा इव । यथा आदिरागा बलयोग्या न भवन्ति । यतः सूक्तम्—'कविता वनिता गीतिः स्वयमेवागता वरम् । बलादाकृष्यमाणापि सरसा विरसा भवेत् ॥', तथा—'जरा यौवनस्युं प्राणन होइ जातइं प्राणइं प्राणन होइ । प्राणनाथस्युं प्राणन होइ कीर्तिप्रीतिस्युं प्राणन होइ ॥' इत्युक्तेः । नात्र बलदर्शनमुचितम् ॥

श्લोકार्थ

જ્યારે રાજાએ વારંવાર કહ્યું તો પણ આચાર્યે ગ્રહણ કર્યું નહીં ત્યારે રાજાએ મનમાં વિચાર્યું કે આ સાધુઓ નિસ્પૃહી છે તે અનુરાગની જેમ બલાત્કારને યોગ્ય નથી. કહ્યું છે કે-કવિતા, વનિતા અને ગીત સ્વયં આવીને વરે છે પરંતુ બલાત્કારથી તે વિરસ બની જાય છે. ॥ ૧૦૧ ॥

अमीभिरुक्तिर्मम मन्यते न चेत्ततोऽन्तरा कश्चन संधिकर्तृवत् ।
विधीयते यद्विविधोक्तिभिः प्रभूनुरीकृतिं स्वेन स एव कारयेत् ॥ १०२ ॥

चेद्यदि अमीभिः सूरिभिर्ममोक्तिः मत्कथितं न मन्यते नाङ्गीक्रियते ततः कारणात् संधिकर्तृवत् संधिकारक इव कश्चन शेखप्रमुखः कोऽपि अन्तरा ममैतेषां च साध्ये विधीयते यत्कारणात्स मध्यविहित एव प्रभून् सूरीन् विविधा नानाप्रकारा या उक्तय अनुनयविनयमत्सामर्थ्यस्वभावजातिप्रकटीकारकाणि वाक्यानि वचनचातुरीविशेषास्ताभिः कृत्वा उरीकृतिं स्वीकारं कारयेत् । यतो महत्सु विक्रमो नौचितीमञ्चति किं तु विज्ञप्तिरेव विधेया, यद्वा कमप्यन्तरा विधायानुनत्या प्रणत्या कथमपि कार्यं कार्यमिति नीतिः ॥

શ્લોકાર્થ

આટઆટલું કહેવા છતાં પણ સૂરિજીએ સ્વીકાર્યું નહીં તો હવે વચમાં કોઈ સંધિકાર રાખું ! કે જે અનેક પ્રકારની યુક્તિઓ વડે સૂરિજીને સમજાવીને પુસ્તકનો સ્વીકાર કરાવશે. ॥ ૧૦૨ ॥

इमं विकल्पं परिकल्प्य चेतसा विभूषयन्भागमितः क्षितेः परम् ।
सुधारुचेश्चारवशात्सवेशगो ग्रहः पदव्या इव मन्युभोजिनाम् ॥ १०३ ॥

महीमरुत्वानथ शेखशेखरं प्रतापदेवीतनयं तथाह्वयत् ।
ततः सृजन्तौ प्रणतिं ग्रहेशितुर्ग्रहाविवास्यान्तिकमागतावुभौ ॥ १०४ ॥

अथ विचारकरणानन्तरमपरप्रदेशागमनानन्तरं च महीमरुत्वान् धरित्रीसुधाशर्मा शेखेषु यवनानां मान्येषु शेखरमवतंसं मुकुटं वा अबलफैजं तथा पुनः प्रतापदेव्यः रामासाधुतृतीयलघुपत्न्यास्तनयं नन्दनं थानसिंहाह्वयं चाह्वयदाकारयामास । किं कुर्वन् । इमं पूर्वोक्तं मनसैव विचारितं विकल्पं विचारं चेतसा चित्तेन परिकल्प्य कल्पयित्वा इतः सूरिपार्श्वात्परमन्यं क्षितेर्भूमेर्भागं प्रदेशं स्थानं विभूषयन् सेवालंकुर्वन् । क इव । ग्रह इव । यथा भौमादिग्रहः चारवशाद्गतिविशेषायत्तत्वात् सवेशगः समीपप्राप्तः सुधारुचेश्चन्द्रस्य पार्श्वात्परं मन्युं यज्ञांशं भुञ्जते इत्येवंशीला देवास्तेषां पदव्या मार्गस्य गगनस्य भागमन्यं प्रदेशं भूषयति । ततः साहिना आकारणानन्तरमुभौ शेखथानसिंहौ प्रणतिं 'पातिसाहिसलामत' इत्युक्त्वा भूमौ हस्तं दत्त्वा पुनर्भाले ददतौ पुनस्तदेव वदन्तौ तथैव विदधातौ च इति सलाममिति यवनजातिषु नमस्कृतेरभिधानं तामेव सृजन्तौ कुर्वाणौ सन्तौ अस्य साहेरन्तिकं संनिधानमागतौ । काविव । ग्रहाविव । यथा कौचिचारवशाद्ग्रहेशितुः सूर्यस्य पार्श्वे आगच्छतः ॥ युग्मम् ॥

श्लोकार्थ

જેમ મંગલઆદિગ્રહ ગતિ વિશેષથી ચન્દ્રની સમીપના આકાશ પ્રદેશને શોભાવે તેમ પૂર્વોક્ત પ્રકારે વિચારીને સૂરજી પસેથી બાદશાહે અન્યસ્થાનને શોભાવ્યું. અને ત્યાં શેખોના મુગટ સમાન અબ્દુલફૈજી અને પ્રતાપદેવીના પુત્ર થાનસિંહને બોલાવ્યા. સૂર્યની સમીપે જેમ ગ્રહો આવે તેમ તે બંને નમસ્કાર કરીને રાજાની સમીપે રહ્યાં. ॥ १०३ ॥ १०४ ॥

अमी न गृह्णन्ति मदीयपुस्तकं निरीहभावेन बहूदिता अपि ।
ततो युवां ग्राहयतां कथंचनाप्यमून्यशो मूर्तमिवेन्दुसुन्दरम् ॥ १०५ ॥

हे शेखथानसिंहौ, अमी सूरयो मया बहूदिता वारंवारं विज्ञप्ता अपि निरीहभावेन निःस्पृहत्वेन मदीयं मम संबन्धि अथ वा पद्मसुन्दरसत्कमपि मदधीनत्वान्मदीयमेव मद्दत्तं पुस्तकं न गृहणन्ति नाददते, ततः कारणाद्युवां भवन्तौ सूरिपार्श्वे गत्वा बहु बहु उक्त्वा कथंचन केनचित्प्रकारेणापि विज्ञप्तनुनयमत्सामर्थ्यान्वयप्रकटनप्रकारेणापि अमून् सूरीन्प्रति इन्दुसुन्दरं चन्द्रोज्ज्वलं मूर्तं प्रत्यक्षं यशः कीर्तिमिव मदीयपुस्तकं ग्राहयतां आदापयताम् । स्वीकारयतामित्यर्थः ॥

શ્લોકાર્થ

હે શેખ, થાનસિંહ, મારા વડે ઘણી ઘણી વિજ્ઞપ્તિ કરવા છતાં પણ નિસ્પૃહભાવથી આચાર્ય પુસ્તકનો સ્વીકાર કરતા નથી તો તમો કોઈ પણ પ્રકારે આચાર્યને સમજાવીને ચન્દ્રસમાન ઉજ્વલ મૂર્તિમાન યશ જેવા પદ્મસુંદરજીના પુસ્તકનો સ્વીકાર કરાવો ! ॥૧૦૫॥

इदं गदित्वान्तरिते स्थिते नृपेंऽशुमालिनीवाभ्रकशालिनि क्षणात् ।
उपेत्य तावूचतुरित्यमून्प्रति प्रणीततत्पत्कजरेणुचित्रकौ ॥ १०६ ॥

उपेत्य प्रभुपार्श्वे समेत्य तौ शेखथानसिंहौ अमूनेतान्सूरीन्प्रति इत्यग्रे वक्ष्यमाणं ऊचतुः कथयतः स्म । किंभूतौ । प्रणीतं विहितं तत्पदकजरेणुभिर्नमस्करणसमये सूरिचरणारविन्दरजोभिश्चित्रकं भालस्थले तिलकं याभ्यां तौ । कस्मिन सति । इदं पूर्वोक्तं गदित्वा भाषित्वा अभ्रके मध्ये मध्ये शालते शोभते इत्येवंशीले अभ्रकेणादृश्यमाने अंशुमालिनि भास्करे इव अन्तरिते व्यवहिते नृपे राज्ञि स्थिते सति । सूरेरदृग्गोचरे नृपो जात इत्यर्थः ॥

શ્લોકાર્થ

સૂર્ય જેમ વાદળમાં છુપાઈ જાય તેમ પૂર્વોક્ત પ્રકારે કહીને રાજા અદૃશ્ય થયા. ત્યારબાદ તે બંને સૂરિજી પાસે આવી તેમના ચરણકમલની રજનું લલાટ પર તિલક કરીને અર્થાત્ નમસ્કાર કરીને બોલ્યા. ॥ ૧૦૬ ॥

इदं व्रतीन्द्राः क्षितिशीतदीधितेर्गृहीतवत्तिष्ठति धाम्नि पुस्तकम् ।
दधाति खेदं पतितं यतः क्षिते रजःस्थितं रत्नमिवात्र गृह्यताम् ॥ १०७ ॥

हे व्रतीन्द्राः सूरयः, इदं पुस्तकं गृहीतवद्बन्दीकृतमिव क्षितिशीतदीधितेरकब्बरस्य धाम्नि तिष्ठति स्थितिमाधत्ते । यतः कारणादत्र साहिगृहे पतितं खेदं विषादम् । तयोभाषया 'अदाबम्' इत्युच्यते । दधाति धत्ते । किमिव । रत्नमिव । यथा क्षितेः पृथिव्या रजःस्थितं धूलीभिः स्थगितं छादितं माणिक्यं खेदं बिभर्ति म्लेच्छमुद्गलगृहत्वाद्रज इत्युक्तं पुस्तकं बन्दिमोचनकारणवच्छ्रीमद्भिः गृह्यताम् ॥

શ્લોકાર્થ

હે વ્રતીન્દ્ર, આ પુસ્તક રાજાના ઘરમાં બંદીની જેમ કેટલાય સમયથી રહેલું છે તેથી પૃથ્વીના રજથી આચ્છાદિત થયેલા રત્નની જેમ ખેદ પામેલા આ પુસ્તકને ગ્રહણ કરો ! ॥ ૧૦૭ ॥

हमाउंसूः सोमयशोऽङ्गजन्मवद्ददाति पात्रं गुरवो युगादिवत् ।
रसो यथेक्षोरपि वस्तु पुस्तकं कथं न गृह्णीथ तदर्हमात्मनः ॥ १०८ ॥

हे सूरयः, हमाउंसूरकब्बरपातिसाहिः सोमयशसो बाहुबलेर्बृहत्पुत्रस्य यन्नामा चन्द्रवंशोऽजनि तस्याङ्गजन्मा पुत्रः श्रेयांसस्तद्वद्ददाति । आवश्यकवृत्त्यनुसारेण बाहुबलिसुतः सोमप्रभस्तस्य पुत्रो युवराजः श्रेयांसः । आवश्यकचूर्णौ तु 'भरहस्स पुत्तो सेज्जंसो अन्ने भणंति । बाहुबलिस्स पुत्तो सोमप्पभोसे अंसो अत्थि तत्त्वं केवलिगम्यम् ॥' पुनर्युगादिवत् वृषभजिनेन्द्रा इव । गुरवो यूयं पात्रं सम्यक् श्रेयो बुद्ध्या दानोचितं स्थानमपि तु पुनर्यथा इक्षो रसालस्य रसः स्यन्दः तत्राभूत् । तथा अत्र पुस्तकं दातव्यं वस्तु । 'अथेक्षु स्याद्रसालोऽपि पत्रकः' इति हैम्याम् । तथा 'रसाल इक्षौ चूते च' इत्यनेकार्थः । ततो दातृपात्रसुवस्तुत्रयाणामप्यत्र संयोगो वर्तते, तत्कारणादात्मनः स्वस्यार्हमुचितं ग्रहीतुं योग्यं यूयं कथं केन प्रकारेण न गृह्णीथ ग्रहयध्वे । अवश्य गृह्यतामेवेति थानसिंहोक्तिः ॥

श्लोकार्थ

ગુરૂદેવ, જેમ શ્રેયાંસકુમારે યુગાદિદેવને ઈક્ષુરસનું દાન કર્યું હતું તેમ અકબર બાદશાહ આપને યોગ્ય એવા આ પુસ્તકને અર્પણ કરે છે તો આપ કેમ સ્વીકારતા નથી! શ્રેયાંસકુમારની જેમ અહીં પણ દાતા, પાત્ર અને વસ્તુ એ ત્રણેનો સુમેળ છે. ॥ ૧૦૮ ॥

अमुं च जानीथ न मुन्दलेश्वरं निदेशशूरं द्विषतां निषूदनम् ।
दिगीश्वरा यच्चकिता इवाखिलास्त्यजन्ति नाद्यापि दिगन्तवासिताम् ॥

हे प्रभवः, च पुनरमुमकब्बरं परेषां मुत हर्षो गलति द्रवीभवति । यातीत्यर्थः । येभ्यस्ते मुद्गलास्तेषामपीश्वरं पराभवनकरणे समर्थं स्वामिनं च पेन्दं युगीनचक्रवर्तिनं न जानीथ सम्यक् हृदये न वित्थ नावधारयत । निदेशे आज्ञायां शूरमतिकठिनं य आज्ञां न मन्यते तं स्वशासनोल्लङ्घिनमवश्यमेव निगृह्णाति । पुनः किंभूतम् । द्विषतां वैरिणां निषूदनं मूलादुन्मूलनकारकम् । हे प्रभवः, अखिलाः समस्ता अपि दिगीश्वरा दिक्पालाः । उत्प्रेक्ष्यते—यच्चकिता यस्याद्भयभ्रान्ताः सन्त इव दिशामाशानामन्तेऽवसाने सन्तीत्येवंशीलास्तेषां भावं दिशां प्रान्तेषु दूरे निवसनशीलतामद्यापि पतद्दिनं यावन्न त्यजन्ति ॥

श्लोकार्थ

હે પ્રભુ, આપ અકબરને નથી જાણતા, એ જેમ આજ્ઞા આપવામાં શૂરવીર છે તેમ આજ્ઞાનું ઉલ્લંઘન કરનારને શિક્ષા આપવામાં પણ તેટલા જ કઠોર છે. શત્રુઓનું

નિકંદન કરનાર આ બાદશાહના ભયથી નાસી ગયેલા દિક્પાલો પણ હજુ સુધી દિશાઓના છેડાને છોડી શકતા નથી. ॥ १०९ ॥

निजानुकूलीभवतां तनूमतां सुधालतेव व्रतिचक्रवर्तिनः ।
प्रविभ्रतां स्वप्रतिकूलतां पुनर्विषस्य शाखीव समुन्मिषत्यसौ ॥ ११० ॥

हे व्रतिचक्रवर्तिनः, असावकब्बरो निजस्यात्मनोऽनुकूलीभवतां सेवाहेवाकिभावं भजतां तनूमतां नराणां राजसामन्तादयः सर्वेऽपि तनूमन्त एवेति । सुधालता अमृतवल्लिरिव समुन्मिषति जीवातुरिवोदेति । पुनरसौ साहिः स्वस्यात्मनः प्रतिकूलतां विलोमभावं प्रद्विष्टभावं प्रबिभ्रतां विद्विषतां विषस्य क्ष्वेडस्य कालकूटस्य शाखी वृक्षः किंपाकतरुः समुन्मिषत्युद्गच्छति ॥

શ્લોકાર્થ

હે સૂરીન્દ્ર, અકબર પોતાને અનુકૂલ બનનાર રાજા, સામંત આદિ સેવકો માટે અમૃતવેલ છે અને પોતાથી પ્રતિકૂળ થનારને માટે કાલકૂટ વિષના વૃક્ષસમાન છે. ॥ ११० ॥

यदात्मनोर्व्यां परमेश्वरा इवागताः स्थ साक्षादुपकर्तुमङ्गिनाम् ।
इदं विदन्त्येव मुनीन्दवो हृदा द्विरुक्तितुल्यं पुनरावयोर्वचः ॥ १११ ॥

हे मुनीन्दवः, यत्कारणाद्यूयमुर्व्यामस्मिन् भूमीलोके अङ्गिनां साक्षात्प्रत्यक्षीभूय प्रकटमुपकारं कर्तुं विधातुं साक्षात्स्वरूपेण । उत्प्रेक्ष्यते—परमेश्वरा इवागताः जगन्नाथा इव स्वयं समायाताः स्थ वर्तध्वे । ततः कारणादिदमस्मदुक्तं साहिस्वभावादिकं सर्वं हृदा स्वमनसा कृत्वा हृदि सम्यग्विमृश्य सर्वं च श्रीमन्तो विदन्त्येव । यतः परमेश्वरत्वं ततः सर्वज्ञत्वमप्यास्ते तेन जानन्त्येव । पुनरावयोर्वचः साहिस्वरूपनिरूपणवचनं द्विरुक्तितुल्यं पुनर्भाषणसाधारणं केवलं पिष्टपेषणमेव ॥

શ્લોકાર્થ

હે મુનીન્દ્ર, આપ આ જગતમાં પ્રાણીઓના ઉપકાર માટે આવેલા સાક્ષાત્ પરમેશ્વર છો ! અને સર્વવસ્તુના જ્ઞાતા છો તો અમારું આ વારંવારનું કથન પિષ્ટપેષણતુલ્ય છે. ॥ १११ ॥

स्ववचदादत्त समस्तपुस्तकं स्थितौ गदित्वेति पुरः प्रभोरुभौ ।
ततो विनेया अपि तदबभाषिरे निवार्यते कैः स्वयमागतेन्दिरा ॥ ११२ ॥

उभौ शेखनाथसिंहौ प्रभोर्हीरसूरेः पुरोऽग्रे इत्यमुना प्रकारेण गदित्वा स्थितौ तूष्णीं कृतवन्तौ इति पूर्वोक्तकारणात्स्ववचात्मीयमिव समस्तपुस्तकमादत्त ग्रहयताम् । ततस्तयोरुक्तेरनु पश्चात् विनेया हीरसूरिशिष्याः वाचकविचक्षणगणिप्रमुखा गीतार्था अपि शेखथानसिंहकथितं स्वीकारयोग्यमास्ते तद्गृह्यतामिति तत्तदुक्तमेव बभाषिरे प्रोचुः । युक्तोऽयमर्थः । स्वयमात्मनैवागता संप्राप्ता इन्दिरा लक्ष्मीः कैर्मूर्खैर्निवार्यते निषिध्यते । अपि तु न कैश्चिदपि ॥

श्लोकार्थ

સમસ્ત પુસ્તકનો જાણે સ્વીકાર થઈ ગયો હોય તેમ પૂર્વોક્ત પ્રકારે કહીને શેખ અને થાનસિંહે મૌનનો આશ્રય કર્યો. ત્યારપછી આચાર્ય મહારાજના શિષ્યોએ પણ તે જ પ્રમાણે કહ્યું. ઘરને આંગણે ચાલી આવેલી લક્ષ્મીનો કોણ અનાદર કરે ! ॥ ૧૧૨ ॥

अवेत्य चेतस्यमुना समुन्नतिं स्वशासने पुस्तकसंग्रहेण सः ।
मुदामिवोङ्कार इदंक्षितिक्षितस्तथेति वाचंयमवासवोऽवदत् ॥ ११३ ॥

वाचंयमवासवः यतिजम्भारातिः तथेति एवमस्तु मया साहिप्रदत्तं पुस्तकं ग्रहीष्यते इत्यवदत् भाषते स्म । उत्प्रेक्ष्यते—इदंक्षितिक्षितः अस्याकब्बरपातिसाहेर्मुदां परमानन्दानामोङ्कारः आदिरिव । किं कृत्वा अवदत् । इत्यमुना मुद्गलाखण्डलेन चतुर्दिगधिपतिना पातिसाहिना स्वयमत्याग्रह्य प्रदत्तानामेतत्पुस्तकानां संग्राहणं कृत्वा स्वशासने जैनमते तपागच्छे वा समुन्नतिं दीप्तिमुद्द्योतं वा प्रभावनां चेतसि स्वहृदये अवेत्य विज्ञाय ॥

श्लोकार्थ

'રાજાએ અર્પણ કરેલા પુસ્તકના સંગ્રહથી જૈનશાસનની ઉન્નતિ થશે' એમ વિચારીને આચાર્ય મહારાજે 'તથાસ્તુ' એમ કહીને સ્વીકારવાની અનુમતિ આપી. તે વાક્ય જાણે રાજાના હર્ષનો ઉદ્ગાર ન હોય ! ॥ ૧૧૩ ॥

उपेत्य ताभ्यां तदभाषि भूपतेस्तदेष निश्चेतुमपृच्छदात्मना ।
मुदं प्रणेतुं द्विगुणामिवावनीमणेर्गणेन्द्रोऽप्यवदत्तथैव तम् ॥ ११४ ॥

ताभ्यां शेखथानसिंहाभ्यामुपेत्य पातिसाहिसमीपे समागत्य भूपतेरकब्बरस्य तत्सूरिकथितपुस्तकस्वीकारवचः अभाषि प्रतिपादितम् । पुनः साहिस्तयोस्तद्वचो निश्चेतुं सत्यतया ज्ञातुमात्मना स्वेन स्वयं वा तानपृच्छत् प्रश्नयति स्म श्रीमद्भिर्मदीयं

पुस्तकं गृहीतं न वेति स्वयं पुनः पृष्टवान् । अपि पुनर्गणेन्द्रो गच्छनायकोऽपि तं भूपतिं तथेति मया श्रीमत्पुस्तकं गृहीष्यते गृहीतं वा इत्येवमवदत् जगाद । उत्प्रेक्ष्यते—अवनीमणेरकब्बरस्य मुदमानन्दं द्विगुणां प्रणेतुं विधातुमिव ॥ इति शेखथानसिंहविज्ञपनात्साहिपुस्तकग्रहणम् ॥

શ્લોકાર્થ

શેખ અને થાનસિંહે રાજા પાસે આવીને આચાર્યમહારાજની સ્વીકૃતિ કહી, તો પણ તેનો નિશ્ચય કરવાને માટે રાજાએ સ્વયં પૂછ્યું. ગુરુ મહારાજે રાજાને પણ પુસ્તકની સ્વીકૃતિ દર્શાવી. તે જાણે અકબર બાદશાહના દ્વિગુણ આનંદને વધારવા માટે ન હોય ! ॥ ૧૧૪ ॥

दयान्वितं धर्ममवाप्य सद्गुरोरिवार्णवात्कृष्णलताङ्कविद्रुमम् ।
स थानसिंहं यवनावनीधनस्ततः समाहूय गिरं गृहीतवान् ॥ ११५ ॥

सूरिणा ततः पुस्तकादानस्वीकारकथनश्रवणानन्तरं वा सोऽकब्बरसाहिः यवनास्तुरुष्काः प्रस्थानालाभपुरीयादयस्तथा मुद्गलाः काबिलखुरासानादिजनपदजन्मानो म्लेच्छास्तेषामवनीधनो राजा थानसिंहं समाहूय आकार्य गिरं वाणीं गृहीतवान् जल्पति स्म । किं कृत्वा । सद्गुरोः श्रीहीरविजयसूरीसकाशाद्दयान्वितं कृपाकलितं धर्ममवाप्य लब्ध्वा । कमिव । कृष्णलताङ्कविद्रुममिव । यथा कश्चिदर्णवाज्जलनिधेः कृष्णलता 'कालीवेलि' इति लोके प्रसिद्धा । सा अङ्के हृदये मध्ये यस्य तादृशं प्रवालं लभते ॥

શ્લોકાર્થ

સમુદ્ર પાસેથી જેમ કાલીવેલ પ્રાપ્ત કરે તેમ આચાર્ય મહારાજ પાસેથી દયાધર્મ પામીને અતિઆનંદિત બનેલા અકબર બાદશાહે થાનસિંહને બોલાવીને કહ્યું. ॥ ૧૧૫ ॥

मदीयतूर्यादिनिनादसादरं जगज्जनानन्दिमहेन मेदुरम् ।
त्वमालयं लम्भय साधुसिन्धुरं तटं शशीवामृतवाहिनीवरम् ॥ ११६ ॥

हे थानसिंह, त्वं साधुसिन्धुरं श्रीगुरुं मदीयानि तूर्याणि मम संबन्धीनि वादित्राणि तेषां निनादैर्घोषैः सहादरैर्वर्तन्ते एवं स्यात्तथा आलयं स्वावासमुपाश्रयं वा लम्भय प्रापय । क इव । शशीव । यथा चन्द्रमा अमृतवाहिनीवरं सुधासिन्धुधवं क्षीरसमुद्रं तटं वेलावनीं लम्भयति । ण्यन्तात्कर्मद्वयम् । पुनः कथम् । जगतां भुवनानां जनान् सुरासुरनरानानन्दयति प्रमोदयतीत्येवंशीलेन महेनोत्सवेन कृत्वामे दुरं स्यादेवम् ॥

શ્લોકાર્થ

હે થાનસિંહ, ચન્દ્ર જેમ ક્ષીરસમુદ્રની વેલને પામે તેમ મારાં બાદશાહી વાજિંત્રોના ઘોષપૂર્વક અને જગતના જીવોને આનંદદાયી મહામહોત્સવ પૂર્વક સૂરીન્દ્રને એમના સ્થાને પહોંચાડો ! ॥ ૧૧૬ ॥

प्रमाणमाज्ञा जगतीवसन्तिका सृजामि निःशेषमिदं नियोगिवत् ।
पुरा मदीहा पुनरीशशासनं पयस्तदेतत्सितया करम्बितम् ॥ ११७ ॥

हे प्रभो, जगतीवसन्तिका समस्तक्षोणीचक्रशिरःशेखरायमाणा । 'आपीडशेखरोत्तंसावतंसाः शिरसः स्रजि' इति हैम्याम् । 'विदर्भसुभ्रूश्रवणावतंसिका' इति नैषधे । आज्ञा श्रीमदादेशः प्रमाणं शिरस्यारोपयामि । हे स्वामिन्, इदं श्रीमत्प्रसादितं निःशेषं समस्तमपि सृजामि करोमि । किंवत् । नियोगिवत् । यः कश्चित्स्वस्य सुकरे दुष्करेऽपि कार्ये आप्रयुक्तः स वनिजजीवमपि दुःखात्कृत्यकृत्यं कुरुते स नियोगी सेवक इव । यद्यप्यहं श्रीमत्सेवकोऽस्मि परं नियोगिवत्कार्यकर्ता नास्मि केवलं सेवाकार्यैव । यथा परे नियोगिन आश्रयाः श्रीमद्वार्ताकारकाः श्रीमन्निर्दिष्टं कार्यं कुर्वन्ति तथाहमपि करोमीत्यर्थः । पुनर्हे प्रभो, पुरा पूर्वं मदीहा मम वाञ्छा आसीत् । यदेतान्महामहेन स्वालयं नयामि । पुनस्तदुपरि ईशस्य पृथ्वीनाथस्य पातिसाहेः शासनं आदेशः तदेतत्सितया शर्करया करम्बितं मिश्रितं पयो दुग्धं दुग्धपानमिव संजातमिति ॥

શ્લોકાર્થ

હે પૃથ્વીપતિ, આપની આ આજ્ઞા હું શિરોધાર્ય કરું છું. આપનું સંપૂર્ણ કાર્ય હું સેવકની જેમ કરીશ. પહેલાં પણ મારી ઇચ્છા હતી જ તેમાં આપ શ્રીમાનનો આદેશ મારા માટે સાકર મિશ્રિત દૂધ બરાબર થયો ! ॥ ૧૧૭ ॥

अथैनमापृच्छ्य स भूमिभूषणं प्रदाय धर्माशिषमात्मना पुनः ।
सहानगारैर्निरगात्समाजतः शशीव तारैः शरदभ्रगर्भतः ॥ ११८ ॥

अथ थानसिंहस्य साहेस्तूर्यदानाद्यादेशानन्तरं स सूरिरनगारैः सहागतसाधुभिः सह समाजतः सभामध्यान्निरगात् निर्जगाम । क इव । शशीव । यथा कौमुदीपतिस्तारैस्तारकैरुपलक्षाद्ग्रहोडुभिः । 'प्रथममुपहृत्यार्थं तारैरखण्डिततन्दुलैः' इति नैषधे । तारशब्दोऽकारान्तः । सर्वज्योतिर्भिः सार्धं शरदभ्रस्य शारदीनघनाघनस्य गर्भत उदरात् निर्गच्छति । किं कृत्वा निर्गतः । एनमकब्बरं भूमिभूषणं क्षोणीमण्डलमार्तण्डमापृच्छ्य वयं वसतौ व्रजाम इत्युक्त्वा पुनरस्य साहेरात्मना स्वेन धर्माशिषं धर्मलाभं प्रदाय दत्त्वा ॥ इति साहिना गोष्ठीकरणानन्तरं सभाबहिः पादावधारणं प्रभोः ॥

શ્લોકાર્થ

જેમ તારાઓથી પરિવરેલો શરદઋતુનો ચન્દ્ર વાદળમાંથી બહાર આવે તેમ 'અમો જઈએ છીએ', એમ બાદશાહને કહીને સાધુઓથી પરીવરેલા આચાર્યમહારાજ રાજસભામાંથી બહાર પધાર્યા. ॥ ૧૧૮ ॥

तदा चकोरायितमर्णवायितं रथाङ्गितं कैश्चन कैरवायितम् ।
स्रवन्मुदस्रैश्च विधूपलायितं विलोक्य यद्वक्त्रमृगाङ्कमङ्गिभिः ॥ ११९ ॥

तदा तस्मिन्नकब्बरसभाया बहिः प्रभोरागमनावसरे यस्य गुरोर्वक्त्रं मुखमेव मृगाङ्क चन्द्रं विलोक्य कैश्चनाङ्गिभिर्जनैश्चकोरायितं सूरिमुखलावण्यामृतपानकारिभिर्ज्योत्स्नाप्रियैरिवाचरितम् । पुनः कैश्चनार्णवायितं प्रोल्लसितप्रह्लादकल्लोलपटलीप्रवर्धमानाङ्गरोमाञ्चचञ्चलशालिशीकरितसमुद्रैरिवाचरितम् । समुद्रा हि चन्द्रमालोक्य प्रवर्धन्ते इति जगत्स्वभावः । कल्पसूत्रेऽपि क्षीरसमुद्रे कल्लोलोर्मयोऽपि दृश्यन्ते । तथा 'वेलावनीवनततिप्रतिबिम्बचुम्बिकिर्मीरितोर्मिचयचारिमचापलाभ्याम्' इति नैषधे क्षीरसमुद्रवर्णने । पुनः कैश्चन रथाङ्गितम् । तादृशं जगज्जनैरभिनन्द्यमानं प्रभुहृदयमालोक्य । हृदयेऽभ्यसूयाङ्कितदुःखं दधानैः कुपाक्षिकैः चक्रवाकैरिवाचरितम् । चन्द्रोदये हि चक्रवाकानां दुःखमित्यपि जगत्स्वभावः । यदुक्तम्—'कथय किमपि दृष्टं स्थानमत्र श्रुतं वा व्रजति दिनकरोऽयं यत्र नास्तं कदाचित् । इति विहगसमूहं नित्यमापृच्छ्यमानो रजनिविरहभीतश्चक्रवाको वराकः ॥' इति चक्रवाकाष्टके । पुनः कैश्चित्कैरवायितं विकसितनयनैः कुमुदैरिवाचरितम् । पुनः कैश्चन । स्रवन्ति निःसरन्ति यानि हर्षाश्रूणि प्रमोदबाष्पाणि तैः कृत्वा विधूपलायितं चन्द्रकान्तरत्नैरिवाचरितम् । चन्द्रोदये हि चन्द्रकान्तमणयो हि अमृतं क्षीरं वमन्तीति लोकरूढिः कविसमयश्च । तथा 'यदगारघटाट्टकुट्टिमस्रवदिन्दूपलतुन्दिलापया' इति नैषधेऽपि ॥

શ્લોકાર્થ

ત્યારે આચાર્ય મહારાજના મુખરૂપી ચન્દ્રનાં દર્શન કરીને કેટલાક ભવ્ય જીવો ચકોરરૂપે બન્યા, ઉલ્લસિત આનંદના કલ્લોલો વડે કેટલાક સમુદ્રરૂપે બન્યા, લોકોથી અભિનંદાતા આચાર્યમહારાજને જોઈને કેટલાક વિરોધીઓ ચક્રવાકરૂપે બન્યા, વિકસિત નયને જોતા કેટલાક ચકોરરૂપે બન્યા અને હર્ષાશ્રુ વડે કેટલાક ભાવિકો ચન્દ્રકાન્તમણિરૂપે બન્યા. ॥ ૧૧૯ ॥

तदाभवद्भूमिनभःप्रचारिणां जयारवो भूपुरहूतवर्त्मनोः ।
समीक्ष्य सूरेर्महिमानमुत्तमं हृदा दधाने इव रोदसी स्तुतः ॥ १२० ॥

तदा तस्मिन्नवसरे भूर्भूमी पुरहूतवर्त्म नभोङ्गणः। 'बहुवगाढसुरेश्वराध्व' इति नैषधे। 'सुरेश्वरस्य शक्रस्य अध्वा मार्गः' इति तदर्थः। तयोर्विषये भूमिनभःप्रचारिणां भूचराणां समस्तमानवानां खेचराणामदृश्यान्तरिक्षचारिणां सिद्धगन्धर्वविद्याधराणां जिनशासनाधिष्ठायकसुराणां वा यानानां विविधगजवाजिशिबिकासुखासनस्पन्दानाम्। उपर्यारोहकत्वेनान्तरिक्षचारिता। तेषामुच्चैः स्थितत्वेन खेचराणां नराणां जयारवः जयजयेति निनादः अभवत्संजायते स्म। उत्प्रेक्ष्यते—सूरेर्मुनीन्द्रोर्महिमानं माहात्म्यं समीक्ष्य सम्यगवलोक्य हृदा मानसेन कृत्वा अद्भुतमाश्चर्यं दधाने बिभ्राणे रोदसी भूमीनभसी दिवस्पृथिव्यौ वा स्तुतः स्तुतिं कुरुतः॥

શ્લોકાર્થ

તે અવસરે, ભૂચર અને ખેચરોના જયજયારવના કોલાહલ શબ્દ વડે ભૂમાર્ગ અને આકાશમાર્ગ વ્યાપ્ત બન્યો. તે જાણે આચાર્ય મહારાજના શ્રેષ્ઠ મહાત્મ્યને જોઈને હૃદયમાં હર્ષ ધારણ કરતા આકાશપૃથ્વી સૂરિજીની સ્તુતિ કરતાં ન હોય!॥ ૧૨૦॥

मिलत्पयोवाहपयोधिगर्जितैरिवाहतातोद्यनिनादसान्द्रितैः।
प्रमोदमाद्यत्तुमुलैस्तनूमतां जगत्तदा शब्दमयं स्म जायते॥ १२१॥

तदा तस्मिन्वसतिसमागमनसमये तनूमतां भविकजनानां प्रमोदेन प्रोल्लसत्प्रबलप्रह्लादेन माद्यन्तो बहुलीभवन्तो ये तुमुला व्याकुलशब्दाः 'अध्वं धावत यात मुञ्चत पुरः पन्थानम्' इत्यादिकोलाहलास्तैः कृत्वा जगद्विश्वं शब्दमयं केवलं नादस्वरूपं जायते स्म। किंभूतैः तुमुलैः। आहतानि हस्तदण्डादिभिस्ताडितानि उपलक्षणान्मुखैर्वादितानि च परस्परं दण्डैर्वा घर्षितानि आतोद्यानि नानाविधानि वादित्राणि तेषां निनादैर्निर्घोषैः सान्द्रितैर्नीरन्ध्रीभूतैः। उत्प्रेक्ष्यते—मिलन्तः श्लिष्यन्तः दिग्दिग्भ्यः आगत्य एकीभवन्तो वा अविरलसलिलपटलैः पर्युन्नमन्तो वा पयोवाहाः प्रबलजलभृतगर्भघना यत्र तादृशस्य पयोधेर्गर्जितैर्गम्भीरधीरारवैरिव॥

શ્લોકાર્થ

તે અવસરે, દશેદિશાઓથી એકીસાથે મળેલા જલથી પરિપૂર્ણ મેઘથી ગર્જના-સમાન અનેક પ્રકારનાં વાજિંત્રોના અવાજથી અને અતિઆનંદિત બનેલા ભવ્ય જીવોના આનંદપૂર્ણ કોલાહલ શબ્દથી જગત શબ્દમય બની ગયું હતું. ॥ ૧૨૧॥

कुलाङ्गनाभिः प्रभुमूर्ध्नि हैमनप्रसूनमुक्ताफललाजराजिभिः।
ववर्षिरे प्रावृषि मेघपङ्क्तिभिस्तदाम्बुधारा शिखरे गिरेरिव॥ १२२॥

तदा तस्मिन्व्यतिकरे प्रभुमूर्ध्नि हीरसूरेर्मस्तकोपरि कुलाङ्गनाभिः सुकुलोद्भवसधववधूभिर्हैमनानि हेम्नामिमानि सुवर्णसंबन्धीनि। 'हीराङ्कुरश्चारुणि हेमनीव' इति नैषधे। 'हेमः अकारान्तः पुंनपुंसके नकारान्तस्तु नपुंसके एव' इति लिङ्गानुशासनावचूर्णौ। प्रसूनानि कुसुमानि। उपलक्षणात् रूप्यपुष्पाणि च। तथा मुक्ताफलानि मौक्तिकानि। तथा लाजा अक्षता उपलक्षणादक्षततन्दुलाश्च तेषां राजयः श्रेणयो ववर्षिरे वृष्टाः। काभिरिव। मेघपङ्क्तिभिरिव। यथा प्रावृषि वर्षाकाले धाराधरधोरणीभिर्गिरेः पर्वतस्य शिखरे शृङ्गोपरि अम्बुधाराः पयःप्रवाहाः वर्ष्यन्ते। 'वर्ष वर्षणे' धातुः। यदुक्तम्—'गर्जति शरदि न वर्षति वर्षति वर्षासु निःस्वनो मेघः' इति वचनात्॥

શ્લોકાર્થ

જેમ વર્ષાકાળમાં પર્વતનાં શિખર ઉપર મેઘપંક્તિ જલધારા વરસાવે તેમ હીરવિજયસૂરિના મસ્તક ઉપર કુલાંગનાઓ સોનાચાંદીનાં ફૂલો, મોતી અને અક્ષતોની શ્રેણિ વરસાવતી હતી. ॥ ૧૨૨ ॥

परार्ध्यसंख्यैः पुरुषैः परिष्कृतः प्रभुर्महे बिभ्रति मेदसां भरम्।
चतुर्निकायप्रभवैरिवामरैः प्रतिष्ठते स्म त्रिजगत्पुरंदरः ॥ १२३ ॥

प्रभुर्हीरसूरिः प्रतिष्ठते स्म। राजद्वारादुवसतिं प्रति प्रचलति स्म। कस्मिन् सति। महे थानसिंहादिश्राद्धजननिर्मितमहोत्सवे मेदसां पुष्टीनां भरमतिशयं बिभ्रति धारयति सति। 'तपर्तुपूर्ताविपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे' इति नैषधे। किंभूतैः पुरुषैः। परार्ध्याः सर्वोत्कृष्टाः लौकिकसंख्याः। यथा 'एकं दश शतं सहस्रमयुतं लक्षं प्रयुतं कोटी अर्बुदमब्जं खर्वं निखर्वं महाम्बुजं शङ्कुं वार्धिरन्त्यं मध्यं परार्ध्यमेतत्प्रमाणैर्गणनातीतैर्मनुष्यैः प्रकृष्टा वा संख्या प्रमाणमुत्तमो विचारो धर्मतत्त्वादिको वितर्को येषाम्। 'संख्यैकादौ विचारे च' इत्यनेकार्थः। 'परार्ध्यं च प्रकृष्टे स्यात्संख्यायामपि' इति अनेकार्थः। परिष्कृतः परीतः परिवृतः। क इव प्रतस्थे। त्रिजगत्पुरंदर इव। यथा जगत्त्रयीनायकस्तीर्थंकरः चत्वारो निकाया नराणि भवनानि ज्योतिर्विमानानि कल्पविमानानि च गृहाणि येषां चत्वारो निकायाः संघाः समुदाया वा येषाम्। अथ वा व्यन्तरभवनपतिज्योतिष्कवैमानिकलक्षणा निकाया वैक्रियशक्तिकामचारिदेवत्वेन समानधर्मिकजातिप्रभवैः। 'निकायस्तु सधर्मिणाम्' इति हैम्याम्। 'निकायः सद्मसंघयोः। परमात्मनि लक्ष्ये च' इत्यनेकार्थः। तादृशैरमरैः। 'चतुर्विधामर्त्यनिकायकोटिर्जघन्यभावादपि पार्श्वदेशे' इति हैम्याम्। परिवारितः प्रतिष्ठते। पथीत्यध्याहारः॥

શ્લોકાર્થ

ભુવનપતિ, વ્યંતર, જ્યોતિષી અને વૈમાનિક એ ચારે નિકાયનાં ક્રોડો દેવોથી પરિવરેલા તીર્થંકર પરમાત્મા જેમ ચાલે તેમ થાનસિંહઆદિ શ્રાવકોએ મહોત્સવ કરતાં

અસંખ્ય પુરુષોથી પરિવરેલા શ્રી હીરવિજયસૂરિ, રાજસભામાંથી ઉપાશ્રય તરફ આવતા અત્યંત પુષ્ટિ ધારણ કરતા હતા, અર્થાત્ શોભતા હતા. ॥ ૧૨૩ ॥

निपीयमानो नयनैर्मृगीदृशामिवार्च्यमानो विकचाम्बुजन्मभिः ।
प्रणूयमानः कविभिर्नवस्तवैर्जगत्पृणन्वीयगुणैश्च वास्तवैः ॥ १२४ ॥

मृगारिरद्रेरिव कंदरोदरे कृशोदरीणां मनसीव मन्मथः ।
अमर्त्यदन्ती चतुरे हरेरिव व्रतिक्षितीन्द्रो वसतौ विवेश ॥ १२५ ॥

स व्रतिक्षितीन्द्रः हीरविजयसूरिराजो वसतौ उपाश्रये विवेश प्रविष्टवान् । क इव । मृगारिरिव । यथा कण्ठीरवः अद्रेः पर्वतस्य कंदरोदरे गुहामध्ये प्रविशति । पुनः क इव । मन्मथ इव । यथा मनोभवः कृशोदरीणां तरुणीनां मनसि चित्ते प्रविशति । पुनः क इव । अमर्त्यदन्तीव । यथा सुरगज ऐरावणगजः हरेरिन्द्रस्य चतुरे हस्तिशालायां प्रविशति । 'हस्तिशाला तु चत्वरम्', 'वाजिशाला तु मन्दुरा' इति हैम्याम् । स किं क्रियमाणः । मृगीदृशां सारङ्गीलोचनानाम् । 'सारङ्गी सिंहशावं स्पृशति सुतधिया नन्दिनी व्याघ्रपोतम्' इत्यादि समवसरणवर्णने । नयनैर्नेत्रैर्निपीयमानः सादरं निरीक्ष्यमाणः । उत्प्रेक्ष्यते—विकचाम्बुजन्मभिरुन्निद्रनीलोत्पत्तिरिवार्च्यमानः पूज्यमान इव । पुनः किं क्रियमाणः । कविभिः काव्यकर्तृभिः पण्डितैर्वा नवस्तवैः सचस्कैः काव्यैः स्तुतिभिर्वा प्रणूयमानो वर्ण्यमानः स्तूयमानः । स किं कुर्वन् । वास्तवैः । स्वाभाविकैः जिनवज्जन्मकालोत्पन्नैः स्वीयगुणैः कृत्वा जगद्विश्वलोकं पृणन् आनन्दयन् ॥ इति सूरेः समहं वसतावागमनम् ॥

श्लोकार्थ

મૃગાક્ષી સ્ત્રીઓ આદરપૂર્વક તેઓને જોતી હતી, તે જાણે વિકસ્વર નીલકમલ દ્વારા અર્ચન કરાતા ન હોય? જગતને ખુશ કરે તેવા સ્વાભાવિક ગુણોના નવનવા સ્તોત્રો બનાવીને કવિઓ વડે સ્તુતિ કરાતા આચાર્યદેવે, સિંહ જેમ પર્વતની ગુફામાં પ્રવેશ કરે, કામદેવ જેમ સ્ત્રીઓનાં હૃદયમાં વાસ કરે, ઐરાવણ હાથી જેમ હસ્તિશાલામાં પ્રવેશ કરે અને અશ્વ જેમ અશ્વશાલામાં પ્રવેશ કરે તેમ ઉપાશ્રયમાં પ્રવેશ કર્યો.

॥ ૧૨૪ ॥ ૧૨૫ ॥

प्रतापदेवीतनयस्तदुत्सवे समर्थयन्नर्थिततैर्मनोरथान् ।
दरिद्रमुद्रामभिनत्तमां तटीं प्रवाहवत्प्रावृषि वार्धियोषितः ॥ १२६ ॥

तस्मिन् सूरेरुपाश्रयसमागमनमहामहे प्रतापदेवीतनयः स्थानसिंहः अर्थिततेर्याचकश्रेणेर्मनोरथानभिलाषान् समर्थयन् दरिद्रमुद्रां दुःखावस्थामभिनत्तमामतिशयेन भिनत्ति स्म। किंवत्। प्रवाहवत्। यथा प्रावृषि बहुसलिलभरनिर्भरातिसमुन्नमननिरन्तरनिष्पतन्नीरधाराधोरणीबन्धुरधाराधरसमये वार्धियोषितः समुद्रमहिलाया नद्याः प्रवाहः पानीयपूरः तटीं सरिदुभयसमीपोच्चभूमीम्। तीरभित्तिमित्यर्थः। भिनत्ति पाटयति ॥

श्લોકાર્થ

વર્ષાઋતુમાં જેમ નદીઓનો પ્રવાહ નદીના બંને કાંઠા ભેદે તેમ તે અવસરે પ્રતાપદેવીના પુત્ર થાનસિંહ યાચકવર્ગના મનોરથોને પૂર્ણ કરતો દરિદ્રતાના મૂલને ભેદતો હતો. ॥ ૧૨૬ ॥

तडिद्वता तस्य निजातिपातुकां समीक्ष्य सर्वार्थिषु कामवर्षिताम् ।
शितीकृतास्येन पदं मुरद्विषो निषेव्यते तत्तुलनाकृते किमु ॥ १२७ ॥

तडिद्वता विद्युद्वनितानुषङ्गभाजा मेघेन तत्तुलनाकृते तदवसरदानशौण्डीभवत्स्थानसिंहसमानताप्राप्तये। उत्प्रेक्ष्यते—मुरद्विषः पदं निषेव्यते विष्णुपदं व्योम समुपास्यते इव। किंभूतेन तडिद्वता। शितीकृतं कृष्णं विहितमास्यं वदनं येन। किं कृत्वा। तस्य थानसिंहस्य निजमात्मानमतिपतति अतिक्रामतीत्येवंशीलां निजातिपातुकां काममतिशयेन कामानभिलाषान् वर्षति संपूरयति इत्येवंशीलः कामवर्षी तस्य भावस्तत्तां समीक्ष्य दृष्ट्वा। 'सरूपाणामेकशेषः–' इत्येककामशब्दलोपः ॥ इति थानसिंहकृतसूरिसमागममहोत्सवः ॥

શ્લોકાર્થ

તે અવસરે યાચકોની ઇચ્છાથી પણ અધિક દાન આપતા થાનસિંહની પોતાનાથી અધિક દાનવીરતાને જોઈને શ્યામ બની ગયેલા મુખવાળા મેઘવડે, થાનસિંહની તુલના પ્રાપ્ત કરવા માટે જ જાણે આકાશની સેવા કરાતી ન હોય? (મેઘ આકાશમાં હોય છે.) ॥૧૨૭॥

स्वकोशरक्षाधिकृतस्य भूमिमानिवाखिलक्षोणिजयार्जितैर्धनैः ।
विधाय कोशं नृपदत्तपुस्तकैः स स्थानसिंहस्य वशंवदं व्यधात् ॥ १२८ ॥

स हीरविजयसूरिः नृपेणाकब्बरसाहिना दत्तैरुपदीकृतैः पुस्तकैः कोशं भाण्डागारं विधाय स्वयं निष्पाद्य स्थानसिंहस्य वशंवदमायत्तं व्यधाचक्रे। क इव। भूमिमानिव। यथा पृथ्वीपालः अखिलायाः समस्तायाः क्षोणेः पृथिव्या जयेन स्वायत्तीकरणेनार्जितैः संचितैर्धनैः द्रविणैः। इदं तु साधितत्रिखण्डवसुधामण्डलस्यैव मण्डलीकस्य राजाधिराजस्य

घटते कोशं निर्माय स्वस्यात्मनः कोशस्य भाण्डागारस्य रक्षायामधिकृतस्याऽऽदृतस्य सम्यग् नीतिमत्सत्यवाक् स्वामिभक्ततया अङ्गीकृतस्य भाण्डागारिणो वशं विधत्ते ॥ इति पुस्तककोशः ॥

श्लोकार्थ

જેમ રાજા સમસ્ત પૃથ્વી પર જય મેળવવા દ્વારા પ્રાપ્ત થયેલા ધનનો અખૂટ ભંડાર બનાવીને કોશાધ્યક્ષ-ભંડારીને સુપ્રત કરે તેમ હીરવિજયસૂરિએ રાજાએ ભેટ આપેલો પુસ્તકભંડાર થાનસિંહને સ્વાધીન કર્યો. ॥ १२८ ॥

क्रमान्महादेशमिवावनीशितुर्निदेशमासाद्य पयोधरोदये ।
फतेपुरात्स प्रभुरागरापुरं पवित्रयामास पदाम्बुजन्मभिः ॥ १२९ ॥

स प्रभुः सूरिः पयोधरोदये वर्षाकालप्रारम्भे क्रमादनुक्रमतः फतेपुरात् श्रीकरीनगरात् उग्रसेनपुरापरपर्यायमागरा इति नाम पुरं पदाम्बुजन्मभिः चरणकमलैः कृत्वा पवित्रयामास पावनीकरोति स्म । किं कृत्वा । क्रमात्कियद्भिर्वासरैरवनीशितुरकब्बरसाहेर्निदेशमाज्ञामासाद्य प्राप्य । कमिव । महादेशमिव । यथा कश्चिद्राजरञ्जकः राज्ञः सकाशान्महान्तं जनपदमासादयति लभते ॥ इत्यागरानगरे गमनम् ॥

श्लोकार्थ

રાજાનો પ્રીતિપાત્ર એવો કોઈ રાજપુરુષ રાજા પાસેથી જેમ મહાન દેશ પ્રાપ્ત કરે તેમ અકબર બાદશાહની આજ્ઞા પામીને આચાર્યદેવે વર્ષાકાળના પ્રારંભ સમયે ફતેહપુરથી વિહાર કરીને અનુક્રમે પોતાનાં ચરણકમલ વડે 'આગ્રા' નગરને પવિત્ર કર્યું. ॥ १२९ ॥

न राजहंसान्क्वचन प्रवासयन्वियोगिनोऽपि प्रणयंश्च निर्वृतान् ।
न दुर्दिनं क्वापि सृजंस्तमोद्विषं न च द्विषन्निर्दलयञ्जलोदयम् ॥ १३० ॥

मनोभवं वाभिभवन्गुरोर्महो न निह्नुवानः स्थिरतां पुनर्वहन् ।
अभूदपूर्वः प्रभुरम्बुदः पुरे जिनक्रमोपासनकृद्दिवानिशम् ॥ १३१ ॥

प्रभुर्हीरसूरिः पुरे तत्रागरानगरे अपूर्वोऽसाधारणोऽम्बुदो मेघोऽभूद्बभूव । किं कुर्वन् । राजसु नृपेषु हंसाः प्रधानास्तान्न प्रवासयन् न पीडयन् । आनन्दयन्नित्यर्थः । 'संहरति निर्दलयति निर्वासयति प्रवासयति' इति क्रियाकलापे हिंसार्थाः क्रियाः ।

यदि वा नृपश्रेष्ठान् प्रकर्षेणातिशयेन वासयन् दयादिधर्मतत्त्वे स्थापयन् वासं कारयन् । अथ वा कृपाधर्मसुगन्धवस्तुसौरभेण न सुगन्धीकुर्वन्नपि वासयन्नेव । नकारः काक्वर्थवाची । मेघस्तु वर्षाकाले हंसान्मानसं प्रति प्रस्थापयति । यथा—'प्रोषितकलहंसवयसि' इति चम्पूकथायाम् । 'प्रोषिता मानसं प्रस्थापिता हंसपक्षिणो येन' इति तद्वृत्तिः । पुनः किंविशिष्टः त्रिशिष्टः मनोवाक्कायसंबन्धी अथ वा यमाद्यङ्गयुक्तः प्रशस्तोऽन्यो वा योग एषामस्तीति । यदि वा सर्वसांसारिकसङ्गाद्वियोगो विरहः पृथग्भावो विद्यते येषां ते वियोगिनः संयमिनस्तेषां निर्वृत्तिं मोक्षं प्रणयन् कुर्वन् । विरहिणामपि प्राचीनाचीर्णकर्मपरिणतिप्रकटनपूर्वं संसारानित्यतां प्रकटयन् धर्मोपदेशप्रदानादिना सुखयन् । मेघस्तु वियोगिनो व्यथयति । पुनः किंभूतः । क्वापि कुत्रापि स्थाने दुर्दिनं दुष्टं दिवसं न सृजन् । अपि तु प्रतिबोधप्रदानेन धर्ममाहात्म्यात्सुदिवसानेव कुर्वन् । मेघस्तु दुर्दिनं घनघटासंघट्टप्रकटीभवद्विकटान्धकारं करोति । च पुनस्तमसामज्ञानानां पाप्मनां वा द्विषं भेदकं ज्ञानिनं साधुं वा न द्विषन्न संतापयन् प्रत्युत प्रीणयन् । मेघस्तु तमोद्विषं भास्करं चन्द्रं वा द्वेष्टि आवृणोति । पुनः किंभूतः । डलयोरैक्यात् भावप्रधाननिर्देशाच्च जडत्वस्य जाड्यस्योदयमज्ञानप्रादुर्भावं निर्दलयन् व्यापादयन् । मेघस्तु जलोदयं वर्धते । च पुनर्मनोभवं काममभिभवन् पराजयमानः । मेघस्तु मदनं मदयति । पुनः किं कुर्वाणः । गुरोः स्वधर्माचार्यस्य विजयदानसूरेर्महः प्रतापं तेजो वा न निह्नुवानः प्रकटीकुर्वाणः । मेघस्तु बृहस्पतितारकतेजो निह्नुते विलुम्पति । पुनः किं कुर्वन् । स्थिरतां संयमधर्मादिषु साहसिक्यात्स्थैर्यं वहन् । मेघस्तु चपलाशयत्वान्नैकत्र कुत्रचित्तिष्ठति । पुनः किंभूतः । दिवानिशं दिवसे निशायां च जिनानां तीर्थकृतां क्रमाणां पादारविन्दानामुपासनां स्तुतिध्यानप्रणामादिभिः सेवां करोति । मेघस्तु जिनक्रमस्य विष्णुपदस्य सेवां वर्षास्वेव तत्रापि कदाचिन्न यावद्धर्मकालमत एव गुरोर्मेघादसाधारणता ॥ युग्मम् ॥

શ્લોકાર્થ

આચાર્યદેવ આથા નગરમાં અપૂર્વ મેઘરૂપ બન્યા. શ્રેષ્ઠ રાજાઓને પીડા નહીં કરનારા પ્રત્યુત ધર્મમાં વાસ કરાવનારા બન્યા. (મેઘ તો રાજહંસોને પીડાકારક છે.) સંસારથી વિરક્ત સંયમીઓને મોક્ષમાર્ગ ઉપર પ્રયાણ કરાવનારા બન્યા (મેઘ તો વિયોગીઓને દુઃખ આપનારો છે.) આચાર્ય ક્યારે પણ દુર્દિનને નહીં કરનારા પરંતુ ધર્મદેશના દ્વારા હમેશાં સુદિનને કરનારા બન્યા. (મેઘ તો દુર્દિનને કરનારો હોય છે.) આચાર્યદેવ અજ્ઞાનરૂપી અંધકારને દૂર કરી જ્ઞાની પુરુષોને સંતાપ નહી કરનારા પ્રત્યુત ખુશ કરનારા બન્યા. (મેઘ તો સૂર્ય ચંદ્રને આવૃત્ત કરનારો સંતાપ કરનારો હોય છે.) આચાર્યદેવ જડતાનો નાશ કરનારા બન્યા (મેઘ જલનો આશ્રય કરનારો હોય છે.) આચાર્યદેવ કામદેવનો પરાભવ કરનાર બન્યા. (મેઘ કામનું ઉદ્દીપન કરનારો હોય છે.) આચાર્યદેવ પોતાના ગુરૂનો અપલાપ નહીં કરનારા પરંતુ મહિમાને વધારનારા હતા.

(મેઘ તો સૂર્યના પ્રતાપનો અપલાપ કરનારો અર્થાત્ આવૃત્ત કરનારો હોય છે) આચાર્યદેવ સ્થિરતાને કરનારા બન્યા. (મેઘ એકસ્થાને નહીં રહેનારો હોય છે.) આચાર્યદેવ અહર્નિશ જિનોપાસના કરનારા હતા (મેઘ તો વર્ષાઋતુમાં જ જિન-વિષ્ણુનાં ચરણ (આકાશ)ની ઉપાસના કરનારો હોય છે.) આ જ રીતે આચાર્યદેવ અપૂર્વમેઘરૂપે બન્યા. ॥ ૧૩૦ ॥ ૧૩૧ ॥

क्रमाच्चतुर्मासकवासरान्पयोधरे दधाने बहलीभविष्णुताम् ।
निनाय तस्मिन्परिवर्ततां धुनी धवेऽब्धिशायीव गणेन्दिरावरः ॥ १३२ ॥

गणेन्दिरावरस्तपागच्छलक्ष्मीपतिः तस्मिन्नागरानगरे क्रमात्पर्युषणादिपरिपाट्या चतुर्मासकवासरान् वर्षाशरदृतुदिनान् परिवर्ततां क्षयभावं निनाय अतिक्रामति स्म । 'कल्पो युगान्तः कल्पान्तः संहारः प्रलयः क्षयः । संवर्तः परिवर्तश्च' इति हैम्याम् । संपूर्णतां प्रापयामास । कस्मिन्सति । पयोधरे जलवाहे घने बहलीभविष्णुतां दशभ्योऽपि दिग्भ्योऽभ्येत्य समुन्नम्य समुन्नम्य अखण्डवारिधारावर्षणशीलतां दधाने सति । क इव । अब्धिशायीव । यथा समुद्रशयनशीलो विष्णुः वर्षासु नारायणः शेषशय्यायां समुद्रे शेते इति लोकरूढिः । यदुक्तं चम्पूकथायां वर्षावर्णने—'क्षीरसमुद्रनिद्राणबाणबाहुच्छिदि' इति । वारिधौ वर्षा वासरान्परिवर्ततां लम्भयति ॥ इत्यागरानगरे चातुर्मासकरणम् ॥

શ્લોકાર્થ

જેમ વિષ્ણુ સમુદ્રમાં શયન કરે તેમ તપાગચ્છની લક્ષ્મીના સ્વામી હીરવિજયસૂરિના ચાતુર્માસિક દિવસો અનુક્રમે આગ્રા નગરમાં પસાર થયા. ॥ ૧૩૨ ॥

ततोऽल्पकर्मा तपसेव संसृतिं प्रतीर्य पोतेन पतङ्गनन्दनाम् ।
अरिष्टनेमेर्जनुषा पवित्रितं प्रतस्थवाञ्छौर्यपुरं प्रति प्रभुः ॥ १३३ ॥

ततश्चतुर्मास्या अनन्तरं प्रभुः सूरिः शौर्यपुरं प्रति प्रतस्थिवान् प्रचलितः । किंभूतं शौर्यपुरम् । अरिष्टनेमेर्द्वाविंशतितीर्थकृन्नेमिनाथस्य जनुषा जन्मना पवित्रितं पावनीभूतम् । किं कृत्वा । पोतेन यानपात्रेण कृत्वा पतङ्गनन्दनां सूर्यपुत्रीं यमुनां प्रतीर्य तीर्त्वा समुल्लङ्घ्य । क इव । अल्पकर्मेव । यथा लघुकर्मा आसन्नसिद्धिः बहुक्षीणकर्मप्रकृतिर्जन्तुस्तपसा संसृतिं संसारं प्रतरति । पाठान्तरे तर्या नावा कृत्वा अर्यम्णो भानोर्नन्दनां पुत्रीं नदीं यमुनां प्रतीर्य । क इव । भवीव । यथा भव्यजीवो भरतादिवद्भावनया शुभाध्यवसायेन संसृतिं प्रतरति ॥

શ્લોકાર્થ

ચાતુર્માસ પૂર્ણ થયા બાદ, જેમ લઘુકર્મી જીવ તપથી સંસારસમુદ્રને પાર કરે અથવા ભવ્યજીવ ભરતચક્રવર્તીની જેમ શુભ અધ્યવસાય વડે સંસારસમુદ્રને પાર કરે તેમ આચાર્યદેવે વહાણુ વડે યમુનાનદી પાર કરીને, ભગવાન શ્રી નેમિનાથના જન્મથી પવિત્ર થયેલી શૌરીપુરી તરફ વિહાર કર્યો. ॥ ૧૩૩ ॥

यमीसमीपे रपडीपुरे क्रमात्स संघलोकेन समं समीयिवान् ।
मनोरथाकृष्टमिवागतं पुरो व्यलोकयच्छौर्यपुरं पुरस्ततः ॥ १३४ ॥

स सूरिः क्रमात्प्रयाणपरिपाटीतः यम्या यमुनानद्याः समीपे पार्श्ववर्तिनी रपडीनाम्नि पुरे समीयिवान् समागतः। कथम्। समं सार्धम्। केन। संघलोकेन आगराप्रमुखनगरश्राद्धसमुदायेन। श्राद्धानामनु श्राद्ध्योऽपि समेता एव। ततः रपडी आगमनानन्तरं पुरोऽग्रे शौर्यपुरं नाम नगरं 'सोरीपुर' इत्यधुना प्रसिद्धं व्यलोकयत्पश्यति स्म। उत्प्रेक्ष्यते—मनोरथेन सूरीशितुरभिलाषेणाकृष्टमाकृष्यानीतमिव प्रभुपुरः प्रादुर्भूतम् ॥

શ્લોકાર્થ

ત્યાર પછી આચાર્યદેવ અનુક્રમે યમુનાનદીની સમીપમાં રહેલા 'ઝાડીપુર' નામના નગરમાં સંઘની સાથે પધાર્યા—ત્યાંથી આગળ શૌર્યપુર જોવામાં આવ્યું. તે જાણે આચાર્યદેવના મનોરથોથી આકર્ષાઈને સામે આવ્યું ન હોય! ॥ ૧૩૪ ॥

प्रभुः प्रियस्येव स्वधर्मचारिणीमहर्निशं शौर्यपुराङ्कचारिणीम् ।
च्युतोत्तरीयां कवरीमिवार्णवाम्बरेन्दिराया नवभङ्गसङ्गिनीम् ॥ १३५ ॥

संबन्धस्त्वग्रे वक्ष्यते। केवलं कालिन्द्येव वर्ण्यते—यमुनां किंभूताम् शौर्यपुरः सोरीपुरस्य अङ्के समीपे। 'अङ्कः स्थाने क्रोडेऽन्तिकागसोः' इत्याद्यनेकार्थः। चरति वहतीत्येवंशीलाम्। कथम्। अहर्निशं निरन्तरम्। कामिव। सधर्मचारिणीमिव। यथा प्रियस्य स्ववल्लभस्य समानेन धर्मेण चरणशीला पतिव्रता पत्नी नक्तं दिनमङ्के उत्सङ्गे क्रोडे वा समीपे वा चरति प्रवर्तते इत्येवंशीला स्यात्सति व्यतिकरे भर्तुरुत्सङ्गे उपविशति। यदुक्तं नेमिचरित्रे—'अनुज्ञाप्य स्वपितरौ देवदन्तीमुपेयुषीम्। रथमारोपयामास नलोऽङ्के च न्यवीविशत ॥' इत्युत्सङ्गारोपणम्। तथा 'विना ममोरः कतरत्तवासनम्' इति नैषधे। इति क्रोडे। 'अथ सधर्मिणी। पत्नी सहचरी' इति हैम्याम्। सहचरत्वेन समीपचारिणी। उत्प्रेक्ष्यते—अर्णवाम्बरेन्दिरायाः समुद्रवसनालक्ष्म्याः क्षोणीश्रियः कवरीं वेणीमिव।

किंभूतां कबरीम् । च्युत शिरस्तः स्रस्तमुत्तरीयमुपर्याच्छादनवसनं यस्याः । पुनः किंभूताम् । नवाः सद्यस्काः भङ्गास्तरङ्गा रचनाश्च विद्यन्ते यस्याम् ॥

શ્લોકાર્થ

જેમ પતિવ્રતા સ્ત્રી નીરંતર પોતાના પતિની સમીપમાં જ વસે તેમ યમુનાનદી શૌર્યપુરની સમીપમાં વહેતી હતી. તે જાણે મસ્તક ઉપરથી જેનું ઉત્તરીયવસ્ત્ર સરી ગયું છે એવી અને જેનામાં નવનવી રચનાઓ (તરંગો) છે તેવી સમુદ્રમાં રહેલી લક્ષ્મીની વેણી ન હોય? ॥ ૧૩૫ ॥

व्यवस्यमानामिव जेतुमम्बरापगां तरङ्गैर्गगनावगाहिभिः ।
प्रियेण चाणूरभिदा वियोगिनीं निषेवमानामिव तीर्थमेदिनीम् ॥ १३६ ॥

पुनरुत्प्रेक्ष्यते—गगनावगाहिभिर्नभोङ्गणालिङ्गनशीलैस्तरङ्गैः कल्लोलैः कृत्वा अम्बरापगां स्वर्गगङ्गां जेतुं श्रिया पराभवितुं व्यवस्यमानामुद्यमं कुर्वाणामिव । 'प्रगल्भमानाम्' इति पाठो वा । अर्थः पूर्वोक्त एव । पुनरुत्प्रेक्ष्यते—चाणूरनामानं मल्लं भिनत्ति स्मेति चाणूरभित् तेन विष्णुना भर्त्रा समं वियोगिनीं विरहिणीम् । अत एव वैराग्याद्दुःखोत्थित्यै वा । 'जम्मन्तरे न विहडइ उत्तममहिलाणजं किअं पिम्मम् । कालिन्दिकन्हविरहे अज्जवि कालं जलं वहइ ॥' इति वचनात्कृष्णेन कान्तेन वियोगिनीं वियोगवतीम् । वियोगिनां वैराग्यं दुःखोच्छेदकरणं युक्तमेव । तीर्थमेदिनीं श्रीमन्नेमिनाथजन्मकल्याणकभूमीं निषेवमानां भजन्तीमिव ॥

શ્લોકાર્થ

અથવા, જાણે ગગનચૂંબી તરંગો વડે આકાશગંગાનો પરાભવ કરવા યમુના પ્રયત્ન કરતી ન હોય! અથવા 'ચાણુર' નામના મલ્લનો નાશ કરનારા પોતાના પતિ કૃષ્ણના વિયોગથી દુઃખી બનેલી વિયોગિની યમુના પોતાનું વિયોગજન્ય દુઃખ દૂર કરવા માટે, શ્રીનેમિનાથના જન્મકલ્યાણકથી પવિત્ર બનેલી તીર્થભૂમિ શૌર્યપુરીની ભૂમિની જાણે નિરંતર ઉપાસના કરતી ન હોય! (ઉત્તમ પ્રિયા સાથે કરેલો પ્રેમ જન્માંતરમાં પણ ત્યાગ કરાતો નથી. જુઓ, યમુના હજુસુધી પણ પોતાના પતિ કૃષ્ણના વિરહમાં શ્યામ જલ જ વહન કરે છે!) ॥ ૧૩૬ ॥

जलावगाहागतदन्तिपङ्क्तिभिर्निलीनशैलाब्धितुलावहामिव ।
भुजामिवाम्भोजमुखीं मृणालिकां हिरण्यबाहुं दधतीं च नाभिवत् ॥ १३७ ॥

पुनरुत्प्रेक्ष्यते—जलावगाहार्थं सूर्यातपातितप्तवपुस्तया वा स्नातेन वा तरुणकरिणीभिः समं सलिलकेलिकरणायागताभिः समेताभिर्दन्तिपङ्क्तिभिर्गजराजीभिः कृत्वा निलीना वज्रपाणिभयात्प्रणश्यात्यगाधपानीयप्रविष्टाः शैलाः पर्वता यत्र तादृशस्याब्धेः समुद्रस्य तुलायाः साम्यस्य वहां धारिणीमिव । पुनरुत्प्रेक्ष्यते—किं कुर्वतीम् । दधतीं बिभ्रतीम् । काम् । मृणालिकां पद्मनालिकाम् । कामिव । अम्भोजमुखीमिव । यथा पद्मवदना स्त्री कोमलां भुजां बाहुलतां धत्ते । च पुनः स्त्रीनाभिवत्तुन्दकूपिकामिव हिरण्यबाहुं शोणं हृदं दधतीम् । अथ चन्द्रमाः । अम्भोजं कमलमेव मुखं वदनं यस्याः ॥

श्लोकार्थ

જલક્રીડા કરવા માટે આવેલા હાથીઓની હારના ભયથી ત્રાસ પામીને પર્વતો જેના અગાધ જલમાં પ્રવેશી ગયા છે, તેવા સમુદ્રની જાણે યમુના તુલના કરતી ન હોય? અથવા યમુના, કમલની નાલરૂપી પદ્મવદના સ્ત્રીની ભુજા ધારણ કરતી ન હોય! અથવા હૃદયરૂપી નાભિને વહન કરતી ન હોય! ॥ ૧૩૭ ॥

अमुं नमन्तीमिव वीचिसंचयैर्विभावयन्तीं शफरीक्षणैरिव ।
अभिष्टुवन्तीमिव विष्किरक्वणैर्लुलत्कजैर्नृत्यमिव प्रकुर्वतीम् ॥ १३८ ॥

पुनरुत्प्रेक्ष्यते—वीचिसंचयैः उन्नमन्नमद्भिः परिस्फुरत्तरङ्गगणैः कृत्वा अमुं सूरीन्द्रं नमन्तीमिव कल्लोलमालानामुन्नम्य नम्रीभवनेन प्रणामं सृजन्तीमिव । पुनरुत्प्रेक्ष्यते—शफर्यो मत्स्या एव ईक्षणानि । अथ वा 'मीनलोचनैः' इति पाठे मीना एव लोचनानि नयनानि तैर्विभावयन्तीमिव । सूरीन्द्रं निर्निमेषं निरीक्ष्यमाणामिव । तथा 'विस्फुरच्छफरीनेत्रा तत्रापि रणसाक्षिणी । अस्ति ज्योत्स्नासपत्नाम्बुरियमेव सरस्वती ॥' इति पाण्डवचरित्रे । पुनरुत्प्रेक्ष्यते—विष्किराणां जलचारिणां हंससारसक्रौञ्चदीनां पानीयपानागतानामपरेषां वा पक्षिणां क्वणैः शब्दैः कृत्वा मुनीन्द्रममुमभिष्टुवन्तीमिव सूरेः स्तुतिं विदधतीमिव । पुनरुत्प्रेक्ष्यते—लुलन्ति प्रचलत्कल्लोलैस्तरलीभवन्ति यानि कजानि कमलानि तैरस्य पुरो नृत्यं ताण्डवं कुर्वतीमिव ॥

श्लोकार्थ

યમુના પોતાના સ્ફુરાયમાન તરંગો વડે આચાર્યદેવને જાણે નમસ્કાર કરતી ન હોય! તેમજ માછલીઓરૂપી નેત્રો વડે વારંવાર પ્રેમપૂર્વક આચાર્યશ્રીને જાણે નીરખતી ન હોય! અથવા જલચર જીવોના અવાજથી જાણે સ્તુતિ કરતી ન હોય! અથવા તરંગોથી કંપાયમાન બનેલાં કમલો વડે જાણે નૃત્ય કરતી ન હોય! ॥ ૧૩૮ ॥

निखेलियोषास्तनचन्दनद्रवैः सरिद्वरासंवलितप्लवामिव ।
क्रमात्स तत्राप्यवतीर्य सूर्यजां न्यभालयन्नेमिनिकेतनं पुरः ॥ १३९ ॥

पुनरुत्प्रेक्ष्यते—नितरां स्वस्वकान्तैः समं सखीभिः सार्धं वा खेलन्ति जलक्रीडां कुर्वन्तीत्येवंशीला निखेलिन्यो या योषा विविधभूचरखेचरचञ्चललोचनास्तासां स्तनानां कुचान्तरकुचोपरिविरचितविचित्रपत्रवल्लीविलेपनादिसत्कसलिलसंयोगगलच्चन्दनद्रवैः श्रीखण्डवर्चारसैः कृत्वा सरिद्वरया गङ्गया संवलितो मिश्रीभूतः प्लवः पयःपूरो यस्यास्तादृशीमिव । तत्रापि गङ्गायमुनाप्रवाहद्वयकलितामिव स प्रभुर्हीरसूरिः क्रमात्संघलोकशिष्यानुत्तरणानुपूर्व्या रपडीपार्श्वे पूर्वव्यावर्णितस्वरूपां सूर्यजां मार्तण्डनन्दनां यमुनामवतीर्योल्लङ्घ्य पुरोऽग्रे नेमिनिकेतनम् । लोकरूढ्या यत्र स्थाने श्रीनेमेर्जन्मकल्याण कमजायत तस्मिन्नेव पुण्यपृथ्वीप्रदेशे प्रासादः कारितोऽस्तीति श्रूयते । पश्चाज्जिनो वेद तं नेमिनाथप्रासादं न्यभालयद्विलोकते स्म ॥ पञ्चभिः कुलकम् ॥ यमुनावर्णनम् । इति सूरेः शौर्यपुरागमनाम् ॥

શ્લોકાર્થ

પોતાના સ્વામીઓની સાથે જલક્રીડા કરવા માટે આવેલી સર્વે સ્ત્રીઓના વક્ષસ્થલ ઉપર વિલેપન કરેલા ચંદનના પ્રવાહીરૂપી આકાશગંગાના પ્રવાહથી જેનો જલપ્રવાહ વ્યાપ્ત બન્યો છે તેવી યમુનાને અનુક્રમે પાર કરીને શૌર્યપુરમાં આવેલા શ્રીનેમિનાથ ભગવાનના પ્રાસાદ (જે સ્થાને પ્રભુનો જન્મ થયેલો તે જ સ્થાને કરાવેલો પ્રાસાદ)ને જોયો. ॥ ૧૩૯ ॥

स तूररावैः कुलशैलकंदरोदरप्रसर्पत्प्रतिनादमेदुरैः ।
निनाय नेमेर्वसतिं प्रदक्षिणां महोदयाम्भोनिधिनन्दनामिव ॥ १४० ॥

स हीरसूरिः तूररावैरनेकवादित्रनिर्घोषैः सार्धं नेमेः श्रीअरिष्टनेमिनाथस्य वसतिं प्रासादं त्रिर्वारं भ्रमणीरूपां परितः प्रदक्षिणां निनाय प्रापयति स्म । त्रिः प्रदक्षिणीकरोति स्मेत्यर्थः । किंभूतैः तूररावैः । कुलशैलाः मन्दरमेरुकैलासहिमाचलप्रमुखाः सप्त कुलपर्वतास्तेषां कंदाराणां गुहानामुदरेषु मध्येषु प्रसर्पन्तः प्रवर्तमानाः प्रसरन्तो वा ये प्रतिनादाः प्रतिशब्दाः 'पडच्छन्दा' इति प्रसिद्धाः तैर्मेदुरैः सान्द्रैः पुष्टीभूतैः । उत्प्रेक्ष्यते—महोदयो महानतिशायी अभ्युदयो विशिष्टवैभवप्रारम्भः स एवाम्भोनिधिनन्दनां लक्ष्मीं प्रदक्षिणां प्रकर्षेणातिशयेन दक्षिणां स्वानुकूलां निजानुरागिणीमिव निनाय कृतवान् ॥

શ્લોકાર્થ

મેરૂ, હિમાચલ, કૈલાસ આદિ સાત કુલપર્વતોની ગુફામાં પ્રસરી રહેલા પડઘાઓથી

પુષ્ટ અને અનેક પ્રકારનાં વાજિંત્રોના નાદની સાથે શ્રીહીરવિજયસૂરિએ શ્રીનેમિનાથ ભગવાનના પ્રાસાદને ત્રણ પ્રદક્ષિણા આપી, તે જાણે મોક્ષરૂપી સમુદ્રની પુત્રી લક્ષ્મીને અનુકૂલ કરતા ન હોય! ॥૧૪૦॥

निजां तनूजां धरिणीप्रचारिणीमिवाभ्रकेतौ मिलितुं समीयुषि ।
विवेश तस्मिञ्छमिनां शतक्रतुः शिवासुतस्यायतने हिरण्मये ॥ १४१ ॥

शमिनां शतक्रतुर्वाचंयमवासवः तस्मिन् प्रह्लादपूर्वं पूर्वमेव दृष्टे शिवायाः समुद्रविजयराजजायायाः सुतस्य नेमिनाथस्य आयतने प्रासादे विवेश प्रविष्टवान् । किंभूते । हिरणमये स्वर्णनिर्मिते सुवर्णप्रधाने । उत्प्रेक्ष्यते—धरिण्यां भूमीमण्डले प्रकर्षेण चरति प्रसरति इत्येवंशीलां निजामात्मीयां तनूजां पुत्रीं यमुनानाम्नीं मिलितुं सुतात्वेन स्नेहसंबन्धान्मिलनार्थं समागते गगनाङ्गणात्क्षोणीचक्रे संप्राप्ते अभ्रकेतौ नभाष्कतेन सूर्य इव । 'हरिः शुचीनौ गगनाध्वगाध्वगौ' इति हैम्याम् ॥

શ્લોકાર્થ

સાધુઓમાં ઇન્દ્રસમાન શ્રીહીરવિજયસૂરિએ, નેમિનાથ ભગવાનના સુવર્ણમય પ્રાસાદમાં અત્યંત આનંદપૂર્વક પ્રવેશ કર્યો. તે પ્રાસાદ જાણે પૃથ્વી ઉપર વહી રહેલી પોતાની પુત્રી યમુનાને પુત્રીસ્નેહથી પ્રેરાઈને મળવા માટે આવેલો સૂર્ય ન હોય! ॥૧૪૧॥

जनार्दनान्दोलनकेलयेऽभवत्प्रलम्बदोलेव यदीयदोर्लता ।
य उग्रसेनस्य सुतां प्रभुर्जहौ पतिस्तमीनामरविन्दिनीमिव ॥ १४२ ॥

प्रभुर्हीरसूरिः नेमिं ददर्श इत्यग्रे वक्ष्यते । इति संबन्धः । यच्छब्देन तद्वर्णनमाह—यदीयदोर्लता श्रीनेमिनाथसंबन्धिनी दक्षिणबाहुवल्ली जनार्दनस्य नारायणस्य आन्दोलनस्य प्रेङ्खोलनस्य केलये क्रीडायै प्रलम्बा अतिव्यायता दोला प्रेङ्खा इवाभवत् । पुनर्यो भगवान् उग्रसेनस्य भोजकवृष्णेः सुतस्योग्रसेननृपतेः सुतां नन्दनां राजमतीं जहौ तत्याज न परिणिन्ये । क इव । पतिरिव । यथा तमीनां पतिः रजनीदयितश्चन्द्रमाः अरविन्दिनीं कमलिनीं जहाति ॥

શ્લોકાર્થ

હીરવિજયસૂરિજીએ ભગવાન નેમિનાથનાં દર્શન કર્યાં. તે પ્રભુના બાહુદંડ કૃષ્ણને હિંડોળાની ક્રીડા માટે હિંડોળારૂપ બન્યા હતા; અને ચન્દ્ર કમલિનીનો ત્યાગ કરે તેમ તે પ્રભુએ ઉગ્રસેન રાજાની પુત્રી રાજિમતીનો ત્યાગ કર્યો હતો. ॥૧૪૨॥

तनुश्रिया येन निजौजसा पुनर्जितो ह्रियानङ्ग इवाङ्गजोऽजनि ।
यदङ्गरुग्निर्जितनीलनीरजैरभाजि दुःखादिव पुष्करे तपः ॥ १४३ ॥

पुनर्येन नेमिनाथेन तनुश्रिया शरीरशोभया पुनर्निजौजसा स्वबलेन आत्मीयप्रतापेन वा जितोऽभिभूतः अङ्गजः कंदर्पः । 'अङ्गजः पुत्रकामयोः' इत्यनेकार्थः । तथा 'कमनः कलाकेलिरनन्यजोऽङ्गजः' इति हैम्याम् । उत्प्रेक्ष्यते—ह्रिया मन्दाक्षेणेव अनङ्गो मुक्तकाययष्टिरजनि संजात इव । पुनर्यस्य परमेष्ठिनः अङ्गरुचा शरीरस्य मरकतमणिमसृणकान्त्या निर्जितैः परिभूतैः नीलनीरजैरिन्दीवरैः दुःखात्पुष्करे तीर्थविशेषजले च । 'पुष्करं तु जले व्योम्नि तीर्थे कुण्डे च' इत्यनेकार्थः । तपः अभाजि तपस्तप्यते इव । निर्जितो हि ह्रिया तपस्यति पराभवदुःखोद्विग्नो वा तत्तुल्यतायासये वा ॥

શ્લોકાર્થ

તે નેમિનાથ ભગવાનના શરીરની શોભાથી અને પ્રતાપથી પરાભવ પામેલો કામદેવ લજ્જા વડે જાણે ત્યારથી જ અનંગ (શરીર વિનાનો) બની ગયો ન હોય! જે પ્રભુના અંગની સુચારૂ શોભાથી પરાભવ પામેલા નીલકમલો દુઃખથી જ જાણે પુષ્કર નામના તીર્થમાં તપ કરતા ન હોય! ॥ ૧૪૩ ॥

रवेण बाह्याहितजित्वरं तरोऽप्यभिप्रपन्नः पुनरान्तरद्विषाम् ।
विघातशक्तिं [1]स्पृहयन्त यत्पदं हरेस्त्रिरेखोऽङ्कमिषान्निषेवते ॥ १४४ ॥

हरेर्विष्णोस्त्रिरेखः पाञ्चजन्यनामा शङ्खः अङ्कमिषाल्लाञ्छनच्छलात् यत्पदं नेमिनाथचरणं निषेवते । उत्प्रेक्ष्यते—रवेण निजशब्देन बाह्या भूमिनभः संचारिणः प्रत्यक्षा ये अहिताः प्रतिपक्षास्तेषां जित्वरं जयनशीलं तरो बलं अभिप्रपन्नः संप्राप्तोऽपि । यदुक्तम्—'अम्भोधेरेव जाता जगति कति न ते हन्त सन्तीह शङ्खा यान्बिभ्राणा भ्रमन्ति प्रतिभवनममी भिक्षवो जीवनाय । एकः श्रीपाञ्चजन्यो हरिकरकमलक्रोडहंसायमानो यस्य ध्वानैरमानैरसुरसुरवधूवर्गगर्भा गलन्ति ॥' इति । पुनरान्तराणामन्तरङ्गा नामनन्तकालादात्मना प्रतिबद्धानां द्विषां कर्मशत्रूणां विघातशक्तेर्व्यापादनसामर्थ्यस्य स्पृहया वाञ्छयेव सेवते ॥

શ્લોકાર્થ

વિષ્ણુનો 'પાંચજન્ય' શંખ લાંછનના બ્હાને ભગવાન નેમિનાથના ચરણકમલની

---

१. 'विघातशक्तेः स्पृहया वाञ्छयेव सेवते' इति टीकादर्शनात् 'विघातशक्तः स्पृहयेव यत्पदम्' इति पाठो भवेत्.

સેવા કરતો હતો. પોતાના અવાજથી બાહ્યશત્રુઓનો જય કરવા માટેનું સામર્થ્ય પ્રાપ્ત થવા છતાં પણ આત્માની સાથે અનંતકાળથી રહેલા કર્મોરૂપી અંતરંગશત્રુઓની વિઘાતક શક્તિને તોડવા માટે જ જાણે પ્રભુની સેવા કરતો ન હોય! ॥ ૧૪૪ ॥

अशीलि शीलेन जितेन येन किं ह्रिया कुमारेण गिरेरधित्यका ।
प्रभुर्जिनं तं यदुवंशभास्करोदयोदयक्षोणिधरं दृशा पपौ ॥ १४५ ॥

येन भगवता शीलेन स्वब्रह्मचर्येण जितेन तिरस्कृतेन कुमारेण स्वामिकार्तिकेन । 'षाण्मातुरो ब्रह्मचारी गङ्गोमाकृत्तिकासुतः' इति हैम्याम् । उत्प्रेक्ष्यते—ह्रिया लज्जया गिरेर्गन्धमादनाभिधानभूधरस्याधित्यका ऊर्ध्वभूमिः शृङ्गमशीलि सेवितम् । तत्र गत्वा स्थित इत्यर्थः । 'सुगन्धिगन्धमादनाधिवासिनः स्कन्ददेवस्य दर्शनार्थमितो गतवानस्मि' इति चम्पूकथायाम् । तथा पित्रोरपेक्षया तु कैलासाचलचूलिकायां स्थानम् । तथा 'स्कन्दो मन्दमतिश्चकार न करस्पर्शं श्रियाः शङ्कितः' इति खण्डप्रशस्तौ । प्रभुः सूरिस्तं पूर्वव्यावर्णितं जिनं नेमिनाथं दृशा नेत्रेण पपौ सादरं पश्यति स्म । किंभूतः । यदूनां यादवानां वंशोऽन्ववायः स एव भास्करः सूर्यस्तस्योदयार्थमुद्गमनाय उदयक्षोणिधरः । पूर्वपर्वत इत्यर्थः ॥ चतुर्भिः कलापकम् । नेमिनाथवर्णनम् ॥

શ્લોકાર્થ

ભગવાન નેમિનાથના નૈષ્ઠિક બ્રહ્મચર્ય વડે પરાભવ પામેલા કાર્તિક સ્વામીએ લજ્જાથી જ જાણે 'ગંધમાદન' નામના પર્વતનાં શિખરનો આશ્રય ન કર્યો હોય! તેવા પ્રકારના યદુવંશરૂપી સૂર્યના ઉદ્ગામ સ્થાનરૂપ પૂર્વાચલ પર્વતસમાન ભગવાનશ્રી નેમિનાથના આચાર્ય મહારાજે દર્શન કર્યાં ॥ ૧૪૫ ॥

जय त्रिलोकीजनकल्पपादप पुनर्भवश्रीपरिरम्भलोलुप ।
जय प्रमोदाङ्कुरकोटिवारिमुक् जय प्रभाभर्त्सितनीलरत्नरुक् ॥ १४६ ॥

तरीव वार्धौ तमसीव शारदारविन्दिनीशः सरसीव धन्वनि ।
दरिद्रतायामिव शेवधिर्मया कलौ जिनेन्दो त्वमलम्भि दुर्लभः ॥ १४७ ॥

हे त्रिलोक्या जगत्त्रयस्य जनानां सुरासुरनराणां कामितानां मनोभिलाषाणां पूरणे प्रदाने कल्पपादप सुरतरो । पुनर्हे पुनर्भवश्रिया मोक्षलक्ष्म्या सार्धं परिरम्भे गाढालिङ्गने लोलुप अतिशयेन लोल चञ्चल हे नेम, त्वं जय सर्वोत्कर्षेण वर्तस्व । पुनर्हे प्रभो-

दा आनन्दाः । यद्दर्शनात्पुत्रकलत्रमित्रधनधान्यराज्यैश्वर्यादयः सर्वेऽप्यानन्दकारिणः पदार्थाः प्रादुर्भवेयुः, तस्मात्तेऽपि प्रमोदा एवोच्यन्ते । तत्र च बहुत्वम् । प्रमोदा एवाङ्कुराः प्ररोहास्तेषां कोटयस्तेषां वृद्धिकरणे इत्यर्थः । वारिमुक् वार्षिकवारिवाह पुनर्हे प्रभया नीलोत्पलदलश्यामलदेहदीप्त्या भर्त्सिता तिरस्कृता नीलरत्नानां हरिन्मणीनां रुक्कान्तिर्येन तादृक् शिवानन्दन, त्वं जय । हे जिनेन्दो हे नेमिनाथ, मया कलौ कलियुगे पञ्चमे अरके दुःखेन महाकष्टेन कृत्वा लभ्यते इति दुर्लभः दुःप्रापस्त्वमलम्भि प्राप्तः । केव । तरीव । यथा प्रलयकालोद्दामदावानलज्वालायमना माननिदाघसमयोद्भवन्मध्यंदिनदीप्तदिनकरघोरघर्मरुचिचयसंतापितालानीभूतसिकतभूमण्डलमरुस्थले सच्छायपत्रच्छन्नानेककारस्त्ररकोटिशिशिरीकृतसलिलशालिमहापद्मसरोवरं लभ्यते । पुनः क इव । शेवधिरिव । यथा दुःखावस्थायां निधानमासाद्यते ॥

श्लोकार्थ

त्रणे लोकना अभिलाषो पूर्ण करवामां कल्पवृक्षसमान, मुक्तिरूपी स्त्रीने आलिंगन करवामां आसक्त एवा हे प्रभो, आप जयवंता वर्तो! आनंदरूपी क्रोडो अंकुशने प्रगट करवामां मेघसमान, पोताना देहनी श्यामल कांति वडे नीलरत्नने तिरस्कार करनारा एवा हे शिवानंदन, आप जयवंता वर्तो! समुद्रने पार करवामां नाव समान, अंधकारनो नाश करवा माटे शरदपूर्णिमाना चन्द्र समान, मरुधरना रणप्रदेशमां शीतळता अर्पवा माटे सरोवर समान, दरिद्र अवस्थामां जेम निधाननी प्राप्ति थाय तेम मने आ कलिकाळमां दुर्लभ एवा हे प्रभो, आपनां दर्शननी प्राप्ति थई. ॥ १४६ ॥ १४७ ॥

तमित्यभिष्टुत्य हृदा दधन्मुदं चकार पञ्चाङ्गनतिं यतीशिता ।
विवक्षुरेतत्किमु पञ्चमीं गतिं दिश प्रभो पञ्चमकेरकेऽपि मे ॥ १४८ ॥

यतीशिता सूरिः तं नेमिनाथमिति पूर्वोक्तप्रकारेणाभिष्टुत्य स्तुत्वा हृदा मनसा कृत्वा मुदमाह्लादं दधद्धारयन् सन् पञ्च अङ्गानि प्रकृतानि यत्र सा पञ्चाङ्गा । पञ्चानामङ्गानां समाहारो वा इति पञ्चाङ्गी । द्वौ जानू द्वौ करौ एकं शिरः इति पञ्चाङ्गी । तथा भूः स्पृश्यते इति पञ्चाङ्गनतिं चकार कृतवान् । उत्प्रेक्ष्यते—एतदुच्यमानं जिननेमिनाथं प्रति विवक्षुः किमु वक्तुमिच्छुरिव । एतत्किम् । हे प्रभो, मे मम पञ्चमकेरके कलिकालेऽपि पञ्चमीं नरकतिर्यङ्मनुष्यदेवगतिभ्य उपरितनीं मुक्तिलक्षणां पञ्चानां संख्यापूरणीं गतिं दिश प्रदेहि । चतुर्थारके तु तव मुक्तिदातृत्वमस्त्येव । परं पञ्चमे त्वरके मुक्तिप्राप्तेरभावात्तस्याः प्रार्थनाया उत्प्रेक्षा ॥

श्लोकार्थ

आ रीते परमात्मानी स्तुति करीने हृदयमां आनंद धारण करता आचार्यदेवे पंचांग

(બે ઢીંચણ, બે હાથ અને મસ્તક) પ્રણિપાત કર્યો. 'હે પ્રભો, આપ ચોથા આરામાં તો મુક્તિપદને આપનારા છો જ, પરંતુ આ પંચમકાળમાં મને મુક્તિરૂપી પંચમી ગતિને આપનારા બનો!' આ વાત કહેવાની ઇચ્છાથી જ જાણે પંચાંગ પ્રણિપાત કર્યો ન હોય! ॥ ૧૪૮ ॥

मुनीन्दुना शौर्यपुरे पदाम्बुजैर्विभूष्य दृष्टी इव तत्पुरश्रिया ।
वृषाङ्कनेमिप्रतिमे पुरातने प्रतिष्ठते तत्र सनेमिपादुके ॥ १४९ ॥

मुनीन्दुना हीरसूरिचन्द्रेण तत्र शौर्यपुरे पुरातने जीर्णे पूर्वं केनापि कारिते न परं प्रतिष्ठापिते कथंचिदप्रतिष्ठिते एव स्थिते वृषाङ्कस्य श्रीऋषभदेवस्य नेमेररिष्टनेमिनाथस्य प्रतिमे मूर्ती प्रतिष्ठते अञ्जनशलाकयादिकरणेन स्थापिते । किं च श्रीहीरसीहविमलगणिपितामहसोहिलसंघपतिकारिते इति मूलशौर्यपुरलोके किंवदन्ती इति । उत्प्रेक्ष्यते—तत्पुरश्रिया शौर्यपुरलक्ष्म्या दृष्टी नेत्रे इव । किंभूते प्रतिमे । सहनेमेः शैवेयस्य पादुकाभ्यां पदद्वन्द्वप्रतिबिम्बाभ्यां वर्तेते ये । किं कृत्वा । पदाम्बुजैः । पूज्यत्वाद्बहुवचनम् । चरणकमलैर्जीर्णं शौर्यपुरं विभूष्यालंकृत्य ॥

શ્લોકાર્થ

ત્યારપછી આચાર્યદેવે પોતાનાં ચરણકમલવડે શૌર્યપુરીને શોભાવીને, નગરની મધ્યમાં રહેલા પુરાતન જીર્ણપ્રાય બની ગયેલા જિનમંદિરમાં શ્રીઋષભદેવપ્રભુની અને નેમિનાથ ભગવાનની ચરણપાદુકા સહિત પ્રતિમાનાં દર્શન કર્યાં. ॥ ૧૪૯ ॥

दिनद्वयीं तद्यदुवंशबाहुजव्रजान्कृपाधर्मधियो विधाय सः ।
ततो मुनिक्षोणिमणिर्न्यवीवृतत्तटात्पयःपूर इवापगापतेः ॥ १५० ॥

स मुनिक्षोणिमणिर्हीरविजयनामा साधुवसुधारत्नं सूरीन्द्रः ततः शौर्यपुरान्यवीवृतत निवर्तते स्म पश्चाद्वलते । क इव । पयःपूर इव । यथा आपगापतेर्नदीनाथस्य समुद्रस्य पानीयप्लवः तटात्तीरान्निवर्तते । 'जयी महीमानिव वार्धिरोधसः' । क इव । महीमानिव । यथा दिग्जैत्रयात्रासु अप्रतिहतशक्तित्वेन जयी राजा अर्थात्सर्वा दिशो विजित्य वार्धिरोधसः पयोनिधिप्रतीरान्निवर्तते । किं कृत्वा । दिनद्वयीं वासरयुगलम् । यावत्कालाध्वनोर्नैरन्तर्ये द्वितीयावत् । तस्मिन् शौर्यपुरे यदुवंश्यान्यादवकुलोत्पन्नान् बाहुजानां राजपुत्रसुभटानां व्रजान् गणान् । 'राजन्यो बाहुसंभवः' इति हैम्याम् । 'संध्याधियेवास्तं यान्ति समस्तबाहुजभुजातेजःसहस्रांशवः' इति नैषधे । कृपा जीवाहिंसा सैव धर्मस्तत्र धीर्बुद्धिः परिणामो येषां तादृशान् विधाय कृत्वा ॥

શ્લોકાર્થ

સાધુઓરૂપી પૃથ્વી ઉપર રત્નસમાન એવા શ્રીહીરવિજયસૂરિજીએ શૌર્યપુરમાં બે દિવસની સ્થિરતા કરી ત્યાં રહેલા યદુવંશીય ક્ષત્રિઓને દયા ધર્મમાં સ્થિર કરીને જેમ સમુદ્રના પાણીનો પ્રવાહ તટથી પાછો ફરે તેમ તેઓ શૌર્યપુરથી પાછા ફર્યા. ॥ ૧૫૦ ॥

गते प्रिये क्वापि निजे जनार्दने किमेत्य नेमिप्रभुदेवरान्तिके ।
स्थितां समुत्तीर्य यमीं शमीश्वरः पुरं प्रयातः पुनरागराभिधम् ॥ १५१ ॥

शमीश्वरो मुनिनायकः सूरिः पुनर्व्याघुट्य आगरा इत्यभिधा नाम यस्य तादृशं पुरं नगरं प्रयातो गतवान् । किं कृत्वा । यमीं यमुनां समुत्तीर्य नावा लङ्घयित्वा । किंभूतां यमीम् । उत्प्रेक्ष्यते—निजे आत्मीये प्रिये भर्तरि जनार्दने कृष्णे क्वापि कुत्रापि निजाभिलषिते स्थाने गते प्रयाते सति नेमिप्रभुः अरिष्टनेमिनाथः स एव देवरो निजभर्तुर्लघुभ्राता तस्यान्तिके पार्श्वे किमेत्य स्थितः वसन्तीमिव ॥

શ્લોકાર્થ

પોતાના પતિ નારાયણ કોઈ પણ સ્થાને જવાથી દેવર એવા શ્રીનેમિનાથની પાસે આવીને રહેલી યમુના પાર કરીને આચાર્યદેવ પુનઃ આગ્રા નગરમાં પધાર્યા. ॥ ૧૫૧ ॥

मणिं सुराणां तनुमत्समीहितं प्रदित्सयेव त्रिदिवादुपागतम् ।
स तत्र चिन्तामणिपार्श्वतीर्थपं महामहेन प्रतितस्थिवान्प्रभुः ॥ १५२ ॥

स प्रभुर्हीरविजयसूरिस्तत्रागरानगरे चिन्तामणिः इति नामानं पार्श्वं एव तीर्थपस्तीर्थनाथस्तं महामहेनाधिकोत्सवेन प्रतितस्थिवान् । उत्प्रेक्ष्यते—तनुमतां जगज्जनानां समीहितानां मनसां सम्यक्कामितानां प्रदित्सया प्रदातुमिच्छया त्रिदिवाद्देवलोकादिह भूमण्डले उपागतं संप्राप्तं सुराणां मणिं चिन्तारत्नमिव ॥

શ્લોકાર્થ

આગ્રામાં હીરવિજયસૂરિજીએ મહોત્સવપૂર્વક ચિંતામણી પાર્શ્વનાથની પ્રતિષ્ઠા કરી. તે જાણે જગતના જીવોની અભિલાષાઓ પૂર્ણ કરવા માટે સ્વર્ગમાંથી ચિંતામણી-રત્ન આવેલું ન હોય ! ॥ ૧૫૨ ॥

स उग्रसेनाद्यपुरात्फतेपुरं यशस्करं स्वस्य विभुर्व्यभूषयत् ।
इवान्यराशेः शशिसौधमुच्चतापदप्रदं चित्रशिखण्डिनन्दनः ॥ १५३ ॥

स विभुर्हीरसूरिः स्वस्यात्मनो यशस्करं कीर्तिविधायकं पुनरित्यध्याहार्यम्। उग्रसेन इति पदमाद्यं प्रथमं यस्य तादृशात्पुरात्। आगरादित्यर्थः। फतेपुरं साहिनगरं व्यभूषयदलंकरोति स्म। श्रीकर्या जग्मिवानित्यर्थः। क इव। चित्रशिखण्डिनन्दन इव। यथा बृहस्पतिः स्वस्यात्मन उन्नतायाः उच्चत्वस्य पदं स्थानं प्रददातीति प्रदम् अन्यराशेः पूर्वस्मान्मिथुनराशेः शशिनः शशाङ्कस्य सौधं गृहं कर्कराशिम्। 'प्रोक्तः कर्कस्य चन्द्रमाः' इति वचनात्। विभूषयति। कर्कराशिगतो गुरुरुच्चः प्रतिपाद्यते॥ इति पुनः फतेपुरागमनम्॥

श्लोकार्थ

હીરવિજયસૂરિજીએ આગ્રાનગરથી કીર્તિ કરવાવાળા ફતેપુરને અલંકૃત કર્યું. (અર્થાત્ ફતેપુરમાં પધાર્યા.) જેમ બૃહસ્પતિ (ગુરુ) ઉચ્ચપદની પ્રાપ્તિ માટે મિથુનરાશિમાંથી ચન્દ્રના ઘરમાં (કર્કરાશિમાં) જાય તેમ આચાર્યદેવ ફતેપુરમાં પધાર્યા. (કર્કરાશિમાં રહેલો ગુરુ ઊંચનો કહેવાય છે.) ॥ ૧૫૩ ॥

महीहिमज्योतिरियेष खञ्जनो घनात्ययस्येव तदास्य दर्शनम्।
अमुं स गोष्ठीप्रविविधित्सया पुनर्निकेतने शेखमणेरजूहवत्॥ १५४॥

तदा तस्मिन् सूरेः फतेपुरे समागमावसरे महीहिमज्योतिरकब्बरसाहिः अस्य हीरसूरेर्दर्शनमियेष अभिलषति स्म। क इव। खञ्जन इव। यथा खञ्जरीटो घनात्ययस्य शरत्कालस्य दर्शनमिच्छति। पुनर्दर्शनेच्छानन्तरं द्वितीयवारममुं सूरिं शेखमणेरबलफैजनाम्नो यवनगुरुरत्नस्य निकेतने भवने अजूहवत् आकारयामास। कया। गोष्ठीप्रविविधित्सया धर्मवार्ता कर्तुं काङ्क्षया॥

श्लोकार्थ

જેને 'ખંજરીટ' નામનું પક્ષી શરદઋતુનું દર્શન ઇચ્છે તેમ અકબર બાદશાહે ફરીથી શ્રીહીરવિજયસૂરિનાં દર્શનની ઇચ્છા કરી. તેથી ધર્મગોષ્ઠી કરવા માટે આચાર્યદેવને શેખ અબ્દુલફૈજીના ઘેર બોલાવ્યા. ॥ ૧૫૪ ॥

क्रमेण वाचंयमयामिनीमणिर्विभूष्य शेखप्रमुखस्य मन्दिरम्।
शिरोगृहं तस्य पुनः पवित्रयांचकार जम्भारिरिव त्रिविष्टपम्॥ १५५॥

वाचंयमयामिनीमणिः श्रमणशर्वरीरत्नं सूरी पुनर्गृहागमनादनु शेखगृहस्य शिरोगृहं चन्द्रशालामुपरितनपिट्टनिकां पवित्रयांचकार पावनीकृतवान्। किं कृत्वा। क्रमेण आगमनाकब्बराकारणपरिपाट्या तस्याबलफैजनाम्नः शेखप्रमुखस्य यवनगुरुमुख्यस्य

मन्दिरं निवाससौधं विभूष्यालंकृत्य । यत्र पूर्वं साहिमिलनसमये समेत्य गोष्ठी अनुष्ठिता आसीत्, तदलंकृत्य तस्य सद्मनः चन्द्रशालामलंकरोति स्म । क इव । जम्भारिरिव । यथा पुरंदरः कुत्रचिद्गत्वा गतः सन् त्रिविष्टपं स्वर्गं पवित्रयति ॥ इति पुनर्गुरोः शेखगृहागमनम् ॥

શ્લોકાર્થ

જેમ ઇન્દ્ર બહારના પ્રદેશમાંથી આવીને સ્વર્ગને પવિત્ર કરે તેમ હીરવિજયસૂરિજીએ અનુક્રમે શેખના મહેલને અલંકૃત કરીને મહેલની અગાસીને પવિત્ર કરી. ॥ ૧૫૫ ॥

अथात्मधाम्नीव स शेखमन्दिरे समेत्य भूमीतलशीतलद्युतिः ।
इवाङ्कुरान्कल्पतरोर्मुनीशितुर्मुनीनिह प्रेक्ष्य हृदा मुदं दधौ ॥ १५६ ॥

अथ सूरेः शेखमन्दिरे समागमनानन्तरमकब्बरनामा भूमीतलशीतलद्युतिः मेदिनीमण्डलशीतकान्तिः राजा पातिसाहिः इह शेखमन्दिरे कल्पतरोः सुरद्रुमस्य अङ्कुरान्प्ररोहानिव मुनीशितुः सूरेः मुनीन् वाचंयमान्प्रेक्ष्य विलोचनगोचरीकृत्य हृदा हृदयेन मनसा कृत्वा मुदमानन्दं दधौ । किं कृत्वा । शेखस्य मन्दिरे सद्मनि समेत्यागत्य । कस्मिन्निव । आत्मधाम्नीव निजवेश्मनीव ॥

શ્લોકાર્થ

ત્યારપછી અકબર બાદશાહે પોતાના ઘરની જેમ શેખના મહેલમાં આવીને કલ્પવૃક્ષના અંકુરાની જેવા આચાર્યદેવના મુનિઓને જોઈને હૃદયમાં અત્યંત આનંદ ધારણ કર્યો. ॥ ૧૫૬ ॥

क्रमादमीषामभिधाः सुधारसद्रवानिवापृच्छ्य पिबञ्छ्रवःपुटैः ।
प्रमोदवांस्तद्गृहचित्रशालिकां ततः स्वयं क्ष्मारमणोऽधिरूढवान् ॥ १५७ ॥

ततः सूरिसुधांशुसाधूनां पृथङ्नामप्रश्नतदाकर्णनानन्तरं स्वयमात्मना क्ष्मारमणो भूमीवल्लभः तद्गृहस्य शेखसौधस्य चन्द्रशालिकामुपरितनीं भूमिकामारूढवान् अधिरोहति स्म । किंभूतः क्ष्मारमणः । प्रमोदवानानन्दकलितः । किं कुर्वन् । क्रमाद्गुरुलघुपरिपाट्या अमीषां सूरिसाधूनामभिधा नामानि आपृच्छ्य पृथक् पृथक् दृष्ट्वा ततः सुधारसद्रवानमृतनिःस्पन्दान् च श्रवःपुटैः कर्णपुटकैः श्रवणनामदुन्दुकैः पिबन्नास्वादयन् सादरं शृण्वन् ॥

શ્લોકાર્થ

ત્યારપછી અકબરે નાનામોટાના ક્રમ પ્રમાણે આચાર્યદેવના સાધુઓનાં જુદાં જુદાં નામો પૂછીને સુધારસના પાનસમાન તે નામોનું બે કાનોથી પાન કરીને હર્ષિત થયેલા તેણે શેખના મંદિરની અગાસી ઉપર સ્વયં આરોહણ કર્યું. ॥ ૧૫૭ ॥

मघाभुवेवासुरशीतभानुना विधाय गोष्ठीं सदसद्विचारणा ।
मुनीश्वरेणाम्बुधिनेमिभानुना स्थिरीकृतार्हन्मतसंप्रधारणा ॥ १५८ ॥

मुनीश्वरेण सूरीन्द्रेण सच्च असच्च सदसती तयोर्विचारणा इदं सत् इदमागमविरुद्धमिदं च लोकविरुद्धमिदमुभयाभिमतमिति विमर्शो यस्यां तादृशी अर्हन्मतसंप्रधारणा जिनशासनसमर्थना सर्वेष्वपि शासनेषु विचार्यमाणं सर्वकोटिविशुद्धं जिनशासनमेव दृश्यते इति संप्रधारणा स्थिरीकृता । सत्या चक्रे इत्यर्थः । किं कृत्वा । मघाभुवेव भार्गवेनेव असुरशीतभानुना दैत्येन्द्रेणेव अम्बुधिनेमिभानुना जलधिमेखलाभास्करेण साहिना सार्धं गोष्ठीं धर्मतत्त्वविचारवार्तां विधाय कृत्वा ॥

શ્લોકાર્થ

જેમ ભાર્ગવે દાનવેન્દ્રની સાથે ગોષ્ઠી કરી હતી તેમ આચાર્યદેવે બાદશાહની સાથે ધર્મગોષ્ઠી કરીને જેમાં સદ્-અસદ્‌ની વિચારણા છે, તેવા સર્વકોટિ વિશુદ્ધ જૈનશાસનની સમર્થતા (સત્યતા) સિદ્ધ કરી બતાવી. ॥ ૧૫૮ ॥

तदिष्टगोष्ठीसमये महीहरेर्हृदन्तरानन्दरसः स कोऽप्यभूत् ।
गिरां हि पारेऽजनि यो गिरां पतेर्न यत्र काव्यं न काव्यचातुरी ॥ १५९ ॥

सैव साहिसूरिद्वन्द्वसंबन्धिनी इष्टा मनसोऽभिप्रेता साहिहृदयंगमा गोष्ठी स्वतन्त्रवार्ता तस्याः समये प्रस्तावे स कोऽप्यद्वैताश्चर्यकारी वाचामगोचरो महीहरेर्भूमीन्द्रस्य हृदन्तरा मनोमध्ये आनन्दरसः प्रह्लादास्वादः । 'रस स्वादे जले वीर्ये शृङ्गारादौ' इत्यनेकार्थः । अभूद्बभूव । य आनन्दरसो गिरां पतेः सुराचार्यस्य हि निश्चितं गिरां पारे वाचां परतीरवर्ती वक्तुमशक्योऽजनि संजायते स्म । 'गिरां हि पारे निषधेन्द्रवैभवम्' इति । नैषधे । च पुनर्यत्रानन्दरसे काव्यस्य शुक्रस्य काव्यानां कवित्वानां चातुरी नाजनि वाचस्पतिर्वाचा वक्तुं न शक्नोति । शुक्रोऽपि काव्यरचनां रचयितुं नालं भवतीत्यर्थः ॥ इति सूरिणा समं साहेर्द्वितीयवारं गोष्ठी ॥

શ્લોકાર્થ

સૂરિજી સાથેની હૃદયંગમ ધર્મગોષ્ઠીના સમયે બાદશાહના હૃદયમાં અપૂર્વ આનંદ-

રસ રેલાયો અર્થાત્ પ્રગટ થયો. તે આનંદરસનું સાંગોપાંગ વર્ણન કરવા માટે બૃહસ્પતિની વાણી પણ સમર્થ ન બની, તેમજ કવિ-શુક્ર પણ તેની કવિતા રચવા માટે નાકામિયાબ બન્યો; અર્થાત્ કોઈ અપૂર્વ આનંદ પ્રાપ્ત થયો. ॥ ૧૫૯ ॥

ततः प्रदित्सुर्गुरवे स किंचनात्मनो घनो भूभवनाय नीरवत् ।
प्रणीतवान्सप्रणयं गिरां गृहं मुखारविन्दं वसुधावधूवरः ॥ १६० ॥

ततो गोष्ठीकरणोद्भूतानन्दरसानन्तरं सोऽकब्बर एव वसुधावधूवरः भूमीभामिनीभर्ता सप्रणयं सस्नेहं याच्ञासहितं वा। 'प्रणयः स्नेहयाच्ञयोः' इत्यनेकार्थः। यथा स्यात्तथा मुखारविन्दं वदनकमलं गिरां वाचां गृहं वासस्थानं प्रणीतवान् चकार। नृपः किं कर्तुमिच्छुः। गुरवे हीरविजयसूरये आत्मनः स्वस्य किंचन आत्मीयं वस्तु किमपि प्रदित्सुः प्रदातुमिच्छुः। किंवत्। नीरवत्। यथा घनो धाराधरो भूभवनाय पृथ्वीलोकाय जलं दातुमिच्छति तथा अकब्बरोऽपि प्रभवे वाजिवारणादि दातुमुत्कण्ठितो बभूवेत्यर्थः ॥

श्लोकार्थ

જેમ મેઘ જગતને જલ આપવા ઇચ્છે, તેમ અકબર બાદશાહ આચાર્યદેવને પોતાની પાસે રહેલી સંપત્તિ આદરપૂર્વક આપવાની ઇચ્છાથી બોલ્યા. ॥ ૧૬૦ ॥

परश्शताः कौतुकिना पयोनिधिं प्रमथ्य कृष्टा इव जन्हुना पुनः ।
स्फुरन्ति तेऽमी मम मत्तकुम्भिनः प्रभोऽभ्रमूवल्लभलक्ष्मिलम्भिनः ॥ १६१ ॥

हे प्रभो, ते प्रसिद्धाः प्रबलप्रत्यर्थिपृथिवीपालदलविदलनोपार्जितानेकबिरुदा मदोद्धता मे मम अभ्रमूः नामा हस्तिनी तस्या वल्लभ ऐरावणः। 'अभ्रमूवल्लभारूढं निशः शेषे कदाचन। स्वप्ने महेन्द्रमद्राक्षीत्पृथा पृथुमनोरथा॥' इति पाण्डवचरित्रे। तथा 'गजानामभ्रमूपतिः' इति। काव्यकल्पलतायां च। तस्य लक्ष्मीं शोभां लभन्ते इत्येवंशीलाः। 'लक्ष्मिर्लक्ष्मी हरेः स्त्रियाम्' इति। तथा 'चरणलक्ष्मिकरग्रहणोत्सवे' इति जिनप्रभसूरिकृतऋषभनप्रस्तवेऽपि च। तथा 'स्वस्थानात्पदमात्रमप्यचलतो विन्ध्यस्य चानेकशो जायन्ते मदपालित............श्रीलम्भिनः कुम्भिनः' इति सूक्ते लम्भितः 'लभेर्धातोः सार्वधातुकपरोक्षार्थवर्ज यथाप्रयोगं नुम् इत्यनुस्वारः' इति प्रक्रियायाम्। गजा हस्तिनः स्फुरन्ति स्फूर्तिं दधते। उत्प्रेक्ष्यते—कौतुकिना कुतूहलाकलितेन जन्हुना नारायणेन चतुर्दशरत्नकर्षणाल्लब्धास्वादतया पुनर्द्वितीयवारं पयोनिधिं समुद्रं प्रमथ्य विलोडयित्वा परश्शताः शतात्परे सहस्रशः कृष्टा निष्काशिता इव ऐरावतभ्रातरः ॥

શ્લોકાર્થ

હે પ્રભો, મારી પાસે 'અભ્રમુ' નામની હાથણીના પતિ ઐરાવણની શોભાને પ્રાપ્ત કરનારા એવા હજારો હાથીઓ છે, તે જાણે કૌતુકી એવા વિષ્ણુએ ક્ષીરસમુદ્રનું મંથન કરીને બહાર કાઢેલા ઐરાવણના સહોદરો (બંધુઓ) ન હોય ? ॥ ૧૬૧ ॥

यतीन्द्र यत्पञ्चमचङ्क्रमोपमामवाप्तुकामेन महीविहायसोः ।
भ्रमी समीरेण किमु प्रणीयते तिरस्कृतोच्चैःश्रवसश्च ते हयाः ॥ १६२ ॥

हे यतीन्द्र, तिरस्कृतः स्वशोभया धिक्कृतः उच्चैःश्रवा इन्द्राश्वो यैस्ते विविधजातीयाः मम हयास्तुरङ्गाः सन्ति । ते के । येषां हयानां पञ्चमचङ्क्रमस्य उत्तेरितनामन्याः पञ्चम्या गतेः उपमानं साम्यमवाप्तुकामिना लब्धुमिच्छता । शिक्षितुं काङ्क्षतेत्यर्थः । समीरेण वायुना महीविहायसोर्भ्रमी भ्रमणं प्रणीयते किमु । 'अपि भ्रमीभङ्गिभिरावृताङ्गम्' इति नैषधे ॥

શ્લોકાર્થ

હે યતીન્દ્ર, મારી પાસે ઇન્દ્રના 'ઉચ્ચૈઃશ્રવસ' અશ્વની શોભાને તિરસ્કૃત કરનારા વિવિધ જાતિના અશ્વો છે, તે અશ્વોની ઉત્તરિત નામની પાંચમી ગતિની સમાનતા પ્રાપ્ત કરવાની ઇચ્છાવાળા પવન વડે જાણે તેથી જ આકાશપૃથ્વીમાં ભ્રમણ કરાયું ન હોય ! ॥ ૧૬૨ ॥

रथाः सरथ्या मम कामगामिनो मुमुक्षुमार्तण्ड मरुद्रथा इव ।
पुनः कृतारातिचमूविपत्तयः कृतान्तदूता इव सन्ति पत्तयः ॥ १६३ ॥

हे मुमुक्षुमार्तण्ड सूरे, मम रथाः शताङ्गाः सन्ति । किंभूताः । सह रथ्यै रथधुराधुरीणैर्वृषभैस्तुरगैर्वा वर्तन्ते ये ते । पुनः किंभूताः । कामगामिनः काममतिशयेन इच्छया वा गच्छन्तीत्येवंशीलाः । के इव । मरुद्रथा इव । यथा सुरस्यन्दना देवानामिच्छयैव गमनशीला भवेयुः । पुनरर्थान्तरन्यासे । पुनर्मम पत्तयः सन्ति । किंभूताः । कृता निष्पादिता अरातिचमूनां वैरिसैन्यानां विपत्तयो भङ्गमारणादि नानानिष्टानि यैस्ते । उत्प्रेक्ष्यते—कृतान्तदूता इव चण्डमहाचण्डाद्या यमस्य किंकरा इव ॥

શ્લોકાર્થ

સૂર્યસમાન હે સ્વામિન્, મારી પાસે દેવોના રથ જેવા ઇચ્છા મુજબ ગમન કરનારા વૃષભસહિત અને અશ્વસહિત હજારો રથો છે અને શત્રુઓના સૈન્યને ત્રાસ પોકરાવનારૂં પાયદળ (સૈન્ય) છે, તે જાણે સાક્ષાત્ યમના દૂતો ન હોય ! ॥ ૧૬૩ ॥

जनार्दनस्येव ममेयमिन्दिरा सुरेश्वरस्येव च राज्यमूर्जितम् ।
इदं तथान्यद्यदभीप्सितं हृदो मुनीन्द्र तन्मामनुगृह्य गृह्यताम् ॥ १६४ ॥

हे मुनीन्द्र, इयं मम गृहे इन्दिरा धनरत्नस्वर्णरूप्यादिलक्ष्मीर्वर्तते । कस्येव । जनार्दनस्येव । यथा नारायणस्य मन्दिरे प्रत्यक्षा लक्ष्मीरस्ति । च पुनः ऊर्जितं प्रबलं राज्यं हस्त्यश्वरथराष्ट्रदुर्गबलरूपं वर्तते । कस्येव । सुरेन्द्रस्येव । यथा पुरंदरस्य प्रबलं राज्यं वर्तते । हे प्रभो, इदं यन्मया विज्ञप्तं गजाश्वादिकं तथा अन्यत्परमपि यद्युष्माकं हृदो मनसोऽभीप्सितं वाञ्छितं भवेत् तद्वस्तु मामनुगृह्य ममोपरि अनुग्रहं कृत्वा गृह्यतां स्वीक्रियताम् ॥

श्लोकार्थ

હે મુનીન્દ્ર, નારાયણના ઘરમાં પ્રત્યક્ષ લક્ષ્મી છે તેમ મારા ભુવનમાં સુવર્ણ, રૂપુ, રત્ન, દ્રવ્ય આદિ અનેક પ્રકારની લક્ષ્મી છે. ઇન્દ્રના સૈન્યની જેમ મારી પાસે ગજદળ, અશ્વદળ, રથદળ અને પાયદળ આદિ લાખોની સંખ્યામાં બળવાન સૈન્ય છે. તો હે પ્રભો, આ ચતુરંગી સેના અથવા બીજું કંઈપણ આપની ઇચ્છા હોય તે મારા પર અનુગ્રહ કરીને સ્વીકાર કરો. ॥ ૧૬૪ ॥

स्वचेतसो गोचरयन्नपि क्ष्माक्षपापतिर्निःस्पृहतां मुनीशितुः ।
इवान्यपुष्टः सहकारकोरकैः प्रवर्तितो भक्तिभरैरदोऽवदत् ॥ १६५ ॥

क्ष्माक्षपापतिः अवनीरजनीनायकः अकब्बरसाहिर्मुनीशितुः सूरेर्निःस्पृहतां निरीहभावं स्वचेतसो निजहृदयस्य गोचरयन् गोचरीकुर्वन् । मनसि जानन्नपीत्यर्थः । भक्तेर्भरैरतिशयैः प्रवर्तितः प्रेरितः सन्नदो गजाश्वादि गृह्यतामिति अवदद्बभाषे । क इव । अन्यपुष्ट इव । यथा कोकिलः सहकारकोरकैः आम्रतरोः कलिकाभिः मञ्जुमञ्जरीव्रजास्वादैः प्रवर्तितः शब्दायते मधुरध्वनिं विधत्ते । 'प्रेरणं प्रवर्तनमिति आशीःप्रेरणयोः' इत्यर्थः सारस्वतव्याकरणे ॥ इति सूरीणां गजाश्वादिप्रदानं साहिविज्ञप्तिः ॥

શ્લોકાર્થ

અકબર આચાર્યદેવની નિસ્પૃહતા હૃદયમાં બરાબર જાણતો હોવા છતાં પણ જેમ આમ્રવૃક્ષની મંજરીના સ્વાદ વડે કોકિલો મધુરધ્વનિ કરે તેમ ભક્તિભાવથી પ્રેરાઈને આ પ્રમાણે બોલ્યો. ॥ ૧૬૫ ॥

निशम्य सूरिर्नृपतेरिमां गिरं न किंचिदेभिर्मम कृत्यमित्यवक् ।
मदोद्धता दुर्नृपवद्गजा अमी वशास्पृशः प्रौढकरप्रवृत्तयः ॥ १६६ ॥

नृपतेरकब्बरस्य इमां पूर्वोक्तां गिरं वाणीं निशम्याकर्ण्य सूरिर्मुनीन्द्र इत्यमुना प्रकारेणावक् वदति स्म । इति किम् । हे साहे, एभिः श्रीमत्प्रदीयमानकरितुरगादिभिः मम किंचित्किमपि कृत्यं कार्यं नास्ते । यत्कारणादमी गजा दुर्नृपवदुष्टभूपतय इव । मानदाहंकारेण क्षीबतया वा मदेन मद्यपानेन च राज्यमान्यताकृते हस्तिपालका मदिरापानं कारयित्वोन्मदीकुर्वन्तीति स्थितिः । तत्त्वतस्तु मदेन दानप्रवाहेण उद्धता उत्कटाः सचिवादीनामप्यकथितकारिणो दुर्नराधिपाः । करिणस्तु महामात्राणामवशाः सर्वेऽपि कृत्याकृत्यविचारणान्धबधिराश्च । वशाः करिण्यः । 'इभः करेणुर्गजोऽस्य स्त्री धेनुका वशापि च' इति हैम्याम् । अथ च वशाः स्त्रियः अर्थात्परदारास्ताः स्पृशन्ति स्पर्शाख्यकामगुणैर्वशीकृताः सन्तः आश्लिष्यन्तीति वशास्पृशः । तथा प्रौढा अतिशायिन्न प्रबलाः करा राजदेयांशा शुण्डादण्डः । तथा प्रौढाः पर्वतप्रायाः अथ वा प्रौढोऽतिलम्बः करः शुण्डादण्डः । तथा प्रौढा अतिशायिनी प्रकर्षेणोढा तादृशीप्रवृत्तिर्दानवारिधारा येषाम् । 'मदो दानं प्रवृत्तिश्च' इति हैम्याम् । कलियुगदुष्टनृपतुल्यत्वमर्थात् ॥

श्लोकार्थ

राजानी आवी वाणी सांभळीने आचार्यदेवे कह्युं केः 'हे राजन्, मारे ए सर्ववस्तुओनुं कंईपण प्रयोजन नथी. अभिमानी, परदारा लंपट, प्रजाने पीडाकारी अने 'कर' प्रवृत्ति करनारा दुष्टराजानी जेम हस्तिनीमां आसक्त, मोटा देहवाळा, अतिलांबी सूंढवाळा एवा मदोन्मत हाथीओनुं मारे कंईपण कार्य नथी. ॥ १६६ ॥

अतिप्रमाणा नृप जिह्मगामिनोऽप्यमर्षणाः सुप्तभृतश्च सप्तयः ।
रथाश्च खिङ्गा इव कामचारिणः स्ववाहिनिबन्धविधायिनः पुनः ॥ १६७ ॥

हे नृप, च पुनरमी सप्तयस्तुङ्गा अतिप्रमाणा अतिक्रान्तं भावप्रधाननिर्देशात्प्रामाण्यमादेयता यैस्ते सर्वत्राप्यप्रमाणा न क्वचिदपि मान्या वर्तन्ते । तत्त्वतस्तु अतिक्रान्तं प्रमाणं पुरुषमानं यैरत्युच्चत्वात् । यदुक्तं नैषधे—'जवेऽपि मानेऽपि च पौरुषाधिकम्' इति । पुनः जिह्मं वक्रं गच्छन्तीति । यदुक्तम्—'कुटिलगतिः कुटिलात्मा कुटिलशीलसंपन्नः' इति मौलार्थे । कुटिलं चङ्क्रमणा । यदुक्तम्—'जउकिम्मेकम्महवसइ खलसंपयपामंति । त चतुरंग तुरंगजिम वंकापायठवंति ॥' इति । जात्यश्वा हि सदश्ववारे समारूढे अतिचञ्चलकुटिलगामिनो भवन्तीति ख्यातिः । पुनः किंभूताः । अमर्षणाः कोपनाः कस्यापि वचनमात्रमपि न सहन्ते । अमर्षभाजः परोपरीर्ष्याजुषः । तत्त्वार्थे कोपकलिताः । यदु॰

त्कम्—'दुब्बलकन्नावंकमुह बहुभोअणा सरोस। जेता तुरियां होइ गुण ते ता नरवइ दोस ॥' इत्युक्तेः। सुप्तं निद्रां प्रमादमज्ञानं परोपकारादिकरणे निद्रां बिभ्रतीति। तत्त्वार्थे बहुप्रमिला रणतूररावाकर्णने जाग्रतीति जनप्रसिद्धिः। अतः कारणात्खलोपमाः सन्ति। च पुनः रथाः कामचारिणः अतिशयेन वाताधिकवेगेन चरन्ति प्रचलन्तीत्येवंशीलाः। के इव। खिड्गा इव। यथा विद्याः कामं स्वेच्छया अथ वा कामेन कंदर्पचेष्टया मदविह्वलत्वेन वा चरन्ति व्यवहरन्तीत्येवंशीला भवन्ति। पुनः किंभूताः। स्वमात्मानं वहन्ति शुभस्थानं सुमार्गं वा नयन्तीति स्ववाहिनो वृषभास्तेषां बन्धविधायिनः योक्तृ(त्र)बन्धकारिणः। तथा खिड्गा स्ववाहिनीमाजीविकादिकारिणां कुकर्मरतत्वेन बन्धबधाद्यवस्थायां स्वदानादिना मोचयितृणामपि ऋणप्रत्यर्पणानध्यवसायेन कथंचिदभ्याख्यानप्रदानादिना अनार्यत्वात्तेषां साधूनामुपकारिणामपि नियन्त्रणां निर्मापयन्तीत्येवंशीलाः ॥

श्लोकार्थ

હે રાજન્, પ્રમાણને નહીં માનનારા અર્થાત્ પ્રમાણને ઉલ્લંઘી ગયેલા, વક્રગતિ-કુટિલ આશયવાળા, પરોપકાર કરવામાં આળસુ એવા અશ્વોથી મારે સર્યું ! સ્વેચ્છાચારી પુરુષની જેમ સ્વેચ્છાપૂર્વક ગમન કરનારા અર્થાત્ પવનવેગી અને પોતાને વહન કરનારા વૃષભોનું નિયંત્રણ કરનારા અર્થાત્ કૃતઘ્ન એવા રથો વડે પણ મારે સર્યું ! ॥ १६७ ॥

अमी नृशंसाः परघातिनः क्षितेः शतक्रतो शल्यजुषः पदातयः ।
इयं च लक्ष्मीः करिकर्णतालवच्चलानिलान्दोलितकेतुवत्पुनः ॥ १६८ ॥

हे क्षितेः शतक्रतो भूजम्भारे, अमी पदातयो नृशंसाः क्रूराः। तथा परान् शत्रून् स्वव्यतिरिक्तानन्यान्वा घातयन्तीत्येवंशीलाः। शल्यानि यद्वाणि कुन्तान्वा। 'परस्परोल्लासितशल्यपल्लवे। मृषा मृधं सादिबले कुतूहलान्नलस्य नासीरगते वितेनतुः ॥' इति नैषधे। 'शल्यं शङ्कुं कुन्तश्च' इति तद्वृत्तिः। तथा समरावसरे शरीरान्तःप्रविष्टानि लोहशल्यानि वा। तथा रागद्वेषद्रोहादिशल्यानि वा जुषन्ते भजन्तीति शल्यजुषो वर्तन्ते। च पुनरियं लक्ष्मीः चला चपला वर्तते। किंवत्। करिणां दन्तिनां कर्णतालवत्। पुनरनिलेन प्रबलपवमानेनान्दोलितो वेल्लितस्तरलीकृतो यः केतुः प्रासादशिरःशिखरस्थायुकध्वजस्तद्वत् ॥

श्लोकार्थ

પૃથ્વી ઉપર ઇન્દ્રસમાન હે રાજન્, ક્રૂર, શત્રુનો ઘાત કરનારા, શસ્ત્રોને ધારણ કરનારા અર્થાત્ રાગદ્વેષરૂપી શલ્યને વહન કરનારા એવા પાયદળ વડે પણ મારે સર્યું !

હાથીના કાનની જેમ તેમ પ્રાસાદના શિખર ઉપર રહેલી પવનવડે કંપાયમાન ધ્વજાની જેમ ચંચલ એવી લક્ષ્મીનું પણ મારે કંઈપણ કાર્ય નથી. ॥ ૧૬૮ ॥

इदं च राज्यं नरकप्रतिश्रुतेः सुभूमभूमर्तुरिवास्ति लग्नम् ।
परं पुनः कारणमस्ति संसृतेर्नभोम्बुदाम्भोऽङ्कुरसंततेरिव ॥ १६९ ॥

हे नृप, च पुनरिदं श्रीमदादिमहामण्डलीकैः सम्राड्भिः भुज्यमानं राज्यं सप्तप्रदिगन्तभूमण्डलप्रभुना सुभूमनाम्नो भूभर्तुर्भूमीसार्वभौमस्य चक्रवर्तिन इव नरकस्य सप्तमदुर्गतेः प्रतिश्रुतेरङ्गीकारस्य लग्नं प्रतिभूःसाक्षिकमिवास्ति । च पुनरिदं राज्यं राज्ञो भावो राज्यं भूपतित्वं संसृतेः संसारस्य परं प्रकृष्टं कारणं हेतुरस्ति । किमिव । नभोम्बुदाम्भ इव । यथा श्रवणवारि अङ्कुरसंततेर्धान्यतृणादिप्ररोहपरम्परायाः परमं कारणं विद्यते ॥

श्लोकार्थ

હે રાજન્, આ રાજ્ય સુભૂમચક્રવર્તીની જેમ સાતમી નરકને આપવામાં સાક્ષીરૂપ છે ! જેમ શ્રાવણમાસના મેઘનું જલ અંકુરની વૃદ્ધિના કારણરૂપ છે તેમ રાજ્ય સંસારની વૃદ્ધિના પરમ કારણરૂપ છે. ॥ ૧૬૯ ॥

भवन्ति योग्या विभवा भवादृशां न काबिलक्ष्माधव मादृशां पुनः ।
यदन्तरायं प्रणयन्ति मुक्तिपूःप्रयायिनां दुःशकुना इवाङ्गिनाम् ॥ १७० ॥

हे काबिलनाम्नो मुद्गलमण्डलस्य श्रीमज्जन्मजनपदस्य क्ष्माधव चक्रवर्तिन्, अमी विभवा विशिष्टराज्यादिलाभाकलिताः भवा उत्पत्तय इत्यर्थध्वनिरपि । विभवा विभूतयः धनधान्यद्विपदचतुष्पदसंपदः भवादृशां सांसारिकसुखाभिलाषिणां युष्मादृशामेव योग्या उचिताः । न पुनर्मादृशां विमुक्तसर्वसङ्गानां निवृत्तिनितम्बिनीविनिर्मिताविरलविलासास्वादरसिकायितमनसां साधूनाम् । यत्कारणादमी विभवा विशिष्टा विरुद्धा वा भवाः जन्मपरम्पराः अथ वा धनधान्याद्युपरि अतिमूर्छावत्तया विशेषेण सूक्ष्मबादरादिभेदभिन्नपृथिव्यप्तेजोवायुवनस्पतिनिगोदाधिक्येन भवः संसारो येभ्यस्ते विभवा मुक्तिपुरि सिद्धिनगर्यां प्रयान्ति गच्छन्तीत्येवंशीलानामङ्गिनां भविकजनानां दुःशकुना इव प्रतिकूलविहगा इव विघ्नमन्तरायं कुर्वन्ति । यतः सग्रन्थाः मोक्षं गन्तुमशक्तास्ततो निर्ग्रन्थत्वमेव वरं शिवपदप्राप्तिसाधनम् ॥

શ્લોકાર્થ

હે રાજન્, આ વૈભવો આપ જેવાને માટે યોગ્ય છે પરંતુ અમારા જેવા સર્વસંગના ત્યાગીઓ માટે ઉચિત નથી. મુક્તિરૂપી નગરી તરફ પ્રયાણ કરી રહેલા ભવ્યજીવોને અપશુકનની જેમ આ વૈભવો વિઘ્નરૂપ છે. ॥ ૧૭૦ ॥

शिखामणेस्तस्य निरीहताजुषां बलाहकस्येव निशम्य निःस्वनम् ।
मुदाविरासीदवनीशमानसे विदूरभूमाविव बालवायुजम् ॥ १७१ ॥

अवनीशस्य विश्वंभराभर्तुरकब्बरसाहेर्मानसे हृदये मुत् प्रमोद आविरासीत्प्रकटीभवति स्म । किमिव । बालवायुजमिव । यथा विदूरनाम्नो भूधरस्य भूमौ रत्नोत्पत्तिपृथिव्यां बालवायुजं वैदूर्यरत्नमाविर्भवति । किं कृत्वा । निरीहताजुषां निर्गता ईहा सर्वेष्वपि पुत्रकलत्रधनप्रमुखसांसारिकधनुषङ्गेषु स्पृहा वाञ्छा येषां ते निरीहास्तेषां भावं जुषन्ते सेवन्ते इति निरीहताजुषस्तेषां निःस्पृहत्वभाजां वशिनां शिखामणेः चूडामणेः शिरोरत्नस्य सूरेर्निःस्वनं पूर्वोक्तवस्तूपादाननिषेधसूचकवाचं निशम्य श्रुत्वा । कस्येव । बलाहकस्येव । यथा मेघस्य निःस्वनं बालवायुजं श्रृणोति । वर्षाकाले हि सजलजलदगर्जितमाकर्ण्य विदूरपर्वतक्षितौ वैदूर्यरत्नशलाकाः प्रादुर्भवन्तीति ख्यातिः । अधुनापि यथा अर्बुदाद्यचलवंशभूमीषु प्रथमवृष्टिजलक्लिन्नमेदिनीषु वंशाङ्कुरा भुवं निर्भिद्य निर्गच्छन्तः श्रूयन्ते दृश्यन्ते च केश्चित्तद्वदिति ॥ इति साहिदीयमानवस्त्वनुपादाने सूरिप्रत्युत्तरवचः ॥

श्लोकार्थ

વર્ષાકાળમાં મેઘની ગર્જના સાંભળીને વિદૂરપર્વતની ભૂમિમાં 'વૈડુર્ય' રત્ન પ્રગટ થાય તેમ નિસ્પૃહ-શિરોમણી આચાર્યદેવની વાણી સાંભળીને અકબરના હૃદયમાં અત્યંત આનંદ ઉત્પન્ન થયો. ॥ ૧૭૧ ॥

शशंस सूरिं कमिता ततः क्षितेः किमप्युपादाय कृतार्थ्यतामहम् ।
न यत्करः पात्रकरोपरि स्म[1] भूत्स मोघजन्मा विपिनप्रसूनवत् ॥ १७२ ॥

ततो मुदाविर्भवनानन्तरं क्षितेः कमिता भूमीकामुको वसुधाधवोऽकब्बरः । 'इत्यमी वसुमतीकमितारः' इति नैषधे । सूरिं प्रति शशंस शंसति स्म बभाषे । किमुवाच । हे प्रभो, किमपि किंचिदपि मदीयं मामकीनं वस्तु पदार्थमुपादाय गृहीत्वा प्रभुणाहं कृतः सिद्धोऽर्थः कार्यं यस्य स कृतार्थः कृतकृत्यः कृतार्थं करोतीति कृतार्थयति ततः कर्मोक्तौ कृतार्थ्यतां सफलः क्रियताम् । हि यस्मात्कारणात् यत्करो यस्य पाणिः पात्रस्य साधोर्दानार्हस्य दानावसरे करस्य हस्तस्योपरिष्टान्न स्म भूत् नाजनि न संजातः । स पुमान् विपिनप्रसूनवत्कान्तारकुसुममिव मोघजन्मा निष्फलावतारो जातः ॥

શ્લોકાર્થ

ત્યાર પછી અકબર સૂરિજીની પ્રશંસા કરતા બોલ્યાઃ હે ભગવન્, આપ મારી કંઈપણ વસ્તુ ગ્રહણ કરીને મને કૃતાર્થ કરો. કહ્યું છે કેઃ જેનો હાથ દાન કરવાના અવસરે સુપાત્ર ઉપર નથી તેનો જન્મ વનના પુષ્પની જેમ નિષ્ફળ છે. ॥ ૧૭૨ ॥

[1] 'स्वभूत्' इति पाठः प्रतिभाति.

नवोद्भूतं दध्न इवाम्बुधेः सुधां मृदश्च हेमोपकृतिस्तनोरिव ।
श्रियस्तथा सारमिदं मुनीन्द्र यत्क्रियेत सा पात्रकराब्जसङ्गिनी ॥ १७३॥

हे मुनीन्द्र, तथा तेन प्रकारेण श्रियः लक्ष्म्या इदमेतत्सारं वर्तते । यत्सा श्रीः पात्रस्य साधोः कराब्जस्य पाणिपद्मस्य सङ्गोऽस्ति अस्याः इति पात्रकराब्जसङ्गिनी क्रियेत विधीयेत । तथा कथम् । यथा दध्नः पयःसुतस्य सारं नवोध्दृतं नवनीतं म्रक्षणमास्ते। पुनर्यथा अम्बुधेः क्षीरसमुद्रस्य सारं सुधा पीयूषम् । नवीनसृष्टिनिर्माणमनुजाभ्यवहारेषु धान्येषु जुगुप्सां कुर्वाणैर्गीर्वाणैः स्वाशनार्थमभ्यर्थितो मधुमथनः प्रथमतः पीयूषार्थमेव पयोनिधिं मथितवानिति श्रुतिः। पुनर्यथा मृदो धातुमृत्तिकायाः सारं हेम स्वर्णम् । पुनर्यथा तनोः शरीरस्य सारमुपकृतिरुपकारः । यदुक्तम्—'दानवित्तादृतं वाचः कीर्तिधर्मौ तथायुषः। परोपकरणं कायादसारात्सारमुद्धरेत्॥' इत्युक्तेः॥ इति गुरोर्दानाय पुनराग्रहः॥

શ્લોકાર્થ

હે મુનીન્દ્ર, દહીંનો સાર માખણ, ક્ષીરસમુદ્રનો સાર અમૃત, માટીનો સાર સુવર્ણ અને શરીરનો સાર જેમ પરોપકાર છે, તેમ લક્ષ્મીનો સાર સુપાત્રના કરકમલની સંગિની કરવી તે જ છે. (કહ્યું છે કે : ધનથી દાન, વાણીથી આદર, જીવિતથી કીર્તિ અને ધર્મ તેમજ શરીરથી પરોપકાર કરવો. આ પ્રકારે અસારથી સાર વસ્તુને ગ્રહણ કરવી જોઇએ.) ॥ ૧૭૩ ॥

ततो बभाण प्रभुरब्धिनन्दना स्वतन्त्रचारा व्यभिचारिणीव या ।
श्रयेत तां गन्धकलीमलीव को वृणोमि किं चान्यदहं महीमणे ॥ १७४ ॥

ततो नृपवाक्यानन्तरं प्रभुर्हीरसूरिर्बभाण भाषते स्म। हे महीमणे रत्नगर्भारत्न, या अब्धिनन्दना क्षीरनीरनिधितनया श्रीर्व्यभिचारिणीवासतीव स्वतन्त्रं स्वेच्छया चरति भ्राम्यतीत्येवंशीला स्वतन्त्रं चारो विचरणं भ्रमणं यस्याः सा स्वतन्त्रचारा आस्ते । ततः कारणात् तां पांसुलामिव श्रियं को महात्मा उत्तमः पुमान् श्रयेत भजेत । अपि तु न कोऽपि । कामिव । गन्धकलीमिव । यथा अली भृङ्गो भ्रमरः गन्धकलीं चम्पककलिकां नाश्रयेत् । 'न षट्पदो गन्धकलीमजिघ्रत' इति स्मृते । किं च मत्कथितमवधार्यताम् । एतेषु भवत्कथितपदार्थेषु मम प्रयोजनं नास्ति । अहं किंचिदन्यत् वृणोमि भवत्पार्श्वे याचे ॥

શ્લોકાર્થ

પૃથ્વી ઉપર રત્નસમાન હે રાજન્, લક્ષ્મી વ્યભિચારિણી સ્ત્રીની જેમ સ્વેચ્છાચારિણી છે, તે માટે જેમ ભ્રમર ચંપકકલિકાને ના ઇચ્છે તેમ કુલટા સ્ત્રી જેવી લક્ષ્મીનો કોણ

ઉત્તમ પુરુષ આશ્રય કરે ? તેથી આપે કહેલા પદાર્થોમાંથી કોઈપણ પદાર્થનું મારે પ્રયોજન નથી, તે છતાં હું આપની પાસે બીજી કોઈ વસ્તુની યાચના કરું છું. ॥ ૧૭૪ ॥

निवेशिता ये नरकेषु नारका इवाङ्गिनो गुप्तिषु सन्ति ते विभो ।
विमुञ्च तानित्थमुदीर्य तस्थुषि व्रतीश्वरेऽभाषत भूवृषा पुनः ॥ १७५ ॥

पुनः प्रभुयाच्ञोपरि भूवृषा भूमीन्द्रोऽभाषत । कस्मिन् सति । इत्थममुना प्रकारेण उदीर्य उक्त्वा याचनां कृत्वा व्रतीश्वरे सूरीन्द्रे तस्थुषि स्थिते सति मौनमवलम्बमाने सति । इत्थं कथम् । हे साहे, नरकेषु दुर्गतिषु नारका इव ते तव गुप्तिषु कारागारेषु ये अङ्गिनः प्राणिनो जना निवेशिताः क्षिप्ताः सन्ति तान् विमुञ्च स्वैरचारिणो मुत्कलान् कुरु ॥ इति गुरोर्बन्दिमोचनार्थं याचना ॥

શ્લોકાર્થ

હે બાદશાહ, નરકોમાં જેમ નારકો રહેલા છે તેમ આપના કારાગારમાં જે બંદીજનો રહેલા છે, તેમને મુક્ત કરો, આમ કહીને આચાર્યદેવ મૌન રહ્યા ત્યારે અકબરબાદશાહ બોલ્યા. ॥ ૧૭૫ ॥

पृषत्सपत्नैरिव वन्यजन्तवः शकुन्तपोता इव वा शशादनैः ।
विसारवारा इव देव धीवरैरमीभिरुद्वेगमवापिता जनाः ॥ १७६ ॥

हे देव भट्टारक, अमीभिः कारागारवासिभिः अन्यायाजन्यकारिभिः नृशंसैर्जनाः प्रजा लोकाः उद्वेगं संतापमकराकरदण्डादिकरणैर्महोपद्रवमवापिता लम्भिताः । कैरिव । पृषत्सपत्नैरिव । यथा पृषतां मृगविशेषाणां सपत्नैः प्रत्यर्थिभिः केसरिभिः । 'पृषत्किशोरी कुरुतामसंगतम्' इति नैषधे । वन्या वने भवाः मृगशशशम्बरादयो जन्तवः प्राणिनः काननसत्त्वाः संताप्यन्ते । पुनः कैरिव । शशादनैरिव । यथा श्येनैः शकुन्तानां विहंगमानां पोता बालाः शकुन्ताः पोताश्च लघुवृद्धपक्षिण उद्विज्यन्ते । 'श्येनः पत्री शशादनः' इति हैम्याम् । तथा च—'नभसि महसां ध्वान्तध्वाङ्क्षप्रमापणपत्रिणामिह विहरणैः श्येतां पातां रवेरथ धारयन् । शशविशशनत्रासादाशामयाचरमां शशी तदधिगमनात्तारापारापतैरुदडीयत ॥' इति नैषधे । पुनः धीवरैरिव । यथा कैवर्तकैर्विसारवारा मत्स्यगणा उद्वेगं प्राप्यन्ते । 'विसारः शकली शकली शम्बरोऽनिमिषस्तिमिः' इति हैम्यां मीननामानि ॥

શ્લોકાર્થ

હે દેવ, જેમ કેશરીસિંહોથી હરણ આદિ વનચર જીવો સંતાપ પામે, સિંચાણાઓ વડે પક્ષીઓના બચ્ચાઓને ઉપદ્રવ થાય તથા મચ્છીમારો વડે માછલાઓના સમૂહો

સંતાપ પામે તેમ આ કારાગારવાસી કેદીઓ વડે પ્રજા ઉપદ્રવવાળી અને અનેક પ્રકારના સંતાપવાળી બની હતી. ॥ ૧૭૬ ॥

अमी प्रजाम्भोजरमा हिमागमा मुनीन्द्र नीतेः परिपन्थिका इव ।
पचेलिमेनेव निजांहसा मया निगृह्य तच्चारकगोचरीकृताः ॥ १७७ ॥

हे मुनीन्द्र, यत्कारणादमी बन्दिजनाः नीतेर्न्यायस्य शिष्टाचारस्य परिपन्थिकाः प्रतिपक्षा इव वर्तन्ते । किंलक्षणाः । प्रजाः प्रकृतयः नगरग्रामजनपदादिवासिजना एवाम्भोजानि पद्मानि सुकुमारत्वात्कमलतुल्यास्तेषां रमा लक्ष्म्यः तासु हिमागमाः हेमन्तशिशिरसदृशाः । यथा हिमागमेन लक्ष्मीरादाय । विच्छायीकृत्येत्यर्थः । कमलानि गाल्यन्ते, तथा एभिरपि श्रीणां ग्रहणे कथंत्र का जीवा अभिगृह्यन्ते जनानां तस्मात्कारणान्नीतिविदा न्यायनिष्ठेन मया निगृह्य निग्रहं कृत्वा निगडयित्वा च चारकगोचरीकृताः कारागारनिवासिनो विहिताः । उत्प्रेक्ष्यते—पचेलिमेन परिपाकं प्राप्तेनोदयावनिकायामागतेन निजांहसा स्वकीयपापेनेव । 'अत्युग्रपुण्यपापानामिहैव फलमाप्यते' इति वचनात् ॥

શ્લોકાર્થ

હે મુનીન્દ્ર, આ કેદીઓ ન્યાયના શત્રુ છે અને મારા પ્રજારૂપી કમલવન માટે શિશિર ઋતુ સમાન છે, અર્થાત્ પ્રજાના જીવનનું શોષણ કરનારા છે. તે માટે ન્યાયધર્મની રક્ષા કરવા માટે તેઓનો નિગ્રહ કરીને કારાગારવાસી બનાવ્યા છે. ॥ ૧૭૭ ॥

अगण्यपुण्यादिव पक्त्रिमान्निजात्तथापि वाक्याद्यतिजम्भविद्विषाम् ।
समुद्धृता दुःखमहान्धकूपतो यदृच्छयामी विचरन्तु बन्दिनः ॥ १७८ ॥

हे प्रभो, अमी बन्दिनो बन्दिजनाः कारागारीभूताः अपि यदृच्छया स्वतन्त्रं विचरन्तु स्वस्वस्थाने गत्वा स्वैरं क्रीडन्तु । किंभूताः । यद्यप्यमी हिंस्रा इवानेकसत्त्वोजकाः सन्ति, तथापि यतिजम्भविद्विषां वाचंयमवासवानां तत्रभवतां भवतां वाक्यान्मदनुग्रहकारिवचनात् दुःखमेव महानतिगुरुः पातालविवरोपमो योऽन्धकूपो घोरान्धकारनिचितावटस्तस्मादुद्धृता अर्थात्तत्र पूर्वं पतिताः पश्चान्निष्काशिताः । उत्प्रेक्ष्यते—निजादात्मनैव प्राचीनजन्मन्याचीर्णादत एव स्वकीयात्तथा पक्त्रिमात्परिपाकभावं प्राप्तादुदयावलिकायामायातात् तथा अगण्याद्गणयितुमशक्याद्तिबहुलात्पुण्यात्सुकृतादिव ॥ इति सूरिवाक्याद्बन्दिमोचनम् ॥

શ્લોકાર્થ

હે ભગવાન, આ કેદીઓ જો કે હિંસક અને ક્રૂર છે, છતાં માનો કે તેઓના

પૂર્વસંચિત પુણ્યના પરિપાકરૂપ આપના અનુગ્રહકારી વચનથી મહાદુઃખરૂપ અંધકારમય કૂવારૂપ જેલમાંથી ઉદ્ધૃત થયેલા ભલે સ્વેચ્છાપૂર્વક વિચરો. ॥ ૧૭૮ ॥

इयं तु पूज्येषु परोपकारिता प्रसादनीयं निजकार्यमप्यथ ।
तमूचिवानेष यदङ्गिनोऽखिलानसूनिवावैमि ततः परोऽस्तु कः ॥ १७९ ॥

हे सूरयः । तु इति विशेषद्योतकम् । अवधारयन्तु वा । 'तु विशेषेऽवधारणे' इत्यनेकार्थः । इयं बन्दिजनमोचनलक्षणा पूज्येषु भुवनजनाभ्यर्चनीयेषु श्रीमत्सु केवलं परोपकारिता परेषु आत्मव्यतिरिक्तेषु जीवेषु उपकारिता उपकारकरणशीलता परोपकर्तृत्वमेव । अपि पुनर्निजकार्यं स्वकृत्यमपि प्रसादनीयं प्रसाद्य सद्योवाच्यम् अथ इत्युक्तेरनन्तरमेष सूरिस्तमकब्बरं प्रति ऊचिवान् कथयति स्म । हे साहे, अहमखिलान् समस्तानपि अङ्गिनो जन्तून् असून् स्वप्राणानिवावैमि निजजीववज्जानामि । ततः तर्हि परः कोऽस्तु । न कोऽपीत्यर्थः ॥

श्लोकार्थ

હે સૂરિવર, આ બંદીજનોને મુક્ત કરવારૂપ આપની માંગણી, જગતપૂજ્ય એવા આપના માટે નરી પરોપકારિતા જ સૂચવે છે; છતાં પણ આપ તેને પોતાનું કાર્ય માનો છો ? આ પ્રમાણે બાદશાહે કહ્યું ત્યારે આચાર્યદેવે કહ્યું કે 'હે રાજન્, હું સર્વે જીવોને મારા પ્રાણની જેમ જાણું છું તેથી મારા માટે 'પર' કોણ હોઇ શકે ! અર્થાત્ કોઇ જ નહીં. ॥ ૧૭૯ ॥

सुखं निखेलन्तु विलासविष्किरास्त्वया विमुक्ता निजपञ्जरात्पुनः ।
निरोधदुःखं स्वगृहैर्वियोगिनस्तुदत्यमून्यत्तुहिनं तरूनिव ॥ १८० ॥

हे साहे, निजपञ्जरात्स्वकीयकाष्ठकोष्ठात्त्वया विमुक्ताः श्रीमता निष्कास्य रोधान्मुत्कला मुक्ताः स्वेच्छाचारिणः कृताः विलासविष्कराः क्रीडाविहंगमाः पुनः पूर्ववत्सुखं सुखेन निखेलन्तु रमन्ताम् । यत्कारणात्स्वेषामात्मनां गृहैर्दारैर्वियोगो विरहोऽस्त्येषामिति वियोगिनस्तानमून्विहंगान्निरोधो निरुध्य रक्षणं पञ्जरक्षेपणं च तस्य दुःखमसातं तुदति पीडयति । किमिव । तुहिनमिव । यथा तुहिनं हिमं हिमानीव तरून्पीडयति दहति ॥

श्लोकार्थ

હે રાજન્, તમારા પાંજરામાં ક્રીડાર્થે રાખવામાં આવેલાં પક્ષીઓને પણ આપ મુક્ત કરાવો. જેથી તેઓ પણ પૂર્વની જેમ સુખપૂર્વક ક્રીડા કરે. કારણ કે તેઓની

પોતાની પત્નીઓથી વિયોગ કરાવી તે પક્ષીઓને પકડીને પાંજરામાં રાખવા તે પણ તેઓના માટે દુઃખના કારણરૂપ છે. જેમ હીમ વૃક્ષને પીડા કરે અર્થાત બાળે, તેમ પક્ષીઓને પાંજરામાં પૂરવાં તે તેમના માટે અત્યંત દુઃખદાયી છે. ॥ ૧૮૦ ॥

नभश्चराम्भश्चरभूमिचारिणां वपुष्मतां स्वैरसुखप्रचारिणाम् ।
निभालयन्नीतिदृशा चराचरं भवानिशं साधुरिवाभयप्रदः ॥ १८१ ॥

हे साहे, नभस्याकाशे चरन्तीति नभश्चराः पक्षिणः, तथा अम्भसि पानीये चरन्तीति अम्भश्चारिणो मत्स्या मकरादयः, तथा भूमौ पृथिव्यां चरन्तीत्येवंशीला भूमिचारिणः शशशम्बरवराहहरिणादयो वन्या गोमहिषपश्वेडकादयो ग्रामीणास्तेषां वपुष्मतां देहिनां जन्तूनां त्वं नीतिदृशा न्यायचक्षुषा चराचरं स्थावरजङ्गमरूपं जगन्निभालयन् स्वात्मवत्सर्वेऽपि सत्त्वाः पालनीया इति बुद्ध्या पश्यन्ननिशं निरन्तरं साधुरिव पृथिवीजलानलवायुवनस्पतित्रसाभिधानानां षण्णां कायानां पालयितेव अभयं जीवितदानं प्रददातीत्यभयप्रदो भव एधि । किं च । वपुष्मतां स्वैरं स्वेच्छया सुखेन मनसा तेन च प्रचरन्तीत्येवंशीलास्तेषाम् ॥ इति पञ्जरपक्षिमोचनमार्गणम् ॥

શ્લોકાર્થ

હે રાજન્, સ્વેચ્છાપૂર્વક સુખથી વિચરનારાં પક્ષીઓ આદિ નભશ્ચર જીવો, મત્સ્ય-આદિ જલચર જીવો, અને હરણ, વરાહ, ગાય, ભેંસ, પાડા આદિ ભૂચર જીવોને ન્યાયદૃષ્ટિથી જોનારા આપ પોતાના પ્રાણની જેમ જોતા સાધુની જેમ નિરંતર અભય આપનારા બનો. ॥ ૧૮૧ ॥

इति निशम्य दयोदयगर्भितं क्षितिपतिर्यतिशीतरुचेर्वचः ।
कवितृकाव्यमिवाप्रतिमं गुणैर्मनसि तं प्रशशंस चमत्कृतः ॥ १८२ ॥

क्षितिपतिरकब्बरसाहिः चमत्कृतः आश्चर्यं प्राप्तः सन् मनसि चित्ते एव गुणैः शमदमकृपासत्त्वादिभिरप्रतिममसाधारणं तं सूरिं प्रशशंस श्लाघते स्म । किं कृत्वा । यतिशीतरुचेर्मुनिमृगाङ्कस्य इत्यमुना बन्दिविहगादिमोचनद्वारा दयाया यावज्जगज्जन्तूपरि कृपाया उदयः प्रादुर्भावः गर्भे मध्ये जातोऽस्येति तद्दयोदयगर्भितं करुणाकलितं वचो विभुवाक्यं निशम्य श्रुत्वा । वचोऽपि किंभूतम् । गुणैर्निःस्पृहताशान्तरसादियुक्ततापरोपकारितादिभिरप्रतिममनुपमम् । किमिव । कवितृकाव्यमिव । यथा कवितुः कवेः काव्यं कवित्वं गुणैरुपमोत्प्रेक्षाप्रसादकान्तिश्लेषालंकारादिभिरप्रतिमं न विद्यते प्रतिमा प्रतिबिम्बं यस्य तादृशं स्यात् ॥

શ્લોકાર્થ

આચાર્યદેવના દયાગર્ભિત વચન સાંભળીને અકબરબાદશાહ ચિત્તમાં ચમત્કાર પામ્યા અને કવિની કવિતામાં રહેલા ઉપમા, અલંકાર, ઉત્પ્રેક્ષા અને શ્લેષ આદિ અસાધારણ

ગુણોની જેમ આચાર્યદેવમાં રહેલા સમ, દમ, દયા, દાન અને પરોપકારિતા આદિ અસાધારણ ગુણોની પ્રશંસા કરી. ॥ १८२ ॥

मनसा साहिः किं प्रशशंस । तदेवाह—

प्रावीण्यमन्यहितकर्मणि पश्यतैषां
तथ्य यतो व्यवसितिर्महतां परार्थी ।
विश्वं शशीव धवलत्यखिलं कलाभि-
रम्भोभरैर्जलधरोऽपि धरां धिनोति ॥ १८३ ॥

मूर्ध्ना दधाति वसुधां भुजगाधिराजो
नैःस्थ्यं निहन्ति मणिरध्वरभागभाजाम् ।
आमोदयन्ति हरितो हरिचन्दनानि
भिन्दन्ति संतमसमम्बरकेतवोऽपि ॥ १८४ ॥

साला दिशन्ति च फलानि पचेलिमानि
वार्धेर्वशा अपि वहन्ति पयःप्रवाहान् ।
विश्वोपकारकरणैकनिबद्धकक्षै-
रेभिर्बभूव वसुधा किमु रत्नगर्भा ॥ १८५ ॥

एषाममीषां सूरीणामन्येषां स्वव्यतिरिक्तानां जन्तूनां हितकर्मणि इष्टनिर्मापणे प्रावीण्यं चातुर्यं पश्यत भो लोकाः, विलोकयत । यतः कारणान्महतामुत्तमानां व्यवसितिर्व्यापारः प्रयत्नो वा परेषामेवार्थः प्रयोजनं यस्यास्तादृश्य इति । तथा सत्यां तदेव दर्शयति—शशी चन्द्रमाः कलाभिश्चन्द्रिकाभिः कृत्वा विश्वं जगद्धवलत्युज्ज्वलीकरोति । किंभूतं विश्वम् । अखिलं समस्तमपि । अपि पुनर्जलधरो मेघोऽपि अम्भोभरैर्वृष्टिरूपैः पयःसमूहैः कृत्वा धरां वसुधां भूमीं धिनोति निदाघदाघनिवारणनवाङ्कुरनिकुरम्बकरणादिना प्रीणयति । पुन-र्भुजगाधिराजः शेषनागेन्द्रो मूर्ध्ना मस्तकेन वसुधां दधाति बिभर्ति । पुनरध्वरभागभाजामध्वराणां यज्ञानां भागमंशं भजन्तीति देवाः क्रतुभुक्त्वात् । 'स्वाहास्वधाक्रतुसुधाभुज आदितेयाः' इति हैम्याम् । 'मखांशभाजां प्रथमो निगद्यसे' इति रघौ । 'मुखं मखास्वाद-विदां वदन्ति' इति नैषधे । मखास्वादविदां देवानां मुखं वह्निरित्यर्थः । 'बर्हिर्मुखा निमिषदेवतनाकिलेखाः' इति हैम्याम् । तेषां सुराणां मणिश्चिन्तारत्नम् । नैःस्थ्यं दारिद्र्यं निहन्ति नाशयति । पुनर्हरिचन्दनानि श्रीखण्डपादपाः हरितो दिश आमोदयन्ति सौरभयन्ति सुरभीकुर्वाणाः सन्त आमोदयन्ति सप्रमोदान् कुर्वन्ति हर्षयन्ति पुनरम्बरकेतवो भास्कराः

संतमसमन्धकारं भिन्दन्ति निर्दलयन्ति । च पुनः सालाः सर्वजातीयाः पादपाः पचेलिमानि फलानि दिशन्ति यच्छन्ति । तथा वार्धेः समुद्रस्य वशाः पत्न्यो नद्योऽपि पयःप्रवाहान् पानीयपूरान् वहन्ति । उत्प्रेक्ष्यते– विश्वेषां जगतां समस्तजन्तुजातानां वा य उपकारः समीहितकरणं तत्र एका अद्वितीया निबद्धा रचिता कक्षा स्वीकारो यैस्तादृशैरेभिश्चन्द्रादिपदार्थैः सूरिभिर्वा वसुधा एषा विश्वंभरा रत्नगर्भा बभूव रत्नानि मणयो रत्नपुरुषा वा गर्भे मध्ये यस्याः तादृशी जातेव । रत्नगर्भेत्यभिधानमेभिर्भूमेरभूदिव ॥ त्रिभिर्विशेषकम् ॥

श्लोकार्थ

અહો, આચાર્યની પરોપકારરસિકતા તો જુઓ, ખરેખર ? ઉત્તમ પુરુષોનો વ્યવસાય જ પરોપકાર માટે હોય છે, તે વાત સર્વથા સત્ય છે. જુઓ, ચન્દ્ર પોતાની કળાઓ વડે વિશ્વને ઉજ્જવળ કરે છે, મેઘ જલધારા વડે પૃથ્વીને તૃપ્ત કરે છે અર્થાત્ ખુશ કરે છે, શેષનાગ મસ્તક વડે પૃથ્વીને ધારણ કરે છે, ચિંતામણિ રત્ન મનુષ્યોની દરિદ્રતાને હણે છે, ચંદનવૃક્ષ પોતાની સુવાસથી દિશાઓને સુવાસિત કરે છે, સૂર્ય જગતનાં અંધકારને ભેદે છે, વૃક્ષો મનુષ્યોને પરિપક્વ ફળો આપે છે, તેમજ નદીઓ જલપ્રવાહને વહન કરે છે. ખરેખર, જગતનો ઉપકાર કરવામાં પોતાની કક્ષા બાંધી છે એવા આ પદાર્થો અને આચાર્યશ્રી સમાન સત્પુરુષો વડે જ પૃથ્વી રત્નગર્ભા છે. ॥ १८३ ॥ १८४ ॥ १८५ ॥

शशंस साहिर्जनयन्ति मन्मनोविनोदमेते विबुधा इव प्रभो ।
अमून्परं नाहमवैमि बिभ्रतः शमीद्रुमान्वह्निमिवार्तिमन्तरा ॥ १८६ ॥

साहिरकब्बरः शशंस कथयति स्म । हे प्रभो, एते विहंगमा मन्मनोविनोदं मम मनसश्चित्तस्य विनोदं क्रीडां जनयन्ति । के इव । विबुधा इव । यथा पण्डिता विविधशास्त्रगोष्ठीकाव्यादिरसैः मनोविनोदमुत्पादयन्ति । यदुक्तम्—'गीतशास्त्रविनोदेन कालो गच्छति धीमताम्' इति । परं पुनरहममून् विहगान् अन्तरा मनोमध्ये अर्ति पीडाञ्चितां वा बिभ्रतोधारयतो नावैमि न जाने । कानिव । शमीद्रुमानिव । यथा शमीवृक्षाः 'खेजडी' इति प्रसिद्धाः अन्तरा मध्ये वह्निमनलं बिभ्रति । 'शमीमिवाभ्यन्तरलीनपावकाम्' इति रघुवंशे ॥

श्लोकार्थ

અકબરબાદશાહે કહ્યું કે: 'હે પ્રભો, આ પક્ષીઓ પંડિતોની જેમ મારા મનને આનંદ આપનારાં છે. પરંતુ શમી (ખેજડી) ના વૃક્ષમાં રહેલા અગ્નિની જેમ તેઓના મનની પીડા હું જાણતો નથી. ॥ १८६ ॥

शापेन कस्यापि मुनेरिवानिशं निरुध्यमाना विविधाः खगा मया ।
निर्मुक्तिभाजो भवदीयभाषितैरेते स्वतंत्र विचरन्तु सत्वरम् ॥ १८७ ॥

हे प्रभो, एते विविधा नानाजातीया अनेकजातिजन्मानो मयूरशुकसारिकाकाकपिकचकोरप्रमुखाः खगाः विहंगमाः भवदीयैः श्रीमत्संबन्धिभिः भाषितैः कथितैः निर्मुक्ति बन्धनं परेभ्यो मोक्षं भजन्तीति निर्मुक्तिभाजः मया विमुक्ताः सन्तः सत्वरं शीघ्रं स्वतंत्र स्वेच्छया विचरन्तु सुखं स्वैरमितस्ततो व्रजन्तु विशिष्टां मनोभिलषितां वा चूर्णिं कुर्वन्तु । खगाः किं क्रियमाणाः । मया अनिशं निरन्तरं निरुध्यमानाः पञ्जरादिषु प्रक्षिप्य संरक्ष्यमाणाः रोधं प्राप्यमानाः । उत्प्रेक्ष्यते—कस्यापि कोपनस्य दुर्वासःप्रमुखस्य कस्यचिदनिर्दिष्टनाम्नो मुनेस्तापसस्य आक्रोशवाक्येनेव अनिष्टवद्वसेत् ॥

શ્લોકાર્થ

હે પ્રભો, દુર્વાસાઆદિ કોઇ ક્રોધી તાપસ વડે અપાયેલા શાપની જેમ મારા વડે પાંજરામાં કેદ કરાયેલાં પક્ષીઓને આપનાં વચનથી હું બંધનમુક્ત કરું છું. ભલે, તેઓ સત્વરે સ્વેચ્છાપૂર્વક વિચરો. ॥ ૧૮૭ ॥

भास्वत्करा इव सुदूरभुवः समेता
  गृह्णीत दन्तिहयहेममुखं न किंचित् ।
तेन प्रसाद्य किमपि स्वविधेयमेष
  प्राप्यः कृतार्थपदवीमिति भूभुजोचे ॥ १८८ ॥

भूभुजा साहिना इत्यमुना प्रकारेण ऊचे कथ्यते स्म । इति किम् । हे श्रीसूरयः, यूयं सु अतिशयेन दूरभुवः दविष्ठस्थानाद्गन्धारपुरान्मदाकरणवशात्समेताः इह पादावधारिताः । के इव । भास्वत्करा इव । यथा सूर्यकिरणा अतिदूराद्दशाधिकाष्टयोजनशतस्थायुकार्कमण्डलादायान्ति । अथ वा गमनानन्तरं मया प्रदीयमानं दन्तिनो मदोद्धुरगन्धसिन्धुराः, हया जात्यानेकजातीयोत्तुङ्गतुरंगमाः, हेम स्वर्णम्, तत्प्रमुखं तदादिकं किंचिन्न गृण्हीत नादध्वम् । तेन कारणेन किमपि स्वविधेयमात्मीयकार्यं प्रसाद्य प्रसन्नीभूय कथयित्वा एषोऽहं कृतार्थपदवीं कृतकृत्यतां प्राप्यो लम्भयितव्यः ॥

શ્લોકાર્થ

'હે પ્રભો, જેમ સૂર્યનાં કિરણો આઠસો દશ યોજન રૂપ અતિ દૂર પ્રદેશથી આવે છે તેમ મારા વડે બોલાવાયેલા આપ અતિ દૂર દેશથી પધારેલા છો છતાં ગજ, અશ્વ,

સુવર્ણ આદિ કંઇપણ ગ્રહણ કરતા નથી તો મારા ઉપર કૃપા કરીને ખાસ આપના માટે કંઇપણ ગ્રહણ કરીને મને કૃતકૃત્ય બનાવો;' આ પ્રમાણે બાદશાહે કહ્યું ત્યારે ॥ ૧૮૮ ॥

सम्यग्विमृश्य गुरुणा निजभूमिभर्तु-
रामुष्मिकैहिकसुखप्रतिभूभविष्णुः ।
क्षीराब्धिसूनुरिव पर्युषणाष्टसंख्य-
घस्रेष्वमारिमवनीरमणाद्ययाचे ॥ १८९ ॥

गुरुणा हीरविजयसूरिणा सम्यक् चित्तावधानदानपूर्वकं विचारयित्वा अवनीरमणादकब्बरसाहिपार्श्वात्पर्युषणायाः सांवत्सरिकपर्वणः वसुमिता अष्टसंख्या प्रमाणं येषां तेऽष्टसंख्या घस्रा वासरास्तेषु अमारिं जगज्जीवाभयप्रदानं ययाचे अभ्यर्थयामासे । का इव । क्षीराब्धिसूनुरिव । यथा केनचित्पुंसा वदान्यनृपपार्श्वात्पाथोधिनन्दना श्रीर्याच्यते । किंलक्षणाममारिम् । निजस्य सूरेरात्मनः भूमिभर्तुरकब्बरस्यात्मनश्च आमुष्मिकं स्वर्गापवर्गभवं तथा ऐहिकं पुत्रकलत्रधनधान्यभाण्डागारिकसार्वभौमादिपदवीसंभवं च यत्सुखे साते तयोः प्रतिभूभविष्णुः साक्षिणीभवनशीला ॥

श्लोकार्थ

જેમ કોઈ પુરુષ, દાનેશ્વરી પાસે લક્ષ્મીની યાચના કરે તેમ હીરવિજયસૂરિજીએ સમ્યક્પ્રકારે વિચારીને પોતાના અને રાજાના આલોક–પરલોકના સુખ માટે સમર્થ સાંવત્સરિકપર્વરૂપ પર્યુષણાના આઠ દિવસોમાં દેશના જીવોને અભય આપવારૂપ 'અમારિ'ની યાચના કરી. ॥ ૧૮૯ ॥

उद्वेलिताखिलशरीरिकृपापयोधी-
न्प्रेक्ष्य प्रभून्हृदि चमत्कृतिमादधानः ।
चत्वार्यहान्युपरि सन्तु भवद्वृतानां
चूलावदत्र मम तं नृप इत्यवादीत् ॥ १९० ॥

नृपः साहिस्तं सूरिं प्रति इत्यवादीत् इदं वदति स्म । इति किम् । हे प्रभो, भवद्भिर्वृतानां श्रीमद्याचितानां पर्युषणाष्टदिनानामुपरि अधिकानि मम पुण्यार्थं चत्वारि अहानि दिनानि सन्तु भवन्तु । किंवत् । चूलावत् । यथा दशवैकालिकादिकानां केषांचिच्छास्त्राणामुपरि चूला भवति, यथा वा सप्तदशसहस्रयोजनप्रमाणलवणसमुद्रजलानामुपरिष्टाज्जलशिखा जायते, तथैवैते वासराः श्रीमद्वृतेभ्यो दिवसेभ्योऽभ्यधिका भूयासुः ।

नृपः किं कुर्वाणः। वेलां कूलभूमीक्रमतिक्रान्त उद्वेल उत्कण्ठः। उद्वेलता संजाता अस्मिन्निति त्युद्वेलितः। अखिलानां समग्राणां शरीरिणां जलस्थलाम्बरचारिणां प्राणिनामुपरि कृपा दयोदयः तद्रूपः पयोधिः समुद्रो येषां तादृशान्प्रभून् हीरसूरीन्प्रेक्ष्य दृष्ट्वा चमत्कृतिं यत्र तत्राप्येतेषां केवलं सर्वप्राणिषु करुणापरिणाम एव तदहो महानुभावा एवेत्याश्चर्यम्। आ सामस्त्येन सर्वाङ्गीणोल्लसद्रोमाञ्चकञ्चुकत्वेन दधानः बिभ्राणः ॥

श्लोकार्थ

વેળાનું ઉલ્લંઘન કરનાર સર્વજીવદયારૂપ સમુદ્ર જેવા આચાર્યને જોઈને હૃદયમાં આશ્ચર્ય પામતા રાજાએ આ પ્રમાણે કહ્યું: 'મારા પુણ્ય માટે આપના પર્યુષણાના આઠ દિવસ ઉપર અધિક મારા ચાર દિવસ હો! જેમ દશવૈકાલિક આદિ શાસ્ત્રોની ઉપર ચૂલિકા–શિખા હોય તેમ શિખારૂપે ચાર દિવસ અધિક અમારિ પ્રવર્તન હો! ॥ ૧૯૦ ॥

प्रारभ्यमेव–कनभोदशमीं शमीश
यावन्नभस्य बहुलेतरषष्ठिका स्यात्।
तावच्चरन्तु सुखमङ्गिगणास्त्रिलोकी-
जीवातुनेव भवतां वचसेत्युदित्वा ॥ १९१ ॥

स्वाह्वाङ्कितं कजसुहृन्मितवासराणां
बिभ्रद्विचित्ररुचिकाञ्चनचारिमाणम् ॥
अम्भोनभोवनतनूमदमारित्कं
प्रादायि तेन गुरवे फुरमानषट्कम् ॥ १९२ ॥

तेनाकब्बरसाहिना स्वाह्वाङ्कितं निजनामकलितम्, तथा कंजसुहृदः कमलबान्धवाः सूर्याः तैर्मितानां प्रमाणीकृतानां द्वादशसंख्याकानां वासराणां दिवसानाम्, तथा अम्भसां पानीयानाम्, तथा नभसाम्। वियच्चराणामित्यर्थः। तथा वनानामुपलक्षणाज्जनपदनगरपुरग्रामाणां ये तनूमन्तः अम्भश्चरा मत्स्यकच्छपादयः नभश्चरा मयूरशुककलिविङ्कादयः वनचराः शशशम्बरहरिणादयः ग्रामादीनां महिषमेषादयः एतेषां जीवानाममारिः जीवप्रतिपालनदया तत्सत्कं तत्संबन्धि स्फुरन्मानानां साहिनाममुद्राङ्कितलेखविशेषाणां षट्कं गुरवे हीरविजयसूरये प्रादायि प्रदत्तम्। किं कुर्वत्। विशिष्टानि विचित्राण्यालेख्यानि यत्र रुच्या स्फुरज्ज्योतिषा युक्तस्य काञ्चनस्य। अथ वा विशिष्टा मनोज्ञा चित्रा विस्मयकारिणी। अथ वा विचित्रा नानाप्रकारा रुचिः कान्तिर्यस्य तादृशस्य काञ्चनस्य कनकस्य चारिमाणं मनोहरतां बिभ्रद्धारयत्। दत्तं किं कृत्वा। इत्यमुना प्रकारेणोदित्वा कथयित्वा। इति किम्। त्रिलोक्यास्त्रिभुवनस्य जीवातुना जीवनौषधिनेव। आकाशेन खला ऊर्ध्वलोकः,

बिलादिना अधोलोकः, भूमिर्मध्यमलोकः, इति त्रिलोकी जाताः। भवतां श्रीपूज्यानां वचसा अङ्गिगणा जन्तुव्रजाः तावत्तावन्तं समयं सुखं सातेन चरन्तु पर्यटयन्तु भक्षयन्तु वा यदृच्छया । 'चर गतिभक्षणयोः' अर्थत्वात् । किं यावत् हे शमीश उपशमवतामवतंस, मेचकनभोदशमीमारभ्य श्रावणबहुलदशमीदिनमादौ कृत्वा इदं तु गुर्जरमण्डलानुगतं वचः अन्यदेशापेक्षया तु भाद्रपदकृष्णदशमी स्यादिति श्रावणकृष्णदशमीं प्रथमं संस्थाप्य यावत् यावता कालेन नभस्य भाद्रपदमासस्य बहुलेतरा शुक्ला अथ वा बहुलः कृष्णपक्षः तस्मादितरोऽन्यः शुक्लपक्षस्तस्य षष्ठिका षष्ठी तिथिः स्याद्भवेत् ॥ युगलम् ॥

શ્લોકાર્થ

'શ્રમણોના સ્વામી હે શમીશ, આપના વચનથી ગુર્જરદેશની અપેક્ષાએ શ્રાવણ વદ અને મરૂદેશ આદિ અન્યદેશોની અપેક્ષાએ ભાદરવા વદ દશમીથી પ્રારંભીને ભાદરવા સુદ છઠ સુધી માછલા, કાચબા આદિ જલચર જીવો, મૃગ, હરિણ આદિ સ્થલચર અને શુક, સારિકા આદિ ખેચર જીવો આ પ્રકારે ત્રણેલોકના જીવો 'સંજીવની' ઔષધિસમાન અભયરૂપ 'અમારિ' વડે સુખપૂર્વક સ્વતંત્રપણે વિચરણ કરો.' આ પ્રમાણે કહીને અકબર બાદશાહે પોતાનાં નામથી અંકિત (બાદશાહની મહોર છાપ યુક્ત) વિચિત્ર પ્રકારની કાંતિવાળા સુવર્ણાક્ષરની સુચારૂતા ધારણ કરનારા 'બાર દિવસની અમારિ પ્રવર્તના' રૂપનાં છ ફરમાન આચાર્યદેવને સુપ્રત કર્યા. ॥૧૯૧ ॥ ૧૯૨ ॥

व्यक्तिर्यथा प्रथममार्प्यत गुर्जराणां
सौराष्ट्रमण्डलफतेपुरदिल्लिकानाम् ।
द्वैतीयिकं सदजमेरुकृते तृतीयं
तुर्यं पुनर्निखिलमालवमण्डलस्य ॥ १९३ ॥

श्री लाभ लाभपुर युङ्मुलतान नाम-
नीवृद्द्वयस्य कुसुमाशुग बाण संख्यम् ।
षष्ठं तु रक्षणकृते स्वसवेशदेशे
तत्साधुसिन्धुरसना रजनीश्वरस्य ॥ १९४ ॥

तेषां षण्णामपि फुरमानानां व्यक्तिः पृथक् पृथक् कथनं यथेति ग्रन्थकृता प्रोच्यते । प्रथमं फुरमानं ग्रामनाम्नोः संस्काराभावः । क्वचित्क्रियते क्वचनापि न । तेनात्रापि संस्कारो न कृतः । इति गुर्जराणां धरित्रीमण्डलस्य । सु शोभनो भरतसार्वभौमप्रदत्तदेवदेशनामत्वात् राष्ट्रः, सुराष्ट्रः, सुराष्ट्रः एव सौराष्ट्र इति सौराष्ट्र एव मण्डलः । अथ वा सौराष्ट्र-

नाम्नो युगादिदेवनन्दनस्य मण्डलो देशः सौराष्ट्रमण्डलः । तथा फतेपुरं साहिराजधानी तदाश्रयेण मेवातमण्डलमागतम् । तथा दिल्लिका डिल्लीनामनगरी तत्कथनेन तत्पार्श्ववर्तिनोऽन्येऽपि मण्डलाः समायाताः । एतेषां मण्डलानां द्वितीयमेव द्वैतीयिकम् । स्वार्थं इकण् । तथा सन् प्रधानो योऽजमेरुदेशः तेन वनवकोटीकामरुस्थलीनागपुरादिदेशा लभ्यन्ते । तत्कृते तदर्थं तृतीयम् । पुनर्निखिलः समग्रोऽपि मालवमण्डलोऽवन्तिदेशस्तस्य । तद्ग्रहणेन निखिलापि दक्षिणदिक् तुर्यं चतुर्थम् । तथा श्रिया लक्ष्म्या लाभः प्राप्तिर्यत्र तादृशेन लाभपुरेण लाभपुरदेशेन पञ्चापनाम्ना । मण्डलेनेत्यर्थः । तत्समीपस्था अपि तद्ग्रहणेन ज्ञेयाः । पुनरकीर्ति तादृक् मुलताननामा नीवृज्जनपदः तयोर्द्वयमुच्चमुलतानादिभेदाद्युग्मं तस्य कुसुमाशुगः स्मरस्तस्य बाणाः शरास्तेषां संख्या यस्य: । पञ्चममित्यर्थः । पुनः साधुषु मुनिषु सिन्धुः समुद्रः स एव रसना मेखला यस्या सा पृथ्वी तस्या रजनीश्वरश्चन्द्रः तस्य । एतावता यतिराजस्य हीरसूरेः स्वस्यात्मनः सवेशदेशे समीपे रक्षणकृते कदाचित्कस्याप्याकस्मिकागतस्य प्रत्ययकृते दर्शनार्थं स्वपार्श्वे स्थापनार्थं षष्ठं स्फुरमानमार्प्यत अर्पितम् ॥ युग्मम् ॥ इति पर्युषणाद्वादशदिनामारिफुरमानप्रदानम् ॥

શ્લોકાર્થ

તે છ ફરમાનો કયા કયા દેશસંબંધી હતાં, તેનું વર્ણન કરતાં ગ્રંથકાર કહે છે કે: (૧) ગુર્જરદેશના ગ્રહણથી સૌરાષ્ટ્રદેશ સંબંધી. (૨) બાદશાહની રાજધાની ફતેહપુરને આશ્રયીને રહેલા મેવાડ અને દિલ્હી તથા તેની સમીપમાં રહેલા અન્ય દેશસંબંધી. (૩) અજમેર, કામરૂ, નાગપુર, સ્થલી પ્રદેશ આદિ સંબંધી (૪) સમસ્ત માળવદેશ સંબંધી (૫) લાભપુર–પંજાબ અને મુલતાન આદિ દેશ સંબંધી અને (૬) છઠ્ઠું ફરમાન સાધુઓનાં ચન્દ્રસમાન શ્રી હીરવિજયસૂરિજીને પોતાની પાસે રાખવા માટે અર્પણ કરવામાં આવ્યું. આ રીતે છયે ફરમાનો તે તે દેશોમાં મોકલવામાં આવ્યાં. ॥ ૧૯૩ ॥ ૧૯૪ ॥

नैकक्रोशमितं न दृग्विषयभाक्पारं पयोराशिव-
त्क्रीडत्कुञ्जरवाजिराजिवनितामर्त्यव्रजभ्राजितम् ।
नानानीडजमीननीरभरितं तड्डामराख्यं सर-
स्तेभ्योऽदत्त निषिद्धमीननिधनं तद्विज्ञवाग्भिर्नृपः ॥ १९५ ॥

नृपोऽकब्बरस्तेषां सूरीणां विज्ञाः पण्डितशान्तिचन्द्रगणयस्तेषां वाग्भिः डामरसरो मत्स्यीविज्ञप्त्युपदर्शकश्लोकोक्तियुक्तिभिः निषिद्धं निवारितं मीनानां मत्स्यानां निधनं वधो यत्रैवंविधं तत्स्वयं साहिना खानितत्वान्महत्तया प्रसिद्धं डामर इत्याख्या नाम यस्य तादृशं सरो महातटाकं तेभ्यो हीरविजयसूरिभ्यः अदत्त ददिवान् । किंभूतम् । नैके बहवः

क्रोशा गव्यूतानि तैर्मीयते स्म प्रमाणीक्रियते स्मेति द्वादशक्रोशप्रमाणम् । पुनः किंभूतम् । दृशां चक्षुषां विषयं गोचरीं भजतीति तादृक् पारं परतटं यस्यैवंविधं न । अदृग्गोचरपारमित्यर्थः । किंवत् । पयोराशिवत् समुद्रमिव ज्ञायते । पुनः किंभूतम् । क्रीडन्तो जलकेलीं कुर्वाणा ये कुञ्जरा हस्तिनस्तथा वाजिनस्तुरङ्गमास्तेषां राजयः श्रेणयस्तथा वनिता युवतयस्ताभिर्युक्ता मर्त्या मानवाः सतरुणीकाः तरुणास्तेषां व्रजा गणास्तैर्भ्राजितं भूषितम् । पुनः किंभूतम् । नाना विविधजातिजन्मानो ये नीडजाः पक्षिणः तथा मीना मत्स्या जातयो यत्र तादृशेन नीरेण भरितं संपूर्णम् ॥ इति डामरतटाकार्पणम् ॥

શ્લોકાર્થ

બાર ગાઉનાં વિસ્તારવાળું, સમુદ્રની જેમ જેનો કિનારો દૃષ્ટિગોચર નથી થતો તેવું, ક્રીડા કરી રહેલા ગજ, અશ્વોના સમૂહોથી સુશોભિત, વળી સ્ત્રીઓ સહિત પુરુષોથી સુશોભિત, જેમાં અનેક જાતિનાં પક્ષીઓ અને મત્સ્યો છે, જલથી પરીપૂર્ણ, જેમાં માછલીઓને પકડવાનો નિષેધ છે, આવી પ્રસિદ્ધિ પામેલું 'ડાબર' નામનું સરોવર, અકબર બાદશાહે આચાર્યદેવના શિષ્ય શાંતિચન્દ્ર ઉપાધ્યાયની વાણીથી હીરવિજયસૂરિજીને અર્પણ કર્યું : ॥ ૧૯૫ ॥

भूजानिरित्यालपति स्म सूरयः श्रीमद्गिरा मे न्यवसद्दया हृदि ।
हंसी पयोदध्वनिनैव मानसे पृच्छामि किं त्वेतदहं गुरून्प्रति ॥ १९६ ॥

भूर्भूमी जाया यस्यासौ भूजानिः पृथ्वीपतिरित्यग्रे वक्ष्यमाणमालपति स्म कथयामास। हे सूरयः, श्रीमद्गिरा युष्माकं वाचा मे मम हृदि हृदये दया सर्वसत्त्वोपरि कृपा न्यवसन्निवासं कृतवती। केव। हंसीव यथा पयोदध्वनिना पर्जन्यगर्जारवेण मराली मानससरसि निवसति। मेघागमे हि राजहंसाः कलुषजलत्वादितो मानससरसि यान्तीति कविसमयः। चम्पूकथायामपि 'प्रोषितकलहंसवयसि'। 'वर्षावर्णने प्रोषिता मानसं प्रति प्रस्थापिता हंसपक्षिणो येन' इति तद्वृत्तिः। किं तु परं विशेषः प्रश्नो विद्यते। अहं गुरून् युष्मान्प्रति पृच्छामि॥

શ્લોકાર્થ

ત્યાર પછી રાજાએ આ પ્રમાણે કહ્યું : 'હે સૂરીન્દ્ર, જેમ મેઘના ગર્જારવથી રાજહંસી માનસ સરોવરમાં વાસ કરે તેમ હિતકારિણી એવી આપની વાણી વડે મારા હૃદયમાં દયાધર્મનો વાસ થયો, પરંતુ આપ શ્રીમાનને હું એક પ્રશ્ન પૂછું છું : ॥ ૧૯૬ ॥

अनेहसीव युग्मिनां न कोऽपि कं हनिष्यति ।
कदाचिदीदृशं दिनं समेष्यति क्षितौ प्रभो ॥ १९७ ॥

हे प्रभो, कदाचित् कस्मिन्नपि प्रस्तावे क्षितौ पृथिव्यामीदृशं दिनमेवंविधो वासरः समेष्यति समायास्यति। यस्मिन् समये दिवसे वा कोऽपि लघुवृद्धोऽपि सिंहव्याघ्रादिहिंसकोऽपि कमुत्क्रमपि जन्तुं न हनिष्यति नैव व्यापादयिष्यति। कस्मिन्निव। अनेहसीव। यथा युग्मिनां युगलिकानां समरे अवसर्पिण्याः प्रथमद्वितीयतृतीयारकलक्षणे काले कोऽपि न हन्ति ॥ इति सर्वज्ञगज्जन्तुकृपाविषयः प्रश्नः ॥

શ્લોકાર્થ

જેમ યુગલિકોના સમયમાં (અવસર્પિણીના પ્રથમ અને દ્વિતીય આરામાં) કોઈપણ જીવ કોઈને પણ હણતાં નહી, તેમ હે પ્રભો ? આ પૃથ્વી ઉપર કોઈપણ સમયે એવો દિવસ આવશે કે જે દિવસે સિંહ, વાઘ આદિ હિંસક પ્રાણી બીજા જીવોને હણશે નહીં.
॥ ૧૯૭ ॥

कलौ युगे पाप्मपूर्णे दुर्लभं दिनमीदृशम् ।
इत्युक्ते गुरुणा किंचिद्विचिन्त्येत्यब्रवीन्नृपः ॥ १९८ ॥

पाप्मभिर्दुष्कृतैः पूर्णे भरिते कलौ ईदृशं श्रीमदुक्तं जगज्जन्तुहितावहमहो दुर्लभं दुःप्राप्यम् । गुरुणा इत्युक्ते कथिते सति किंचिद्विचिन्त्य विचारयित्वा नृप इत्यग्रेवक्ष्यमाणमब्रवीज्जगाद ॥

શ્લોકાર્થ

'હે રાજન, પાપપૂર્ણ કલિયુગમાં એવો સુવર્ણદિન બહુ દુર્લભ છે!' આ પ્રમાણે આચાર્યદેવે કહેતાં કંઈક વિચાર કરીને બાદશાહે કહ્યું : ॥ ૧૯૮ ॥

पलाशतां बिभ्रति यातुधाना इवाखिला अप्यनुगामिनो मे ।
अमारिरेषां न च रोचते क्वचिन्मलिम्लुचानामिव चन्द्रचन्द्रिका ॥ १९९ ॥

हे गुरो, मे मम अखिलाः समस्ता अपि अनुगामिनः सेवकाः । 'सहायोऽभिजनोऽश्वजीविगामिचरप्लवाः । सेवकोऽथ' इति हैम्याम् । मुद्गलप्रस्थानाद्धयो यवनाः पलाशतां पलं मांसमश्नन्ति खादन्तीति पलाशास्तेषां भावः मांसभुक्त्वं बिभ्रति । मांसाशिनः सन्तीत्यर्थः । के इव । यातुधाना इव । यथा राक्षसाः पलादतां दधते । च पुनरत एव

कारणादेषामनुचराणां यावद्यनानाममारिर्जीवदया न रोचते न स्वदते । लुब्धकानिवैतान् जीवानुकम्पा न प्रीणाति इत्यर्थः । केव । चन्द्रचन्द्रिकेव । यथा चान्द्रस्य सुधारुचेश्चन्द्रिका कौमुदी मलिम्लुचानां चौराणां न रोचते । दन्तानामपि चन्द्रिका स्यात् । यथा 'दशनचन्द्रिकया व्यवभासितम्' इति रघौ प्रोक्तमास्ते । तन्निरासार्थं चन्द्रचन्द्रिकेति ग्रहणमत्र ॥

श्लोकार्थ

'હે ગુરુદેવ ? મારાં સર્વે સેવકો રાક્ષસોની જેમ માંસાહારી છે, તેથી જેમ ચોર-લોકોને ચન્દ્રની ચન્દ્રિકા ન ગમે, તેમ તેઓને આવી જીવદયા ગમતી નથી. ॥ ૧૯૯ ॥

शनैः शनैस्तेन मया विमृश्य प्रदास्यमानामथ सर्वथैव ।
दत्तामिवैतामवयान्तु यूयममारिमन्तर्महतेव कन्या ॥ २०० ॥

हे पूज्याः, यस्माज्जीवदया मुद्गलानां म्लेच्छानां न रोचते तेन कारणेन त्रिकरणशुद्ध्यैव दानाभिप्रायेण विमृश्य अमारिप्रदानयोग्यदिवसादीनां विचारं विधाय शनैः शनैर्मन्दं मन्दं मस्तकैरिव दिनैः प्रदास्यमानामेतां श्रीमदुक्काममारिं जीवपालनरूपां सर्वथा सर्वप्रकारेणैव यूयमन्तश्चित्ते दत्तामेवावयान्तु जानन्तु । कामिव । कन्यामिव । यथा महता उत्तमेन । 'अमोघा महतां वाणी' इति वचनात् । तथा च 'कूर्मकुलाचलफणिपतिविधृतापि चलति वसुधेयम् । प्रतिपन्नमचलमनसां न चलपुंसां युगान्तेऽपि ॥' इत्यपि वचनाच्च प्रदास्यमानां स्वयं मनसि कल्पितां कथितां वा दत्तामिव ज्ञायतेऽवश्यम् ॥ इति गुरोः पुर इत्यग्रे जीवामारिप्रदावकथनम् ॥

श्लोकार्थ

હે પૂજ્ય, તે માટે મેં અમારિ પ્રદાનના દિવસોનો વિચાર કરીને, ધીમે ધીમે આપે કહેલી 'અમારિ' આપના હૃદયમાં, ઉત્તમ પુરુષોનાં કન્યાવાગ્દાનની જેમ સર્વપ્રકારે આપેલી છે, એમ જાણજોઃ કારણ કે મહાપુરુષોની વાણી અમોઘ હોય છે.' વળી, કાચબો, મેરૂ અને શેષનાગ વડે ધારણ કરાયેલી પૃથ્વી પણ કોઈ અવસરે ચલિત થાય પરંતુ ઉત્તમ પુરુષોનાં આપેલા વચનો યુગાન્તે પણ ચલિત થતાં નથી. ॥ ૨૦૦ ॥

प्राग्वत्कदाचिन्मृगयां न जीवहिंसां विधास्ये न पुनर्भवद्वत् ।
सर्वेऽपि सत्त्वाः सुखिनो वसन्तु स्वैरं रमन्तां च चरन्तु मद्वत् ॥ २०१ ॥

हे गुरो, अहं कदाचित् कस्मिन्नपि समये मृगयामाखेटकं न विधास्ये । किंवत् । प्राग्वत् । यथा पूर्वं श्रीमन्मिलनात्प्रथमं मृगयां कुर्वाणोऽभवं तद्वत्पुनर्मृगयां विनापि जीवहिंसां

निरपराधवन्यग्राम्यजन्तूनां वधं न करिष्ये। किंवत्। भवद्वत्। यथा भवन्तः कदाचिन्मृगयां न कुर्वन्ति, अथ सर्वप्राणातिपातविरतत्वात्सापराधनिरपराधजीववधं सर्वथा न विदधते, अहं तु गृहमेधित्वाद्धरणीधरत्वेन दुष्टादुष्टनिग्रहपालनधर्मत्वान्निरपराधजीववधं न निर्मास्ये। अथ मृगयान्यसत्त्ववधनिषेधानन्तरं सर्वे समस्ता अपि जलजाः स्थलजा वनजा नगरग्रामजाश्च मत्स्यादयो मृगादयः श्वापदा गोमहिषमेषादयश्च सत्त्वाः प्राणिनः सुखिनः सौख्यभाजः वसन्तु भवन्तु। पुनः स्वैरं स्वेच्छया रमन्तां क्रीडन्तु। स्त्रीभिः समं च पुनः स्वैरं चरन्तु भक्षणसंचरणादि कुर्वन्तु। त्रिष्वप्युक्तिषु मद्वत्। यथाहं सुखी वर्ते स्वैरं रमे स्वेच्छया चाश्नि चरामि विलसामि च॥ इति मृगयानिषेधः॥

શ્લોકાર્થ

હે ગુરુદેવ, હું પહેલાંની જેમ ક્યારેય પણ શિકાર કરીશ નહીં, આપની જેમ નિરપરાધી જીવોની ક્યારે પણ હિંસા કરીશ નહીં, વળી મારી જેમ સર્વપ્રકારનાં જીવો સુખપૂર્વક રહો! સ્વેચ્છાપૂર્વક ક્રીડા કરો? અને સ્વતંત્રપણે ચરભક્ષણ આદિ કરો! ॥ ૨૦૧ ॥

प्रागागमे प्राभृतवत्किमेषां कार्यं मया चिन्तयतेति चित्ते।
प्रवर्तितासौ नवरोजघस्रामारिः क्षितौ खेलनकौतुकेन॥ २०२॥

हे सूरयः, क्षितौ पृथिव्यां खेलनकौतुकेन क्रीडाकुतूहलेन कृत्वा असौ सर्वजनसाक्षात्कारिणी प्रत्यक्षा वा श्रीमदुचिता श्रीमन्निमित्त प्राभृतरूपा मया नवरोजनाम्नां घस्राणां दिनविशेषाणाममारिः कोटिकाद्यानामपि जीवानां वधनिषेधः प्रवर्तिता मया कृता मत्सेवकैश्च कारिता प्रकटीकृता वा। मया किं कुर्वता। एषां जगन्मान्यानां षट्कायगोपालानां सूरीणामागमे आगमने मन्नगरसमीपे समवसरणे प्राभृतवत् ढौकनमिव प्राक् पूर्वं किं कार्यं विधेयम्। कर्तव्यमित्यर्थः। इत्यमुना प्रकारेण चित्ते स्वमनसि चिन्तयता विचारयता॥ इति नवरोजनामामारिप्रदानं गुरोः॥

શ્લોકાર્થ

હે આચાર્યદેવ, પૃથ્વી ઉપર ક્રીડા કરવામાં કૌતુકી એવા મેં જગતપૂજ્ય એવા આપના આગમન સમયે ભેટણારૂપ કંઈપણ કરવું જોઈએ, એમ વિચારીને મેં સેવકો દ્વારા રોજાના નવ દિવસોમાં આ 'અમારિ પ્રવર્તન' કરાવ્યું હતું. ॥ ૨૦૨ ॥

आघाटनगरक्षोणीशक्रेणेव तपा इति।
द्वादशाब्दाचाम्लकर्तुर्जगच्चन्द्रव्रतीशितुः॥ २०३॥

यथा दफरखानेन स्तम्भतीर्थे प्रमोदतः ।
मुनिसुन्दरसूरीन्दोर्वादिगोकुलसंकटः ॥ २०४ ॥

गुणश्रेणीमणीसिन्धोः श्रीहीरविजयप्रभोः ।
जगद्गुरुरिदं तेन बिरुदं प्रददे तदा ॥ २०५ ॥

तदा तस्मिन्नवसरे तेन प्रमुदितेनाकब्बरसाहिना शमदमार्जवामार्दवादीनां गुणानां श्रेण्य एव मण्यो रत्नानि तेषां सिन्धोः समुद्रस्य श्रीहीरविजयाभिधानस्य प्रभोः सूरीन्द्रस्य अयं जगद्गुरुरिदं बिरुदं प्रसिद्धिकृन्नामविशेषं प्रददे दीयते स्म दत्तम् । केनेव । आघाटनगरक्षोणीशक्रेणेव । यथाधुना 'आहड' इति प्रसिद्धस्य मेदपाटमण्डलमण्डनस्याघाटनगरस्य क्षोणीशक्रेण भूमीन्द्रेण राणकेन द्वादशसंख्याकानि वत्सराणि यावत् आचाम्लानां तपोविशेषाणां कर्तुः कारकस्य जगच्चन्द्रनाम्नो व्रतीशितुः सूरिराजस्य तपा इति बिरुदं ददे । पुनः केनेव । दफरखानेनेव । यथा स्तम्भतीर्थे तन्नगरनायकेन दफरनाम्ना खानेन यवनाधिपतिना प्रमोदतो हर्षातिशयतः सहस्रावधानिनो मुनिसुन्दरनाम्न सूरीन्दोराचार्यचन्द्रस्य वादिगोकुलसंकट इति बिरुदं दत्तम् ॥ त्रिभिर्विशेषकम् ॥ इति जगद्गुरुबिरुदम् ॥

શ્લોકાર્થ

જેમ પૂર્વે મેવાડદેશમાં આવેલા "આહડ" નામના નગરનાં રાણાએ બાર વર્ષ પર્યંત આયંબિલતપ કરનારા જગચ્ચન્દ્રસૂરિને "તપા" નામનું બિરૂદ અર્પણ કર્યું હતું, અને સ્તંભન તીર્થના દફરખાન રાજાએ હર્ષથી સહસ્રાવધાની મુનિસુંદરસૂરિજીને "વાદિગોકુલસંકટ" નામનું બિરૂદ અર્પણ કર્યું હતું, તેમ તે અવસરે અત્યંત ખૂશ થયેલા અકબરે ગુણરત્નસાગર હીરવિજયસૂરિજીને "જગદ્ગુરૂ"નું બિરૂદ અર્પણ કર્યું.
॥ २०३ ॥ २०४ ॥ २०५ ॥

नीत्वास्तोकान्बन्दीलोकाञ्श्रीमत्सूरेः पादोपान्ते ।
प्रोज्झांचक्रे क्षोणीशक्रो देहीवांहोव्यूहांस्तीर्थे ॥ २०६ ॥

क्षोणीशक्रोऽकब्बरसाहिः श्रीमान् साहिविहितसंमानदानकुललक्ष्मीकलितो हीरविजयनामा सूरिस्तस्य पादोपान्ते चरणसमीपे नीत्वा आनीय अस्तोकान् बहून् बन्दीलोकान् कारागारनिक्षिप्तजनान् प्रोज्झांचक्रे बन्दीतो निष्करदण्डान् कृत्वा मुत्कलान् मुञ्चति स्म । क इव । देहीव यथा भव्यजीवस्तीर्थे श्रीशत्रुंजये अन्यतीर्थे वा अंहोव्यूहान्निजदुरितसंघातान्मुञ्चति निष्पापो भवेत् ॥

શ્લોકાર્થ

જેમ ભવ્યજીવો તીર્થસ્થાનમાં પોતાનાં પાપકર્મોથી મુક્ત બને તેમ અકબરે શ્રી હીરવિજયસુરિજીનાં ચરણે લાવીને ઘણા બંદીજનો (કેદીઓ)ને મુક્ત કર્યા. ॥ ૨૦૬ ॥

प्रणम्य ते प्रभोः पदानवीवदन्निदं मुदा ।
मुनीन्द्र नन्दताच्चिरं सुवर्णसानुमानिव ॥ २०७ ॥

ते बन्दीलोकाः प्रभोर्हीरसूरेः पदान् । पूज्यत्वाद्बहुवचनम् । चरणान्प्रणम्य स्वस्वशिरसा संस्पृष्ट्वा मुदा प्रमोदेन कृत्वा इदमेवंविधमवीवदन् अतिशयेन बाढस्वरेण वा वदन्ति स्म । इदं किम् । हे मुनीन्द्र, चिरादस्माकं कारागारनरककुहकनिपातिनामुद्धारकारक त्वं गुरो, चिरं गलितावधिसमयं यावन्नन्दतात् समृद्धिमान् भव जीव चिरस्थायी भव । क इव । सुवर्णसानुमानिव । यथा मेरुगिरिः कल्पवृक्षादिसमृद्धिमांस्तथा शाश्वतस्थायुकोऽस्ति तथा त्वमपि भूयाः ॥ इति बन्दीमोचनम् ॥

શ્લોકાર્થ

તે બંદીજનો હીરવિજયસુરિજીનાં ચરણોને નમસ્કાર કરીને, સ્પર્શ કરીને, હર્ષિત થઈને મોટા સ્વરે બોલ્યા : હે પ્રભો, અંધકૂપસમાન કારાવાસમાંથી અમારો ઉદ્ધાર કરનાર હે મુનીન્દ્ર, આપ ચિરકાળ સમૃદ્ધિવાન બનો ! આપ મેરૂની જેમ દીર્ઘાયુ (શાશ્વતાયુ) બનો ! ॥ ૨૦૭ ॥

उत्थाय निशीथिन्यां प्रभुपार्श्वात्पक्षिणां विमुक्तिकृते ।
डावरसरसि स गतवान्धनविजयं सार्धमादाय ॥ २०८ ॥

सोऽकब्बरसाहिः प्रभुपार्श्वात् श्रीहीरविजयसूरीन्द्रस्य संनिधानानादुत्थाय पक्षिणां केलिकुतूहलकृते स्वयंरक्षितानां विविधविहंगमानां विमुक्तिकृते स्वयमेव विमोचनार्थं धनविजयनामानं सूरिसचिवं सार्धं स्वेन सममादाय सूरीणां बिम्बार्थं गृहीत्वा डावरनाम्नि सरसि तटाके गतवान् जगाम ॥

શ્લોકાર્થ

અકબર આચાર્યદેવ પાસેથી ઊઠીને ક્રીડાર્થે રક્ષણ કરાયેલા પક્ષીઓને મુક્ત કરવા માટે આચાર્યદેવના પ્રતિનિધિરૂપ ધનવિજય નામનાં શિષ્યની સાથે ડાબર સરોવર તરફ ગયા. ॥ ૨૦૮ ॥

पक्षिणस्तत्क्षणात्क्षोणिचक्रेन्दुना पञ्जरेभ्यो विमुक्ताः समस्ता अपि ।
प्राप्नवन्तः स्वनीडद्रुमान्धन्विना कार्मुकेभ्यः शरव्यं पृषत्का इव ॥ २०९ ॥

क्षोणिचक्रेन्दुना मेदिनीमण्डलचन्द्रेण पञ्जरेभ्यः पक्षिरक्षणकाष्ठमयादिस्थानकेभ्यः तत्क्षणात्सरोगमनानन्तरकालं निशीथिन्यां वा विमुक्ता मोक्षं प्रापिताः सन्तः मुकुलीकृताः सन्तः समस्ताः सर्वेऽपि पक्षिणो नैकजातिशकुन्ताः स्वनीडद्रुमान् निजालयकुलायस्थानद्रुमान् प्राप्नवन्तः समाश्रितान् केषांचित्स्थानतरवः परेषां तु भाविनः भाविनि भूतोपचारस्तु वर्तते एव । के इव । पृषत्का इव । यथा धन्विना धनुर्धरेण कार्मुकेभ्यः कोदण्डेभ्यः पृषत्काः शराः क्षिप्ताः सन्तः शरव्यं लक्ष्यं वेध्यं प्राप्नुवन्ति ॥

श्लोकार्थ

જેમ ધનુર્ધારી પુરુષે ધનુષ્યમાંથી ફેંકેલાં બાણો લક્ષ્યને પ્રાપ્ત કરે તેમ અકબર બાદશાહે પાંજરાઓમાંથી મુક્ત કરેલાં પક્ષીઓ ક્ષણમાત્રમાં પોતપોતાના માળા, વૃક્ષો આદિ પ્રાપ્ત કરનારાં બન્યાં. ॥ २०९ ॥

तेऽपि पत्नीपरीरम्भिणो भाषितैर्बिभ्रतः संमदं सूरिमित्यूचिरे ।
त्वद्‌गिरास्माभिरापे यथा निर्वृतिस्त्वं लभस्वाशिषा नस्तथा निर्वृतिम् ॥ २१० ॥

पत्नीं स्वजायां पक्षिणीं परीरम्भन्ते आलिङ्गन्ति इत्येवंशीलास्ते पक्षिणोऽपि संमदं बन्धनागमनात्परमानन्दं बिभ्रतो हृदि धारयन्तः सन्तः भाषितैः स्वस्वभाषाभिः सूरिं हीरविजययतीन्द्रमित्यमुना प्रकारेण ऊचिरे प्रोक्तवन्तः । इति किम् । हे प्रभो, यथा येन प्रकारेण त्वद्गिरा श्रीमदीयया वाचा वचनेन अस्माभिर्निर्वृतिं स्वैरं संचारितारूपं सुखमापे प्राप्तं लब्धम् । तथा तेन प्रकारेण अस्माकमाशिषा मङ्गलशंसकवाचा त्वं निर्वृतिं मानसिकं सौख्यं मुक्तिसुखं च लभस्व प्राप्नुहि । प्रायोऽव्यक्तानामाशीर्वाक् फलेग्रहिर्भवेत्तेनावश्यं त्वं निर्वृतिं लप्स्यसे ॥ इति पक्षिमोचनम् ॥

श्लोकार्थ

પોતાની પક્ષિણીઓને આલિંગન કરી રહેલાં પક્ષીઓ અત્યંત આનંદને ધારણ કરતાં પોતાની ભાષામાં સૂરિજીને આ પ્રકારે કહેતા હતા : હે પ્રભો, આપની વાણીથી અમને મુક્તિ પ્રાપ્ત થઈ તેમ અમારી આશિષથી આપ પણ મુક્તિ (મોક્ષ) પ્રાપ્ત કરો ! ॥ २१० ॥

त्रिजगज्जनगीयमानयानुगतोऽद्वैतयशःश्रियालये ।
भरतावनिभृज्जयश्रिया पुरि चक्रीव ततः स जग्मिवान् ॥ २११ ॥

ततो बन्दीमोचनानन्तरं स हीरविजयसूरिः आलये वसतौ उपाश्रये जग्मिवान् गच्छति स्म। किंभूतः। त्रिजगज्जनैः सुरासुरनरनिकरैर्गीयमानया गानगोचरं नीयमानया अद्वैतया न विद्यते द्वैतं युगलं सदृशोपमानं यस्याः सा तया असाधारणया यशःश्रिया कीर्तिलक्ष्म्या अनुगतः सहितः। क इव। चक्रीव। यथा भरतक्षेत्रस्य अवनिभृतां द्वात्रिंशत्सहस्रपार्थिवानां जयश्रियानुगतः ग्रन्थकर्तुर्भरतक्षेत्रस्थायुकत्वेन भरतक्षेत्रस्यैव नामानीतम्। चक्री चक्रवर्ती भरतादिसार्वभौमः पुरि स्वराजधानीनगरे गच्छति। अत्रापरं पाठान्तरमपि—'त्रिजगज्जनगीयमानयानुगतः सूरिशशी यशःश्रिया। वसतिं सुदृशा नवोढया परिणीतेव ततो व्यभूषयत्॥' त्रैलोक्यलोकगीयमानया यशःश्रिया सहितः सूरिशशी वसतिमालयं व्यभूषयदलंकरोति स्म। यथा परिणेता पाणिग्रहणकर्ता नवोढया तत्कालपरिणीतया सुदृशा मृगलोचनया सहितो वसतिं वाससौधं विभूषयति॥

શ્લોકાર્થ

જેમ બત્રીસ હજાર મુગટબદ્ધ રાજાઓની જયલક્ષ્મીથી અનુસરાતા ભરત ચક્રવર્તી પોતાની રાજધાનીને શોભાવે, નવપરિણીતપતિ નવોઢા સ્ત્રી સહિત વાસગૃહને શોભાવે તેમ જગતનાં સુર, અસુર અને માનવો વડે ગવાઈ રહેલા અસાધારણ યશરૂપી લક્ષ્મી વડે અનુસરાતા આચાર્યદેવ ઉપાશ્રયમાં પધાર્યા. ॥ ૨૧૧ ॥

अथामारिप्रवर्तनम्—

पावर्तयत्पुनर्भुवो भास्वानमारिमङ्गिनाम्।
मूर्धाभिषिक्तवन्निजामाज्ञामशेषमण्डले ॥ २१२ ॥

भुवो भास्वान् अत्युत्कटप्रतापवत्त्वेन प्रतिपक्षक्षोणीक्षिल्लक्षाणां कल्पान्तकालोद्दण्डचण्डमार्तण्डमण्डलवदुःसहोऽकब्बरसाहिः पुनर्हीरविजयसूरेरालये पादावधारणानन्तरं स्वयं च अशेषमण्डले स्वायत्तीकृतसमस्तजनपदव्रजे अशेषाश्च ते मण्डलाश्चाशेषमण्डलाः, अशेषमण्डलानां मण्डलमशेषमण्डलम्। 'सरूपाणामेकशेषः', सरूपाणां सदृशानां शब्दानां मध्ये एक एव शिष्यते रक्ष्यते नान्य इति एकमण्डलशब्दस्य लोपः। अथ वा मध्यमपदलोपी समासः शाकपार्थिवादिवत्। अङ्गिनां प्राणिनाममारिं वधनिषेधं प्रावर्तयत् प्रवर्तयति स्म। किंवत्। मूर्धाभिषिक्तवत्। यथा श्रेष्ठिसेनापतिसचिवपुरोहितसामन्तादिभिरभिषिक्तः सप्ताङ्गराज्याधिपतिबलन्यायशक्तिकलितः पृथ्वीपतिरशेषमण्डले निजामात्मीयपितृप्रदत्ते निखिले देशे आज्ञां प्रवर्तयति॥

શ્લોકાર્થ

ત્યાર પછી સપ્તાંગરાજ્યનો અધિપતિ છત્રપતિ રાજા સમસ્ત દેશોમાં પોતાની આજ્ઞા પ્રવર્તાવે તેમ અકબર બાદશાહે પોતાના સમસ્ત દેશોમાં જીવોની અમારિનું (જીવરક્ષાનું) પ્રવર્તન કર્યું. ॥ ૨૧૨ ॥

तत्र च व्यतिकरेऽटवीवियद्वारिचारियुवजानिजन्मिनाम् ।
संकथा विरहदाववारिमुग्मालिका इव मिथोऽत्र जज्ञिरे ॥ २१३ ॥

च पुनरमारिः प्रवर्तिता, अथ च सकलसत्त्वानां मिथश्च वार्ता प्रवृत्ता इति चशब्दार्थः । तत्र च व्यतिकरे तस्मिन्नेवामारिप्रवर्तनसमये अत्राकब्बरभूमण्डले जगति वा अटव्यामरण्ये । उपलक्षणाद्वनग्रामादिसंग्रहः । तथा वियति आकाशे, तथा वारिणि सलिले चरन्ति पर्यटन्ति इत्येवंशीलाः एतावता वनचारिणो मृगादयः श्वापदाः । यदुक्तं पाण्डवचरित्रे—'कान्तारेऽत्र कृतान्तोऽपि श्वापदानामनापदाम् । त्वत्पुत्रभीतो नैतेषां प्रभवत्यपमृत्यवे ॥' इति । यद्यपि हैम्याम् ॥ 'पशुस्तिर्यक्चरे हिंस्रेऽस्मिन्व्यालः श्वापदोऽपि' इत्युक्तम्, तथापि अन्यत्र वन्यजीवाः सर्वेऽपि श्वापदा एवोच्यन्ते इति । वियच्चारिणो मयूरादयः पक्षिणः, तथा जलचारिणो मीनादयः, तथा युवतिस्तरुणी जाया पत्नी येषाम् । 'जायाया निङ्' । जायाशब्दस्य निङ्प्रत्ययः । तथा 'लोपो व्योर्वलि' इति सूत्रेण यकारस्य लोपः । पुंवद्भावः स्त्रीप्रत्ययस्य तेर्लोपः । युवजानयः तरुणीस्त्रीकाः तादृशा ये जन्मिनो जीवाः अधिकारात्पुमांसः तेषां मिथः परस्परं स्त्रीभिः सार्धं संकथा वार्ताः । 'त्वत्संकथापि जगतां दुरितानि हन्ति' इति भक्तामरस्तवे । 'संकथा वार्ता' इति तद्वृत्तिः जज्ञिरे जाताः प्रवृत्ताः । उत्प्रेक्ष्यते—विरहः स्त्रीभर्त्रोः इतरेतरं वियोगः स एव दावो दावानलः तत्र वारिमुचां मेघानां मालिका धोरणयः कादम्बिन्य इव ॥

श्लोकार्थ

અમારિ પ્રવર્તન કરાયું અને સમસ્ત પ્રાણીઓની પરસ્પર વાર્તા પણ પ્રવર્તાઈ! અમારિપ્રવર્તન થતાં વનચર, ખેચર અને જલચર તરુણીઓ સહિત તરુણ પ્રાણીઓની પરસ્પર વાર્તા પ્રવર્તી. તે જાણે પતિપત્નીના પરસ્પરના વિરહરૂપી દાવાનલને શાંત કરવા માટેની મેઘમાળા ન હોય! ॥ ૨૧૩ ॥

अथ प्रथमं वनचारिणां वार्ता—

काप्याचख्यौ प्रियमिति करिणी किं मत्तो मद्यप इव रमसे ।
नो जानीषे मृगयुमिव नृपं हन्तारं तद्व्रज गज गहनम् ॥ २१४ ॥

कापि अनिर्दिष्टनामा करिणी हस्तिनी प्रियं करिणमित्यमुना प्रकारेण आचख्यौ वदति स्म । किमाचख्यौ तदेवाह—हे प्रिय हस्तिन्, मद्यपो मदिरापायीव मत्तोऽतिक्षीबः सन् रमसे मया सह क्रीडसि यद्यस्मात्कारणात् त्वं मृगयुमिव प्रबलाखेटककारिणममुं नृपमकब्बरसाहिं ते तव हन्तारं घातकं नो जानीषे नो वेत्सि काकूक्त्या । तत्तस्मात्कारणात् हे गज 'जीवन्नरो भद्रशतानि पश्येत्' इति वचनात् गहनं गिरिगह्वरं प्रति व्रज मारणभयात्प्रणश्य याहि ॥

श्लोकार्थ

પ્રથમ વનચર જીવોની વાર્તા કહે છે :

કોઈ હાથણી પોતાના પ્રિય હાથીને આ પ્રમાણે કહે છે કે : 'હે સ્વામિન્, મદિરાપાન કરનાર દારૂડિયાની જેમ મદોન્મત્ત બનીને મારી સાથે શું રમે છે? તું જાણતો નથી મહાશિકારી એવો અકબર બાદશાહ તારો વધ કરશે? તે માટે હે ગજ, તું કોઈ કે અગોચર વનમાં ચાલ્યો જા.' ॥ २१४ ॥

सोऽप्यवक्करिणि मा बिभीहि नः सूरिशासनवशान्न हन्ति सः ।
किं त्वनेकपतयो रणेषु मद्गोत्रिणामुपकृतिस्मृतेरिव ॥ २१५ ॥

सोऽपि गजोऽपि अवक् व्याचष्टे आख्यातवान् । हे करिणि, भीरुत्वात् भीरुकस्वभावत्वात् च मा बिभीहि मनसि भयं मा नय । सः अकब्बरः सूरेर्हीरविजयगुरोः शासनस्योपदेशस्य वशादायत्तत्वान्नोऽस्मान्न नैव हन्ति व्यापादयति । उत्प्रेक्ष्यते—अनेकान् बहून् पाति रक्षतीत्यनेकपस्तत्त्वेनैव उताथ वा रणेषु संग्रामाङ्गणेषु मद्गोत्रिणां मद्वंश्यानां मदेकवंशानां वा गजानामुपकृतेः परदलविदलनाद्युपकारस्य स्मृतेः संस्मरणादिव ॥ इति गजमिथुनालापः ॥

श्लोकार्थ

ત્યાર પછી હાથીએ કહ્યું કે : હાથણી, ડરપોક એવી તું ભય ના પામ. કારણ કે અકબર હીરવિજયસૂરિની આજ્ઞાને આધીન હોવાથી અમારો વધ કરશે નહીં. વળી તે અનેક પ્રાણીઓનો રક્ષણ કરનાર છે; વળી રણસંગ્રામમાં મારા વંશજ હાથીઓ વડે કરાયેલા ઉપકારની સ્મૃતિથી જ અમારો વધ નહીં કરે! ॥ २१५ ॥

इति काचिदुवाच हयद्विषती प्रमदं प्रिय मुञ्च सचिन्त इव ।
भुजमूर्धविरोधितयेव यतः प्रणिहन्तुमना अयमेति नृपः ॥ २१६ ॥

काचित् हयद्विषती वनखण्डमहिषी । 'महिषो यमवाहनः । रजस्वलो वाहरिपुः' इति हैम्याम् । इत्यमुना प्रकारेण उवाच भाषते स्म । इति किम् । हे महिष प्रिय, सचिन्त इवात्यार्तियुक्त इव प्रमदमानन्दं मुञ्च त्यज । यतः कारणात् प्रणिहन्तुमनाः त्वां घातयितुकामः अयमतिभयात्प्रत्यक्ष इव लक्ष्यते साक्षादकब्बरः नृपो राजा समेत्यायाति । उत्प्रेक्ष्यते—भुजमूर्धविरोधितया स्कन्धश्रीस्पर्धोद्भूतवैरित्वेनेव । 'स्कन्धयो वृषरक्ताक्षस्कन्धोपमः' इति काव्यकल्पलतायाम् ॥

श्લोકार्थ

વનખંડની મહિષીએ મહિષને કહ્યું કે 'હે પ્રિય મહિષ, ચિંતાતુર માણસની જેમ તું આનંદનો ત્યાગ કર. કારણ કે પ્રાણીઓનો વધ કરવામાં તત્પર એવો અકબર આવ્યો લાગે છે, જાણે સ્કંધની શોભા સાથે સ્પર્ધા કરવાથી ઉત્પન્ન થયેલા વૈરભાવને કારણે તને હણવા માટે જ આવેલો ન હોય ! ॥ ૨૧૬ ॥

इत्यवक्सोऽपि कान्तेऽधृतिं भूपतेर्मा कृथा यन्निदेशेन सूरीशितुः ।
सोऽप्यवद्येन नश्चक्षुषा नेक्षते यानभावेन बिभ्यत्कृतान्तादिव ॥ २१७ ॥

सोऽपि हयद्विषन् महिषोऽपि इत्यमुना प्रकारेण अवक् जगाद । हे कान्ते सैरभि, भूपतेरकब्बरात्सकाशादधृतिमस्वास्थ्यम् । भीतिमित्यर्थः । मा कृथा मा कुर्याः । 'माङि लुङ्,' माङ्योगे लुङ् स्यात् । 'मा कार्षीत् । लुङ्शब्देन भूते सिः' इति प्रक्रियाकौमुद्याम् । तथा च हेमचन्द्रः—'मा कार्षीत्कोऽपि पापानि मा च भूः कोऽपि दुःखितः' इति वचनाद्भविष्यदर्थे भूते सिप्रयोगः । यत् यस्मात्कारणात् सूरीशितुः हीरविजयसूरीन्द्रस्य निदेशेनानुशिष्ट्या नोऽस्मानवद्येन पापेनासमीचीनेन चक्षुषा नेत्रेण नेक्षते न पश्यति किं पुनर्वधेच्छया तन्मा शङ्कस्व । उत्प्रेक्ष्यते—यानभावेन वाहनत्वेन कृतान्ताद्बिभ्यदिव । स्ववाहनपरिभवं विभाव्य ममोपरि मा कुप्यादित्यन्तकाद्भयं प्राप्नुवन्निव ॥ इति महिषमिथुनालापः ॥

શ્લોકાર્થ

ત્યારે મહિષે કહ્યું કે : 'હે પ્રિય મહિષી, તું હવે અકબર તરફથી ભય ના રાખ, કારણ કે અકબર હીરવિજયસૂરિના ઉપદેશથી પાપની સામે પણ જોતો નથી, તો અમારા વધની શંકા શું કરવી ! વળી, હું યમના વાહનરૂપે હોવાથી યમરાજાના ભયથી પણ એ મારો વધ કરી શકે નહીં. ॥ ૧૧૭ ॥

कापि प्रियं वदति वारणवैरिणीति
शेषे सुखं कथमहो गिरिगह्वरेषु ।
हन्ता नृपस्तव कलत्रकलत्रलक्ष्मी-
स्पर्धाक्रुधा निजगजारितयाथ वा किम् ॥ २१८ ॥

कापि वारणवैरिणी गजद्वेषिणी सिंही प्रियं स्वभर्तारं पञ्चाननं प्रति इति वदति । इति किम् । अहो कान्त केसरिन्, गिरिगह्वरेषु भूधराणां कंदरेषु घननिकुञ्जेषु वा यथा स्यात्तथा कथं केन प्रकारेण शेषे स्वपिषि । यस्मादित्यधिकारात्प्राक्तनमेव सर्वत्र गृह्यते ।

कारणान्नृपोऽकब्बरो मृगयारसिकतया तव भवतो हन्ता घातको व्यापादयिता वर्तते । उत्प्रेक्ष्यते—कलत्राणां स्वपत्नीनां कलत्रलक्ष्म्या कटितटीश्रिया सह स्पर्धा संघर्षस्तस्यास्तया वा या क्रुध कोपस्तेन किम् अथ वा निजा आत्मीया ये गजा रणकरणधुरीणा वारणास्तेषामरित्वेन किं शत्रुभावेनेव ॥

श्लोकार्थ

वळी, कोई सिंहण सिंह तरफ बोली : 'हे प्रिय केसरी, तुं पर्वतनी गुफामां सुखपूर्वक सूई जा. कारण के शिकारनो रसिक राजा अकबर तारो घात करशे. तुं अकबरनी पत्नीओनां कटी प्रदेशनी साथे स्पर्धा करतो होवाथी अथवा तेनां रणशूर हाथीओनो तुं दुश्मन होवाथी तारा प्रत्येना वैरभावथी पण ए तारो घात करशे.' ॥ २१८ ॥

सिंहोऽप्याख्यत्कुरु मा भीरु भीतिं नायं हन्ति व्रतिशार्दूलशास्त्या ।
यद्वा शौर्याद्दलितद्वेषिनागान्हन्यादुच्चैःशिरसः संश्रितान्कः ॥ २१९ ॥

सिंहः कण्ठीरवोऽपि आख्यद्बभाषे । हे भीरु हे कान्ते केसरिणि, त्वं भीतिमातङ्कं मा कुरु। 'पिव वोदच चारुलोचने यदतीतं वरगात्रि तद्गतम् । न हि भीरु गतं निवर्तते समुदायमात्रमिदं कलेवरम् (?) ॥' इत्युत्तराध्ययनवृत्तौ । यस्माद्धेतोर्व्रतिशार्दूलस्य मुनिपञ्चाननस्य हीरगुरोः शास्त्या आज्ञया शिक्षया वा अयं साहिः अस्मान्न हन्ति न घातयति । यद्वा अथ वा वधविधानाभावे हेतुमप्याह—शौर्यान्निजशूरत्वेन दलिता व्यापादिता द्वेषिषु विपक्षेषु नागा मुख्या ये द्वेषिणो निजनिकृन्तनजनितामितद्वेषित्वेन वैरिणो नागा हस्तिनो यैस्तान् तथा उच्चैःशिरसो महात्मनो महर्धिकान्वा पर्वतांश्च तुङ्गशृङ्गान् शैलांश्च संश्रितान् पृष्ठलग्नान् सेवमानान् वा को हन्यात्कोऽपि व्यापादयेत् । अपि न कोऽपि । यदुक्तं भक्तामरस्तवे—'हरिणाधिपोऽपि नाक्रामति क्रमयुगाचलसंश्रितं ते' ॥

श्लोकार्थ

त्यारे सिंह बोल्यो : हे भीरु सिंहण, तुं भय ना पाम. कारण के मुनिपंचानन (सिंह) हीरविजयसूरिनी आज्ञाथी ते अकबर अमारो वध नहीं करे. वळी, पोताना शौर्यथी जेणे शत्रु हाथीओने हणी नाख्या छे तेमज मोटा पुरुषना मस्तके रहेला अथवा पर्वतनी टोचे रहेला एवा अमारो वध करनार ए अकबर कोण छे ? ॥ २१९ ॥

वपुषा कुरुषे किमभ्यसूयां स्मयमानासनशाखिशाखया त्वम् ।
किमवैषि न भूपैति हन्तुं दयितं द्वीपिनमित्युवाच काचित् ॥ २२० ॥

काचिद्व्याघ्री दयितं स्वभर्तारं द्वीपिनं व्याघ्रमित्युवाच इति जजल्प। इति किम्। हे नाथ द्वीपिन्, स्मयमाना विकसन्तो ये असनशाखिनः पीतसाला 'बीउ' इति नाम्ना सिद्धास्तरवस्तेषां शाखया सह वपुषा स्वशरीरेण किमभ्यसूयामीर्ष्यां कुरुषे। असनशाखानां व्याघ्रस्य तुल्यत्वेनोपमानं दृश्यते। यथा रघुवंशे—'व्याघ्रानभी०। फुल्लासनाग्रविटपानिव' इति। किमिति प्रश्ने। हे द्वीपिन्, त्वं किं नावैषि न जानासि। यत्कारणादकब्बरभूभृत् पृथ्वीपुरंदरः साहिस्त्वां हन्तुमेत्यागच्छति॥

श्लोकार्थ

કોઈ વાઘણે પોતાના પતિ વાઘને કહ્યું : હે પ્રિય સ્વામી, વિકસ્વર એવા પીતસાલાવીકે નામના વૃક્ષની પિત્તવર્ણી શાખા સાથે પોતાનાં શરીર વડે ઈર્ષા કેમ ધારણ કરે છે! તું નથી જાણતો કે અકબર બાદશાહ તારો શિકાર કરવા માટે આવ્યો છે! ॥ २२० ॥

रमस्वससुखं योषे यदस्मान्न हन्ति यतिजम्भारेर्गिरा सः।
मुदा पिबति यन्मां पुण्डरीकं सुदृष्टिरिव शैलं पुण्डरीकम् ॥ २२१ ॥

व्याघ्रीपतिरपि स्वां द्वीपिनीं प्रियां प्रत्युवाचेति संबन्धः। हे योषे द्वीपिनि व्याघ्रि, सह सुखेन वर्तते यत्तत्ससुखं सौख्यसहितं तथा स्यात्तथा रमस्व स्वेच्छया मया सह विलासं विधेहि। यत्कारणात्सोऽकब्बरसाहिः यतिजम्भारेर्मुनिमघोनः गिरा वाचा अस्मानात्मनां यावज्जातीनं हन्ति न हिनस्ति। हे व्याघ्रि कान्ते, असौ क्षोणीन्द्रः तत्सूरिवाक्प्रपञ्चैककारणान्मां पुण्डरीकं मुदा हर्षेण मच्चेष्टाशौर्याद्यवेक्षणोद्भूतप्रमोदेन पिबति। अथ वा गर्भितोपमा। पुण्डरीकमिव सिताम्भोजमिव अग्निदिग्गजमिव स्मितसहकारमिव वा इक्षुविशेषमिव वा ऋषभस्वामिप्रथमगणधरमिव वा भव्यः सादरं पश्यति। 'पुण्डकं सिताम्बुजे सितच्छत्रे च भेषजे।' 'पुण्डरीकोऽग्निदिग्गजे सहकारे णधरे राजलाहौ जगत्वरे गजज्वरेऽपि प्रत्यन्तरे' इत्यवचूर्णो। 'कौशिकान्तरे व्याघ्रे इत्यनेकार्थः। क इव। सुदृष्टिरिव। यथा सम्यग्दर्शनवान् श्राद्धः पुण्डरीकं शैलं शत्रुंजयं पर्वतं प्रोत्या पिबति गच्छन्नागच्छन् वलितग्रीवं मुहुर्मुहुरतृप्त इव प्रेक्षते। चैत्रपूर्णिमायां पञ्चकोटीमुनिपरिवृतपुण्डरीकगणधरस्य मोक्षगमनात्। पुण्डरीक इति नामाद्रिरप्यासीत्। तथा च हैमनाममालायाम्—'अथ व्याघ्रो द्वीपी शार्दूलचित्रकौ। चित्रकायः पुण्डरीकः' इत्येकार्थान्येव नामानि दृश्यन्ते। वृत्तावपि तथैव व्याख्यानात्। तथा च शत्रुंजयकल्पे शत्रुंजयनामसु—'विमलगिरिमुत्तनिलउत्तिसिद्धिसिद्धखित्तपुण्डरिउ' इति॥ इति व्याघ्रमिथुनालापः॥

श्लोकार्थ

ત્યારે વાઘે પોતાની પ્રિયા વાઘણને કહ્યું : હે ડરપોક પ્રિયા, તું શાંતિથી રહે, અને મારી સાથે સ્વેચ્છાપૂર્વક ક્રીડા કર. કારણ કે સૂરીન્દ્રની વાણીથી અકબર મને હણશે

નહીં, પરંતુ જેમ સમ્યક્દષ્ટિ જીવ પુંડરિકગિરિને (ચૈત્રીપૂર્ણિમાના દિવસે પાંચક્રોડ મુનિઓ સાથે પરિવરેલા પુંડરિકગણધરનું મોક્ષગમન થયું હોવાથી શત્રુંજયપર્વતનું બીજું નામ 'પુંડરિકગિરિ' પણ છે.) વારંવાર નીરખે તેમ અકબર પુંડરિક એવા મને સ્નેહાળ-દૃષ્ટિથી જોશે. ॥ ૨૨૧ ॥

पोत्रिणी वदति काचन दयितं किं निखेलसि निषद्वर सुखितः ।
रुद्र एष निहनिष्यति मखवत्त्वां विचिन्तय तदायतिकुशलम् ॥ २२२ ॥

काचन पोत्रिणी काननसूकरी दयितं वनसूकरं प्रति वदति । किं वक्ति तदेवाह–हे वराह निषद्वर जम्बाल, सुखितः सौख्ययुक्तः सन् कथं निखेलसि मया समं स्वैरं क्रीडां कुरुषे । यत्कारणादेष प्रत्यक्षः प्रत्यहमाखेटकागमनेन स्मृतिगोचरीकरणात्प्रत्यक्ष एव लक्ष्यते । आगतोऽकब्बरः रुद्रश्चण्डस्त्वां सुखनिखेलिनं भवन्तं निहनिष्यति नितरां घातयिष्यति मृगयाक्रीडारसावेशात्किमप्यगणयन्प्रमथयिष्यति । किंवत् । मखवत् । यथा रुद्रेण शंभुना मखो नाम दैत्यविशेषो निहतः । तत्तस्मात्कारणात् त्वमायतिकुशलमुत्तरकाले दीर्घदर्शिताभित्याग्रे आत्मनः कुशलं चिरजीवितां निर्विघ्नतां विचिन्तय विमृश ॥

શ્લોકાર્થ

કોઈ જંગલી ભૂંડણ ભૂંડને કહેવા લાગી કે: હે પ્રિય વરાહ, તું સુખમગ્ન થઈને મારી સાથે સ્વેચ્છાપૂર્વક કેમ ક્રીડા કરી રહ્યો છે! જો જો, આ પેલો પ્રચંડ શિકારી અકબર આવેલો દેખાય છે, જેમ રૂદ્રે 'મખ' નામના દૈત્યને હણી નાખ્યો હતો તેમ તારો એક ક્ષણમાત્રમાં જ તે વધ કરશે. માટે ભવિષ્યની કુશળતાનો તો વિચાર કર. ॥ ૨૨૨ ॥

पातालावटकोटरान्तरपतत्पाथोधिनेमिर्मया
दंष्ट्रायां यदधारि धेनुकभिदो भागीभवद्वर्ष्मणा ।
भूभृत्त्वादिव गोत्रिणं न मिनुयाद्धात्रीधरः पोत्रिणि
श्रीमत्सूरिगिरा शुभंयुरिव तत्स्वैरं चरेत्याह सः ॥ २२३ ॥

स पोत्री पोत्रिणीमित्याह ब्रूते स्म । इति किम् । हे पोत्रिणि वराहि, तत्कारणात् शुभंयुः शुभसंयुक्ता कल्याणवती त्वं स्वैरं स्वेच्छया चर संचर । इतस्ततो याहि कंदान्मुस्तांश्च खाद भक्षय । यद्यस्मात्कारणात् हे पोत्रिणि सूकरि, श्रीमत्सूरिगिरा श्रीहीरविजयसूरिवाचा धात्रीधरोऽकब्बरो मां न मिनुयान्न घातयेत् । उत्प्रेक्ष्यते—भूभृत्त्वात् धरणीधारकत्वात् गोत्रिणं स्वजनमिव । यतो महात्मा सर्वथा स्वशक्त्या स्वजनं रक्षतीति

रीतिः । अथ भूभृत्त्वमेव दर्शयति—यत्कारणात् पातालमधोलोकः स एवावटः कूपः तस्य कोटरेऽधोभागवर्ती महागर्तस्तस्यान्तरे मध्ये पतन्ती यान्ती पाथोधिनेमिरासमुद्रान्तक्षिति-र्धनुकभिदो विष्णोर्भागीभवत् अंशरूपेण जायमानं वर्ष्म शरीरं यस्य तादृशेन मया महीवराहरूपेण दंष्ट्रायां दाढामध्ये अधारि । श्रूयते च शास्त्रे—पुरा पातालं प्रविशन्ती क्षितिर्विष्णुना वराहरूपेण स्वदंष्ट्रायां धृता इति ॥ इति वराहमिथुनालापः ॥

श्लोकार्थ

કલ્યાણમતી એવી હે વરાહી, તું સ્વેચ્છાપૂર્વક મારી સાથે રમ. કારણ કે હીરવિજયસૂરિની વાણીથી અકબર મારો વધ કરશે નહીં, તેમજ પાતાળરૂપી કૂવામાં પડતી સમુદ્રપર્યંતની પૃથ્વીને વિષ્ણુના અંશરૂપે જેનું શરીર ઉત્પન્ન થયું છે, એવા મેં મારી દાઢામાં ધારણ કરી હતી. (કહ્યું છે કે : પૂર્વે પાતાળમાં પ્રવેશ કરતી પૃથ્વીને વિષ્ણુએ વરાહરૂપે પોતાની દાઢામાં ધારણ કરી હતી.) તેથી અકબરરાજા સમાનગોત્રીની જેમ મારું રક્ષણ કરશે. ॥ ૨૨૩ ॥

इति पृषती शंसति दयितं स्वं किमु जितकासीव विगतभीतिः ।
स्वयुवतिजङ्घाप्रतिभटभावादिव तव हन्ता यदवनिकान्तः ॥ २२४ ॥

पृषती मृगीविशेषा स्वं दयितं प्रेयांसमात्मीयं पृषतं प्रति शंसति कथयति । इति किम् । हे प्रिय, त्वं जितकासीव जिताहवः विजयीव किमु कथं विगतभीतिर्निर्मुक्तभयो वर्तसे । यत्कारणादवनिकान्तोऽकब्बरसाहिः तव भवतो हन्ता व्यापादयितास्ते । मृगयुत्वेन त्वां हनिष्यतीत्यर्थः । उत्प्रेक्ष्यते—स्वस्यात्मनो युवतीनां तरुणीनां स्त्रीणां जङ्घानां प्रतिभटभावाद्वैरवैरित्वादिव । जङ्घयो मृगजङ्घोपमा योगशास्त्रवृत्त्यादिष्वास्ते अतस्तदुत्प्रेक्षा । 'पृषतीमस्पृशती तदीक्षणे' इति नैषधे ॥

श्लोकार्थ

કોઈ મૃગલી પોતાના પ્રિયમૃગને કહેતી હતી કે 'હે પ્રિયમૃગ, બહાદુરની જેમ નિર્ભય બનીને કેમ ફરે છે? હમણાં તારો શિકાર કરવા માટે અકબર આવશે. કારણ કે તેની પોતાની પત્નીઓની જંઘા સાથે તું સ્પર્ધા કરતો હોવાથી જરૂર તારો વધ કરશે. ॥ ૨૨૪॥

पृषदिति कान्तां निगदति भूभृद्व्रतिविभुवाचा व्यथयति नास्मान् ।
निजकजनेत्रानयनसखित्वाच्छरणगतत्वादुत किमु राज्ञः ॥ २२५ ॥

पृषन्मृगविशेषः कान्तां स्वप्रियां पृषतीं प्रति इति निगदति जल्पति । पृषत्पृषच्छब्दोऽपि यथा जलबिन्दुवाची 'पृषत्पृषतविप्लुषः बिन्दौ' इति, तथा मृगवाच्यपि दृश्यते ।

यथा 'पृषत्किशोरी कुरुतामसंगतम्' इत्यपि नैषधे। इति किम्। हे प्रिये पृषति, व्रतिविभोर्मुनीन्द्रस्य वाचा वाण्या कृत्वा भूभृद्राजा अस्मान्मृगजातीरपि न व्यथयति नैव पीडयति। उत्प्रेक्ष्यते। निजकजनेत्राणामात्मीयानां कमलदललोचनानां तरुणीनां नयनकर्णान्तायतानां सखित्वान्मित्रत्वादिव। उताथ वा राज्ञः चन्द्रस्य शरणगतत्वात्किमु राज्ञोऽङ्कस्थायुकत्वादिव॥ इति मृगमिथुनालापः। इति वनचराः॥

શ્લોકાર્થ

ત્યારે મૃગ બોલ્યો કે: હે પ્રિયે, સૂરીન્દ્રના ઉપદેશથી અકબરબાદશાહ અમારા કોઈને પણ પીડા કરશે નહીં. પોતાની પદ્મનયના પત્નીઓનો હું મિત્ર હોવાથી (મૃગ સમાન નેત્ર હોવાથી મિત્ર) અને રાજા (ચન્દ્ર)નો શરણાગત હોવાથી પણ એ અમારો વધ કરશે નહીં ॥ ૨૨૫ ॥

कापि मयूरी लपति पतिं किं केकाङ्कितताण्डवकेलीम्।
व्यातनुषे मनुषे नो मानुषपूषणमेनं स्वासहजम्॥ २२६॥

काप्यज्ञाताभिधाना मयूरी केकिनी पतिं स्वभर्तारं प्रति वदति। हे केकिन् प्रिय, केकया शिखण्डिसंबन्धिशब्दविशेषेणाङ्कितां कलितां ताण्डवकेलीं नृत्यविलासं किं कथं व्यातनुषे विस्तारयसि। हे नाथ, एनं मानुषपूषणं मनुजेषु प्रतापवत्त्वेन विभाकरं स्वस्यात्मनोऽसहजं परिपन्थिनं ना मनुषे न जानासि इति काकूक्तिः। अपि तु जानीहि॥

શ્લોકાર્થ

કોઈ મયૂરી પોતાના પતિ મયૂરને કહેતી હતી કે: હે પ્રિયમયૂર, તું કેકારવ શબ્દવાળા નૃત્યનો વિલાસ કેમ કરે છે! તારો શત્રુ પૃથ્વીનો સૂર્ય અકબરને શું તું નથી જાણતો. ॥ ૨૨૬ ॥

विष्टपजीवनवारिधरैरिव मैत्र्याद्वा क्षितिकण्ठतया।
सूरिगिरा न निहन्ति नृपोऽस्मान्मेचकिनोच्यत कान्तेति॥ २२७॥

मेचकिना मयूरेण कान्ता स्वप्रेयसी मयूरी इत्यौच्यत इदं निगद्यते स्म। हे कान्ते हे शिखिनि, सूरेर्हीरविजयगुरोर्गिरा दयोपदेशवाचा नृपः पातिसाहिरस्मान्न निहन्ति नैव यमातिथीकरोति। उत्प्रेक्ष्यते—विष्टपानां जगज्जन्तूनां जीवनैर्जीवितव्यहेतुभिर्वारिधरैर्मेघैः सह मैत्र्यात्सौहार्दादिव। अथ वा शितिकण्ठतया नीलकण्ठत्वेनेश्वरतया इव॥ इति मयूरमिथुनालापः॥

શ્લોકાર્થ

ત્યારે મયૂર પ્રિયતમા મયૂરીને કહે છે: હે મયૂરી, તું નિશ્ચિંત બન, કારણ કે હીરવિજયસૂરિની દયામય વાણીથી, જગતનાં જીવો માટે સંજીવિની ઔષધ સમાન અકબર, મેઘોનો મિત્ર અને નીલકંઠ (ઈશ્વરરૂપ) એવા મારો વધ કરશે નહીં. ॥ ૨૨૭ ॥

ऊचे कापि पिकं पिकीति विरहिव्यामोहजेनांहसा
प्रादुर्भूतमिवावयासि दमनं न क्षोणिसंक्रन्दनम् ।
स स्माहेति गुरोर्गिरा द्विजतयेवासौ स्वलीलावती-
लीलापञ्चमगीतिपाठकतया वास्मान्न हन्ति प्रिये ॥ २२८ ॥

कापि पिकी कोकिला पिकं स्वकान्तं कलकण्ठमित्यूचे भाषितवती । हे जीवितनायक पिक, क्षोणिसंक्रन्दनं भूमिजम्भारारातिमकब्बरं दमनमात्मनां निग्रहयितारं प्रादुर्भूतं प्रकटं जातं नावयासि न वेत्सि । उत्प्रेक्ष्यते—विरहिणां वियोगिनामत्यनुरक्तात्मयुवतीभिः समं विश्लेषवतां प्रवासिनां जनानाम् । अथ वा प्रवासिप्रियापांसुलामहिलालोकानां वा व्यामोहजेन विरहोत्पादनोद्भूतातुच्छमूर्छासंतापजनितेनांहसा । यदुक्तम्—'कोइलिमधुरीभाषिअं ववनि कुहु कुहइ । जसकापिउ परदेसकिहि यडाडहकि हइ ॥ भरभाउंकीरातिनयनझरलइ तुहइ । दाधाउपरिलूणववीहादे तुहइ ॥' इत्युक्तेः । पापेनेवागतं नो जानीषे । यत्स्वैरं मत्तो मया रमसे इति प्रागुक्तादध्याहार्यं तत इत्युक्तेरनन्तरं स वनप्रिय आह स्म अब्रवीत् । हे प्रिये, असौ साहिर्गुरोर्हीरसूरेर्गिरा वाचा अस्मान्न हन्ति न प्रमापयति । उत्प्रेक्ष्यते—द्विजतया ब्राह्मणत्वेनेव । ब्राह्मणो हि लोकेऽवध्यः । चतसृषु हत्यासु प्रथमहत्यात्वेनेति । 'द्विजः पक्षी ब्राह्मणश्च' इत्यनेकार्थः । वाथ वा स्वस्यात्मनो लीलावतीनां विलासिनीनां लीलया विलासेन कलितं यत्पञ्चमरागोपचितगानं पञ्चमध्वनितं तस्य पाठकतया अध्यापकत्वेनेव वा साहिहरिणीदृशः पञ्जरान्तरस्थायुककेलीपिकनिकरमाकन्दमञ्जुमञ्जरीव्रजास्वादोद्घटिताकुण्ठकण्ठकुहरसमुच्चरच्चरुपञ्चमकूजिताकर्णनात्तदनुगुणं गायन्तीत्यर्थः ॥ इति कोकिलमिथुनालापः ॥

શ્લોકાર્થ

વળી, કોઈ કોયલ કોકિલને કહેતી કે: 'હે સ્વામિન, પૃથ્વીનો નિર્વાહ કરનાર અકબરને આપ નથી જાણતા ? વિરહીઓના વ્યામોહથી ઉત્પન્ન થયેલા પાપકર્મથી અકબર જરૂર આપણને હણશે.' કોયલના આવા વચન સાંભળીને કોકિલ બોલ્યો કે: 'હે પ્રિયે આ અકબર હીરવિજયસૂરિના વચનથી અને આપણે દ્વિજ (પક્ષી) બ્રાહ્મણરૂપ હોવાથી આપણો વધ કરશે નહીં. આવી પ્રિયતમા સાથેના વિલાસયુક્ત પંચમરાગનો હું પાઠક હોવાથી પણ મને મારશે નહીં.' ॥ ૨૨૮ ॥

स्वां पत्नीं ताम्रचूडो दरतरलदृशं हन्तुमभ्येति भूमी-
भास्वांस्त्वां मामपीति प्रकटितवचसं धीरयन्नित्यवादीत् ।
मा भूस्त्वं भूरिभीतेर्भवनमिह जगद्बोधकर्तृत्वशक्ति-
व्यक्तिप्रेमातिरेकादिव विभुवचसा ध्वंसते नायमस्मान् ॥ २२९ ॥

ताम्रचूडः कुक्कुटः स्वां स्वकीयां पत्नीं कुक्कुटीं कान्तां धीरयन्नाश्वासयन् सन्नित्यवादीत् निगदितवान् । किंभूतां पत्नीम् । हे प्राणेश्वर हे ताम्रचूड, भूमीभास्वानकब्बरसाहिः त्वामपि पुनर्मामपि हन्तुं कीनाशशकाशं नेतुमभ्येति आगच्छति इत्यमुना प्रकारेण प्रकटितवचसं उदीरितं भर्तुः पुरः कथितं दीनवचनं यया । अत एव पुनः किंभूताम् । दरेण कृतान्तनिकेतातिथीभवनभयेन तरले चपले दृशौ यस्यास्तादृशीम् । धीरां करोति धीरयति इति धीरयन् निर्भयां कुर्वन् । तत्कथं तदेवाह—इति किम् । हे प्राणप्रिये हे कुक्कुटि, त्वं भूरिभीतेः प्रबलतमभयस्य भवनं स्थानं मा भूर्भव । यतो विभुवचसा जीवदयोपदेशादयं भूमान्नास्मान् ध्वंसते न घातयति । उत्प्रेक्ष्यते—इह भूमिभुवने जगतां विश्वजनानां यो बोधः प्रतिबोधनं सुप्तोत्थापनं प्रतिबोधदानं जागरणं सत्पथस्थापनं वा तस्य कर्तृत्वं तस्य शक्तिः सामर्थ्यं तस्या व्यक्तिः प्रकटता । अथ वा शक्तया कृत्वा व्यक्त्या स्फुटतया यः प्रेमातिरेकः स्नेहातिशयस्तस्मादिव ॥ इति कुक्कुटमिथुनालापः ॥

श्लोकार्थ

કોઈ કુકડી પોતાના પતિને કહેતી હતી કે: 'હે પ્રિય કુકુંટ, આ અકબર તમને અને મને યમનાં અતિથિ બનાવવા માટે જ આવ્યો છે.' પોતાની પ્રિયતમાનાં આવાં દીનવચન સાંભળીને કુકડો બોલ્યો કે: 'હે પ્રાણપ્રિયે તું ભયભીત ના બન. પ્રભુશ્રી-હીરગુરુના વચનથી આ રાજા આપણા કોઈનો પણ વધ કરશે નહીં. વળી, જગતને જાગ્રત કરવાની આપણી શક્તિથી પ્રભાવિત બનેલો સ્નેહના અતિરેકથી પણ આપણો વધ કરશે નહીં. ॥ ૨૨૯ ॥

ऊचे हंसीति हंसं किमु तव नृपतेर्भीतिरभ्येति नान्त-
र्हन्ता ते यन्मृगाक्षीललितगतिपरिस्पर्धिभावादिवासौ ।
सोऽपि स्मित्वा शशंस श्रुतसुरसुदृशो विश्वकर्तुश्च जाने
यानत्वान्मां न कश्चिद्व्रतिपतिवचनादीश्वरः स्यान्निहन्तुम् ॥ २३० ॥

हंसी मराली हंसं सितच्छदमित्यूचे भाषितवती । इति किम् । हे हंस प्रियतम मानसवासिन्, तव भवतोऽन्तर्हृदयमध्ये नृपतेः सकाशात् भीतिर्भयमपि नाभ्येति नोदेति ।

यत्कारणात् असौ साहिस्तव हन्ता प्रमापयितास्ते । उत्प्रेक्ष्यते—मृगाक्षीणां स्वसारङ्गनयनानां स्त्रीणां लीलाललिताभिर्मन्थरभावमञ्जुलाभिर्गतिभिर्गमनैः सह परिस्पर्धिभावात्संघर्षित्वात् इव । ततः स हंसः स्मित्वा किमपि हसित्वा स्वसहचरीं चक्राङ्गीं प्रति शशंस अवदत् । हे वारले, व्रतिपतेः सूरीन्द्रस्य वचनाद्वाक्यान्मां प्रति कश्चिन्निहन्तुं घातयितुं न ईश्वरः स्यात् न समर्थो भवेत् । उत्प्रेक्ष्यते—श्रुतसुरसुदृशः सरस्वत्याश्च पुनर्विश्वकर्तुर्ब्रह्मणोऽपि यानत्वाद्वाहनभावादिव । अत्र जाने इवार्थे ॥ इति हंसमिथुनालापः ॥

श्लोकार्थ

કોઈ હંસી હંસને કહે છે કે: 'હે પ્રિયતમ હંસ, શું આપના હૃદયમાં અકબરરાજાથી જરાયે ભયનો સંચાર થતો નથી! કેમકે તેની પત્નીઓની મંથરગતિની સાથે સ્પર્ધા કરી રહેલો હોવાથી તે તારો અવશ્ય વધ કરશે. તે શું તું નથી જાણતો?' હંસીના આવા વચન સાંભળીને કંઈક હસીને હંસ બોલ્યો કે: 'અરે વેવલી હંસી, સૂરિજીના વચનથી અને હું શ્રુતદેવી સરસ્વતી અને બ્રહ્માનું વાહન હોવાથી કોઈપણ મારો વધ કરવા માટે સમર્થ નથી.' ॥ ૨૩૦ ॥

रथाङ्गी रथाङ्गं जगादेति दूरात्प्रयाहि प्रियास्माद्द्विषत्कालरात्रेः ।
यतो राजविद्वेषितोदीतकोपातिरेकादसौ त्वां हनिष्यत्यवश्यम् ॥ २३१ ॥

रथाङ्गी चक्रवाकी रथाङ्गं स्वसहचारिणं कोकमिति जगाद कथितवती । इति किम् । हे हृन्नाथ प्राणनाथ, द्विषतां वैरिणां कालरात्रेः कल्पान्तकालान्त्यनिशासदृशात् । यस्यां निशायां सुरासुरनरादयः सर्वेऽपि क्षयं यास्यन्ति न कोऽपि चराचरेषु स्थाता इति शैवमते । जैनमते तु निखिला भरतभूर्मनुष्यरिक्ता भाविनी षष्ठारके सर्वेऽपि मनुष्यचतुष्पदपक्षिणस्तु बिलवासिनः इति बहिर्भुवोऽनुसारिण्यपि कालरात्रिरेवेति । ततो बहुद्विपदचतुष्पदपक्षिक्षयंकरादस्मान्नृपतेस्त्वं दूरात् दूरं विप्रकृष्टभूभागे प्रयाहि । स्वप्राणधारणायेत्यध्याहारः । गच्छ । यतः कारणात् राज्ञा स्वयं राजत्वात् स्वेन चन्द्रेण च सह या विद्वेषिता वैरिभावस्तस्याः सकाशादुदीतः प्रादुर्भूतो यः कोपातिरेकः क्रोधातिशयस्तस्मादिव त्वां राजविरोधनं भवन्तं अवश्यं निश्चितं हनिष्यति ॥

श्लोकार्थ

ભયભીત બનેલી ચક્રવાકી ચક્રવાકને કહેવા લાગી કે: 'હે પ્રાણનાથ, જાઓ, દૂર જાઓ, કાલરાત્રિ સમાન રાજા અકબર આવી રહ્યો છે, માટે દૂર દૂર ભાગો. (શૈવ મતે જે સમયે ચરાચર જગતનો સંપૂર્ણ પ્રલય થાય તેને કાલરાત્રિ કહે છે.) કેમકે રાજા ચન્દ્ર સાથે તારે શત્રુતા હોવાથી રોષાતુર બનેલો રાજા તારો અવશ્યમેવ વધ કરશે.' ॥ ૨૩૧ ॥

प्राहेत्यसौ मां स नृपः कृपावान्न हन्ति जाने निजयौवतस्य ।
रतोत्सवोच्छ्वासितकञ्चुकेषु कुचेषु संचारितचित्तवृत्तिः ॥ २३२ ॥

असौ चक्रवाकः स्वां प्रेयसीं प्रति निरातङ्कः सन् प्राह बभाण । इति किम् । हे जीवितवल्लभे द्वन्द्वचारि चक्रवाकि, कृपावान् श्रीहीरसूरीन्द्रधर्मोपदेशश्रवणात् कृपाकलितचेतोभूतः स नृपोऽकब्बरसाहिः मां नैव हन्ति निशुम्भति । अहमेवं जाने वेद्मि । उत्प्रेक्ष्यते—इत्यर्थे जाने । निजयौवतस्य स्वतरुणरमणीगणस्य रतस्य संभोगस्यानन्दमयसमयत्वादुत्सव इवोत्सवः तत्रोच्छ्वासितः उच्चैः कृतो हृदयादुत्तार्यान्यत्र क्षिप्तो वा कञ्चुको निचोलो येभ्यस्तादृशेषु कुचेषु पीनप्रोत्तुङ्गपयोधरेषु संचारिता संक्रामिता चित्तवृत्तिरन्तःकरणव्यापारो वर्तनं वा येन तादृश इव । विगलन्निचोलचारुलोचनोकुचकलशस्मरणात्तत्तुल्यत्वेनास्मान्नायं निहन्तीत्यर्थः । जाने ज्ञानार्थे इवार्थे वा इति चक्रवाकमिथुनालापः ॥

श्लोकार्थ

નિર્ભય બનેલો ચક્રવાક ચક્રવાકીને કહે છે કે: 'હે પ્રાણવલ્લભે, કરૂણાના સાગર શ્રી હીરવિજયસૂરિજીના ધર્મોપદેશથી દયાળુ બનેલો અકબર મને હણશે નહીં, તે હું જાણું છું. વળી પોતાની પ્રિયતમાની સાથે સૂરતક્રીડારૂપી ઉત્સવમાં જેનો કંચૂક ઊંચે ચઢી ગયેલો છે અથવા દૂર ફેંકાઈ ગયેલો હોવાથી તેનાં સ્તનોની સાથે મારી (ચક્રવાકની) સ્મૃતિ થવાથી પણ મારો વધ કરશે નહીં'

(સ્તનોને 'ચક્રવાક'ની ઉપમા આપવામાં આવે છે.) ॥ ૨૩૨ ॥

प्रियाश्चकोरानपि खञ्जरीटान्वदन्त्यदस्तिष्ठथ किं सुखेन ।
पुरा हि बध्नाति वधूविलोचनश्रियोऽधमर्णान्भवतो यतो नृपः ॥ २३३ ॥

चकोरान् ज्योत्स्नाप्रियान् खञ्जरीटान् खञ्जनान् प्रति प्रियास्तेषामङ्गनाः चकोर्यः तथा खञ्जरीटचटुललोचनाः अदः एतद्वदन्ति निर्दिशन्ति कथयन्ति । तदेवाह—हे प्रियाः, सुखेन शर्मणा निश्चिन्ततया वा किं कथं प्रश्ने तिष्ठथ वसथ वा स्थिता था । यतः कारणाद्वधूनां निजयुवतीनां विलोचनानां चारुचञ्चलविचित्रनेत्राणां श्रियो लक्ष्म्या अधमर्णान् ग्राहकान् भवतो युष्मान् नीतिनिपुणो नृपोऽसौ पुरा बध्नाति बन्त्स्यति बन्धं प्रापयिष्यति गृहीतं पश्चाददददानोऽधमर्णः समर्थेन उत्तमर्णेनावश्यं निगृह्यते इति लोकव्यवहारः ॥

શ્લોકાર્થ

ચકોરને ચકોરીઓ અને ખંજન પક્ષીઓને તેઓની પ્રિયાઓ કહે છે કે: 'હે સ્વામિન, તમો નિર્ભય થઈને કેમ રહો છો? કારણ કે તમે તેની પ્રિયાઓના સુંદર

નેત્રોની શોભાના ગ્રાહકો હોવાથી નીતિનિપુણ રાજા તમારો અવશ્યમેવ વધ કરશે.' ॥ ૨૩૩ ॥

इत्थममी प्रति दयिताः प्रोचुर्मा स्म भयं मनसापि जिहीध्वम् ।
येन सपक्षतयेव न पश्येत्सूरिगिराभिमुखं नृपतिर्नः ॥ २३४ ॥

अमी चकोरखञ्जरीटाः पतत्रिणः दयिता स्वस्वप्रियाः प्रति इत्थममुना प्रकारेण प्रोचुर्व्याचक्षते स्म। इत्थं कथम् । हे कान्ताः, यूयं मनसापि स्वचित्तेनांशमात्रमपि भयं साध्वसं मा स्म जिहीध्वं मा गच्छत । येन कारणेन सूरिगिरा गुरोर्दयोपदेशप्रदानश्रवणेन नृपतिर्नास्माकमभिमुखं क्रूरदृष्ट्या घातवार्ता तु दूरे तिष्ठतु विरुद्धदृशापि संमुखं पश्येन्नावलोकयेत् । उत्प्रेक्ष्यते—सपक्षतयेव सह पक्षेण परिवारेण वर्तन्ते ये ते सपक्षास्तत्तथा । 'जे परिवारइ अग्गला ते गञ्जणां न जाइ' इति वचनात् । पक्षैः पक्षकक्षाकारिभिर्मित्रादिभिर्वा वर्तन्ते ये अथवा समानः पक्षो गोत्रं येषां ते सगोत्राः। पक्षो गोत्रे परीवारे पक्षतौ च' इत्यनेकार्थः । तेषां भावः सपक्षता तया पक्षयुक्तत्वेन एकगोत्रत्वेन वा । बहुपक्षो हन्तुमशक्य एकपक्षश्च हन्तुमयुक्तः ॥ इति चकोरखञ्जनमिथुनालापाः । इति खचराः ॥

શ્લોકાર્થ

ચકોરો અને ખંજરીઓ પોતપોતાની પ્રિયાઓને કહે છે કે: હે પ્રિયાઓ, તમે મનમાંથી ભયને બિલકુલ દૂર કરો; કારણ કે આચાર્યશ્રીની વાણીથી અકબરબાદશાહ આપણી સામે ક્રૂરદૃષ્ટિથી પણ જોતો નથી, તો પછી વધની તો વાત જ શું કરવી ! વળી, આપણે પરિવાર સહિત (પક્ષસહિત–બીજા અર્થમાં ઘણાં છીએ) છીએ, તેથી પણ આપણો વધ કરી શકશે નહીં. ॥ ૨૩૪ ॥

न्यगदद्निमिषीनं मीनमेतत्किमु रमसे रमणीसखः सुखेन ।
अनय नयपयोधिपारदृश्वा किमु कुलवैरितया हनिष्यति त्वाम् ॥ २३५ ॥

अनिमिषी मत्स्यी इनं स्वकान्तं मीनं मत्स्यमिति न्यगदद्दाचख्यौ । हे मीन, रमणीसखः बहुस्त्रीकत्वेन स्वान्यनारीकलितः किमु कथं रमसे सलिले स्वेच्छया क्रीडसि बहुमत्स्यीभिः सार्धं विलससि । केन । सुखेन शर्मणा । निरपायं क्रीडानिषेधहेतुमाह– हे अनय, न विद्यते नयो निजकुलक्षयकारित्वेन न्यायो यस्मिन् । मत्स्यगलागलिन्याय जेह जेह नइ पहुचइ ते हनइ खाय' इति लोकवार्ता । तथा न्याय एवागाधत्वात्पयोधिः समुद्रस्तस्य पारदृश्वा पारगामी नीतिभिः रामचन्द्रो भूपतिस्त्वां भवन्तं हनिष्यति कृतान्तनिकेतनातिथेयीं ग्राहयिष्यति। उत्प्रेक्ष्यते—कुलस्य स्ववंशस्य वैरितया संहारकत्वेन

किमु यः कुलसंहारकृत्सोऽवश्यं स्वांहसैव निहन्यते । तथा चोक्तं नैषधे—'अबलस्वकुलाशिनो झषान्निजनीडद्रुमपीडिनः खगान्। अनवद्यतृणार्दिनो मृगान्मृगयाघायनभूभृतां घ्नताम्' इति शैवपुरोहितमन्त्रिवचसा नृपस्नयाणामपि मृगयां करोति ॥

श्लोकार्थ

માછલી મત્સ્યને કહેતી હતી કે: 'હે પ્રિય મત્સ્ય, જલમાં ઘણી માછલીઓની સાથે સુખપૂર્વક ક્રીડા કરી રહેલા તને શું બાદશાહ હણશે નહીં! રામચન્દ્રજી સમાન ન્યાયનિપુણરાજા કુલવૈરીપણાથી અવશ્ય તારો વધ કરશે.' ॥ ૨૩૫ ॥

तिमिरिति कान्तां मदनविनोदी वदति मुनीन्दोर्वचनविलासात् ।
अनिमिषभावादिव विनिहन्तुं धरणिसुधांशुः प्रभवति नास्मान् ॥ २३६ ॥

मदनेन कामेन मदनादनङ्गोदयाद्वा विनोदो विलासः स्वेच्छया विविधचेष्टा कामक्रीडा सुरतादिर्वा अस्यास्तीति मदनविनोदी तिमिर्मत्स्यः कान्तां स्वप्रेमवतीं लीलावतीं मत्स्यीं प्रति इति वदति जल्पति । हे प्रिये, मुनीन्दोः साधुसुधाकरस्य वचनविलासात्कृपाप्रपञ्चाञ्चितवाचां वैचित्र्यात् धरणिसुधांशुरचला चक्रचन्द्रमाः साहिरस्मान्विनिहन्तुं न प्रभवति न समर्थो भवति । धरणिशब्दो ह्रस्वोऽपि दृश्यते नाटकशास्त्रे यथा—'प्राचीभागे धरणिविरहिणि क्रान्तमुद्रे समुद्रे' इत्यादि । तथा च वाग्भटालंकारे—'मुदा यस्योद्गीतं सह सहचरीभिर्वनचरैर्मुहुः श्रुत्वा हेलोद्धृतधरणिभारं भुजबलम् । दरोद्गच्छद्दर्भाङ्कुरनिकरदम्भात्पुलकिताश्चमत्कारोद्रेकं कुलशिखरिणस्तेऽपि दधिरे ॥' इति । उत्प्रेक्ष्यते—अनिमिषभावाद्देवत्वादिव । 'अनिमिषो देवमीनयोः' इत्यनेकार्थः । देवदेव्यो हि मनुष्येण हन्तुं न शक्यन्ते ॥ इति मत्स्यमिथुनालापः ॥

श्लोकार्थ

કામક્રીડામાં રસિક મત્સ્ય માછલીને કહે છે કે: પ્રિયમત્સી, સૂરીશ્વરની વાક્ચાતુરીથી દયાળુ બનેલો અકબર કદાપિ અમારો વધ કરશે નહીં. વળી, આપણે અનિમેષ દેવરૂપ હોવાથી દેવદેવીઓનો વધ શું મનુષ્યો કરી શકે? ॥ ૨૩૬ ॥

व्याघ्रेण वेधीकृतकाययष्टी मृगीव तत्साध्वसधावमाना ।
त्रासातिमात्रास्थिरनेत्रपत्रा वादालबालेत्यलपत्प्रियं स्वम् ॥ २३७ ॥

वादालः सहस्रदंष्ट्रः मत्स्यविशेषस्तस्य बाला स्त्री स्वं प्रियमात्मीयं वल्लभमित्यलपज्जगदति स्म । किंभूता । धावमाना पलायमाना प्रणश्यन्ती । केन । तत्साध्वसेन तस्मान्मृ-

गयो राज्ञो भयेन कीनाशदार्म्किरणातङ्केन । पुनः किंभूता ! त्रासादाकस्मिकभयादतिमात्रमतिशयेनास्थिरे चञ्चलतमे नेत्रपत्रे विलोचनदले यस्याः । केव । मृगीव । यथा व्याधेन लुब्धकेन वेधीकृता शरव्या विहिता । 'इषा शरव्याकरणे दिवौकसाम्' इति नैषधे । यकारसहितस्यापि च्विप्रत्ययः । काययष्टी तनुलता यस्याः तादृशी मृगी सारङ्गी व्याधस्य भयेन प्रणश्यन्ती त्रासाच्चितान्ततरलोचना स्यात् ॥

શ્લોકાર્થ

શિકારીએ જેને પોતાનું લક્ષ્ય બનાવી છે તેવી હરણીની જેમ ભયભીત બનીને સમુદ્રમાં દોડાદોડ કરતી 'વાદાલ' નામની માછલી પોતાના પતિને કહે છે: ॥ ૨૩૭ ॥

वादाली किमाललाप तदेवाह—

वादाल कुद्दालवदानने किं दंष्ट्राः स्फुटीकृत्य सुखेन शेषे ।
गम्भीरताभिश्चुलुकीकृताब्धेस्त्वद्भानुसूनुर्यदुपैति भूपः ॥ २३८ ॥

हे वल्लभ वादाल सहस्रदंष्ट्र, आनने स्वमुखे कुद्दालवद्भूखननोपकरणविशेषानिव । 'कोदाला' इति लोके प्रसिद्धाः । दंष्ट्रा दाढाः स्फुटीकृत्य विकाश्य सुखेन जलशयेन किं कथं शेषे निद्रायमाणो वर्तसे । यत्कारणात् त्वद्भानुसूनुः तव भवतो भानोरादित्यस्य सूनुर्नन्दनो धर्मराज्ञो वर्तते त्वद्वधकः अकब्बर उपैति समागच्छति । सोऽलपत्—भद्रे, अहं समुद्रमध्ये, तन्मां कथं मारयिष्यति । अत एव सा वक्ति । किंभूतः साहिः । गम्भीरताभिः स्वगाम्भीर्यैः चुलुकीकृतः गण्डूषमात्राम्भोविहितोऽब्धिः समुद्रो येन । कुम्भोद्भववत्पीतपयोनिधिस्तत्कथमात्मानं रक्षसि ॥ युग्मं संगत्या न क्रियया ॥

શ્લોકાર્થ

'એક હજાર દાંતવાળા હે વાદાલ! પોતાના મુખમાંથી કોદાળા જેવી દાઢા બહાર કાઢીને સુખપૂર્વક કેમ સૂતો છે! કારણ કે યમરાજ સમાન અકબર બાદશાહ તારો વધ કરવા આવી રહ્યો છે.' ત્યારે વાદાલે કહ્યું કે: 'હું સમુદ્રની મધ્યમાં છું. મારો વધ તે કેવી રીતે કરશે!' ત્યારે માછલી બોલી કે: પોતાની ગંભીરતાથી જેણે સમુદ્રને ચુલુક (કોગળા) માત્ર કરી દીધો છે તે અગસ્તિ-ઋષી સમાન અકબરથી તું તારું રક્ષણ કેવી રીતે કરી શકીશ!' ॥ ૨૩૮ ॥

स स्माहेति सहस्रदंष्ट्रमहिलामालिङ्गय लीलालसो
मा गाः साध्वसमध्वराशनपतेः पाथोधिनेमेरतः ।
श्रीमत्सूरिगिरा महाव्रतिवपुःपाथोनिशोपासना-
प्रोद्भूतप्रणयादिव प्रियतमे नास्मान्हिनस्ति प्रभुः ॥ २३९ ॥

लीलया विलासेन नर्मणा वा मन्थरोऽपरकर्मण्यलसः सहस्रदंष्ट्रमहिलां स्वां प्रियां वादालीमालिङ्ग्य स्वहृदयेन दयिताहृदयं गाढमाश्लिष्य स वादाल इति आह स्म ब्रूते स्म। हे प्राणितप्रियतमे भीरु, अतोऽस्मादकब्बरात् पाथोधिनेमेर्जलधिचक्रवालाया वसुधाया अध्वराशनपतेर्यज्ञभोजनप्रभोरिन्द्रस्य अध्वरा यज्ञा अशनं भोजनं येषां तेषां देवानां पतिः स्वामी तस्माद्भूमीन्द्रात् साध्वसं भयं मा गा मा व्रज। यस्मात् श्रीमत्सूरेर्गिरा वाक्यात् स प्रभुः साहिरस्मान्न हिनस्ति नालभते। उत्प्रेक्ष्यते—महान्ति सर्वोत्कृष्टानि मेरुवद्धर्तुमशक्यानि यस्य तादृशस्य सूरेरन्यस्य कस्यापि साधोर्वा नाम्ना वशंकरस्य महाव्रतिनो वपुः शरीरं यत्पाथः पानीयं तस्यानिशं निरन्तरं या उपासना सेवा ततः प्रोद्भूतः प्रकटो जातः प्रणयः स्नेह प्रेमातिरेकस्तस्मादिव ॥ इति वादालमिथुनालापः ॥

શ્લોકાર્થ

ક્રીડામાં તત્પર વાદાલ મત્સ્ય પોતાની પ્રિયાને ગાઢ આલિંગન આપીને બોલ્યો કે: 'હે પ્રાણપ્રિયે, સમુદ્રપર્યંતની ભૂમિનાં સ્વામી અકબર રાજાથી તું જરાયે ભય ના પામ, કારણ કે હીરવિજયસૂરિની વાણીથી આપણો વધ કરશે નહીં. મહાવ્રતી સાધુઓનાં શરીર-રૂપી જલની નીરંતર ઉપાસના કરવાથી જેના હૃદયમાં પ્રેમાંકુર ઉત્પન્ન થયો છે તેવા સ્નેહાળુ અકબરબાદશાહ કદાપિ આપણો વધ કરશે નહીં.' ॥ ૨૩૯ ॥

नक्राद्यानुपसृत्य तत्प्रियतमा इत्यूचुरातङ्किताः
कीलालेष्विव लोलुपाशयतया हन्ता नृनेतात्मनाम्।
तेऽप्याख्यन्निति वज्रबाहुनृपवद्गोपायति क्ष्मापति-
र्जन्तूञ्जन्तुपितामहः स करुणाकल्लोलिनीवल्लभः ॥ २४० ॥

नक्रा जलयादोविशेषाः कुम्भीराः मत्स्यजातयस्ते आद्या आदिभूता येषां येषु वा ते नक्रचक्रपाठीनकुम्भीरालस्यकुम्भीमहामुखप्रमुखानुपसृत्य समीपमागत्य आतङ्किता भूपतेर्भीतिव्याकुलीभूतास्तेत्प्रियास्तेषां नक्रादीनां पत्न्यः इत्यमुना प्रकारेणोचुः कथयांचक्रुः। इति किम्। हे प्राणवल्लभाः, नृनेता नरपतिरकब्बरः आत्मनां यावदात्मजातिजन्तूनां हन्ता घातयिता [स्ते] विवृद्धव्यसनवशंवदानां कृत्याकृत्यविवेको न भवत्येव। उत्प्रेक्ष्यते—कीलालेषु रुधिरेषु लोलुपो लम्पटो लुब्ध आशयो मनो येषां तत्तयेव रुधिरपानलुब्धमनस्त्वेनेव। 'कीलालं रुधिरे जले' इत्यनेकार्थः। तत्त्वतस्तु जलचरत्वेन जले एव लोलुपाशयाः। ततस्ते नक्राद्या जलयादोव्रजा अपि निजदयिताः स्वस्वप्रियाः प्रति इत्याख्यन् इदमाचख्युः। हे प्रियाः, स क्ष्मापतिर्नृपः जन्तूनां प्राणभृतां पितामहः पितृपिता भवन् सन् जन्तून् सर्वसत्त्वान् नृपनृवद्गोपायति रक्षति। किंभूतः। करुणा जगज्जन्तूपरि कृपा तस्याः कल्लोलिनीवल्लभो नदीनायकः समुद्रः। किंवत्। वज्रबाहुनृपवत् श्रीशान्तिनाथपूर्वजन्मवज्रबाहुमहीपतिरिव। पारापतप्रमुखाननेकसत्त्वान्। तथा सूरिगिरा इत्यध्याहारादयमासीदिति ॥ इति नक्रादिजलजन्तुमिथुनालापः। इति जलचराः ॥

શ્લોકાર્થ

નક્રચક્ર આદિ જલજંતુઓની ભયભીત બનેલી પ્રિયાઓ પોતાના પતિને કહેતી હતી કે: 'હે સ્વામિન્, કીલાલો (રૂધિર પીનાર)ની જેમ આ અકબર જાલ વડે આપણને હણશે!' ત્યારે નક્રચક્રો કહે છે કે: હે પ્રિયાઓ, વજ્રબાહુ (મેઘરથ) રાજાની જેમ (શ્રી શાંતિનાથ ભગવાનના પૂર્વજન્મમાં મેઘરથ રાજાએ પારેવાનું રક્ષણ કર્યું હતું તેમ) હીરવિજયસૂરિની વાણીથી દયાનો સાગર અકબર બાદશાહ જગતના જીવોનું રક્ષણ કરવા માટે પિતામહ સમાન છે, તે માટે આપણો તે વધ કરશે નહીં. ॥ ૨૪૦ ॥

चौलुक्यावनिजानिनेव निखिलेऽकूपारकाञ्चीतले
श्रुत्वा प्राणिगणैरमारिमवनीकान्तेन संकल्पिताम् ।
गर्जन्तीह गजा हसन्ति हरिणाः कूर्दन्त्यथो कासरा
हृष्यन्ति द्विरदद्विषः सुखमधुर्वाध्रीणसद्वीपिनः ॥ २४१ ॥

केकायन्ते कलितललनाकेलयो नीलकण्ठा
माकन्दस्था विदधति पिकाः पञ्चमालापलीलाम् ।
शब्दायन्ते शिखरिशिखरस्थायुकास्ताम्रचूडाः
कीरा धीरा इव तरुशिरस्यन्वतिष्ठंश्च गोष्ठीः ॥ २४२ ॥

प्रीतिप्रह्वां रमयति रहः स्वां चकोरीं चकोर-
श्चेरुः स्वैरं गृहबलिभुजः खञ्जनाः खे विलेसुः ।
लीलायन्ते धवलगरुतः प्रोच्छलन्ति स्म मत्स्या
विश्वस्यासन्निव सुखमया वासरास्ते तदानीम् ॥ २४३ ॥

चौलुक्यावनिजानिना कुमारपालभूपालेनेव निखिले समग्रे अकूपारः समुद्रः स एव काञ्ची मेखला यस्यास्तस्याः तले । भूमण्डले इत्यर्थः । अवनीकान्तेनाकब्बरेण संकल्पितां प्रवर्तिताममारिं जीवदयां श्रुत्वा निशम्य इह जगति गजाः सर्वेऽपि वन्यचारिणः गर्जन्ति सजलजलधरवद्गम्भीरधीरगर्जारवं कुर्वन्ति । पुनर्हरिणा हर्षेण हसन्ति मिथो हास्यं कुर्वन्ति । अथ पुनः कासरा महिषाः कूर्दन्ति नभसि फा[illegible]ं ददते । च पुनर्द्विरदद्विषः केसरिणः हृष्यन्ति उद्धुषितकेसरसटाटोपः प्रमोदमेदुरी । पुनर्वाध्रीणसाः खड्गिणो 'गांडां सावज' इति प्रसिद्धाः । तथा द्वीपिनो व्याघ्राः चित्रकाया वा । तथा गिरिनारिगिरिगहने व्याघ्रीचित्रकचित्रकीव्याघ्राणां च संयोगे जायमानास्तत्र 'दीपडाः' इति प्रसिद्धाः सुखं

सातमधुर्बिभ्रति स्म। सातेन शेरते इत्यर्थः। पुनः कलिता निर्मिता ललनाभिर्मयूरीभिः समं केलयो विलासा यैस्तादृशा नीलकण्ठाः केकायन्ते सताण्डवाडम्बरं केकारवं कुर्वते। पुनर्माकन्दस्थाः स्मितसहकारशाखिशाखास्थायुकास्तत्कलिकाकदम्बकास्वादसुन्दरीभूतनूतनाकुण्ठकण्ठाः पञ्चमनाम्नो रागस्य आलापस्य आलपनस्य खेलनाया लीलां विनोदं विदधति। तथा शिखरिणां पत्रलपादपानां शिखरेषु तिष्ठन्तीत्येवंशीलाः स्थायुकाः स्थायिनः सन्तस्ताम्रचूडाः कुक्कुटाः शब्दायन्ते जगत्प्रबोधं विदधति। पुनर्धीराः पण्डिता इव। यथा हैम्याम्—'ज्ञः प्राप्तरूपकृतिख्यानिरूपधीराः' इति। कीराः शुकास्तरूणां पुष्पितफलितद्रुमाणां शिरसि शिखरे उपरिशाखायां गोष्ठीः परस्परवार्ताः अन्वतिष्ठन् चक्रुः। पुंश्चकोरो ज्योत्स्नाप्रियः प्रीत्या स्नेहेन कृत्वा प्रह्वां नम्रीभूतां स्वामात्मीयां चकोरीं रह एकान्ते रमयति। पुनर्गृहबलिभुजश्चटकाः स्वैरं स्वेच्छया चेरुः पर्यटन्ति स्म भक्षयन्ति स्म। च पुनः खञ्जना आकाशे विलेसुः विलसन्ति स्म विक्रीडुर्वा। पुनर्धवलगरुतो राजहंसा लीलायन्ते मन्थरगमनैर्विचरन्ति। पुनर्मत्स्या मीनाः प्रोच्छलन्ति प्रकर्षेणोच्चैरुत्पतन्ति। साहेर्मृगयानियमनाकर्णनात्सर्वेऽपि प्रमोदभाजो जन्तवः स्वतन्त्रं क्रीडन्ति तैर्हि ते दिनाः[1] [घस्रा] कीदृशा जाताः तदानीं तस्मिन्प्रस्तावे तेऽमारिसत्का वासरा दिवसा विश्वस्य सर्वस्य जलस्थवारिचरजन्तुवर्गस्य सुखमयाः शर्मप्रचुराः। यदुक्तं रघुवंशे— 'क्षणमप्यवतिष्ठते श्वसन्यदि जन्तुर्ननु लाभवानसौ' इति। इति वचनात्परमानन्दमया इवासन् बभूवुः। परममारिपटहोद्घोषणव्यतिकरे इत्यर्थः॥ त्रिभिर्विशेषकम्॥

શ્લોકાર્થ

કુમારપાલ રાજાની જેમ અકબર બાદશાહે સમસ્ત ભૂમંડળમાં જાહેર કરેલી અમારિ (જીવદયા) પ્રવર્તનને સાંભળીને હાથીઓ ગર્જારવ કરવા લાગ્યા, અશ્વો પરસ્પર હસવા લાગ્યા, મહિષો ઊંચી ઊંચી ફાળો ભરવા લાગ્યા, કેસરી સિંહો હર્ષથી કેસરાનો આરોપ કરવા લાગ્યા, સાવજો, વાઘો, ચિત્તાઓ અને દીપડાઓ સુખપૂર્વક શયન કરવા લાગ્યા, મયૂરીઓની સાથે ક્રીડા કરતા મયૂરો હર્ષપૂર્વક 'કેકારવ' કરવા લાગ્યા, આમ્રવૃક્ષ ઉપર રહેલી કોકિલાઓ પંચમસ્વરનો આલાપ કરવા લાગી, વૃક્ષોની ટોચ ઉપર રહેલા કુકુંટો અવાજ કરવા લાગ્યા, વૃક્ષની ટોચ ઉપર રહેલા પોપટો પંડિતોની જેમ પરસ્પર ગોષ્ઠી કરવા લાગ્યા, સ્નેહથી નમ્ર બનેલી ચકોરીઓ એકાંતમાં ક્રીડા કરવા લાગી, ચકલીઓ સ્વેચ્છાપૂર્વક ચણભક્ષણ માટે પર્યટન કરવા લાગી, ખંજરીટો આકાશમાં ક્રીડા કરવા લાગ્યા, રાજહંસો મંથર ગતિ વડે વિચરણ કરવા લાગ્યા, અને માછલાઓ ઉછળવા લાગ્યા, આ રીતે સર્વ જાતિના જીવોના દિવસો સુખમય બની ગયા.

॥ ૨૪૧ ॥ ॥ ૨૪૨ ॥ ॥ ૨૪૩ ॥

---

१. दिनशब्दस्य वस्तुतः पुंस्त्वाप्रसिद्धत्वेन चिन्त्योऽयं प्रयोगः, अर्धाधजन्तत्वात्पुंस्त्वं वा.

मधुना मञ्जरीमालालंकृताः फलदा इव ।
अमारिमण्डिताः सर्वे कृतास्तेनात्मनीवृतः ॥ २४४ ॥

तेनाकब्बरेणात्मनीवृतः निजजनपदा अमारिमण्डिता जीवानुकम्पाविभूषिताः कृता निर्मिताः । केनेव के । मधुना फलदा इव । यथा वसन्तेन सर्वे महीरुहा मञ्जरीणां कलिकानां उपलक्षणात्पल्लवपुष्पफलानां च मालाभिरावलीभिरलंकृताः क्रियन्ते । यदुक्तम्—'अर्थो नराणां पतिरङ्गनानां वर्षा नदीनामृतराट् तरूणाम् । स धर्मचारी नृपतिः प्रजानां गतं गतं यौवनमानयन्ति ॥' इति ॥

श्लोकार्थ

જેમ વસંતઋતુ વૃક્ષોને નવપલ્લવિત કરે તેમ અકબર બાદશાહની અમારિ (જીવદયા) એ પોતાના સર્વ દેશોને વિકસિત કર્યા. (કહ્યું છે કે: મનુષ્યોને દ્રવ્ય, સ્ત્રીઓને પતિ, નદીઓને વૃષ્ટિ, વૃક્ષોને વસંતઋતુ, અને પ્રજાને ધર્મનિષ્ઠ રાજા આનંદ અર્પે છે.) ॥ ૨૪૪ ॥

प्राचीनापगुदीचीनप्रतीचीनावनीधनाः ।
साहिप्रवर्तितामारिं शेषामिव शिरस्यधुः ॥ २४५ ॥

पूर्वदिग्दक्षिणदिक्पश्चिमदिगुत्तरदिक्संबन्धिनो भूमीकान्ता राजानश्चतसृणामपि दिशामधीशाः उपलक्षणाद्विदिशामपीशास्ते कर्तारः साहिना प्रवर्तिताममारिं सकलजीवदयां शेषां देवेन स्वामिना वा प्रदत्तप्रसादमिव शिरसि मस्तके अधुर्धारयन्ति स्म । शेषाः शीर्षा अपि । 'सेस' इति लोकप्रसिद्धा ॥ इति श्रीहीरविजयसूरिवचनादकब्बरसाहिना निखिलमण्डलेष्वमारिः प्रवर्तिता ॥

શ્લોકાર્થ

પૂર્વ, પશ્ચિમ, ઉત્તર, દક્ષિણ એમ ચારે દિશાના અધિપતિઓએ અકબર બાદશાહની 'અમારિ'ને 'શેષ'ની જેમ મસ્તક ઉપર ધારણ કરી. ॥ ૨૪૫ ॥

श्रीसूरिश्वरहीरहीरविजयैस्तैः स्थानसिंहः स्वयं
निर्माप्यातिमहोत्सवेन भगवद्बिम्बप्रतिष्ठामहम् ।
कल्याणश्रियमर्थिसार्थवशगां कुर्वन्नपि प्रीतीमा-
नेतच्चित्रममुत्र तन्निजवशां तां निर्मिमीते स्म यत् ॥ २४६ ॥

अमुष्मिन् जगति तत्प्रसिद्धमेतद्दृश्यमानं चित्रमाश्चर्यमास्ते । तत्किम् । थानसिंहो यत्तां कल्याणश्रियं मुक्तिलक्ष्मीं निजवशां स्वायत्तां निर्मिमीते स्म चकार । किंभूतः । प्रीतिमान् मुक्तिलक्ष्मीं प्रति स्नेहवान् । अन्यत्र प्रमोदमेदुरिताङ्गयष्टिः । पुनः किं कुर्वन् । कल्याणश्रियं सुवर्णविभूतिर्थिनां याचकानां सार्थस्य वर्गस्य वशगां वशवर्तिनीं कुर्वन्नपि सृजन्नपि । किं कृत्वा । इह फतेपुरमध्ये तैरकब्बरसाहिविहितसन्मानैः श्रिया शुद्धाचारत्वेन यशोलक्ष्म्या युक्तानां सूरीणामपरेषामनूचानानां मध्ये ईश्वराः अधिपतयः ज्ञानवर्गादिभिर्महीयांसस्तेषु हीरैश्चूडामणिकल्पैर्हीरविजयसूरिभिः स्वयमात्मना अप्रतिमेनासाधारणेन उत्सवेन महेन भगवतां तीर्थकृतां बिम्बानां प्रतिमानां प्रतिष्ठां वा सक्षेपाञ्जनशलाकादिकां निर्माप्य कारयित्वा ॥

श्लोकार्थ

આ જગતમાં આશ્ચર્ય તો જુઓ ! શ્રી હીરવિજયસૂરિના જિનેશ્વર ભગવંતનો સ્વયં અંજનશલાકા આદિ ભવ્ય મહોત્સવ કરાવીને પ્રીતિવંત થયેલા થાનસિંહે કલ્યાણ-સુવર્ણની સંપત્તિ યાચક વર્ગને સ્વાધીન કરીને અર્થાત્ અનર્ગલ દાન આપીને મુક્તિ-લક્ષ્મીને પોતાને સ્વાધીન કરી. ॥ ૨૪૬ ॥

श्रीमद्गुर्जरराजवीरधवलाधीशः समुत्कण्ठितः
स्वेन श्रीकरणाभिधानपदवीं श्रीवस्तुपालं यथा ।
सूरिक्षोणिमहेन्द्रहीरविजयस्तस्मिन्महेऽस्याग्रहे-
णोपाध्यायपदं निनाय विबुधं शान्त्यादिचन्द्राभिधम् ॥ २४७ ॥

स जगद्विख्याताकब्बरप्रतिबोधविधाता सूरिष्वनूचानेषु क्षोणिमहेन्द्रः पृथिवीपाकशासनो राजा श्रीहीरविजयसूरिस्तस्मिन् प्रतिष्ठासंबन्धिनि महे महोत्सवे अस्य थानसिंहस्याग्रहेण शान्तिरिति पदमादौ यस्य तादृशी चन्द्र इत्यभिधा नाम यस्य तादृग्विधं विबुधं प्रज्ञांशमुपाध्यायपदं निनाय प्रापितवान् । शान्तिचन्द्रप्रज्ञांशस्योपाध्यायपदं ददावित्यर्थः । तत्र दृष्टान्तं वक्ति—यथा सम्यगुत्कण्ठा औत्सुक्यं जातमस्येति समुत्कण्ठितः श्रीमान्मण्डललक्ष्मीकलितः गुर्जराणां राजा स्वामी वीरधवल इति नामाधीशः प्रभुः स्वेनात्मना श्रिया भाग्यवैभवेन युक्तं वस्तुपालं तेजःपालज्येष्ठभ्रातरं श्रीकरणनाम्नीं पदवीमधिकारविशेषम् । मित्रित्वमित्यर्थः ॥ इति थानसिंहप्रतिष्ठायां शान्तिचन्द्रस्योपाध्यायपदम् ॥

श्लोकार्थ

જેમ ગુર્જરદેશના અધિપતિ વીરધવલરાજાએ ઉત્સાહપૂર્વક વસ્તુપાળમંત્રીને શ્રીકરણની પદવી આપી હતી તેમ જગદ્ગુરુ હીરવિજયસૂરિજીએ પ્રતિષ્ઠા મહોત્સવમાં

સિંહના આગ્રહથી પોતાના શિષ્ય શ્રી શાંતિચન્દ્ર નામના પંડિતને 'ઉપાધ્યાય'ની પદવી અર્પણ કરી. ॥૨૪૭॥

दुर्जनमल्लो दुर्जनमल्ल इव गुणैर्महीपतेर्मान्यः ।
समहं प्रत्यष्ठापयदर्हत्प्रतिमा मुनीन्द्रेण ॥ २४८ ॥

दुर्जनमल्लो नाम श्राद्धो मुनीन्द्रेण सूरिपार्श्वे समहं महामहकलितं यथा स्यात्तथा अर्हत्प्रतिमा भगवद्बिम्बानि प्रत्यष्ठापयत् प्रतिष्ठापयति स्म । किंभूतः । गुणैरौदार्यधैर्यमणिपरीक्षाकारकादिभिः कृत्वा महीपतेरकब्बरसाहेर्मान्यो बहुमाननीयः । पुनः गुणैर्दुर्जनानां कर्णेजपानां खलानां वा मल्ल इव मल्लः प्रतिपक्षः ॥

શ્લોકાર્થ

ઔદાર્યાદિ ગુણો વડે રાજમાન્ય તેમજ સુજનતા આદિ ગુણો વડે દુર્જનોના શત્રુ એવા દુર્જનમલ્લ નામના શ્રાવકે આચાર્યદેવની પાસે મહોત્સવપૂર્વક જિનબિંબની પ્રતિષ્ઠા કરાવી. ॥૨૪૮॥

समहं मथुरापुर्यां यात्रां पार्श्वसुपार्श्वयोः ।
प्रभुः परीतः पौरौघैश्चारणर्षिरिवाकरोत् ॥ २४९ ॥

प्रभुर्हीरविजयसूरिः मथुरापुर्यां मधुपघ्ननगरे समहं सोत्सवं चारणर्षिर्विद्याजङ्घाचारणादिमुनिरिव पौरौघैर्नागरिकनिकरैः परीतः परिवृतः संघेन सहितः पार्श्वसुपार्श्वयोस्त्रयोविंशतितमसप्तमजिनचन्द्रप्रतिमयोर्यात्रामकरोच्च कृतवान् ॥

શ્લોકાર્થ

ચારણમુનિની જેમ હીરવિજયસૂરિજીએ મહોત્સવપૂર્વક સંઘસહિત મથુરાપુરીમાં શ્રીસુપાર્શ્વનાથ અને શ્રી પાર્શ્વનાથ ભગવંતની પ્રતિમાનાં દર્શન કર્યાં. ॥૨૪૯॥

जम्बूप्रभवमुख्यानां मुनीनामिह स प्रभुः ।
ससप्तविंशतिं पञ्चशतीं स्तूपान्प्रणेमिवान् ॥ २५० ॥

स प्रभुर्हीरसूरिरिहैव मथुरानगर्यां जम्बूनाममहावीरदेवस्य द्वितीयपट्टधरः, चरमकेवली प्रभवनामा तृतीयः पट्टधरः, तौ मुख्यौ प्रकृष्टावाद्यौ वा येषां तेषां मुनीनामुपलक्षणात्साध्वीनामपि परं तन्मध्यवर्तिनामेव सहसप्तविंशत्या वर्तते या तादृशीं पञ्चशतीं

स्तूपान् प्रणेमिवान्नमति स्म । पञ्चशती प्रभवस्वामिसहिता चौरसाधूनां जम्बूस्वामियुक्तानामष्टानां कनीनां नवानामति [1]मातृपितृणां नव त्रिभिर्गुणिताः सप्तविंशतिर्जातं यथोक्तमानं सप्तविंशत्यधिका पञ्चशतीस्तूपाः सन्तीति ॥ मथुरायात्रा ॥

श्लोकार्थ

श्री हीरसूरिजीએ મથુરાપુરીમાં જંબૂસ્વામી અને પ્રભવસ્વામી વગેરેનાં પાંચસોને સત્તાવીશ સ્તૂપોનાં દર્શન કર્યાં. (જંબૂસ્વામી) તેમનાં માતાપિતા, આઠ કન્યાઓ, તેમનાં માતાપિતા કુલ–૨૭ અને પ્રભવસ્વામી સહિત ૫૦૦ ચોર. કુલ ૫૨૭.) ॥૨૫૦॥

गोपालशैलेऽथ सुपर्वसद्मावष्टम्भनस्तम्भ इवाभ्युपेत्य ।
समं जनौघैर्जिनसार्वभौमं ककुद्मकेतुं नतवान्व्रतीन्द्रः ॥ २५१ ॥

अथ मथुरायात्रानन्तरं व्रतीन्द्रः सूरिः जनौघैर्भविकप्रकरैः समं सार्धमुपेत्यागत्य गोपालशैले 'ग्वालेरगढ' इति लोकोक्त्या तत्र ककुद्मान् वृषभः केतुश्चिह्नं यस्यैतादृशं ऋषभस्वामिनं जिनाः सामान्यकेवलिनः तेषु तेषां मध्ये वा सार्वभौमं चक्रवर्तिनं नतवान् प्रणमति स्म । किंभूते गोपालशैले । सुपर्वसद्मनः स्वर्गस्यावष्टम्भनार्थमाधारकृते विधिना विश्वसृजा कृते स्तम्भे स्थूणा वागिव ॥

श्लोकार्थ

ત્યારપછી, હીરવિજયસૂરિજીએ સંઘસહિત ગોપાલશૈલ (ગ્વાલીયરગઢ) આવીને સામાન્ય કેવલીઓમાં ચક્રવર્તી શ્રીઋષભસ્વામીનાં દર્શન કર્યાં. તે ગોપાલગઢ જાણે સ્વર્ગલોકના આધાર માટેનો સ્તંભ ન હોય ! ॥૨૫૧॥

द्वापञ्चाशद्गजमितवृषभप्रतिमां स सिद्धशैल इव ।
प्रभुरपरा अपि तस्मिन्मूर्तीर्जैनीरनंसीत्सः ॥ २५२ ॥

स प्रभुः सूरिः सिद्धशैले शत्रुंजयपर्वते इव तस्मिन् गोपगिरौ द्वापञ्चाशतो गजा वस्त्रादिप्रमितिकरणार्थं वंशमया काष्ठमया वा यष्टिविशेषास्तैर्द्विपञ्चाशद्भिर्मिता प्रमाणीकृता या वृषभस्यादिनाथस्य प्रतिमा मूर्तिस्तामाशां वरीयाकृतित्वाद्रासक्षेपपूर्वकमनंसीत् प्रणतवान् । अपि पुनरपरा अन्या अपि जैनीर्जिनसंबन्धिनीर्मूर्तीः प्रतिमाः पञ्चाशच्चत्वारिंशत्पञ्चत्रिंशत्रिंशद्विंशत्यादिगजमानास्तथैव पूर्वप्रतिमावन्नेमिवान् ॥

[1] मध्यमपदलोपिसमासत्वेन नानङादिः प्रसक्तिः.

શ્લોકાર્થ

આચાર્યદેવે શત્રુંજયની જેમ ગોપગિરિમાં બાવનગજ પ્રમાણ શ્રીઋષભસ્વામીની પ્રતિમાને નમસ્કાર કર્યા. તેમજ પચાસ, ચાલીસ, પાત્રીસ, ત્રીશ અને વીશગજ પ્રમાણ બીજી પણ જિનપ્રતિમાઓનાં ભક્તિપૂર્વક દર્શન કર્યાં. ॥૨૫૨॥

यात्रां कृत्वात्र सुत्रामा यथा नन्दीश्वरे दिवम् ।
प्रभुर्विभूषयामास पुनरप्यागरापुरम् ॥ २५३ ॥

प्रभुः सूरिरत्र गोपगिरौ यात्रां जिनपादप्रणतिं कृत्वा भावविधिपूर्वं विधाय पुनरपि व्याघुट्य तदेवागरानाम नगरं विभूषयामासालंकृतवान् । दृष्टान्तमाचष्टे—यथा सुत्रामा सौधर्मेन्द्रः नन्दीश्वरे जम्बूद्वीपादष्टमे द्वीपे भगवत्कल्याणकादिकाष्टाह्निकादिषु यात्रां गीतनृत्यकारापणादिमहोत्सवं निर्माप्य पुनरपि दिवं स्वर्लोकं भूषयति ॥ इति गोपगिरियात्रा ॥

શ્લોકાર્થ

જેમ સૌધર્મેન્દ્ર નંદીશ્વરદ્વીપમાં ભગવંતના કલ્યાણક મહોત્સવ આદિ મહોત્સવપૂર્વક યાત્રા કરીને સ્વર્ગલોકને અલંકૃત કરે તેમ આચાર્યદેવે ગોપગિરિની યાત્રા કરીને ફરીથી આગ્રાનગરને અલંકૃત કર્યું. ॥૨૫૩॥

यः सेरद्विकखण्डलम्भनिकया ख्यातोऽखिले मण्डले
श्रद्धावानिह मेदिनीपुरसदारङ्गः प्रभोर्भक्तितः ।
सोऽदान्मूर्तमिवेन्द्रकुम्भिनमिभं लक्षप्रसादं पुन-
र्वाहानां नवतिं च काञ्चनमणीस्वर्णांशुकाद्यर्थिनाम् ॥ २५४ ॥

तस्मिन्नवसरे इहागरानगरे सः दानशक्त्या प्रसिद्धो मेदिनीपुरस्य मेडतानगरस्य वास्तव्यः सदारङ्गनामा श्रद्धावान् श्रावकः प्रभोः सूरीन्द्रोरुपरि भक्तितः भक्तिवशात्रागातिशयात् । अर्थिनां याचकानामिति सर्वत्र योज्यम् । मूर्तं मूर्तिमन्तं भूमावागतमिन्द्रकुम्भिनमैरावणमिव इभं गजोचितपरिकरादिकलितकरिणमदाद्ददौ । पुनर्लक्षप्रसादं 'लाखपसाय' इति जनप्रसिद्धिः च पुनर्वाहानां जात्यतुरङ्गाणां नवतिं नवतिप्रमाणानश्वान् ददिवान् । पुनः काञ्चनैः सुवर्णमणीभिः रत्नैः उपलक्षिता स्वर्ण मुद्रा अङ्गुलीयकानि । 'साक्षराङ्गुली मुद्रा' इति हैम्याम् । 'वेढवीटी' इति प्रसिद्धा । तथा अर्थिनां अंशुकानि नानाविधवस्त्राणि । आदिशब्दादुर्णायवः 'सखलातपामरी' इति जनप्रसिद्धाः । दत्ते स्म । श्रूयते हि—कस्मिन्नपि व्यतिकरे पातिसाहिमार्गणेन सूरीन्द्रः करीन्द्रमज्ञानाद्याचितः । तदवसरे च करिराजसमर्पकं सकलसंघमनुनीय सदारङ्गसाधुः स्वयमेव श्रीहीरविजयसू-

रीन्द्रोरुपरि न्युञ्छनं निर्माय तस्य साहिडुम्बकस्य सर्वगजोपकरणपरिकलितं गजं परस्य कस्यापि तादृशस्य लक्षप्रसादमन्येषां च नवतिं तुङ्गतुरङ्गमानां परेषां च वस्त्रस्वर्णमणिभूषणौर्णायुप्रमुखं प्रदत्तवानिति । स कः। यः सदारङ्गश्राद्धः सेरयोर्लोकप्रसिद्धयोर्मानविशेषयोर्द्विकं युगलं तन्मितानां खण्डानां मधुधूलीनां लम्भनिकया प्रतिमथनप्रदानेनाखिले मण्डले ख्यातः प्रसिद्धिमान् जातोऽस्ति ॥ इति श्रीहीरविजयसूरिश्राद्धदानम् ॥

श्लोकार्थ

તે વખતે આગ્રાનગરીમાં બે રતલ શર્કરાના દાન વડે દેશમાં પ્રસિદ્ધિ પામેલો મેડતાનગરના રહેવાસી સદારંગ નામના શ્રાવકે આચાર્યદેવની ભક્તિથી હાથીઓને ઉચિત આભૂષણો અને પલાણ સહિત ઐરાવણ સમાન હાથી, નેવું ઘોડા, રેશમી વસ્ત્રો, સુવર્ણ અને રત્નોનાં આભૂષણો વાચકોને દાનમાં આપ્યાં. ॥૨૫૪॥

मुक्त्वामात्यमिवावनीशसविधे शान्त्यादिचन्द्राभिधो-
पाध्यायं प्रविधाय तत्र विषये वर्षाश्चतस्रः स्वयम् ।
श्रीकम्मातनयव्रतीन्द्रविलसत्संघाग्रहाद्गुर्जरा-
द्गच्छन्नागपुरे स्म तिष्ठति चतुर्मासीं स नागेन्द्रवत् ॥ २५५ ॥

स सूरिर्नागपुरे नगरे प्रसिद्धे नगरे चतुर्मासीं वर्षासमयं तिष्ठति स्म । किंवत्। नागेन्द्रवत् । यथा नागानां राजा नागपुरे भोगवत्यां नगर्यां तिष्ठति । किं कुर्वन् । श्रिया: आचार्यलक्ष्म्या कलितो यः कम्माख्यसाधोस्तनयः पुत्रो व्रतीन्द्रः सूरिरेतावता विजयसेनसूरिस्तेन विलसन् शोभमानो यो गुर्जरदेशसंघः साधुसाध्वीश्रावकश्राविकारूपसमुदायस्तस्याग्रहात्पुरोधाद्गुर्जरानुधरित्रीपदं प्रति गच्छन् प्रतिष्ठमानः । किं कृत्वा । अमात्यं सचिवमिव अवनीशस्याकब्बरपातिसाहेः सविधे संनिधाने शान्तिरिति पदमादौ यस्य तादृशं चन्द्रोपाध्यायम् । शान्तिचन्द्रवाचकमित्यर्थः। मुक्त्वा कार्यकरणार्थं संस्थाप्य पुनस्तत्र मेवातनाम्नि विषये मण्डले स्वयमात्मना चतस्रश्चतुःसंख्याकाः वर्षाः प्रावृट्कालप्रतिबद्धाश्चतुर्मासीः प्रविधाय कृत्वा । स्थित्वेत्यर्थः॥ इति मेवातमण्डलादागत्य नागपुरे चतुर्मासककरणम् ॥

श्लोकार्थ

શ્રીહીરવિજયસૂરિજીએ પોતાના મંત્રીસમાન શાંતિચન્દ્ર ઉપાધ્યાયને અકબર બાદશાહ પાસે મૂકીને, મેવાડમંડળમાં ચાતુર્માસ પૂર્ણ કરીને, વિજયસેનસૂરિજી વડે શોભતા ચાતુર્વિધ સંઘના આગ્રહથી ગુર્જરદેશ તરફ જતા આચાર્યદેવે પ્રસિદ્ધ નાગપુર (નાગોર)માં નાગેન્દ્રની જેમ ચાતુર્માસિક સ્થિરતા કરી. ॥૨૫૫॥

तस्मिञ्जगन्मल्लमहीन्द्रमन्त्री मेहाजलो नाम वणिङ्महेन्द्रः ।
भक्तिं व्यधात्कॢप्तमहो मुनीन्दोः पद्मावतीकान्त इवाहिकेतोः ॥ २५६ ॥

तस्मिन्नागपुरे जगन्मल्लो जगमाल इति नाम्ना महीन्द्रो राजा तस्य मन्त्री प्रधानो मेहाजल इति नाम वणिक्सु नैगमेषु महेन्द्र इन्द्रसदृशः मुनीन्दोः सूरीन्द्रस्य भक्तिं सेवां पर्युपासनां व्यधात् चकार । किंभूतः । कॢप्तो निष्पादितोऽखिलपुरजन्मार्यानार्यजनैर्मह उत्सवो येन । क इव । पद्मावतीकान्त इव । यथा धरणेन्द्रः अहिकेतोः श्रीपार्श्वनाथस्य स्वस्य नागेन्द्रपदप्रदानप्रमोदेनान्यप्रकारेण वा महोत्सवं कुर्वन् भक्तिं विधत्ते ॥

श्लोकार्थ

જેમ ધરણેન્દ્ર મહોત્સવપૂર્વક શ્રી પાર્શ્વનાથ ભગવંતની ભક્તિ કરે તેમ નાગપુરના રાજા જગપાલના વણિકકુલમાં શ્રેષ્ઠ 'મેહાજલ' નામના મંત્રીએ મહોત્સવપૂર્વક આચાર્યદેવની ભક્તિ કરી. ॥૨૫૬॥

श्रीमज्जेसलमेरुनामनगरादागत्य संघान्वितः
कोष्ठागारिकमाण्डणो मुनिमणिं सौवर्णटङ्कैर्मुदा ।
सिद्ध्यै स्वर्मणिवत्प्रपूज्य तृणयंल्लक्ष्मीं पुनस्तत्पुरे
नानादानविधौचितीं प्रकटयांचक्रे यथा विक्रमः ॥ २५७ ॥

कोष्ठागारिकः धान्यकोष्ठाध्यक्षः लोकप्रसिद्ध्या 'कोठारी' माण्डणः । 'ग्रामनाम्नोः संस्काराभावः क्वचित्' इति वचनान्माण्डणः । संस्कारे तु मण्डन इति नाम्ना वणिक् श्राद्धः तस्मिन्नागपुरे पुनरित्यन्यार्थे अन्यानां नानाविधानां दानानां स्वर्णरजताशुकोर्णायुखण्डघृताद्यनेकप्रकाराणां विश्राणनानां विधा विधयः प्रकारा वा तेषामौचितीमुचिततामौचित्यं प्रकटयांचक्रे प्रकाशयामास । दृष्टान्तमाचष्टे—यथा विक्रमो विक्रमादित्यः नानादानविधौचितीं प्रकटीचक्रिवान् । माण्डणः किं कुर्वन् । तत्पुरे तस्मिन्नागपुरनगरे स्वलक्ष्मीं निजविभवं तृणयन् तृणमिव गणयन् । विविधलम्भनिकाभिर्याचकदानैश्चेत्यध्याहारः । किं कृत्वा । मुदा हर्षेण सिद्ध्यै महानन्दप्राप्तये मुनिमणिं हीरविजयसूरिपुरंदरं सौवर्णटङ्कैः 'सोनइयाइ' इति प्रसिद्धैः प्रपूज्यार्चयित्वा । किंवत् । स्वर्मणिवत् । यथा कोऽपि सिद्ध्यै स्वार्थसंप्राप्तये विभवार्थं चिन्तामणिं पूजयति । किं कृत्वा । श्रीमतो लक्ष्मीः दुर्गादिशोभा वा विद्यते यस्मिंस्तादृशं यज्जेसलमेरुनामाभिधानं यस्य तादृशान्नगरात् । जेसलमेरुपुरादित्यर्थः । आगत्य । किंभूतो मण्डनः । संघेन । यद्यपि संघशब्देन चातुर्वर्ण्यं गृह्यते, तथाप्यत्राधिकारात् श्राद्धश्राद्धीसार्थनान्वितः सहितः ॥

શ્લોકાર્થ

કોઠારી 'મંડન' નામના શ્રાવકે જેસલમેર નગરથી સંઘસહિત નાગપુરમાં આવીને, જેમ કોઈ સિદ્ધિને માટે ચિંતામણિરત્નની પૂજા કરે તેમ આચાર્યદેવની સૌનેયા વડે પૂજા કરીને લક્ષ્મીને તૃણની જેમ માનતા મંડનકોઠારીએ વિક્રમાર્કની જેમ સુવર્ણ, ચાંદી, વસ્ત્ર આદિ અનેક પ્રકારની દાનવિધિને પ્રગટ કરી ॥૨૫૭॥

परेऽपि तत्रो पागत्य संघाः स्थानं निजं निजं ।
तीर्थानिव विभोः पादानभिवंद्य ययुः क्रमान् ॥ २५८ ॥

परेऽपि अन्यान्यनगरसंबन्धिनः संघाः क्रमात्तत्र नागपुरे उपागत्य समेत्य विभोर्ही रसूरेः पादांश्चरणानभिवन्द्य नमस्कृत्य निजं निजं स्वं स्वं स्थानं नगरामग्रादिकमास्पदं ययुर्गताः । कानिव । अभिवन्द्य तीर्थानिव । यथा संघा विविधग्रामनगरजनपदसंबन्धिनः श्राद्धीसखश्राद्धसार्थाः शत्रुंजयोज्जयन्तार्बुदाष्टापदसमेतशिखरादिषु विभोर्भगवतः पादान् जिनबिम्बान जिनपादुकान्वा अभिवन्द्य प्रणम्यार्चित्वा च निजनिजस्थानं यान्ति ॥

શ્લોકાર્થ

જેમ શત્રુંજય, ગીરનાર આદિ તીર્થસ્થાનોમાં, નગરો, ગામો, અને દેશોના અનેક સંઘો આવીને શ્રીજિનેશ્વર ભગવંતની પ્રતિમાજીનાં દર્શન, વંદન અને પૂજન કરીને સૌ સૌના સ્થાને જાય તેમ અનેક નગરોના સંઘો આવીને શ્રીહીરવિજયસૂરિજીનાં દર્શન, વંદન અને પૂજન કરીને સૌ સૌના સ્થાને ગયા. ॥૨૫૮॥

यदन्यनीवृत्ततिमुद्रिकायां बिभर्ति माणिक्यमिवात्र लक्ष्मीम् ।
क्रमात्प्रतिक्रम्य स तत्पुरे चतुर्मासीं विहारं विदधे व्रतीश्वरः ॥ २५९ ॥

स सूरिः क्रमात्पर्युषणापरिपाट्या तत्पुरे तस्मिन्नागोरनगरे चतुर्मासीं प्रतिक्रम्य अथ वा कार्तिकचतुर्मासकं प्रतिक्रम्य व्रतीश्वरो यतिराजो हीरसूरिर्विहारं विदधे विहितवान प्रतिष्ठते स्म । तत्किम् । यत्पुरम् अन्येऽपरे ये नीवृतो जनपदास्तेषां ततिः श्रेणिः सैव मुद्रिका अङ्गुलीयकं तस्यां माणिक्यं महर्घ्यमणिरिवात्र भूमण्डले लक्ष्मीं शोभां बिभर्ति धत्ते । 'और देस सब मुंदडी उर नागोर नगीना' इति तत्रत्यजनैः प्रसिद्धिरद्ययावत् श्रूयते ॥ इति नागपुरचतुर्मासकम् ॥

શ્લોકાર્થ

બીજા દેશોની શ્રેણીરૂપ મુદ્રિકામાં માણેકસમાન શોભાને ધારણ કરતા નાગોરનગરમાં ચાતુર્માસિક પ્રતિક્રમણ કરીને આચાર્યદેવે ત્યાંથી વિહાર કર્યો. ॥૨૫૯॥

पींपाढिनाम्नि स्वपुरे प्रभोर्मरुत्पुरोपमे नागपुरादुपेयुषः ।
तालाह्वसाधुर्व्यधिताकोत्सवं तदा प्रदेशीव मुदान्तिमार्हतः ॥ २६० ॥

तदा तस्मिन्सूरिसमागमनावसरे पींपाढि इति नाम यस्य तस्मिन् पींपाढिनाम्नि स्वपुरे आत्मीयनिवसननगरे ताला इत्याह्वा नाम यस्य तादृशः साधुर्वणिक् । तालोसाह इत्यर्थः । प्रभोर्हीरसुरेरधिकमतिशायिनमुत्सवं व्यधित कृतवान् । प्रभोः किं चकुषः । नागपुरादुपेयुषः आजग्मुषः । किंभूते स्वपुरे । मरुत्पुरोपमे मरुतो देवास्तेषां पुरं पत्तनममरावती तस्योपमा सादृश्यं यस्य तादृशे । क इव । प्रदेशीव । यथा केशीप्रतिबोधितप्रदेशी नामा नृपतिः अन्तिमार्हतश्चरमतीर्थकृतः श्रीमहावीरस्वामिनः छद्मस्थात्वयामप्रतिबद्धं विहरतः स्वपुरं स्वकीयश्वेताम्बीनगर्यां समागतस्यात्यभ्यधिकमहोत्सवं विधत्ते स्म । किं च श्रीसूरीणामागमनावसरे आउआपुरे तालाह्व आसीत् । तदवसरे तु पातिसाहेरायत्तत्वात्पींपाढिनगरे निवसतीति तात्पर्यम् ॥

શ્લોકાર્થ

ચરમતીર્થપતિ મહાવીર પરમાત્મા છદ્મસ્થ અવસ્થામાં અપ્રતિબદ્ધ વિહાર કરતા 'શ્વેતાંબી' નગરીમાં પધારેલા ત્યારે પરદેશીરાજાએ જેમ મહોત્સવ કરેલો તેમ સ્વર્ગપુરી સમાન 'પીપાડ' નામના નગરમાં પધારતા આચાર્યદેવનો 'તાલોસાહ' નામના શ્રાવકે પૂર્વે આઉઆ નગરમાં પ્રવેશમહોત્સવ કર્યો હતો તેનાથી અધિક ઘણા જ હર્ષપૂર્વક પ્રવેશમહોત્સવ કર્યો. ॥૨૬૦॥

ग्रामाश्वद्विपताम्रखान्यधिपतिः सामन्तवद्योऽजनि
श्रीमालान्वयभारमल्लतनयः श्रीइन्द्रराजस्तदा ।
आह्वातुं सुगुरून्स्वकीयसचिवास्तेनाथ संप्रेषिताः
प्रासादे निजकारिते भगवतां मूर्तिप्रतिष्ठाकृते ॥ २६१ ॥

तदा तस्मिन् पींपाढिपुरपादावधारणप्रस्तावे श्रिया युक्त इति नामा वणिक् वर्तते । किंभूतः । श्रीमाल इत्यन्वयो वंशो यस्य तादृशो यो भारमल्लस्तस्य तनयः पुत्रः । पुनः किंभूतः । ग्रामाणां पञ्चशतीजिनानां संनिवेशानां तथा अश्वानां तुरंगमाणां तथा द्विपानां हस्तिनां तथा ताम्राणां खानेराकरस्याधिपतिः स्वामी । किंवत् । सामन्तवत् । यथा सामन्तः सीमालभूपालः कतिचिद्ग्रामपुराधिपतिः सामान्यनृपः ग्रामाश्वद्विपखान्यधिपतिः स्यात् । राजन्यानां तु 'वागिउ' इति, यवनानां तु 'उंवरो' इति प्रसिद्धस्तत्तुल्य इति । अथ प्रभोर्मरुदेशे समागमनानन्तरं तेनेन्द्रराजेन सुगुरून् हीरविजयसूरीन् आह्वातुं स्वविराटनगरे आकारयितुं स्वकीयसचिवा निजप्रधानपुरुषाः संप्रेषिताः प्रस्थापिताः । किमर्थम् ।

निजेनात्मना कारिते निर्मापिते प्रासादे विहारे भगवतां तीर्थकृतां मूर्तिप्रतिष्ठाकृते प्रतिमां प्रतिष्ठापयितुम् ॥

શ્લોકાર્થ

સામંતરાજાની જેમ પાંચસો ગામ, ઘોડા, હાથી અને તાંબાની ખાણના અધિપતિ શ્રીમાલવંશીય ભારમલ નામના શ્રેષ્ઠીના પુત્ર 'ઇન્દ્રરાજ' સામંતે પોતાના બંધાવેલા જિનપ્રાસાદમાં જિનમૂર્તિની પ્રતિષ્ઠા કરાવવા માટે પીપાડનગરમાં બિરાજમાન આચાર્ય ભગવંતને પોતાના 'વિરાટ' નગરમાં પધારવા માટે પોતાના પ્રધાનોને મોકલ્યા. ॥૨૬૧॥

ज्ञात्वा शक्तिमितो विराटनगरे गन्तुं प्रभुः स्वामय
श्रीहर्षाङ्गजवाचका वनिर्माणं प्रैषीत्तदाभ्यर्णगं ।
स्वीयां मूर्तिमिवापरं सपदि स प्राप्य क्रमात्तत्पुरं
क्लृप्तैस्तेन महामहैर्विरचयांचक्रे प्रतिष्ठा ततः ॥ २६२ ॥

अथ विज्ञप्तेरनन्तरं सूरिवरः अभ्यर्णगं समीपस्थायिनं श्रीहर्षाङ्गजवाचकं श्रिया वाचकलक्ष्म्या युक्तं हर्षा इति नाम्नो वणिजः अङ्गजं नन्दनं कल्याणविजयनामानं वाचकेष्ववनिर्माणमुपाध्यायराजं प्रैषीत तत्र प्रस्थापयति स्म । उत्प्रेक्ष्यते—अपरामन्यां स्वीयामात्मीयां मूर्ति किं तनूमिव स्वप्रतिमामिव । किं कृत्वा । स्वामात्मीयामशक्तिं शरीरासामर्थ्यं ज्ञात्वा अवधार्य । किं कर्तुम् । इतः पींपाडिपुरात् मेवातमण्डलस्थविराटनगरे गन्तुं प्रयातुम् । ततः प्रेषणानन्तरं सोऽपि वाचकेन्द्रोऽपि सपदि शीघ्रमनविच्छिन्नप्रयाणैः क्रमाद्ग्रामानुग्रामविहारपरिपाट्या तत्पुरं विराटनगरं प्राप्यासाद्य क्लृप्तैर्निर्मितैरसाधारणैस्तस्य तेन च महामहैः प्रतिष्ठां विरचयांचक्रे कृतवान ॥

શ્લોકાર્થ

પીપાડનગરથી મેવાડદેશમાં આવેલા વિરાટ નગરમાં જવા માટેની પોતાની શરીરની અશક્તિ જાણીને, પ્રધાનોની વિજ્ઞપ્તિ લક્ષમાં લઈને પોતાની પાસે રહેલા કલ્યાણ વિજય ઉપાધ્યાયને વિરાટનગર તરફ વિહાર કરાવ્યો. તેઓએ પણ અવિચ્છિન્ન વિહાર વડે વિરાટનગરમાં પહોંચીને અપૂર્વ મહોત્સવપૂર્વક જિનમૂર્તિની પ્રતિષ્ઠા કરી. ॥૨૬૨॥

रत्नस्वर्णसुवर्णकोपलमयाप्तार्चाप्रतिष्ठाक्षणे
हस्त्यश्वांशुकभूषणाशनमुखानेकप्रकारैस्तदा ।
भोजेनेव पुनर्गृहीतवपुषा विश्वार्थिदौस्थ्यच्छिदे
चत्वारिंशदनेन रूपकसहस्राणि व्ययीचक्रिरे ॥ २६३ ॥

तदा तस्मिन् रत्नानि स्फटिकादीनि स्वर्णं काञ्चनं सुवर्णकं पित्तलम् । यदुक्तं हैम्याम्—'रीरीरीरीवरीतिश्च पित्तलोहं सुवर्णकम्' इति । उपलः मम्माणीखनिजन्मा पाषाणस्त एव स्वरूपं यासां तादृशा आप्तानां जिनानामर्चाः प्रतिमाः तासां प्रतिष्ठाक्षणे स्थापनमहोत्सवे इन्द्रराजेन हस्तिनो गजाः अश्वा वाजिनः अंशुकानि वस्त्राणि भूषणान्याभरणानि अशनानि जेमनवरा मुखानि आद्यानि येषु तादृशैरनेकैर्बहुविधैः प्रकारैः कृत्वा चत्वारिंशन्मितानि रूपकाणां रूप्यटङ्कानां 'रूपया' इति प्रसिद्धानां सहस्राणि व्ययीचक्रिरे व्ययीकृतानि । उत्प्रेक्ष्यते—विश्वेषां सर्वेषामर्थिनां याचकानां दौस्थ्यच्छिदे दारिद्र्यच्छेदनाय पुनर्द्वितीयवारं गृहीतवपुषा उपात्तदेहेन भोजेनेव धाराधिराजभोजदेवेनेव ॥ इति विराटनगरप्रतिष्ठा ॥

શ્લોકાર્થ

રત્ન, સુવર્ણ, પંચધાતુ અને આરસ આદિની બનાવેલી જિનમૂર્તિઓની પ્રતિષ્ઠા પ્રસંગે વિરાટનગરીના રાજા ઇન્દ્રરાજે હસ્તિ, અશ્વ, વસ્ત્ર, આભૂષણ અને સ્વામિવાત્સલ્ય (જમણ) આદિનું દાન આપીને ચાલીશ હજાર રૂપિયાનો વ્યય કર્યો. તે જાણે જગતના યાચકોની દરિદ્રતા છેદવા માટે ધારાનગરીના રાજા ભોજે ફરીથી અવતાર ગ્રહણ કર્યો ન હોય ! ॥૨૬૩॥

श्रीरोहिण्याः प्रतिष्ठायै संश्रुतायै स्वयं प्रभुः ।
ततः प्रतस्थे यत्साधोः स्थितिर्नैकत्र भृङ्गवत् ॥ २६४ ॥

प्रभुर्हीरसूरिस्ततः पींपाढिपुरतः प्रतस्थे प्रचलितः । कस्यै । श्रीरोहिण्याः शिवपुर्याः प्रतिष्ठायै शिवपुरीश्राद्धकारितचतुर्मुखप्रासादतद्बिम्बानां च प्रतिष्ठाकृते । किंभूतायै प्रतिष्ठायै । संश्रुतायै इन्द्रराजसचिवागमनात्प्रथममङ्गीकृतायै स्वयमात्मनैव प्रस्थाने । युक्तोऽयमर्थः—यद्यस्मात्कारणात् साधोः संयमिन स्थितिर्वास एकत्र न स्यात् एकस्मिन्नेव स्थाने न स्यादेव नैव भवेत् । किंवत् । भृङ्गवत् । यथा भ्रमरस्य एकत्र स्थितिर्न स्यात् । यत उक्तम्—'समाणाणं सउणाणं भ्रमरकुलाणं गोकुलाणं च । अणिआउवसहीउसारयाणं च मेहाणम् ॥' इति ॥

શ્લોકાર્થ

ઇન્દ્રરાજના પ્રધાનોના આગમન પહેલાં જ સિરોહીનગરીની વિજ્ઞપ્તિ સ્વીકારનારા આચાર્યદેવે સીરોહીનગરીના ભવ્ય ચતુર્મુખ જિનપ્રસાદમાં ભગવંતની પ્રતિષ્ઠા કરાવવા માટે પીપાડનગરથી વિહાર કર્યો. ખરેખર ! સાધુઓ ભ્રમરની જેમ એક સ્થાને રહેતા નથી. ॥૨૬૪॥

वरकाणकमागत्य पुरं सूरिपुरंदरः ।
वरकाणकपार्श्वेशं साक्षात्पार्श्वमिवानमत् ॥ २६५ ॥

सूरिपुरंदरो हीरविजयसूरिः वरकाणकनाम्ना पार्श्वयक्षस्य ईशं स्वामिनं पार्श्वं पवेशो विश्वनायकः तमनमन्नमस्करोति स्म । उत्प्रेक्ष्यते—साक्षात्प्रत्यक्षं स्वयमेवमुक्तेरभ्यायातं श्रीपार्श्वनाथमिव । किं कृत्वा । वरकाणकमित्यभिधानं पुरमागत्य समेत्य ग्रामनाम्नैव श्रीपार्श्वनाथाभिधानम् । श्रीशङ्खेश्वरपार्श्वनाथवत् ॥

श्लोकार्थ

श्रीहीरविजयसूरिजीએ વરકાણા આવીને પાર્શ્વયક્ષના અધિપતિ વરકાણા પાર્શ્વનાથ ભગવંતનાં દર્શન કર્યાં તે જાણે સાક્ષાત્ સદેહે પાર્શ્વપ્રભુ જ ન હોય ! ॥૨૬૫॥

आगादथाभिमुखमस्य पुरादमुष्मा-
दागच्छतो विजयसेनगुरुर्गणेन्दोः ।
विश्वोपकारकृतिनौ मिलितौ मिथस्तौ
तीर्थाधिभूगणधराविव दिद्युताते ॥ २६६ ॥

अथेत्यपराधिकारे अस्माद्वरकाणकपुरादागच्छतः शिवपुर्यां समवसरतः अस्य गणेन्दोर्हीरविजयसुरेर्विजयसेननामा गुरुराचार्यः अभिमुखं संमुखमागाद्यायौ तथा तौ भट्टारकाचार्यौ मिथः परस्परं मिलितौ संगतौ दिद्युताते राजतः । किंभूतौ । विश्वेषां जगतां समस्तभव्यजीवानां वा उपकारो बोधिबीजदानादिस्तत्र कृतिनौ चतुरौ । उत्प्रेक्ष्यते—तीर्थाधिभूस्तीर्थंकरस्तथा गणधराविव ॥

श्लोकार्थ

વરકાણાનગરથી શિવપુરીમાં પધારતા આચાર્યદેવ હીરવિજયસૂરિજીની સામે વિજયસેનસૂરિજી પધાર્યા. તે જાણે, તીર્થંકર અને ગણધરની જેમ જગત પર ઉપકાર કરવા માટે જ પરસ્પર મળ્યા ન હોય ! ॥૨૬૬॥

उत्तंसैरिव पत्कजैः शिवपुरीं संप्राप्य भूषां परां
प्रासादे च चतुर्मुखे ध्रुव इव श्रीमन्महोक्षध्वजम् ।
चैत्येऽन्यत्र पुनर्गजध्वजजिनं बिम्बैरनेकैः समं
प्रत्यस्थापयदासपालविलसन्नेताप्रणीतोत्सवैः ॥ २६७ ॥

स हीरसूरिः ध्रुव इव ब्रह्मणीव चत्वारि मुखानि आननानि यस्य तादृशे प्रासादे विहारे श्रीमन्तं त्रैलोक्यलक्ष्मीकलितं महोक्षध्वजं वृषभकेतनमादिनाथं पुनरन्यत्र चैत्ये जिनगृहे गजध्वजं हस्तिलाञ्छनमजितनाथं जितं तीर्थकरं प्रत्यस्थापयत्प्रत्यतिष्ठिपत् । कथम् । समं सार्धम् । कैः । अनेकैः शतसंख्यैर्बिम्बैर्जिनप्रतिमाभिः । कैः । आसपालनाम्ना संघपतिना तथा विलसता शोभमानेन नेतानामसाधुना प्रणीतैः कृतैरुत्सवैः महामहैः । आसपालसंघपतिना चतुर्मुखप्रासादे आदिनाथस्य प्रतिष्ठा कारिता, नेताकेन श्रीअजितनाथ-चैत्ये श्रीअजितनाथस्य प्रतिष्ठा निर्मिता इति तत्त्वम् । किं कृत्वा । उत्तंसैः शेखरैः इव पत्कञ्जैः चरणारविन्दैः शिवपुरीं श्रीरोहिणीनगरीं परां प्रकृष्टां भूषां शोभां संप्राप्य लम्भयित्वा । ण्यन्तत्वाद्विकर्मकत्वम् ॥

શ્લોકાર્થ

ત્યારપછી શ્રીહીરવિજયસૂરિજીએ પોતાનાં ચરણકમલ વડે શિવપુરી (સીરોહી)ને અલંકૃત કરી. બ્રહ્માની જેમ ચતુર્મુખ જિનપ્રાસાદમાં 'આસપાલ' નામના સંઘપતિએ બીજા જિનબિંબોની સાથે શ્રીઋષભદેવની પ્રતિષ્ઠા કરી. અને 'નેતા' નામના સુંદર શ્રેષ્ઠીએ કરેલા મહોત્સવપૂર્વક શ્રીઅજિતનાથના ચૈત્યમાં શ્રીઅજિતનાથ પ્રભુની પ્રતિષ્ઠા કરી. ॥૨૬૭॥

आरुह्यार्बुदभूधरं जिनपतीन्नत्वा पुनर्गुर्जरा-
न्प्रस्थातुं स्पृहयन्महीपतिसुरत्राणेन मन्त्रीश्वरैः ।
आगृह्यायममारिनिर्मितिकरव्यामुक्तिपूर्वं समा-
हूतो भूषितवांस्ततः शिवपुरीं वर्षागमे सूरिराट् ॥ २६८ ॥

ततः प्रतिष्ठाकरणानन्तरमयं सूरिराट् हीरविजयसूरीन्द्रो वर्षागमे चतुर्मासके शिवपुरीं पुनर्भूषितवानलंकरोति स्म । किंभूतः । महीपतिना सुरत्राणनाम्ना नृपेण मन्त्रीश्वरैः स्वमुख्यप्रधानपुरुषैः सकलेऽपि स्वमण्डले अमारिनिर्मितिर्जीवदयापालनं तथा कराणां राजदेयांशानां जनदण्डानां च व्यामुक्तिर्मोचनं पूर्वं यथा स्यात्तथा । यावन्तं समयं श्रीपूज्या मन्नगरीमलंकरिष्यन्ति तावत्कालं मदीयाखिलमण्डले अमारिं तथा जनेषु करदण्डमोचनं करिष्यामीति वाग्बन्धपूर्वकमित्यर्थः । आगृह्याग्रहं कृत्वा मन्त्रीश्वरैः स्वप्रधानपुरुषैः समाहूतः सम्यक्प्रकारेण संमानदानपूर्वकमाकारितः । सूरिराट् किं कुर्वन् । अर्बुदभूधरं हिमाद्रिनन्दनशैलाधित्यकामारुह्याध्यास्य पुनर्जिनपतीन् चैत्येषु भगवत्प्रतिमां नत्वा प्रणम्य पुनर्गुर्जरान् गुर्जरजनपदं प्रति प्रस्थातुं स्पृहयन् । पुनःशब्दो घण्टालालान्यायेनोभयत्रापि योज्यते ॥ इति शिवपुर्यां प्रतिष्ठाद्वयपूर्वकं चतुर्मासकम् ॥

શ્લોકાર્થ

ત્યારબાદ આબૂ ઉપર રહેલા જિનચૈત્યોનાં દર્શન વંદન કરીને ગુર્જરદેશ તરફ

જવા ઇચ્છતા હીરવિજયસૂરિજીને 'જયાં સુધી આચાર્યદેવની સ્થિરતા થાય ત્યાં સુધી મારા સમસ્ત રાજ્યમાં 'અમારિપ્રવર્તન' અને પ્રજા ઉપરના કર રદ કરવા', આવા સંકલ્પથી સીરોહીના રાજા સુરત્રાણે ચાતુર્માસિક સ્થિરતા કરવા માટે પોતાના પ્રધાનો દ્વારા આગ્રહ કર્યો; તેથી આચાર્યદેવે વર્ષાકાળમાં સીરોહીને વિભૂષિત કરી. ॥૨૬૮॥

हेमसूरीश्वरेणेवाणहिल्लपुरपत्तनम् ।
क्रमाद्विहरता तेनालंचक्रे व्रतिचक्रिणा ॥ २६९ ॥

क्रमाच्चतुर्मासकप्रतिक्रमणानन्तरं पारणके विहरता क्रमाद्ग्रामानुग्रामं सुखं सुखाद्वा विहारं कुर्वता तेन व्रतिचक्रिणा सूरीन्द्रेणहिल्लपुरं नाम पत्तनमलंचक्रे । केनेव । हेमसूरीश्वरेणेव । यथा हेमचन्द्रसूरिपुरंदरेण पत्तनमलंक्रियते ॥ इति गुर्जरदेशागमनम् ॥

શ્લોકાર્થ

કાર્તિક ચાતુર્માસિક પ્રતિક્રમણ કરીને સુખપૂર્વક વિહાર કરતા આચાર્યદેવે શ્રીહેમચન્દ્રાચાર્યની જેમ અણહિલ્લપાટણને અલંકૃત કર્યું. ॥૨૬૯॥

निःशेषोचितकर्मकर्मठधियं वाचैव वाचस्पतिं
मुक्त्वा तत्र च भानुचन्द्रविबुधाधीशं गुरूणां गिरा ।
श्रीमद्वाचकशान्तिचन्द्रगणिनेत्याख्यायि साहेः पुरः
शिष्टिः स्याद्यदि वः प्रयामि तदहं नन्तुं गुरूनुत्सुकः ॥ २७० ॥

श्रीमान् शोभाकलितो वाचक उपाध्यायः शान्तिचन्द्रगणिना शान्तिचन्द्रोपाध्यायेन साहेरकब्बरस्य पुरोऽग्रे इत्याख्यायि प्रोक्तम् । इति किम् । यदि वो युष्माकं शिष्टिराज्ञा स्यात् तदा उत्सुक उत्कण्ठितोऽहं गुरून् हीरसूरीन्नन्तुं नमस्कर्तुं गच्छामि । किं कृत्वा । गुरूणां सूरीणां गिरा शासनेन भानुचन्द्रनामानं विबुधाधीशं प्राज्ञपतिं तत्र फतेपुरे साहिपार्श्वे वा मुक्त्वा संस्थाप्य । किंभूतं भानुचन्द्रविबुधाधीशम् । निःशेषाणि समस्तानि उचितानि साहिकथनयोग्यानि यानि कर्माणि कार्याणि तेषु कर्मठा कार्यशूरा प्रतिभा प्रज्ञा मतिर्यस्य । पुनः किंभूतम् । वाचा वाग्विलासेन कृत्वा वाचस्पतिं बृहस्पतिमिव ॥

શ્લોકાર્થ

શ્રીશાંતિચન્દ્ર ઉપાધ્યાયે અકબર બાદશાહની આગળ આ પ્રમાણે કહ્યું : 'સર્વ કાર્ય કરવામાં નિપૂણ પ્રતિભાવાળા અને વાણીમાં બૃહસ્પતિ સમાન વિદ્વદ્ શિરોમણિ

ભાનુચન્દ્ર ઉપાધ્યાયને આપની પાસે મૂકીને હે રાજન, આપની અનુજ્ઞા હોય તો ગુરુદેવની આજ્ઞાથી ગુરુદર્શન માટે ઉત્સુક બનેલો હું ગુરુદેવને વંદન કરવા માટે જાઉં.' ॥૨૭૦॥

प्रह्लादेन ततो गुरून्प्रति निजात्पार्श्वात्स जेजीयका-
मारीणां फुरमानढौकनकरः संदेशवाचो वहन् ।
श्रीमत्सूरिसितांशुशासनकृपाकोशानिशश्रावण-
च्छेकः प्रैषि नृपेण वाचकवरः शान्त्यादिचन्द्राभिधः ॥ २७१ ॥

तत आदेशमार्गणानन्तरं नृपेणाकब्बरेण निजात्स्वकीयात्पार्श्वात्समीपात्प्रह्लादेन शान्त्यादिचन्द्राभिधः वाचकेषु विधुः शान्तिचन्द्रोपाध्यायः गुरून श्रीहीरविजयसूरीन्द्रान् प्रति प्रैषि प्रस्थापितः । किंभूतः । जेजीयकाख्यो गौर्जरकरविशेषस्तन्मोचनयुक्तामारीणां फुरमानं स्वनाममुद्राङ्कितलेखः स एव ढौकनं प्राभृतं नृपोपदा करे हस्ते यस्य । किं कुर्वन् । संदेशवाचः साहिना संदिष्टान् कथितान् वाग्विलासान् वहन् बिभ्रत् । पुनः किंभूतः । सूरिसितांशोर्हीरविजयसूरीचन्द्रस्य शासनादादेशात्कृपारसकोशः स्वकृतकाव्यग्रन्थविशेषस्तस्यानिशं निरन्तरं श्रावणं साहेः कर्णप्राघुणकीकारकत्वं तत्र छेकश्चतुरः ॥

શ્લોકાર્થ

જીજીયાવેરો અને અમારિપ્રવર્તનનાં જેના હાથમાં ફરમાનો છે, અને બાદશાહનો મૌખિક સંદેશો ધારણ કરતા તેમજ ગુરુદેવની આજ્ઞાથી પોતાનો બનાવેલો 'કૃપાકોષ' નામનો ગ્રંથ નિરંતર બાદશાહને સંભળાવનારા પંડિતશ્રેષ્ઠ શાંતિચન્દ્ર ઉપાધ્યાયને અકબર બાદશાહે પોતાની પાસેથી આનંદપૂર્વક પ્રયાણ કરાવ્યું. ॥૨૭૧॥

हमाउंसूनोः फुरमानदानाद्युदन्तमुद्वेलकृपापयोधेः ।
प्रीत्या समेत्याप्त इवात्र सोऽपि न्यवेदयत्सूरिपुरंदरस्य ॥ २७२ ॥

सोऽपि शान्तिचन्द्रवाचकेन्द्रोऽपि अत्र गुर्जरमण्डले पत्तने वा समेत्यागत्य प्रीत्या मुदा । 'मुत्प्रीत्यामोदसंमदः' इति हैम्याम् । हमाउंसूनोरकब्बरपातिसाहेः फुरमानस्य स्वमुद्राङ्कितलेखस्य दानं विश्राणनं गुरून्प्रति प्रेषणं यत्र तादृशमुदन्तं वृत्तान्तं सूरिपुरंदराय न्यवेदयत्कथयांचकार । क इव । आप्त इव । यथा विश्वस्तः केनचित्कथितं सर्वं वृत्तान्तं निवेदयति । किंभूतस्य हमाउंसूनोः । उद्वेलो वेलामतिक्रान्तोऽतिप्रवृद्धः कृपारूपः पयोधिः समुद्रो यस्य यस्मिन्वा ॥ इति शान्तिचन्द्रोपाध्यायगुर्जरागमनं फुरमानदानं च ॥

શ્લોકાર્થ

શાંતિચન્દ્ર ઉપાધ્યાયે ઘણા હર્ષપૂર્વક પાટણનગરમાં આવીને જેમાં કૃપારૂપ સમુદ્ર અભિવૃદ્ધિને પામ્યો છે, બાદશાહનાં ફરમાનો આચાર્યદેવને આપીને, તેઓની સમક્ષ આપ્તપુરુષની જેમ સર્વ વૃત્તાંત કહી સંભળાવ્યો. ॥૨૭૨॥

श्रीमत्पर्युषणादिना रविमिताः सर्वे रवेर्वासराः
सोफीयानदिना अपीददिवसाः संक्रान्तिघस्राः पुनः ।
मासः स्वीयजनेर्निाश्च[1] मिहिरस्यान्येऽपि भूमीन्दुना
हिन्दुम्लेच्छमहीषु तेन विहिताः कारुण्यपण्यापणाः ॥ २७३ ॥

तेन भूमीन्दुना वसुधासुधांशुना अकब्बरेण हिन्दुम्लेच्छमहीषु राजपुत्राणां यवनानां च भूमीषु आर्यानार्यदेशेष्वपि एते प्रोच्यमाना दिना कारुण्यपण्यानां कृपाक्रयाणकाणामापणा विपणयो हट्टा विहिताः कृताः । तानेव दिनान्दर्शयति—रविभिर्मिताः सूर्यप्रमाणा द्वादश श्रीमत्याः पर्युषणायाः सांवत्सरिकपर्वणः । पुनः सर्वे समस्ता अपि रवेरादित्यस्य वासराः । द्वादशमाससंबन्धिनो निःशेषा आदित्यवारा इत्यर्थः । अपि पुनः सोफीयानदिना यवनजातिप्रसिद्धाः । अपि पुनरीदस्य दिनास्तेऽपि[1] यवनेष्वेव प्रसिद्धाः । पुनः संक्रान्तीनां मेषादिकानां सूर्यसंक्रमणानां घस्रा दिवसाः । पुनः स्वीयजनेः । स्वकीयजन्मनः संबन्धी मासः । तथा मिहिरवासरास्तेऽपि यवनजातिष्वेव विख्याताः । अपि पुनरन्ये अपरेऽपि दिना वासराः ॥

શ્લોકાર્થ

અકબર બાદશાહે, આર્ય અનાર્યદેશોમાં પર્યુષણાના બાર દિવસો, સર્વે રવિવારના દિવસો, સોફીયાના દિવસો, ઈદના દિવસો, મેષ આદિ સંક્રાન્તિના દિવસો પોતાના જન્મનો મહિનો અને મિહિરના દિવસોમાં કૃપારૂપી કરિયાણાની દુકાનો માંડી. ॥૨૭૩॥

तेन नवरोजदिवसास्तनुजजनू रजबमासदिवसाश्च ।
विहिता अमारिसहिताः सलतास्तरवो घनेनेव ॥ २७४ ॥

तेनाकब्बरेण नवरोजस्य क्रीडाविशेषस्य दिवसाः, तथा तनुजानां पुत्राणां जनुषो जन्मनो मासाः, तथा रजबमासस्य दिवसाः, नवरोजः रजबमासश्च यवनेष्वेव प्रसिद्धौ ।

१. दिनशब्दस्य नित्यनपुंसकत्वेन पुंस्त्वघटितोऽयं प्रयोगश्चिन्त्यः, अर्शाद्यजन्तत्वात्पुंस्त्वं वा कल्प्यम्.

अमारिसहिता विहिताः जीवदयाकलिताः कृताः। केनेव। घनेनेव। यथा वार्षिकवारिदेन तरवः पादपाः सलता वल्लीसमालिङ्गिता विधीयन्ते ॥

જેમ મેઘ વડે વૃક્ષો નવપલ્લવિત થાય તેમ બાદશાહ વડે નવરોજાના દિવસો, પોતાના પુત્રોના જન્મદિવસો, તેમજ રજબના દિવસો, પણ **અમારિ** (જીવદયા) યુક્ત કરાયા. ॥૨૭૪॥

गुरुवचसा नृपदत्तासाधिकषण्मास्यमारिरभवदिति ।
तत्तनुजैरपि दत्ताधिकवृद्धिं व्रततिवद्भे ॥ २७५॥

गुरोर्हीरविजयसूरेर्वचसा स्वर्गकुसुमापवर्गफलप्रदायिदयालताद्वैतमाहात्म्योपदेशकथाकथेन नृपेणाकब्बरेण दत्ता स्वदेशेषु च प्रवर्तिता साधिका षड्भिर्वासरैरधिका षण्मासीं यावदमारिरिति दिनानुक्रमेणाभवद्बभूवुषी। अपि पुनस्तस्य तनुजैर्नन्दनैः सलेमसाहिसुरादिसाहिप्रमुखैर्दत्ता स्वस्वजन्ममासादिका प्रवर्तिता व्रततिवद्वल्लीवाधिकवृद्धिं भेजे ॥ इत्यमारिदिनव्यक्तिः ॥

श्लोकार्थ

હીરવિજયસૂરિજીના ઉપદેશથી અકબર બાદશાહે છ માસથી અધિક અમારિપ્રવર્તન કર્યું. તેમના સુલેમા આદિ પુત્રોએ વેળાની જેમ પોતપોતાના જન્મદિવસોમાં એ અમારિપ્રવર્તન અધિક કર્યું. ॥ ૨૭૫ ॥

येनोद्वेगमवापितो जनपदः स्वक्षीणताकारिणा
तूर्णं त्याजयता निजं पुरमपि प्राणिव्रजान्यक्षमवत् ।
शंभोर्देशनया भवस्तनुमतेवाशंसुना श्रेयसे
जेजीयाख्यकरो व्यमोचि च महीशक्रेण सूरेर्गिरा ॥ २७६ ॥

सूरेर्हीरगुरोर्गिरा वाङ्मात्रेण स गुर्जरादिजनपदप्रसिद्धो जेजीया इत्याख्या यस्य तादृङ्नामा करो दण्ड एव महीशक्रेण भूमीन्द्रेण साहिना व्यमोचि सर्वथैव निवारितः। केनेव। तनुमतेव। यथा शंभोस्तीर्थंकरस्य देशनया व्याख्यानश्रवणेन प्राणिना भवः संसारो मुच्यते त्यज्यते। नृपेण प्राणिना च किंलक्षणेन। श्रेयसे कल्याणाय मोक्षाय वाशंसुना अभिलाषुकेण। स कः। येन जेजीयाभिधकरणे जनपदो गुर्जरमण्डलमुद्वेगं क्लेशमवापितो नीतः किंभूतेन। स्वस्य देशस्यात्मनः क्षीणताया दारिद्र्यस्य कारिणा करणशीलेन। पुनः किं कुर्वता। प्राणिव्रजान् जननिकरान्निजमपि पुरं स्वकीयमपि निवासनगरं तूर्णं द्रविणाभावाद्दातुमशक्ततया शीघ्रं त्याजयता मोचयता। किंवत्। यक्ष्म-

वत् । यथा राजयक्ष्मणा क्षयरोगेण जनपदो देशः कदाचिद्बहुव्यापको भवेत् । अथ वा धर्मचारिनिष्पुत्रनृपाङ्के भाविना देश उद्वेगमवाप्यते । किंभूतस्य । स्वस्य रोगिण आत्मनः शरीरस्य शनैः शनैः क्षीणतां दुर्बलतां करोतीत्येवंशीलस्य । किं कुर्वता । तूर्णं रागोत्पत्तेरनन्तरं त्वरितमेव पुरं देहं त्याजयता । 'यदा जठरे अश्वः पुमान् छत्रं संपूर्णतयाति तदा देहं त्यजेज्जन्तुः' इति चिकित्सकशास्त्रे । 'पुरं तु नगराङ्गयोः' इत्यनेकार्थः ॥ इति जेजीयाकरविमुक्तिः ॥

श्लोकार्थ

દેશને ઉદ્વેગ પમાડનારો અને દરિદ્ર કરનારો એવા જીજીયાવેરાથી જેમ ક્ષયના રોગી પ્રાણોનો ત્યાગ કરે છે, તેમ માણસો દ્રવ્યના અભાવે પોતપોતાના નગરોનો ત્યાગ કરતા હતા. આવો જીજીયાવેરો આચાર્યદેવની વાણીથી અકબરે માફ કર્યો. જેમ તીર્થંકર ભગવંતની દેશનાથી કલ્યાણના કામી ભવ્ય જીવો સંસારથી મુક્ત બને તેમ આચાર્યની વાણીથી બાદશાહે જીજીયાવેરાથી દેશને મુક્ત કર્યો. ॥ ૨૭૬ ॥

कश्मीराध्वनि पल्वलो तजयनलक्षोणीभृताखानि यः
संख्यातो दशयोजनैर्जयनलप्रोल्लासिलङ्काभिधः ।
यूथाधीश्वरसिन्धुराधिपतिवत्पोतव्रजैर्भ्राजित-
स्तं कौतूहलतो निरीक्षितुमिव प्राप्तं सरो मानसम् ॥ २७७ ॥

जयनल इति नाम्ना क्षोणीभृता राज्ञा कश्मीर इति नाम्नो देशस्याध्वनि मार्गे पल्वलस्तटाकः अखानि खानितः । किंभूतः पल्वलः । जयनलेनाद्यभूतेन प्रोल्लसनशीला लङ्का इत्यभिधा नाम यस्य । जयनललङ्काभिधसर इत्यर्थः । पुनः किंभूतः । दशयोजनैश्चत्वारिंशत्क्रोशैः संख्यातः प्रमाणीकृतः । पुनः किंभूतः । पोतव्रजैर्भ्राजितः यानपात्रप्रकरैः शोभितः । किंवत् । यूथाधीश्वरसिन्धुराधिपतिवत् । यथा यूथनाथगजेन्द्रः पोतानां दशवर्षदेशीयानां करिकिशोराणां व्रजैर्गणैः भूषितो भवेत् । 'पञ्चवर्षो गजो बालः स्यात्पोतो दशवार्षिकः' इति हैम्याम् । उत्प्रेक्ष्यते—कौतूहलतः कौतुकात्तं जयनलनृपं तदवसरे चाकब्बरसाहिमिव वा निरीक्षतुं द्रष्टुं प्राप्तं समागतं मानसं हंसावासं सर इव ॥

શ્લોકાર્થ

કાશ્મીર દેશના રસ્તે જયનલ નામના રાજાએ દશયોજન પ્રમાણવાળું તેમજ નાના નાના હાથીઓથી સુશોભિત યુથનાથની જેમ યાનપાત્રો વડે સુશોભિત પોતાના નામથી પ્રસિદ્ધ 'જયનલલંકા' નામનું સરોવર બનાવ્યું હતું, તે જાણે જયનલ રાજાને જોવા માટે માનસસરોવર આવેલું ન હોય ! ॥ ૨૭૭ ॥

प्रालेयेन खिलीकृते शिखरवत्प्रालेयभूमीभृतः
शीतार्तिं प्रविषह्य वस्त्रवियुजां संवर्तरात्रीमिव।
क्षोणीपालनिभालिताखिलमहाभीलोपम्भः पथि
श्रीवाचंयमशर्वरीवरयितुः संदेशवाक्प्रेरितः ॥ २७८ ॥

श्रीशत्रुंजयभूभृतस्तनुमतां यात्रां विनिर्मित्सतां
मूलान्मोचयितुं स्वयं करमथो श्रीभानुचन्द्रः सुधीः।
तत्सारस्वतवर्त्मभूषणसरोवोहित्थसंस्थायिनो
विज्ञप्तिं कृतवानकब्बरधरापाथोजिनीप्रेयसः ॥ २७९ ॥

अथो सूरिसंदेशलेखागमनानन्तरं भानुचन्द्रनामा सुधीर्विद्वान्। भानुचन्द्रप्रक्षांश इत्यर्थः। तत्पूर्वव्यावर्णितस्वरूपं यत्सारस्वतानां कश्मीराणां वर्त्मनो मार्गस्य भूषणमलंकारभूतं सरो जयनलङ्काख्यस्तडाकः तत्र वोहित्थे वहने संस्थायिनः तिष्ठतीत्येवंशीलस्याकब्बरनामधरापाथोजिनीप्रेयसः पृथिवीपद्मिनीपतेर्भूमीभानोः विज्ञप्तिम्। यवनजाति प्रसिद्धां अरजीमित्यर्थः। कृतवान् चकार। किं कर्तुम्। श्रीशत्रुंजयभूभृतो विमलाचलस्य यात्रां विनिर्मित्सतां कर्तुमिच्छतां श्रीशत्रुंजयशैलमधिरुह्य ऋषभदेवं नन्तुं पूजयितुं वा काङ्क्षतां तनुमतां भव्यजनानां करं राजदेयांशं मूलादादितः सर्वथैव स्वयमात्मनैव मोचयितुं त्याजयितुम्। किंभूतो भानुचन्द्रः। श्रीवाचंयमानां मध्ये शर्वरीवरयितुः निशानाथस्य संदेशवाचा उदन्तप्रेषणेन प्रेरितः। पुनः किंभूतः। पथि मार्गे क्षोणीपालेन पृथिवीपतिना साहिना निभालितो दृष्टः अखिलः समस्तः महानतिशायी आभीलस्य पीडायाः शीतव्यथायाः उपलम्भः प्राप्तिर्यस्य अत एव पथि मार्गे शीतार्तिं शीतोद्भूतां पीडां प्रविषह्य मर्षयित्वा। उत्प्रेक्ष्यते—वस्त्रैर्वसनैर्वियुज्यन्ति पृथग्भवन्ति तेषां वस्त्ररहितानां संवर्तरात्रीं कालरात्रीमिव क्षयकारिणीम्। पथि किंलक्षणे। प्रालेयेन हिमेन खिलीकृते विषमे निष्पादिते। किंवत्। शिखरवत्। यथा प्रालेयभूमीभृतः तुहिनाचलस्य शिखरं शृङ्गं प्रालेयेन हिमेन स्थपुटीक्रियते विषमं विधीयते ॥ युग्मम् ॥

श्लोकार्थ

કાશ્મીર દેશના આભૂષણરૂપ જયનલલંકા સરોવરમાં વહાણમાં બેઠેલા અકબર બાદશાહ જેમ હિમ વડે હિમાચલનું શિખર વ્યાપ્ત છે તેમ બરફથી આચ્છાદિત થયેલા માર્ગે સાથે ચાલી રહેલા અને અસહ્ય શીત વેદનાને સહી રહેલા ભાનુચન્દ્ર ઉપાધ્યાયને જોતાં અત્યંત પ્રભાવિત થયા. ત્યારે ગુરુદેવના સંદેશાથી પ્રેરાઈને ભાનુચન્દ્ર ઉપાધ્યાયે અકબર પાસે શત્રુંજય તીર્થના યાત્રાવેરો રદ કરવાની માંગણી કરી. ॥ ૨૭૮ ॥ ૨૭૯ ॥

भूभृत्कुकुद एष जेजियकरव्यामुक्त्यलंकारितां
योऽमारिं स्वकुमारिकामिव मुदा पूर्वं प्रदाय प्रभोः।
निःशुल्कां पृथिवीं पुनर्जिनमतं निर्माय नित्योत्सवं
श्रीमत्सिद्धधराधरं प्रददिवांस्तद्यौतके युक्तकृत् ॥ २८० ॥

'सत्कृत्यालंकृतां कन्यां यो ददाति स कूकुदः' इति हैम्याम् । एष भूभृद्कब्बर एव कूकुदः स्वस्यात्मनः कुमारिकां कन्यामिवामारिं जीवदयां सूरिभिरमारिर्मार्गिता नृपेण प्रदत्ता अत एव दानं पूर्वं प्रथमतः प्रभोर्हीरसूरेः प्रदाय दत्त्वा तद्यौतके तयोः सूरिजीवदययोर्वरवध्वोर्युवतयोर्देये दातव्ये श्रीमन्तमनेकरत्नस्वर्णरजतरचनाकं महानन्देन्दिरामन्दिरं सिद्धधराधरं शत्रुंजयशैलं प्रददिवान् निष्करं कृतवान् विश्राणयामास । किंभूताममारिकुमारिकाम् । जेजीयाख्यो यः करो जनदण्डस्तस्य या व्यामुक्तिर्मोचनं सैवालंकारो भूषणगणः संजातोऽस्याः । किं कृत्वा ददौ । पृथिवीं स्वसाधितसर्ववसुधां निःशुल्कां व्यापारादावपि प्रदेयद्रव्यरहिताम् । शुल्कं लोकभाषया 'दाण' यवनभाषया तु 'जगातिः' इत्युच्यते । पुनर्जिनमतमर्हच्छासनं नित्योत्सवं निरन्तरमहामहं विधाय । नृपः किंभूतः । युक्तमुचितं वेत्तीति विदित्वा च करोतीति युक्तकृत् । 'यौतकं युतयोर्देयम्' इति हैम्याम ॥

श्लोकार्थ

અકબર બાદશાહ રૂપી કુકુદે (અલંકાર સહિત સન્માનપૂર્વક પોતાની પુત્રીને આપનાર પિતા) 'જીજીયાવેરા મુક્તિ' રૂપ અલંકારયુક્ત હાથવાળી પોતાની પુત્રી 'અમારિ' નામની કુમારિકા, હીરવિજયસૂરિરૂપી વરને હર્ષપૂર્વક આપીને, પૃથ્વીને કરરહિત કરીને, જૈનશાસનમાં નિત્ય મહોત્સવ કરાવીને પાણિગ્રહણમાં (કરમોચનમાં) અકબરબાદશાહે યુક્તિયુક્ત કન્યાદાનરૂપી શ્રી સિદ્ધગિરિ અર્પણ કર્યો. અર્થાત્ શત્રુંજયપર્વતનો યાત્રાવેરો રદ કર્યો. ॥ ૨૮૦ ॥

निजनामाङ्कं कृत्वा फुरमानं प्राहिणोन्नृपः प्रभवे ।
इदमप्यलमकृत ततः करकमलं हंस इव सूरेः ॥ २८१ ॥

नृपः पातिसाहिर्निजस्यात्मनो नामाङ्के उत्सङ्गे मध्ये यस्य तादृशं फुरमानं कृत्वा विधाय प्रभवे सूरीन्द्राय प्राहिणोत्प्रेषयामास । ततः प्रेषणानन्तरमिदमपि फुरमानं सूरेः करकमलं पाणिपद्मं हंस इवालमकृत भूषयति स्म ॥

श्लोकार्थ

અકબર બાદશાહે પોતાના નામથી અંકિત કરીને (મહોર છાપ મારીને) એક

ફરમાન આચાર્યદેવને મોકલાવ્યું, તે હંસની જેમ સૂરિજીનાં કરકમલને અલંકૃત કરનારું બન્યું. ॥ २८१ ॥

यः पूर्वं कलिकालकेलिकलनालीलालयश्रीजुषां
म्लेच्छक्षोणिभुजां वशंवदतया जज्ञे नृणां दुर्लभः ।
तिग्मज्योतिरखण्डचण्डिममहःसंदोहदूरीकृत-
ज्योत्स्नारम्भविभावरीशविभवः सौगन्धिकानामिव ॥ २८२ ॥

सौवर्णेन ततो बभूव भविकैर्लभ्योऽत्र गोशीर्षव-
ज्जातः साधिकरूपकेण तदनु प्राप्यः कथंचिज्जनैः ।
साहिश्रीमदकब्बरेण यवनक्षोणीभुजा संमदा-
त्सोऽपि श्रीविमलाचलो मुनिमणेश्चक्रे शयालुः शये ॥ २८३ ॥

यः श्रीशत्रुंजयशैलः पूर्वं प्रथमं म्लेच्छानामागमनसमये म्लेच्छक्षोणिभुजां यवनपातिसाहीनां वशंवदतया आयत्तत्वेनाधीनभावेन यात्रिकजनानां दुर्लभो दुःप्रापो जज्ञे जातः । पूर्वं म्लेच्छा हि चढितुं यात्रामपि कर्तुं न ददुः । किंभूतानाम् । कलिकालस्य कलियुगस्य केलिकलयायै क्रीडाकरणार्थं लीलालयः क्रीडासदनं तस्य श्रियं जुषन्ते भजन्ते । केषामिव दुर्लभः । सौगन्धिकानामिव । यथा तिग्मज्योतिषो ग्रीष्मभानोरखण्डोऽविच्छिन्नो निस्तुषो वा चण्डिमा अतितीव्रता यत्र तादृशेन महसां भूयसः प्रतापानां संदोहेन समुदायेन दूरीकृतो निरस्तो ज्योत्स्नां चन्द्रिकाणामारम्भोऽभ्युदयो यस्य तादृशस्य विभावरीशस्य चन्द्रमसः विभवः शोभाभरोऽत्र कह्लाराणां दुर्लभो भवेत् । कह्लारं चन्द्रविकाशि । यथा नैषधे—'कह्लारमिन्दुकिरणा इव हासभासम्' इति । 'सौगन्धिकं तु कह्लारम्' इति हैम्याम् । ततोऽप्राप्तेरनन्तरं कियता कालेनात्र काले भूमौ वा सौवर्णेन सुवर्णटङ्केन । सुवर्णविकारः सौवर्णं तेन 'सोठइयो' इति लोकप्रसिद्धेन । 'दीनारेण' इति पाठो वा । भविकैर्यात्रिकजनैर्लभ्यः प्राप्यो बभूव । किंवत् । गोशीर्षवत् । यथा चन्दनं सौवर्णेन स्वर्णमूल्येन लभ्यते, तदनु हेमटङ्केन प्राप्तेरनन्तरं पञ्चमुद्रिकाभिर्महंमुदीभिः, तदनु च कथंचिन्महत्कष्टेन विज्ञप्तिभिः साधिकरूपकेण तिसृभिर्मुद्रिकाभिः कृत्वा कथंचिज्जनैः प्राप्योऽभूत । सोऽप्येवंविधदुष्प्रापोऽपि श्रीविमलाचलः श्रीशत्रुंजयपर्वतः यवनक्षोणीभुजा मुद्गलभूमण्डलाखण्डलेन पातिसाहिना श्रीमता चतुर्दिक्चक्रलक्ष्मीवता अकब्बरेण मुनिमणेः श्रीहीरविजयसूरेः शये शयालुः पाणौ स्थाता चक्रे । गुरुकरकमलवर्तीकृत इत्यर्थः । कस्मात् । संमदाद्गुरूपरि गुरुप्रीत्या ॥

શ્લોકાર્થ

સૂર્યનાં તીક્ષ્ણ અને પ્રચંડ કિરણોથી દૂર કરાયેલા ચન્દ્રના વૈભવની પ્રાપ્તિ જેમ

ચન્દ્રવિકાસી કમલને દુર્લભ હોય તેમ પૂર્વે 'શત્રુંજય પર્વત' કલિયુગને ક્રીડા કરવા માટેના ક્રીડામંદિરની શોભા ધારણ કરનારા મ્લેચ્છ રાજાઓને આધીન હોવાથી યાત્રિકોને દુર્લભ હતો; ત્યાર પછી કેટલાક કાળે સુવર્ણના મૂલ્યથી જેમ ચંદન સુલભ બને તેમ સોનૈયાના કરથી શત્રુંજય સુલભ બન્યો. ત્યારબાદ મહમદના સમયમાં પાંચ મુદ્રિકાના કરથી અને પછીથી મુસીબતે ત્રણ મુદ્રિકાના કરથી યાત્રિકોને સુલભ બન્યો, તેવા પ્રકારના દુષ્પ્રાપ્ય શત્રુંજય પર્વતને અકબર બાદશાહે ઘણા જ હર્ષપૂર્વક આચાર્યદેવ હીરવિજયસૂરિજીના કરકમલમાં સમર્પિત કર્યો, અર્થાત્ કરમુક્ત કર્યો. ॥ ૨૮૨ ॥ ૨૮૩ ॥

प्राचीनजैननरपतिवारक इव निष्करे विमलशैले ।
विदधुर्विधिना यात्रां तत्र मनुष्याः [1]परोलक्षाः ॥ २८४ ॥

[1]परोलक्षा लक्षसंख्या मनुष्या यात्रिकास्तत्र विमलशैले शत्रुंजयपर्वते विधिना शास्त्रोक्तप्रकारेण यथा 'एकाहारी भूमिसंस्तारकारी पद्भ्यां चारी शुद्धसम्यक्त्वधारी । यात्राकाले सर्वसचित्तधारी पुण्यात्मा स्यात्सत्क्रियो ब्रह्मचारी ॥' इत्युक्तविधिना संघपतिभवनविधिना वा यात्रां विदधुः चक्रुः । किंभूते । विमलशैले निष्करे कररहिते । कस्मिन्निव । प्राचीनजैननरपतिवारके इव । यथा प्राचीनाः पूर्वकालोत्पन्नास्तथा जैना जिनशासनरञ्जितमनसः ये नरपतयो भरताद्या भूपालास्तेषां वारके । तद्राज्यसमये विमलाद्रिनिर्गतः करो यस्मात्तादृश आसीत् ॥ इति गुरोर्विमलाचलार्पणम् ।

શ્લોકાર્થ

પ્રાચીન કાળમાં જૈન રાજાઓના સમયમાં જેમ શત્રુંજય કરરહિત હતો તેમ અકબર બાદશાહના રાજ્યમાં પણ શત્રુંજય પર્વત કરરહિત બનાવવામાં આવ્યો, તેથી લાખો યાત્રિકો શત્રુંજયની વિધિપૂર્વક યાત્રા કરવા આવવા લાગ્યા. (એકલહારી, ભૂમિસંથારી, પાદચારી, સમકીતધારી, સચિત્ત પરિહારી અને બ્રહ્મચારી આ પ્રકારની છરી પાળતા સંઘો યાત્રા કરવા આવતા.) ॥ ૨૮૪ ॥

वर्षाकाले व्रतीन्द्रौ तौ राजधान्यपुरेऽन्यदा ।
जम्बूद्वीपे पयोजन्मबान्धवाविव तस्थतुः ॥ २८५ ॥

अन्यदा अन्यस्मिन् कस्मिंश्चिद्वर्षाकाले प्रावृट्समये चतुर्मासिके तौ व्रतीन्द्रौ श्रीहीरविजयसूरिविजयसेनसूरी राजधान्यनाम्नि पुरे नगरे तस्थतुः स्थितौ । अर्थाच्चतुर्मासकम् । काविव । पयोजन्मबान्धवाविव । यथा जम्बूद्वीपे द्वौ भास्करौ तिष्ठतः ॥

१. पृषोदरादित्वेनैवायं प्रयोगः कल्प्यः.

શ્લોકાર્થ

કોઈ એક સમયે હીરવિજયસૂરિજીએ અને વિજયસેનસૂરિજીએ ચાતુર્માસિક સ્થિરતા રાધનપુર નામના નગરમાં કરી. તે જાણે જંબૂદ્વીપમાં બે સૂર્યો આવીને રહ્યા ન હોય ! ॥ ૨૮૫ ॥

श्रीमत्सूरिपतिः प्रसन्नहृदयः सन्भानुचन्द्राभिध-
प्राज्ञेन्दोरथ वाचकाह्वयपदं दत्ते स्म वाचैव सः ।
संस्थास्नोरतिदूरतोऽपि कुमुदां पङ्क्तेरिव ज्योत्स्नया
प्रोद्यत्पार्वणशर्वरीवरयिता प्रोज्जृम्भतावैभवम् ॥ २८६ ॥

अथ राजधान्यपुरागमनचतुर्मासकस्थितिकरणानन्तरं प्रसन्नं शत्रुंजयकरमुक्तिसत्कपातिसाहिफुरमानप्रेषणेन कृत्वा प्रसादोपेतं हृदयं मनो यस्य तादृशः स जगद्गुरुविरुदतया ख्यातः श्रीमत्सूरिपतिः श्रीहीरविजयसुरिरतिदूरतो लाभपुरे लाहोरनगरे साहिपार्श्वे संस्थास्नोः स्थितवतोऽपि भानुचन्द्र इत्यभिधा नाम यस्य तादृशस्य प्राज्ञेन्दोविबुधविधोः प्रज्ञांशस्य वाचक इत्याह्वयं नाम यस्य तादृशं पदम् । उपाध्यायपदमित्यर्थः । दत्ते स्म । कया । वाचा । कथमेव । वचनमात्रेणैव न तु वासक्षेमपूर्वमिति । क इव । प्रोद्यत्पार्वणशर्वरीवरयितेव । यथा उदयं प्राप्नुवन् पूर्णिमासंबन्धी शर्वर्या निशाया वरयिता भर्ता अतिशयेन दूरतोऽपि भूमण्डलकमलाकरमध्ये गगनापेक्षया क्षोणी दूरस्थायिनी । कुमुदां कैरवाणां पङ्क्तेः श्रेण्या ज्योत्स्न्या चन्द्रिकयेव प्रोज्जृम्भताविभवं विकाशभावलक्ष्मीं दत्ते॥ इति भानुचन्द्रस्योपाध्यायपदम् ॥

શ્લોકાર્થ

રાધનપુરમાં ચાતુર્માસિક સ્થિરતા કર્યા બાદ બાદશાહ પાસે યાત્રાવેરો રદ કરાવવાથી પ્રસન્ન થયેલા જગદ્ગુરૂ હીરવિજયસૂરિજીએ અતિદૂર લાહોરનગરમાં રહેલા પંડિતશ્રી ભાનુચન્દ્રજીને પોતાની આજ્ઞાથી ઉપાધ્યાયપદ અર્પણ કરાવ્યું. અભ્યુદય પામેલો પૂર્ણિમાનો ચન્દ્ર અતિદૂર હોવા છતાં પણ ચન્દ્રિકા વડે કુમુદોની પંક્તિને વિકસ્વર થવાની શોભા અર્પણ નથી કરતો ! ॥ ૨૮૬ ॥

विजयसेनविभोर्हृदि दर्शनं वसुमतीकमिता चकमे क्रमात् ।
विदलिताखिललोकतमस्ततेः शुचिरुचेश्चलचक्षुरिवाचिरात् ॥ २८७ ॥

क्रमादनुक्रमेण हीरविजयसूरिभ्यां भानुचन्द्रस्य वाचकपदं प्रदत्तं तदाकर्णनानन्तरं वसुमतीकमिता भूमीपतिरकब्बरसाहिः हृदि मनोमध्ये विजयसेननाम्नो विभोर्गुरोर्दर्शनं

चकमे काङ्क्षति स्म । क इव । चलचञ्चुरिव । यथा चकोरः शुचिरुचेश्चन्द्रमसो दर्शनं कामयते । किंभूतस्य विजयसेनविभोः शुचिरुचेश्च । विदलितानि अखिललोकस्य समस्तजगतः सर्वभविकानां च तमसामज्ञानानामन्धकाराणां च ततिः पङ्क्तिर्येन ॥

શ્લોકાર્થ

શ્રી હીરવિજયસૂરિજી દ્વારા ભાનુચન્દ્રજીને ઉપાધ્યાયપદ અર્પણ કરાયા બાદ જેમ ચકોર ચન્દ્રદર્શન ઇચ્છે તેમ બાદશાહના હૃદયમાં, ભવ્યલોકના અજ્ઞાનરૂપ અંધકારનો નાશ કરનારા વિજયસેનસૂરિનાં દર્શનની કામના જાગી. ॥ ૨૮૭ ॥

प्रैषीत्ततः प्रेष्ययुगं सलेखमानेतुमाचार्यसुधामरीचिम् ।
अकब्बरः सिन्धुमिवात्र चक्री सुमित्रभूः सुस्थितमादितेयम् ॥ २८८ ॥

ततो दर्शनाकाङ्क्षानन्तरं अकब्बरः पातिसाहिः आचार्यसुधामरीचिं विजयसेनसूरीन्दुमानेतुं स्वदेशे समाकारयितुं सह लेखेन फुरमानेन वर्तते यत्तत्सलेखं प्रेष्ययुगं मेवडाद्वन्द्वं प्रैषीत्प्रस्थापयति स्म । क इव । सुमित्रभूरिव । यथा सगरचक्रवर्ती सिन्धुं समुद्रमानेतुं लवणसमुद्राधिष्ठायकं सुस्थितनामानमादितेयं देवं प्रेषयति स्म ॥

શ્લોકાર્થ

જેમ સગરચક્રવર્તીએ સમુદ્રને લાવવા માટે લવણસમુદ્રના અધિષ્ઠાયક સુસ્થિત નામના દેવને મોકલ્યો હતો તેમ દર્શનની ઇચ્છા થયા બાદ અકબર બાદશાહે વિજયસેનસૂરિજીને બોલાવવા માટે ફરમાન સહિત બે દૂતોને મોકલ્યા. ॥ ૨૮૮ ॥

लेखं न्यासमिवार्पितं क्षितिपतेर्दूतद्वयेनादरा-
दादायाथ विभाव्य तस्य बुबुधे हार्दं मुनीन्द्रोऽखिलम् ।
द्रष्टुं काङ्क्षति मामिवैष कथमप्याचार्यमप्यात्मना
संतर्क्येति ततो न्यवेदयदनूचानाय सर्वं स तत् ॥ २८९ ॥

मुनीन्द्रो हीरविजयसूरिस्तस्य फुरमानरूपलेखस्य अखिलं समग्रं हार्दं रहस्यं बुबुधे जानाति स्म । किं कृत्वा । विभाव्यावलोक्य । कथम् । अथ पश्चात् । किं कृत्वा । आदरादूबहुमानादादाय गृहीत्वा । कम् । लेखं फुरमानम् । कमिव । न्यासमिव निक्षेपमिव । यथा 'पणि' इति लोकप्रसिद्धया । किंभूतं लेखम् । क्षितिपतेरकब्बरसाहेर्दूतद्वयेन मेवडायमलेन संदेशहारकयुगलेन अर्पितं स्वस्य प्रदत्तम् । ततो लेखादानवाचनरहस्यज्ञानानन्तरं

स सूरिस्तत्सर्वं भूपाकारणवाचिकमनूचानाय विजयसेनसूरये न्यवेदयत्कथयांचकार । किं कृत्वा । इत्यमुना प्रकारेण संतर्क्य विचार्य । इति किम । यदेष पातिसाहिः कथमपि केनापि प्रकारेण आत्मना स्वेन मामिव आचार्यमपि द्रष्टुं विलोकयितुं काङ्क्षति कामयते वाञ्छति ॥

શ્લોકાર્થ

બાદશાહના દૂતો દ્વારા થાપણની જેમ અર્પણ કરાયેલા ફરમાનને આદરપૂર્વક ગ્રહણ કરીને, બરાબર જોઈને હીરવિજયસૂરિજીએ ફરમાનના રહસ્યને જાણી લીધું કે 'બાદશાહ મારી જેમ કોઈ પણ રીતે વિજયસેનસૂરિજીને જોવાને ઇચ્છે છે.' આમ વિચારીને સર્વવૃત્તાંત સેનસૂરીને કહ્યો. ॥ ૨૮૯ ॥

गुरोरुपादाय रहस्यविद्यां शिक्षां च साक्षात्किमुदर्कसिद्धिम् ।
कम्माङ्गजातव्रतिचक्रवर्ती क्रमाच्चलंल्लभपुरं बभाज ॥ २९० ॥

कम्मानाम्नः साधोरङ्गजातो नन्दनः स यत्र व्रतिषु साधुषु मध्ये चक्रवर्ती सार्वभौमो विजयसेनसूरीन्द्रः क्रमादनुक्रमेण ग्रामानुग्रामदेशानुदेशविहारपरिपाट्या चलन् प्रतिष्ठमानः लाभपुरं लाहोरनगरं बभाज भजते स्म । लाभपुरनगरं गतवानित्यर्थः । किं कृत्वा । गुरोर्हीरविजयसूरे रहस्यस्योपनिषदो विद्यां पराज्ञातजैनमन्त्रान् च पुनः शिक्षां हितमतिम् । उत्प्रेक्ष्यते—साक्षात्प्रत्यक्षेण किमुदर्कसिद्धिमुत्तरकालोत्पन्नसिद्धिमिव ॥

શ્લોકાર્થ

સાધુઓમાં ચક્રવર્તી સમાન કમાશ્રેષ્ઠાના પુત્ર વિજયસેનસૂરિજી ભવિષ્યમાં પ્રાપ્ત થનારી જાણે સિદ્ધિ ન હોય તેવી ગુરૂદેવની હિતશિક્ષા ગ્રહણ કરીને ગ્રામાનુગ્રામ વિહાર કરતા અનુક્રમે 'લાહોર' નગરમાં પધાર્યા. ॥ ૨૯૦ ॥

निर्ग्रन्थनाथः स विधाय गोष्ठीं संप्रीणयामास महीमहेन्द्रम् ।
वाङ्नामपीयूषरसाभिवर्षी नाह्लादकः कस्य कुमुद्वतीशः ॥ २९१ ॥

स निर्ग्रन्थनाथो विजयसेनसूरिः महीमहेन्द्रमकब्बरं संप्रीणयामास प्रह्लादयांचक्रिवान् समतोषयत् । 'प्रीणाति प्रीणयति पृणातीति प्रीणनार्थाः स्युः' इति क्रियाकलापे । समुपसर्गः । पञ्चमीस्तुतौ यथा—'संप्रीणन्सचकोराञ्शिवतिलकसमः कौशिकानन्दिमूर्तिः' इति । किं कृत्वा । गोष्ठीं धर्मतत्त्ववार्तां विधाय कृत्वा । किंभूतः सः । वाग्वाण्येव नाम यस्य तादृशो यः पीयूषरसः सुधाद्रवजलं वा अभिवर्षतीत्येवंशीलः । युक्तोऽयमर्थः । कुमुद्वतीशश्चन्द्रः कस्य नाह्लादकः स्यात् । अपि तु सर्वस्यापि प्रमोदकारी भवत्येव ॥

શ્લોકાર્થ

વિજયસેનસૂરિજીએ વાણીરૂપી અમૃતધારા વર્ષાવતી ધર્મગોષ્ઠી કરીને બાદશાહના દિલને ખૂબ જ આનંદ પમાડયો. ખરેખર, ચન્દ્ર કોને આનંદ નથી આપતો. ॥ ૨૯૧ ॥

श्रीमत्सूरिवरो व्यधत्त वसुधावास्तोष्पतेराग्रहे-
णोपाध्यायपदस्य नन्दिमनघां श्रीभानुचन्द्रस्य सः ।
शेखो रूपकषट्शतीं व्यतिकरे तत्राश्वदानादिभि-
र्भक्तः श्राद्ध इवार्थिनां प्रमुदितो विश्राणयामासिवान् ॥ २९२ ॥

स सूरिष्वाचार्येषु वरः प्रधानो विजयसेनसूरिर्वसुधावास्तोष्पतेर्महीन्द्रस्याग्रहेणो-परोधेन उपाध्यायपदस्य नन्दिं विधिविशेषं व्यधत्त चक्रे । तत्र व्यतिकरे तस्मिन्नन्दि-विधानावसरे शेखः अबलफैजनामा रूपकाणां 'रुपया' इति प्रसिद्धानां षट्शतीं षट्शतानि रूप्यटङ्कानां प्रमुदितो हृष्टः परस्परमैत्र्यात् अश्वदानमादौ येषां तेऽश्वदानादयः प्रकारास्तैः कृत्वा अर्थिनां याचकानां विश्राणयामासिवान् प्रददाति स्म । किंभूतः शेखः । भक्तः । क इव । श्राद्ध इव । यथा भक्तश्राद्धोऽपि कस्यचित्खेटस्य योग्यस्य साधोरुपाध्याय-पदतन्नन्दिकरणादिमहोत्सवे स्वधनमर्थिनां विश्राणयति स्म ॥

શ્લોકાર્થ

આચાર્યોમાં શ્રેષ્ઠ વિજયસેનસૂરિજીએ બાદશાહના આગ્રહથી વાચક શ્રી ભાનુચન્દ્રના ઉપાધ્યાય પદવીનો મહોત્સવ કર્યો. તે મહોત્સવમાં શ્રાવક ભક્તની જેમ શેખ અબ્દુલફૈજીએ યાચકોને અશ્વદાન આદિ દાનમાં છસો રૂપિયાનો વ્યય કર્યો. ॥ ૨૯૨ ॥

साहेः पर्षदि शेखादिपार्षद्यजुषि स प्रभुः ।
अजैषीद्वादिनो वादे मुनिसुन्दरसूरिवत् ॥ २९३ ॥

प्रभुर्विजयसेनसूरिः साहेरकब्बरधरणीरमणस्य पर्षदि सभायाम् । किंभूतायां पर्षदि । शेखः अबलफैजनामा साहिसामन्तः स एवाद्यौ येषां तादृशान्पार्षद्यान् सभ्यान् जुषते भजते तद्विधायां वादिनस्त्रिषष्टित्रिशतीं ब्राह्मणान् वादविधायिनः प्रतिवादीभूतान् समस्तानपि अजैषीत् पराजयति स्म । उक्तियुक्तिप्रत्युक्तिभिर्निरुत्तरीकृतवानित्यर्थः । किंवत् । मुनि-सुन्दरसूरिवत् । यथा श्रीमुनिसुन्दरसूरिस्तैरभुक्तोयं पण्डितं शताष्टकेन क्वचिदष्टाधिक-सहस्रेण वर्तुलिकावधानेन अजयत्पराबभूव ॥

શ્લોકાર્થ

જેમ મુનિસુંદરસૂરિજીએ એકસો આઠ અથવા એક હજાર આઠ અવધાનો કરીને અભુકિલથં પંડિતનો પરાસ્ત કર્યો હતો તેમ વિજયસેનસૂરિજીએ શેખ આદિ પંડિતોથી સુશોભિત બાદશાહની રાજસભામાં વાદવિવાદના પ્રસંગે ત્રણસો ત્રેસઠ પ્રતિવાદી બ્રાહ્મણોને પરાસ્ત કર્યા; અર્થાત્ નિરૂત્તર કર્યા. ॥ ૨૯૩ ॥

साहिः सवाईविजयसेनसाधुविधोरिदम् ।
बिरुदं हीरसूरीन्दोर्जगद्गुरुरिवाददात् ॥ २९४ ॥

साहिरकब्बरो विजयसेनसाधुविधोः सूरिन्द्रस्य सवाईविजयसेनसूरेरिदं बिरुदमददा- दत्तवान् । कस्येव । हीरसूरीन्दोरिव । यथा श्रीहीरविजयसुरेर्जगद्गुरूरिदं साहिः प्रददौ ॥

શ્લોકાર્થ

જેમ હિરવિજયસૂરિજીને 'જગદ્ગુરૂ'નું બિરૂદ અર્પણ કર્યું હતું તેમ બાદશાહે વિજયસેનસૂરિને 'સવાઈ'નું બિરૂદ અર્પણ કર્યું. ॥ ૨૦૪ ॥

वादिनां विजयोदन्तं श्रुत्वा तं मुमुदे गुरुः ।
तस्य विष्णोरिवाशेषद्विषामानकदुन्दुभिः ॥ २९५ ॥

गुरुर्हीरविजयसूरिस्तस्य विजयसेनसूरेस्त वादिनां विजयस्य निरुत्तरीकरणस्योदन्तं वृत्तान्तं श्रुत्वा मुमुदे जहर्ष । क इव । आनकदुन्दुभिरिव । यथा विद्याधरान्वशीकृत्य वैताढ्यादागतो वसुदेवो विष्णोर्नारायणस्य अशेषद्विषां समग्रशिशुपालजरासंधप्रमुख- विद्वेषिणां पराभवनोदन्तमाकर्ण्य मोदते स्म ॥ इति विजयसेनसूरेर्वादे विजयाः सवाई- बिरुदं च ॥

શ્લોકાર્ધ

વિષ્ણુએ કરેલા શિશુપાળ, જરાસંધ આદિ શત્રુરાજાઓના પરાભવના સમાચાર સાંભળીને, વિદ્યાધરોને વશ કરીને વૈતાઢ્ય પર્વત ઉપરથી વસુદેવ ખુશ થયા હતા તેમ વિજયસેનસૂરિજીના વાદિવિજય અને 'સવાઈ' બિરૂદ અર્પણ કરવાના સમાચાર સાંભળીને હીરવિજસૂરિજી અત્યંત આનંદ પામ્યા. ॥ ૨૯૫ ॥

सूरिर्दीक्षयति स्म सक्षणमिहानेकान्महेभ्याङ्गजा-
न्मूर्तीनां च सहस्रशो भगवतां चक्रे प्रतिष्ठाः स्वयम् ।
एकच्छत्रमिव व्यधत्त भुवने स्वायंभुवं शासनं
प्रज्ञाधःकृतगीष्पतिः क्षितिपते राज्यं पुरोधा इव ॥ २९६ ॥

सुरिर्हीरविजयगुरुरिहास्मिन्महीमण्डले सक्षणं समहोत्सवं यथा स्यात्तथा अनेकान् बहून् महेभ्याङ्गजान् व्यवहारिनन्दनान्दीक्षयति स्म प्रव्राजयामास । च पुनः स्वयमात्मना सुरिः सहस्रशो बहुसहस्रसंख्यानां भगवतां तीर्थकृतां मूर्तीनां प्रतिमानां प्रतिष्ठाश्चक्रे । पुनर्भुवने विश्वे स्वायंभुवं जैनं शासनमेकच्छत्रमद्वितीयातपत्रमिव व्यधत्त विदधे । किंभूतः । प्रज्ञया स्वबुद्ध्या अधःकृतस्तिरस्कृतो गीष्पतिर्बृहस्पतिर्येन । क इव । पुरोधा इव । यथा पुरोहितो बुद्धिमत्तया मन्त्रविद्यादिशक्तिमान् क्षितेः पतेः स्वनृपस्य मन्त्रतन्त्रादिशक्त्या राज्यमेकच्छत्रं विधत्ते सोऽपि प्रतिभापराभूतपुरुहूतसुरिः स्यात् ॥

श्लोकार्थ

જેમ પુરોહિત મંત્રતંત્રાદિ શક્તિ વડે પોતાના રાજાના રાજ્યને એકછત્રીય બનાવે તેમ પોતાની બુદ્ધિ વડે બૃહસ્પતિનો પણ તિરસ્કાર કરનારા જગદ્‌ગુરુ શ્રી હીરવિજયસૂરિજીએ પ્રતિબોધ કરીને અનેક શ્રેષ્ઠીપુત્રોને મહોત્સવપૂર્વક દીક્ષિત બનાવ્યા, હજારો જિનબિંબોની પ્રતિષ્ઠાઓ કરાવી, તેમજ જગતમાં જૈનશાસનને એકછત્રીય સામ્રાજ્ય બનાવ્યું. ॥ ૨૯૬ ॥

सानन्दं ससुरासुरोरगनरव्रातैः स्वकान्तायुतैः
श्रोतृश्रोत्ररसायनैर्धनरवैर्जेगीयमानां रसात् ।
तद्विश्वत्रयचित्रकृद्गुणगणैरागत्य कर्णान्तिकं
गीतेर्गोचरताममेयसमयं नेतुं प्रणुन्नैरिव ॥ २९७ ॥

सूरेर्भूधनबोधनादिचरितप्रोद्भूतकीर्तिप्रथां
प्रीत्याकर्ण्य शिरोविघूर्णनपरे जातेऽखिले विष्टपे ।
श्रोतुं सोत्सुकमानसो दशशतीमक्ष्णामिवाखण्डलः
कर्णानाममरावतीविरचितावासाद्वृणीते विधेः ॥ २९८ ॥

आखण्डलः पुरंदरः अमरावत्यां स्वनगर्यां विरचितः कृत आवासो गृहं येन तादृशाद्विधेर्विधातुः सकाशात् कर्णानां श्रवणानां दशशतीं सहस्रं वृणीते याचतीव । केषामिव ।

अक्ष्णामिव । यथा मम नयनानां दशशती वर्तते तथा श्रुतीनामपि दशशतीं कुरु । कस्मिन् सति । सूरेर्हीरगुरोर्भूधनोऽकब्बरसाहिस्तस्य बोधनं प्रतिबोधविधानं तत्प्रमुखं चरितं चरित्रं तस्मात्प्रोद्भूतां प्रकटां जातां कीर्तिप्रथां यशोविस्तारं प्रीत्या प्रमोदेनाकर्ण्य श्रुत्वा । अखिले समस्तेऽपि विष्टपे विश्वे शिरोविघूर्णनपरे चेतश्चमत्कारितया स्वमूर्धविधूननतत्परे जाते सति । कीर्तिप्रथां किं क्रियमाणाम् । रसाद्रागात् । रसो रागेऽनेकार्थ्याम् । स्वेषामात्मनां कान्ताभिः स्त्रीभिर्युतैः सहितैः सुरसहिता ये असुरा दानवा उरगा नागा नरा मनुष्यास्तेषां व्रातैर्वृन्दैः सानन्दमानन्दककलितं यथा स्यात्तथा श्रोतॄणां श्रोत्रेषु कर्णेषु रसायनसदृशैर्घनैर्निबिडैस्तारतरैर्वा स्वैर्गीयमानामतिशयेन गीतां नरव्रातैः । उत्प्रेक्ष्यते—विश्वत्रयस्य त्रैलोक्यस्य चित्रकृद्भिरतिशयाश्चर्यविधायिभिर्गुणानां गणैः कर्णान्तिकं आगत्य श्रवणसमीपे समेत्य मातुं योग्यो मेयो न मेयोऽमेयो गलितावधिसमयं यावद्गीतेर्गानस्य गोचरतां नेतुं प्रापयितुं प्रणुन्नैरिव प्रेरितैरिव ॥ युग्मम् ॥

શ્લોકાર્થ

પોતાની સ્ત્રીઓ સહિત દેવ, અસુર, નાગ અને માનવોના સમૂહો વડે મધુર સ્વરે ગવાતા શ્રોતાજનને રસાયણ સમાન અને ત્રણે જગતને આશ્ચર્યકારી સેવા આચાર્યદેવના ગુણો સાંભળીને, તેમજ અકબર બાદશાહને પ્રતિબોધ આદિ આચાર્યદેવના અદ્ભુત ચરિત્રથી ઉત્પન્ન થયેલી કીર્તિકથાનો વિસ્તાર તેમજ ત્રણે જગતના મસ્તકને ડોલાવી નાખે તેવા યશના વિસ્તારને પ્રેમપૂર્વક સાંભળવા માટે ઉત્સુક બનેલા સ્વર્ગની અમરાવતીમાં રહેલા ઇન્દ્રે બ્રહ્મા પાસે પોતાનાં હજાર નેત્રોની જેમ હજાર કાનની યાચના કરી? વિશ્વને આશ્ચર્યકારી આચાર્યશ્રીના ગુણો કાનમાં નહીં શમાવવાથી જ જાણે ગીતારૂપે કાનની પાસે રહેલા ન હોય! ॥ ૨૯૭ ॥ ॥ ૨૯૮ ॥

सूर्याचन्द्रमसौ पुनर्दिनतमीनिर्माणदम्भादिदं
शुश्रूषारसिकायितानिशमनोवृत्ती इव भ्राम्यतः ।
भर्ता भोगभृतां तदाश्रवभवन्निर्वेदमेदस्विहृ-
न्मन्दं स्वश्रुतिनिर्मितावपि शतानन्दं निनिन्दात्मना ॥ २९९ ॥

पुनरपरार्थे सूर्याचन्द्रमसौ भानुविधू दिनानां तमीनां रात्रीणां निर्माणं करणम् । सूर्यो दिनान् चन्द्रो रात्रीः कुरुते । तस्य दम्भात्कपटाद्भ्राम्यतः पर्यटतः । उत्प्रेक्ष्यते—इदं शुश्रूषायां कीर्तिप्रथां श्रोतुमिच्छायां रसिकवदाचरिते अनिशं निरन्तरं मनसो वृत्तिर्व्यापारो ययोस्तादृशाविव । अपि पुनस्तदाश्रवणेन भवन्नुत्पद्यमानो यो निर्वेदः खेदस्तेन मेदस्वि मेदुरं पुष्टं भूतं हृत् हृदयं यस्य तादृशो भोगभृतां नागानां भर्ता स्वामी नागेन्द्रः

स्वस्यात्मनः श्रुतीनां कर्णानां सहस्रफणत्वात्कर्णबाहुल्यस्य निर्मितौ विधाने मन्दमलसं मूर्खं वा शतानन्दं जगत्कर्तारमात्मना स्वेनैव निलिन्द पर्षदि गर्हणामकरोत ॥

શ્લોકાર્થ

હીરવિજયસૂરિજીના ગુણો સાંભળવામાં રસિક એવા સૂર્ય, ચન્દ્ર, દિવસ તથા રાત્રિ કરવાના બ્હાને ગુણોને સાંભળવા માટે જ જાણે આકાશમાં પર્યટન કરતા ન હોય! આચાર્યના ગુણોને પોતાના કાનના અભાવે નહીં સાંભળવાથી ઉદ્વેગ પામેલો નાગોનો સ્વામી નાગેન્દ્ર, પોતાના કાન નહીં બનાવવા બદલ આળસુ એવા બ્રહ્માની અવગણના કરતો હતો ? ॥ ૨૯૯ ॥

विद्मो मन्दरकंदरैः प्रतिरवैः प्रोत्साहिताः किंनराः
यत्कीर्तिं युवतीकृतानुवदनाः प्रीतेरुपावीणयन् ।
सिद्धा रोधसि सिद्धसिन्धुसुदृशो योषानुषङ्गा जगू
रङ्गत्तुङ्गतरङ्गसङ्गजरवैः स्थानं ददत्या इव ॥ ३०० ॥

युवतीभिः स्वकान्ताभिः किंनरीभिः कृतमनुवदनं समं गानं येषां तादृशाः किंनराः पुरुषाः प्रीतेः स्वतन्त्रानन्दाद्यत्कीर्तिमुपावीणयन् वीणया वादनपूर्वकं गायन्ति स्म तत्र वयमेवं विद्मो जानीमः। उत्प्रेक्ष्यते वा—मन्दरकंदरैर्मेरुदरीभिः प्रतिरवैर्जगज्जनगानतार-तरध्वनिप्रतिध्वनितैः कृत्वा प्रोत्साहिता गातुमुत्कण्ठां प्रापिता इव। 'मन्दरकंदरासु शयितानुत्थापयन्किंनरान्' इति चम्पूकथायाम्। पुनः सिद्धा देवविशेषास्ते सिद्धानां सिन्धु-सुदृशः समुद्रपत्न्या नद्या एतावता गङ्गायाः। 'सिद्धस्वःस्वर्गिखापगाः' इति हैम्याम्। रोधसि तीरे जगुर्गायन्ति स्म। उत्प्रेक्ष्यते—रङ्गन्तश्चलन्तो ये तुङ्गा अत्युच्चतमास्तरङ्गाः कल्लोलास्तेषां परस्परं सङ्गाज्जाता ये रवाः कोलाहलाकलितगम्भीरधीरध्वनयस्तैः कृत्वा स्थानं ददत्याः स्वरं पूरयन्त्या इव। जिगासतां हि प्रथमं स्थानं दीयते, रागाद्यालापः वादित्रादिध्वनिश्च विधीयते, तत्स्थानम्, तदनु च गायनो गायति इति गीतिरीतिः। सिद्धाः किंभूताः। योषानुषङ्गाः स्त्रीणामनुषङ्गो येषाम्। सस्त्रीका इत्यर्थः॥

શ્લોકાર્થ

જાણે આચાર્યના ગુણો ગાઈ રહેલા જગતના મનુષ્યોના અવાજના મેરુપર્વતની ગુફામાં પડેલા પડઘાઓથી ગુરુગુણ ગાવામાં પ્રોત્સાહિત બનેલા કિન્નરો કિન્નરીઓની સાથે વીણાવાદનપૂર્વક કીર્તિનાં ગીતો ગાતા હતા. સ્વર્ગના દેવો દેવીઓની સાથે આકાશ-ગંગાના તીરે મનોહર અને ઉછળતા તરંગોના અવાજથી જાણે સ્થાન આપતા ન હોય, તે રીતે ગુણગાન કરતા હતા. ॥ ૩૦૦ ॥

तद्गङ्गागिरिराजयत्पिबजनानुर्व्याः स्तुवन्त्यो मुहुः –
स्वर्गे स्वर्गिमृगीदृशो निजजनिं निन्दन्ति मन्दाशयाः ।
मोहात्प्राक्परिकल्पितप्रियतमार्धाङ्गानुषङ्गादिमां
श्रोतुं क्वापि न गन्तुमीश्वरतया स्वं शैलजाक्रोशति ॥ ३०१ ॥

सैव कीर्तिप्रथैव गङ्गा मन्दाकिनी तस्या गिरिराजो हिमाचल पवोत्पत्तिस्थानं यः सूरिस्तं पिबन्ति सादरं पश्यन्ति तादृशान् जनान् भूमण्डलजन्मनो लोकान् मुहुर्वारंवारं स्तुवन्त्यः प्रशंसन्त्यः श्लाघमानाः स्वर्गिमृगीदृशः सुराङ्गनाः स्वर्गे देवलोके निजजनिं स्वावतारं निन्दन्ति तद्दर्शनाभावाद्गर्हन्ति । किंभूताः मन्दाशयाः प्रभोरन्यभुवनस्थायुकत्वेन दर्शनमलभमाना अत एव मन्दीभूतमनसो जडभावमुपगताः तथा मोहादज्ञानात् । 'सोऽहं हसायितुं मोहात्' इति चम्पूकथायाम् । मोहशब्देनाज्ञानम् । अथ च मोहात्प्रेमातिरेकात्प्राक् प्रथमं परिकल्पितः कृतः प्रियतमस्य अतीष्टस्य भर्तुश्च हरस्यार्धाङ्गेन सामिशरीरेण सममनुषङ्गः सबन्धः तस्मात्स्वार्धशरीरमीश्वराङ्गे स्यूतमतोऽर्धाङ्गी गौरीति प्रसिद्धिः । तत्कारणादिमां सूरिकीर्तिं क्वापि श्रोतुं कर्णगोचरीकर्तुं नेश्वरतया न समर्थत्वेन स्वमात्मानं शैलजा पार्वत्यपि स्वमोहमाक्रोशति धिक्कुरुते । हा मया अविचारचतुरया वृथैव हाराङ्गेन स्वाङ्गं स्यूतम्, गीतिप्रीतिमत्तापि क्वापि हरेण विना हन्तुं न शक्तेति ॥

श्लोकार्थ

કીર્તિ રૂપી ગંગાના ઉત્પત્તિ સ્થાનરૂપ હિમાચલ સમાન શ્રી હીરવિજયસૂરિનાં જેણે આદરપૂર્વક દર્શન કર્યાં છે તેવા મનુષ્યોની વારંવાર પ્રશંસા કરતી સ્વર્ગલોકની દેવાંગનાઓ, ગુરુદર્શનના અભાવે પોતાની જાતને ધિક્કારતી હતી. "મોહના અતિરેકથી પ્રિયતમ-ઈશ્વરના અર્ધ અંગમાં સ્યૂત બનેલી એવી હું (પાર્વતી) ઈશ્વરનાં અર્ધ અંગરૂપે હોવાથી આચાર્યના ગુણો સાંભળવા માટે શક્તિશાળી નથી" આ રીતે પાર્વતી પણ પોતાની જાતને ધિક્કારતી હતી. ॥ ૩૦૧ ॥

यत्कीर्तिं नरनिर्जरोरगवधूप्रारब्धनूतस्तुतिं
श्रुत्वास्यामनुरागितां त्रिभुवने बिभ्रत्यदभ्रां हृदा ।
शर्वाणीरमणस्तदश्रवणतो मूर्धस्थसिद्धापगां
कुर्वाणां बधिरत्वमुद्धररवैस्तारङ्गजैर्गर्हते ॥ ३०२ ॥

शर्वाणीरमणः पार्वतीपतिर्हरस्तस्याः सूरिकीर्तेरश्रवणतः अनाकर्णनात्तारङ्गजैः तरङ्गाणां समूहास्तारङ्गाः, तारङ्गेभ्यो जायन्ते स्मेति तारङ्गजास्तैः । यथा पद्मसुन्दरकविकृतभारतीस्तवे- 'वारं वारं तारतरस्वरनिर्जितगङ्गातारङ्गाः' इति । उद्धररवैरत्युद्धरध्वनिभिर्बधिरत्वं

कर्णयोर्बाधिर्यं कुर्वाणां मूर्धस्थसिद्धापगां स्वमस्तकस्थायुकभागीरथीं गर्हते। अस्या अडाशयाया: प्रोल्लसत्कल्लोलकोलाहलपुरः किमपि क्वापि श्रोतुं न शक्यते इति निन्दति। कस्मिन्सति। त्रिभुवने जगत्त्रये सति। किं कुर्वति त्रिभुवने। अस्यां सूरिकीर्तेः हृदा मानसेन कृत्वा अदभ्रामतिशायिनीमनुरागितां रागयुक्तवत्तां बिभ्रति दधाने। किं कृत्वा। नरा नागराः, निर्जराः सुराः, उरगा नागाः, तेषां वधूभिः अङ्गनाभिः प्रारब्धाः प्रमोदादुपक्रान्ताः। 'प्रारम्भः प्रोपतः क्रमः' इति हैम्याम्। नूता अभिनवाः स्तुतयः स्तवनानि यस्यां तादृशीं यस्य हीरसूरेः कीर्तिं श्रुत्वा श्रवणगोचरीकृत्य ॥

श्लोकार्थ

વિશ્વવ્યાપી આચાર્યની કીર્તિ તરફ અનુરાગ ધારણ કરતો હોવાથી દેવ, દાનવ અને મનુષ્યલોકની સ્ત્રીઓ વડે ગવાઈ રહેલા ગુણોની સ્તુતિ સાંભળીને, પોતાના મસ્તક ઉપર રહેલી આકાશગંગાના ઉદ્ધત તરંગોના કોલાહલથી જેના કાન બ્હેરા થઈ ગયા છે તે ઈશ્વર, આચાર્યના ગુણો નહીં સાંભળવાથી, તેને (ગંગાને) તિરસ્કારની દૃષ્ટિએ જોતા હતા. ॥ ૩૦૨ ॥

नैतां श्रोत्रवतंसिकां विरचयन्सृष्टेर्विनिर्माणतो
वैयग्र्येण कुलालमेव मनसा मेने निजं नाभिभूः।
त्रैलोक्यस्तुतिपारवर्तिविभवां संस्तोतुमेतां गुरुः
संजज्ञे गतगौरवः कविरपि प्रापाकवित्वं पुनः ॥ ३०३ ॥

सृष्टेर्विश्वसर्गस्य निर्माणतः करणाद्वैयग्र्येण व्यग्रभावेन एतां सूरीकीर्तिं श्रोत्रयोरात्म-कर्णयोरवतंसिकां कर्णपूरताम्। 'विदर्भसुभ्रुश्रवणावतंसिका' इति नैषधे। न विरचयन्न कुर्वाणः। न शृण्वन्नित्यर्थः। नाभिभूर्ब्रह्मा निजमात्मानं कुलालं कुम्भकारमेव मेने। कुम्भकारो हि भाण्डरणव्यग्रतया किमपि श्रोतुं न शक्नोति। पुनस्त्रैलोक्यस्य त्रिभुवन-स्यापि स्तुतेः स्तवनस्य पारे अगोचरे वर्तते इत्येवंशीलो विभवो यस्य। विश्वत्रयस्यापि स्तुतिगोचरामित्यर्थः। एतां सूरिकीर्तिं संस्तोतुं वर्णयितुं गुरुः बृहस्पतिर्गतं गौरवं माहात्म्यं वाचस्पतिता वा यस्य तादृशः संजज्ञे संजातः। तथा कविः शुक्रोऽपि काव्यकर्तापि अकवित्वं मूर्खत्वं न काव्यकर्तृत्वं प्राप ॥

श्लोकार्थ

ઘડા આદિ બનાવવામાં વ્યગ્ર બનેલો કુંભાર જેમ બીજું કંઈ પણ સાંભળી શકતો નથી, તેમ સૃષ્ટિનું સર્જન કરવામાં વ્યગ્ર બનેલા બ્રહ્માએ આચાર્યની કીર્તિ નહીં સાંભળી શકવાથી પોતાની જાતને કુંભારરૂપે માની! આચાર્યદેવની કીર્તિની સ્તુતિ

કરવા માટેની ગુરુ (બૃહસ્પતિ)ની ગુરૂતા ગઈ અને કવિ (શુક્ર)ની કવિતા ચાલી ગઈ ? ॥ ૩૦૩ ॥

निर्विण्णा इव जज्ञिरेऽश्रवणतस्तस्या मदप्रोद्धुर-
स्वाशासिन्धुररुन्धनादहरहः स्वान्ते महेन्द्रा दिशाम् ।
निद्रामुद्रितलोचनं जलनिधौ निध्याय ताक्ष्यर्ध्वजं
स्वच्छन्देन्दुमुखीव तां प्रतिगृहं शुश्राव सिन्धोः सुता ॥ ३०४ ॥

दिशां महेन्द्राः दिक्पालाः । 'पतिः प्रतीच्या इति दिङ्महेन्द्रैः' इति नैषधे । अहरहर्निरन्तरं मदेन प्रोद्धुराणां मदोन्मत्तानां स्वाशासिन्धुराणां निजनिजदिग्गजानां रुन्धनात्स्वस्थीकरणादेकत्र स्थाने रक्षणाद्वा तस्याः सूरिकीर्तेरश्रवणतोऽनाकर्णनात्स्वान्ते मनसि निर्विण्णाः खेदखिन्नाः इव जज्ञिरे जाताः । पुनः सिन्धोः सुता समुद्रस्य पुत्री लक्ष्मीस्तां कीर्तिं प्रतिगृहं सर्वेष्वपि मन्दिरेषु शुश्राव श्रृणोति स्म । यदुक्तम्—'सायर बप्प मुरारिपिय चंदसरीसा भाउ । लच्छी हींडइ घरघरिं महिला यह सहाउ ॥' केव । स्वच्छन्देन्दुमुखीव । यथा स्वच्छन्दचारिणी विलासिनी प्रतिगृहं वार्तादिकं श्रुतिविषयीकुरुते । किं कृत्वा । जलनिधौ पारावारे निद्रया स्वापेन मुद्रिते मीलिते लोचने नयने यस्य तादृशं तार्क्ष्यध्वजं गरुडकेतुं कृष्णं कान्तं निध्याय दृष्ट्वा ॥

श्લोકાર્થ

પોતાના મદોન્મત્ત દિગ્ગજોને નિરંતર વશ કરવાના વ્યવસાયમાં મસ્ત બનેલા દિક્પાળો આચાર્યના ગુણોનું શ્રવણ નહીં થવાથી ખેદ વડે ખિન્ન બની ગયા, અને સમુદ્રમાં નિદ્રા લઈ રહેલા પોતાના પતિ કૃષ્ણને જોઈને સ્વેચ્છાચારિણી સ્ત્રીની જેમ લક્ષ્મી પ્રત્યેક ગૃહમાં આચાર્યના ગુણોનું શ્રવણ કરતી હતી. ॥ ૩૦૪ ॥

स्वच्छन्दं त्रिजगद्विलासरसिकां कीर्तिं व्रतिक्ष्मापतेः
संदब्धोद्धुरतानगानवनितावक्त्रामृतार्चिःसुधाम् ।
सोत्कण्ठं पिबतामकुण्ठमनसां विश्वत्रयीजन्मिनां
प्राप्तानुत्तरसंमदा इव तदा संजज्ञिरे वासराः ॥ ३०५ ॥

तदा तस्मिन्नवसरे विश्वत्रयीजन्मिनां स्वर्लोके पाताललोके भूर्लोके च जन्मास्त्येषामिति विश्वत्रयीजन्मिनां सुरासुरनराणां वासरा दिवसाः प्राप्तो लब्धो न विद्यते उत्तरोऽग्रेतनः पदार्थः कोऽपि यस्मादसाधारणः संमदो नन्दो येषु तादृशा इव संजज्ञिरे संजाताः । किंभूतानां विश्वत्रयीजन्मिनाम् । अकुण्ठमनसां तदकेतानचित्तानां च । किं कुर्वताम् ।

क्षितिक्ष्मापतेः हीरविजयसूरिराजस्य कीर्तिमेव संदब्धानि विरचितानि उद्धुराणि अतिशायीनि तानानि आलापविशेषा येषु तादृशानि गानानि यासां तानयुक्तगानानि याभिर्वा तादृशीनां वनितानां निजयुवतीनां वक्त्राणि वदनानि एवामृतार्चिषां चन्द्राणां सुधां पीयूषरसं सोत्कण्ठं सह उत्कण्ठया वर्तते यत्तत् पिबतामास्वादयतां सादरं शृण्वताम् । किंभूतां कीर्तिम् । स्वच्छन्दं स्वेच्छया निरंकुशं त्रिजगति त्रिभुवनमध्ये यो विलासो विविधकेलीकरणं तत्र रसिकां सरसामुत्सुकां वा ॥ इति सूरिकीर्तिवर्णनम् ॥

श्लोकार्थ

त्रणे जगतमां निरंकुशपणे भमी रहेली हीरविजयसूरिजीनी कीर्तिरूपी घणा आलापोवाळां गीतोनुं जगतनी स्त्रीओना मुखरूपी चन्द्रमांथी उत्कंठापूर्वक एकाग्र चित्ते पान करता जगतना जीवोना दिवसो अपूर्व आनंददायक बन्या. ॥ ३०५ ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
पुत्रं कोविदसीहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलेनानन्दतो निर्मिते
वृत्ते हीरगुरोश्चतुर्दशमितः सर्गो बभूवानसौ ॥ ३०६ ॥

पण्डितदेवविमलगणिना आनन्दतः आह्लादान्निर्मिते विरचिते हीरगुरोः श्रीहीरविजयसूरेर्वृत्ते चरिते हीरसौभाग्यनाम्नि महाकाव्ये असौ पूर्वव्यावर्णितस्वरूप एव चतुर्दशत्वेन चतुर्दशसंख्यया वा मितः प्रमाणतां प्रापितः गणितः सर्गः काव्यरचनमयाधिकारविशेषः बभूवान् । क्वसुप्रयोगः । संजात इति ॥

इति पण्डितश्रीसीहविमलगणिशिष्यपण्डितदेवविमलविरचितायां स्वोपज्ञहीरसौभाग्यनाम्नि महाकाव्यवृत्तौ अकब्बरगोष्ठीबन्दिपञ्जरपक्षिमोचनमृगयानियमनसकलजन्तुजातसिद्धोभयनिर्भयकथनालापसुखानुभवनसोरीपुरमथुरागोपगिरियात्रानागपुरशिवपुरीप्रतिष्ठापूर्वकचतुर्मासककरणगुर्जरागमनजेजीयाकरमोचनामारिप्रवर्तनशत्रुंजयपर्वतार्पणफुरमानादिप्रदानकीर्तिवर्णनादिवर्णनो नाम चतुर्दशः सर्गः ॥

श्लोकार्थ

वणिक कुलमां ईन्दु समान 'शिव' नामना श्रेष्ठी अने सौभाग्यदेवीना जन्मजात सुपुत्र देवविमलगणी, के जेओ निरंतर ज्ञानोपासनामां तत्पर हता अने सर्वे मुनिओमां सिंहसमान सिंहविमलगणीना प्रथम शिष्यरूपे प्रसिद्ध हता; ते देवविमलगणी वडे जेमां जगद्गुरु श्री हीरविजयसूरिजीनुं सविस्तर जीवनचरित्र आवे छे, एवा

'હીરસૌભાગ્ય' નામના મહાકાવ્યની આનંદપૂર્વક રચના કરવામાં આવી. તે મહાકાવ્યનો બાદશાહ સાથેની ધર્મગોષ્ઠીથી પ્રારંભીને અમારિ પ્રવર્તન, શત્રુંજય પર્વતનો યાત્રા વેરો રદ કરવાના ફરમાનનું અર્પણ અને સૂરિજીની કીર્તિકથા સવિસ્તર વર્ણનપૂર્વકનો આ ચૌદમો સર્ગ સમાપ્ત થયો. ॥ ३०६ ॥

पञ्चदशः सर्गः ।

अथ सुहृद इव स्वं सारवस्तु प्रदत्तं
प्रमुदितहृदयेनाकब्बरोर्वीमघोना ।
श्रमणधरणिभृत्तल्लाभमादातुकामो
विमलशिखरिरत्नं प्रेक्षितुं काङ्क्षति स्म ॥ १ ॥

अथ शत्रुंजयप्रदानस्फुरमानागमनानन्तरं श्रमणधरणिभृत्सूरिराजः विमलनामा श्रीशत्रुंजयाभिधानः स एव शिखरिषु सर्वपर्वतेषु रत्नं सकलतीर्थाधिराजत्वात् । यथा स्नातस्यास्तुतौ—'मन्दररत्नशिखरे' इति । प्रेक्षितुं दृग्गोचरीकर्तुं काङ्क्षति स्म वाञ्छति स्म । रत्नस्य हि प्रेक्षणं युक्तमेव । किं कर्तुकामः । तस्माद्विमलाचलात्सकाशाल्लाभमधिकफलं यात्रया कृत्वा सुकृतोपार्जनात्कर्मक्षयाद्वा मोक्षप्राप्तिरूपं च आदातुकामो गृहीतुमनाः । किंभूतं विमलशिखरिरत्नम् । प्रमुदितहृदयेन हृष्टमानसेन अकब्बरोर्वीमघोना अकब्बरपातिसाहिना स्वं स्वकीयं तस्य सौराष्ट्राधिपतित्वात्सारवस्तु सम्यकपदार्थं धनरूपं वा प्रदत्तमर्थात्सूरीन्द्राय विश्राणितम् । कस्येव । सुहृद इव । यथा केनापि सौहार्दभाजा सुहृदः स्वमित्रस्य सारवस्तु प्रदीयते ॥

શ્લોકાર્થ

ત્યાર પછી આચાર્યદેવે, અકબર બાદશાહે મિત્રવત્ પોતાની સાર વસ્તુની જેમ હર્ષપૂર્વક આપેલા પર્વતરત્ન તીર્થાધિરાજ વિમલાચલ જોવાની ઇચ્છા કરી. ॥ १ ॥

विदलयितुमिवान्तर्वैरिषड्वर्गमुच्चै-
र्विधिवदुपचरद्भिः षड्भिरीन्ब्रह्ममुख्यान् ।
प्रतिविमलगिरीन्द्रं भव्यलोकैः परीतो
व्रतिपतिरथ यात्रां कर्तुकामः प्रतस्थे ॥ २ ॥

अथ दर्शनाकाङ्क्षानन्तरं व्रतिपतिर्हीरविजयसूरिः विमलगिरीन्द्रं प्रति श्रीशत्रुंजयशिलोच्चयसंमुखं प्रतस्थे प्रतिष्ठते स्म प्रचलति स्म। किंभूतः। भव्यलोकैः विमलाद्रियात्राभिलाषुकभविकजनैः परीतः परिवृतः परिवारितो वा। भव्यलोकैः किं कुर्वद्भिः। विधिवदागमोक्तप्रकारेण ब्रह्म शीलं मुख्यं प्रकृष्टमादिर्वा येषु तादृशान् षट्संख्याकान्। 'एकाहारी भूमिसंस्तारकारी पद्भ्यां चारी शुद्धसम्यक्त्वधारी। यात्राकाले सर्वसच्चित्तहारी पुण्यात्मा स्यात्सत्क्रियो ब्रह्मचारी ॥' इति। विधीनाचारविशेषान् उपचरद्भिः सेवमानैः कुर्वद्भिर्वा। उत्प्रेक्ष्यते—उच्चैरतिशयेन। मूलादित्यर्थः। अन्तरित्यव्ययम्। मध्यस्थायुकानामन्तरङ्गाणामित्यर्थः। वैरिणां शत्रुभूतानां परमप्रत्यर्थिनामनर्थकारित्वात्। क्रोधमानमायालोभरागद्वेषरूपाणां षड्वर्गं षण्णां वर्गं देहिनां महादुःखदायित्वात्सर्वेषामपि सादृश्यम्। 'वर्गस्तु सदृशाम्' इति हैमीवचनात्। विदलयितुमिव ॥

શ્લોકાર્થ

ક્રોધ, માન, માયા, લોભ, રાગ, દ્વેષરૂપ અંતરંગ શત્રુઓનો નાશ કરવા માટે એકલઆહારી, ભૂમિસંથારી, પાદચારી, શુદ્ધસમ્યક્ત્વધારી સચિત્તપરિહારી અને બ્રહ્મચારી આ છ પ્રકારની વિધિસહિત ભાવિકોથી પરિવરેલા આચાર્યદેવે યાત્રાર્થે શ્રીવિમલાચલ તરફ પ્રયાણ કર્યું. ॥ ૨ ॥

> नगरनिगमदुर्गग्रामसारामसीमा-
> गहनगुरुगिरीन्द्रांल्लङ्घमानः क्रमेण ।
> किममृतकमलायाः केलिशैलं क्षमायां
> श्रमणधरणिशक्रः सिद्धिशैलं ददर्श ॥ ३ ॥

श्रमणानां तपस्विनां मध्ये धरणिशक्रो राजा। धरणिशब्दो दीर्घो ह्रस्वोऽप्यस्ति। पूर्वं लिखितोऽस्ति ग्रन्थोक्तेन। सूरिराजः सिद्धिशैलं शत्रुंजयगिरिं ददर्श पश्यति स्म। उत्प्रेक्ष्यते—क्षमायां भूमौ अमृतं मुक्तिः सैव कमला लक्ष्मीः तस्याः केलिशैलं क्रीडाकरणार्थं पर्वतमिव। अत्र सिद्धिश्रीः स्वैरं रमते। सूरिः किं कुर्वाणः। क्रमेण विहारपरीपाट्या नगराणि महत्पुराणि देशेषु मुख्यपुराणि राजधानीरूपाणि वा, निगमा नगरस्थानविशेषा बृहद्वणिक्स्थानकानि वा, दुर्गा दुःखेन गम्यन्ते अध्यास्यन्ते इति दुर्गाः कोट्टाः विषमस्थानानि वा, ग्रामा अल्पचातुर्याणि लघुपुराणि संनिवेशा वा, सहारामैः कृत्रिमवनैरुद्यानैरुपवनैर्वा वर्तन्ते यास्तादृश्यः सीमा पुरबाह्यपरिसरभूमयो नगर्यो विभागकृद्भवो वा, गहनानि शैलसमीपविषमप्रदेशागतवनानि संकीर्णानेकपादपपटलशाखाविशेषा प्रविष्टार्ककिरणदुःसंचारकान्तारा वा, गुरवोऽतितुङ्गशृङ्गा गिरीन्द्राः महाशैलास्तांल्लङ्घमानः अतिक्रामन् ॥

શ્લોકાર્થ

નગર, નિગમ, દુર્ગ, ગ્રામ, ઉદ્યાન અને સિમાડા તથા ગહન અને ઊંચાં શિખરોવાળા પર્વતોનું ઉલ્લંઘન કરતા આચાર્યદેવે શત્રુંજય ગિરિનાં દર્શન કર્યાં. તે શત્રુંજય પર્વત જાણે પૃથ્વી ઉપર મુક્તિરૂપી લક્ષ્મીને ક્રીડા કરવા માટેનો ક્રીડાપર્વત ન હોય! ॥ ૩ ॥

अथ सिद्धिशैलं विशिनष्टि—

नयनपुटनिपेयामाश्रयन्काययष्टीं
किमु सुकृतसमूहो भारतक्षेत्रभाजाम् ।
निखिलविषयभूषामोषिसौराष्ट्रलक्ष्म्या
यदवनिधरदम्भाचारुचूडामणिर्वा ॥ ४ ॥

उत्प्रेक्ष्यते—यदवनिधरदम्भाद्यस्य श्रीशत्रुंजयशैलस्य व्याजाद्भारतं नाम जम्बूद्वीपमध्यभागस्थमन्दरगिरिदक्षिणदिक्प्रान्तविभागवर्तिलवणाम्भोधिसंनिधिवर्ति च क्षेत्रं वर्षं भजन्ते जन्मना श्रयन्ते इति भरतक्षेत्रोत्पन्नानां नराणामित्यर्थः । सुकृतसमूहः किमु पुण्यराशिरिव । किंभूतः सुकृतसमूहः । नयनानि भविकलोकलोचनानि एव पुटाः पर्णभाजनानि तैर्निरन्तरं पेयां पातुं सादरमवलोकयितुं योग्यां काययष्टीं तनुलताम् । 'स्याद्दोर्भूयः कणसमुचितः काययष्टीनिकायः' इति नैषधे । आश्रयन् बिभ्रत् वा । अथ वा निखिलाः समस्ता ये विषया देशाः । 'विषयस्तूपवर्तनम् । देशो जनपदो नीवृत्' इति हैम्याम् । तेषां भूषां शोभां मुष्णात्यपहरतीत्येवंशीलः सौराष्ट्रनामा देशः शत्रुंजययात्रासमागतभरतचक्रवर्तिप्रदत्तापरनामधेयो देवदेश इति तस्य लक्ष्म्याः श्रियः यद्विमलशैलच्छलाच्चारुः सर्वालंकारेभ्यो विशेषभूतश्चूडामणिः शिरःशिखामणिरिव ॥

શ્લોકાર્થ

ભવ્ય જીવોના નેત્રોને આહ્લાદનીય શરીરને ધારણ કરતો શત્રુંજયપર્વત જાણે ભરત ક્ષેત્રના મનુષ્યોનો પુણ્યસમૂહ ન હોય ! અથવા જેણે સર્વદેશોની વિભૂષાને હરી લીધી છે, તે સૌરાષ્ટ્ર દેશની લક્ષ્મીનો જાણે મુગટ ન હોય ॥ ૪ ॥

अमितरजतरत्नस्वर्णशृङ्गैरसंख्या-
निमिषशिखरिखण्डैः स्वःसदां सद्मभिश्च ॥
त्रिजगदुपरिभूमीलम्भिना येन मेरु-
र्विजित इव बभूव व्रीडयानक्षिलक्ष्यः ॥ ५॥

येन शत्रुंजयगिरिणा विजितः पराभूतः सन् । उत्प्रेक्ष्यते—मेरुः सुवर्णाचलो व्रीडया लज्जया कृत्वा न अक्ष्णोर्नयनयोर्लक्ष्यो निरीक्षितुं योग्योऽनक्षिलक्ष्योऽदृश्यो बभूव जायते स्म । क इव । येन । किंभूतेन । त्रिजगतां त्रयाणां पातालभूमिस्वर्गलक्षणानां भुवनानामुपरिभूमीं लोकाग्रवर्तिस्थानं मुक्तिलक्षणं लम्भयति प्रापयति इत्येवंशीलस्तेन । 'सर्वेषामपि शैलानामुन्नतो विमलाचलः । यदारोहेण लोकाग्रं प्राप्यते बालकैरपि ॥' इति पूर्वाचार्यस्तुतिवचनात् । विजितः । कैः कृत्वा । न मीयन्ते प्रमाणीक्रियन्ते स्वबुद्ध्या विदग्धैरपीत्यमितानि । गणनातीतानीत्यर्थः । रजतानां रूप्यरत्नानां विविधमणीनां स्वर्णानां काञ्चनानां शृङ्गाणि शिखराणि तैः पुनर्न विद्यते संख्या गणना मानं येषां तान्यसंख्यानि अनिमिषाणां देवानां शिखरिणां वृक्षाणां खण्डानि काननानि तैः । 'स्यात्खण्डं काननं वनम्' इति हैम्याम् । पुनः स्वःसदां सुराणां सद्मभिर्नगरैर्मन्दिरैश्च । 'गौस्त्रिदिवमूर्ध्वलोकः सुरालयः' इति हैम्याम् । मेरुस्तु स्वप्रमाणोच्चप्रदेशे प्रापयति नोपरितनविभागे । तथा मितान्येव शृङ्गाणि बिभर्ति तान्यपि रत्नानामेव रत्नसानुत्वात् । तथा भद्रसालनन्दनसौमनसपाण्डुकनामानि चत्वार्येव वनानि धत्ते । तथा एकमेव सुरगृहं कलयति । यदुक्तम्—'दिवमङ्कादमराद्रिरागताम्' इति नैषधे । अथः शत्रुंजयाद्रिणा स्वाभ्यधिकवैभवेन मेरुर्निर्जितस्तद्युक्तमेव ॥

श्લોકાર્થ

અગણ્ય રૂપા, સોના અને રત્નોનાં શિખરો વડે, અસંખ્ય કલ્પવૃક્ષોના વનખંડો વડે, દેવોનાં મંદિરો વડે અને ત્રણ જગતના મસ્તક ઉપર રહેલી મુક્તિને આપવા વડે સર્વોત્કૃષ્ટતાને ધારણ કરતા શત્રુંજય પર્વત દ્વારા પરાભવ પામેલો મેરૂપર્વત (એક શિખર, ભદ્રશાલ, સૌમનસ, નંદન અને પુંડરિક આ ચાર જ વનખંડવાળો અને એક જ દેવમંદિરવાળો મેરૂપર્વત) લજ્જાથી જ જાણે અદૃશ્ય બની ગયો ન હોય! ॥ ५ ॥

शिखरिमणिविनिर्यज्ज्योतिरुज्जृम्भमाणा-
ञ्जनविपिनविनीले व्योम्नि यस्याबभासे ।
अतुलचटुलभावं स्वं परित्यज्य नित्यं
तडिदिव निवसन्ती वल्लभाम्भोधराङ्के ॥६॥

उज्जृम्भमाणा पुष्पपल्लवादिभिर्विकसितभावं भजन्ते येऽञ्जनाः अञ्जननामानो वृक्षविशेषाः । 'केचित्प्रभञ्जना इव पापर्धिकजनाः खण्डिताञ्जनाधरप्रवालाः' इति चम्पूकथायाम् । 'अञ्जना सुन्दरी पत्नी अञ्जनद्रुमश्च । अधरोष्ठपल्लवः अधस्तनकिसलयं च' इति तद्वृत्तिः । तेषां विपिनानि तद्वद्विनीले अतिश्यामले व्योम्नि नभस्तले यस्य शत्रुंजयाद्रेः शिखराणामुत्तुङ्गशृङ्गाणां मणिभ्यो रक्तपीतरत्नेभ्यो विनिर्यन्निःसरद्दशदिगङ्गणान व्याप्नुवज्ज्योतिः कान्तिराबभासे शोभते स्म । उत्प्रेक्ष्यते—स्वमात्मीयमतुलमतिशायितमतिघनं चटुलभावं चापलं परित्यज्य विहाय वल्लभस्य स्वभर्तुः अम्भोधरस्य प्रावृषेण्यपयोदस्य

अङ्के उत्सङ्गे। 'चिरविलसनात्खिन्नविद्युत्कलत्रः' इति मेघदूतकाव्यम्। विद्युतो मेघकलत्रत्वमुक्तम्। तथा 'प्रिये मदुत्सङ्गविभूषणं भव' इति नैषधे। वल्लभाया वल्लभस्य क्रोडे उपवेशनं दृश्यते। निवसन्ती वाल्लभ्येन वितिष्ठमाना तडिद्विद्युदिव ॥

श्लोकार्थ

વિકસ્વર 'અંજન' નામનાં વૃક્ષોના વનની સમાન અત્યંત શ્યામ બનેલા આકાશમાં, શત્રુંજયપર્વતનાં શિખરો ઉપર રહેલાં રત્નોમાંથી નીકળતી કાંતિ શોભતી હતી; જાણે હંમેશની પોતાની અતિશય ચપલતાનો ત્યાગ કરીને પોતાના મેઘરૂપી પતિના ઉત્સંગમાં રહેલી વિદ્યુત ન હોય ! ॥ ६ ॥

क्वचिदपि कलधौतप्रस्थसंस्थानगाहि-
प्रवहदविरलाम्भोनिर्झरस्फारधारा ।
तुहिनशिखरिशृङ्गोत्सङ्गरङ्गत्प्रवाह-
द्युसदधिपनदीवाद्वैतशोभां बभार ॥ ७ ॥

क्वचदपि शत्रुंजयशैलस्य कुत्रापि स्थानके कलधौतस्य रजतस्य प्रस्थं शिखरं तदेव संस्थानं सम्यगाश्रयस्तदवगाहन्ते अधितिष्ठन्तीत्येवंशीलाः तथा प्रकर्षेण वहन्ति प्रसर्पन्ति, तथा अविरलानि अविच्छिन्नधाराधोरणानि अम्भांसि जलानि येषु तादृशानां निर्झराणां स्फारा अत्युदारा दृश्यमाना नयनानन्ददायिन्यो धारा महत्प्रमाणाधोनिष्पतत्पयःप्रवाहाः अद्वैतामसाधारणां शोभां बभार धत्ते स्म। केव। तुहिनशिखरिणो हिमाचलस्य शृङ्गस्य शिखरस्य उत्सङ्गे क्रोडे मध्ये वा रङ्गन्प्रसर्पन प्रवाहो निरन्तरपयःपूरो यस्यास्तादृशी। दिवि सीदन्त्यवतिष्ठन्ते इति द्युसदो देवास्तेषामधिपः पुरंदरस्तस्य नदी सरिद्गङ्गेव। यथा देवनदी तथा देवेन्द्रस्यापि नदी। यदुक्तम्—'सुरेन्द्रतटिनीतीरेषु सिद्धाङ्गनाः' इति भोजप्रबन्धे ॥

શ્લોકાર્થ

શત્રુંજય પર્વતના કોઈ સ્થાનમાં ચાંદીના શિખર ઉપર સમ્યક્પ્રકારે પ્રસરતી અવિચ્છિન્ન ઝરણાંની જલધારા કોઈ અદ્વિતીય શોભા ધારણ કરતી હતી. તે જાણે હિમાચલના શિખરની મધ્યમાં જેનો પ્રવાહ પ્રસરી રહ્યો છે તેવી દેવગંગા ન હોય ! ॥૭॥

जलधिभवनजम्भारातिसारङ्गचक्षु-
र्दिगवनिधरमूर्धालम्बिबिम्बौ दिनादौ।
रजतकनकराजत्कर्णपूराविवैत-
द्विमलगिरिरमायाः पुष्पदन्तौ विभातः ॥८॥

जलधौ सागरे भवनं गृहं यस्य स वरुणः। 'वरुणस्त्वर्णवमन्दिरप्रचेताः' इति हैम्याम्। जम्भस्य दानवविशेषस्य अरातिः शत्रुरिन्द्रस्तयोः सारङ्गचक्षुषी प्रिये तादृश्यौ दिशौ प्रतीचीप्राच्यौ। 'वरुणगृहिणीमाशामासादयन्तममुं रुची—,' तथा 'निजमुखमितः स्मेरं धत्ते हरेर्महिषी हरित्' इति पदद्वयमपि नैषधे। तयोर्दिशोरवनिधरौ पर्वतौ अस्ताचलोदयाद्री तयोर्मूर्धानौ मस्तकशिखरे आलम्बेते आश्रयेते तादृशौ बिम्बौ मण्डलौ ययोस्तादृशौ पुष्पदन्तौ शशिभास्करौ। पुष्पदन्तौ पुष्पवन्तावेकोक्तया शशिभास्करौ' इति हैम्याम्। दिनादौ पूर्णिमादिके क्वापि प्रातःकाले विभातः। उत्प्रेक्ष्यते—एतस्य विमलगिरेः शत्रुंजयाद्रे रमायाः लक्ष्म्याः रजतेन रूप्येण तथा कनकेन काञ्चनेन कृत्वा राजन्तौ रूप्यस्वर्णनिर्माणेन शोभमानौ दीप्यमानौ कर्णपूरौ श्रवणौ पूर्येते आभ्यामिति कुण्डले इव॥

श्लोकार्थ

જેમનું ઘર સમુદ્ર છે તેવા વરૂણ અને ઇન્દ્રની પ્રિયતમાઓ પશ્ચિમ દિશા અને પૂર્વ દિશાના પૂર્વાચલ અને પશ્ચિમાચલનાં શિખર ઉપર જેમનાં બિંબ રહેલાં છે તે સૂર્ય અને ચન્દ્ર, દિવસના પ્રારંભે વિમલગિરિની લક્ષ્મીનાં રૂપ્યમય અને સુવર્ણમય કુંડલોની જેમ શોભે છે. ॥ ८ ॥

निखिलभुवनभारोद्धारनिर्वेदभाजा
भुजगपरिवृढेनानेकविज्ञप्तिकाभिः।
भरभरणधुरीणोऽशेषनीरेशनेमेः
किमयमिह महीध्रः कारितो विश्वकर्त्रा ॥ ९ ॥

भुजगानां नागानां परिवृढेन स्वामिना शेषनागेन अनेकाभिर्विविधप्रकाराभिर्विज्ञप्तिकाभिरञ्चलप्रसारेण दीनतादर्शनमुखाङ्गुलीप्रेक्षणचटुभाषणप्रमुखविज्ञपनैः कृत्वा। उत्प्रेक्ष्यते—विश्वकर्त्रा जगन्निष्पादकेन धात्रा पार्श्वे इह जगति पृथिव्या अयं महीध्रः एष शत्रुंजयाद्रिः। किं कारितः। निर्मापित इव। किंभूतेन। निखिलस्य समग्रस्य भुवनस्य भूलोकस्य भारो वीवधस्तस्योद्धारेणोद्वहनेन कृत्वा निर्वेदं मनसि विषादं खेदं वा भजतीति तेन। अयं किंभूतः। अशेषायाः समस्ताया नीराणां जलानामीशः स्वामी समुद्रः। 'स्रोतोवार्नदीशः सरस्वान्' इति हैम्याम्। नेमिश्चक्रधारावद्यस्याः परिधीभूतो यस्यास्तादृश्याश्चतुरर्णवपर्यन्तपृथिव्या भरस्य भरणे धारणे। 'डुभृञ् धारणपोषणयोः' इत्यस्य प्रयोगः। धुरीणो धुर्यो धौरेयः॥

श्लोकार्थ

નાગોથી પરિવરેલા શેષનાગે, સમસ્ત જગતનો ભાર વહન કરવાથી શ્રમિત થયેલા

હોવાથી બ્રહ્માને આ પ્રમાણે વિજ્ઞપ્તિ કરી : સમુદ્ર પર્યંતની ભૂમિનો ભાર વહન કરવામાં સમર્થ એવો આ શત્રુંજયપર્વત આપે કેમ બનાવ્યો ! ॥ ९ ॥

सुरपथपथिकैतत्प्रस्थसंस्थानभोगाः
शशभृदपरभागं प्रेक्ष्य साक्षान्निरङ्कम् ।
किमयमिदमुपास्ते नित्यमभ्येत्य कुर्व-
न्नजनि विगतलक्ष्मेत्यन्तरध्याहरन्ति ॥ १० ॥

सुरपथस्याकाशस्य पथिकेषु पान्थेषु । अभ्रंकषेष्वित्यर्थः । एतस्य शत्रुंजयाद्रेः प्रस्थेषु श्रृङ्गेषु संतिष्ठन्ते इति संस्थाः । क्विबन्तः । तिष्ठन्तीत्यर्थः । नभस्याकाशे गच्छन्तीति नभोगाः सिद्धगन्धर्वविद्याधरसुराः अन्तश्चित्तमध्ये इत्यमुना प्रकारेणाध्याहरन्ति विचारयन्ति । किं कृत्वा । निर्गतोऽङ्कः कलंको यस्मात्स निरंकस्तं लाञ्छनरहितं शशभृतश्चन्द्रस्यापरभागं यस्मिन्नधस्तने भागे लाञ्छनं लक्ष्यते तस्मादन्यम् । उपरितनभागमित्यर्थः । साक्षात्प्रत्यक्षेण प्रेक्ष्य व्यालोक्य । एतावता चन्द्रलोकादप्युन्नतमानि श्रुङ्गाणि तेषूपविष्टा नभोगाश्चन्द्रस्योपरितनं भागं दृशा व्यालोक्य वितर्कयन्ति । इति किम् । यदयं चन्द्रो नित्यं सदा अभ्येत्यात्रागत्य इदमुपास्ते श्रीशत्रुंजयाद्रेः सेवां कुर्वन् सन् । उत्प्रेक्ष्यते— विगतं प्रयातं लक्ष्म लाञ्छनं यस्य तादृशः किमजनि संजात इव ॥

શ્લોકાર્થ

શત્રુંજય પર્વતનાં ગગનચૂંબી શિખરો ઉપર થઈને આકાશમાર્ગે પસાર થતા દેવો, વિદ્યાધરો અને ગંધર્વોએ ચંદ્રનો લાંછન વિનાનો પાછલો ભાગ જોઈને વિચાર્યું 'ચન્દ્ર શત્રુંજય પર્વતની નિત્ય ઉપાસના કરવાથી નિષ્કલંક બની ગયો લાગે છે' ! ॥ १०॥

भुजगभवनमध्यं व्याप्नुवन्स्थूलमूलै-
र्दिवमपि शिखरैः स्वैर्भूघनेनापि भूमीम् ।
इति विमलमहीभृद्भूर्भुवःस्वस्त्रयीं यो
हरिरिव निजपादैः स्वात्मनाक्रम्य तस्थौ ॥ ११ ॥

यो विमलनामा महीभृत् शत्रुंजयाचलः स्वात्मना निजस्वरूपेण कृत्वा भूर्भुवःस्वस्त्रयीं पातालभूमण्डलस्वर्गलोकत्रिकमाक्रम्याभिव्याप्य तस्थौ स्थितवानास्ते । क इव । हरिरिव । यथा नारायणो निजैः स्वकीयैः त्रिभिः पादैः क्रमैः कृत्वा त्रैलोक्यमाक्रम्य तिष्ठति स्म । बलिबन्धावसरे वामनरूपेण बलेः सकाशात्क्रमत्रिकमितां क्षितिं याचितवान्, तस्मिन्व्यतिकरे अतिमहद्रूपमाधाय क्रमत्रयेण त्रिजगदाक्रान्तम्, तदा बलिर्बध्वा पाताले क्षिप्तः । तदंशौ नैषधे यथा—'हरेर्यदक्रामि पदैककेन खं पदैश्चतुर्भिः क्रमणेऽपि तस्य नः । त्रपा

हरीणामिति नम्रितानर्नैन्र्यर्वर्ति तैरर्धनभःकृतक्रमैः ॥' 'यत्स्वमाकाशं हरेरेककेन पदाङ्घ्रिणा अक्रामि तस्य नभसश्चतुर्भिः पदैराक्रमणे नोऽस्माकं हरीणां त्रपा लज्जा इति नम्रितं नीचैः कृतमाननं यैस्तादृशैः । नामसादृश्यादुत्प्रेक्षा । हरिभिरश्वैरर्धा न संपूर्णा नभसि गगने कृताः क्रमाः कला यैर्न्यर्वर्ति । नाभःक्रमणादित्यर्थः ।' इति तद्वृत्तिः । यथैकेन क्रमेण खम्, तथा द्वितीयेन पदेन भूः, तृतीयेनाङ्घ्रिणा पातालं चेति । अथ गिरेराक्रमणं दर्शयति- यः किं कुर्वन् । स्थूलैरतिपुष्टैः पृथुलैर्वा मूलैरधोभागवर्तिस्वप्रदेशैः कृत्वा भुजगानां भवनं गृहं पातालं तस्य मध्यं पातालमूलम् । कैलाश इत्यभिधानत्वात् । अपि पुनर्दिवमाकाशं स्वर्गं वा स्वैरात्मीयैरभ्रंलिहैः शिखरैः शृङ्गैः अपि पुनर्भूघनेन स्वशरीरबाहुल्येन देहस्थौल्येन पृथ्वीं व्याप्नुवन् ॥

શ્લોકાર્થ

જેમ વિષ્ણુએ, વામનરૂપ કરીને બલિનો વધ કરવાનો હતો ત્યારે બલિ પાસેથી ત્રણ પગલાં જેટલી પૃથ્વીની યાચના કરીને અતિમહાન રૂપે વિકુર્વીને ત્રણ પગ વડે અનુક્રમે સ્વર્ગલોક, મૃત્યલોક અને પાતાળલોક આક્રમીને રહ્યા હતા તેમ શત્રુંજયપર્વત, અતિપુષ્ટ મૂલ વડે પાતાલલોક, ગગનચૂંબી શિખરો વડે સ્વર્ગલોક અને શરીરના વિસ્તારથી મૃત્યુલોક--આમ ત્રણે લોકને વ્યાપીને રહેલો છે. ॥ ૧૧ ॥

बहलसलिलपूर्णातूर्णयानाभ्रिकाभिः ।
स्फुरति शिखरमालालम्बिकादम्बिनीभिः ।
विधुमणिरविदीपाञ्जेतुमभ्यागतैर्यः
किमभिलषितदायी सेव्यमानस्तमोभिः ॥ १२ ॥

यो विमलाद्रिः शिखरमालां शृङ्गश्रेणीमालम्बन्ते समाश्रयन्ते इत्येवंशीलाभिः कादम्बिनीभिर्घनघटाभिः कादम्बिनीमेघमालाभिबहलं नीरन्ध्रं सर्वेष्वपि वर्दलेषु विद्यमानत्वेनातिघनं यत्सलिलं पानीयं तेन पूर्णा निर्भरभृता अत एवातूर्णं मन्दमत्वरितं यानं गमनं यासां तादृश्योऽभ्रिका वर्दलानि यासु ताभिः । उत्प्रेक्ष्यते—अभिलषितानि निजमनःकामितानि ददातीत्येवंशीलो यः शैलो विधुश्चन्द्रो रविः सूर्यः मणयो रत्नानि कर्कतनादीनि प्रभंकरादिमानि वा दीपास्तान् जेतुमर्थात्स्वप्रतिपक्षान् पराभवितुं यदेते तमसामुच्छेदविधायिनस्ततस्तेषामभिभवनमुचितमत्र । अभ्यागतैर्महात्मनः समीपे समेतैस्तमोभिरन्धकारैरिव सेव्यमानः किमुपास्यमानः ॥

શ્લોકાર્થ

જેમાં મેઘની સતત ધારા છે, પર્વતનાં શિખરોને અવલંબીને રહેલી, જલથી પરિપૂર્ણ અને મંદ મંદ ચાલતી વાદળીઓ વડે જગતના જીવોને અભિષ્ટદાયી એવો

શત્રુંજયપર્વત, જાણે ચન્દ્ર, સૂર્ય, રત્ન અને દીપકોને જીતવા માટે આપેલા અંધકારોથી સેવાતો ન હોય ! ॥ ૧૨ ॥

जडिमशितिमवर्षायुष्कलोलस्वभावो-
दधुरसमिरविरोधोदन्वदभ्यर्थनाद्यम् ।
निजमखिलमसातं हातुमब्दैः समेत्या-
निशनिवसनदम्भात्किं तपस्तप्यतेऽस्मिन् ॥१३॥

अब्दैर्मेघैः समेत्य अत्रागत्य अनिशं निरन्तरं यन्निवसनं निवासः स्थितिकरणम्। वर्षानन्तरं हि वारिदाः क्वापि गिरौ वसन्तीति कविसमयः। तस्य दम्भात्कपटात्। उत्प्रेक्ष्यते—अस्मिन् शत्रुंजये तप उपवसनादि तप्यते किं क्रियत इव। किं कर्तुम्। निजमात्मीयमखिलं समस्तमप्यसातं दुःखं हातुम्। 'ओहाक् त्यागे' इत्यस्य प्रयोगः। त्यक्तुम्। किंभूतमसातम्। जडिमानं जाड्यमज्ञानं डलयोरैक्यात् जलमयतां जडाशयताम्, तथा शितिमानं निन्द्यकृष्णभावम्, तथा वर्षायुष्कं वर्षाकाले यावज्जीवितव्यताम्। 'शरद्धनात्पयः' इति वचनात्। तथा लोलस्वभावतामस्थिरत्वं चञ्चलाशयत्वम्। यदुक्तम्—'क्षारो वारिनिधिः कलङ्ककलुषश्चन्द्रो रविस्तापकृत्पर्जन्यश्चपलाशयः स्वयमिहा दृश्यः सुवर्णाचलः। काष्ठं कल्पतरुर्दृषत्सुरमणिः स्वर्धामधेनुः पशुः..........तत्केन साम्यं सताम्॥' इति लोकोक्तेः। तथा उद्धुरा उत्कटा प्रबला ये समिराः पवनास्तैः सह विरोधो वैरम्। यदुक्तम्—'सज्जन सावन मेहज्यूं उन्नहिप गहगट्ट। पिशुनपवनभइसंचरे मारिकिपदहवट्ट॥' इति। पुनरप्युक्तम्-'विलपति कृषा सारङ्गोऽयं त्वमुन्नतिमानहो जलमपि च ते संयोगोऽयं कथंचिदुपस्थितः। उपकृतिकृते प्रह्वं चेतः कुरुष्व यदग्रतो भ्रमति पवनःकस्त्वं कोऽयं क्व ते जलबिन्दवः॥' तथा 'अहह... समीरण दारुण किमिदमाचरितं चरितं त्वया। यदिह चातकचञ्चुपुटे दरे पतति वारि तदेव निवारितम्॥' इत्यपि सूक्तोक्तेः। समुद्रात्सकाशादभ्यर्थना प्रतिवर्षपानीययाच्ञा परस्मादभ्यर्थदानम्। यदुक्तम्- अब्दैर्वारिजिघृक्षयार्णवगतैः साकं व्रजन्ती मुहुः' इति खण्डप्रशस्तौ। तथा मेघा हि समुद्रात्सलिलं याचित्वा भूमण्डले वर्षन्तीति जनश्रुतिः। एते प्रकारा आद्याः प्रथमा यत्र तत्॥

શ્લોકાર્થ

શત્રુંજયપર્વત ઉપર મેઘો નિરંતર રહેલા હતા ! પોતાની જડતા, (જલતા) વર્ષાકાળપર્યંત જ જીવન ધારણ કરવું, ચપલસ્વભાવ, પ્રચંડ પવન સાથેની શત્રુતા અને સમુદ્ર પાસેથી જલની યાચના કરવી વગેરે પોતાનાં દુઃખો દૂર કરવા માટે જાણે મેઘો શત્રુંજય પર્વત ઉપર તપ કરવા માટે આવીને તપસ્યા કરતા ન હોય ! ॥ ૧૩ ॥

---

१. 'वायुः समीरसमीरौ' इति हैमकोशाद्ध्रस्वेकारघटितसमिरशब्दः साधुः.

त्रिदिवसदनमार्गोत्सङ्गरङ्गत्तरङ्गै-
　मणिचितचयचञ्चद्रोचिषां संचयैर्यः ।
द्युनिशमिह निजाङ्कस्थायुकानां चिकीर्षुः
　किमु शरणधुरीणः शाश्वतं सुप्रभातम् ॥ १४ ॥

यः शत्रुंजयाद्रिर्मणिभिराभङ्कैरप्रभङ्कैरादिरत्नैश्चितो व्याप्तो रत्ननिर्मितो यश्चयो वप्रः प्राकारस्तस्य चञ्चतां दीप्यमानानां रोचिषां कान्तीनां संचयैः संदोहैः कृत्वा । उत्प्रेक्ष्यते- इह विश्वे द्युनिशं नित्यं निजस्यात्मनः अङ्के उत्सङ्गे स्वसमीपे वा स्थायुकानां निवसनशीलानां स्वापत्यानामिव भविकजनानां शाश्वतमनश्वरं सुप्रभातं शोभनालोकं सिद्धशैलत्वाच्चिकीर्षुः कर्तुमिच्छुरिव । किंभूतैः संचयैः । त्रिदिवे स्वर्गे सदनं गृहम्, अथ वा त्रिदिवं द्यौरेव सदनं येषां ते देवास्तेषां मार्गः पन्था आकाशस्तस्योत्सङ्गे क्रोडे रङ्गन्तः प्रसर्पन्तः तरङ्गाः प्रसारा येषां तैः । यः किंभूतः । शरणे स्वसमीपागतरक्षणे धुरीणो बलवान् वत्सलः आश्रितपालकः शरणागतवज्रपञ्जरो वा ॥

श्लोकार्थ

આકાશમાં જેનાં કિરણો પ્રસરી રહ્યાં છે તેવા શત્રુંજયપર્વતના રત્નમય કિલ્લાની દેદીપ્યમાન કાંતિના સમૂહથી જાણે પોતાની મધ્યમાં અર્થાત્ વિશ્વની મધ્યમાં નિરંતર ભવ્ય જીવોને શાશ્વત અને સુંદર બનાવવા માટે સિદ્ધગિરી શરણાગત વત્સલની જેમ રહ્યા ન હોય ! ॥ ૧૪ ॥

घनलसदुपकण्ठा रुक्मरूप्यद्विभागा
　पतदुपरिझराम्भा भाति कुत्रापि भित्तिः ।
तनुरिव पुरदस्योः स्यूतशैलाङ्गजाङ्गा
　श्रितशितिगलनाला स्वःस्रवन्तीं श्रयन्ती ॥ १५ ॥

यत्र शत्रुंजयाद्रौ कुत्रापि कस्मिंश्चित्प्रदेशे कौतुकाकलितशिल्पिकल्पिता भित्तिः कुड्यं भाति दीप्यते राजते वा । किंभूता । घनेन मेघेन कृत्वा । 'गिरौ वर्षन्ति माधवाः' इति वचनात् । लसत् शोभमानमुपकण्ठं कण्ठस्य समीपमुपकण्ठं समीपं वा यस्याः । पुनः किंभूता । रुक्मं स्वर्णं रूप्यं रजतं तयोर्द्वौ पूर्वापरौ भागावंशप्रदेशौ यस्याः । एकस्मिन् भागे स्वर्णेन, अपरस्मिन् भागे च रजतेन घटिता इत्यर्थः । पतन्निर्माणविशेषादागच्छदुपरि शिरःप्रदेशे झरस्य शिखरनिर्झरस्य अम्भः पानीयं यस्याः । केव भाति । तनुरिव । यथा पुरदस्योरीश्वरस्य तनुः वपुर्यष्टी शोभते । किंभूता । घनवन्मेघ इव नीलत्वाल्लसत्कण्ठस्य समीपं यस्याः । पुनः किंभूता । स्यूतं प्रोतम् अर्धाङ्गीकरणात् शैलस्य हिमाद्रेरङ्गजाया

पार्वत्या अङ्गं शरीरं यस्याम्। शंकरः श्वेतवर्णः, पार्वती तु कनककेतकी पीतवर्णा। पुनः किंभूता। श्रितं शिति श्यामवर्णं गलनालं कण्ठपीठं यया। पुनः किं कुर्वन्ती। स्वःस्रवन्तीं गगनगङ्गां श्रयन्ती शिरसि सिद्धधुनीं दधती ॥

श्लोकार्थ

શત્રુંજય પર્વતના કોઈ પ્રદેશમાં કૌતુકી શિલ્પીએ નિર્માણ કરેલી ભીંત ઈશ્વરના શરીરની તુલના કરતી શોભે છે. ભીંતનો ઉપરનો ભાગ મેઘ વડે સુશોભિત છે, ઈશ્વરના કંઠના સમીપનો ભાગ મેઘની જેમ શ્યામ કાન્તિથી શોભે છે, અર્ધભાગરૂપ પાર્વતીનો રંગ સુવર્ણમય છે, ભીંતના ઉપરના ભાગમાંથી ઝરણાનું પાણી પડી રહ્યું છે, ઈશ્વરના મસ્તક ઉપર આકાશગંગા ધારણ કરાઈ છે, આ રીતે ઈશ્વરના શરીરની જેમ શત્રુંજયની ભીંત શોભી રહી છે. ॥ ૧૫ ॥

स्फटिकघटितशृङ्गोत्सङ्गसङ्गी तरङ्गी-
भवदलिकुलशाली चम्पकः पुष्पपीतः।
दशशतनयनस्याध्याश्रितस्वःकरेणोः
कलितकनककान्तेः कान्तिमादान्मघोनः ॥१६॥

यत्र शत्रुंजये क्वचन प्रदेशे चम्पको हेमपुष्पकः मघोनः पुरंदरस्य कान्तिं शोभामाशाञ्जप्राह। शक्रसदृशः संजायते स्मेत्यर्थः। 'कान्तिर्द्युतिभूषेच्छासु' इत्यनेकार्थः। किंभूतश्चम्पकः। स्फटिकैः श्वेतरत्नैर्घटितं निष्पादितमर्थाद्भिरञ्चिना विरचितं यच्छृङ्गं शिखरं तस्योत्सङ्गः क्रोडो मध्यं तत्र सङ्गोऽस्यास्तीति स्फटिककूटोपरिप्ररूढः। पुनः किंभूतः। तरङ्गीभवद्भिः अनेकश्रेणीबन्धागमनात्कल्लोललीलां कलयद्भिरमन्दमकरन्दास्वादोन्मदिष्णुभावं बिभ्रद्भिरलिनां भ्रमराणां कुलैर्वृन्दैः शालते शोभते इत्येवंशीलः। यद्यपि च लोकोक्त्या 'वहिरइनपुण्यो गीतभमरचंपइनबइट्ठो। सोलकलासंपुन्नचन्दअधलइ न दिट्ठो॥' इत्यादि श्रूयते। तथापि 'चिचिन्वती पान्थपतङ्गहिंसनैरपुण्यकर्माण्यलिकज्जलच्छलात्। व्यलोकयच्चम्पककोरकावलीः स शाम्बरारेर्बलिदीपका इव' इति नैषधोक्त्या चम्पकेऽपि भृङ्गागमनसंभवो दृश्यते। पुनः किंभूतः। पुष्पैर्विकसत्कुसुमैः पीतो हारिद्रवर्णः। मघोनः किंभूतस्य। दशशतानि सहस्रं नयनानि नेत्राणि यस्य। पुनः किंभूतस्य। अध्याश्रितः स्वकीयारोहेण पृष्ठे प्रतिष्ठां प्रापितः स्वःकरेणुरैरावणो येन। एतावता अभ्रमूवल्लभारूढः। पुनःकिंभूतस्य। कलिता धृता कनकवत्स्वर्णस्येव कान्तिर्देहद्युतिः शोभा या येन। 'चम्पकोऽस्मिन्सपुष्पः' इति पाठे अस्मिन् शत्रुंजये सपुष्पः स्मेरप्रसूनपरिचितश्चम्पकद्रुमः॥

श्लोकार्थ

ઐરાવણ હાથી ઉપર આરૂઢ થયેલો, હજાર નેત્રવાળો અને કંચનવર્ણીય શરીરની શોભાને ધારણ કરતો ઇન્દ્ર જેમ શોભે તેમ શત્રુંજય પર્વત ઉપર રહેલા સ્ફટિક રત્નના

શિખર ઉપર રહેલું ચંપક વૃક્ષ ભ્રમરોની હારમાલાથી અને વિકસ્વર પીતવર્ણીય પુષ્પોના સમૂહથી શોભી રહ્યું છે. ॥ ૧૬ ॥

अपि धृतसुरसिन्धुर्नागरङ्गी सदुर्गः
सवृषमुषितकालः केकियानं दधानः ।
धृतशशधरचूडो नीरमुङ्नीलकण्ठः
शिव इव घनयानो भाति मृत्युंजयाद्रिः ॥ १७ ॥

अद्रिः शत्रुंजयशैलः शिव ईश्वर इव भाति । किंभूतः । धृता कलिताः सुरा विविधस्थानस्थातारोऽनेककपर्दियक्षप्रमुखा अधिष्ठातारो देवाः, तथा सिन्धवः शत्रुंजया चेन्द्री-साभ्रमती-ब्राह्मी-प्रमुखाश्चतुर्दश महानद्यो येन। शिवस्तु श्रितदेवनदीको गङ्गाधरत्वात् । पुनः किंभूतः । नागरङ्गा वृक्षविशेषा 'नारङ्गा' इति लोके प्रसिद्धाः सन्त्यस्मिन् । पक्षे नागेषु भुजंगमेषु विषये रङ्गः स्नेहोऽस्त्यस्येति । 'पाणौ फणीन् भजति कङ्कणभूयमैशे सोऽयं मनोहरमणीरमणीयमुच्चैः । कोटीरबन्धनधनुर्गुणयोगपट्टव्यापारपारगममुं भज भूतभर्तुः ॥' इति नैषधे । पुनः किंभूतः । सह दुर्गैर्विषमस्थानकैः कोट्टैर्वा वर्तते यः । पक्षे पार्वतीयुक्तः अर्धाङ्गत्वात् । पुनः किंभूतः । सह वृषेण धर्मेण । 'पुण्यराशिः श्रिय-' इत्यभिधानत्वात् । पक्षे वृषभेण वाहनबलीवर्देन वर्तते यः । तथा मुषितो निर्दलितः कालः कलिर्यमो वा अजरामरपददायकत्वात् । पक्षे कालनामा दैत्यो येन । पुनः किंभूतः । केकिनां मयूराणां यानमितस्ततो गमनम् । पक्षे स्वामिकार्तिकं च दधानः । पुनः किंभूतः । धृतः, कलितः शशधरश्चन्द्रो यया तादृशी चूडा शिखरशिखा अभ्रंकषत्वात् मस्तकोपरितनभागश्च येन । पुनः किंभूतः । नीरमुचा मेघेन तद्वच्च नीलः कृष्ण कण्ठः कंधरा गलनालं यस्य । 'द्रुध-दम्बुदनीलकण्ठताम' इति नैषधे राजगृहवर्णनम् । अम्बुदेन मेघेन नीलः कण्ठः उपत्यका-भागो ग्रीवा चेति उपत्यकायाः कंधरेति प्रतिपादनम् । 'यदनेककसौधकंधराहरिभिः कुक्षिगतीकृता इव' इत्यपि नैषधे । पुनः किंभूतः । घनानां मेघानां यानानि गमनानि संचारा यत्र । पक्षे घनवाहन इत्यभिधानः । यानशब्देन वाहनम् । पुनः किंभूतः । मृत्युं मरणं यमं जयतीति मृत्युंजयो जन्मजरामरणापहारकः सिद्धिदातृत्वात् । पक्षे मृत्युंजयो नाम्ना ॥

શ્લોકાર્થ

શત્રુંજય પર્વત ઈશ્વરની જેમ શોભે છે. પર્વત અધિષ્ઠાયક દેવો, શત્રુંજયી, સાબરમતી, સરસ્વતી આદિ ચૌદ મહાનદીઓને ધારણ કરનારો છે, ઈશ્વર મસ્તક ઉપર સુરગંગાને ધારણ કરનાર છે. પર્વત નારંગીનાં વૃક્ષોથી સહિત છે, ઈશ્વર નાગો પ્રત્યે અનુરાગી છે. પર્વત દુર્ગ (કોટ) સહિત છે, ઈશ્વર દુર્ગા (પાર્વતી) સહિત છે. પર્વત ધર્મસહિત છે, ઈશ્વર વૃષભના વાહનવાળો છે. પર્વત અજરામર પદનો દાયક હોવાથી

યમનો નાશ કરનાર છે, ઈશ્વર કાલ નામના દૈત્યનો નાશ કરનાર છે. પર્વત મયૂરોને ધારણ કરનારો છે, ઈશ્વર કાર્તિકસ્વામીને ધારણ કરનારો છે. પર્વતનાં શિખરો ઉપર ચંદ્ર રહેલો છે, ઈશ્વરના મસ્તક ઉપર ચંદ્ર રહેલો છે. પર્વત મેઘ વડે શ્યામ કંધરાવાળો છે, ઈશ્વર મેઘની જેમ શ્યામ કંઠવાળો છે. (નીલકંઠ) પર્વત ઉપર મેઘનું ગમનાગમન છે, ઈશ્વર મેઘવાહન કહેવાય છે. પર્વત ભવ્ય જીવોના જન્મ-મરણનો નાશ કરનાર હોવાથી મૃત્યુંજય છે, ઈશ્વર પણ મૃત્યુંજય કહેવાય છે. આ રીતે શત્રુંજય પર્વત ઈશ્વરની જેમ શોભે છે. ॥ ૧૭ ॥

स्वकशिखरशिखाङ्कस्थायुकान्स्वैकताना-
न्कमलमृदुलदेहांस्तापितांस्तापनेन ।
सुखयितुमिव शैत्यैः सिद्धशैलोऽङ्गभाजो
बहलजलमुचोच्चैरातपत्रं तनोति ॥ १८ ॥

सिद्धशैलः शत्रुंजयाद्रिर्बहलेन नीरन्ध्रेण सान्द्रेण जलमुचा नीरदेन कृत्वा। उत्प्रेक्ष्यते—अङ्गभाजो यात्रिकजनान् शैत्यैः शीतलताभिः सुखयितुं सुखीकर्तुं शीतलान्विधातुमिवात-पत्रं मायूरपिच्छच्छत्रं तनोति विस्तारयति। शिरसि धत्ते इत्यर्थः। किंभूतानङ्गभाजः। स्वकान्यात्मीयानि शिखराणि शृङ्गाणि तेषां शिखानामग्राणामङ्के उत्सङ्गे स्थायुकान् संस्थायिनः उपविशनशीलान्। पुनः किंभूतान्। स्वस्मिन्नात्मनि विषये एकतानानेकाग्र-चित्तान्। पुन किंभूतान्। कमलवन्मृदुलः सुकुमारो देहः शरीरं येषाम्। पुनः किंभूतान्। तापनेन सूर्येण तापितान् संतप्तीकृतकायान् ॥

શ્લોકાર્થ

પોતાનાં શિખરોના અગ્ર ભાગ ઉપર રહેલા, પોતાને વિષે અનુરાગવાળા, કમલ સમાન કોમલ શરીરવાળા અને સૂર્યના તાપથી સંતપ્ત બનેલા યાત્રિકોને શીતળતા અર્પણ કરવા માટે શત્રુંજય પર્વત મેઘની ધારા વડે જાણે તેઓને છત્ર ધારણ કરતો ન હોય ! ॥ ૧૮ ॥

स्वभवविभवभूम्ना लम्भितेनाभिभूतिं
त्रिदशशिखरिमुख्याशेषशैलव्रजेन ।
किमु विमलगिरीन्दो रूप्यरत्नार्जुनाङ्गा
निजनिजशिखरौघाः प्रापिताः प्राभृतत्वम् ॥ १९ ॥

त्रिदशशिखरी मेरुर्मुख्यः प्रकृष्टो येषु तादृशा अशेषाः समस्ता ये शैलाः पर्वतास्तेषां व्रजेन समूहेन विमलगिरीन्दोः श्रीशत्रुंजयशैलशक्रस्य । उत्प्रेक्ष्यते—निजस्य शिखरौघाः शृङ्गगणाः 'निजस्य तेजः शिखिनः परश्शताः' इति नैषधे । प्राभृतत्वमुपदाभावं प्रापिताः । ढौकिता इत्यर्थः किंभूताः । रूप्यं रजतं रत्नानि मणयः अर्जुनं स्वर्णं तेषामङ्कं शरीरं येषां ते । रजतरत्नहेममया इत्यर्थः । किंभूतेन । त्रिदशशिखरिमुख्याशेषशैलव्रजेन । स्वस्माद्विमलशैलात्मनो भव उत्पत्तिर्येषां तादृशानां विभवानां शोभासंपदां भूम्ना बाहुल्येन । अभिभूतिं पराभवं लम्भितेन प्रापितेन ॥

श्लोकार्थ

શત્રુંજય પર્વતરૂપ રાજાના વૈભવથી પરાભવ પામેલા મેરૂ આદિ સર્વે પર્વતોના સમૂહે રૂપાનાં, સોનાનાં અને રત્નનાં પોતપોતાનાં શિખરો જાણે વિમલાચલને ભેટણારૂપે આપ્યાં ન હોય! ॥ ૧૯ ॥

विमलशिखरिकुण्डा वल्लरीः शैवलाना-
मुपरि बहलितानामुद्वहन्तो विभान्ति ।
प्रवसितदयितानां कामिनीनां कपोला
इव लुलदलकाङ्काः पाण्डिमानं दधानाः ॥ २० ॥

विमलशिखरिणः श्रीशत्रुंजयगिरेः कुण्डा जलस्थानानि विभान्ति शोभन्ते । किं कुर्वन्तः । उपरि स्वसलिलोर्ध्वभागे बहलितानां निश्छिद्रीभूतानां सान्द्राणां शैवलानां शेवलानां वल्लरीर्मञ्जरिः । 'मञ्जरी वल्लरीश्च सा' इति हैम्याम् । उद्वहन्तो धारयन्तः । के इव । कपोला इव । यथा प्रवसिताः पथिकीभूताः परदेशं प्राप्ता ना दयिता भर्तारो यासां तादृशीनां कामिनीनां विरहविधुरवधूनां कपोलाः गण्डा गल्ला राजन्ते । किंभूताः । लुलन्तः पतिव्रता व्रततया प्रियप्रवासवासरादारभ्य अबद्धत्वादुपरि पतन्तो गण्डस्थले मिलन्तः अलकाः केशा अङ्क उत्सङ्गे येषाम् । पुनः किं कुर्वाणाः । पाण्डिमानं पाण्डुरभावं दधानाः । विरहे हि प्रायः प्रतिव्रतानां कपोला धवलीभवन्ति । यदुक्तं नैषधे—'विरहपाण्डुकपोलतले विधुः' इति ॥

श्लोकार्थ

જે સ્ત્રીઓના પતિ પ્રવાસે ગયા છે તે વિરહિણી સ્ત્રીઓની ફીકાશને ધારણ કરતા કેશયુક્ત કપોલો જેમ શોભે તેમ વિમલાચલના જલકુંડો જલ ઉપર રહેલી નીરપ્રશેવાલો વડે શોભે છે. ॥ ૨૦ ॥

विविधनवचिरत्नायत्नदत्तात्मरत्नै-
 र्निखिलमपि निहत्याकिंचनत्वं जनानाम् ।
मणिशिखरिणमद्रिर्दीनवाकारिणं यो
 बहु तृणमिव चक्रे किंपचानं वदान्यः ॥ २१ ॥

अद्रिः श्रीशत्रुंजयपर्वतः मणिशिखरिणं रोहणाचलम् । 'श्रेणीवर्जनदुर्यशोनिर्विशितव्रीडस्तु रत्नाचलः' इति नैषधे । तथा 'ये रत्नाचलवासिनो हि मनुजास्तेषां न रत्नोद्यमः' इति सूक्ते । यथा रत्नाचलस्तथा मणिशिखरी । तं बहु धनं यथा स्यात्तथा तृणं तृणप्रायमकिंचित्करमिव चक्रे कृतवान । किं कृत्वा । जनानां स्वाश्रितभविकलोकानां निखिलं समस्तमपि अकिंचनत्वं दरिद्रभावं निहत्य मूलादुच्छेद्य । कैः कृत्वा । विविधानि नानाप्रकाराणि 'वज्र-वैडूर्य-लोहिताक्ष-मसारगल्ल हंसगर्भ-पुलक-सौगन्धिक-ज्योतीश्वर-अञ्जन-अञ्जनपुलक-जातरूप-सुभग-अङ्क-स्फटिक- कर्केतन-मरकत-प्रवाल-इन्द्रनील- चन्द्रप्रभ' इति सिद्धान्तोक्तानि, 'पद्मराग-गरुडोद्गार-राजपट्ट- चन्द्रकान्त-सूर्यकान्त-माणिक्याद्यानि नवानि नवीनोत्पन्नानि चिरत्नानि चिरकालोद्भूतानि । 'चिरत्नरत्नाचितमञ्चितं चिरात्' इति नैषधे । 'चिरत्नानि चिरकालजातानि' इति तद्वृत्तिः । अयत्नदत्तानि प्रयासं विनैव प्रकटस्थितत्वेन खननाद्युपक्रममन्तरेण विश्राणितानि यान्यात्मनः स्वस्य स्वस्मिन्नुत्पन्नत्वेन निजस्यैव रत्नानि माणिक्यानि तैः । अद्रिः किंभूतः । वदान्यो दानशीलः । किंभूतं मणिशिखरिणम् । दीनां कृपणाम् । 'कृपाश्रये यः कृपणे पतत्रिणि' इति नैषधे । 'कृपणे दीने' इति तद्वृत्तिः । 'कृपणः कदर्ये दीने च' इत्यनेकार्थः । हस्ताभ्यां भालमास्फाल्य हा तात हा मातः इति वाचं वाणीं कारयतीत्येवंशीलम् । यदुक्तम्—'हादं वेति वचो विना न ददते वज्राणि वज्राकराः' इति सूक्ते । तथा 'दैन्योक्त्या रोहणाद्रिः खरमुखरतरं पुष्करावर्तमेघाः' इति सोमसुन्दरसूरिकृतऋषभदेवस्तवे । तथा 'धिग्रोहणं गिरिं दीनदारिद्र्यव्रणरोहणम् । दत्ते हा दैवमित्युक्ते रत्नान्यर्थिजनाय यः ॥' इति विक्रमादित्यादिभिरुक्ते । अत एव पुनः किंभूतम् । किंपचानं कदर्यम् ॥

શ્લોકાર્થ

દાનેશ્વરી શત્રુંજયપર્વત પોતાના વિવિધ પ્રકારના પદ્મરાગ, ચન્દ્રકાન્ત, સૂર્યકાન્ત આદિ નવીન રત્નો અને વજ્ર, વૈડુર્ય આદિ ચિરરત્નો કોઈપણ પ્રકારના પ્રયાસ વિના આપીને ભવ્ય જીવોની દરિદ્રતા દૂર કરીને, મનુષ્યો પાસે લમણે હાથ મૂકાવીને "હો તાત... હા....માત....' એવાં દીનવચનો બોલાવીને રત્ન આપનારો કૃપણ રોહણાચલને તૃણપ્રાયઃ ગણતો હતો. ॥ ૨૧ ॥

विदलितदलमालाशालिलीलातमालः
　कनकशिखरसंस्थस्तच्छविच्छन्नवर्ष्मा ।
मुररिपुरिव पीतस्फीतवासोवसानो
　विहगविभुविहारी यत्र शत्रुंजयेऽभात् ॥ २२ ॥

यत्र यस्मिन् श्रीशत्रुंजयधात्रीधरे विदलिताभिर्विकसिताभिर्दलानां मरकतमणिगणाच्छिन्नच्छविच्छायानां पत्राणां मालाभिः श्रेणीभिः शालते शोभते इत्येवंशीलो यो लीलातमालः विद्याभृद्भिर्मानवैर्वा क्रीडा (?) कृते रोपितस्तापिच्छतरुः । अथ वा स्वयमेव कथंचिदुद्गतः विलासविधायकस्तमालद्रुमः अभाद्बभौ । किंभूतस्तमालः । कनकस्य काञ्चनरचिते शिखरे शृङ्गे संतिष्ठते इति कनकशिखरस्थः । पुनः किंभूतः । तस्य कनकशिखरस्य छविर्ज्योतिस्तया छन्नं व्याप्तं वर्ष्म शरीरं यस्य । क इवाभात् । मुररिपुरिव । यथा नारायणो भासते । किंभूतः । पीतं हारिद्रवर्णं स्फीतं मनोज्ञं वासो वस्त्रं वसानः परिदधानः । वस्ते इति वसानः । 'गुणिप्रायाणि वस्त्राणि भूषणानि तव प्रभो । वसानश्च दधानश्च सत्कविर्द्वारि तिष्ठति ॥' इति भोजप्रबन्धे । पुनः किंभूतः । विहगानां पक्षिणां विभुः स्वामी गरुडस्तेन विहरति विचरतीत्येवंशीलः ॥

श्लोकार्थ

જેમ પીતાંબર ધારણ કરનારા ગરૂડવિહારી વિષ્ણુ શોભે તેમ શત્રુંજય પર્વતના સુવર્ણના શિખર ઉપર રહેલું, સુવર્ણની કાન્તિથી વ્યાપ્ત અને વિકસ્વર પાંદડાઓથી સુશોભિત તમાલવૃક્ષ શોભે છે. ॥ ૨૨ ॥

उपरिपरिसरद्भिः पद्मरागाश्मगर्भ-
　स्फटिकघटितशृङ्गव्रातजातांशुपूरैः ।
अपि नभसि भुवीव ब्रह्मभूभानुपुत्री-
　त्रिदशजलधिगानां यस्तनोतीव सङ्गम् ॥ २३ ॥

यः श्रीशत्रुंजयशैलः भुवि पृथिव्यामिव नभस्याकाशेऽपि ब्रह्मभूः सरस्वती, भानुपुत्री यमुना, त्रिदशजलधिगा गङ्गा, तासां सङ्गं संगमनं मेलनम् । त्रिवेणीसङ्गमित्यर्थः । तनोति करोतीव । कैः कृत्वा । उपरि नभोङ्गणे परिसरद्भिः परि समन्तात्प्रसरद्भिः पद्मरागा रक्तमणयः, तथा अश्मगर्भाः मरकतरत्नानि, तथा स्फटिकाः श्वेतमाणिक्यानि तैः कृत्वा । 'रत्नं वसुमतीमाणिक्यमपि' इति हैमीवृत्तौ । घटितानां नाकिना शिल्पिना वा संकल्पितानां शृङ्गाणां शिखराणां व्रातादूवृन्दाज्जाताः प्रकटीभूता येंऽशुपूराः किरणगणास्तैः कृत्वा । पद्मरागरुचिभिर्विरञ्चिसुता सरस्वती हि कविसमये किंचिदरुणा वर्ण्यते । रुधिरप्रवाहस्य त्वस्या

उपमानत्वेन मरकतमणिकान्तिभिर्यमुना तस्याः श्यामवर्णत्वेन स्फटिकरत्नज्योतिषा गङ्गा तस्या उज्ज्वलत्वेन । इति त्रिवेणीसंगमः ।

શ્લોકાર્થ

શિખર ઉપર રહેલા પદ્મરાગ (લાલમણિ) વડે સરસ્વતી, મરકત(નીલ)મણિવડે યમુના અને સ્ફટિક રત્ન વડે ગંગા, આ રીતે શત્રુંજય પર્વત જાણે સરસ્વતી, યમુના અને ગંગાનો પૃથ્વીની જેમ આકાશમાં ત્રિવેણી સંગમ કરતો ન હોય ! ॥ ૨૩ ॥

क्वचिदपि मुचकुन्दोऽमन्दनिस्यन्दवृन्द-
स्मितसुमविशदश्री राजतप्रस्थसंस्थः ।
समदसुरभिसूनोः पृष्ठधिष्ठानभाजो
भसितलसितमूर्तेः प्राप शंभोर्विभूषाम् ॥ २४ ॥

क्वचिदपि श्रीशत्रुंजयस्य कुत्रापि प्रदेशे मुचकुन्दो मुचकुन्दनामा पुष्पजातिवृक्षविशेषः शंभोरीश्वरस्य विभूषां शोभां प्राप लेभे । किंभूतः । अमन्दा अतिप्रचुरा ये निस्यन्दास्तेषां वृन्दानि पटलानि येषु तादृशानि स्मितानि विकसितानि सुमानि पुष्पाणि तैः विशदा उज्जवला श्रीः शोभा यस्य सः । पुनः किंभूतः । राजते रूप्यसंबन्धिनि प्रस्थे शिखरे संतिष्ठते इति संस्थः । शंभोः किंभूतस्य । समदो मदमेदुरो यः सुरभिसूनुः अर्जुनीनन्दनो वृषभस्तस्य पृष्ठे 'पुंठि' इति लोके प्रसिद्धा तत्राधिष्ठानमाश्रयं भजते । पृष्ठे चढितः । पुनः किंभूतः । भसितैर्भस्मभिर्लसिता मनोज्ञीभूता मूर्तिर्यस्य । यस्यांङ्गनशालिनः ॥

શ્લોકાર્થ

શત્રુંજયપર્વતના કોઇ શિખર ઉપર મચકુંદવૃક્ષ ઈશ્વરની તુલના કરતું શોભી રહ્યું છે. ઈશ્વર જેમ વૃષભની પીઠ ઉપર આરૂઢ થયેલા અને ભસ્મ વડે સુશોભિત છે તેમ જેમાંથી ખૂબ રસ ઝરી ગયો છે તેવાં વિકસ્વર પુષ્પોથી ઉજ્જવલ એવું મચકુંદવૃક્ષ શોભી રહ્યું છે. ॥ ૨૪ ॥

अनणिममणिमालाशालिनी यस्य सिन्धुः
प्रतिफलितविवस्वद्दीप्तिदुःप्रेक्षणीया ।
सुकृतभरितजन्तोर्गर्भमन्तर्वहन्ती
युवतिमनुकरोति स्मेरदम्भोरुहास्या ॥२५॥

यस्य श्रीशत्रुंजयस्य सिन्धुः काचित्तरङ्गिणी युवतिं तरुणीमनुकरोति । युवतीसदृशी भवतीत्यर्थः । किंभूता सिन्धुः । न विद्यते मूल्यापेक्षया महिम्ना वा अणिमा लघिमा अल्पत्वं

येषु एतावता बहुमूल्यानामप्रतिमप्रभाप्रभाववतां च मणीनां रत्नानां मालाभिः श्रेणीभिः शालते शोभते इत्येवंशीला । गिरिनदीषु मणिसद्भावः किरातार्जुनकाव्ये कथितोऽस्ति । किंभूता । प्रतिफलितः अन्तर्जलं प्रतिबिम्बितो यो विवस्वान् सूर्यः तस्य दीप्त्या कान्त्या दुःखेन प्रेक्षितुं योग्या द्रष्टुमर्हा । किंभूतां युवतीम् । सुकृतेन प्राचीनजन्माचीर्णेन पुण्येन भरितस्योपचितस्य पूर्णस्य जन्तोर्जीवस्य गर्भं दोहदलक्षणमन्तः कुक्षौ वहन्तीं धारयन्तीम् । पुनः किंभूता । स्मेरद्विनिद्रद्यदम्भोरुहं कमलं तद्वत् विकसितसरोजवद्वा आस्यं मुखं यस्याः । 'स्मेरदम्भोजखण्डाभिः' इति पाण्डवचरित्रे । तथा युवत्यपि पुण्यप्राग्वद्गर्भानुभावाद्दुःप्रेक्षणीया । यथा 'धार्मिकधाम गङ्गाया इव भास्करं गर्भमन्तर्दधाना वा दुरालोकमभूद्वपुः' इति पाण्डवचरित्रे ॥

શ્લોકાર્થ

શત્રુંજયપર્વતની નદી સગર્ભા યુવતીની જેમ શોભે છે. કોઈ પુણ્યશાળી કમલાક્ષિ પુણ્યવંત જીવને ગર્ભરૂપે ધારણ કરતી દુઃપ્રેક્ષ્ય લાગે છે, તેમ શત્રુંજયનદી અમૂલ્ય રત્નોને ધારણ કરતી અને સૂર્યના પ્રતિબિંબ વડે દુઃપ્રેક્ષ્ય લાગતી શોભી રહી છે. ॥ ૨૫ ॥

वृषभजिनगुणौघान्गायतः स्वक्वणस्या-
नुगुणरणितवीणान्किंनरेन्द्रान्गिरीन्द्रः ।
क्वचन विकचमोचाचारुपत्रैर्धवित्रै-
रिव पवनविलोलैर्वीजयामास मन्ये ॥२६॥

गिरीन्द्रः शत्रुंजयपर्वताधिपतिः क्वचन कस्मिन्नपि कदलीसदनलतामण्डपादौ प्रदेशे किंनरेन्द्रान्किंपुरुषराजान् । उत्प्रेक्ष्यते—अहमेवं मन्ये वा । पवनविलोलैर्वातवेगान्दोलनचञ्चलीभूतैर्विकचानां विकसितानां मोचानां रम्भाद्रुमाणां चारुभिर्मनोहरैः पत्रैः महद्दलैर्वीजयामास निरन्तरगाढबहुलगीतिजनितश्रमापनोदार्थं वीजयति स्मेव । कैरिव । धवित्रैरिव । यथा मृगचर्मव्यजनैः कश्चित्पार्थिवादीन् ग्रीष्मसमये स्वेदबिन्दुकितकायान् वीजयति । 'व्यजनं तालवृन्तं धवित्रं मृगचर्मणि' इति हैम्याम् । किंनरेन्द्रान् किं कुर्वतः । वृषभजिनस्य विमलाचलकमलाशृङ्गारहारस्य युगादिदेवस्य गुणानामोघान् गणान् गायतो गीतिगोचरीकुर्वतः । पुनः किंभूतान् । स्वक्वणस्य निजमधुरध्वनेरनुगुणा अनुगतः सदृशीभूतो गुणो निःक्वणनरूपो यस्याः सा तादृशी रणिता वादिता वीणा विपञ्चिका यैस्तान् ॥

શ્લોકાર્થ

જેમ રાજાને મનોહર વીંઝણા વડે વીંઝવામાં આવે અર્થાત્ સ્વેદને દૂર કરવા માટે પવન નાંખવામાં આવે તેમ વિમલાચલના અલંકારરૂપ શ્રીયુગાદિદેવના ગુણોનું, પોતાના

અવાજને અનુસરતા રાગને સાથ આપનારી વીણાઓ વડે કીર્તન કરતા કિન્નરોના શ્રમને દૂર કરવા માટે જાણે શત્રુંજયપર્વત રંભા (કેળ)ના વૃક્ષના સુંદર પત્રોરૂપી વીંઝણા વડે વીંઝતો ન હોય ! ॥ ૨૬ ॥

गलदमलमरन्दोन्मादिरोलम्बरावा-
कुलकलदलमालोन्निद्रसान्द्रद्रुमौघः ।
रणरणकितचेता वेश्मनीवात्र तस्थौ
मुदिर इव रिरंसुर्विद्युतात्मीयपत्न्या ॥२७॥

गलद्भिः सर्वर्तुनिवासवत्त्वेन समकालविकसितसकलकुसुमसमूहेभ्यो निःसरद्भिः अमलैर्विशदैः सुस्वादुभिर्मरन्दैः कुसुमरसैरुन्मादिनां मकरन्दबिन्दुपानोन्मत्तीभूतानां रोलम्बानां मधुकराणां रावैर्गुञ्जारवैराकुला विहस्ता निर्झरभृताः शब्दायमानाः । तथा कलानां मनोज्ञानां दलानां पत्राणां मालाः श्रेणयो येषु तादृशास्तथोन्निद्रा विकसिताः पल्लवपत्रपुष्पफलकलिताः जाताः अत एव सान्द्राः स्नेहलच्छाया ये द्रुमा वृक्षास्तेषामोघः समूहोऽत्र शत्रुंजययाद्रौ तस्थौ स्थितिमातनुते स्म । उत्प्रेक्ष्यते—मुदिरो मेघ इवागत्य स्थितवान् । कुत्रात्र कस्मिन्निव । वेश्मनीव यथा कश्चिद्गृहे गत्वा तिष्ठति । मुदिरः किंभूतः । रणरणकमौत्सुक्यं जातमस्मिन्निति रणरणकितं तादृशं चेतो यस्य । अत एव पुनः किं कर्तुमिच्छुः । रिरंसु रन्तुमिच्छु । कया । विद्युता सौदामिन्या । किंलक्षणया । आत्मीयया निजसंबन्धिन्या पत्न्या सहचर्या स्त्रिया । 'चिरविलसनात्खिन्नविद्युत्कलत्रः' इति मेघदूते ॥

શ્લોકાર્થ

શત્રુંજયપર્વત સમકાળે વિકસ્વર થયેલાં પુષ્પોમાંથી ઝરતા નિર્મલ રસનું પાન કરવામાં ઉન્માદી બનેલા ભ્રમરોના અવાજથી વ્યાપ્ત અને મનોહર પાંદડાઓના સમૂહવાળાં ગીચ વૃક્ષોની શ્રેણી શોભે છે, તે જાણે પોતાની પ્રિયતમા વિદ્યુત્ સાથે વિલાસ કરવા ઉત્સુક બનેલો મેઘ પોતાના ઘરની જેમ આવીને રહ્યો ન હોય ! ॥ ૨૭ ॥

मदमुदितमृगेन्द्रारब्धरावाः प्रतिश्रु-
न्मुखरितशिखरौघा मेघघोषं द्विषन्तः ।
विमलधरणिभर्तुर्विश्वतीर्थेश्वरत्वा-
भ्युदितहृदवलेपैर्हुंकृतानीव भान्ति ॥२८॥

मदेन क्षीबतया मुदितैः प्रहृष्टमनोभिः मृगेन्द्रैः कण्ठीरवैः आरब्धा उपक्रान्ताः स्वेच्छया शयनसमये पार्श्वपरावर्तने विहिता रावाः क्ष्वेडितानि सिंहनादाः भान्ति शोभन्ते । स्वतन्त्रं

निद्रा विरामे कृतत्वात् शोभनं तेषाम् । किंभूताः । प्रतिश्रुति प्रतिशब्दे । 'प्रतिश्रुत्तु प्रतिध्वनिः' इति हैम्याम् । मुखरिता वाचालीकृताः शिखराणां शृङ्गाणामोघाः समूहा यैस्ते । पुनः किं कुर्वन्तः । मेघानां प्रबलजलधराणां घोष धीराणां घोषं धीरगम्भीरगर्जारवं प्रति द्विषन्तः स्पर्धमानाः । उत्प्रेक्ष्यते—विमलधरणिभर्तुः श्रीशत्रुंजयशैलस्य तथा विमलनाम्नो राजविशेषस्य वा विश्वेषां समस्तानां जगतां वा तीर्थानां मुक्तिस्थानानां मागधप्रसादादीनामीश्वरत्वेनाधिपत्येनाभ्युदिताः प्रादुर्भूता ये हृदवलेपा अहंकारास्तैः कृत्वा हुंकृतानीव हुंकारशब्दा इव । चक्रवर्त्यादयः केचिद्विश्वाधिपत्याहंकृतेर्हुकृतीः कुर्वते ॥

श्लोकार्थ

મેઘગર્જનાને તિરસ્કાર કરનાર મદેદ્ધુર સિંહોના સિંહનાદના પડઘા વડે મુખરિત બનેલાં શિખરો શોભે છે, તે જાણે જગતનાં તીર્થોમાં પોતાના તીર્થાધિપણાથી હૃદયમાં ઉત્પન્ન થયેલા અહંકારના હુંકારા ન હોય ! ॥ ૨૮ ॥

निकटविटपिपत्त्रिव्रातवातप्रपाति-
　　स्मितकिसलयपुष्पाक्लृप्ततल्पानिवात्र ।
सुखमनिमिषलेखाः संनिषण्णैणनाभी-
　　सुरभिमणिशिलाङ्कान्साङ्गनाः संश्रयन्ते ॥२९॥

अनिमिषाणां देवानां लेखाः पङ्क्तयः सुखं सातं यथा स्यात्तथा अत्र शत्रुंजयाद्रौ संनिषण्णाः सम्यगुपरि उपविष्टा ये एणाः कस्तूरिकामृगास्तेषां नाभीभिस्तुन्दकूपिकाभिः सुरभयः कस्तूरिकोत्पत्तिस्थानसंपर्कात्सुगन्धा या मणीनां रत्नमयाः शिलास्तासामङ्कानुत्सङ्गान् संश्रयन्ते । किंभूताः । अनिमिषाः साङ्गनाः स्वस्वयुवतीसखाः । उत्प्रेक्ष्यते—क्लृप्तान् रचितान् पुष्पपल्लवादिविच्छित्तिकलितान् तल्पान् पल्यङ्कानिव । किंभूतान् । निकटयोरुभयोः पार्श्वयोर्विटपिनोर्विनिद्रद्रुमास्तेषु पत्त्रिणां विविधविहंगमानां व्राताः प्रकारास्तेषां वाताः उड्डयनोपवेशनगमनागमनसमयविधूतपक्षपवनैः प्रकर्षेण पतन्तीत्येवंशीलानि । तथा स्मितानि विकसितानि किसलयानि पल्लवाः पुष्पाणि कुसुमानि येषु तान् । अन्येऽपि तरुणीसहितास्तरुणाः पुष्पपल्लवरचनाञ्चिते पर्यङ्के सुखं भजन्ते ॥

श्लोकार्थ

કસ્તૂરીમૃગના સંપર્કથી સુવાસિત બનેલી રત્નની શિલા ઉપર પોતપોતાની દેવીઓની સાથે દેવોની શ્રેણી સુખપૂર્વક આશ્રય કરતી હતી; તે શિલા જાણે બંને બાજુ રહેલાં વૃક્ષો ઉપરથી ગમનાગમન કરતા પક્ષીગણના પવનથી નીચે પડેલાં પલ્લવો અને પુષ્પોથી બનાવેલો પલંગ ન હોય ! ॥ ૨૯ ॥

क्वचिदपि सरिदम्भो गाहितुं साग्रहेण
द्विरदसमुदयेनोन्मादिनास्मिन्दिदीपे ।
कुलिशशयभयोर्वीनष्टवार्धिप्रविष्टा-
खिलशिखरिविभूषामिच्छताछेत्तुमूहे ॥ ३० ॥

अस्मिन् श्रीशत्रुंजये क्वचिदपि कुत्रापि स्थाने द्विरदसमुदयेन विन्ध्यावत्तत्र कथंचिदुत्पन्नेन राजादीनां स्वेच्छया चरणार्थं मुक्तेन वा गजयूथेन दिदीपे । किंभूतेन । उन्मादिना मदोदयमत्तीभूतेन । पुनः किंभूतेन । सरितः शत्रुंजयाप्रमुखचतुर्दशमहानदीषु कस्याश्चिन्नद्याः अम्भो जलं गाहितुं मध्ये प्रविश्य सलिलकेलिं कर्तुं साग्रहेण सहठेन निर्बन्धवता । तत्राहमेवमूहे वितर्कयामि । कुलिशं वज्रं शये पाणौ यस्य स शक्रस्तस्य भयेन भीतेर्वशेन उर्व्याः पृथिव्याः सकाशान्नष्टाः पलायिताः सन्तो वार्धौ स्वप्राणतादृगपरस्थानाभावात्तद्भ्रातृसकललोकपालकपुरुषोत्तमनिवासस्थाननीरनिधिमध्ये प्रणश्य प्रविष्टाः अखिलाः समग्रा ये शिखरिणः शैलास्तेषां विभूषां शोभामाछेत्तुं हठाद्गृहीतुमिच्छता वाञ्छतेव ॥

શ્લોકાર્થ

શત્રુંજયપર્વતની કોઈ નદીમાં જલક્રીડા કરવાનો આગ્રહ રાખતા મદોન્મત્ત હાથીઓ શોભતા હતા. તે હાથીઓ જાણે ઇન્દ્રના ભયથી નાસીને સમુદ્રમાં પ્રવેશી ગયેલા સમસ્ત પર્વતોની શોભાને બલાત્કારે ગ્રહણ કરવા ઇચ્છતા ન હોય ! ॥ ૩૦ ॥

क्वचिदुदरशयालून्प्रौढगर्भान्महेला
इव दधति धरेन्दोः कंदराः सिंहशावान् ।
अपि बभुरिह नागाः प्रेषिता यत्प्रसत्त्यै
निजगरिमजितेनेवाञ्जनेनात्मशृङ्गाः ॥ ३१ ॥

क्वचित्कुत्रापि प्रदेशे धरेन्दोः शत्रुंजयशैलराजस्य कंदराः गुहाः सिंहशावान् केसरिकिशोरान्दधति बिभ्रति । का इव । यथा धरेन्दोः पृथिवीनिशीथिनीनाथस्य महेला नितम्बिन्यः उपलक्षणान्निखिला अपि योषितः प्रौढान् प्रगल्भान् संपूर्णनिष्पन्नान् गर्भान् भ्रूणान् बिभ्रति । किंभूतान् । उदरेषु कंदरामध्येषु कुक्षिषु च शयालून् शयनशीलान् निद्रामुद्रितलोचनान् स्थायुकांश्च । अपि पुनरिह श्रीशत्रुंजयाचले नागाः गन्धसिन्धुराः बभुर्भान्ति स्म । उत्प्रेक्ष्यते—निजस्य विमलशैलात्मनो गरिम्णा गुरुतया तुङ्गत्वेन जितेनाभिभूतेनाञ्जनेनाञ्जननाम्ना पर्वतेन यस्य पुण्डरीकाद्रेः प्रसत्त्यै प्रसन्नीकरणार्थमनुकूलीकरणाय प्रेषिताः प्रस्थापिता आत्मनोऽञ्जनगिरिसंबन्धिनः शृङ्गाः शिखराणीव ॥

શ્લોકાર્થ

જેમ સ્ત્રીઓ પરિપક્વ ગર્ભોને ધારણ કરે તેમ પર્વતની ગુફાઓ સિંહબાલકોને ધારણ કરે છે. વળી, શત્રુંજય પર્વત ઉપર મદોન્મત્ત હાથીઓ શોભે છે, તે જાણે શત્રુંજયના વૈભવથી પરાભવ પામેલા અંજનગિરિએ, શત્રુંજયની પ્રસન્નતા પ્રાપ્ત કરવા માટે પોતાનાં શિખરો મોકલ્યાં ન હોય! ॥ ૩૧ ॥

क्वचन करिणि मग्ने केलिलोले ह्रदिन्यां
तदुपरिसरवेणाभ्राम्यत भ्रामरेण ।
क नु गत इह हस्ती(?)स्ताघ आस्ते नवान्त-
स्तमनु पुनरयेऽहं पृच्छतातीव सिन्धुम् ॥ ॥३२॥

ह्रदिन्यां नद्यां क्वचन क्वापि स्थानके केल्यां जलक्रीडायां लोले चञ्चले करिणि कुञ्जरे कपोलयुगलनिर्गलद्बहलमदजलप्रबलप्रवाहश्यामलीभूतभूयस्तरतरलजले दन्तावले मग्ने जलमध्यप्रविष्टे सति तदुपरि गजमज्जनस्थाननीरोपरिष्टात् सरवेण सशब्देन गुञ्जारवभाजा भ्रामरेण मधुकरनिकरेण । भ्रमराणां समूहो भ्रामरम् । यथा 'बहुलभ्रामरमेचकतामसे' इति वृत्तरत्नाकरवृत्तौ काव्यकल्पलतायां च । अभ्राम्यत भ्रान्तम् । उत्प्रेक्ष्यते—सिन्धुं नदीं प्रति इत्यमुना प्रकारेण अतीव पृच्छता प्रश्नं कुर्वता इव । इति किम् । नु प्रश्ने । हे सिन्धो, इहास्मिन्प्रदेशे मग्नो हस्ती महानृपः क्व कुत्र स्थाने गतः प्रविष्टस्तिष्ठति वा । पुनरिह त्वज्ज(?)मध्ये स्ताघो गाधाम्बु स्वल्पजलमास्तेन वा अगाधोदकं वर्तते । यद्यल्पपयः स्यात्-दाहं तं हस्तिनमनु पृष्ठे अये गच्छामि मदपानार्थमिति शेषः ॥

શ્લોકાર્થ

નદીના કોઈ એક ભાગમાં હાથીઓ જલક્રીડા કરવામાં મસ્ત હતા ત્યારે તેમના ઉપર ભ્રમરો ગુંજારવ કરતા આમતેમ ભમતા હતા, અને જાણે નદીને આ પ્રમાણે કહેતા હતા કે 'હે નદી, તારા કયા ભાગમાં હાથી નિમગ્ન છે! અને ત્યાં જલ અગાધ છે કે અલ્પ! જો જલ અલ્પ હોય તો અમે ત્યાં મદપાન કરવા માટે જઈએ?' ॥૩૨॥

किमखिलकुलशैलाञ्जेतुकामः स्वलक्ष्म्या
तरुण इव मृगाक्षीः किं दिशः प्रेक्षितुं वा ।
किमुत निखिललोकालोकनोत्कण्ठिचेता
विमलवसुमतीभृत्प्रोन्नतिं संतनोति ॥ ३३ ॥

विमलनामा वसुमतीभृत्पर्वतः प्रकर्षेणोन्नतिमुच्चैस्तरत्वं संतनोति सम्यक्तया वृद्धिं विदधाति किमु। उत्प्रेक्ष्यते—स्वलक्ष्म्या निजवैभवेन कृत्वा अखिलानष्टावपि कुलशैलान्मन्दरप्रमुखान गिरीन जेतुकामः किं पराभवितुमिच्छुरिव । वा अथ वा । उत्प्रेक्ष्यते—दिशो दशापि हरितः प्रेक्षितुमिव । क इव । तरुण इव । यथा युवा मृगाक्षीः सारङ्गसुन्दरलोचनास्तरुणीः प्रेक्षितुमुन्नतीभवति । उताथ वा । उत्प्रेक्ष्यते – निखिलस्य समग्रस्य सचराचरस्य लोकस्य त्रिभुवनस्यापि आलोकने दर्शने उत्कण्ठा औत्सुक्यं विद्यते यस्मिन् तादृशं चेतो मानसं यस्यैवंविधं किमुच्चैस्तरः संजातः ॥

श्लोकार्थ

વિમલાચલ અતિ ઊંચાઈવાળો છે. કેમ ! પોતાના વૈભવથી જાણે મેરૂ આદિ કુલ પર્વતોને જીતવા માટે ઇચ્છતો ન હોય ! અથવા યુવાનની જેમ દિશાઓરૂપી મૃગાક્ષીઓને જોવા માટે તલસતો ન હોય ! અથવા ચરાચર જગતને જોવા માટે ઉત્કંઠિત બન્યો ન હોય ! ॥ ૩૩ ॥

उदयदरुणबिम्बेनैकतो नैशनिर्य-
त्तिमिरपरिकरेणाप्यन्यतः पर्वतेन ।
कलितनिलयरत्नः पृष्ठतिष्ठत्तमिस्रो
दिननिधननिकेतापातिलोकोऽनुचक्रे ॥ ३४ ॥

पर्वतेन श्रीशत्रुंजयाद्रिणा दिनस्य वासरस्य निधनं नाश एतावता संध्यासमयस्तस्मिन्निकेतं निजवाससौधमापतत्यागच्छतीत्येवंशीलो लोको जनो येनानुचक्रे अनुकृतः स्वसदृशो विहितः । केन कस्मिन् । पूर्वदिग्विभागवर्तिपार्श्वप्रदेशे उदयदुद्गच्छदुदयाचलचूलिकामलंकुर्वत् अरुणस्य भास्करस्य बिम्बं मण्डलं तेन । अपि पुनः केन । अन्यतः अपरस्मिन् प्रतीचीदिग्वर्तमानपार्श्वे नैशानां निशासंबन्धिनां निर्यतां स्वद्रोहिध्वान्तारातिभीतेर्निःसरतां तिमिराणामन्धकाराणां परिकरेण परिवारेण । प्रकरेणेत्यर्थः । किंभूतो लोकः । कलितं भूरितमानुच्छेदभूच्छायाच्छादितनिखिलपुरस्थपदार्थसार्थप्रकटीकरणप्रगुणघृणिगणं स्वहस्ते गृहीतं निलयरत्नं प्रदीपो येन । पुनः किंविशिष्टम् । पृष्ठे स्वनिर्मुक्तपश्चात्प्रदेशे तिष्ठद्वर्तमानं तमिस्रमन्धकारं यस्य ॥

श्लोकार्थ

ગાઢ અંધકારના સમૂહથી વ્યાપ્ત શત્રુંજય પર્વત ઉદય પામતાં સૂર્યનાં બિંબ વડે જાણે હાથમાં દીપક લઈને સંધ્યા સમયે પોતપોતાના ઘેર જતા મનુષ્યોની સમાનતા ધારણ કરતો હતો. ॥ ૩૪ ॥

क्वचिदपि कमलानामात्मनोऽक्षीणभावं
त्रिजगदनिशदानेनाप्ययाच्यत्वमन्यत् ।
किमु विवरिषुरेष प्रावृषेण्याम्बुवाहो
वशदविमलशैलं शीलति स्माञ्जनौघः ॥ ३५ ॥

अञ्जनानामञ्जनाभिधानातिनीलवर्णवृक्षविशेषाणामोघः समुदयः शत्रुंजशैलं शीलति सेवते । निकुरम्बेण समुन्नताः सन्तीत्यर्थः । उत्प्रेक्ष्यते—एषः अञ्जनपादपवपुः प्रत्यक्षलक्ष्यः प्रावृषेण्याम्बुवाहः किमु वर्षाकालसंबन्धी वारिवाह इव भजते । किं कर्तुमिच्छुः । त्रिजगतां त्रयाणामपि भुवनानामनिशं निरन्तरमविच्छेदं दानेन विश्राणनेनापि स्वस्य कमलानां लक्ष्मीणां जलानां च क्वचिदपि कुत्रापि स्थाने क्षीणत्वं न सर्वत्राप्यक्षीणभावं शाश्वतत्वम् अन्यत्पुनः अयाच्यत्वमनर्थिभावम् । मेघा हि क्षीरसमुद्राद्याचित्वा जलमादाय वर्षन्ति इति कविसमयो लोकरूढिश्च । कस्यापि याच्ञां न कुर्मः इत्ययाच्यत्वं किमु विवरिषुर्याचितुमिच्छुरिव । कम् । वशं कामितं ददातीति । 'तृष्णा लिप्सा वशः स्पृहा' इति हैम्याम् । वशदः समीहितदायकं तादृशं विमलशैलं शीलति । किं चाक्षीणलक्ष्मीकस्य याचनीयमेव न भवेत्, तर्हि किमर्थमयाच्यत्वयाच्ञायुक्तं परं किंचिद्वस्तु लक्ष्यापि दुःप्राप्यं स्यात्, तथाच्ञायां केनचित्कृतायां तदपि अविद्यमानतया कुतोऽप्यानीयाभ्यर्थ्यादाय वा दातव्यं भवेत्, अत एव विश्वविश्वपदार्थेश्वरत्वमयाच्यत्वमिति ॥

શ્લોકાર્થ

અંજન નામના વૃક્ષોનો સમૂહ વિમલાચલને સેવતો હતો; તે જાણે વર્ષાકાલનો મેઘ પોતાની લક્ષ્મી (જલ)ને અખૂટ બનાવવા માટે યાચના કરતો ન હોય ! અથવા સમુદ્ર પાસેથી જલ લઈને સ્વયં જગતને દાન કરતો હોવાથી પોતાની અયાચકતા (બીજા પાસે યાચના નહી કરવા૩૫)ની યાચના કરવા માટે અભિષ્ટ ફલદાયી વિમલાચલની સેવા કરતો ન હોય ! ॥ ૩૫ ॥

असुरसुरनराणां श्रेणिभिः सप्रियाणां
स शिखरिपृतनाषाड् भूष्यते निर्विशेषम् ।
भुजगभवनदेवावासविश्वंभराणां
सममखिलविभूषादित्सयेवोत्सुकाभिः ॥ ३६ ॥

स शत्रुंजयः शिखरिणां समस्तपर्वतानां पृतनाषाडिन्द्रः सप्रियाणां साङ्गनानामसुराणां दानवानां नागानां वा सुराणां देवानां नराणां मनुष्याणां श्रेणिभिर्धोरणीभिर्निर्गतो विशेषः सेवाविधौ यत्र तथा भूष्यते अलंक्रियते । उत्प्रेक्ष्यते—सममेककालं भुजगभवनं पाताललोक-

स्तथा देवावासः स्वर्गलोकः तथा विश्वंभरा भूलोकः एतासाम् । त्रिजगतामित्यर्थः । अखिलानां समग्राणां विभूषाणां शोभानां दित्सया दातुमिच्छया उत्सुकाभिरुत्कण्ठिताभिरिव ॥

શ્લોકાર્થ

પર્વતોમાં ઇન્દ્ર સમાન શત્રુંજય પર્વતે સ્ત્રીઓ સહિત દેવ, દાનવ અને માનવોની શ્રેણીઓ વડે અદ્ભુત શોભા ધારણ કરી. તે જાણે સમકાળે સ્વર્ગ, મૃત્યુ અને પાતાળ એમ ત્રણે લોકની સઘળી વિભૂષા ગ્રહણ કરવાની ઇચ્છાથી ઉત્સુક બન્યો ન હોય ! ॥ ૩૬ ॥

मरकतशिखराणां पद्मरागोदराणां
दिशि दिशि जलधारोद्गारिनिर्यज्झराणाम् ।
क्वचिदुपरि नमन्तश्चञ्चलाकेलिमन्तो
ध्वनिभिरिह पयोदा जज्ञिरे वृष्टिमन्तः ॥ ३७ ॥

इह शत्रुंजये क्वचित्कुत्रापि स्थले मरकतशिखराणामश्मगर्भमणिमयशृङ्गाणामुपरि ऊर्ध्वशिरःप्रदेशे नमन्तः मिलित्वागत्य संस्पृशन्तः पयोदा मेघाः ध्वनिभिर्गजारवैरेव जज्ञिरे कथमपि ज्ञायन्ते स्म । शिखराणां किंभूतानाम् । पद्मरागाः लक्ष्मीपुष्पाणि रक्तमणयः उदरे गर्भे मध्ये येषाम् । पुनः किंभूतानाम् । दिशि दिशि सर्वास्वपि दिक्षु । 'दिशि दिशि किमिमानि प्रच्यवन्तेऽन्तरिक्षात्' इति चम्पूकथायाम् । जलानां पानीयानां धाराणां वृष्टीरुद्गिरन्ति मुञ्चन्तीत्येवंशीलं निर्यान्तः शिखरमध्यान्निःसरन्तो झरा निर्झरप्रवाहाः येषु तेषाम् । किंभूताः पयोदाः । चञ्चलाया विद्युतः केलयो विलसनानि विद्यन्ते येषु । 'चिरवि-लसनात्खिन्नविद्युत्कलत्रः' इति मेघदूतकाव्ये । पुनः किंभूताः वृष्टिमन्तो निष्पन्ननीरधाराः ॥

શ્લોકાર્થ

દરેક દિશામાં જલધારા વહાવતાં ઝરણાઓથી યુકત તેમજ જેના મધ્યમાં પદ્મ-રાગમણિઓ છે તેવા મરકતમણિનાં શિખરો જાણે-વિદ્યુતના વિલાસ વડે યુક્ત અને ગર્જના કરતા મેઘોની જેમ વૃષ્ટિ કરતા ન હોય ! ॥ ૩૭ ॥

क्वचिदवहदपाचीवीचिमालीव सेतुं
क्वचिदपि वसुराजीभिभ्यधामेव धत्ते ।
अपि दुरधिगमत्वं ब्रह्मवत्क्वाप्यधत्त
व्यधृत कनकसालं क्वापि लङ्केव शैलाः ॥ ३८ ॥

शैलः शत्रुंजयाचलः क्वचित्क्वचन प्रदेशे अपाच्या दक्षिणस्या दिशो वीचिमाली समुद्र इव सेतुं पद्यामवहद्वहति स्म । रावणापहृतसीताप्रत्यायनार्थं लङ्कागमनावसरे रामेण

दक्षिणार्णवे सेतुर्बद्ध इति श्रुतिः । 'सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तयः' इति भोजप्रबन्धे । क्वचित्कुत्र च स्थाने इभ्यधाम व्यवहारिवेश्मेव वसूनां मणीनाम् । 'रत्नं वसुमणिः' इति हैम्याम् । स्वर्णानां च । 'स्वर्णं हेमहिरण्यहाटकवसून्यष्टापदं काञ्चनम्' इत्यपि हैम्याम् । राजीं श्रेणीं धत्ते दधाति । अपि पुनः क्वापि शिखरादिप्रदेशे ब्रह्मवन्मोक्ष इव दुःखेनाधिगम्यते इति दुरधिगमं तस्य भावो दुरधिगमत्वं दुरारोहतामधत्त बिभर्ति स्म । पुनः क्वापि ऋषभकूटादौ लङ्केव दशकंधरनगरीव कनकसालं काञ्चनप्राकारं व्यधृत धरति स्म ॥

શ્લોકાર્થ

શત્રુંજય પર્વત કોઈ સ્થાને પશ્ચિમ સમુદ્રના સેતુ (પુલ)ની જેમ દેખાતો હતો, કોઈ સ્થાને શ્રેષ્ઠીના ઘરની જેમ સુવર્ણ અને રત્નોની શ્રેણીને ધારણ કરતો હતો, કોઈ સ્થળે મોક્ષની જેમ દુષ્પ્રાપ્ય લાગતો હતો તો કોઈ સ્થાને લંકાની જેમ સુવર્ણના કોટને ધારણ કરતો હતો. ॥ ૩૮ ॥

स्फुटकटतटनिर्यद्दानपाथःप्रवाहैः
शिशुशिखरिसमूहान्सिञ्चदञ्चद्वनान्तः ।
क्वचिदपि करियूथं विन्ध्यधात्रीभृतीव
प्रणयति रतिकेलीं यत्र सत्र कलत्रैः ॥ ३९ ॥

यत्र शत्रुंजये क्वचिदपि कुत्रचनापि वनगह्वरप्रदेशे करियूथं गजवृन्दं कलत्रैः स्वकरिणीभिः सत्रा सार्धं रत्या मनस्तुष्ट्या रागेण च केलीं विविधक्रीडां सुरतविलासं वा प्रणयति करोति । कस्मिन्निव । विन्ध्यधात्रीभृतीव । यथा स्वोत्पत्तिस्थाने विन्ध्यशैले गजघटा स्ववशाभिः । 'गजोऽस्य स्त्री धेनुका वशापि च' इति हैम्याम् । स्वैरं रमते । किं कुर्वन् । स्फुटं प्रकटं जननयनगोचरं यथा स्यात्तथा कटतटाभ्यां कपोलस्थलाभ्यां सकाशान्निर्यद्भिर्निःसरद्भिर्दानपाथसां मदोदकानां प्रवाहैर्धाराप्रवहणैः कृत्वा शिशूनां बालानां नवप्ररूढानां शिखरिणां वृक्षाणां समूहान् गणान् सिञ्चत् पानीयं पायन् । पुनः किं कुर्वन् । वनान्तर्विपिनमध्ये अञ्चत् चरत् ॥

શ્લોકાર્થ

શત્રુંજયપર્વતના કોઈ ભાગમાં પ્રગટપણે પોતાના ગંડસ્થલમાંથી વહી રહેલા મદજલના પ્રવાહથી બાલવૃક્ષો (વૃક્ષના છોડવાઓ)ના સમૂહને સિંચન કરતું જંગલની મધ્યમાં સંચરતું હાથીઓનું ટોળું વિંધ્યાચલની જેમ પોતાની હાથણીઓની સાથે રતિક્રીડા કરતું હતું ॥ ૩૯ ॥

त्रिदिवसदनभूभृत्सार्वभौमाध्वरोधो-
द्धुरशिखरसहस्रैः पुण्डरीकावनीभृत् ।
धरणिमिव फणाभिश्चक्रिणां चक्रवर्ती
त्रिदिवमिव दिधीषुर्लक्षकैर्लक्ष्यते स्म ॥ ४० ॥

पुण्डरीकावनीभृद्विमलाचलः त्रिदिवं स्वर्गलोकं दिधीषुः धर्तुमिच्छुरिव लक्षकैर्दर्शयितृभिरवलोककलोकैर्लक्ष्यते ज्ञायते । कैः । त्रिदिवे स्वर्गे सदनं गृहं येषां ते त्रिदिवसदना देवास्तेषां भूभृत्पर्वतो मेरुः । 'स्वःस्वर्गिकाञ्चनतोगिरिः' इति हैम्याम् । सुराचलस्तस्य सार्वभौमश्चक्रवर्ती शक्रः । 'जाम्बूनदोर्वीधरसार्वभौमः' इति नैषधे इन्द्राभिधानम् । तस्येन्द्रस्याध्वा मार्गो गगनम् । 'बहुविगाढसुरेश्वराध्वा' इति नैषधे च । तस्याध्वनो नभसो रोधे रुन्धने उद्धुरैरुत्कटैः शिखराणां शृङ्गाणां सहस्रैर्भूयस्तरदशशतीभिः प्रमितैः । कृत्वा इत्यर्थः । क इव । चक्रवर्तीव । यथा चक्रिणां नागानां सार्वभौमः शेषनागः सहस्रफणाभिः कृत्वा धरणिं भूमिं धत्ते । 'धरणिविरहिणि क्लान्तमुद्रे समुद्रे' इति नाटकशास्त्रे धरणिशब्दो ह्रस्वोऽप्यस्ति । 'मुदा यस्योद्गीतं सह सहचरीभिर्वनचरैर्मुहुः श्रुत्वा हेलोद्धृतधरणिभारं भुजबलम्' इति वाग्भटालंकारेऽपि ॥

श्लोकार्थ

નાગોનો ચક્રવર્તી શેષનાગ જેમ પોતાની હજાર ફણાઓ વડે પૃથ્વીને ધારણ કરે છે તેમ સ્વર્ગરૂપ ઘરવાળા મેરૂપર્વતના ચક્રવર્તી ઇન્દ્રના માર્ગને (આકાશને) અવરોધીને રહેલાં હજારો શિખરો વડે પુંડરિકગિરી જાણે સ્વર્ગને ધારણ કરતો ન હોય તેમ પ્રેક્ષકો-વડે દેખાતો હતો. ॥ ૪૦ ॥

विदलितदललीलाश्यामलीभूतभूमी-
रुहनिवहनितम्बालम्बिजाम्बूनदस्नुः ।
प्रसृतझरपयस्कः प्रावृषेण्याम्बुवर्षि-
स्फुरदशनिपयोदं योऽनुयातीव कान्त्या ॥ ४१ ॥

यः शत्रुंजयाद्रिः प्रावृषेण्यं वर्षाकालसंबन्धिनं अम्बु पानीयं वर्षतीत्येवंशीलः, तथा स्फुरन्ती विद्योतमाना प्रतिदिशं चमत्कारं कुर्वती वा अशनिर्विद्युद्यत्र तादृशं पयोदं मेघं कान्त्या शोभया कृत्वा अनुयातीव आत्मना अनुकरोतीव । यः किंभूतः । विदलितानां विशेषेण विकाशं प्राप्तानामुन्मिषितम् । 'विकसितं दलितं स्फुटितं स्फुटम्' इति हैम्याम् । दलानां पत्राणां लीलया विलासेन श्यामलीभूतानां कृष्णच्छवीभूतानां भूमीरुहाणां द्रुमाणां निवहाः समूहा यत्र तादृशं नितम्बमालम्बते श्रयतीत्येवंशीलम् । 'मेखलामध्यभागोऽद्रेर्नितम्बः कटकश्च सः' इति हैम्याम् । जाम्बूनदं काञ्चनमयं स्नुः शिखरं यस्य । पुनः

किलक्षणः । प्रसृतानि दिशि दिशि विस्तारं गतानि ऊढानि वा झराणां निर्झराणां पयांसि जलानि यस्मिन् सः । 'स्नुः प्रस्थं सानु' इति हैम्याम् ॥

શ્લોકાર્થ

વિકસ્વર પાંદડાઓથી શ્યામ બની ગયેલાં વૃક્ષોના સમૂહને અવલંબીને રહેલું તેમજ જેમાં ઝરણાઓ વહી રહ્યાં છે તેવા શત્રુંજય પર્વતનું સુવર્ણમય શિખર ચમકતી વિજળીઓવાળા, જલવર્ષા કરતા વર્ષાઋતુના મેઘની કાન્તિનું જાણે અનુકરણ કરતું હતું. ॥૪૧॥

क्वचिदपि लसदाभ्रस्फाटिकोत्तुङ्गशृङ्गा-
ङ्गणधरणिचरिष्णुः क्ष्मास्पृशां प्रेक्ष्य लक्षाः ।
इति मतिरुदयासीद्यन्नितम्बस्थितानां
किमिह चरति पङ्क्तिः स्वैरमेषा सुराणाम् ॥ ४२ ॥

यस्य शत्रुंजयाद्रेर्नितम्बे मेखलायां स्थितानामुषितानां वा पुंसामित्यमुना प्रकारेण मतिरुदयासीदाविर्भूता । इति किं का बुद्धिः । यदेषां प्रत्यक्षलक्ष्या सुराणां देवानां पङ्क्तिः धोरणी इह विमलाचले स्वैरं स्वेच्छया चरति विहरति भ्राम्यति वा । किं कृत्वा । क्वचिदपि कुत्रापि प्रदेशे विशेषे । 'लस श्लेषणक्रीडनयोः' इति धातुः । लसतां श्लिष्यतामर्थात्परस्परं शिखरापेक्षया आभ्रस्फाटिकानामाकाशस्फटिकरत्नानामिमानि आभ्रस्फाटिकानि । क्वचिद्द्वयोः पूर्वोत्तरपदयोर्वृद्धिर्भवति । 'आग्निमारुतं कर्म सौहार्दम्' इति सारस्वतव्याकरणे, तद्वदत्राप्युभयत्र वृद्धिः । आकाशस्फटिकमयानि क्रीडया कुतूहलेन वा देवैर्विरचितानि स्वाभाविकानि वा तथा उत्तुङ्गानि गगनाङ्गणालिङ्गीनि शृङ्गाणि शिखराणि तेषामङ्गणान्यजिराणि अधित्यका वा तेषां तासां वा धरणौ भूमौ चरिष्णुः संचरणशीला क्ष्मास्पृशां यात्रिकमानवानां लक्षाः शतसहस्राणि प्रेक्ष्य दृष्ट्वा दृग्गोचरीकृत्य । आकाशस्फटिकमणीनां चर्मचक्षुरलक्ष्यत्वात्सुराणां चाम्बरचारित्वादेषा घटना ॥

શ્લોકાર્થ

શત્રુંજયપર્વતના દેદીપ્યમાન અભ્રસ્ફટિકનાં ઊંચાં શિખરોની ભૂમિ ઉપર ચાલી રહેલા લાખો મનુષ્યોને જોઈને પર્વતની તલાટીમાં રહેલા લોકો કલ્પના કરતા હતા કે જાણે 'સ્વેચ્છાપૂર્વક દેવોની શ્રેણી ચાલી રહી છે !' ॥ ૪૨ ॥

मलयगिरिरिवासौ क्वापि काकोदराली-
कलितमलयसालैर्निर्यदामोदिवातैः ।
गलदमलमदाम्भःपङ्क्तिसंसिक्तवृक्षैः
क्वचिदपि गजयूथैर्विन्ध्यवद्यो विभाति ॥ ४३ ॥

असौ शत्रुंजयाचलः क्वापि कुत्रचन प्रदेशे मलयगिरिरिव दक्षिणाचल इव विभाति। 'अथ मलय आषाढो दक्षिणाचलः' इति मलयाद्रिनामानि हैम्याम्। कैः। काकोदराणां भुजगानामालीभिः राजीभिः कलितैरामूलचूलं वेष्टितैर्मलयसालैश्चन्दनद्रुमैः। किंभूतैः। निर्यान्तः श्रीखण्डवनखण्डेभ्यो निर्गच्छन्तः प्रसरन्तः आमोदाः परिमला विद्यन्ते येषु तादृशा वाता वायवो येभ्यस्तैः। अपि पुनः क्वचित्कस्मिंश्चिदपि स्थाने गजयूथैर्मत्तगजपुञ्जैः विन्ध्यवज्जलबालकशैल इव विभाति। किंभूतैः गजयूथैः। गलन्तीभिः कपोलपालिभ्योऽविरलप्रवाहैः निष्पतन्तीभिः अमलाभिः अनाविलाभिर्मदाम्भसां दानजलानां पङ्क्तिभिर्धोरणीभिः संसिक्ताः सम्यक्प्रकारेण उद्यानपालवत्सेकं सिञ्चनं प्रापिता वृक्षा बालसालाः प्रौढपादपा वा यैः॥

શ્લોકાર્થ

શત્રુંજય પર્વતનો કોઈ ભાગ નાગોના સમૂહથી વીંટળાયેલા ચંદનનાં વૃક્ષોથી સુવાસિત બનેલા પવન વડે મલયાચલનું અનુકરણ કરતો હતો! ઝરી રહેલા મદજલની ધારાઓથી વૃક્ષો સિંચાયાં છે, તેવા ગજયૂથો દ્વારા વિંધ્યપર્વતનું અનુકરણ કરતો હતો! ॥ ४३ ॥

करिकदनकपर्दक्रोडलीलायमान-
त्रिदिवसदनपाथोनाथपद्माननेव।
क्वचन कनकशृङ्गोत्सङ्गरङ्गत्तरङ्गा-
वलिललितविलासा कापि कुल्योल्ललास॥ ४४॥

यत्र शत्रुंजये काप्यनिर्दिष्टाभिधाना चतुर्दशसु नदीषु अन्यतमा कापि काचित्कुल्या कल्लोलिनी उल्ललास शोभते स्म। किंभूता कुल्या। कनकस्य काञ्चनमयस्य शृङ्गस्य शिखरस्योत्सङ्गे क्रोडे रङ्गन्ती प्रचलन्ती तरङ्गाणां कल्लोलानामावलिः श्रेणिः तया ललितो मनोज्ञो विलासो विलसनं यस्याः सा। उत्प्रेक्ष्यते—करिणो गजासुरस्य कदनं हननं यस्मादिति कृत्वा शंकरः। 'गजपुष्पपुरानङ्गकालान्धकमखासुहृत्। हरः', तथा 'निग्रन्थनं प्रमथनं कदनं निबर्हणम्' इति हनननामानि। इदं द्वयमपि हैम्याम्। तस्य शिवस्य कपर्दो जटाजूटः। 'कपर्दस्तु जटाजूट ईश्वरस्य' इत्यपि हैम्याम्। तस्य क्रोडेऽङ्के लीलायमाना लीलया चलन्ती विलसन्ती वा त्रिदिवः स्वर्गस्तत्र तदेव वा सदनं गृहं येषां तादृशा देवास्तेषां पाथसां पानीयानां नाथः स्वामी। 'यादःस्रोतोधानदीशः सरस्वान्' इति हैम्याम्। समुद्रस्तस्य कमलमुखी पत्नी। 'समुद्रदयिताधुन्यौ' इत्यपि हैम्याम्। नदी। एतावता देवनदी गङ्गेव स्फुरति स्म॥

શ્લોકાર્થ

કોઈ પ્રદેશમાં, સોનાના શિખરના મધ્યભાગે પ્રસરતા તરંગોની પંક્તિથી મનોહર નદી શોભતી હતી; તે જાણે–'ગજાસુર' નામના દૈત્યનો પરાભવ કરનાર શંકરની જટામાં રહેલી દેવસમુદ્રની પત્ની આકાશગંગા ન હોય તેવી શોભતી હતી. ॥ ४४ ॥

क्वचन कनकरत्नाधित्यकादीप्रदीप्तिं
　दिनकरकरसङ्गाद्गाहमानां विहायः ।
सकलकुलगिरीन्द्रान्यः पराभूय भूत्या
　कलयति किमु शैलः स्वेन मूर्तं प्रतापम् ॥४५॥

यो विमलाद्रिः क्वचन कवापि प्रदेशे कनकानां काञ्चनानां रत्नानां रक्तपीतमणीनां वा अधित्यका ऊर्ध्वभूमिस्तस्या दीप्रां दीपनशीलां दीप्तिं कान्तिं कलयति धत्ते । किंभूतां दीप्तिम् । दिनकरस्य सूर्यस्य कराणां किरणानां सङ्गात्संपर्कादाश्लेषाद्विहाय आकाशं गाहमानानां निर्भरं भरन्तीनाम् । गगनमण्डलं यावत् प्रसृमराणामित्यर्थः । उत्प्रेक्ष्यते—सकलान् समग्रान् कुलगिरीन्द्रान् भूत्या आत्मलक्ष्म्या पराभूय जित्वा शैलो विमलशैलोच्चयः स्वेनात्मना मूर्तं तनूमन्तं सकललोकलोचनगोचरं तन्मन्दरमेरुकैलाशादिशैलाभिभवोद्भवं प्रतापमिव बिभर्ति ॥

श्लोकार्थ

શત્રુંજય પર્વતનો કોઈ પ્રદેશ સૂર્યનાં કિરણોના સંપર્કથી, આકાશને અવગાહી રહેલી સુવર્ણમય અને રત્નમય ભૂમિની દેદીપ્યમાન કાંતિ ધારણ કરતો હતો; તે જાણે પોતાના વૈભવથી સર્વે કુલપર્વતનો પરાભવ કરીને પોતાના દ્વારા મૂર્તિમાન પ્રતાપ ધારણ કરાયો ન હોય! ॥ ૪૫ ॥

बलिनिलयनिकेतैरात्मनः स्थूलमूलै-
　र्धरणिधरतया यो भूभृतां सार्वभौमः ।
निखिलजलधिनेमीभारभुग्नाङ्गभाजो
　दिशति किमु कृपालुर्विश्रमं भोगिभर्तुः ॥ ४६ ॥

भूभृतां समस्तपर्वतानां सार्वभौमश्चक्रवर्ती नगाधिराजाभिधानत्वात् शत्रुंजयाद्रिः धरणिधरतया भूभृत्त्वेन । उत्प्रेक्ष्यते—भोगिभर्तुः शेषनागस्य विश्रमं श्रमापनोदं किमु दिशति ददातीव । कैः । आत्मनः स्थूलमूलैः पुष्टैः पदैः अधः प्रविष्टप्रदेशैः । किंभूतैः । बलिनिलये पाताले निकेतो निवासो येषाम् । 'पातालमूलकैलाशः' इत्यभिधानत्वाच्च । किंभूतस्य भोगिभर्तुः । निखिला समग्रा या जलधिनेमिः सप्तद्वीपसमुद्रपर्यन्ता पृथिवी तस्या भारो वीवधस्तेन भुग्नं वक्रीभूतमङ्गं वपुर्भजतीति तस्य ॥

श्लोकार्थ

પાતાલલોકમાં જેનું મૂલ છે તેવાં પોતાનાં સ્થૂલમૂલથી સમસ્ત પર્વતોમાં શત્રું-

જયપર્વત પોતાની સાર્વભૌમતાને ધારણ કરે છે. કૃપાવંત એવો તે પર્વત, સાતદ્વીપ સમુદ્રપર્યંત પૃથ્વીના ભારથી જેનું શરીર વળી ગયું છે, તે શેષનાગનો શ્રમ દૂર કરતો ન હોય! અર્થાત્ જાણે શેષનાગને રાહત આપતો ન હોય! ॥ ૪૬ ॥

गगनगतयदग्रस्फारकासारफुल्ल-
रकुमुदकुवलयाङ्कादभृङ्गरिञ्छोलिकाभिः ।
निशि शशिनमवेक्ष्याधावि मुग्धाभिरूर्ध्वं
सुरसरिदलिलीलापुण्डरीकभ्रमेण ॥ ४७ ॥

भृङ्गाणां भ्रमराणां रिञ्छोलिकाभिर्देशीभाषया श्रेणीभिर्निशि रात्रौ शशिनं शशलाञ्छनं चन्द्रमवेक्ष्य दृष्ट्वा ऊर्ध्वमुच्चैर्गगनं प्रत्यधावि उड्डीनम् । केन । सुराणां देवानां सरिन्नदी गङ्गा तस्या अलिभिर्मधुपानागतमधुकरैर्युक्तं यल्लीलापुण्डरीकं क्रीडाकरणार्हं सिताम्भोजं तस्य भ्रमेण भ्रान्त्या । कस्मादधावि । गगने आकाशे गतं प्राप्तं यद्यस्य शत्रुंजयस्याग्रमुपरितनशिखरं तस्मिन् स्फारो मनोज्ञः पानीयपूर्णो यः कासारः पञ्चवर्णचन्द्रिकाविकाशिसूर्यविकाशिकमलाकरस्तडागस्तत्र फुल्लतां निशाकरकरसंपर्काद्विकस्वरीभवतां कुमुदानां कैरवाणां कुवलयानामुत्पलानामङ्कात्क्रोडात् । किंभूताभिः भृङ्गरिञ्छोलिकाभिः । मुग्धाभिः अज्ञानाभिः सदसद्विवेकविकलाभिर्विचाराचतुराभिः सार्धपशुभिरिव । यदुक्तम्— 'हे मालति म्लायसि किं यदेष चुचुम्ब तुम्बी कुसुमं षडङ्घ्रिः । प्राणी चतुर्भिश्चरणैः पशुश्चेत्स षड्भिरध्यर्धपशुर्न किं स्यात् ॥' इति ॥

श्લोकार्थ

રાતે ચન્દ્ર જોઈને આકાશગંગામાં રહેલા પુંડરિકકમલની ભ્રાન્તિથી, ગગનચૂંબી શિખર ઉપર રહેલા સુંદર સરોવરનાં ચન્દ્રવિકાસી અને સૂર્યવિકાસી કમલોમાંથી મુગ્ધ ભ્રમરોની પંક્તિએ જાણે ઊંચે દોડાદોડ કરી દીધી. ॥ ૪૭ ॥

विकसितकुसुमालीकर्णिकालीनपीन-
ध्वनदनयनपेयामेयरोलम्बरावः ।
क्वचन रजतशृङ्गे चम्पकद्रुश्चकासे
कविरिव कृतवेदोद्गारहंसाधिरूढः ॥ ४८ ॥

क्वचन कुत्रापि शत्रुंजयस्थानकविशेषे रजतशृङ्गे रूप्यशिखरे चम्पकद्रुर्हेमपुष्पपादपः चकासे दिदीपे । किंभूतश्चम्पकद्रुः । विकसितानां विकाशं प्राप्तानां कुसुमानां चम्पकपुष्पाणामालीनां श्रेणीनां कर्णिकासु बीजकोशेषु लीना मकरन्दपानार्थं मध्ये प्रविश्य निश्च-

लीभूय स्थितास्तथा पीना यथेच्छाहारप्राप्त्या पुष्टास्तथा ध्वनन्तः शब्दायमाना गुञ्जारवो जितास्तथा अनयनपेया कर्णिकासु प्रविष्टत्वेन लोचनाभ्यां पातुं योग्याः। अदृश्या इत्यर्थः। तथा अमेयाः प्रमाणातीता ये रोलम्बास्तेषां रावो गुमगुमायमानध्वनिर्यस्मिन् सः। क इव। कविरिव। यथा धाता चकास्ति। किंभूतः। कृतो निर्मितो वेदानामृक्सामयजुषामथर्वणानामुद्गार उद्गिरणमुच्चारो येन हंसे सितच्छदे अधिरूढः अध्याश्रितः राजमरालपृष्ठस्थायुकः ॥

શ્લોકાર્થ

શત્રુંજય પર્વતના ચાંદીના શિખર ઉપર રહેલું ચંપકવૃક્ષ શોભે છે. રાજહંસ ઉપર આરૂઢ થયેલા વેદોચ્ચાર કરતા બ્રહ્માની જેમ, વિકસ્વર પુષ્પોની કર્ણિકામાં રસપાન કરવામાં લોલુપી બનેલા અસંખ્ય ભ્રમરોના ગુંજારવનો ધ્વનિ ચંપકવૃક્ષમાં થઈ રહ્યો છે. ॥ ४८ ॥

स्वकशिखरसरःस्थां भृङ्गरङ्गत्कटाक्षां
विदलितदलनेत्रीं रागमन्तर्दधानाम् ।
परमसुहृदिवाद्रिः पद्मिनीं यो विविक्ते
समगमयदभीशुस्वामिना कामिनेव ॥ ४९ ॥

योऽद्रिः शत्रुंजयगिरिः परमः सर्वोत्कृष्टः सुहृदिव मित्रमिव पद्मिनीं पद्मपरिमलां कामिनीं कमलिनीं च कामिना कामुकेनेव अभीशुस्वामिना ज्योतिःपतिना भानुना समं विविक्ते विजने एकान्ते समगमयत्संगमं कारयति स्म। किंभूतां पद्मिनीम्। स्वकस्य शैलसंबन्धिनः शिखरं शृङ्गं निजं वा कूटं तत्र यत्सरः पद्माकरस्तत्र तिष्ठतीति तादृशीम्। 'शिरःस्थाम्' इति पाठे शृङ्गमस्तके जलार्द्रप्रदेशे स्थायिनीम्। स्थलेऽपि पद्मिन्याः संभवो दृश्यते। यथा नैषधे—'ददर्श दूनः स्थलपद्मिनीं नलः' इति। तथा चम्पूकथायामपि 'उत्फुल्लस्थलपद्माभभवच्चरणभूषिता' इति। पुनः किंभूताम्। भृङ्गा भ्रमरा एव मधुकरैः कृत्वा रङ्गन्तः पतिं सूर्यं तिर्यक्सर्पन्तः कटाक्षा अक्षिविकूणितानि यस्याः सा। पुनः किंभूताम्। विदलितानि दलानि पत्राण्येव नेत्रे नयने यस्याः। पुनः किं कुर्वाणाम्। अन्तर्मध्ये मानसे च रागं रक्तिमानमनुरतिं स्नेहं च दधानां बिभ्राणाम् ॥

શ્લોકાર્થ

શત્રુંજય પર્વત પરમમૈત્રીભાવથી જ્યોતિપતિ કામુક સૂર્યનો પોતાના શિખરના સરોવરમાં રહેલી, પત્રરૂપ નેત્રોને ધારણ કરતી, ભ્રમરરૂપ કટાક્ષોને ફેંકતી તેમજ અંતરમાં રક્તતા (રાગ)ને ધારણ કરતી પદ્મિનીની સાથે જાણે એકાંતમાં સંગમ કરાવતો ન હોય ! ॥ ૪૯ ॥

विलिखितागनाङ्कप्रस्थकण्ठावलग्न-
द्विजपरिवृढबिम्बालम्बिनक्षत्रमाला ।
तरलकलितमुक्तामालिकाशालिशोभां
प्रतिरजनि विधत्ते सिद्धभूभृन्मघोनः ॥ ५० ॥

विलिखितो निजाग्रेण धृतो गगनस्य नभसः अङ्क उत्सङ्गो येन तादृशं प्रस्थं सानु शिखरं तस्य कण्ठोऽधित्यका तस्य समीपं किंचन शिखाधःप्रदेश उपकण्ठस्तत्रावलग्नं मिलितं यद्द्विजपरिवृढस्य बिम्बं मण्डलमालम्बते आश्रयते इत्येवंशीला नक्षत्राणामुपलक्षणाद्ग्रहनक्षत्रतारकाणां माला श्रेणी सिद्धनामा भूभृतां पर्वतानां पार्थिवानां च मघोनः पुरंदरस्य प्रतिरजनि निशां निशां प्रति तरलेन नायकेन हारमध्यमणिना कलितायाः सहिताया मुक्तामालिकाया हारलतायाः शालिनीं दीपनशीलां शोभां विभूषां विधत्ते करोति ॥

श्लोकार्थ

આકાશના મધ્યભાગને જેણે પોતાના અગ્રભાગથી ધારણ કર્યો છે તેવા શિખરોની પાસે રહેલા ચન્દ્રમંડલથી યુકત ગ્રહ નક્ષત્રોની પંકિત, જાણે પ્રત્યેક રાત્રિએ સિદ્ધગિરીરૂપ રાજાની ઉજ્જવલ મૌકિતકની માલાની જેમ શોભા વધારતી હતી. ॥ ૫૦ ॥

अविरलमणिशृङ्गैर्नैकनाकिद्रुमैश्च
त्रिदशमिथुनवृन्दैर्जातरूपश्रिया च ।
विविधसुरनिकुञ्जैः सिद्धसौधैर्नृणां यः
श्लथयति सुरशैलप्रेक्षणोत्कण्ठि चेतः ॥ ५१ ॥

यः शत्रुंजयाद्रिः नृणां भरतक्षेत्रभूचरनराणां सुरशैलस्य मेरोः प्रेक्षणे विलोकने उत्कण्ठा औत्सुक्यं विद्यते यस्मिन् तादृशं चेतो मनः श्लथयति शिथिलयति मेरुदर्शनोत्कण्ठां श्लथीकरोति । स्वर्णाचलविलोकनहृल्लेखविमुखं मानसं सृजतीत्यर्थः । कैः कृत्वा । अविरलान्यनेकानि मणीनाम् । रत्नमितानीत्यर्थः । शृङ्गाणि शिखराणि तैः च पुनः कैः । नैकैर्नानाप्रकारैर्लौकिकैः कल्पपारिजातादिपञ्चप्रकारैर्जिनशासनोक्तमङ्गादिदशप्रकारैर्वा नाकिभिर्देवैः स्वक्रीडाकृते छायार्थं वा प्ररोपितैः द्रुमैर्वृक्षैः कल्पतरुभिर्वा । च पुनः कैः । त्रिदशानां चतुर्निकायसुराणां मिथुनानां यात्रार्थागतानामधिष्ठातृतया वा स्थायुकानां युगलानां दम्पतीरूपाणां वृन्दैः समूहैः । च पुनर्जातया सम्यक्समुत्पन्नया रूपस्य संस्थानविशेषस्य स्वर्णस्य या श्रिया शोभया लक्ष्म्या । च पुनः कैः । विविधा भवनपतिव्यन्तरवैमानिकाः सुरा येषु तादृशैर्निकुञ्जैः काननैरथ वा विविधा नानाप्रकाराः सुरनि-

कुञ्जा नन्दनवनरूपा देवारामास्तैः । पुनः कैः । सिद्धानां देवविशेषाणां गानरसिकाणां सौधैर्गृहैः सिद्धायतनैश्च ॥

શ્લોકાર્થ

છિદ્ર વિનાનાં રત્નોના શિખરો વડે, અનેક પ્રકારના કલ્પવૃક્ષો વડે યાત્રાર્થે આવેલા દેવયુગલો વડે, સુવર્ણની શોભા વડે વિવિધ પ્રકારના ઉદ્યોગો વડે તેમજ સિદ્ધાયતનો (દેવમંદિરો) વડે શત્રુંજયપર્વત, ભરતક્ષેત્રનાં મનુષ્યોની મેરૂપર્વત જોવાની ઉત્કંઠાને શિથિલ કરતો હતો. ॥ ५१ ॥

क्वचन करटियाना मेखलाशालमानाः
कनककटकभाजो वारिमुक्केशपाशाः ।
विविधमणिविभूषाः पद्मिनीनालबाहा
विकचकुसुमनेत्रा बिम्बदन्तच्छदाश्च ॥ ५२ ॥
बहलमलयजन्मामोदिता मञ्जुपादा
गुरुतरकुचकुटाः स्फारमुक्तावलीकाः ।
मदपटुपिकवाचश्चम्पकश्रेणिगौरा
युवतय इव यस्मिन्भूमयो विस्फुरन्ति ॥ ५३ ॥

यस्मिन् श्री शत्रुंजये युवतयस्तरुण्यः स्त्रिय इव भूमयः पृथिव्यः क्वचन क्वापि प्रदेशे विस्फुरन्ति दीप्यन्ते । भूमयो युवतयश्च किंभूताः । क्वचन कुत्रापि स्थाने करटिनां गलद्दानजलगजानामिव च यानं गमनं स्वेच्छया परिभ्रमणं लीलामन्थरगतिश्च यासु यासां वा । पुनः किंभूताः । मेखलया गिरिमध्यभागेन स्वर्णमणिवेचितकाञ्च्या च कृत्वा शालमानाः शोभमानाः । पुनः किंभूताः । कनकस्य स्वर्णमयं काञ्चनखनीयुक्तं वा कटकं कमपि मध्यप्रदेशविशेषं हेमवलयं च भजन्तीति । पुनः किंभूताः । वारिमुचा शिखरोपरिसंचरज्जलदेन कृत्वा मेघवच्च केशपाशः कुन्तलहस्तो यासाम् । पुनः किंभूताः । विविधानामनेकप्रकाराणां मणीनां कर्कतनचन्द्रकान्तादीनां रत्नानां विभूषाः शोभा विशिष्टा भूषा अलंकारा यासु वा यासाम् । पुनः किंभूताः । पद्मिनीनां कमलानां नालानि मृणालान्येव तत्तुल्या बाहा भुजा यासाम् । 'पद्मिनी कमलिन्यां कमले प्रधानस्त्रियां च' इत्यनेकार्थः । पुनः किंभूताः । विकचानि विकसितानि कुसुमान्येव कुसुमतुल्यानि वा नेत्राणि नयनानि यासाम् । पुनः किंभूताः । बिम्बानि पक्वगोल्हकानि पत्र तद्वद्वा दन्तच्छदा अधरा यासाम् । पुनः किंभूताः । बहलाः सान्द्राः दृढा वा ये मलयजन्मानः श्रीखण्डतरवः तेषामामोदाः परिमलाः संजाता आसु । पक्षे सान्द्रवदनविलेपनेन सुगन्धीभूताः प्रमोदकलिता वा जाताः । आमोदः परिमलः प्रमोदश्च । पुनः किंभूताः । मञ्जवो मनोज्ञाः पादाः पर्यन्तपर्वताः स्त्रीयोग्यलक्षणोपेताश्चरणाश्च

यासाम्। पुनः किंभूताः। गुरुतराण्यभ्रंलिहानि अत्युन्नतानि पर्वतलक्ष्म्याः कुचरूपाणि स्तना एव वा कूटानि शिखराणि यासाम्। पुनः किंभूताः। स्फाराः स्फुरन्तः जनगणैः श्रवणैराकर्ण्यमाना मुक्ता अनेकानगारकोटीकलितपुण्डरीकगणिद्रविडवालिखिल्लरामशाम्बप्रद्युम्नपाण्डवादिका मुक्तात्मानः सिद्धास्तेषामावल्यः श्रेणयो यासु। मुक्ताशब्देन मुक्तात्मानः प्रोच्यन्ते। यदुक्तं चम्पूकथायाम्—'ता एव निर्वृतिस्थानमहं मन्ये मृगेक्षणाः। मुक्तानामास्पदं येन तासामेव स्तनान्तरम्॥' इति। 'निर्वृतिर्मोक्षः सुखं च मुक्तानां मौक्तिकानां च' इति तट्टिप्पनके। अस्याद्रेरपि सिद्धक्षेत्राभिधानात्। 'कर्करकर्करेष्वनन्ताः सिद्धाः' इति श्रुतेश्च। पक्षे दीप्यमानमौक्तिकमालाकलिताः। पुनः किंभूताः। मदेन क्षीबतया सुरखेचरप्रकरप्रकारोऽपि तत्सर्वर्तुकस्मितयत्सहकारसरसमञ्जरीपुञ्जास्वादोद्धट्टिताकुण्ठकण्ठकुहरोदितामन्दानन्दोन्मदतया वा पटवः प्रगल्भा ये पिकाः कोकिलास्तेषां तद्वद्वाचो मधुरपञ्चमालापललितगिरो यासु यासां वा। पुनः किंभूताः। चम्पकानां विकलितकुसुमपुञ्जपिञ्जरीभूतनूतनहेमपुष्पकतरूणां श्रेणीभिः पङ्क्तिवद्धा गौराः काञ्चनरूचः। 'गौरं तु पीतश्वेतयोः' इत्यनेकार्थः। पीतवर्णाः॥ युग्मम्॥

શ્લોકાર્થ

શત્રુંજયપર્વતની ભૂમિ યુવતિની જેમ આચરણ કરતી હતી. યુવતિઓ ગજગામિની હોય. આ પર્વતમાં આમતેમ ઘૂમતા હાથીઓનું ગમનાગમન છે. પર્વતની ભૂમિ મધ્યભાગ રૂપી મેખલા વડે શોભે છે, સુવર્ણનાં મધ્યપ્રદેશરૂપ કડાને ધારણ કરે છે, મેઘોરૂપી જેનાં કેશપાશ છે, વિવિધ જાતનાં રત્નો તેનાં આભૂષણો છે, કમલની મૃણાલ તેના બાહુ છે, વિકસ્વરપત્રો તેનાં નેત્રો છે, બિંબફલ તેના અધર છે, ચંદનવૃક્ષની સુવાસ તેનું વિલેપન છે, પર્વતના છેડા તેના પગ છે, અતિઊંચા શિખરો તેના સ્તન છે, પુંડરિક દ્રાવિડ, વારિખિલ્લ આદિ મુક્ત અનગારો તેના હાર છે, પટુ કોકિલની વાણી તેનો મધુરસ્વર છે, તેમજ ચંપક વૃક્ષોની પંક્તિ તેનો ગોરો દેહ છે, આવી રીતે પર્વતની ભૂમિ સ્રીની જેમ શોભતી હતી. ॥ ૫૨ ॥ ૫૩ ॥

विकचकुसुमपीतस्फीतिमज्जातिजातो-
परिपरिमललुभ्यल्लोलमत्तालिमाला।
खगपरिवृढपृष्ठाधिष्ठितारिष्टदस्यो-
रुपमितिमिह शैलाखण्डलेऽलंचकार ॥ ५४ ॥

इहास्मिन् शत्रुंजयनाम्नि शैलाखण्डले गिरीन्द्रे विकचानि विनिद्राणि कुसुमानि पुष्पाणि यस्मिन् तथा पीतत्वेन स्फीतिमद्दीप्यमानमथ वा पीतं हारिद्रवर्णं काश्चिज्जातयः श्वेताः काश्चिच्च पीता अपि स्युरिति स्फीतिमत्प्रवर्धमानं यज्जातीनां मालतीनां जातं वृन्दं

तस्योपरि परिमले सुरभितायां लुभ्यतां लोभं प्राप्नुवतां लोलानां चञ्चलानां मत्तानां मकरन्दपानेनोत्कटानामलीनां भ्रमराणां माला श्रेणी सा कर्त्री। खगानां परिवृढः पक्षिणां स्वामी नायको गरुडः स्वर्णकायस्तस्य पृष्ठं ततः पश्चिमो भागस्तमधिष्ठितस्य स्थितस्याध्यारूढस्य वा अरिष्टनामासुरस्तस्य दस्योर्वैरिणः कृष्णस्य उपमितिमुपमानमलंचकार भूषितवान। विष्णोरुपमां प्राप्तवतीत्यर्थः।

શ્લોકાર્થ

શત્રુંજયપર્વત ઉપર પીતવર્ણનાં વિકસ્વર પુષ્પોના સમૂહમાં રસપાન કરવામાં લોલુપી બનેલા ભ્રમરોની પંક્તિ, ગરૂડ ઉપર આરૂઢ થયેલા વિષ્ણુની જેમ શોભાને ધારણ કરતી હતી. ।। ૫૪ ।।

लिखितसुरपथाङ्कप्रस्थपुञ्जप्ररोह-
न्मसृणसरसघासग्रासवृत्तिं सृजन्तः।
क्षुधितमृगतुरङ्गाः खेदयन्ति स्म नक्तं-
दिनमिदमुपरिष्टात्संचरच्चन्द्रसूर्यौ ॥ ५५ ॥

क्षुधिता नक्तंदिनाविश्रान्तिपरिभ्रमणप्रादुर्भवद्बुभुक्षाक्षामकुक्षयः मृगश्चन्द्रोत्सङ्गकुरङ्गस्तुरङ्गाः सूर्यरथरथ्याश्वाः कर्तारः नक्तंदिनं रात्रौ दिवा च इदमुपरिष्टाद्विमलाचलोपरिप्रदेशे संचरन्तौ प्रचलन्तौ चन्द्रसूर्यौ शशिभास्करौ प्रति कर्मणी खेदयन्ति विषादमापादयन्ति। दुःखीकुर्वन्तीत्यर्थः। किं कुर्वन्तः। लिखितो निघृष्टः सुरपथस्याकाशस्य अङ्कः क्रोडो हृदयं येन तादृशो यः प्रस्थानां सानूनां पुञ्जः तत्र प्ररोहन्त्युद्गच्छन्तस्तथा मसृणाश्चिक्कणाः सुकुमारास्तथा सरसाः सान्द्राः स्नेहलाः सुस्वादा वा ये घासास्तृणानि तेषां ग्रासैः कवलैर्वृत्तिमाजीविका प्राणाधारं सृजन्तः कुर्वन्तः।

શ્લોકાર્થ

રાત અને દિવસ શત્રુંજય પર્વત ઉપર પર્યટન કરતા ચન્દ્ર અને સૂર્યનાં ક્ષુધાતુર બનેલા મૃગ (ચન્દ્રમાં રહેલો) અને અશ્વો (સૂર્યના સાત ઘોડા) ખેદ પામતા હતા; તેથી આકાશને સ્પર્શીને રહેલાં શિખરો ઉપર ઊગેલા મુલાયમ અને સ્નિગ્ધ ઘાસ વડે પોતાની આજીવિકા કરતા હતા. ।। ૫૫ ।।

क्वचन कनकशृङ्गे रङ्गिभृङ्गानुषङ्गि-
क्षरदमितमरन्दस्पन्दसंदोहसान्द्रा ।

अलभत वयसीत्वं जृम्भमाणा तमाला-
वलिरिह यमुनाया भास्वदङ्के स्थिताया ॥ ५६ ॥

इह शत्रुंजयाद्रौ क्वचन कुत्रचन स्थानके कस्मिन्नपि वा कनकशृङ्गे सुवर्णशिखरे जृम्भमाणा विकसन्ती तमालानां तापिच्छद्रुमाणामावलिः श्रेणी भास्वदङ्के सूर्योत्सङ्गे स्थितायाः पितुः सवितुरुत्सङ्गे खेलन्त्या यमुनाया यमभगिन्या नद्याः वयसीत्वं सखीभावमलभत प्राप्नोति स्म । किंभूता । रङ्गो रङ्गणं पर्यटनम् । 'अगिरगिलगि गत्यर्थाः' इत्ययं धातुः । तथा रञ्जनं रङ्गो रागः । 'रञ्ज रागे' इत्यस्य प्रयोगश्च विद्यते । येषां रङ्गिणस्तेषां भृङ्गाणां भ्रमराणामनुषङ्ग सङ्गो विद्यते येषु तादृशाः क्षरन्तो निःसरन्तोऽमिता मानातीता ये मरन्दा मधूनि त एव स्पन्दा रसास्तेषां संदोहा राशयस्तैः सान्द्रा नीरन्ध्रा पूर्णा ॥

श्लोकार्थ

रागी भ्रमरोना संगवाळी अने स्रवी रहेला रसना प्रवाहोथी पूर्ण सुवर्ण शिखर उपर रहेलां तमालवृक्षोनी पंक्ति पोताना पिता सूर्यना उत्संगमां क्रीडा करी रहेली यमुना जेवुं आचरण करती हती. ॥ ५६ ॥

मरकतकटकाङ्कस्फाटिकानुच्चकूटो-
दरविदलितपुष्पप्रस्फुरच्चम्पकद्रुः ।
नरकदमननाभीपुण्डरीकाङ्कनिर्य-
ज्जलजतनुजलीलामाललम्बे कदम्बे ॥ ५७ ॥

कदम्बे शत्रुंजयाचले मरकताश्मगर्भमणीनां कटकस्य क्वापि नीलरत्ननिर्मितगिरिनितम्बस्याद्रिमध्यभागस्य अङ्कैः क्रोडस्तत्र स्फाटिकं स्फटिकमणिसंबन्धि यदनुच्चं नात्युन्नतं नोत्तुङ्गम् । लघु इत्यर्थः । कूटं शिखरं किंचिदुच्चगिरिप्रदेशस्तस्योदरे मध्ये गर्भे वा विदलितैर्विनिद्रीभूतैः पुष्पैः कुसुमैः प्रस्फुरद्दीप्यमानश्चम्पकद्रुर्हेमपुष्पकपादपः कर्ता । नरकनाम्नोऽसुरस्य दमनो हन्ता नारायणस्तस्य नाभ्यां तुन्दकूपिकायां यत्पुण्डरीकं श्वेताम्भोजं तस्याङ्कात् हृदयात् । उदरादित्यर्थः । निर्यतो निर्गच्छतो जलजतनुजस्य कमलभुवो ब्रह्मणो लीलां विलासमाललम्बे आश्रयते स्म । इति गर्भितोपमा ॥

શ્લોકાર્થ

શત્રુંજયપર્વત ઉપર મરકતમણીનાં મોટા શિખરનાં મધ્યભાગમાં રહેલાં સ્ફટિકરત્નોના નાના શિખરોમાં રહેલું વિકસિત પુષ્પોથી શોભતું ચંપકવૃક્ષ, વિષ્ણુની નાભિમાંથી ઉત્પન્ન થયેલા પુંડરિક કમલમાંથી નીકળતા બ્રહ્માની લીલા ધારણ કરતું હતું. ॥ ૫૭ ॥

रसिककरिविलोलत्कर्णतालौघतूर-
ध्वनिमधुकरराजीगुञ्जितोदात्तगीतौ ।
क्वचिदिह गुरुणेव प्रेरिता मारुतेन
स्त्रिय इव वनवल्ल्यः पत्रहस्ता अनृत्यन् ॥ ५८ ॥

इह श्रीसिद्धशैले क्वचित् कुत्रापि प्रदेशे स्त्रियो नृत्यकृत्कामिन्यो नर्तक्य इव वनवल्ल्यः काननोद्गतलता अनृत्यन् नृत्यन्ति स्म । किंभूताः । मारुतेन वायुना प्रेरिताश्चपलीकृताः । उत्प्रेक्ष्यते—गुरुणेव । यथा नाटकाचार्येण सूत्रधारेण प्रेरिताः प्रवर्तितास्ताण्डवकारिकाः पात्राणि नृत्यन्ति । किंभूतानि । पत्राणि पर्णान्येव पवनचञ्चलत्वात् हस्तकाः पाणिविक्षेपा यासां ताः । नृत्यन्ति कस्यां सत्याम् । रसिकाः स्वैरं स्ववशाभिर्वनद्रुमेषु सल्लकीकाननेषु क्रीडारसकल्लोलितचेतसो ये करिणो गजेन्द्राः तेषां सशब्दं चञ्चलीभवतामितस्ततः संजायमानानां कर्णतालानां श्रोत्रपत्राणाम् । 'उषसि गजयूथकर्णतालैः' इति रघुवंशे । ओघाः समूहास्त एव तूराणां वादित्राणां ध्वनयो निर्घोषास्तथा मधुकराणां विकसितकुसुमारविन्दवृन्दमकरन्दबिन्दुमदोन्मदबन्धुरगन्धसिन्धुरकपोलस्थलगलन्मदोदकपानमेदुरीभूतानां भ्रमराणां गुञ्जितानि गुञ्जारवा एव उदात्ता मनोज्ञा गीतिर्गानं तस्यां सत्याम् ॥

શ્લોકાર્થ

સિદ્ધગિરિના કોઈ ભાગમાં, જંગલની વેલો સૂત્રધાર જેવા પવન વડે પ્રેરાઈને જાણે નર્તકીની જેમ નૃત્ય કરતી હતી ! વનવિહારી રસિક હાથીઓના ચપલકર્ણતાલનાં સમૂહરૂપ વાજિંત્રનો જેમાં ધ્વનિ છે, ભ્રમરોની પંક્તિના ગુંજારવરૂપ જેમાં સુંદર ગીત છે, અને પત્ર (પાંદડાં) રૂપ હાથના જેમાં હાવભાવ છે, તેવા પ્રકારની વેલડીઓ જાણે નૃત્યને વિસ્તારતી હતી. ॥ ૫૮ ॥

लुलितगगनगङ्गासीकरासारवन्तः
स्मिततरुवनमालामन्दमान्दोलयन्तः ।
विकचकुसुमपद्मामोदमेदस्विनो यं
प्रभुमिव पवमानाः सेवकाः शीलयन्ति ॥ ५९ ॥

पवमाना मारुताः यं पुण्डरीकाचलं शीलयन्ति । के इव । सेवका इव । यथा अनुचराः प्रभुं स्वामिनं सेवन्ते । वायुस्त्रिधा वर्ण्यते । शीतो मन्दः सुरभिश्च । तदेव त्रैविध्यं दर्शयति– किंभूताः पवमानाः । लुलिताः पवनवेगेनान्दोलिता अतिचपलीकृता या गगनस्य गगनवर्तिनी वा आकाशे प्रवहमाना भूमिगतवत् या गङ्गा सिद्धधुनी देवनदी तस्याः सीकराणां जलकणानामासारो वेगवती वृष्टिर्विद्यते येषु । इति शीतलत्वम् । पुनः किंभूताः ।

स्मिता विनिद्रोस्तरवो द्रुमा येषु तादृशानि वनानि काननानि तेषां मालाः श्रेणीः मन्दं शनैः शनैरान्दोलयन्तस्तरलीकुर्वन्तः। इति मन्दत्वम्। पुनः किंभूताः। विकचानां विकसितानां कुसुमानां त्रिविधजातीयतरुपुष्पाणां तथा पद्मानां कमलानां वा मोदैः परिमलैः मेदस्विनः पुष्टाः। इति सुरभित्वम्॥

श्लोकार्थ

પવન પણ સિદ્ધગિરિની સેવકની જેમ સેવા કરે છે. જેમાં પવન વડે ચપલ બનેલા આકાશગંગાનાં જલકણો છે, (શીતલ), જેમાં વિકસ્વર વૃક્ષોની પંક્તિઓનું મંદ મંદ આંદોલન છે, (મંદ), જે વિકસ્વર પુષ્પોની સુવાસથી પુષ્ટ છે (સુરભિ), આ રીતે શીતલ, મંદ અને સુગંધી એમ ત્રણે પ્રકારે પવન જાણે સેવા કરતો ન હોય. ॥ ૫૯ ॥

प्रतिशिखरममुष्मिन्निःसरन्निर्झरौघा
अमुरसुरपुरंध्रीकेलिनीरन्ध्रनीराः।
नभसि निरवलम्बप्रस्खलन्नाकिनद्याः
शतश इव भवन्तो वाःप्रवाहाः स्फुरन्ति ॥ ६० ॥

अमुष्मिन् सिद्धपर्वते प्रतिशिखरं निखिलशिखरेभ्यो निःसरन्तो निर्गच्छन्तो ये निर्झराणामोघाः संघाताः स्फुरन्ति दीप्यन्ते। विभान्तीत्यर्थः। किंभूताः। असुराणां पातालवासिनां सुराणां स्वर्गगेहानां पुरंध्यः कामिन्यस्ताभिः केलिभिः जलविलासैः कृत्वा नीरन्ध्रं निर्भरं भृतं नीरं पानीयं येषु ते। उत्प्रेक्ष्यते—निर्गतः अवलम्ब आश्रयणं यस्मात्तादृशे नभसि आकाशे निराधारत्वेन प्रस्खलन्त्या प्रकर्षेण स्खलित्वा निष्पतन्त्या नाकिनद्याः स्वर्गिगङ्गायाः शतशः शतसहस्रसंख्याका भवन्तः वाःप्रवाहाः पयःपूरा इव॥

श्लोकार्थ

સિદ્ધગિરિના પ્રત્યેક શિખરમાંથી નીકળતાં, દેવ દાનવની સ્ત્રીઓની જલક્રીડાથી નીરંધ્ર જલવાળાં ઝરણાંઓ શોભતાં હતાં. જાણે નિરાલંબન આકાશમાં નિરાધારપણે ચાલવાથી સ્ખલના પામેલી આકાશગંગાના જાણે હજારો જલપ્રવાહો ન હોય! ॥ ૬૦ ॥

स्फटिकघटनमन्तः पद्मरागप्रगल्भं
मरकतमयशृङ्गं निर्झरै राजमानम्।
कलितकलबलाकाकालिकीवारिधारं
ध्वनिजितमिव सार्वं शीलदभ्रं बभासे ॥ ६१ ॥

क्वचित्कस्मिन्नपि गिरेः प्रदेशे मरकतानि अश्मगर्भा नीलमणय एव रूपं यस्य इन्द्रनीलरत्नघटितं शृङ्गं शिखरं बभासे शुशुभे । किंभूतं शृङ्गम् । स्फटिकानां क्षीरतैल-स्फटिकरत्नानां घटना रचना यत्र तत् । पुनः किंभूतम् । अन्तर्मध्ये क्वापि स्थाने पद्मरागा अरुणमणयस्तैः प्रगल्भं पटुशोभम् । पुनः किंभूतम् । निर्झरैर्निःसरन्नीरधा-राधोरणीभी राजमानम् । उत्प्रेक्ष्यते—ध्वनिना गम्भीरशब्देन जितमभिभूतं सत्साधैं ऋषभदेवं शीलत् सेवमानभ्रं मेघ इव । 'मेघगम्भीरघोषत्वम्' इति हैम्याम् । किंभू-तमभ्रम् । कलिता धृता कला मनोज्ञा बलाका बलाकां गता । मेघसमये हि बलकानां गर्भाधानं जायते । अत एव मेघदूतकाव्ये प्रोक्तम्—'गर्भाधानक्षणपरिचयान्नूनमाबद्धमालाः बलाकाः सेविष्यन्ते' इति । तथा वर्षासु बका नीडवृक्षादावेवोपविश्य तिष्ठन्ति, बलाकानां तेषां भक्ष्यमानीय ददते । 'बगला पावसवइठा' इति लोकवृत्तावपि श्रूयते प्रसिद्धिः । तस्मा-द्बलाकापदोपादानम् । तथा आकालिकी विद्युत् । तथा वारिधारा जलवृष्टयो येन ॥

શ્લોકાર્થ

પર્વતના કોઈ ભાગમાં સ્ફટિક રત્નની રચનાવાળું, મધ્યમાં પદ્મરાગ મણિઓથી સુશોભિત અને પવિત્ર ઝરણાઓવાળું નીલમણિનું શિખર શોભતું હતું. જાણે સુંદર બગલા, વિદ્યુત અને જલ વૃષ્ટિવાળો મેઘ, ભગવાનના ગંભીર સ્વરથી પરાભવ પામીને શ્રીવૃષભ-દેવની ઉપાસના કરતો ન હોય ! ।। ६१ ।।

क्वचिदपि रुचिचिञ्चत्पद्मरागप्रगल्भं
मरकतमणिचङ्गोत्तुङ्गशृङ्गं चकासे ।
विजितऋषभभर्त्रा धीरगम्भीररावै-
स्तप इव तनुतेऽस्मिंस्तत्तुलाप्त्यै तडित्वान् ॥ ६२ ॥

क्वचिदपि कुत्रापि स्थाने शत्रुंजयपर्वतोपरिभूमौ मरकतमणीनां महेन्द्रनीलरत्नानां चङ्गं प्रधानं मरकतमाणिक्यैर्वा चङ्गं चारु तथोत्तुङ्गमभ्रंलिहं शृङ्गं चकासे दीप्यते स्म । किंभू-तम् । रुचिभिर्निर्यज्ज्योतिःपुञ्जैश्चञ्चद्भिर्दीप्यमानैः पद्मरागैः लक्ष्मीपुष्परत्नैः प्रगल्भं भ्राजमा-नम् । उत्प्रेक्ष्यते—ऋषभभर्त्रा विमलाचलकमलालंकारहारेण श्रीवृषभदेवस्वामिना आदिना-थेन धीरैरभङ्गाघुर्घुरैः गम्भीरैर्मन्द्रैः मथ्यमानपाथोनाथनिर्घोषानुकारिभिः रावैः स्वशब्दैः जितः पराभूतः सन् तडित्वान् विद्युद्वलयालंकृतो जलधरस्तेषां जैनधीरगम्भीररावाणां तुलायाः सादृश्यस्य आप्त्यै प्राप्त्यै किं तपस्तनुते उपवासादिकष्टं करोतीव ॥

શ્લોકાર્થ

શત્રુંજય પર્વતના કોઈ સ્થાનમાં પદ્મરાગ મણિઓથી રચિત ભવ્ય મરકત મણિનું ગગનચુંબી શિખર શોભે છે; જાણે શ્રીઋષભદેવના ધીર ગંભીર અવાજથી પરાભવ પામેલો મેઘ તેની સમાનતા પ્રાપ્ત કરવા માટે તપશ્ચર્યા કરતો ન હોય ! ।। ६२ ।।

चपलशफरनेत्रा बन्धुरावर्तनाभी
मधुपपटलकैश्या मानसावासहासाः ।
कनककमलगौर्यो वीचिमालावलीकाः
स्त्रिय इव रसभाजो भूभृतापो ध्रियन्ते ॥ ६३ ॥

भूभृता शत्रुंजयाद्रिणा स्त्रियो वध्व इव आपो जलानि ध्रियन्ते। किंभूता आपः स्त्रियश्च। चपलाश्चञ्चलाः शफरा मत्स्या एव तद्वद्वा नेत्राणि नयनानि यासाम्। तथा बन्धुरो मनोज्ञ आवर्तो दक्षिणावर्तो भ्रमिविशेषः पयसां भ्रमो भ्रमणं यासां तादृश्यो नाभ्यो मध्यं तुन्द-कूपिकाश्च यासां तथा मधुपानां भ्रमराणां पटलानि मण्डलानि एव तद्वद्वा कैश्यं केशानां समूहो यासाम्। पश्चात्कर्मधारयः। पुनः किंभूताः। मानसावासा हंसास्त एव तद्वद्वा विशदो हासो यासाम्। पुनः किंभूताः। कनकस्य स्वर्णस्य कमलानि तैस्तद्वद्वा गौर्यः गौराङ्ग्यः। पुनः किंभूताः। वीचीनां कल्लोलानां माला श्रेणी सैव तद्वद्वा वली उदरे मांससंकोचलक्षणा यासाम्। पुनः किंभूताः। रसं जलं शृङ्गारादिकं च भजन्ते इति रसभाजः॥

શ્લોકાર્થ

સ્ત્રીઓની જેમ શત્રુંજય પર્વતે જલવહન કર્યું. ચપલ મત્સ્યરૂપ નેત્રોવાળી, મનોહર જલના આવર્તરૂપ નાભિવાળી, ભ્રમરોના સમૂહરૂપ, કેશપાશવાળી, રાજહંસ રૂપ હાસ્યવાળી, સુવર્ણના કમલરૂપ ગૌર અંગવાળી, ઉદર ઉપર કલ્લોલોની શ્રેણીરૂપ ત્રિવલી-વાળી, અને જલરૂપ શૃંગાર આદિ રસવાળી, સ્ત્રીઓની જેમ શત્રુંજય પર્વત જલને ધારણ કરે છે. ॥ ૬૩ ॥

क्वचन जिनगृहान्तर्दह्यमानागुरुभ्यः
प्रसरदमरमार्गप्रस्फुरद्वायुवाहम् ।
सजलजलदबुध्या वीक्ष्य बप्पीहबालाः
कृतपटुचटुवाचो यत्र धावन्ति मुग्धाः ॥ ६४ ॥

यत्र शत्रुंजये क्वचन कुत्रचन प्रदेशेषु मुग्धा अज्ञाना बप्पीहानां चातकानां बालाः शिशवः अङ्गना वा सजलानां पानीयपूर्णानां जलदानां मेघानां बुध्या धिया भ्रान्त्या वा धावन्ति संमुखं पार्श्वं वा यान्ति। किंभूताः। कृता विहिताः पटवः प्रवणाश्चटवः प्रियप्राया वाचो वाण्यो यैर्याभिर्वा। किं कृत्वा। जिनगृहाणां जैनप्रासादानामन्तर्मध्ये दह्यमाना भग-वत्पुरो धूपोत्क्षेपणार्थं धूपाधानाग्नौ प्रज्वाल्यमानाः। उत्क्षिप्यमाना इत्यर्थः। ये अगुरवः काकतुण्डास्तेभ्यः प्रसरन्तं विस्तरन्तं तथा अमरमार्गे आकाशे प्रस्फुरन्तमितस्ततो भूत्वा दशदिग्गृहाङ्गणानि व्याप्नुवन्तं वायुवाहं धूमं वीक्ष्य दृष्ट्वा ॥

શ્લોકાર્થ

શત્રુંજય પર્વતના કોઈ જિન મંદિરમાં ઉખેવાતા ધૂપદાનમાંથી પસાર પામી આકાશ માર્ગમાં ફેલાયેલા ધુમાડાને જોઈને જલ વડે પરિપૂર્ણ મેઘની ભ્રાન્તિથી મુગ્ધ બાલ બપૈયાઓ (ચાતકો) ચટુ પટુ શબ્દ કરતા અર્થાત્ કોમલ શબ્દ કરતા આમ તેમ દોડાદોડ કરતા હતા. ॥ ૬૪ ॥

स्वकरनिकरसङ्गश्चोतदिन्दूपलाम्भो-
भरमिदमचलोच्चैरत्नशृङ्गाद्गृहीत्वा ।
स्वयममृतमरीचिर्मैत्र्यतः कैरवाणां
किमु दिशति तमेव प्रश्रिपीयूषदम्भात् ॥ ६५ ॥

अमृतमरीचिश्चन्द्रः कैरवाणां स्वबन्धुकुमुदानां मैत्र्यतः परस्परसंख्यात् प्रश्रीनां पीयूषस्य कान्तिद्वारा अमृतस्य प्रश्रिरूपस्य पीयूषस्य वा दम्भात्कपटात् तमेव चन्द्रकान्ताम्भोभरमेव स्वयमात्मना दिशति ददातीव । किं कृत्वा । इदमचलस्य अस्य शत्रुंजयोच्चैरुच्चैः ऊर्ध्वमधिकायां यद्रत्नानां चन्द्रकान्तकर्केतनादिमणीनां शृङ्गं शिखरं तस्मात्स्वस्य कराः किरणास्तेषां निकरो राशिस्तस्य सङ्गः संपर्कस्तेन श्चोतन्तः क्षरन्तो गलन्तो ये इन्दूपलाश्चन्द्रकान्तमणयस्तेषामम्भोभरं जलपटलं गृहीत्वा आदाय ॥

શ્લોકાર્થ

શત્રુંજય પર્વતના ચન્દ્રકાન્ત મણિનાં ઊંચા શિખર ઉપરથી પોતાનાં કિરણો દ્વારા ઝવી રહેલા જલસમૂહને ગ્રહણ કરીને, ચન્દ્ર સ્વયં મૈત્રીભાવે કૈરવોને અમૃતના બ્હાને જલસમૂહ જાણે આપતો હતો. ॥ ૬૫ ॥

यस्मिन्नुरोद्वयसनिःसृतसिन्धुरङ्क-
क्रीडत्सुरासुरपुरंध्रिपयोधराणाम् ।
कस्तूरिकामलयजद्रवसान्द्रपूरा
रेजे यमीसलिलसंवलितेव गङ्गा ॥ ६६ ॥

यस्मिन् शत्रुंजयाद्रौ उरोद्वयसंहृदयप्रमाणं निःसृता निर्गता सिन्धुर्नदी यस्या यमुनायाः सलिलैः संवलिता मिश्रितजला गङ्गेव रेजे विभाति स्म । किंभूता सिन्धुः । अङ्के जलोत्सङ्गे क्रीडन्तीनां जलकेलिं कुर्वाणानां सुराणां देवानामसुराणां दानवानां पातालवासिनां प्रथमनिकायभवनयतिनिर्जराणां वा पुरंध्रीणां वधूनां पयोधराणां विविधपत्रलताकलितस्त-

नकलशानां कस्तूरिकाणां गन्धधूलीनां मलयजन्मनां चन्दनानां द्रवैः जम्बालिनीजलसञ्जातपङ्कैः सान्द्रं करम्बितं पूरं जलप्रवाहो यस्याः ॥

श्लोकार्थ

શત્રુંજય પર્વતની મધ્યમાંથી નીકળતી નદી, પોતાની મધ્યમાં ક્રીડા કરી રહેલી દેવદાનવોની સ્ત્રીઓનાં વક્ષસ્થલ ઉપર વિલેપન કરાવેલા કસ્તૂરી અને ચંદનના પ્રવાહીથી વ્યાપ્ત જલપ્રવાહવાળી થઈ સતી યમુનાનાં જલ વડે મિશ્રિત ગંગાના પ્રવાહની જેમ શોભતી હતી. ॥ ૬૬ ॥

यत्रोन्मदैः परिणतैर्हरितां करीन्द्रै-
रुत्खातगैरिकभरैर्नभसि भ्रमद्भिः ।
संध्याधियेव गलितावधिवेलमत्र
विश्रान्तिमाप न महानटनाटचरङ्गः ॥ ६७ ॥

अत्र जगति महानटस्य शंभोर्नाट्यरङ्गः नाटकस्य रङ्गः स्नेहक्रीडा गलितो विगतोऽवधिः सीमा यत्र तादृग्वेला वारः । काल इत्यर्थः । निरवधिसमयं यावत् । 'शंभोर्मा व्रत सांध्यवेलनटनं भाजि व्रतं वाक्' इति नैषधे । विश्रान्तिं विश्रमम् आप लेभे । न नाटकरङ्गाद्विरराम इत्यर्थः । उत्प्रेक्ष्यते—संध्याधिया पितृसूभ्रमेणेव । कैः कृत्वा । यत्र शत्रुंजये हरितां दिशां करीन्द्रैः गजराजैः । दिग्गजैरित्यर्थः । उत्खातैस्तटाघातक्रियायां दत्तमुसलैरुत्पाद्य क्षिप्तैः गैरिकाणां धातूनां भरैः प्रकरैः । किंभूतैः करीन्द्रैः । उन्मदैः क्षीबतयोद्धतीभूतैः । पुनः किंभूतैः । परिणतैस्तिर्यक्प्रवादिषु प्रदत्तप्रहारैः । भरैः किं कुर्वद्भिः । नभसि आकाशे भ्रमद्भिः पर्यटद्भिः । विस्तरद्भिरित्यर्थः ॥

श्लोकार्थ

શત્રુંજયની દિશાઓના મદોન્મત્ત અને દંતપ્રહારોથી પરિણત દિગ્ગજો, ગૈરિક ધાતુ (લાલમાટી)ને ઉખેડીને તેનો સમૂહ આકાશમાં ઉછાળવાથી સંધ્યા સમયની ભ્રાન્તિથી મહાનટ (ઈશ્વર)નો નાટયરંગ નિરવધિ બની ગયો ! અર્થાત્ વિરામ પામ્યો નહીં. ॥ ૬૭ ॥

यस्मिन्ननन्यमणिधोरणिक्लृप्ततुङ्ग
शृङ्गाङ्गणैर्दलितसंतमसप्रचारैः ।
पूषा मयूखमुषितोल्लसहस्रलक्ष्मीः
खद्योतपोत इव किंचिदधत्त शोभाम् ॥ ६८ ॥

यस्मिन् शत्रुंजये विमलाचलोपरि वर्तमानः पूषा सूर्यः खद्योतो ज्योतिरिङ्गणः 'खज्जऊ' इति लोकप्रसिद्धः । तस्य पोतो बालकः खद्योत एव शिशुः तद्वत्किंचित्किमपि स्वल्पमात्रां शोभामधत्त दधाति स्म । किंभूतः । पूषा मुषिता आच्छिद्य गृहीता उस्राणां किरणानां सहस्रं दशशती तस्य लक्ष्मीः श्रीर्यस्य । कैः । अनन्याभिरसाधारणाभिः मणीनां नानाविधरत्नानां धोरणीभिः श्रेणीभिः क्लृप्तानि घटितानि तथा तुङ्गान्यभ्रंकषाणि शृङ्गाणि शिखराणि तेषामङ्गणैरजिरैः । सद्भूमीभिरित्यर्थः । किंभूतैः । दलितो व्यापादितः संतमसानामन्धकाराणां प्रचारः प्रसारो यैः ॥

श्लोकार्थ

વિમલાચલ પર્વત ઉપર જેથી અંધકાર સમૂહ નાશ કરાયો છે તે અમૂલ્ય રત્નની પંક્તિ વડે નિર્માણ કરાયેલા ગગનચૂંબી શિખરોનાં આંગણાએ જેનાં હજાર કિરણોની લક્ષ્મીનું હરણ કર્યું છે તે સૂર્ય બાલખદ્યોતની જેમ કંઈક જ પ્રકાશ ધારણ કરનારો બન્યો. ॥ ૬૮ ॥

अहोरात्रस्थास्नूदयदमितभास्वद्भ्रमकरीं
　मणीशृङ्गश्रेणीं हततमसमभ्राध्वपथिकीम् ।
विलोक्यैतत्पद्माकरकमलिनीराजिरनिशं
　गलन्निद्रामुद्रां कलयति समुद्बोधकमलाम् ॥ ६९ ॥

एतस्य शत्रुंजयाद्रेः पद्माकराणां कमलमण्डलशालिसरसां कमलिनीनां राजीविनीनां राजिरनिशं निरन्तरं नक्तंदिनमपि समुद्बोधस्य सम्यग्विकाशस्य कमलां लक्ष्मीं कलयति धत्ते । किंभूतां कमलाम् । गलन्ती निर्यान्ती निद्रासंकोचलक्षणा तन्द्रा तस्या मुद्रा मुद्रणं स्वापावस्था यस्याः सा ताम् । किं कृत्वा । मणीनामाभंकरप्रभंकरादीनां माणिक्यानाम् । देदीप्यमानमणिमयानामित्यर्थः । शृङ्गाणां शिखराणां श्रेणीं धोरणीं विलोक्य दृष्ट्वा । किंभूताम् । अहोरात्रे दिवसे निशायां च निरवधिसमयं यावन्नित्यं स्थास्नूनां वसनशीलानां तथा उदयतामभ्युद्गमं भजतां तथा अमितानां प्रमाणरहितानां संख्यातीतानां भास्वतां भास्कराणां भ्रमकरीं भ्रान्तिविधायिकाम् । पुनः किंभूताम् । हतानि ध्वस्तानि गले गृहीत्वा निष्काशितानि तमांसि ध्वान्तानि यया ताम् । पुनः किंभूताम् । अभ्राणां मेघानामध्वनो मार्गस्य गगनपद्धतेर्वा पथिकीं पान्थीम् । अभ्रंकषामित्यर्थः । 'अभ्रं व्योमपयोदयोः' इत्यनेकार्थः ॥

श्लोकार्थ

રાત ને દિવસ ઉદય પામતી સૂર્યની ભ્રાન્તિ કરાવનારી અને અંધકારનો નાશ કરનારી ગગનચૂંબી રત્નમય શિખરોની શ્રેણી જોઈને, શત્રુંજયના સરોવરમાં રહેલી

કમલોની પંક્તિ સંકોચરૂપ નિદ્રાવસ્થાનો ત્યાગ કરીને વિકાસરૂપ જાગ્રત અવસ્થાને નિરંતર પ્રાપ્ત કરનારી બની. ॥ ६९ ॥

यस्मिन्नुद्वहता कनीमिव लतां यूनेव भूमीरुहा
स्वामोदैः स्वजनैरिव स्मितसुमैः पात्रैरिवोद्यन्मधु ।
प्रीत्या भोजयितुं वराशनमिवानेके द्विरेफाः समं
स्त्रीभिर्नागरिका इवोन्नततयामन्त्र्यन्त मन्यामहे ॥ ७० ॥

यस्मिन् शत्रुंजये यूनेव तरुणेनेव भूमीरुहा विनिद्रद्रुमेण अथ च भूमीजन्मना व्यवहारिणा नागरिकाः पौरजना इव अनेके बहवो द्विरेफा भ्रमरा भृङ्गाः आमन्त्र्यन्त आकार्यन्त । कथम् । समं सार्धम् । काभिः । स्त्रीभिः नागरीभिरिव भ्रमरीभिः सह । कया । उन्नततया महत्त्वेन उच्चैःशिरस्त्वेन महातरुत्वेन अथ महाव्यवहारारित्वेन चेत्यभ्राय हेतुः । कैः कृत्वा आहूयन्ते स्म । आमोदैः परिमलैः । कैरिव । स्वजनैरिव स्वगोत्रजातैरिव । भूमीरुहा किं कुर्वता । उद्वहता उत्प्राबल्येन वहता बिभ्रता अङ्गीकुर्वता षण्णामपि ऋतूनां सर्वदा तत्राद्रौ स्थायुकत्वेन पाणिग्रहणं कुर्वता च । काम् । लतां वनवल्लीम् । कामिव । कनीमिव कुमारिकामिव । किमर्थमामन्त्र्यन्त । भोजयितुं भोजनं कारयितुम् । कया । प्रीत्या । स्वोत्सङ्गस्नेहेन स्थायुकत्वेन किं कर्मतापन्नम् । उद्यन्मधु प्रकटीभवन्मकरन्दम् । किमिव । वराशनमिव षड्रससरसीकृतप्रधानभोज्यास्वाद्यलेह्यचोष्यभोजनमिव । कैः । स्मितैः विकसितैः कुसुमैः पुष्पैः । कैरिव । पात्रैरिव स्वर्णाद्यमत्रैरिव ।

શ્લોકાર્થ

કોઈ વ્યાવહારી જેમ યુવાન પુરુષની સાથે પોતાની કન્યાનાં પાણિગ્રહણ કરાવવાના સમયે, સ્ત્રી સહિત નાગરિકોને પ્રીતિભોજન માટે આમંત્રણ આપે, તેમ વિકસ્વર વૃક્ષ સાથે લતારૂપ કન્યાનાં પાણિગ્રહણ સમયે, પોતાના પરિમલરૂપ રૂપી સ્વજનો વડે વિકસિત પુષ્પોરૂપ સુવર્ણ પાત્રોમાં મકરંદરૂપી શ્રેષ્ઠ રસનું પ્રેમપૂર્વક ભોજન કરવા માટે ભ્રમરીઓ સહિત ભ્રમરોને આમંત્રણ આપવામાં આવ્યું. ॥ ७० ॥

सिन्धूः सुता इव पिता त्वरमाणभावाः
प्रोत्कण्ठिताः प्रदधतीः सरसीजभूषाः ।
प्रास्थापयत्प्रति पतिं जलधिं तरङ्गैः
सत्राङ्गरक्षकभटैरिव सिद्धशैलः ॥ ७१ ॥

सिद्धशैलः श्रीशत्रुंजयाचलः सिन्धूश्चतुर्दशापि महानदीः सर्वर्तुस्थानत्वेन जलधराकालवहलीभवज्जलदजलप्राबल्यकल्लोलितकल्लोलिनीः जलधिं समुद्रं भर्तारं प्रति प्रास्थापय-

प्रेषयति स्म । कथम् । सत्रा सार्धम् । कैः । तरङ्गैः गगनाङ्गणालिङ्गनलोलकल्लोलैः । कैरिव । अथ वा उत्प्रेक्ष्यते—अङ्गरक्षकभटैः शरीरयत्नविधायकवीरैरिव । क इव प्रास्थापयत । पितेव । यथा जनकः स्वस्वतातः सुताः आत्मपुत्रीः पतिं पाणिगृहीतारं प्रति प्रस्थापयति । किंभूताः सिन्धूः सुताश्च । त्वरमाणः शीघ्रतरो भावः । भूयते उत्पद्यते कर्मवशतया भूयो भूयः संसारः अनेनेति भाव आत्मा चित्ताभिप्रायश्च यासाम् । प्रायो वर्षाकाले नद्यस्त्वरितं चलन्ति । स्त्रियोऽपि पतिमिलनार्थं त्वरिता अत्युत्सुकाश्च भवन्ति । पुनः किंभूताः । प्रोत्कण्ठिताः प्रकर्षेण उत्कृष्टः कण्ठः उपकण्ठः संनिधानं संजात आसाम् उभौ कण्ठौ पानीयपूर्णौ संजातावासामिति प्रोत्कण्ठिताः कण्ठादूर्ध्वमूढा वा । 'कण्ठो ध्वनौ संनिधाने ग्रीवायां मदनद्रुमे' इत्यनेकार्थः । तथा प्रकर्षेणोत्कण्ठा औत्सुक्यं भर्तृसंगमे जातमासाम् । पुनः किं कुर्वतीः । सरसीजानि विविधकमलानि तैः कृत्वा भूषा शोभा यासाम् । पक्षे पद्मानामुपलक्षणात्कुसुमानां भूषा हारादिमाभरणानि यासाम् । अथ वा कमलकुसुमानि हाररूपाणि तथा भूषा विविधाभरणानि यासाम् । 'भावोऽभिप्रायवस्तुनोः । स्वभावजन्मसत्तात्मक्रियोलीलाविभूतिषु ॥ चेष्टायोन्योर्बुधे जन्तौ शृङ्गारादेश्च कारणे । शब्दवृत्तिहेतौ च' इत्यनेकार्थः ॥

શ્લોકાર્થ

જલદીથી જવા માટે ઉત્સુક બનેલી અને કમલોનાં આભૂષણો ધારણ કરતી પોતાની ચૌદ મહાનદીઓને, પિતાની જેમ શત્રુંજય પર્વત તરંગોરૂપી અંગરક્ષકો સાથે તેઓના પતિ સમુદ્ર તરફ પ્રયાણ કરાવતો હતો. ॥ ૭૧ ॥

शशाङ्ककरसंगमक्षरदमन्दपाथःप्लवैः
क्वचिद्विधुमणीमयः कलयति स्म सालः श्रियम् ।
प्रचण्डतरचण्डरुक्किरणतापसंतापितः
प्रतिक्षपमि वामृतैः प्रविदधन्निजेनाप्लवम् ॥ ७२ ॥

क्वचित्कुत्रापि शत्रुंजये विधुमणीमयश्चन्द्रकान्तरत्नघटितः सालः प्राकारः श्रियं शोभां कलयति धत्ते । कैः । शशाङ्कस्य चन्द्रस्य कराणां किरणानां संगमेन संपर्केण क्षरतां निःसरताममन्दानां भूयसां पाथसां पानीयानां प्लवैः पूरैः कृत्वा । उत्प्रेक्ष्यते—प्रचण्डतरेण अतिशयेन तीव्रेण चण्डरुचः सूर्यस्य किरणानां ज्योतिषां तापेनोष्मणा संतापितो व्याकुलीकृतः सन् प्रतिक्षिपं रात्रीं रात्रीं प्रति अमृतैर्नीरैः कृत्वा निजेनात्मना आप्लवं स्नानं प्रविदधत् कुर्वन्निव ॥

શ્લોકાર્થ

શત્રુંજયપર્વત ઉપર ચન્દ્રકાન્ત મણિથી નિર્માણ કરાયેલો પ્રાકાર શોભે છે. ચન્દ્ર

કિરણોના સંપર્કથી અત્યંત સ્રવી રહેલા પાણીનાં પૂરથી સૂર્યના પ્રચંડ તાપ વડે સંતપ્ત બનેલા પોતાને અમૃત વડે જાણે સ્નાન કરાવતો ન હોય ! ॥ ૭૨ ॥

लीलायमानान्निजमौलिदेशे केशानिवोच्चैःप्रसरत्पयोदान् ।
धूपायतीवाप्तनिकेतधूपधूमैर्विलासीव स सिद्धशैलः ॥ ७३ ॥

स त्रिजगद्विख्यातः सिद्धशैलः शत्रुंजयाद्रिः निजस्यात्मनो मौलिदेशे शिरःस्थानीयशिखराग्रभागे लीलायमानान् लीलयाचरतो विभ्रमं भजन्तः क्रीडया आचरतो वा केशानिव कुन्तलानिव मस्तकोपरि शोभां बिभ्रतः उच्चैरूर्ध्वं प्रसरतो विस्तारं प्राप्नुवतः पयोदान् जलधरान् । उत्प्रेक्ष्यते—आप्तानामर्हतां निकेतेषु गृहेषु प्रासादेष्वित्यर्थः । उत्क्षिप्यमानागुरुव्रातधूपानां धूमैः कृत्वा धूपायतीव । सुगन्धीकरोतीव । क इव । विलासीव । यथा स्त्र्यादिभोगासक्तत्वेन विलासवान् पुमान् कृष्णागुरुप्रमुखधूपधूमैर्निजकेशान्सुरभयति ॥

શ્લોકાર્થ

જેમ કોઈ વિલાસી પુરુષ કૃષ્ણાગુરુ આદિ ધૂપ વડે પોતાના કેશ સુવાસિત કરે તેમ શત્રુંજય પર્વત પોતાના મસ્તકે (શિખરના અગ્ર ભાગે) કેશની જેમ રહેલા મેઘને, જિન પ્રાસાદોમાં ઉવેખેલા ધૂપના ધૂમાડાઓથી જાણે સુવાસિત કરતો ન હોય ! ॥ ૭૩ ॥

अर्कांशुसंपर्किपतङ्गकान्ताभितोविनिष्पातिहुताशहेतिभिः ।
मणीविहाराः प्रणयन्ति यस्मिन्पञ्चाग्निकष्टं क्वचनापि योगिवत् ॥ ७४ ॥

यस्मिन्विमलाचले क्वचनापि कुत्रचिदपि प्रदेशे मणीनामन्तःसंलब्धार्ककान्तमाणिक्यानां विहाराः प्रासादाः योगिवत्तापसा इव पञ्चाग्निकष्टं चतसृषु दिक्षु चत्वारः प्रज्वालितकाष्ठाग्नयः पञ्चमो भास्वांश्चेति पञ्चाग्निसाधनं कृच्छ्रं प्रणयन्ति कुर्वते इति गर्भितोत्प्रेक्षा । काभिः कृत्वा । अर्कस्य सूर्यस्यांशुभिः किरणैः समं संपर्कः संयोगोऽस्त्येषां तादृशा ये भास्करमणयस्तेभ्यः अभितश्चतुर्दिक्षु विशेषेण निष्पतनशीलानां हुताशानामनुच्छिष्टवह्नीनां हेतिभिर्ज्वालाभिः ॥

શ્લોકાર્થ

સૂર્યનાં કિરણોના સંપર્કથી સૂર્યકાન્ત મણિઓમાંથી નીકળતી અગ્નિની જવાળાઓ વડે શત્રુંજયના મણિમય પ્રસાદો યોગીની જેમ જાણે પંચાગ્નિ તપ કરતા હતા. ॥ ૭૪ ॥

निर्गत्वरप्रसमरद्युतिवारिपूर-
पूर्णान्तरस्फटिककल्पितकूटकोटीम् ।
जज्ञे किमु प्रतितटं तटिनी विपाशा
प्रेक्ष्येत्यबुध्यत विमुग्धजनेन यस्मिन् ॥ ७५ ॥

यस्मिन् शत्रुंजये विमुग्धजनेनाज्ञानलोकेन इत्यमुना प्रकारेणाबुध्यत ज्ञातम् । विचारितमित्यर्थः । किं कृत्वा । निर्गत्वरा निःसरणशीलाः प्रसमरा द्युतयः किरणास्ता एव वारिणां नीराणां पूराः प्लवाः प्रवाहास्तैः पूर्णं संपूरितं भृतमन्तरं मध्यं यस्यास्तादृशीं स्फटिकैः श्वेतोपलैः कल्पितां रचितां कूटानां शिखराणां कोटीं प्रेक्ष्य दृष्ट्वा । इति किम् । प्रतितटं शिखरं शिखरं प्रति विपाशा तटिनी अनुसर्पिणी नदी किमु जज्ञे संजाता । 'उत्सर्पिणी न खलु तत्र तरङ्गिणी या त्वन्नेत्रयोरहह तत्र विपाशि जाता । नीराजनाय नवनीरजराजिरास्तामत्राङ्ग्नसानुरज राजनि राजमाने ॥' इति नैषधे । तत्र द्वीपे विपाट् नदी न प्रसरणशीला आविर्भवति किल तत्र जातत्वात् अन्यत्र द्वीपेषु यथा सरित्प्रसरन्ती दृश्यते तथा तत्र विपाट् नेति पुराणप्रसिद्धिः । 'तत्र तस्यां विपाशि जाता नवपद्मपङ्क्तिः त्वन्नेत्रयोर्नीराजनायास्ताम् । अहहेत्याश्चर्ये । अत्रास्मिन् राजनि साकल्येनानुरज अनुरक्ता भव । 'अञ्जेश्च' इत्यनुनासिकलोपः । 'विपाशा तु विपाट् स्त्रियाम्' इत्यमरः ।' इति नैषधवृत्तौ ॥

श्लोकार्थ

शत्रुंजय पर्वत उपर, निर्गमनशील अने प्रसरती कांतिरूपी जल वडे जेनो मध्य भाग परिपूर्ण छे तेवां स्फटिक रत्नोनां क्रोडो शिखरो जोईने मुग्ध पुरुषे आ प्रमाणे विचार्युं! 'शुं दरेक शिखरो उपर नदीओ रहेली छे!' ॥ ७५ ॥

गुहागृहशयानानां खगसारङ्गचक्षुषाम् ।
राजीं जागरयन्तीव स्तनितैः स्तनयित्नवः ॥ ७६ ॥

यत्र पुण्डरीकपर्वते स्तनयित्नवो वारिवाहाः स्तनितैर्निजगर्जारवैः । 'जलदस्य तु । स्तनितं गर्जितं गर्जिः स्वनितं रसितानि च ॥' इति हैम्याम् । मेघगर्जाभिधानानि कृत्वा । उत्प्रेक्ष्यते—गुहाः शत्रुंजयकंदरा एव गृहा रमणीयत्वान्मणीगणसोद्योतत्वाच्चालयतुल्यास्तेषु शयनानां बहुदेवगृहगमनसंजातपरिश्रान्तिवशात्सुखसुप्तानां खगसारङ्गचक्षुषां विद्याधरहरिणीनयनानां खे नभसि गच्छन्तीति खगाः सुरास्तेषामपि मृगेक्षणानाम् । देवीनामित्यर्थः । राजीं श्रेणीं जागरयन्तीव पुनर्देववन्दनपूजनार्थं प्रबोधयन्तीव ॥

શ્લોકાર્થ

શત્રુંજયપર્વત ઉપર રહેલા મેઘો ગર્જનાથી, ગુફારૂપી ગૃહમાં આરામથી સૂતેલા વિદ્યાધર સ્ત્રીપુરુષોને ભગવંતનાં દર્શન માટે જાણે પ્રતિબોધ કરતો હતો અર્થાત જગાડતો હતો. ॥ ७६ ॥

स्वभक्तभव्यजन्तूनामन्तरङ्गविरोधिनाम् ।
योऽरुंतुदानां संदोहं स्पृहयन्हन्तुमात्मना ॥ ७७ ॥
नाराचोपचिता विश्वजैत्रीश्चापलता इव ।
भृङ्गालिसङ्गिनीर्धत्ते पद्मिनीः प्रतिपल्वलम् ॥ ७८ ॥

यः शत्रुंजयाद्रिः प्रतिपल्वलं पद्माकरं पद्माकरं प्रति भृङ्गाणां मधुकराणामालिभिः श्रेणीभिः सह सङ्गोऽनुषङ्ग आसक्तिरस्त्यासां तादृशीः पद्मिनीः कमलिनीः कमलानि वा धत्ते धारयति । उत्प्रेक्ष्यते—यः शैलः विश्वानां जगतां जैत्रीर्जयनशीलास्तथा नाराचै-र्लोहमयबाणैः सर्वायसशरैरुपचिताः संधानसहिताः लता धत्ते इव धारयतीव । किं कुर्वन् । हन्तुं निहन्तुं स्पृहयन् काङ्क्षन् । केन । आत्मना स्वयमेव स्वभक्तत्वप्रीत्या । कम् । संदोहम् । केषाम् । अन्तरङ्गा मध्ये वर्तमाना अष्ट कर्माण्येव अथ वा क्रोधमा-नमायालोभरागद्वेषाख्या एव विरोधिनः प्रतिपक्षास्तेषाम् । किंभूतानाम् । अरुंतुदानां मर्मव्यथकानाम् । केषाम् । स्वस्मिन् स्वस्य वा भक्ताः सेवासक्तास्तादृशा ये भव्याः सिद्धिगमनयोग्या जन्तवः प्राणिनस्तेषाम् ॥

શ્લોકાર્થ

શત્રુંજયપર્વતનાં દરેક સરોવર, ભ્રમરોના સંગવાળી કમલિનીઓને ધારણ કરતાં હતાં. જાણે પોતાના ભક્ત ભવ્યજીવોના કામ, ક્રોધ, માન, મદ, રાગ, દ્વેષ આદિ અંતરંગ શત્રુઓનાં મર્મસ્થાનોને હણવાને ઇચ્છતો શત્રુંજયપર્વત જાણે લોહમય બાણો-સહિત ત્રણે જગતને જીતવા માટે સમર્થ ધનુષ્યલતાને ધારણ કરતો ન હોય! ॥ ७७ ॥

स्वस्मिन्नम्बरचारिणां प्रतिपदं कृत्वैकतानं मनो
विद्याः साधयतां स्वपुण्यमिव यः सिद्धीर्विधत्ते धरः ।
यस्मिन्क्वापि च योगिनामहरहर्ज्योतिः परं ध्यायतां
हृत्पद्मे परमात्मना प्रकटितं पूष्णेव पूर्वाचले ॥७९॥

यो धरः शत्रुंजयाद्रिः । 'ग्रावापर्वतभूध्रभूधरधराः' इति हैम्याम् । एकतानमेकाग्रं विद्याध्यानलीनं मनो मानसं कृत्वा विधाय प्रतिपदं स्थाने स्थाने आत्मशिखरकंदरा-

शिलातलोद्यानकुण्डतटभूमिपीठेषु स्वस्मिन्नात्मनि विषये विद्या गोचरीप्रज्ञप्तिप्रमुखा विद्याधिष्ठायिका देवता मन्त्रान् साधयतामाराधानं कुर्वतामम्बरचारिणां विद्याधराणां सिद्धीः कार्यनिष्पत्तीर्विधत्ते कुरुते । विद्यादेवतास्तत्प्रत्यक्षीकरोतीत्यर्थः । किमिव । स्वपुण्यमिव । यथा निजप्राचीनसुकृतं सिद्धीर्दत्ते । च पुनर्यस्मिन्विमलाचले क्वापि प्रदेशे अहरहः प्रतिवासरम् । नित्यमित्यर्थः । परं परममुत्कृष्टं ज्योतिर्ब्रह्म परमेष्ठिलक्षणं ध्यायतां ध्यानगोचरीकुर्वतां योगिनां मनोवाक्काययोगवतामष्टाङ्गयोगभाजां वा योगीन्द्राणां हृत्पद्मे हृदयकमले परमात्मना ब्रह्मस्वरूपेण प्रकटितं प्रादुर्भूतम् । योगिनो हि ध्यानं कुर्वाणा हृदयकमलर्णिकायां परमात्मस्वरूपमालोक्य ध्यानाद्विरमन्तीति श्रुतिः । 'योगात्स चान्तः परमात्मसंज्ञं दृष्ट्वा परं ज्योतिरुपारराम' इति कुमारसंभवे । केनेव । पूष्णेव । यथा पूर्वाचले सहस्ररश्मिना प्रकटीभूयते ॥

श्लोकार्थ

સિદ્ધાચલ પોતાના સ્થાને સ્થાને એકાગ્રચિત્તે 'પ્રજ્ઞપ્તિ' આદિ વિદ્યાઓને સાધતા વિદ્યાધરોને, પોતાના પૂર્વોપાર્જિત પુન્યની જેમ વિદ્યાસિદ્ધિ કરી આપે છે, કોઈ સ્થાનમાં નિરંતર પરમાત્મસ્વરૂપનું ધ્યાન કરતા યોગીપુરુષોનાં હૃદયકમલમાં જ્યોતિર્મય પરમાત્મસ્વરૂપને પ્રગટ કરતો, પૂર્વાચલ ઉપર જેમ સૂર્ય પ્રગટ થાય તેમ યોગીપુરૂષના હૃદયમાં પરમાત્મસ્વરૂપ પ્રગટ કરતો હતો. ॥ ૭૯ ॥

तावल्लीलाविलासं कलयति मलयो विन्ध्यशैलोऽपि ताव-
 द्धत्ते मत्तेभगर्वं तुहिनधरणिभृत्तावदेवाभिरामः ।
तावन्मेरुर्महत्त्वं वहति हरगिरिर्गाहते तावदाभां
 यावत्तीर्थाधिराजो न नयनपुटैः पीयते पर्वतेन्द्रः ॥ ८० ॥

मलयो दक्षिणाचलः गोशीर्षचन्दनोत्पत्तिस्थानं मलयगिरिस्तावत्प्रमाणमस्येति समयप्रमाणं लीलया स्वरसेन स्थानवैशिष्ट्येन वा विलासं विभ्रमं कलयति बिभर्ति । अपि पुनर्विन्ध्यशैलो जलबालकाचलः मत्तेभानां मदोदयोद्धतानां मतङ्गजेन्द्राणां गर्वमहंकारं धत्ते धारयति । विन्ध्याद्रौ हि भद्रमन्दमृगमिश्रजातयो गजा उत्पद्यन्ते तदभिमानः । पुनस्तुहिनधरणिभृत् हिमाचलस्तावदेवाभिरामः कस्तूरिकामृगौषधीप्रस्थचमरगोप्रमुखैर्मनोज्ञः । तथा मेरुः सुपर्वपर्वतः तावन्महत्त्वं महिमानं गरिमाणं वहति । पुनर्हरगिरिः कैलाशस्तावन्तं कालमाभां शोभां गाहते आलम्बते यावत् यावता समयेन स त्रिभुवनप्रसिद्धः पर्वतेन्द्रः शत्रुंजयशैलाखण्डलः नयनपुटैः नेत्रपत्रामत्रैर्न पीयते सादरं स्वदृशा नावलोक्यते । किंभूतः । तीर्थानां पुण्यस्थानानां मोक्षगमनक्षेत्राणां वा अधिराजश्चक्रवर्ती तीर्थाधिराजः पर्वतेन्द्रः । 'श्रियः पदम्' इति शत्रुंजयमाहात्म्योक्ताभिधानत्वात् ॥

શ્લોકાર્થ

ત્યાં સુધી જ મલયગિરિ લીલાને ધારણ કરે છે, ત્યાં સુધી જ વિંધ્યાચલ મદોન્મત્ત હાથીઓના ગર્વને ધારણ કરે છે, ત્યાં સુધી જ હિમાલય મનોહરતાને વહન કરે છે, ત્યાં સુધી જ મેરૂપર્વત મહત્તાને ધારે છે અને ત્યાં સુધી જ કૈલાસ પર્વત કાન્તિને વહન કરે છે કે જ્યાં સુધી પુણ્યક્ષેત્ર તીર્થાધિરાજ શત્રુંજયપર્વતનું આદરપૂર્વક નેત્રપુર વડે પાન કર્યું નથી અર્થાત્ ગિરિરાજને નજરે જોયો નથી. ॥ ८० ॥

विविधकमलाकेलीगेहं क्षमाक्षणदापते-
गृहमिव महीकान्तारत्नावतंसमिवोन्नतम् ।
सफलमखिलं कर्तुं काङ्क्षञ्जनुर्गिरियात्रया
व्रतिवसुमतीशक्रः शत्रुंजयं स्वदृशा पपौ ॥ ८१ ॥

व्रतिनां संयमिनां मध्ये वसुमतीशक्रो राजा । 'राजा राट् पृथिवीशक्रः' इति हैम्याम् । हीरविजयसूरीश्वरः शत्रुंजयं विमलाचले स्वदृशा निजनयनेन पपौ सादरमवलोकयति स्म । प्राक् सर्गस्य तृतीये 'सिद्धिशैलं ददर्श' इत्युक्तमास्ते तत्र तु दूरत्वेन दक्मात्रावलोकनम् । इदानीं तु शनैः शनैः संनिधामागमनेन सम्यगवेक्षणत्वेन शिखरादिस्थानविशेषविभूषितं पुण्डरीकपर्वतं स्वलोचनाभ्यां सादरं दृष्टवानिति विशेषः । किं कर्तुमिच्छन् । शत्रुंजयशैलारोहणप्रासादप्रतिमादर्शनसर्वतः स्पर्शनादिभिरखिलमशेषमपि जनुर्जन्म स्वावतारं सफलं फलैर्महि कृतार्थं फलकलितं कर्तुं विधातुं काङ्क्षन् वाञ्छन् । किंभूतं शत्रुंजयम् । विविधानां कमलानां केलीगेहं क्रीडासदनम् । 'केलीभिरुद्भर कृशोदरि' इति नैषधे । किमिव । गृहमिव । यथा क्षमाक्षणदापतेर्वसुधासुधाकरस्य आसमुद्रान्तभूमीभर्तुर्भवनं भाण्डागारगेहमन्यद्वा सौधं विविधश्रीणां स्थानं भवेत् । शत्रुंजयमुत्प्रेक्षते-- महीकान्ताया भूमीभामिन्या रत्नावतंसं मणिमयशेखरमिव । किंभूतम् । उन्नतं तुङ्गम् ॥

શ્લોકાર્થ

રાજમંદિરની જેમ વિવિધ પ્રકારની લક્ષ્મીનું મંદિર અને પૃથ્વીરૂપી સ્ત્રીના મુગટ સમાન શત્રુંજયપર્વતની યાત્રા વડે પોતાનો જન્મ સફળ કરવા ઇચ્છતા મુનીન્દ્ર શ્રીહીરવિજયસૂરિએ પોતાની દૃષ્ટિ વડે શત્રુંજયપર્વતનું આદરપૂર્વક પાન કર્યું. ॥ ८१ ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलेनानन्दतो निर्मिते
वृत्ते पञ्चदशोऽत्र हीरचरिते सर्गो बभूवानसौ ॥ ८२ ॥

आनन्दतः सकलतीर्थाधिराजस्मरणवर्णनोद्भूतनूतप्रमोदाद्देवविमलेन निर्मिते विरचिते हीरस्य हीरविजयसूरेश्चरितं यत्पावारादिना सिद्धिगमनादिकं चरित्रं यत्र तादृशे वृत्ते हीरसौभाग्यनाम्नि महाकाव्ये असौ पूर्वोक्तलक्षणः पञ्चदशः पञ्चदशानां संख्यापूरणः अत्र हीरचरित्रे सर्गोऽधिकारविशेषः बभूवान संजातः ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यमहाकाव्यवृत्तौ गुर्जरदेशात्प्रस्थानशत्रुंजयसमीपागमनतद्दर्शनतद्वर्णनो नाम पञ्चदशः सर्गः ।

श्लोकार्थ

વણિક્કુલમાં ઇન્દ્રસમાન 'શિવ' નામના શ્રેષ્ઠી અને સૌભાગ્યદેવીનાં જન્મજાત સુપુત્ર દેવવિમલગણી, કે જેઓ નિરંતર સરસ્વતીદેવીની ઉપાસના કરવામાં તત્પર હતા, અને મુનીઓમાં સિંહસમાન સિંહવિમલગણીના પ્રથમ શિષ્યરૂપે પ્રસિદ્ધ હતા; તે દેવવિમલગણીએ જેમાં જગદ્ગુરુ શ્રીહીરવિજયસૂરિનું સવિસ્તાર જીવનચરિત્ર આવે છે; એવા **"હીરસૌભાગ્ય"** નામના મહાકાવ્યની સ્વોપજ્ઞટીકાસહિત રચના કરી; તે મહાકાવ્યનો ગુર્જરદેશના પ્રયાણથી શત્રુંજયદર્શન-પર્યંતનો આ પંદરમો સર્ગ સમાપ્ત થયો ॥ ८२ ॥

षोडशः सर्गः ।

समीपमुपजग्मिवानथ गिरीशितुः श्रीगुरुः
प्रभावमतिशायिनं त्रिभुवने समाकर्णयन् ।
सुरद्रुमसमुल्लसत्कनककान्तकायद्युति-
र्लघूकृततनुः समीक्षितुमिवोत्सुकः स्वर्गिरिः ॥ १ ॥

अथ दर्शनसम्यगवलोकनानन्तरं श्रीगुरुः हीरविजयसूरिर्गिरीशितुः शत्रुंजयशैलशक्रस्य समीपं पार्श्वमुपजग्मिवान् समाजगाम । समस्त्यर्थे द्वितीया । उत्प्रेक्ष्यते—समीक्षितुं सम्यक्षितुं सम्यक्तया विलोकयितुमुत्सुक उत्कण्ठितः स्वर्गिरिर्मेरुरिव समीपे समेतः । किं कुर्वन् । त्रिभुवने त्रैलोक्येऽपि अतिशायिनमत्यभ्यधिकं प्रभावमर्थाद्विमलाद्रेर्माहात्म्यं समाकर्णयन् सम्यगेकाग्रमनसा शृण्वन् । महिमानं श्रुत्वा तं द्रष्टुमागत इत्यर्थः । किंभूतः श्रीगुरुः स्वर्गिरिश्च । सुरद्रुमाः पञ्चापि कल्पवृक्षाः तद्वद्दातृतया निरुपमरूपवत्तया च तैश्च समुल्लसन्दीप्यमानः । तथा कनकं सुवर्णं तद्वद्वा तेन च कान्ता मनोज्ञा कायस्य शरीरस्य द्युतिर्यस्य । पश्चात्कर्मधारयः । किंभूतः स्वर्गिरिः लघूकृता स्वल्पा विहिता तनूः शरीरं येनः ॥

શ્લોકાર્થ

ત્રણે ભુવનમાં સર્વોત્કૃષ્ટ શત્રુંજયનું માહાત્મ્ય વિચારતા જગદ્ગુરુ શ્રીહીરવિજયસૂરિ શત્રુંજયની સમીપે પધાર્યા. તે જાણે કલ્પવૃક્ષો વડે સ્ફુરાયમાન અને સુવર્ણમયદેહાકાંતિ-વાળો સાક્ષાત્ મેરૂપર્વત પોતાનું શરીર સંકોચીને શત્રુંજયપર્વતને જોવા માટે આવેલો ન હોય ! ॥ ૧ ॥

तदद्रितलहट्टिकाप्रथितपादलिप्ताभिधं
पपौ पुरमपश्रमः श्रमणशर्वरीवल्लभः ।
उपेतमिह पूर्ववत्पुनरुपान्तमानन्दयु-
क्पुरं प्रथमहार्दतः किमतिदूरभावं त्यजन् ॥ २ ॥

श्रमणशर्वरीवल्लभः तस्य शत्रुंजयनाम्नोऽद्रेः पर्वतस्य तलहट्टिका परिसरभूमिः 'तलहटी' इति प्रसिद्धा तस्यां प्रथितं भुवि विख्यातं तथा पादलिप्तमित्यभिधा नाम यस्य तादृशं पुरं नगरं 'पालीताणुं' इति लोके प्रसिद्धं पपौ सादरमवलोकितवान् । मार्गश्रान्तस्य नगरस्य प्रमोदकृदित्यादरपूर्वकप्रेक्षणम् । अत एव सूरिः किंभूतः । अपगतः श्रमो मार्गप्रयासखेदो यस्य सोऽपश्रमः । उत्प्रेक्ष्यते—इह तलहट्टिकायां पूर्ववत्प्रथममिव पुनर्व्याघुट्य द्वितीयवारम् । पूर्वं भरतचक्रिणा शत्रुंजयदर्शनादानन्दसमुत्पादात्तलहट्टिकायां वासितमासीत्, बहुकाला-तिक्रमवशात्कालानुभावेन च गिरिघटनात्तदतिदूरीभूतम् । अत एव प्रथमहार्दतः पूर्वस्नेहा-दुपान्ते शत्रुंजयसमीपे उपेतमागतमानन्देन युनक्तीत्यानन्दयुक् तादृशं पुरम् । आनन्दपुर मित्यर्थः । तदायातमिव । किं कुर्वत् । अतिदूरभावमतिशयेनात्यन्तं विप्रकृष्टतां त्यजन् मुञ्चन् ।

શ્લોકાર્થ

શ્રમરહિત જગદ્ગુરુ શ્રીહીરવિજયસૂરિએ શત્રુંજયની તલાટીમાં પ્રસિદ્ધ એવું 'પાદ-લિપ્તપુર' (પાલીતાણા) નામનું નગર જોયું. પૂર્વકાળમાં ભરતચક્રવર્તીએ શત્રુંજયનાં દર્શનથીઉત્પન્ન થયેલા આનંદથી તલાટીમાં 'આનંદપુર' નામનું નગર વસાવ્યું હતું; પરંતુ કાળક્રમે પર્વતના ઘટવાથી અતિદૂર થઈ ગયેલું આનંદપુર જાણે પૂર્વના સ્નેહથી પુનઃ શત્રુંજયની સમીપે આવેલું ન હોય ! તેવું પાદલિપ્તપુર શોભતું હતું. ॥ ૨ ॥

नभोगमनभेषजव्रजविधेरनुग्राहिणा
गुरोरभिधया पुरं गृहमिव त्रिलोकीश्रियाम् ।
सुवर्णरससिद्धिमान्विविधसिद्धविद्यान्वितः
स्म वासयति संनिधौ नगवरस्य नागार्जुनः ॥ ३ ॥

नागार्जुनो नाम योगीन्द्रः पादलिप्तसूरेरमिधया नाम्ना नागेषु सर्वपर्वतेषु वरः सिद्धिदायकत्वात्प्रधानः शत्रुंजयशैलेन्द्रस्य संनिधौ समीपे पुरं पादलिप्तनगरं वासयति स्म निवेशितवान् । उत्प्रेक्ष्यते—त्रिलोकीश्रियां त्रैलोक्यलक्ष्मीणां गृहं निवाससौधमिव । गुरोः किंभूतस्य । नभसि आकाशे गम्यते पादलेपप्रभावाद्भ्रम्यते अनेनेति नभोगमनं भेषजानां सप्रभावाणां औषधानां व्रजः अष्टोत्तरशतसंख्यः सतृहास्तस्य विधेः प्रकारस्तानुगृह्णाति स्वभक्तिभवनात्प्रसादं करोतीत्येवंशीलस्य। किंभूतो नागार्जुनः । सुवर्णस्य सार्धषोडशवर्णिकाभाजो हेम्नः कोटीवेधीति नाम्नो रसस्य जलरूपस्य सर्वधातुभेत्तुः सिद्धिर्निष्पादनं विद्यते अस्येति सुवर्णरससिद्धिमान् । नवीनं सुवर्णरसं स्वयं निष्पादयतीत्यर्थः । पुनः किंविशिष्टः । वितिधा नानाप्रकाराः सिद्धाः परिपाकं प्राप्ताः कार्यकारिणः । अथ वा प्रत्यक्षीभूततदधिष्ठायकदेवतास्तादृश्यो विद्या आम्नायमन्त्रास्ताभिरन्वितः । नागार्जुनयोगी श्रावकीभूय श्रीपादलिप्तसूरीशितुः सकाशात् गगनगमनदायकभेषजाम्नायमग्रहीदिति श्रूयते ॥

શ્લોકાર્થ

સાડાસોળ પ્રકારના વર્ણથી યુકત એવા સુવર્ણરસ (કોટીવેધીરસ) ની સિદ્ધિ કરનાર, તેમજ જેને અનેક પ્રકારની વિદ્યાઓ સિદ્ધ છે તેવા નાગાર્જુન યોગીએ, એકસો આઠ ઔષધીઓના પ્રભાવના જ્ઞાતા એવા પોતાના ગુરૂ પાદલિપ્તસૂરિના (ઔષધીઓના પગે લેપ કરીને તેના પ્રભાવથી આકાશ માર્ગે હંમેશા પાંચ તીર્થોની યાત્રા કરવાથી "પાદલિપ્તસૂરી" નામથી પ્રસિદ્ધ) નામથી સર્વપર્વતોમાં શ્રેષ્ઠ એવા શત્રુંજયપર્વતની પાસે પાદલિપ્ત નામનું નગર વસાવ્યું હતું; તે જાણે ત્રણે લોકની લક્ષ્મીનું ગૃહ ન હોય! તેવું શોભતું હતું. ॥ ૩ ॥

यदीयविभवैर्जगत्त्रयपुरीतराजापुकैः
पुरी त्रिदिवसद्मनां परिभवं मराम्लम्भिता ।
उपास्तिमतनोन्निजाश्रयसपस्त्रिलोकीसृजः
सरोजवसतेरिवाकलयितुं स्वयं तन्नीलाम् ॥ ४ ॥

त्रिदिवसद्मनां देवानां पुरी नगरी अमरावती नाम्नी निजमात्मैवाश्रयं स्नानं जुषते भजते स्वस्याश्रये स्थानं सेवते वा तादृशस्य सरोजवसतेः । 'तात्म्यस्तामरसान्तरालवसतिर्देवः स्वयंभूरभूत्' इति खण्डप्रशस्तौ । तथा 'नाभिपद्मात्मभूतिः' इति हैम्याम् । ब्रह्मणः । उत्प्रेक्ष्यते—उपास्ति सेवामतनोत्चकारेव । किंभूतस्य सरोजवसतेः । त्रिलोकीसृजः जगतां त्रयीं सृजति करोतीति । किं कर्तुम् । स्वयमात्मना तस्य पादलिप्तपुरस्य तुलां साम्यमाकलयितुं प्राप्तुम् । किंभूता अमरावती । जगतां पातालभूमिस्वर्गाणां त्रयस्य । त्रिभुवनस्येत्यर्थः। पुरीणां समग्रसुरासुरनरनगरीणां पराभावुकैरभिभवनशीलैर्यदीयैः पादलिप्तपुरसंबन्धिभिर्विभवैः शोभातिशयैर्भरादाधिक्यात्परिभवमभिभूतिं लम्भिता प्रापिता ॥

શ્લોકાર્થ

ત્રણે જગતની નગરીઓના વૈભવને જીતનારા પાદલિપ્તપુરના વૈભવથી પરાભવ પામેલી સ્વર્ગપુરી અમરાવતી, જગતના સ્રષ્ટા, બ્રહ્મા પાસે પાદલિપ્તપુરીની તુલના પ્રાપ્ત કરવા માટે જાણે સ્વયં આવીને શત્રુંજયની ઉપાસના કરતી ન હોય! ॥ ૪ ॥

सुरादिपरिवारिता किममरावती स्वर्गतः
क्षितौ किमुपजग्मुषी विमलशैलयात्राकृते ।
द्विजिह्वनिचिताश्रयं किमु विहाय गेहं बले-
रुतागतिमिह श्रिया स्फुरति पादलिप्तं पुरम् ॥ ५ ॥

इह शत्रुंजयशैलतलहट्टिकायां पादलिप्तं पादलीताणाभिधानं पुरं श्रिया शोभया लक्ष्म्या वा स्फुरति दीप्यते । अत्प्रेक्ष्यते—विमलशैलस्य पुण्डरीकाद्रेर्यात्राकृते स्पर्शन-देवदर्शनपूजनाद्यर्थं स्वर्गतो देवलोकात्क्षितौ पृथिव्यामर्थाद्विमलाचलसंनिधौ सम्यक्प्रकारेण महर्ध्या उपजग्मुषी समागता किममरावती इन्द्रनगरीव । किंभूता । सुरा देवाः । आदि-शब्दाद्देव्यः इन्द्राण्यः मन्दिराणि कोट्टवाप्यः वनानि सरांसि पुरीपरिकरादि सर्वमपि संगृह्यते । सुरादिभिः परिवारः संजातोऽस्या इति परिवारिता परिच्छदकलिता । उताथ वा इह गिरेरुपान्ते आगतं संप्राप्तं बलेर्गेहमिव नागलोक इव । किं कृत्वा । द्विजिह्वैः भुजंगमैः पिशुनैर्वा निचितं व्याप्तमाश्रय स्वस्थानं विहाय त्यक्त्वा । यदुक्तम्—'शृङ्गिणं दशभिर्हस्तैः शतहस्तैर्यं त्यजेत् । गजं हस्तसहस्रेण देशत्यागेन दुर्जनम् ॥' इति ॥

શ્લોકાર્થ

શત્રુંજયપર્વતની તલાટીમાં પાલીતાણા નામનું નગર શોભે છે; તે જાણે વિમલગિરીની યાત્રા કરવા માટે સ્વર્ગમાંથી પૃથ્વી ઉપર આવેલી દેવનગરી અમરાવતી ન હોય! અથવા દ્વિજીહ્વ (નાગ) વડે વ્યાપ્ત પોતાનું આશ્રયસ્થાન ત્યજીને પાતાળ નગરીએ શત્રુંજયની તલાટીમાં વાસ કર્યો ન હોય! (કહ્યું છે કે: શિંગડાવાળાં પશુઓથી દશ હાથ, હાથીથી હજાર હાથ દૂર રહેવું અને દ્વિજીહ્વ (દુર્જન) થી બચવા દેશનો ત્યાગ કરવો. ॥ ૫ ॥

भवाहितभिदोदयत्परमसातमाशंसतां
पुरी निजनिवासिनामसुमतां समूहानसौ ।
महोदयमहापुरं विमलशैलमूलाध्वन
निनीषुरमुना किमु स्थितवती समेत्यान्तिके ॥ ६ ॥

असौ पादलिप्ताभिधाना नगरी अन्तिके शत्रुंजयांद्रिसमीपे समेत्यागत्य स्थितवती उवास स्थितिं कृतवती । उत्प्रेक्ष्यते—निजनिवासिनां स्वस्यां नितरां सातेन वसनाशीलानाम् । 'निजनिषेविनाम्' इति पाठे तु निजमात्मानं नितरामतिशयेन सेवन्ते इत्येवंशीलानामसुमतां प्राणिनां समूहान् गणान् अमुना प्रत्यक्षलक्ष्येण विमलशैलरूपो यो मूलः अध्वरोऽध्वा मार्गस्तेन कृत्यः महोदयो मोक्षः अथ वा महानतिशायी उदयः मानससमीहितं सर्वसंपत्प्राप्तिर्यसत् तादृशं महापुरमनन्तसुखविधायकत्वात्सर्वनगराभ्यधिकपतनं किमु निनीषुर्नेतुमिच्छुरिव । असुमतां किं कुर्वताम् । भवः संसारः स एवाहितः शत्रुर्न विद्यते हितं शुभोदर्को यस्मात्सोऽहितः केवलानिष्टरायतिफलप्रदस्तस्य भिदा व्यापादनं तया कृत्वा उदयप्रकटीभवत्परममुत्कृष्टं सातं शर्म आशंसतां काङ्क्षताम् ॥

श्लोकार्थ

શત્રુંજયની પાસે રહેલી પાદલિપ્તપુરી, જાણે સંસારરૂપી શત્રુનો નાશ કરવાથી પ્રાપ્ત થતાં પરમસુખની ઇચ્છાવાળા સ્વનગરનિવાસી જીવોના સમૂહને વિમલગિરીરૂપ શ્રેષ્ઠમાર્ગ દ્વારા મોક્ષપુરી તરફ લઈ જવા ઇચ્છતી ન હોય! તેવી શોભે છે. ॥ ૬ ॥

विजित्य निजवैभवैः सुरनरोरगस्वामिनां
स्फुरत्पुरपरम्परा जगति पादलिप्तं वरं
परश्शतजिनेश्वराश्रयशिखाङ्गणालिङ्गिनी-
द्विषद्विजयोधिकां व्यधृत वैजयन्तीरिव ॥ ७ ॥

पादलिप्तं पुरं नाम नगरं द्विषतां श्रिया कृत्वा स्वप्रतिमल्लानां विजयस्य पराभवस्य बोधिकां कथयित्रीम् । 'निजत्रिनेत्रावतरत्त्वबोधिकाम्' इति नैषधे । उत्प्रेक्ष्यते—वैजयन्तीर्महापताका व्यधृत धारयति स्मेव । किंभूता वैजयन्तीः । परश्शताः शतसहस्रसंख्याकाः ये जिनेश्वराणां तीर्थंकराणामाश्रया गेहाः । प्रासादा इत्यर्थः । तेषां शिखाङ्गणानि शृङ्गाजिराणि आलिङ्गन्त्याश्लिष्यन्तीत्येवंशीलाः । किं कृत्वा व्यधृत । जगति त्रैलोक्येऽपि सुरा देवाः नरा मानवा उरगा असुरनागास्तेषां स्वामिनां नायकानां सुरेन्द्रनरेन्द्रनागेन्द्राणां स्फुरतां लक्ष्म्या दीप्यमानानां पुराणां नगराणां परम्पराः श्रेणीर्निजवैभवैः स्वकीयसमृद्धिशोभातिशयैर्विजित्य परिभूय ॥

श्लोकार्थ

જગતમાં શ્રેષ્ઠ એવી પાદલિપ્તપુરીના હજારો જિનપ્રસાદોનાં શિખરો ઉપર રહેલી ધ્વજાઓ જાણે સુર અસુર અને માનવોના સ્વામીઓની અનેક નગરીઓ જીતીને શત્રુઓ પર વિજય મેળવ્યાનો સંદેશ આપનારી વૈજયન્તી ન હોય? તેવી ધ્વજાઓ શોભે છે. ॥ ૭ ॥

नृशंसनिकषात्मजव्रजनिवासतो बिभ्यती
पयःप्रकटसंकटाज्जलधिजाच्च निर्वेदभाक् ।
अपास्य पदमात्मनः किमियमत्र लङ्कागता
पुरी पुरजनोत्सवैरलमयारि सूरीन्दुना ॥ ८ ॥

सूरीन्दुना हीरविजयसूरिचन्द्रेण पुरजनानां नगरलोकानामुत्सवैर्महामहैर्जायमानैः सद्भिः पुरी पादलिप्तनाम्नी नगरी अलमकारि भूष्यते स्म । उत्प्रेक्ष्यते—अत्र शत्रुंजयसमीपे तलहट्टिकाप्रदेशे आगता समागता लङ्का दशकंधरनगरीव । किं कृत्वा । आत्मनः स्वस्या पदं जलधिमध्यगतं स्थानमपास्य त्यक्त्वा । किंभूता । नृशंसानां निर्दयानां निकषात्मजानां राक्षसानाम् । 'कीनाशरक्षोनिकषात्मजाश्च' इति हैम्याम् । व्रजानां कुलकलापानां निवासतोऽनिशं स्वस्यां निवसनं ततो बिभ्यती भीतिं प्राप्नुवती । च पुनः किंभूता । निर्वेदभाक् खेदोपगता । कस्मात् । जलधिजात्समुद्रोत्पन्नात् । परिखास्थाने परितः पयोधिमध्ये लङ्का तादृग्जलमध्यस्थितिलक्षणात्पयसां पानीयानां प्रकटादुल्बणात्संकटात्क्लेशात् । 'स्थानं त्रिकूटः परिखा समुद्रो रक्षांसि योधा धनदाश्च वित्तम् । संजीविनी यस्य मुखे च विद्या स रावणोदैववशाद्विनष्टः ॥' इत्युक्तेः ॥ इति पादलिप्तपुरम् ॥

શ્લોકાર્થ

શ્રી હીરવિજયસૂરિજીએ નગરજનો દ્વારા કરાયેલા મહોત્સવપૂર્વક પાદલિપ્તપુરીને અલંકૃત કરી. ક્રૂર રાક્ષસોનો પોતાનામાં વાસ હોવાથી ભય પામેલી અને સમુદ્રમાંથી ઉત્પન્ન થયેલી હોવાથી જલસંકટથી નિર્વેદ પામેલી લંકાપુરી, પોતાના સ્થાનનો ત્યાગ કરીને જાણે અહીં પાદલિપ્તનગરી રૂપે આવીને રહી ન હોય, તેવી શોભે છે. ॥ ૮ ॥

अशेषविषयान्तराद्व्यतिकरेऽत्र संघाधिपाः
समं मनुजराजिभिर्जयिमहीमहेन्द्रा इव ।
भगीरथगिरीश्वरं प्रति शताङ्गमातङ्गयु-
क्तुरङ्गशिबिकासुखप्रमुखयानभाजोऽव्रजन् ॥ ९ ॥

अत्र व्यतिकरे पादलिप्तपुरे सूरिसमागमनप्रस्तावे अशेषविषयान्तरात्समस्तजनपदमध्यात्संघाधिपाः संघपतयः मनुजानां मनुष्याणां राजिभिः श्रेणिभिः समं भगीरथगिरीश्वरं विमलाचलेन्द्रं प्रति अव्रजन प्रतिष्ठन्ते स्म । 'बाहुबलिर्मरुदेवो भगीरथः सहस्रपत्रशतपत्रः' इति शत्रुंजयकल्पे । के इव । जयिनो विजयकरणशीला महीमहेन्द्रा महामण्डलीकमहीपाला इव । तेऽपि मानवमण्डलीभिः प्रतिष्ठन्ते । अर्थात् दिग्विजयाय । किंभूताः संघाधिपाः नृपाश्च । शताङ्गा रथा मातङ्गा हस्तिनः तैर्युञ्जन्ति युक्ता भवन्ति ।

तत्सहिता इत्यर्थः । तुरङ्गा अश्वास्तथा शिबिका याप्ययानानि 'पालखी' इति प्रसिद्धाः मुखानि येषु तादृशानि प्रकृष्टानि यानानि वाहनानि भजन्ते संश्रयन्ते इति ॥

શ્લોકાર્થ

આચાર્યદેવના, નગરીમાં પ્રવેશમહોત્સવ સમયે હાથી, ઘોડા, રથ અને શિબિકાઓ આદિ વાહનોનો આશ્રય કરી રહેલા માનવમહેરામણુ સાથે દેશદેશના સંઘપતિઓ વિજયી રાજાની જેમ વિમલાચલ તરફ પ્રયાણુ કરતા હતા. ॥ ૯ ॥

अगाधभववारिधेरभिलषद्भिरेतुं बहिः
　समुद्धरणधुर्यतां प्रदधदन्तरीपं किमु ।
व्रजद्भिरिह यात्रिकैः प्रति सहस्रपात्राचलं
　तदा विदधिरेऽखिला अपि निजावशेषा दिशः ॥ १० ॥

तदा हीरविजयसूरियात्रासमये इह जगति सहस्रपत्राचलं शत्रुंजयशैलोच्चयं प्रति व्रजद्भिः प्रतिष्ठमानैर्यात्रिकैर्यात्राकारकैर्लोकैरखिलाः समस्ता अपि दिशः हरितः निज आत्मा एव अवशेषोऽवशिष्टो यासां तादृश्यो विदधिरे विहिताः । दिशः केवलं स्वयमेव स्थिताः, जनास्तु सर्वेऽपि प्रस्थिता इत्यर्थः । यात्रिकैः किं कुर्वद्भिः । अगाधोऽलब्धमध्यपूर्वपरपारो यो भवः संसारः स एव वारिधिः समुद्रस्तस्माद्बहिः पारे मोक्षलक्षणे बाह्यप्रदेशे एतुमागन्तुमभिलषद्भिर्वाञ्छद्भिः । अत एवोत्प्रेक्ष्यते—समुद्धरणे भवसमुद्रमध्ये मज्जतां जन्तुनां सम्यगुद्धारकरणे धुर्यतां प्रकृष्टधौरेयतां प्रदधत् प्रकर्षेण धारयत् । अत एवान्तरीपं किमु अन्तर्जले तटमिव ॥

શ્લોકાર્થ

હીરવિજયસૂરીજીની યાત્રાના સમયે, સંસાર રૂપ અગાધ સમુદ્રમાંથી પાર પામવાને ઇચ્છતા વિમલાચલના યાત્રિકો વડે સમસ્ત દિશાઓ દિશામાત્ર બની ગઈ. ખરેખર, શત્રુંજયપર્વત સંસારરૂપી સમુદ્રમાં ડૂબતા જીવોનો ઉદ્ધાર કરવા માટે અંતર્દ્વીપ સમાન છે. ॥ ૧૦ ॥

महोदयवर्धायिना विमलभूभृताहूतव-
　त्स कोऽप्यजनि नो जनोऽगमि न येन यात्राकृते ।
न काचिदचलाभवत्पथि च या न तद्यात्रिकै-
　रनीयत पवित्रतां त्रिपथगाप्रवाहैरिव ॥ ११ ॥

स कोऽपि तत्तदुत्तमजातिजनितः कश्चिदनिर्दिष्टनामा जनो लोको नाजनि नो संजातः । स कः । येन जनेन यात्राकृते शत्रुंजययात्रार्थं नागमि नागतम् । किंवत् । विमलभूभृता शत्रुंजयशैलेनाहूतवदाकारितेनेव । 'निहोत्रो' इति लोकप्रसिद्धया । यथा कश्चित्संमानपूर्वककमाकारित आगच्छति । किंभूतेन विमलाद्रिणा । महोदयो मोक्षः महान् त्रिभुवनजनतानिषेव्यलक्षणोऽभ्युदयस्तं विदधाति करोतीत्येवंशीलेन च पुनः सा काचिदचला पृथिवी नाभवन्न बभूव । याचला पथि मार्गे तयात्रिकैः शत्रुंजययात्राकारकैः पवित्रतां पावनीभावं नानीयत न प्रापिता । कैरिव । त्रिपथगाप्रवाहैरिव । यथा गङ्गाया ओघैः सहस्रसंख्याभिर्वेणिभिः पयःपूरैः पवित्रतां नीयते प्राप्यते ॥

શ્લોકાર્થ

મોક્ષને પ્રાપ્ત કરી આપનાર એવા વિમલાચલ વડે જાણે બોલાવાયેલો ન હોય તેવો કોઈ પણ માણસ નહીં હોય કે જે વિમલાચલની યાત્રાર્થે આવ્યો ન હોય ! એવી કોઈ પૃથ્વી નહીં હોય કે જે ગંગાના પ્રવાહની જેમ યાત્રિકો વડે પવિત્ર કરાઈ ન હોય ! ॥ ૧૧ ॥

शिवश्रिय इवावनीवलयशालिलीलाचलं
जनैः प्रचलितैः समं परिजनेन शत्रुंजयम् ।
स्ववर्तिविविधासुमत्प्रकरकीलनाविश्रमा-
दधुः सुखमिहाखिला अपि दिशां प्रदेशास्तदा ॥ १२ ॥

तदा तस्मिन् संघप्रस्थानावसरे इह जगति अखिलाः समस्ता अपि दिशां हरितां प्रदेशाः भूमिभागाः सुखं शर्मातिशयं दधुर्धृतवन्तः । कुतः । स्वस्मिन्नात्मनि विषये वर्तन्ते तिष्ठन्तीत्येवंशीलास्तथाविधा अनेकजातीया ये असुमन्तः । प्राणिनः जनाः सस्वजनगजवाजिकरभमहिषवृषभप्रमुखास्तेषां प्रकराः समुदायास्तैः कृत्वा कीलनास्ताडनाः पीडाः ताभ्यो विश्रमः क्षणमात्रं स्वस्थीभवनं ताडनान्निरमणं तस्मात्सकाशात्कैर्विश्रमः शत्रुंजयाचलं प्रति परिजनेन स्वस्वसमस्तपरिवारेण समं प्रचलितैः प्रस्थितैर्जनैः धार्मिकलोकैः । उत्प्रेक्षते—शत्रुंजयम् । शिवश्रियो मोक्षलक्ष्म्या अवनीवलये भूमीमण्डले शालते शोभते इत्येवंशीलं लीलाचलं क्रीडाकरणार्थं पर्वतमिव ॥

શ્લોકાર્થ

પોતાના પ્રદેશમાં રહેલા અનેક જાતનાં પ્રાણીઓના સમૂહથી ક્ષણમાત્ર જ વિશ્રામ પામતા એવા સર્વે દિશાઓના પ્રદેશો, શત્રુંજય તરફ પ્રયાણ કરી રહેલા માનવો વડે સંતોષ અનુભવતા હતા. ખરેખર શત્રુંજય પર્વત મોક્ષરૂપી લક્ષ્મીને ક્રીડા કરવા માટેનો આ ક્રીડાપર્વત ન હોય ! તેવો શોભે છે. ॥ ૧૨ ॥

महेन्द्रमिहिराङ्गजाम्बुनिधिधामपौलस्त्यदि-
क्पथेषु पृथु पप्रथे प्रथितजन्तुसार्थैस्तथा ।
तिलैर्न जगतीतलं क्वचिदलम्भि कीर्णैर्यथा-
वसानमिव मानसैर्जनमनोरथस्फूर्जितैः ॥ १३ ॥

प्रथितैः सकर्तव्यैः सद्गुणैर्वा जगति विख्यातिमद्भिर्जन्तूनां भविकप्राणिनां सार्थैः । संघसार्थौ तु देहिनाम्' इति हैम्याम् । वृन्दैः 'पान्थसार्थैः' इति पाठे तु पान्थाः विमलगिरिमार्ग प्रति स्थायुकास्तेषां प्रकरैरिति । महेन्द्रः शक्रः मिहिरः सूर्यः तस्याङ्गजो नन्दनो यमस्तथाम्बुनिधिधामा वरुणस्तथा पौलस्त्यो धनदस्तेषां दिशो हरितः पूर्वा, पश्चिमा, दक्षिणा, उत्तरा, तासां पथेषु मार्गेषु पृथु विस्तीर्णं विपुलं यथा स्यात्तथा तेन प्रकारेणातिबाहुल्येन पप्रथे विस्तृतम् । यथा येन प्रकारेण विकीर्णैर्विक्षिप्तैस्तिलैः स्नेहधारिधान्यविशेषैः क्वचित्कुत्रापि स्थाने जगतीतलं भूमण्डलं नालम्भि न प्राप्तम् भूमेरुत्सङ्गो न लेभे जनमस्तकेष्वेवातिष्ठत । विक्षिप्तास्तिलाः क्षितौ नापतन्नित्यर्थः । किमिव । अवसानमिव । यथा मानसैर्मनःसंबन्धिभिर्जनानां मनोरथानामभिलाषाणां स्फूर्जितैर्विलसितैरवसानं प्रान्तो न प्राप्यते संसारिणां प्राणिनामवसानमेव नास्ति । 'इच्छा हु आगाससमा अनन्तया' इत्युत्तराध्ययनोक्तेः ॥

શ્લોકાર્થ

ઇન્દ્રની દિશા પૂર્વ, પશ્ચિમ, યમની દક્ષિણ અને કુબેરની ઉત્તર એમ ચારે દિશાઓના માર્ગો શત્રુંજયના યાત્રિકોથી વ્યાપ્ત બની ગયા. જેમ અદ્ધરથી નાખેલા તલ અદ્ધર ને અદ્ધર રહે પરંતુ પૃથ્વી પર દેખાતા નથી તેમ અસંખ્ય યાત્રિકોથી દિગ્માર્ગ દેખાતા ન હતા. અર્થાત્ જેમ મનુષ્યોની ઇચ્છાનો અંત નથી તેમ યાત્રિકોની સંખ્યાનો અંત ન હતો. ॥ ૧૩ ॥

चलत्सु विमलाचलं निखिलयात्रिकेष्वोजसा
पुरस्त्वरितमैयरुः क्वचन केचिदुत्कण्ठिताः ।
गृहीतुमनसः शिवश्रियमिवागमेनाग्रतः
स्वयं प्रथमतः परेष्विव धनार्थिनोऽर्थप्रथाम् ॥ १४ ॥

क्वचन कुत्रचित्स्थाने उत्कण्ठिताः श्रीशत्रुंजययात्राजिनदर्शनोत्सुकितचेतसः केचन पुरुषा ओजसा बलेन कृत्वा त्वरितं शीघ्रं पुरः संघजनाग्रे केषांचिज्जनानामपेक्षया वा `ययुः आगताः । केषु सत्सु । क्रमादनुक्रमेण श्रेण्यादिपरिपाट्या निखिलेषु सर्वेषु या-

त्रिकेषु जनेषु विमलाचलं शत्रुंजयशैलं प्रति चलत्सु प्रतिष्ठमानेषु सत्सु । उत्प्रेक्ष्यते— अग्रतः पुरस्तादागमेन आगमने कृत्वा प्रथमतः पूर्वमेव स्वयमात्मना शिवश्रियं मुक्तिलक्ष्मी गृहीतुमनसः आदातुकामा इव । के इव । धनार्थिन इव । परेषु अन्येषु द्रव्याभिलाषिषु विगतो मलः किट्टो रत्नोत्पत्त्या यस्मात्तादृशमचलम् । रोहणाद्रिमित्यर्थः । परदेशं वा प्रति व्रजत्सु अत्यौत्सुक्यादतिशायितृष्णाभाजो धनार्थिनः बहुलाभाभिलाषिणः अतिधनलुब्धाः निःप्रत्यूहमाजन्मसुखकारकत्वेन शिवश्रियं कल्याणकृद्रत्नादिभसंपदं गृहीतुकामा अग्रे गच्छन्ति ॥

श्लोकार्थ

યાત્રા કરવા માટે ઉત્સુક અનેક યાત્રિકો બીજા બધા યાત્રિકોથી જલ્દી જલ્દી ચાલતા આગળ ને આગળ જતા હતા. જેમ ધનલોલુપ્ત પુરુષો ધનપ્રાપ્તિ માટે પરદેશ જતા ધનાર્થી સાથે ને સાથે આગળ જાય તેમ મોક્ષરૂપી લક્ષ્મી ગ્રહણ કરવાની ઇચ્છાથી જાણે યાત્રિકો આગળ ચાલતા હતા. ॥ ૧૪ ॥

पुरःप्रचलितैर्जनैर्घननिरुद्धवर्त्मान्तरः
पुनः प्रणुदितस्तमां द्रुतमुपेत्य पश्चात्तनैः ।
अमन्यत तदा हृदा क्वचन यात्रिकैः स्वं भ्रम-
द्धरट्टघटितं क्षणं कणमिवातिसंघट्टितः ॥ १५ ॥

तदा संघप्रस्थानसमये क्वचन कुत्रचित्स्थानके कश्चिद्यात्रिकजनो भ्रमति भ्रमणीं कुर्वाणे घरट्टके कणचूर्णीकरणोपवृत्तपाषाणयुगलरूपे घटितं योजितं तदन्तर्निक्षिप्तं कणं धान्यमिव क्षणं निमेषमात्रं हृदा स्वमनसा स्वमात्मानममन्यत जानाति स्म । किंभूतो यात्रिकः । अत्यधिकं संघट्टितः बहुजनसंमर्देन पश्चादागच्छद्भिः पुरश्चलद्भिश्च जनैरतिसंकीर्णतया निष्पीडितः । अत एव पुनः किंभूतः । पुरोऽग्रे प्रचलितैः क्रमाक्रमाभ्यां प्रस्थितैर्जनैर्लोकैर्घनं बहु निबिडं वा नीरन्ध्रमन्तरालरहितं वा निरुद्धमतिसंकीर्णतया कथमप्यग्रे गन्तुमशक्तीकृतं पुरस्तात्प्रचलल्लोकमध्ये प्रवेष्टुमशक्यं कृतं वर्त्मनो मार्गस्य अन्तरं मध्यं यस्य वर्त्मान्तरः अपरमार्गो वा यस्य सः । पुनः किंभूतैः । पश्चात्तनैः पृष्ठे समागतैर्जनैर्द्रुतं शीघ्रमुपेत्यागत्य तमामतिशयेन प्रणुदितः अग्रे गमनाय प्रेरितः वाक्शरीरादिभिस्त्वरितीकृतः ॥

श्लोकार्थ

આગળ ચાલતા ઘણા યાત્રિકો વડે માર્ગ રોકાઈ જવાથી અને પાછળ ચાલતા યાત્રિકો દ્વારા આગળ ચાલવા માટે વારંવાર પ્રેરણા કરાતી હોવાથી વચ્ચે રહેલા યાત્રિકો પોતાની જાતને ઘંટીમાં રહેલા ધાન્યના કણની જેમ પીસાતી માનતા હતા. ॥ ૧૫ ॥

चतुर्जलधिमेखलावनिनिकेतलोकैस्ततः
　समीपमवनीभृतः सममलम्भि शोभां पराम् ।
पुरंदरगिरेरिवाखिलचतुर्निकायामरै-
　र्जिनेन्द्रजननाभिषिञ्चनमहोत्सवप्रक्रमे ॥ १६ ॥

ततः स्वस्वदिग्भ्यः प्रस्थितेरनन्तरं चत्वारः पूर्वापरदक्षिणोत्तरलक्षणाश्चतुःसंख्याका जलधयः समुद्रा एव मेखला काञ्ची यस्यास्तादृश्यामवनौ निकेतं गृहं येषां तादृशैर्लोकैर्यात्रिकजनैः सममेककालमवनीभृतः अर्थाधिकाराद्यात्रासमत्वाच्च श्रीशत्रुंजयगिरेः समीपं तलहट्टिकारूपपार्श्वं परां प्रकृष्टां शोभामलम्भि प्रापितम् । कैरिव । अखिलचतुर्निकायामरैरिव । यथा जिनेन्द्रस्य तीर्थंकरस्य जननस्य जन्मनोऽभिषिञ्चनस्याभिषेकस्य । जन्माभिषेकस्येत्यर्थः । प्रक्रमे प्रस्तावे । 'वेलावारावसरः प्रस्तावः प्रक्रमोऽन्तरम्' इति हैम्याम् । अखिलैः समस्तैश्चत्वारो निकाया उत्पत्तिगतिसाधर्म्येण सादृश्यं येषां ते । 'निकायस्तु सधर्मिणाम्' इति हैम्याम् । भवनपतिव्यन्तरज्योतिष्कवैमानिकलक्षणाश्चतुर्निकायास्तादृशा अमरा देवास्तैः पुरंदरगिरेर्मेरोः समीपं शोभा लभ्यते । यथा सुरगिरिः तथा सुरेन्द्रगिरिरपि । यथा सुराचार्यस्तद्वत्पुरंदरगुरुरपि । यथा नैषधे—'शैशवावधि गुरुर्गुरुरस्य' । अस्य शक्रस्य । तथा श्रीपालचरित्रे—'सक्कगुरूचेश्सक्के इ' इति । तथा नैषधे—'जाम्बूनदार्थी धरसार्वभौमः' । यथा शक्रनामेदं तथा शक्रस्यायमपि शैल इति ॥

श्लोकार्थ

જિનેશ્વર ભગવંતના જન્માભિષેકના મહોત્સવ પ્રસંગે ચાર નિકાયના દેવો જેમ મેરૂપર્વતની ભૂમિને શોભાવે તેમ ચાર સમુદ્રપર્યંતની પૃથ્વી ઉપર રહેલા અર્થાત્ ચારે દિશામાંથી આવેલા મનુષ્યોએ શત્રુંજય પર્વતની તળેટીને શોભાવી. ॥ ૧૬ ॥

धराधिविबुधेरिता किमु सहैव संकेतभा-
　क्किमत्र सुकृतैरुत प्रतिपतेरिवाकर्षिता ।
शताङ्गमुखवाहनानुगतयौवतप्राजिना
　यदेकसमये ततिस्तनुमतामुपेता गिरौ ॥ १७ ॥

गुरौ शत्रुंजयाचले तनुमतां प्राणिनां यात्रिकजनानां ततिः श्रेणी यद्यस्मात्कारणात् एकसमये एकस्मिन्नेव प्रस्तावे उपेता समकालं समागता । किंभूता । शताङ्गाः स्यन्दना रथा मुखे आदौ येषां तादृशानि वाहनानि यानानि तैरनुगतानां युक्तानां यौवतैर्युवती-

समूहैर्भ्राजन्ते शोभन्ते इत्येवंशीलास्तेषां द्वयोरपि कर्मधारयः । तत्रोत्प्रेक्ष्यते—धरस्य विमलाद्रेरधिविबुधैरधिष्ठायकसुरैः ईरिताः प्रणुन्नाः किमु । अथ वा सहैव एककालमेकेन वारेणैव संकेतं परस्परसंगमस्थानं भजतीति तादृशी किमु । उताथ वा व्रतिपतेर्हीरविजयसूरेः सुकृतैः पुण्यैराकर्षिता अत्र शत्रुंजये आकृष्यानीतेव वा कश्चिदाकर्षयति । स्वार्थे ञिप्रत्ययः । आकर्ष्यते स्मेत्याकर्षिता ॥

श्लोकार्थ

રથ આદિ વાહનો વડે અનુસરાતી અને સ્ત્રીપુરુષોનાં યુગલો વડે શોભતી યાત્રિકોની શ્રેણી એકી સાથે શત્રુંજય પર્વતની પાસે આવી પહોંચી. જાણે તેઓ વિમલાચલના અધિષ્ઠાયક દેવો વડે પ્રેરિત થઈ ન હોય! અથવા કોઈ સંકેત પામીને આવી ન હોય! અથવા તો શ્રીહીરવિજયસૂરિજીના પુણ્ય વડે આકર્ષાઈને આવી ન હોય ॥ ૧૭ ॥

तुरङ्गममतङ्गजाग्रिमशताङ्गरङ्गन्मरु-
प्रियोक्षतरवेसरोत्करपुरःसरप्राञ्चिता ।
पुरीपरिसरावनी समजनिष्ट संघागमे
तदा विजयिमेदिनीरमणराजधानीव सा ॥ १८ ॥

तदा तस्मिन् यात्रिकजनप्रजागमनसमये पुर्याः पादलिप्तनगर्याः परिसरस्य समीपप्रदेशस्य अवनी भूमी कर्त्री विजयिनो विजयकरणशीलस्य मेदिनीरमणस्य राज्ञो राजधानी स्कन्धावतार इव समजनिष्ट संजाता । किंभूता । तुरङ्गमा अश्वा मतङ्गजा हस्तिनः तथा अग्रिमाः प्रकृष्टाः शताङ्गाः रथास्तथा रङ्गन्तो मरुप्रियाः करभाः तथा उक्षतरा महोक्षाः पुष्टबलीवर्दास्तथा वेसरा अश्वतराः लोके 'खचर' इति प्रसिद्धास्तेषामुत्कराः समूहास्तथा पुरःसराः पादचारिणः तैः प्राञ्चिताः परिपूर्णा निभृतं भृताः ॥ इति संघागमनम् ॥

श्लोकार्थ

દેશદેશના સંઘના આગમનથી પાદલિપ્તપુરીની ભૂમિ અશ્વ, હસ્તિ, રથ, ઊંટ, વૃષભ, ખચ્ચર, ગાડાં અને મનુષ્યોના સમૂહથી જાણે વિજયી રાજાની છાવણી જેવી શોભતી હતી. ॥ ૧૮ ॥

जडीकरणभीतितो हिमगिरेः प्रणश्यागतं
सरः किमिह मानसं सकुलराजहंसाकुलम् ।
समग्रसुखसंपदभ्युदयसिद्धगोत्रान्तिके
व्यभूषि ललिताभिधं सर उपेत्य संघैः समम् ॥ १९ ॥

संघेर्यात्रिकपान्थसार्थैः उपेत्य समीपे आगत्य ललित इत्यभिधा नाम यस्य तादृशं सरः । ललितसरोवरमित्यर्थः । समं समकालं व्यभूषि अलंकृतम् । उत्प्रेक्ष्यते—जडीकरणस्य । 'जडो मूर्खे हिमाघाते मूकेऽपि च' इत्यनेकार्थः । मूर्खीकरणस्य मूकीकरणस्य वा हिमांघ्रानीकरणस्य वा यो बहुना तुहिनेनाघ्रातो निर्दिडीभूतः स्यात्तस्य प्राणस्यापि संशयः स्यात्तथा मूर्खमूककरणादपि भीतिर्भयं ततः कारणात् हिमगिरेस्तुहिनाचलात्प्रणश्य प्रपलाय्य । नेष्ठ्वेत्यर्थः । इहास्मिन् समग्राणां समस्तानामैहिकामुष्मिकाणां सुखानां शर्मणां संपदां विभूतीनां वा अभ्युदय आविर्भावो यस्मात्तादृशस्य सिद्धगोत्रस्य सिद्धाचलस्य शत्रुंजयशैलस्य मन्त्रतन्त्रविद्यौषधीरसादिभिः सिद्धानां पुरुषाणां गोत्रस्य वंशस्य अन्तिके यत्र गोत्रे सर्वेऽपि सिद्धतरास्तेषां संनिधौ आगतं मानसं नाम सरः पद्माकर इव । किंभूतम् । सह कुलैः पुत्रपौत्रप्रपौत्रभ्रातृभ्रातृव्यस्वजनादिवंशैर्वर्तते ये तादृशानां हंसानां सितच्छदानां मालाभिर्धोरणीभिराकुलं व्याप्तम् । हिमाचले मानसं सरोऽस्ति । यदुक्तं चम्पूकथायाम्—'सदाहंसाकुलं बिभ्रन्मानसं प्रचलज्जलम् । भूभृन्नाथोऽपि नायाति यस्य साम्यं हिमाचलः ॥' इति । तत आगमनं युक्तमेव ॥

श्लोकार्थ

સમસ્ત સુખસંપત્તિનો અભ્યુદય સિદ્ધ કરી આવનાર શત્રુંજય પર્વતની પાસે રહેલું 'લલિત' સરોવર સંઘસહિત અનોખી શોભા ધારણ કરતું હતું. તે સરોવર પોતાને બરફરૂપ બનાવવાના ભયથી હિમાલય ઉપરથી નાસીને આવેલું રાજહંસના કુલસહિત એવું જાણે માનસરોવર ન હોય ! એવું શોભતું હતું. ॥ ૧૯ ॥

गजा इव जनास्ततः सलिलकेलिमातन्वते
पिबन्ति च पिपासिताः सलिलमत्र पान्था इव ।
विजृम्भिजलजावलिं कुसुममालिकां मालिका
इवावनिरुहे पुनः क्वचन केचिदुच्चिन्वते ॥ २० ॥

तरन्ति च सितच्छदा इव परे मृगाक्षीसखा
विशन्ति रसिकाः पुनस्तिमिगणा इवान्तर्जलम् ।
तपर्तुरवितापिता इव मुदा प्लवन्ते परे
चिरेण मिलितेष्ववज्जहति नास्य पार्श्वं पुनः ॥ २१ ॥

ततः ललितसरःसमीपागमनोत्तरणानन्तरम् अत्र ललितसरोवरे केचित्केऽपि जना गजा हस्तिन इव सलिलकेलिं जलमज्जनादिकां क्रीडामातन्वते कुर्वते । च पुनरत्र सरसि

पान्थास्तपागमतीव्रतपनतापसंशुष्यद्गलतालुरसनोष्ठपुटसंकटविधुराः पथिका इव पिपासितास्तृषातरलिताः सन्तः केचिज्जनाः सलिलं पानीयं पिबन्ति । पुनः क्वचन कुत्रापि सरःप्रदेशे केचन जनाः विजृम्भिणीं विकसनशीलां जलजानां पद्मानामावलीं मालिकामुच्चिन्वते उच्चित्य गृह्णन्ति । के इव । मालिका इव । यथा मालाकारिका अवनिरुहे वृक्षे कुसुममालिकां पुष्पपरंपरामुच्चिन्वन्ति च । 'मालतीषु कुसुमश्रद्धालवो मालिकाः' इति चम्पूकथायाम् । पुनः परे अन्ये जनाः सितच्छदा राजहंसा इव तरन्ति । किंभूताः । मृगाक्ष्यो निजनिजयुवत्यः सखायो येषाम् । पुनः रसिका विविधजलकेलिकरणरसभाजो जनास्तिमिगणा मत्स्यव्रजाः इवान्तर्जलं पानीयमध्ये विशन्ति । 'डबकि' इति लोकप्रसिद्धा । परे जनास्तपर्तोर्ग्रीष्मकालस्य रविणा सूर्येण तापितास्तीव्रतापेन क्लेशिताः संतापिता इव मुदा हर्षेण प्लवन्ते स्नान्ति स्नानं कुर्वते । पुनः केचिदन्ये जनाश्चिरेण बहुकालेन मिलितः संगतो य इष्टः स्वमनसोऽतिवल्लभस्तद्वत्तस्यैवास्य ललितसरोवरस्य पार्श्वं न जहति नो त्यजन्ति ॥ युग्मम् ॥ इति ललितासरोवरे यात्रिकजनविविधक्रीडा ॥

શ્લોકાર્થ

એ લલિત સરોવરમાં કેટલાક માણસો હાથીઓની જેમ જલક્રીડા કરે છે, કેટલાક પથિકોની જેમ તૃષાતુર બનેલા જલપાન કરે છે, કેટલાક માળીઓની જેમ કમલ-પુષ્પોનો સમૂહ એકઠો કરે છે, કેટલાક માણસો સ્ત્રીઓ સહિત રાજહંસની જેમ તરવાની ક્રીડા કરે છે, કેટલાક રસિકો મત્સ્યોની જેમ જલમાં પ્રવેશ કરે છે, કેટલાક સૂર્યના તાપથી સંતપ્ત બનેલા હર્ષપૂર્વક સ્નાન કરે છે, તેમજ કેટલાક માણસો લાંબા કાળે મળેલાં પ્રિયજનની જેમ સરોવરનાં પડખાંને પણ છોડતા નથી ! ॥ ૨૦ ॥ ૨૧ ॥

प्रमोदभरमेदुरः प्रथममेव संघस्तदा
स हीरविजयव्रतिक्षितिपतेः पदाम्भोरुहम् ।
अचुम्बदलिवन्महोदयमरन्दपानाभिको
गुरुक्रमविलङ्घनं यदुदयेत न श्रेयसे ॥ २२ ॥

तदा तस्मिन् पादलिप्तपुरे समागमनावसरे प्रमोदानां स्थावरजङ्गमतीर्थानमस्क्रियोद्भवहर्षाणां भरेणातिशयेन मेदुरः पुष्टः स तत्तद्देशागतः संघो यात्रिकलोकप्रकरः प्रथमं पूर्वं शत्रुंजययात्रायाः प्रागेव हीरविजयनाम्नो व्रतिनां साधूनां मध्ये क्षितिपते राज्ञः पदाम्भोरुहं चरणारविन्दमचुम्बच्चुम्बति स्म । ववन्दे इत्यर्थः । किंवत् । अलिवत् । यथा भ्रमरः कमलं चुम्बति । किंभूतः संघः । महोदयो महानतिशायी उदयो जगदैश्वर्यलक्षणो मोक्षश्च स एव मरन्दो मधु तस्य पाने अभिकः अभिलाषुकः । प्रथमवन्दने हेतुमाह—

यद्यस्मात्कारणात् गुरुक्रमाणां पूज्यपादचरणानामतिक्रमणमर्हणोल्लङ्घनं श्रेयसे कल्याणाय नोदयेत नो जायेत। 'प्रतिबध्नाति हि श्रेयः पूज्यपूजाव्यतिक्रमः' इति रघुवंशे॥

શ્લોકાર્થ

શત્રુંજય તીર્થની યાત્રા કરવામાં ઉત્સુક અને મોક્ષરૂપી મકરંદનું પાન કરવામાં લોલુપી ભ્રમર જેવા સંઘે પહેલાં શ્રીહીરવિજયસૂરિજીનાં ચરણકમલે વંદન કર્યું, કારણ કે ગુરુ મહારાજનાં ચરણોનું ઉલ્લંઘન કરવું તે હિતાવહ થતું નથી. ॥ ૨૨ ॥

वशारसिकगीतिभिर्विविधवाद्यमाद्यद्रवै-
रखण्डकृतताण्डवैर्विदुरबन्दिवृन्दस्तवैः।
समं प्रमुदितैर्जनैः प्रभुरितः प्रतस्थे गिरिं
सुरासुरनरोत्करैरिव जिनावनीवासवः॥ २३॥

तत इत्यध्याहार्यम्। संघागमनान्तरं प्रभुर्हीरविजयसूरिरितः पादलिप्तपुरात् गिरिं शत्रुंजयशैलं प्रति प्रतस्थे प्रचलति स्म। कथम्। समं सार्धम्। कैः। प्रमुदितैरानन्दं प्राप्तैर्जनैः संघलोकैः समम्। पुनः काभिः। वशानां तरुणीनां रसिकाभिः सरसाभिः श्रवणयोः सुधारसवर्षिणीभिः विविधरसललिताभिर्गीतिभिर्गानैः। पुनः कैः। विविधानि बहुप्रकाराणि वाद्यानि मृदङ्गमुरजपटहझल्लरीनिःस्वानभेरीनफेरीदुन्दुभिढक्कातालकंसालवीणा-वंशादिमवादित्राणि तेषां माद्यद्भिः सागरगिरिगह्वरादिषु प्रतिशब्देन मदमेदुरीभवद्भिः उद्भटै रवैर्निर्घोषैः शब्दैः उद्धतध्वनिभिः। पुनः कैः। अखण्डं विच्छेदविरहितं कृतैः प्रारब्धैः विरचितैस्ताण्डवैर्नाटकैः। पुनः कैः। प्रमुदिता अनर्गलदानप्राप्त्या प्रमोदकलिता जाता अथ वा विदुराः प्राज्ञा ये बन्दिनो मङ्गलपाठका मागधास्तेषां वृन्दानि संदोहास्तेषां स्तवाः स्तुतयस्तैः। अमूनि सर्वाण्यपि विशेषणानि जनविशेषणीक्रियन्ते वा बहुव्रीहिणा च योज्यन्ते। क इव। जिनावनीवासव इव महोक्षलक्ष्मेव वा। यथा जिनराजः अथ वा वृषभध्वजो युगादिदेवः सुरा देवा असुरा दानवा नरा मनुष्याः तेषामुत्करैर्गणैः सार्धं' शत्रुंजयं प्रति प्रतिष्ठते। त्रयोविंशतिरपि तीर्थकराः शत्रुंजये समवसृताः, तेषु ऋषभदेवो नवनवतिपूर्ववारान्समागतः। यदुक्तम्—'नवनवतिपूर्ववारान् यस्मिन् समवसृतयुगादिजिनः। राजादनीतरुतले विमलगिरिरयं जयति तीर्थम्॥' इति पूर्वाचार्यस्तवे। तथा श्रीमन्ने-मिनाथोऽपि शक्रस्तुतिमसहमानैः सुरैः परिक्षिप्तास्तदवसरागतपुरंदरप्रार्थनाप्रक्रमे गृहमे-धित्वे यावदेवेन्द्रो देवेन्द्रैः समं शत्रुंजये समाजगाम-इति शत्रुंजयमाहात्म्ये॥

શ્લોકાર્થ

સ્ત્રીઓ રસિક ગીતો ગાતી હતી, વિવિધ પ્રકારનાં વાજિંત્રો વાગતાં હતાં, અખંડ નાટકો થતાં હતાં, ચતુર મંગલપાઠકો સ્તુતિપાઠ કરતા હતા, સંઘસેવકો હર્ષિત બનેલા હતા, આ રીતે જેમ સુર અસુર અને માનવોના સમૂહ સાથે તીર્થંકર ભગવંત સમવસરે તેમ હીરવિજયસૂરિ મહારાજે વિમલગિરિ તરફ પ્રયાણ કર્યું. ॥ ૨૩ ॥

तदा मुदितमानसा निखिलयात्रिकाणां गणा
उपेत्य तलहट्टिकां शिवपुरस्य सीमामिव ।
प्रसूनमणिमौक्तिकैर्धरमवर्धयन्बिन्दुभि-
स्तटावनिधरं पयोनिधिविवृद्धवेला इव ॥ २४ ॥

तदा हीरसूरेर्यात्राकृते श्रीशत्रुंजयशैलं प्रति प्रस्थानसमये निखिलाः समस्ता यात्रिकाणां विमलाचलरोहणार्थमागतानां भविकानां गणाः समूहा धरमर्थात्पुण्डरीकपर्वतं प्रसूनानि पुष्पाणि स्वर्णरूप्यमयानि स्थलजजलजातानि कुसुमानि, मणयो रत्नानि, मौक्तिकानि मुक्ताफलानि, तैः कृत्वा सममेककालं सर्वेऽप्यवर्धयन् वर्धापयन्ति स्म । किं कृत्वा । तलहट्टिकामर्थाद्विमलाचलोपान्तपृथिवीमुपत्यकामधोभागे उपेत्यागत्य । उत्प्रेक्ष्यते—शिवपुरस्य मुक्तिनगरस्य सीमामुपशल्यमिव परिसरभूमीमिव। किंभूता गणाः। मुदितं यात्राचिकीर्षया शत्रुंजयाभ्यर्णागमनेन हृष्टं मानसं मनो येषां ते । अवर्धयन्कथम्। सममेकस्मिन्नेव समये यात्रिका धरं विमलाद्रिमवर्धयन । का इव । वेला इव । यथा पयोनिधेः समुद्रस्य विवृद्धा चन्द्रोदयदर्शनाद्ग्रीष्मर्तुप्रादुर्भावाद्वा वृद्धिं प्राप्ता वेलास्तटावनीधरं वेलातीरगिरिं बिन्दुभिर्जलकणैरवकिरन्ति ॥

શ્લોકાર્થ

તે અવસરે જેમ સમુદ્રની ભરતીનાં જલબિંદુઓ સમુદ્રકિનારે રહેલા પર્વતને વધાવે તેમ ખૂબ આનંદને ધારણ કરતા સર્વે યાત્રિકોએ મોક્ષપુરીની સીમા સમાન એવી તલાટીની પાસે આવીને મોતી, મણિ અને સોનાચાંદીનાં પુષ્પો વડે વિમલગિરિ વધાવ્યો. ॥ ૨૪ ॥

निपीय नगपुंगवं विकचनेत्रपत्रैर्भव-
स्थितैर्भविककुञ्जरैरपि तनूलतालम्बिभिः ।
व्यपेतभवविग्रहैरिव समग्रलोकाग्रगै-
रलम्भि भुवि निर्वृतिर्यदिह तत्र चित्रं महत् ॥ २५ ॥

इह तलहट्टिकायामुपत्यकायां वा विकचैर्गिरिगवेषणोद्भुषितहर्षप्रकर्षाद्विस्मेरैर्नेत्रपत्रैलोचनदलैर्नगपुंगवं समग्रगिरिगरिष्ठं शत्रुंजयं निपीय सादरमवलोक्य भविककुञ्जरैः प्रधानभव्यजनैः भुवि पृथिव्यां यन्निर्वृतिरलम्भि संप्राप्ता । किंभूतैः । भवे संसारे स्थितैर्वसद्भिरपि । संसारस्थैर्हि कदापि निर्वृतिर्नाप्यते । पुनः किंभूतैः । तनूलतां शरीरयष्टिमालम्बन्ते श्रयन्ते इत्येवंशीलैरपि । शरीरं बिभ्रद्भिरपि मुक्तिर्नो लभ्यते । कैरिव । व्यपेतभवविग्रहैरिव । यथा व्यपेतो निष्ठितो भवः संसारः गतोभवः शिवो वा तथा विग्रहः शरीरं संग्रामो वा येभ्यस्तादृशैर्मिथ्यादृशां सिद्धैरभावः तथा समग्राणां समस्तानां लोकानां त्रयाणां सप्तानां चतुर्दशानां वा भुवनानामग्रे उपरितनभागे गच्छन्ति तिष्ठन्तीति कृत्वा तादृशैः । 'लो अग्गमुवगगयाणम्' इति वचनात्सिद्धैरिव निर्वृतिर्लब्धा । 'निर्वृतिः शिवशर्मणोः' इत्यनेकार्थः । इति जगति तत्र निर्वृतिप्राप्तिप्रकारे महद्गुरु चित्रमाश्चर्यं वर्तते ॥

શ્લોકાર્થ

જ્યારે સિદ્ધભગવંતો સંસારનો ઉચ્છેદ કરીને લોકના અગ્રભાગ ઉપર રહેલી મુક્તિ-(નિવૃત્તિ)ને પ્રાપ્ત કરે છે ત્યારે આશ્ચર્યચકિત નેત્રો વડે તીર્થાધિરાજ શત્રુંજયને જોઇને સંસારી અને સશરીરી હોવા છતાં પણ ભવ્ય જીવોએ નિવૃત્તિ(શાંતિ)ને પ્રાપ્ત કરી ! તે ખરેખર આશ્ચર્યકારક છે. ॥ ૨૫ ॥

ततः श्रमणशर्वरीपतिरुपत्यकायां गिरे-
र्गिरीशसदनान्तरे सह महेश्वरैर्भावुकैः ।
चरन्नमृतपत्तनं किमतिदूरभावात्पथो
निशि न्यवसदन्तराप्रमितसार्थसार्थेशवत् ॥ २६ ॥

ततस्तलहट्टिकागमनानन्तरं श्रमणशर्वरीपतिः साधुसुधांशुः सूरीन्द्रो गिरेः शत्रुंजयाद्रेरुपत्यकायामधोभूमिभागप्रदेशे अन्तरा पादलिप्तपुरशत्रुंजयाद्रिमार्गमध्ये यद्गिरीशस्य शंभोः सदनं गृहं शिवप्रासादस्तस्यान्तरं मध्यं तत्र निशि रात्रौ न्यवसन्निवासं कृतवान् वासकं वसति स्म । तिष्ठति स्मेत्यर्थः । कथम् । सह । कैः । महेश्वरैर्भावुकैर्महेभ्यैः

श्राद्धैः जिनश्रावकैः । अथ च शिवसदने महेश्वरजनैः कश्चिद्वसति । उत्प्रेक्ष्यते— अमृतपत्तनं मुक्तिनामपुटभेदनं प्रति चरन् गच्छन् पथो मार्गस्यातिशयेन दूरभावाद्दवीयस्तया किमन्तरा निवसति स्म । किंवत् । अप्रतिमसार्थसार्थेशवत् । यथा अप्रमितः प्रमाणरहितः सार्थः मनुष्यसंघो यस्य तादृशः सार्थपतिः किमपि नगरं गन्तुमिच्छन्मार्गस्यातिदूरत्वेन अन्तरा मार्गमध्ये एव निशायां निवसति ॥

श्लोकार्थ

જેમ અસંખ્ય મનુષ્યોની સાથે દેશાંતર પર્યટન કરતો સાર્થવાહ રાત્રિના સમયે કોઈપણ સ્થાને વિશ્રામ કરે તેમ તળેટીએ આવ્યા બાદ હીરવિજયસૂરિજીએ ભાવિક શ્રેષ્ઠીઓની સાથે પર્વતની નીચેના ભાગમાં આવેલા શિવમંદિરમાં વિશ્રામ કર્યો. ॥ ૨૬ ॥

हरेर्मृगदृशामिवोत्पलदृशां लसद्गीतिभिः
पुनर्मुदितनाटचकृद्धटिततण्डवाडम्बरैः ।
निनाय निखिलां निशां वशिशशी स धर्मक्रिया-
विनिर्मितिभिराश्रये रजनिजानिचूडामणेः ॥ २७ ॥

स वशिशशी हीरविजयसूरिचन्द्रः रजनी रात्री जाया पत्नी यस्य । 'जायाया निङ्' इति निप्रत्ययः । 'लोपो व्योर्वलि' इति यकारस्य लोपः । रजनिजानिरिति सिद्धम् । रजनिजानिश्चन्द्रः चूडामणिः शिरोरत्नं यस्य । एतावता ईश्वरस्तस्याश्रये वसतौ शंकरप्रासादे धर्मस्य स्वाचारलक्षणस्य क्रिया अनुष्ठानं सम्यक्तया प्रतिक्रमणादिकरणं तस्य विनिर्मितिभिर्विधानैः कृत्वा निखिलां समस्तां चतुर्यामवर्ती निशां रात्रीं निनायातिचक्राम । यथा स्वधर्मानुष्ठानैस्तथा । पुनः काभिः । लसन्तीभिश्चेतोहराभिर्गीतिभिर्गानैः । कासाम् । उत्पलदृशां कुवलयलोचनानां तरुणीनाम् । उत्प्रेक्ष्यते—हरेरिन्द्रस्य मृगदृशामिन्द्राणीनामिव । पुनः कैः । मुदितैर्यथेप्सितदानाधिगमादानन्दमेदुरैर्नाटचकृद्भिर्नर्तकैर्घटितैर्निर्मितैस्ताण्डवानां नाटकानामाडम्बरैः ॥ इति शत्रुंजयान्तिकशिवप्रासादे वासकावस्थाम् ॥

श्लोकार्थ

ઇન્દ્રાણી સમાન મૃગનયના સ્ત્રીઓનાં ગવાતાં ગીતો વડે, હર્ષિત બનેલા નાટ્યકારો વડે કરાતાં નાટકો વડે અને ધર્માનુષ્ઠાન વડે આચાર્યદેવે સમસ્ત રાત્રિ ચન્દ્રમૌલિ એવા શંકરના મંદિરમાં (શિવમંદિરમાં) પસાર કરી. ॥ ૨૭ ॥

गते तमसि तद्गिरेरिव निरीक्षणात्तत्क्षणा-
 त्खगैर्गुरुजयारवे किमु कृतेऽथ सांराविणे ।
समीयुषि खरत्विषि द्विषि निशां नभोमण्डले
 विधित्सति सहामुना विमलशैलयात्रामिव ॥ २८ ॥
सुधाशनपथातिथिं शिवनिकेतनिःश्रेणिका-
 मिव व्रतिशतक्रतुर्विमलशैलपद्यां ततः ।
सबालवरवर्णिनीनिवहनैकतौर्यत्रिका-
 नुयातजनसंयुतः समधिरोढुमारब्धवान् ॥ २९ ॥

स व्रतशतक्रतुर्हीरविजयसूरीन्द्रः विमलशैलस्य शत्रुंजयाद्रेः पद्यां सेतुं लोकप्रसिध्द्या 'पाज' इति समधिरोढुमारब्धवान् प्रारेभे । किंभूतः सः । सह बालाः कुमाराः कुमारिकाश्च तैस्ताभिश्च । 'सरूपाणामेकशेषे' । वर्तन्ते यास्तादृश्यो वरवर्णिन्यः प्रधानस्त्रियः । तीर्थयात्रादिधर्मकारकत्वात् प्राधान्यम् । अथवा उत्तमा स्त्री जात्या गुणैर्वा । 'उत्तमा वरवर्णिनी' इत्यमरः । तासां निवहाः प्रकराः । तथा नैकानि बहूनि अनेकजातीयानि वा तौर्यत्रिकाणि गीतनृत्यवाद्यानां त्रिकाणि तैरनुयाताः सहिता ये जना यात्रिकसंघलोकास्तैः संयुतः परिकलितः । किंभूतां विमलाचलपद्याम् । सुधाशनानां देवानां पन्था मार्गो गगनं तस्यातिथिं प्राघुणिकीम् । गगनावगाहिनीमित्यर्थः । उत्प्रेक्ष्यते—शिवनिकेतनिःश्रेणिकामिव मोक्षप्रासादे अधिरोहणार्थमधिरोहणिकामिव 'नीसरणी' इति लोकप्रसिद्धाम् । कस्मिन् सति । तत्क्षणात्तत्कालात् शीघ्रमेव तमसि अन्धकारे गते सति लोकान्निःसृते सति । उत्प्रेक्ष्यते—तद्गिरेः स चासौ विमलाचलनामा गिरिः पर्वतश्च तस्य निरीक्षणाद्दर्शनादिव पापे याते । 'तमोऽज्ञानेऽन्धकारेऽघे' इत्यनेकार्थः । अथ पश्चात्तमोगमनानन्तरं खगैः प्रातःप्रबुद्धविहंगमैः सांराविणे मिश्रास्पष्टशब्दे कृते सति । अथ वा समन्ताद्रवैः । यदुक्तं नैषधे—'तटतरुवेगश्रेणीसांराविणैरिव सांप्रतं सरसि विगलन्निद्रामुद्राजनिष्ट सरोजिनी' इति । 'संपूर्वाद्रौतेरभिविधौ भावे इनुण् । तस्मादिनुणः सांराविणानि तैः' इति तद्वृत्तौ साधना । उत्प्रेक्ष्यते —गुरोर्हीरविजयसूरेर्जयारवे विहिते सति किमु पुनः कस्मिन् सति खरत्विषि भास्करे नभोमण्डले गगनाङ्गणे समीयुषि सति संप्राप्तवति । किंभूते । निशां रात्रीणां द्विषि वैरिणि तद्विनाशकत्वात् । उत्प्रेक्ष्यते—अमुना सूरीन्द्रेण सह सार्धं विमलशैलस्य शत्रुंजयाद्रेर्यात्रां विधित्सतीव ॥ युग्मम् ॥

શ્લોકાર્થ

જાણે ગિરિરાજનાં દર્શનથી પાપનો સમૂહ ચાલી ગયો ન હોય તેમ જગતમાંથી અંધકાર દૂર થતાં, ગુરુમહારાજનો જયજયકાર કરતો ન હોય તેવા કુકડાઆદિ પક્ષી-

ઓનો કોલાહલ થતાં અને રાત્રિનો શત્રુ સૂર્ય ગગનમંડલમાં આવતાં બાલવૃદ્ધ અને યુવાન સ્ત્રીપુરુષો સહિત સકલસંઘની સાથે દિશાઓને ભરી દેતાં એવાં વાજિંત્રોના વાદનપૂર્વક હીરવિજયસૂરિજીએ યાત્રા કરવા માટે મુક્તિમંદિરની નિસરણીસમાન, ગગન ચુંબી વિમલગિરીની પગદંડીએ ચઢવાની શરૂઆત કરી. ॥ ૨૮ ॥ ૨૯ ॥

क्रमादचलचक्रिणः श्रमणपुंगवः पद्यया
रुरोह भवसागरं किमु तितीर्षुभिः क्लृप्तया ।
निबद्धुमिव शृङ्खलां हृदयदन्तिनो मेखलां
सुपर्वतरुनन्दनामिव सुमेरुभूमीभृतः ॥ ३० ॥

श्रमणपुंगवः सूरीन्द्रः क्रमादनुक्रमेण पद्यया सेतुना प्रस्तरनिबद्धमार्गेण 'पाज' इति प्रसिद्धेन कृत्वा अचलचक्रिणो गिरीन्द्रस्य । सर्वतीर्थाधिराजत्वात्पर्वतसार्वभौमत्वम् । तथा जैनमते प्रातः प्रतिक्रमणप्रान्तप्रत्याख्यानकरणसमयादौ 'सकलतीर्थाधिराजश्रीशत्रुंजयाय नमः' इत्युच्चार्य प्रत्याख्यानं क्रियते इति । मेखलां मध्यभागमारुरोहाध्यासामास । किंभूतया पद्यया क्लृप्तया रचितया । उत्प्रेक्ष्यते—भवसागरं संसारसमुद्रं तितीर्षुभिस्तरीतुमिच्छुभिरिव कृतया रामचन्द्रादिवत्सेतुना समुद्रः समुत्तीर्यते । किंभूतां मेखलाम् । हृदयानि मनांसि । 'हृच्चेतो हृदयं चित्तम्,' तथा 'स्तनान्तरं हृद्धृदयम्' इति द्वयमपि हैम्याम् । अत एवानेकार्थः —'हृदयं मनो वक्षश्च' । तान्येवोन्मत्तत्वाद्दन्तिनः करिणः तन्निबद्धुं नियन्त्रयितुं शृङ्खलां निगडमिव । शृङ्खलशब्दस्त्रिलिङ्गः । 'शृङ्खला निगडोऽन्दुकः' इति हैम्याम् । तथा 'नालप्रणालपटलार्गलशृङ्खलकंदलाः' इति लिङ्गानुशासने स्वतस्त्रिलिङ्गे । तथा मेखलां मुञ्जदोरिकामिव । दोरिकया हि करिणो नियन्त्र्यन्ते । यथा चम्पूकथायाम—'ब्राह्मीव दौर्जनी समेखला समेमित्रे । अमित्रे च समभावभाजि साधौ विषये वेला मत्सरवती दौर्जनी श्रेणी ब्राह्मी तु सह मेखलया मौञ्जीदोरिकया वर्तते या' इति चम्पूटिप्पनके । इति गर्भितोत्प्रेक्षा । पुनः किंभूताम् । सु शोभनानि पर्वाणि शाखादिनिर्गमस्थानानि येषां येषु वा तादृशैर्वृक्षैस्तरुभिः नन्दयति प्रीणाति समृद्धिं प्राप्नोतीति वा । उत्प्रेक्ष्यते—सुमेरुभूमीभृतो मन्दरमहीधरस्य मेखलां नितम्बमिव । किंभूताम् । सुपर्वतरुभिः कल्पवृक्षैर्नन्दयति समृद्धिं प्राप्नोति । अथ वा कल्पद्रुकलितनन्दनवती । एतावता प्रथममेखलामारूढवान ॥ इति पद्यया प्रथममेखलारोहणम् ॥

શ્લોકાર્થ

ત્યારપછી અનુક્રમે આચાર્યદેવે, સંસારસમુદ્રને તરવા માટેની જાણે પાજ ન હોય, તેવી શત્રુંજયની પાજ ઉપર આરોહણ કર્યું, અને જેમ કલ્પવૃક્ષ વડે મેરુપર્વતની મેખલા શોભે તેમ આચાર્યદેવ વડે પ્રથમ પાજ (પહેલો હેડો) શોભાને પામી તે મેખલા (પાજ)

જાણે મનરૂપી મદોન્મત હાથીને નિયંત્રણ કરવા માટેની મજબૂત શૃંખલા ન હોય, તેવી હતી. ॥ ૩૦ ॥

प्रपासु गिरिपद्धतेरमृतपानवद्यात्रिकै-
रपीयत सितोपलाकलिततोयमातृप्तितः ।
पुनर्मुनिमहीन्दुनावनिधराधिरोहोदय-
त्प्रमोदरससंमिश्रिता शमसुधा तदास्वाद्यत ॥ ३१ ॥

तदा शत्रुंजयप्रथममेखलाधिरोहणसमये गिरेर्विमलाचलस्य पद्धतेर्मार्गस्य पद्धतौ मार्गे वा वर्तमाना याः प्रपाः पानीयशालास्तासु यात्रिकैः श्रीशत्रुंजययात्राकारकैर्लोकैरमृतस्य पीयूषस्य पानवद्धीतिरिव। 'धीतिः पाने' इति हैम्याम्। 'धेट् पाने'। धयनं धीतिरिति व्युत्पत्तिः। अथ वा मुक्तिरसास्वादवत्। 'अमृतं मुक्तिपानीयपीयूषु' इत्यनेकार्थः। आतृप्तितस्तृप्तिं मर्यादीकृत्य। आङादियोगे पञ्चमी। सितोपलाभिः शर्कराभिः कलितं करम्बितं बहुव्याप्तं तोयं पानीयमपीयत पीतम्। पुनर्हीरविजयसूरिणा तु शमसुधा उपशान्तरसनाम्नी सुधा समास्वाद्यत सम्यक् पीयते स्म। किंभूता शमसुधा। अवनिधरे शत्रुंजयशैले यदधिरोहणं चढनं तेनोदयत्प्रकटीभवन् यः प्रमोदाभिधरसो हर्षोत्कर्षः आनन्दातिरेकनिस्यन्दस्तेन मिश्रिता करम्बिता व्याप्ता ॥

श्લोકાર્થ

શત્રુંજયના પહેલા હડા સુધીના આરોહણ પછી યાત્રિકોએ સાકરમિશ્રિત પાણીનું આકંઠ પાન કર્યું, અને આચાર્યદેવે વિમલગિરિનાં દર્શનથી ઉત્પન્ન થયેલા આનંદના અતિરેકથી વ્યાપ્ત શમસુધાનું પાન કર્યું. ॥ ૩૧ ॥

स्फुरत्खरकरोद्धरद्युतिवितानसंतापिता-
ञ्जनाञ्जनितनिर्झरोत्करजलाप्लवा वायवः ।
भवार्तिविधुरीकृतानिव महात्मनां संगमाः
सृजन्ति शिशिरान्गिरौ क्षणमपास्य तापं तनौ ॥ ३२ ॥

गिरौ पुण्डरीकपर्वते वायवः पवनाः जनान्यात्रिकलोकान् क्षणं क्षणमात्रं शिशिरान् शीतलान् सृजन्ति कुर्वन्ति। किं कृत्वा। निमेषमात्रं च तनौ शरीरे तापं धर्ममपास्य निवार्य। जनान् किंभूतान्। स्फुरन्दीप्यमानस्तीव्रं तपन्वा खरकरश्चण्डरश्मिः सूर्यस्तस्योद्धुराणामुत्कटानां द्युतीनां कान्तीनां वितानेन समूहेन संतापितान्पीडितान् अतितप्ती-

कृतान । किंभूता वायवः । जनितो निर्मितो निर्झराणां शिखरान्तरनिःसरत्पयःप्रवाहाणामुत्कराणां संदोहानां जलेषु पानीयेषु आप्लवः स्नानं यैस्ते । के इव शिशिरयन्ति । संगमा इव । यथा महात्मनां साधूनां संगतयः भवस्य संसारस्यार्तिर्त्रिविधाधिव्याधिदुःखपीडा तया ताभिर्बहुत्वं वा विधुरीकृतान व्याकुलान विहितान भविकान संसारासारतोद्भावनविविधधर्मोपदेशप्रदानादिना शीतलयन्ति ॥

શ્લોકાર્થ

જેમ સંસારમાં દુઃખોથી દુઃખી બનેલા જીવોને સત્પુરુષોનો સંગ ધર્મોપદેશ દ્વારા શીતલતા અર્પે તેમ સૂર્યના પ્રચંડ તાપથી સંતપ્ત બનેલા યાત્રિકોને ઝરણાંનાં જલમાં સ્નાન કરીને આવેલા પવન ક્ષણમાત્રમાં તાપને દૂર કરી શિશિરઋતુની જેમ શીતલતા અર્પે છે. ॥ ૩૨ ॥

झरञ्झरपयःप्लवप्रसरशीतलोर्वीतले
सहस्ररुचिसंचरद्रुचिचयस्य दुःसंचरे ।
विलासिकदलीगृहे भुजगगुल्मिनीमण्डपे
स्फुरद्विविधविष्टरे पृथुलशैलतल्पाङ्किते ॥ ३३ ॥
स्मितद्रुमगलन्मणीचकचयोपचाराञ्चिते
द्विरेफरवगानितानिललुलल्लताताण्डवे ।
जनान्भवनवद्वने श्रमनुदेऽतिधर्माम्बुभिः
सबिन्दुकितवक्षसो ह्वयति लोलशाखाशयैः ॥ ३४ ॥

शत्रुंजयाचलः जनान यात्रार्थमधित्यकामधिरोहते लोकान लोलैश्चपलैः शाखारूपैः शयैः हस्तैर्वने स्वनिकुञ्जे ह्वयत्याकारयतीव । इति गर्भितोत्प्रेक्षा । किंभूतान जनान । अतिधर्माम्बुभिः अत्यभ्यधिकप्रस्वेदसलिलैर्बिन्दुकितवक्षसः बिन्दुभिः श्रमोदककणगणैर्युक्तं जातम् । स्वार्थे के जातार्थे इतप्रत्यये । बिन्दुकितं वक्षो हृदयं येषाम् । अत एव कस्मै हेतवे । श्रमनुदे मार्गक्लमापनोदाय । 'स्वेदबिन्दुकितनासिकाशिखाम्' इति नैषधे । किंवत् । भवनवत् । यथा कश्चित्सुजनः कमपि मार्गक्लमप्राप्तं निजनिकेतने समाह्वयति । किंभूते वने । झरन्तो निःसरन्तो ये झरा निर्झरास्तेषां पयःप्लवानां वारिपूराणां प्रसरैर्विस्तारैः कृत्वा शीतलं शिशिरीभूतमुर्वीतलं भूमीमध्यं यस्य । पुनः किंभूते । सहस्ररुचेः सूर्यस्य संचरन्तीनामितस्ततो दशदिक्षु प्रसरन्तीनां रुचीनां कान्तीनां वितानं समुदायस्तस्य दुःखेन संचरः प्रसरणं प्रवेशो वा यत्र । पुनः किंभूते । विलासिनः शोभनशीलाः कदलीगृहा रम्भाभवनानि यस्मिन । पुनः किंभूते । भुजगगुल्मिनीनां नागवल्लीनां ताम्बूलवल्लीनाम् । 'ताम्बूल-

वल्ली ताम्बूली नागपर्यायवल्ल्यपि' इति हैम्याम्। मण्डपा यस्मिन्। पुनः किंभूते। स्फुरन्तो विकसन्तः प्रकटीभवन्तो वा दृश्यमाना वा विविधा विष्टरा वृक्षा आसनानि वा यस्मिन्। 'क्षितिरुहः कारस्करो विष्टरः', तथा 'विष्टरः पीठमासनम्' इति द्वयमपि हैम्याम्। विष्टरः पुंसि। पुनः किंभूते। पृथुलानि विस्तीर्णानि शैलानि शिलासमूहा वा। यथा स्नातस्यास्तुतौ 'मन्दररत्नशैलशिखरे' पतस्यार्थद्वयम्। यथा मन्दरेषु पञ्चसु सुमेरुषु मध्ये रत्नं श्रेष्ठो यः सुदर्शनाख्यो मेरुः शैलः पर्वतस्तस्य शिखरे शृङ्गे। अपरोऽप्यर्थः—यथा मन्दरस्य मेरो रत्नानां शैलाः शिलासमूहा यस्मिंस्तादृशे इति। ततो पृथुलानि विपुलानि शैलानि एव तल्पानि पल्यङ्काः शय्यास्तैरङ्किते कलिते युक्ते। पुनः किंभूते। स्मिता विकसिता ये द्रुमा वृक्षास्तेभ्यो गलन्ति वातादिवशात्स्वभावपरिपाकाद्वा निष्पतन्ति यानि मणीचकानि कुसुमानि तेषामुपचारः प्रकरः 'पगर' इति लोकप्रसिद्धः रचनाविशेषस्तेनाञ्चिते सहिते। पुनः किंभूते। द्विरेफाणां भ्रमराणां रवा गुञ्जितानि त एव गानितं गीतिर्जातं यस्मिन् तादृशमनिलेन पवमानेन लुलन्तीनां चपलीभवन्तीनां लतानां विविधजातिवल्लीनां ताण्डवं नाटकं यस्मिन्। सर्वाण्यप्येतानि विशेषणानि भवनेष्वर्थात्संबध्यन्ते। किं चात्र भवनशब्देन राजमन्दिरादि ग्राह्यम्। तत्र सर्वेऽप्यर्थाः संभवन्त्येव दृश्यन्ते च। अथ वा पुण्याढ्यानामाढ्यानामपि भवने भवन्ति शालिभद्रादिमन्दिरवत् इति ॥ युग्मम् ॥

શ્લોકાર્થ

અરણ્યોના વહી રહેલા જલપ્રવાહના વિસ્તારથી જેનું પૃથ્વીતલ શીતલ છે, સૂર્યનાં પ્રચંડ કિરણોનો જેમાં દુસંચાર છે, જેમાં વિલાસી કદલીગ્રહો છે, જેમાં વિવિધ પ્રકારનાં દર્શનીય વૃક્ષો છે, જે શિલારૂપી પલંગ વડે યુક્ત છે, જે વૃક્ષોનાં ખરી પડેલા વિકસ્વર પુષ્પોના સમૂહથી વ્યાપ્ત છે, અને જેમાં ભ્રમરોના ગુંજારવથી મિશ્ર પવન વડે દોલાયમાન થયેલી લતાઓ છે, તેવી વનભૂમિ પવનથી ડોલતી શાખાઓ રૂપી હાથ વડે પરસેવાથી રેબઝેબ થઈ ગયેલા યાત્રિકોને જાણે પોતાના ઘરની જેમ શ્રમ દૂર કરવા માટે બોલાવતી ન હોય! ॥ ૩૩ ॥ ૩૪ ॥

क्वचिद्विकचकानने मधुपगीतिमिश्रां गिरं
जगुर्मृदु फलादनाः श्रुतिसुखां विदग्धा इव।
क्वचिच्च ननृतुर्नटा इव शिखण्डिनां मण्डला
जगर्ज जलदः क्वचित्करिघटेव भूमीभृतः ॥ ३५ ॥

क्वचित्कुत्रापि शत्रुंजयमेखलाशालिप्रदेशे विकचे विकसितकुसुमितसान्द्रद्रुमश्रेणीके कानने वने फलादनाः शुकाः मधुपानां कुसुममकरन्दपानोन्मादमेदुरभ्रमराणां गीतिभिर्गुञ्जारवैर्मिश्रां करम्बीकृतां गिरं वाणीं मृदु सुकुमारं मधुरमतृप्तत्वेन श्रवणपुटकनिपीयमानं

यथा स्यात्तथा जगुर्वदन्ति स्म। के इव। विदग्धा इव। यथा छेका लोका गीतिमिश्रां वाणीं वदन्ति। किंभूताम्। श्रुत्योः श्रोतृश्रवणयोः सुखां सातोत्पादकत्वेनामृतायमानाम्। च पुनः क्वचिद्घनवने शिखण्डिनां परिपूर्णकलापकलितानां मयूराणां मण्डलाः संततयो ननृतुर्नृत्यन्ति स्म। च पुनः क्वचित्प्रदेशे जलदो मेघो जगर्ज गर्जति स्म। गिरौ मेघानां सद्भावो वर्ण्यते। उत्प्रेक्ष्यते—भूमीभृतः शत्रुंजयाद्रे राज्ञो वा करिघटेव गजराजीव। 'बहूनां घटना घटा' इति हैम्याम्।

શ્લોકાર્થ

શત્રુંજયપર્વતની કોઈ વનભૂમિમાં પંડિતોની જેમ પોપટો ભ્રમરોના ગુંજારવથી યુક્ત કર્ણપ્રિય એવી મધુરવાણી ઉચ્ચારતા હતા. વળી, કોઈ પ્રદેશમાં મયૂરો નૃત્યકારની જેમ નૃત્ય કરતા હતા, અને મેઘો ગર્જારવ કરતા હતા; તે મેઘો જાણે શત્રુંજયરૂપી રાજાની ગજઘટા ન હોય! ॥ ૩૫ ॥

मरुन्मिथुनमण्डिता खगविनोदसान्द्रीकृता
मरुत्तरुपरंपरा विविधसिद्धसौधान्तरा।
मणीशिखरशालिनी पुनरनिन्दिताष्टापदा
नितम्बविलसद्वनी भगवतालुलोके गिरौ॥ ३६॥

भगवता हीरसूरिणा गिरौ शत्रुंजयशैले नितम्बे मेखलायां विलसन्ती स्फुरन्ती शोभमाना वनी काननमालुलोके निरीक्षिता। तीर्थस्थान्यपि सर्वाणि स्थानानि पावनान्येव। वनीशब्दोऽन्यत्रापि दृश्यते। यथा 'यवनी नवनीतकोमलाङ्गी शयनीयं यदि पावनीकरोति। अवनीतलमेव माननीयं न पुनर्माघवनीवनीविनोदः॥' इति कविकल्लोले। तथा 'स्ववनी संप्रवदत्पिकापि का' इति नैषधे। किंभूता वनी। मरुतां देवानां मिथुनानि देवदेवीयुगलानि तैर्मण्डिता अलंकृता। पुनः किंभूता। खगानां विविधजातीयविहंगमानां स्वकामिनीकलितविद्याधराणां वा विद्यासाधकखेचराणां वा विनोदः क्रीडातिरेकः रसैर्विशिष्टैर्गुरुप्रमुखैः साधनोपायकरणादिषु नोदैः प्रेरणैः सान्द्रीकृता स्नेहलीकृता निबिडा विहिता वा। पुनः किंभूता। मरुद्भिर्यक्षादिदेवैः अधिष्ठितानाम्। 'गुह्यको वटवास्यपि' इति हैम्याम्। तरूणां द्रुमाणां देवद्रुमाणां वा परंपराः श्रेणयो यत्र। पुनः किंभूता। विविधानि नानाप्रकाराणि स्वर्णरूप्यरत्नमयानि वा सिद्धानामर्हतां पुण्डरीकादिमुनीनामेव सिद्धानां वा सौधानि चैत्यानि सिद्धायतनानि। अथ वा विविधमन्त्रतन्त्रौषधीरससिद्धिभाजां सिद्धानां गृहाणि। तत्रस्था हि केचिन्मन्त्रादिसाधनां विदधतो विविधौषधीजिघृक्षवोऽपि सौधमाधाय तिष्ठन्तीति तानि अन्तरे मध्ये यस्याः सा। पुनः किंभूता। मणीनां शिखरैः

भृङ्गैः शालते इत्येवंशीला । पुनः किंभूता । अनिन्दिता श्लाघनीयास्तीर्थानुभावेनाक्रूरत्वात्प्रशस्याः अष्टापदाः शरभा उपलक्षणादन्येऽपि श्वापदा अष्टापदानि खानौ स्वर्णानि वा यस्याम् । अत्रापि मेरुमेखलाया अप्यर्थध्वनिः, तत्रापि सुरयुग्मानि खेचराणां विविधनिधुवनविनोदैः सान्द्रीकृतकंदरान्तराः कल्पद्रुमाश्च सिद्धायतनानि रत्नशिखराणि स्वर्णमया च ॥

श्लोकार्थ

દેવયુગલોથી યુક્ત, પક્ષીઓના વિનોદથી વ્યાપ્ત, કલ્પવૃક્ષના, સમૂહો સહિત, અનેક પ્રકારનાં સિદ્ધાયતનો(દેવમંદિરો)થી મંડિત, રત્નનાં શિખરોથી સુશોભિત અને બળવાન એવા અષ્ટાપદ આદિ વનપશુઓથી યુક્ત એવી શત્રુંજયગિરિની વનભૂમિને આચાર્યમહારાજે જોઈ. ॥ ૩૬ ॥

प्रभोः शिरसि भूरुहैर्विदधिरे छदैश्छायिका
　निरुद्धरविरश्मिभिः सहचरैरिव स्वांशुकैः ।
अवीज्यत पुनर्जनः क्वचन तालवृन्तैरिव
　प्रसारिझरसीकराकलितलोलरम्भादलैः ॥ ३७ ॥

क्वचन कुत्रापि गिरिमेखलायां भूरुहैः सच्छायतरुभिः कर्तृभिः निरुद्धाः पिहिता आच्छादिता रवेर्भानुमालिनो रश्मयः किरणा यैस्तादृशैश्छदैः स्वपर्णैः साधनैः कृत्वा प्रभोः सूरीन्द्रस्य शिरसि मस्तके छायिका भास्करातपावृतयः 'छाहडा' इति जनप्रसिद्धाः विदधिरे कृताः । कैरिव । सहचरैरिव । यथा सेवकलोकैः प्रभोः स्वस्वामिनः शिरसि स्वांशुकैः स्वकीयवसनैः कृत्वा छायिकाः क्रियन्ते । पुनः क्वचन कुत्रापि स्थाने प्रसारिभिर्विस्तरणशीलैः झराणां शिखरान्तरनिःसरत्पयःप्रवाहाणां सीकरैर्वा तास्ता वारिबिन्दुभिः कलितैर्मिश्रीभूतैस्तथा लोलैः पवनान्दोलनचपलीभूतै रम्भाणां कदलीद्रुमाणां दलैः पृथुलपर्णैः कृत्वा जनः अवीज्यत । अर्थाद्गिरिणैव । कथम् । पुनर्वारं वारम् । कैरिव । तालवृन्तैरिव । यथा व्यजनैर्वीज्यते ॥

श्लोकार्थ

જેમ સેવકો માલિકના મસ્તક ઉપર પોતાનાં વસ્ત્રો વડે છાયા કરે તેમ સૂર્યનાં કિરણોને આચ્છાદિત કરનારાં વૃક્ષોનાં પાંદડાઓએ આચાર્યદેવના મસ્તક ઉપર

છાયા કરી. અને પ્રસરતા ઝરણાના જલકણોથી વ્યાપ્ત કદલીવૃક્ષના પવનથી પ્રેરાયેલા પાંદડાઓએ વીંઝણાની જેમ આચાર્યમહારાજને વીંઝયા, અર્થાત્ શીતલ પવનની લહેરીઓએ શીતલતા અર્પણ કરી. ॥ ૩૭ ॥

विदग्धविहगा जयारवमुदीरयन्त्यध्वनि
स्तुतिव्रतजना इवान्तरभिमातिभेत्तुः प्रभोः ।
क्वचिन्निचितमारुतोपचितकीचकानां क्वणै-
र्गुरोर्गुणगणः पुनर्गिरिसुरैरिवोद्गीयते ॥ ३८ ॥

क्वचित्क्वापि प्रदेशे विदग्धाः कौतुकक्रीडाकृते अध्याप्य पश्चात् श्रीभूतमहेभ्यैः पञ्जरेभ्यो निजेच्छया गमनाय विमुक्ताः । 'तदर्थमध्याप्य जनेन तद्वने शुका विमुक्ताः पटवस्तमस्तुवन्' इत्यपि नैषधादौ दर्शनादिदमपि युक्तिमदेवेति । तथा श्रावकसंगत्या श्राद्धत्वं च प्रपन्नाः । अत एव तीर्थाधिराजं स्वतिर्यक्कृतपयोहाय सेवमानाः पण्डिता विहगाः शुकसारिकादयः पक्षिणः अध्वनि शत्रुंजयाचलारोहणमार्गे प्रभोः सूरीन्दोर्जयारवं जयजयेति शब्दमुदीरयन्ति कथयन्ति । किंभूतस्य प्रभोः । अन्तर्मध्ये स्वात्मनि वर्तमानानामभिमातीनां रागद्वेषकषायादिविद्विषां भेत्तुर्हन्तुः । के इव । स्तुतिव्रतजना इव । यथा स्वामी प्रमुखाणां पूर्वपुरुषकर्तव्यादिषु प्रवर्तमाननृपादिमानां वैरिजयधर्मकार्यदानप्रमुखे विधेये स्तवने व्रतं नियमो येषां तादृशा जना बन्दिलोका वैरिविजेतुः स्वामिनो मङ्गलपाठकाः जयजयारवमुदीरयन्ति । पुनः क्वचिद्भूमिभागे निचितैरन्तःप्रविष्टत्वान्निमूर्तैर्निर्बलीभूतैः अथ वा निभृतं परिपूर्णं यथा स्यात्तथा मारुतैः पवनैरुपचिताः पुष्टाः कृताः । समस्तावयवेषु पूरिता इत्यर्थः । ये कीचकाः सकीचकाः सच्छिद्रवंशाः । 'स कीचकैर्मारुतपूर्णरन्ध्रैः' इति रघुवंशे । तेषां क्वणैः शब्दैः कृत्वा । उत्प्रेक्ष्यते — गिरिसुरैः श्रीशत्रुंजयाचलाधिष्ठायकदेवैः कपर्दिचक्रेश्वरीगोमुखप्रमुखैर्गुरोर्हीरसूरेर्गुणानां शमदमसंयमादीनां गणः समूह उद्गीयते उत्प्राबल्येन गानविषयीक्रियते इव ॥

श्लोकार्थ

ચતુર શુકસારિકાઆદિ પક્ષીઓ મંગલપાઠકોની જેમ રાગદ્વેષ આદિ અંતરંગ શત્રુઓના વિજેતા શ્રીહીરવિજયસૂરિની જયજયારવ શબ્દ વડે સ્તુતિ કરતાં હતાં; અને જાણે પવનના અધિષ્ઠાયકદેવો આચાર્યની ગુણસ્તુતિ કરતા ન હોય તેમ પવનથી પુષ્ટ બનેલા છિદ્રવાળા વાંસ મંજુલ અવાજ કરતા હતા. ॥ ૩૮ ॥

स्वचैत्यचटुलध्वजोपधिकरैरिवाकारय-
न्प्रभञ्जननमद्द्रुमैः किमतिगौरवं कल्पयन् ।
मनीषिशुकभाषितैरिव सुखागमं प्रश्नय-
न्झरज्झरमुदश्रुभाग्गिरिरभूद्गुरोरागमे ॥ ३९ ॥

गुरोः सूरीन्द्रस्य आगमे गिरिर्विमलाचलः अद्दीनमोदप्रादुर्भावादेवंविधः अभूद्बभूव। किंभूतः। झरन्तो निष्पतन्तो ये झरा निर्झरवारिधारास्त एव मुदश्रूणि हर्षबाष्पान् भजतीति। उत्प्रेक्ष्यते—स्वस्यात्मनश्चैत्यानां परमेश्वरप्रासादानां चटुलाः पवनान्दोलनविलोला ये ध्वजा वैजयन्त्यस्त एवोपधिः कपटं येषां तादृशैः करैर्हस्तैः किमाकारयन्नाह्वयन्निव। पुनरुत्प्रेक्ष्यते—प्रभञ्जनेन वायुवेगेन नमन्तो नम्रीभवन्तो ये द्रुमाः पादपास्तैः कृत्वा अतिगौरवमतिशायिनीं भक्तिं नमनचरणलगनलक्षणां कल्पयन् कुर्वन्निव। 'अनुतिष्ठति विदधाति रचयति कल्पयति चेति करणार्थे' इति क्रियाकलापे। पुनरुत्प्रेक्ष्यते—मनीषिणां विविधशास्त्राध्येतृणां शुकानां कीराणां भाषितैरुक्तिभिर्वचनचातुरीभिः कृत्वा। सुखागमं यूयमत्र सुखेन समाधिना चागता इत्यादि स्वागतप्रश्नयन्निव पृच्छन्निव। अन्यो महात्मा कमपि स्वाभीष्टमभ्यागच्छन्तं विभाव्य चञ्चलकरैराकारयति। तथा नमनपदलगनादिभिर्गौरवं कल्पयति। तथा मधुरया गिरा सुखागमनप्रश्नं कुरुते। तथा हर्षाश्रूण्यपि भजते॥ इति गुरोर्विमलाचलपटचारोहणे गिरिमेखलावर्णनम्॥

श्लोकार्थ

આચાર્યદેવના આગમનથી હર્ષિત બનેલો વિમલાચલ જાણે ઝરણાના જલરૂપે હર્ષાશ્રુ વહાવતો ન હોય! જિનપ્રાસાદો ઉપર રહેલી અને પવનથી ચંચલ બનેલી ધજારૂપી હાથ વડે જાણે બોલાવતો ન હોય! પવનથી નમ્ર બની ગયેલા વૃક્ષો વડે જાણે સ્વાગત કરતો ન હોય! અને ચતુર પોપટોની વાણી વડે જાણે સુખસમાચાર પૂછતો ન હોય! ॥ ૩૯ ॥

क्रमेण धरणीभृतः समधिगत्य सोऽधित्यकां
ददर्श वशिनां शशी वरणमम्बरालम्बिनम् ।
धृतं विमलभूभृतोद्भटभवाभिमातेर्भया-
ज्जनं स्वशरणागतं किमिह रक्षितुं काङ्क्षता ॥ ४० ॥

स वशिनां वशात्मनां जितेन्द्रियाणां मध्ये शमाभृतैरतिशीतलत्वेन विश्वाह्लादकत्वेन च शशी। अत्र षष्ठ्या अलुक्समासे एकमपि पदं प्रणीयते वा। सूरीन्द्रः अम्बरमाकाशमालम्बते संश्रयत्यालिङ्गति इत्येवंशील वरणमाकारं बाह्यसालं ददर्श पश्यति स्म।

किं कृत्वा। क्रमेण प्रथमद्वितीयतृतीयादिमेखलारोहणपरिपाट्या धरणीभृतः श्रीशत्रुंजयाद्रेरधित्यकामूर्ध्वभूमीं समधिगत्य प्राप्य। 'अधिगत्य जगत्यधीश्वरादथ मुक्तिं पुरुषोत्तमात्ततः' इति नैषधे। 'अधिगत्य आसाद्य' इति तद्वृत्तिः। उत्प्रेक्ष्यते—उद्भटः अत्युत्कटो वारयितुमशक्यो यो भवः संसारः स एवाभिमातिः शत्रुस्तस्य भयाद्भीतेः स्वस्यात्मनः शरणे आगतं संप्राप्तं जनं भविकलोकं रक्षितुं त्रातुं पालयितुं निर्भयं कर्तुं काङ्क्षता वाञ्छता विमलभूभृता शत्रुंजयाद्रिणा किमु धृतं कृतं वा॥

શ્લોકાર્થ

અનુક્રમે ઉપર ચઢતા આચાર્યદેવે ગગનચુંબી બહારના કોટને જોયો. અતિઉત્કટ સંસારરૂપી શત્રુના ભયથી ભવ્યજનોને નિર્ભય કરવા માટે અર્થાત્ જીવોનું રક્ષણ કરવા માટે જાણે વિમલાચલે કોટરૂપે કિલ્લાબંધી કરી ન હોય! ॥ ૪૦ ॥

विवेश वशिशर्वरीवरयिता नृणां श्रेणिभिः
समं वरणगोपुरं पुरमिवावनीवासवः।
स धर्मधरणीपतेरिव निवासवेश्मावलीं
व्यलोकत पुरःस्फुरज्जिननिकेतपङ्क्तिं पुनः ॥ ४१ ॥

स वशिनां संयमिनां मध्ये शर्वर्या निशाया वरयिता भर्ता चन्द्रो हीरविजयसूरिर्नृणां यात्रिकसंघलोकानां श्रेणिभिः समं वरणं शत्रुंजयशिखरबाह्यप्राकारस्तस्य गोपुरं प्रतोलीं विवेश प्रविष्टवान्। क इव। अवनीवासव इव। यथा विजयी राजा दिग्जययात्रां प्रणीय पुरं स्वां राजधानीं नगरीं प्रविशति। पुनरन्यार्थोपन्यासे। स हीरसूरिः पुरोऽग्रे वरणप्रवेशानन्तरमेवाग्रत एव स्फुरन्तीं प्रकटीभवन्तीं दीप्यमानां वा जिनानां तीर्थकृतां निकेतानां मन्दिराणाम्। प्रासादानामित्यर्थः। पंक्तिं मालिकां व्यलोकत निरीक्षते स्म। उत्प्रेक्ष्यते—धर्मनामा यो धरणीपतिस्तस्य निवासार्थं वासकृते वेश्मावलीं भवनराजीमिव॥ इति शत्रुंजयतीर्थे प्रथमप्राकारे प्रवेशः॥

શ્લોકાર્થ

જેમ વિજયી રાજા દિગ્વિજય કરીને પોતાની રાજધાનીમાં પ્રવેશ કરે તેમ સાધુઓમાં ચન્દ્ર સમાન શ્રીહીરવિજયસૂરિજીએ સંઘસહિત બાહ્યકોટના દરવાજામાં પ્રવેશ કર્યો. આગળ જતા દેદીપ્યમાન એવા જિનમંદિરોની હારમાળા જોઇ. તે હારમાળા જાણે ધર્મરાજાને વસવા માટેની ગૃહપંક્તિ ન હોય! ॥ ૪૧ ॥

मृगेन्द्रशरभाङ्कुशाः परिभवन्ति मां निर्दया
इमां जहि जगत्पतेर्जननि दुःखितामुल्बणाम् ।
इतीव गदितुं गजो भजति यानदम्भेन यां
वृषध्वजजिनप्रसूः प्रथममेव नेमेऽमुना ॥ ४२ ॥

अमुना सूरिचन्द्रेण प्रथमप्राकारप्रवेशे पूर्वमेव सातात्कालिकोत्पन्नकेवलज्ञानेन चतुर्निर्मितसमवसरणमध्ये सिंहासनमधितस्थुषा चतुर्विधसंघस्थापनकृते भरतभूपागमनं प्रतीक्षमाणेन श्रीऋषभदेवेन तीर्थस्थापनसमयात्प्राक् सिद्धिगामुकत्वेन अतीर्थसिद्धत्वेन च अस्यामवसर्पिण्यां भरतक्षेत्रे प्रथमसिद्धत्वेन वा प्रसिद्धा वृषो वृषभो ध्वजश्चिह्नमूरुलाञ्छनं यस्य स युगादिदेवः स यत्र जिनः प्रथमतीर्थकृत्तस्य प्रसूर्माता मरुदेवा नेमे नमस्कृता प्रणता। सा का। यां मरुदेवीं यानदम्भेन वाहनच्छलेन गजो हस्ती भजते सेवते। उत्प्रेक्ष्यते—इति गदितुं कथयितुमिव। इति किम्। हे जगत्पतेस्त्रैलोक्यनायकस्य जननिर्माता निर्दया निर्याता दया करुणा येभ्यस्तादृशा मृगेन्द्राः केसरिणः तथा शरभा अष्टापदाः। 'हर्यक्षः केसरी इभारिः' तथा 'शरभः कुञ्जराराति:' इदं द्वयमपि हैम्याम्। तथा शिरसि घातदायकत्वादङ्कुशाः सृणयः पतत्प्रमुखा मृगयाविधायिव्याधभूपादिकाः मां परिभवन्ति यावद्गजजातिमपि निघ्नन्ति। इमामुल्बणामुत्कटां घातनलक्षणां दुःखितां दुःखिनो भावं जहि विनाशय निवारय। हन्तेर्धातोर्हिविषये जहिरादेशः। यदुक्तं सारस्वते—'जह्येधिशाधिः, हन्तेर्जहिशब्दोऽस्तेरेधिः शास्तेः शाधिशब्दो निपात्यते हि विषये' इति वक्तुमिव॥

શ્લોકાર્થ

પહેલા કોટમાં પ્રવેશ કર્યા બાદ આચાર્યદેવે સર્વપ્રથમ શ્રીઋષભપ્રભુની માતા મરૂતદેવાને નમસ્કાર કર્યા. (જેમને તાત્કાલિક કેવળજ્ઞાન થયું હતું. સમવસરણમાં બિરાજમાન શ્રીઋષભદેવસ્વામિએ ચતુર્વિધ સંઘની સ્થાપના કર્યા પહેલાં ભરત ચક્રવર્તીનું ભગવાન પાસે આગમન થયું, ત્યારે હાથી ઉપર આરૂઢ થયેલા મરૂદેવામાતાને તીર્થની સ્થાપના કર્યા પહેલાં જ કેવળજ્ઞાન ઉત્પન્ન થયેલું અને મુક્તિગમન થયેલું. તેથી આ અવસર્પિણીમાં મરૂદેવામાતા અતીર્થરૂપે પ્રથમ સિદ્ધ થયા.) તે મરૂતદેવામાતાના વાહનરૂપે રહેલો હાથી જાણે આ પ્રકારે વિજ્ઞપ્તિ કરતો હતો કે "હે માતા! અષ્ટાપદો, સિંહો અને શિકારીરાજાઓ મને નિર્દયપણે હણે છે, માટે હે જગજ્જનનિ! આ મારી અતિ દુઃખી અવસ્થાને દૂર કરો!" ॥ ४२ ॥

यदीक्षणजितो मृगः श्रित इवाङ्ककायः क्रमं
मृगध्वजजिनं ततः प्रमुदितः स तं नेमिवान् ।
जिनेन्द्रमजितं पुनर्नजितमान्तरैर्वैरिभिः
कदाचिदपि पद्मिनीप्रियतमस्तमिस्रैरिव ॥ ४३ ॥

स सूरिस्ततो मरुदेवीनमस्कृतेरनन्तरं तं शान्तिकारकत्वेन सर्वत्रापि प्रसिद्धं मृगो हरिणो ध्वजश्चिह्नं यस्य तादृशं जिनं षोडशतीर्थनाथं श्रीशान्तिनाथं नेमिवान् प्रणमति स्म । अयं क्वसोः प्रत्ययस्य प्रयोगः । स च णशादिवत् ज्ञेयः । किंभूतः सूरिः । प्रमुदितो हृष्टमानसः । यत्तदोर्नित्यसंबन्धात् यस्य श्रीशान्तिनाथस्य क्रमं चरणं मृगः सारङ्गः श्रितः समेत्य सेवते स्म । उत्प्रेक्ष्यते—यदीक्षणाभ्यां यस्य नयनाभ्यां जितः श्रिया पराभूत इव अङ्कोऽभिज्ञानमेव कायो वपुर्यस्य तादृशः सन् श्रित इव । पुनरपरविहारे अजितं द्वितीयं जिनेन्द्रं परमेष्ठिनं नेमिवान् प्रणनाम । किंभूतम् । नेति निषेधे । जितं पराभूतं न जित मजितम् । कैः । आन्तरैरन्तरङ्गैः कर्मादिभिर्भाववैरिभिः । कथम् । कदाचिदपि कस्मिन्नपि काले प्रस्तावे । कैरिव । तमिस्रैरिव । यथा अन्धकारैः कदाचिदपि पद्मिनीप्रियतमो भानुमान्न जीयते ॥

श्लोकार्थ

त्यारपछी अत्यंत आनंदित बनेला आचार्यदेवे श्रीशांतिनाथ भगवाननां दर्शन कर्यां; जे प्रभुना नेत्रोथी पराभव पामेला मृग भगवानना चरणमां लांछनरूपे रहीने जाणे हंमेशा प्रभुनी सेवा करतो न होय! त्यार पछी आचार्यदेवे अंतरंग शत्रुओथी नहीं जितायेला एवा अजितनाथ भगवाननां दर्शन कर्यां; शुं अंधकारनो समूह सूर्यनो क्यारे पण पराभव करी शके खरो! अर्थात् अंतरंग शत्रुओ क्यारे पण वितराग भगवंतोनो पराभव करी शकता नथी. ॥ ४३ ॥

स सिद्धगृहवज्जिनं प्रणमति स्म पृथ्वीधर-
प्रणीतजिनमन्दिरे मुनिपुरंदरः संमदात् ।
प्रधान इव पर्षदं क्षितिपतिं स छीपाभिधां
समेत्य वसतिं पुनर्जिनसुधांशुमाराधयत् ॥ ४४ ॥

शत्रुंजयोज्जयन्तादितीर्थानां करमोचयिता मुनीनां तपागच्छश्रमणानां पुरंदरः अतिशायिलक्ष्मीवत्त्वेन वासवसदृशः सूरिः संमदादानन्दात् पृथ्वीधराभिधेन मण्डपाचलपातिसाहिमन्त्रिणा पेथडदेसाधुना निर्मापिते जिनमन्दिरे प्रासादे जिनं भगवन्तं प्रणमति

स्म । किंवत् । सिद्धगृहवत् । यथा कश्चिद्विद्याधरो लब्धिमान्वा साधुः सिद्धायतने शाश्वततीर्थंकरं नमस्करोति । पुनस्तस्मादन्यत्र स्थाने छीपा इत्यभिधा नाम यस्य तादृशीं वसतिम् । अत्र तीर्थादौ वसतिशब्देन केवलं चैत्यमेव प्रतिपाद्यते न गृहादि प्रासादं समेत्य जिनांशुसुधांशुमेहद्भट्टारकम् आराधयत् भजते स्म । 'वरिवस्यत्यन्वास्ते जुषते शुश्रूषतेऽनुकूलयति । आराध्नोत्याराध्यत्याराधयतीति सेवायाम् ॥' इति क्रियाकलापे । क इव । प्रधान इव । यथा सचिवः पर्षदं सभां समागत्य क्षितिपतिं स्वस्वामिनृपतिमाराधयति ॥

શ્લોકાર્થ

જેમ વિદ્યાધરમુનિ સિદ્ધાયતનોમાં જિનબિંબોને નમસ્કાર કરે તેમ આચાર્યદેવે હર્ષપૂર્વક માંડવગઢના શણગાર મહામંત્રી પેથડશાહે બંધાવેલા જિનમંદિરને નમસ્કાર કર્યા. જેમ પ્રધાન રાજસભામાં આવીને રાજાને નમસ્કાર કરે તેમ આચાર્યદેવે છીપાવસહિમાં આવીને જિનબિંબોને ભક્તિપૂર્વક નમસ્કાર કર્યા. ॥ ૪૪ ॥

अवन्दत स टोटराभिधविहारतीर्थेश्वरं
पुनः प्रभुमबीभजद्वसतिमेत्य मौल्हाभिधाम् ।
विलोक्य च कपर्दिनं सकलसंघविघ्नच्छिदं
परंगिरिमिवार्बुदादिमविभुं स्तवैरस्तवीत् ॥ ४५ ॥

स सूरिः टोटरा इत्यभिधा नाम यस्य तादृशे विहारे प्रासादे तीर्थेश्वरं जिनमवन्दत नमस्कुरुते स्म । पुनरन्यत्र प्रदेशे मौल्हा इत्यभिधा नाम यस्यास्तादृशीं वसतिं चैत्यं समेत्य प्रभुं परमेश्वरमबीभजदुपास्ते स्म । च पुनः स सूरिः । उत्प्रेक्ष्यते—परमन्यं गिरिं पर्वतमिव तादृशमर्बुदनामानमादिमविभुमादिनाथं स्तवैः स्तोत्रैः कृत्वा अस्तवीत् स्तौति स्म । किं कृत्वा । सकलानां विविधदेशागतत्वेन बाहुल्यात्समस्तानां संघानां यात्रिकलोकानां विघ्नानामन्तरायाणां छिदं विघातकं कपर्दिनामानं शत्रुंजयस्यादितीर्थस्य चाधिष्ठायकं यक्षं विलोक्य दृग्गोचरीकृत्य ॥ इति बाह्यप्राकारप्रासादेषु सकलजिनप्रणमनम् ॥ इति मरुदेवीशिखरवर्णनम् ॥

શ્લોકાર્થ

ત્યાર પછી "ટોટરાવિહાર" અને "મૌલ્હાવિહાર"માં આવીને જિનબિંબોને નમસ્કાર કર્યા. તેમજ સકલ સંઘનાં વિઘ્નો નાશ કરનાર શત્રુંજયના અધિષ્ઠાયક "કપર્દિ યક્ષ"ને આદરપૂર્વક જોઇ ધર્માશિષ આપીને ત્યાં બિરાજમાન જિનમંદિરોમાં જિનેશ્વર

ભગવંતની (આદિનાથ ભગવંતની) અર્બુદાગિરિ ઉપર આદિનાથ ભગવંતની સ્તુતિ કરી હતી તેમ ભાવપૂર્વક સ્તુતિ કરી. ॥ ૪૫ ॥

सरस्यनुपमाभिधे शिखरिशेखरे मानसा-
ह्वये तुहिनमेदिनीधर इव क्षिपन्नक्षिणी ।
ततः समधिरूढवान्स शिखरं स्वरारोहणा-
भिधं धृतमिवामुना स्वरधिरोहणायाङ्गिनाम् ॥ ४६ ॥

ततो मरुदेवीशिखरादवतरणानन्तरं सूरिराजहंसः स्वरधिरोहणाभिधमर्थात्स्वर्गारोहणं नाम । अथ वा अक्षरच्युतकप्रदानालंकारेणाधिकारोऽपनीयते गकारश्च प्रदीयते तदा च स्वर्गारोहणाभिधानं शृङ्गं समधिरूढवान् चढति स्म । उत्प्रेक्ष्यते—अङ्गिनां भविकानां स्वरधिरोहणाय स्वर्गे अधिरोहणार्थममुना शत्रुंजयगिरिणा धृतमिव । सूरिः किं कुर्वन् । शिखरिणां सर्वपर्वतानां शेखरे अवतंसभूते शिखरिणो विमलाद्रेः शेखरे वा तेजःपालपत्न्या अनुपमदेव्या खानिते कारिते तदभिधेये वा उपमनाम्नि सरसि तटाके अक्षिणी निजनयने क्षिपन् किरन् । पश्यन्नित्यर्थः । कस्मिन्निव । मानसाह्वये इव । यथा तुहिनभूधरे हिमाचले किमपि शिखरमारोहन् हंसो मानसमित्याह्वयं नाम यस्यैतावता मानसनाम्नि सरसि तटाके दृशौ क्षिपति । हिमाचलोपरि मानससरसः सद्भावः प्रोक्तोऽस्ति । यथा चम्पूकथायाम्—'सदा हंसाकुलम्' इति प्राक् प्रोक्तमस्ति ॥

શ્લોકાર્થ

જેમ હિમાલયના શિખર ઉપર ચઢતો રાજહંસ માનસરોવરને જુએ તેમ આચાર્ય દેવે શત્રુંજયના શિખર ઉપર ચઢતાં, તેજપાલની પત્ની અનુપમાદેવીએ પોતાના નામથી ખોદાવેલા અનુપમસરોવરને જોતાં "સ્વર્ગારોહણ" નામનાં શિખર ઉપર આરોહણ કર્યું. તે શિખર જાણે મનુષ્યોને સ્વર્ગ ઉપર આરોહણ કરાવવા માટે શત્રુંજયે ધારણ કર્યું ન હોય! ॥ ૪૬ ॥

समेत्य मणिसेतुना वृषभकूटमभ्रंकषं
विवेश वरणान्तरे किमपवर्गपूर्गोपुरे ।
विलोक्य स तदन्तिके सचिववस्तुपालेन चो-
ज्जयन्तमवतारितं प्रणमति स्म तत्रार्हतः ॥ ४७ ॥

स हीरसूरिः वरणस्यान्तरे मध्यतनप्राकारमध्ये विवेश प्रविष्टवान् । उत्प्रेक्ष्यते—

अपवर्गो मोक्षः स एव पूर्नगरी तस्या गोपुरं प्रतोलीमिव प्रविशति स्म । किं कृत्वा । मणिसेतुना विविधरत्ननिर्मापितपद्यया अभ्रंकषं गगनमुल्लिखत् वृषभकूटं मूलप्रासादसंबन्धि शिखरं समेत्य समागत्य। च पुनस्तस्य चरणस्यान्तिके सचिवो वीरधवलधराधवप्रधानो यो वस्तुपालस्तेनावतारितं रचनया नवीनं निष्पादितमुज्जयन्तं गिरिनारिगिरिप्रपञ्चं विलोक्य। 'प्रणीय नयनातिथिं स च कुमारदेवीभुवा' इत्यपि पाठः। तत्र च पुनः कुमारदेवीसाधो रासराजस्य पत्नी तस्यां भूरुत्पत्तिर्यस्य ताद्दशेन वस्तुपालेनावतारितं प्रतिरूपं कृतमुज्जयन्तं रैवताचलं नयनयोरतिथिं प्राघुणिकं प्रणीय विधाय। लोचनगोचरीकृत्येत्यर्थः। स सूरिस्तत्रोज्जयन्तावतारे वस्तुपालविहारे अर्हतः श्रीनेमिनाथप्रमुखान् जिनेन्द्रान्नमति स्म ॥

श्लोकार्थ

હીરવિજયસૂરિજીએ વિવિધ પ્રકારનાં રત્નોથી રચિત ગગનચુંબી એવા "ઋષભકૂટ" નામના શિખર ઉપર આવીને બીજા કોટમાં પ્રવેશ કર્યો, તે કોટ જાણે મોક્ષપુરીમાં પ્રવેશ કરવા માટેનો દરવાજો ન હોય! તેની સમીપે આવેલા રાણા વીરધવલના મંત્રી વસ્તુપાળે ઉજ્જયન્ત ગિરિસમાન બંધાવેલા "વસ્તુપાલવિહાર"ને જોયો અને ત્યાં બિરાજમાન નેમિનાથ ભગવાનને નમસ્કાર કર્યા. ॥ ४७ ॥

ततः खरहताभिधां वसतिमभ्युपेत्य प्रभुः
स्ववासत इवागतं रचनयात्र नन्दीश्वरम् ।
सराजिमतिकां स्फुरच्चतुरिकां पुनर्नेमिनो
निभाल्य जिनपुंगवानिह तमामनंसीन्मुदा ॥ ४८ ॥

प्रभुर्हीरसूरिः इह खरहतवसतौ मुदा हर्षेण जिनपुंगवान् तमामतिशयेन पञ्चाङ्गप्रणतिनमस्तवादिना अनंसीन्नतवान्। किं कृत्वा । ततो रैवतावतार-वस्तुपालवसति-जिनपति-नमनानन्तरं खरहत इत्यभिधा यस्यास्ताद्दशीं वसतिं खरहतनाम्ना व्यवहारिणा स्वनाम्नैव कारितप्रासादमभ्युपेत्यागत्य। पुनः किं कृत्वा। नन्दीश्वरमभ्युपेत्य। उत्प्रेक्ष्यते—रचनया शिल्पघटनाविशेषेण कृत्वा इह शिखरवसतो स्ववासतो निजवसनस्थानात् अष्टमद्वीपभूमेरागतं संप्राप्तं नन्दीश्वरमष्टमद्वीपलक्षणं द्विपं वा सत्प्रसादलक्षणमिव। पुनः किं कृत्वा। अत्र खरहतवसतौ नेमिनो द्वाविंशतितमतीर्थकृन्नेमिनाथस्य स्फुरन्तीं रचनाचातुर्येण शोभमानां चतुरिकां 'चउरी' इति लोकप्रसिद्धां पाणिग्रहणस्थानं निभाल्य दृष्ट्वा। किंभूतां चतुरिकाम्। सराजिमतिकां सह राजीमत्या वर्तते या सा सराजिमतिका। राजिमतीत्यत्र जिकारो ह्रस्वोऽपि दृश्यते श्रेण्यामिव राजिः राजी। तथा च 'स्वामिन्मामुग्रसेनक्षितिपकुलभवां सानुरागां सुरूपां बालां त्यक्त्वा कथं त्वं

बहुमनुजरतां मुक्तिनारीमरूपाम् । वृद्धां मूकामकुल्यां करपदरहितामीहसेऽशेषविच्छागित्युक्तो राजिमत्या यदुकुलतिलकः श्रेयसे सोऽस्तु नेमिः ॥' इति पूर्वसूरिप्रणीतस्तवे । तथा 'काप्यतः' इति सारस्वतसूत्रेण कापि परे ह्रस्वे राजिमतिका ॥

શ્લોકાર્થ

ત્યાર પછી આચાર્યદેવે ખરહત નામના શ્રેષ્ઠીએ બંધાવેલા "ખરહતવિહાર"માં આવીને નંદીશ્વરદ્વીપનાં દર્શન કર્યાં. તે વિહાર જાણે પોતાના નિવાસસ્થાનને ત્યજીને આવેલો સાક્ષાત્ નંદીશ્વરદ્વીપ ન હોય તેવો દેખાતો હતો! ત્યારપછી રાજીમતિસહિત નેમિનાથ ભગવાનની ચોરીને જોઈને ત્યાં રહેલા જિનબિંબોનાં દર્શન-વંદન કર્યાં. ॥ ૪૮ ॥

स घोटकचतुष्किकादिमगवाक्षजैनालये
चकार च नमस्कृतिं चरणयोर्जिनोर्वीभृताम् ।
गिरेरिव विशेषके तिलकतोरणे श्रीजिना-
न्पुनर्मुनिमतङ्गजो नवनवैः स्तवैरस्तवीत् ॥ ४९ ॥

स सूरिर्घोटकचतुष्किका इति आदौ नवमादिमं पदं यत्र तादृशो गवाक्ष इत्यभिधानो 'घोडाचोकी गउख' इति नाम्नि जैनालये तीर्थकृत्संबन्धिनि मन्दिरे । प्रासादे इत्यर्थः । च पुनर्जिनोर्वीभृतां जिनराजानां चरणयोः पादयोः नमस्कृतिं प्रणामं चकार । पुनरपि मुनिमतङ्गजः साधुसिन्धुरः तिलकतोरणे 'तिलकुंतोरण' इति नाम्नि विहारे श्रीजिनान् श्रीमत्तीर्थकृतो नवनवैर्नूतनैर्नूतनैः तात्कालिकैः स्वकृतैः स्तवैः स्तोत्रैः अस्तवीत्तुष्टाव । उत्प्रेक्ष्यते—गिरेः श्रीशत्रुंजयाद्रेस्तिलके विशेषके इव ॥

શ્લોકાર્થ

ત્યારબાદ આચાર્યદેવે ઘોડીચોકીમાંની પ્રથમ ચોકીના ગવાક્ષમાં આવેલા જિનમંદિરમાં જિનેશ્વરભગવંતનાં ચરણે નમસ્કાર કર્યા, અને શત્રુંજયગિરિના તિલકસમાન "તિલકતોરણ"માં નવનવા સ્તોત્રો વડે ભગવંતની સ્તુતિ કરી. ॥ ૪૯ ॥

जिनाधिपसभाजनाप्लवविधानबद्धादरा-
रविन्दनयनाजनैः सममलंकृतं सर्वतः ।
जलाधिसुरयौवतैः प्रभुनिनंसयेव स्फुटी—
भवद्भिरमुना न्यभाल्यत पतङ्गकुण्डं ततः ॥ ५० ॥

ततस्तत्र तिलकतोरणे जिननमनानन्तरममुना सूरीन्द्रेण पतङ्गकुण्डं सूर्यकुण्डम्। कुण्डशब्दस्त्रिलिङ्गः। 'पेटो मठः कुण्डनीड—' इति लिङ्गानुशासने। न्यभाल्यत ददृशे। किंभूतम्। सर्वतः सर्वेष्वपि प्रदेशेषु सममेव एककालं समलंकृतं सम्यक्प्रकारेण शोभितम्। कैः। जिनाधिपानामृषभदेवतीर्थंकृतां सभाजनार्थं पूजाकृते। 'सभाजने पश्यति विस्मिते सा सभाजनं तत्र ससर्ज तेषाम्' इति नैषधे। 'तेषां देवानां सभाजनं पूजां ससर्ज चकार' इति तद्वृत्तिः। यः आप्लवः स्नानम्। 'स्नानं सवनमाप्लवः' इति हैम्याम्। तस्य विधाने करणे बद्ध आदरो बहुमानं यैस्तादृशैररविन्दनयनाकपैर्जनैः। स्त्रीनमूहैरित्यर्थः। उत्प्रेक्ष्यते—प्रभोर्हीरविजयसूरेर्निनंसयानन्तुमिच्छया स्फुटीभवद्भिः प्रकटीजायमानैः जलाधिसुराणां सलिलाधिष्ठायकदेवानां जलदेवतानां यौवतैर्युवतीसमूहैरिव॥ इति द्वितीयप्राकारप्रासादेषु देववन्दनम्॥

श्लोकार्थ

ते पछी आचार्यदेवे, जिनेश्वरभगवंतनी पूजा करवा माटे चारेबाजु रहेला स्नान करवामां आतुर एवा स्त्रीपुरुषना युगलोथी सुशोभित एवो 'सूरजकुंड' जोयो. ते युगलो जाणे आचार्यदेवने नमस्कार करवामाटे आवेला जलदेवताना देवयुगलो न होय ! ॥ ५० ॥

विजित्य कलिना समं दुरितदुर्धरद्वेषिणः
सुखं स्थितिमुपेयुषः शिखरिमण्डलाखण्डले।
ससालमणिमन्दिरं किमिह धर्मभूमीभुजो
न्यभालयदयं पुरः प्रवरवप्रवेश्मार्हतः॥ ५१॥

अयं हीरविजयसूरिः पुरोऽग्रतः अर्हतः ऋषभदेवतीर्थंकृतः सत्कः प्रवरः प्रकृष्टः वप्रः प्राकारो यत्र तादृग्वेश्म भवनं ससालं युगादिजिनविहारं न्यभालयत्पश्यति स्म। उत्प्रेक्ष्यते—इहास्मिन् शिखरिणां सर्वपर्वतानां मण्डलानां समूहानां मध्ये आखण्डलः शक्र इवाखण्डले सुखं सातं यथा स्यात्तथा स्थितिं निवासलक्षणामुपेयुषः प्राप्तवतो धर्मनाम्नो भूमिभुजः भूपालस्य सह सालेन प्राकारेण वर्तते यत्तत्ससालं तादृशं मणिमन्दिरं किं रत्नगेहमिव सुखं स्थितस्य। किं कृत्वा। कलिना कलिकालेन समं सार्धं दुरितानि पापान्येव दुर्धरानुत्कटान् दुष्टत्वात् द्वेषिणः सपत्नान् विजित्य सर्वात्मना पराभूय॥

श्लोकार्थ

आचार्यदेवे सुंदर अने मजबूत कोटथी सुशोभित "ऋषभविहार" जोयो. ते ऋषभविहार जाणे कलिकाळसहित पापरूप दुर्धर शत्रुओनो पराभव करीने पर्वतेन्द्र एवा शत्रुंजयपर्वत उपर सुखपूर्वक रही शकाय ते माटे धर्मराजाए बंधावेलो आकार सहित रत्नमहेल न होय तेवो शोभतो हतो ! ॥ ५१ ॥

स्फुरत्करतरङ्गितां स्फटिककल्पितारोहणा-
वलीमयममार्गयद्वरणगोपुराभ्यन्तरे ।
विमुच्य मृडमद्रिजापरिभवेन सापत्न्यतः
किमम्बरतरङ्गिणीं विदधतीं विरक्तेस्तपः ॥ ५२ ॥

मलीमसजनाप्लवैर्निजमपावनीभावुकं
पवित्रयितुमीयुषी किमथ वात्र शत्रुंजये ।
मुरारिमथनोदितस्वतनुजादिविश्लेषजा
सुखादुत सुधाम्बुधिः किमु तनोति तीर्थे तपः ॥ ५३ ॥

अयं सूरिर्वरणस्य प्राकारस्य गोपुरं प्रतोली तस्याभ्यन्तरे मध्ये स्फुरद्भिः करैः किरणैः कृत्वा तरङ्गाः कल्लोलाः संजाता अस्यामिति तरङ्गिता तादृशीं तथा स्फटिकैः श्वेतरत्नैः कल्पितां निर्मितामारोहणानां सोपानानामावलीं श्रेणीममार्गयत्पश्यति स्म । 'मार्गयति मृगयतेऽपि च मार्गति चेत्याहुरीक्षार्थे' इति क्रियाकलापे । उत्प्रेक्ष्यते—समान एकः पतिर्यस्याः सापत्नी तस्याः भावः सापत्न्यं ततः कारणादद्रिजायाः पार्वत्याः परिभवेन संतापेन । उद्विग्नेत्यध्याहार्यम् । मृडमीश्वरं विमुच्य त्यक्त्वा विरक्तेर्वैराग्यात्तपो विदधतीं तीर्थे तपस्यन्तीमम्बरतरङ्गिणीं गङ्गामिव । अथ वा पुनरुत्प्रेक्ष्यते—मलीमसा जात्या अन्त्यजाः कर्मणा महाक्रूरकर्माणो जीवादिघातनान्महापापिनो मलिनजनास्तेषामाप्लवैः स्नानकरणादिभिः कृत्वा अपावनीभावुकमपवित्रीभवनशीलं निजमात्मानं पवित्रयितुं पावनीकर्तुम् । तीर्थसेवया इत्यध्याहार्यम् । अस्मिन् सर्वतीर्थाधिराजे सौराष्ट्रमण्डलकमलाचूडामणौ श्रीशत्रुंजये ईयुषी समागतवती किमु । अर्थात्पूर्वप्रतिपादिता गङ्गेव वा । उताथ वा मुरारिणा नारायणेन यन्मथनं मन्दरगिरिणा कृत्वा आमूलाद्विलोडनं तस्मादुदितः प्रादुर्भूतो यः स्वस्य क्षीरसमुद्रस्यात्मनः तनुजानां 'लक्ष्मीः कौस्तुभपारिजातकसुरा धन्वन्तरिश्चन्द्रमाः धेनुः कामदुधा सुरेश्वरगजो रम्भादिदेवाङ्गना । अश्वः सप्तमुखोऽमृतं हरिधनुः शङ्खो विषं चाम्बुधे रत्नानीति चतुर्दशापि कविभिः संकीर्तितानि स्फुटम् ॥' एषां चतुर्दशानां मध्ये केचित्पुत्रा आदिशब्दात्काश्चित्पुत्र्यस्तासां विश्लेषो वियोगः तस्माज्जातं यदसुखं सुखादन्यत् विरुद्धं वा सुखस्याभावो वासुखम् । 'तदन्यत्तद्विरुद्धतदभावेषु नञो वर्तमानत्वात् त्रयोऽप्यर्थाः संगच्छन्ते' इति सारस्वतव्याकरणानुसारिवचः । एतावता दुःखं तस्मात्कारणात्सुधाम्बुधिः क्षीरसमुद्रो महानन्दपदप्रापकास्पदेऽत्र शत्रुंजयतीर्थे तपस्तनोति किमु । अशनादित्यागलक्षणं नियमविशेषं करोतीव ॥ युग्मम् ॥ इति सर्वाभ्यन्तरप्राकारप्रतोलीसोपानानि ॥

શ્લોકાર્થ

આચાર્યદેવે, પ્રાકારની મધ્યમાં દેદીપ્યમાન રત્નનાં કિરણોથી તરંગોરૂપે થયેલી

સ્ફટિક રત્ન વડે બનાવેલી સોપાનપંક્તિ જોઇ. તે સોપાનપંક્તિ જાણે પોતાની સપત્ની (શોક્ય) પાર્વતી વડે પરાભવ પામવાથી ઉદ્વિગ્ન બનેલી આકાશગંગા શત્રુંજય ઉપર તપ કરતી ન હોય! અથવા નીચ માણસોએ કરેલાં સ્નાન વડે અપવિત્ર બનેલા પોતાના પ્રવાહને પવિત્ર બનાવવા માટે શત્રુંજય પર્વત ઉપર આવેલી ગંગાનદી ન હોય! અથવા વિષ્ણુએ મંથન કરેલા ક્ષીર સમુદ્રમાંથી ઉત્પન્ન થયેલાં લક્ષ્મી, કૌસ્તુભમણિ, પારિજાત, દેવ ધન્વંતરિ, ચન્દ્ર, કામધેનુ, ઐરાવણ હાથી, રંભા આદિ અપ્સરાઓ, ઉચ્ચૈઃશ્રવસ અશ્વ, અમૃત, શાર્ઙ્ગધનુષ્ય, દક્ષિણાવર્તશંખ, અને વિષ તે રૂપ ચૌદ રત્નો સહિત (પોતાના પુત્રો આદિના વિયોગથી ઉત્પન્ન થયેલા દુઃખ વડે) ક્ષીરસમુદ્ર શત્રુંજય પર્વત ઉપર આવીને સુખપૂર્વક તપ કરતો ન હોય! તેવી સોપાન પંક્તિ શોભતી હતી. ॥ ५२ ॥ ॥ ५३ ॥

स हीरविजयप्रभुर्वरणगोपुरं प्राविश-
त्प्रवेशनमिवर्षभध्वजजिनावनीवज्रिणः ।
सुराम्बुधिवधूप्लवेऽम्बुजपरागपिङ्गीभव-
त्सितच्छद इव व्यभासत ततोऽस्य सोपानके ॥ ५४ ॥

अकब्बरसाहिसंमानितो हीरविजयामा प्रभुस्तपागणश्रमणस्वामी अर्थात्सूरिः वरणस्य मूलप्रासादप्राकारस्य गोपुरं प्रतोलीं प्राविशत् प्रविशति स्म । उत्प्रेक्ष्यते—ऋषभो वृषभो ध्वजश्चिह्ममूरुविषयलाञ्छनं यस्य युगादिरेव जिनानां सामान्यकेवलिनां मध्ये अवन्या भूमेर्वज्रिणः पुरंदरस्य । राज्ञ इत्यर्थः । प्रवेशनं सिंहद्वारमिव । ततो गोपुरप्रवेशानन्तरमस्य सर्वाभ्यन्तरवरणगोपुरस्य सोपानके आरोहणगणे सोपानानां समूहः सोपानकं तस्मिन् । समूहार्थे कप्रत्ययः । हास्तिकादिवत् । सूरिर्व्यभासत संशोभते स्म । क इव । सुराणां देवानामम्बुधेः समुद्रस्य वधूः पत्नी एतावता देवनदी तस्याः प्लवे पूरे गङ्गाप्रवाहे । स्वभावेन पद्मानि पीतकमलानि इत्युच्यन्ते । यथा स्नातस्यास्तुतौ—'हंसांसाहतपद्मरेणुकपिशक्षीरार्णवाम्भोभृतैः' इति । तानि च हेमसूरिणा नामग्राहं हैम्यामानीतानि न सन्ति, यथा पराणि वर्णभेदोच्चारणप्रोक्तानि । यथा—'रक्तोत्पलं कोकनदं श्वेते तु तत्र कुमुदं नीले तु स्यादिन्दीवरम् । श्यामे तूत्पलं स्यात्कुवलयम्' इति । तस्मात्तेषां स्वभावात्पीतिमैवावसीयते । ततोऽत्रापि अम्बुजानि पीतपद्मानि अथ वा कनकमयानीत्यध्याहार्यम् । तेषां परागा रजांसि तैस्तत्संगमात्पिङ्गीभवन्पीतो जायमानः सितच्छदो राजहंस इव ॥

શ્લોકાર્થ

જગદ્ગુરુએ મૂલપ્રાસાદના પ્રાકારના દરવાજામાં પ્રવેશ કર્યો અને મૂલપ્રાસાદ "ઋષભવિહાર"ની સોપાનશ્રેણીને અલંકૃત કરી. ત્યાં રહેલા આચાર્યદેવ, ગંગાના પ્રવાહમાં રહેલા પીતકમલની પરાગથી પીતવર્ણીય બનેલા રાજહંસની જેમ શોભતા હતા. ॥ ५४ ॥

चतुष्कमधिरोहणात्क्रमविहारयोरन्तरा
व्यलोकत समाजवत्सुकृतभूमिभर्तुः प्रभुः ।
पुनर्मणिहिरण्मयं जिननिकेतनं तत्पुरः
सुधाशवसुधाधरोल्लसितचूलिकाचैत्यवत् ॥ ५५ ॥

प्रभुर्हीरविजयसूरिः अधिरोहणादधस्तनसोपानात्क्रमादुपरितनसोपानागमनात सोपानक एव स्थितः । यत्र विहारयोर्मूलप्रासादप्राकारयोरन्तरा मध्ये चतुष्कं 'चौक' इति प्रसिद्धम् । प्रासादाङ्गणभूमिमित्यर्थः । व्यलोकत दृष्टवान् । किंवत् । समाजवत् । उत्प्रेक्ष्यते—सुकृतभूमिभर्तुः धर्माभिधानपार्थिवस्य समाजं सभामिव । पुनरन्यत्तत्पुरः तस्य चतुष्कस्याग्रे मणयः कर्केतनचन्द्रकान्तादिकास्तैर्युक्तं हिरण्मयं स्वर्णप्रधानं रत्नकाञ्चनरचितं जिननिकेतनमृषभदेवप्रासादं व्यलोकत ददर्श । किंवत् । सुधाममृतमश्नन्तीति सुधाशा देवास्तेषां वसुधाधरः पर्वतो मेरुगिरिस्तस्योल्लसिता उल्लासं प्राप्ता शोभासंयुक्ता जाता या चूलिका शिखा अधित्यका वा तस्याश्चैत्यवत्सिद्धायतनमिव ॥

अथैकविंशतिकाव्यैर्मूलप्रासादवर्णनम्—

શ્લોકાર્થ

જગદ્ગુરુએ સોપાનપંક્તિ ઉપર ચઢતા છેલ્લા પગથિયેથી મૂલપ્રાસાદની વચમાં આવેલો રંગમંડપ જોયો; તે જાણે ધર્મરાજાની રાજસભા ન હોય તેવો શોભતો હતો. વળી તેની આગળ સુવર્ણ અને રત્નમય એવો મૂલપ્રાસાદ જોયો; તે જાણે મેરૂપર્વતની ચૂલિકા ઉપર રહેલું સિદ્ધાયતન ન હોય ! ॥ ૫૫ ॥

तमीश इव तारकैर्ग्रहपतिर्ग्रहौघैरिवा-
सुरेश्वर इवासुरैरिव सुरैः सुरेशः पुनः ।
नरेन्द्र इव मानवैर्वृषभकेतनार्हद्गृहं
गृहैर्लघुभिरर्हतां स्फुरति सर्वतोऽलंकृतम् ॥ ५६ ॥

सर्वतः सर्वास्वपि दिक्षु अर्हतां भगवतां लघुभिरल्पप्रमाणैर्गृहैर्देवकुलिकाभिरलंकृतं शोभितं वृषभकेतनार्हतः वृषभदेवस्य गृहं चैत्यं स्फुरति दीप्यते । कैः क इव । तारकैर्ज्योतिर्भिस्तमीशश्चन्द्र इव । पुनर्ग्रहाणां मङ्गलादीनामोघैः समूहैर्ग्रहपतिः सूर्य इव । पुनरसुरैः दानवैरसुरेश्वरो दानवेन्द्रवत् । पुनः सुरैर्देवैः सुरेशो देवेन्द्र इव । पुनर्मानवैर्मनुष्यैः नरेन्द्रो राजेव ॥

તારાઓ વડે ચન્દ્ર મંગલ આદિ ગ્રહો વડે સૂર્ય, દેવો વડે ઇંદ્ર અને મનુષ્યો વડે

જેમ રાજા શોભે તેમ ચારે દિશામાં રહેલી નાની દેવકુલિકાઓ વડે અલંકૃત શ્રીઋષભદેવભગવંતનું મંદિર શોભે છે. ॥ ૫૬ ॥

क्षयं प्रलयकालजं निजमवेक्ष्य साक्षान्मरु-
त्सरिज्जलरयैरिवाक्षयपदोदयाकाङ्क्षया ।
उपासितुमुपागतैरिह पदारविन्दं प्रभो-
र्व्यलासि सदने वृषध्वजजिनस्य सोपानकैः ॥ ५७ ॥

वृषध्वजजिनस्य युगादिदेवस्य सदने गृहे मूलप्रासादे प्रवेशनमार्गे सोपानकैरारोहणैर्व्यलासि शुशुभे । अत्र कः स्वार्थं । उत्प्रेक्ष्यते—न विद्यते क्षयो विनाशो यत्र तादृशस्य पदस्य स्थानस्य संपदो वा उदय आविर्भावः तस्याकाङ्क्षया वाञ्छया इह शत्रुंजये प्रभो ऋषभस्य युगादिदेवस्य पदारविन्दं चरणकमलमुपासितुं सेवितुमुपागतैः समीपे समेतैर्मरुत्सरितो गङ्गाया जलरयैः पयःप्रवाहैरिव । किं कृत्वा उपागतैः । प्रलयकालः कल्पान्तषष्ठारकलक्षणः तस्माज्जातं निजमात्मीयं स्वसंबन्धिनं क्षयं विनाशं षष्ठारके क्रमाद्विशुष्यज्जला रथचक्रमार्गमात्रप्रवाहा गङ्गा भविष्यतीति श्रुतिः । सार्धद्विषष्टियोजनमानजलप्लवो विशोष्य द्विहस्तप्रमाणप्रवाहो भविता इति । अल्पशब्दस्याभाववाचित्वात्क्षय एव साक्षादागमोक्तवाक्यात्प्रत्यक्षेणैवावेक्ष्य दृष्ट्वा । ज्ञात्वा इत्यर्थः ॥

શ્લોકાર્થ

શ્રીઋષભદેવભગવંતના પ્રાસાદનાં પગથિયાં શોભે છે. તે પગથિયાં જાણે છઠ્ઠા આરામાં (પ્રલયકાળમાં) પોતાનો પ્રવાહ બે હાથ પ્રમાણ જાણીને મોક્ષપદની ઇચ્છાથી ભગવંતના ચરણકમલની ઉપાસના કરવા માટે આવેલો ગંગાનદીનો પ્રવાહ ન હોય ! ॥ ૫૭ ॥

इमा अनिशनिम्नगा बत जडाशया वक्रतां
वहन्त्यहरहस्तथा सप्रतिकूलवृत्तिप्रथाः ।
श्रितोत्पलमधुव्रताङ्कृतकुलक्षयैराश्रिता
धरन्ति च पदे पदे भुवनभङ्गरङ्गं पुनः ॥ ५८ ॥

नमन्निकटवर्तिनामवनिजन्मनां घातुकाः
स्वकीयवचनीयतामिति जिघांसुभिः सिन्धुभिः ।
निषेवितुमिव प्रभोः पुर उपागताभिर्बभे
यदाप्तसदनाग्रतो विविधरत्नसोपानकैः ॥ ५९ ॥

यस्य श्रीशत्रुंजयसंबन्धिनः आसादनस्य मूलजिनगृहस्याग्रतः पुरस्ताद्विविधानां नानाप्रकाराणां रत्नानां मणीनां सोपानकैः । स्वार्थे कप्रत्ययः । आरोहणैर्वा बभे शुशुभे । उत्प्रेक्ष्यते—निषेवितुमर्थात् युगादिजिनमुपासितुं प्रभोः ऋषभदेवस्य पुरोऽग्रे उपागताभिः संप्राप्ताभिः सिन्धुभिर्नदीभिरिव । किं कर्तुकामाभिः । इत्यमुना प्रकारेण स्वकीयामात्मीयां वचनीयतामपवादं जननिन्दां जिघांसुभिर्हन्तुमिच्छुभिरिव । इति किम् । यत् इमाः सिन्धवः अनिशं निरन्तरं निम्नगा नीचगामिन्यः । बत इति खेदे । पुनर्जडाशया मन्दमनस्काः जडिमाश्रितचित्ताः डलयोरैक्याज्जलभृताः । तथा अहरहः प्रतिवासरं वक्रतां कुटिलभावं वहन्ति धारयन्ति । तथा पुनरर्थे सप्रतिकूलवृत्तिप्रथाः सह प्रतिकूलवृत्तेः प्रतिलोमवर्तनस्य प्रथया विस्तारेण वर्तन्ते याः । तत्त्वतस्तु कूलं कूलं प्रति मर्यादामेदिनी प्रवृत्तेः प्रवर्तनस्य पयःप्रवहणस्य प्रथाभिः सह वर्तन्ते । ह्रादिसंयोगे क्वचिल्लघुरेव गण्यते । यथा—'बहुलभ्रामरमेचकतामने' इति वृत्तरत्नाकरवृत्तौ काव्यकल्पलतायां च । इति न दोषः । पुनरिमाः श्रितमङ्गीकृतमुत्कृष्टं पलं मांसं यैस्तादृशान्मांसखादयान् मधु मद्यमेव व्रतं मद्यं विना वयं नान्यत्पिबाम इति नियमो येषां तान् । तत्त्वतस्तु सेवित कुवलयान् भ्रमरान् । पुनः कृतो विहितः कुलानां स्वान्वयानां क्षयो विनाशो यैस्तैर्मत्स्यैराश्रिताः । पुनरिमाः पदे पदे स्थाने स्थाने भुवनानां जगतां भङ्गे विनाशे रङ्गं राग श्रयन्ति । तत्त्वतस्तु भुवनानां पानीयानाम् । 'नीरं वारि जलं दलं कमुदकं पानीयमम्भः कुशं तोयं जीवनजीवनीयसलिलार्णांस्यम्बु वाः शंबरम् । क्षीरं पुष्करमेघपुष्पकमलान्यापः पयःपाथसी कीलालं भुवनं वनं घनरसो यादोनिवासोऽमृतम्' ॥ इति हैम्याम् । भङ्गाः कल्लोलाः । 'तरङ्गे भङ्गवीच्यूर्मिः' इत्यपि हैम्याम् । तैरङ्गं श्रयन्ति । पुनरिमा नमन्तो नम्रीभवन्तः पादयोर्लगन्तः तथा निकटे समीपे वर्तन्ते आजीविकां कुर्वन्तीत्येवंशीलास्तादृशानामवनिजन्मनामवन्यां भूमावेव जन्मावतारो येषां त्रसानां द्वित्रिचतुःपञ्चेन्द्रियाणां तिरश्चां तथा । खेचरजलचरभूचराणामवन्यामेवोत्पत्तिर्न तु देवगृहादौ, स्थावराणां तूभयत्रापि दृश्यमानत्वात्त्रसानामुपादानम् । तत्त्वतस्तु अवनिजन्मनां वृक्षाणाम् । घातुका हननशीला इति श्वापदं निराकर्तुकामाभिः ॥ युग्मम् ॥ इति मूलप्रासादसोपानानि ॥

શ્લોકાર્થ

મૂલપ્રાસાદ ઋષભવિહારનાં વિવિધ પ્રકારનાં રત્નોથી બનેલાં પગથિયાં શોભે છે, તે જાણે જગતપ્રસિદ્ધ પોતાના અપવાદોને દૂર કરવાની ઇચ્છાથી ભગવંતની ઉપાસના માટે આવેલી અનેક નદીઓ ન હોય! નિરંતર નીચ ગામિની, જલને આશ્રય કરનારી હોવાથી મૂર્ખ, કુટિલતાને વહન કરનારી, સ્થાને સ્થાને કિનારાને વિસ્તારતી, માંસભક્ષિણી અર્થાત્ ઉત્પલ (કમલ) રસના લોલુપી ભ્રમરોને આશ્રય આપનારી, કૂલને ક્ષય કરનારી, મત્સ્યોને આશ્રય, મોટા મોટા તરંગો વડે જગતની રચનાનો ભંગ કરનારી તેમજ સમીપે નમ્ર બની રહેલાં વૃક્ષોનો ઘાત કરનારી, આવા આવા પોતાના અપવાદોને દૂર કરવાની ઇચ્છાથી આવેલી જાણે નદીઓ ન હોય; તેવાં પગથિયાં શોભે છે. ॥૫૮॥ ॥૫૯॥

जिनेन्द्रसदनाग्रतोऽद्युतदनल्पशिल्पोल्लस-
त्सुवर्णमणितोरणं शिवसुधाब्धिजाकार्मणम् ।
निबद्धमपवर्गपूः प्रथमसाधनप्रक्रमे
जिनावनिबिडौजसः किमिह मुक्तिगेहे गिरौ ॥ ६० ॥

जिनेन्द्रस्य ऋषभस्वामिनः सदनस्य प्रासादस्याग्रतः पुरस्तात् द्वाराग्रे अनल्पैर्बहुभिरनेकजातीयैः शिल्पैर्विज्ञानै रचनाविशेषैरुल्लसद्दीप्यमानं सुवर्णानां मणीनां सुवर्णमणिभिर्वा घटितं स्वर्णमाणिक्यमयं वा तोरणमद्युतत् द्योतते स्म दिदीपे । किंभूतं तोरणम् । शिवं मुक्तिरेव सुधाब्धिजा क्षीरसमुद्रपुत्री लक्ष्मीस्तस्याः कार्मणं संवननम् । वशिक्रियाकरणमित्यर्थः । उत्प्रेक्ष्यते– इहास्मिन्मुक्तिगेहे गिरौ शत्रुंजयशैले 'विमलगिरिमुत्तिनिलउ' इति शत्रुंजयकल्पे । तथा 'मुक्तिगेहः श्रियः पदम्' इति शत्रुंजयमाहात्म्ये जिनावनिबिडौजसः श्रीजिनराजस्य अपवर्गो मोक्षः स एव पूर्नगरी तस्याः प्रथममादित एव साधनं स्वायत्तीकरणं तस्य प्रक्रमे प्रारम्भे निबद्धं रचितमिव । राज्ञा हि नवीननगरग्रहणे पूर्वं तत्र तोरणं बध्यते इति रीतिः ॥

श्लोकार्थ

મૂલપ્રાસાદ ઋષભવિહારની આગળ અનેક પ્રકારની રચનાઓથી યુક્ત સુવર્ણમય અને રત્નમય તોરણ શોભે છે. તે તોરણ જાણે મુક્તિરૂપી લક્ષ્મીનું વશીકરણ ન હોય! અથવા "મુક્તિનિલય" એવા વિમલાચળ ઉપર જિનેશ્વર ભગવંતરૂપી રાજાને મોક્ષરૂપી નગરીને સ્વાધીન કરવાના પ્રારંભે બાંધેલું જાણે મંગલતોરણ ન હોય! ॥ ૬૦ ॥

निजस्य बहलीभवत्यपि महोत्सवे द्वारि मां
जना असहजा इव प्रतिपदं निबध्नन्त्यमी ।
जहीत मम दुःखितां किमिति वक्तुकामं प्रभोः
पुरः स्थितमुपेत्य यज्जिननिकेतने तोरणम् ॥ ६१ ॥

यदस्मिन् जिनस्यार्हतो निकेतने गृहे मूलविहारे उपेत्य कुतश्चिदागत्य तोरणं स्थितं तिष्ठति स्म । उत्प्रेक्ष्यते–प्रभोः ऋषभदेवस्य पुरः इत्यमुना प्रकारेण वक्तुकामं कथयितुमीहमानं किं स्थितमिव । इति किम् । हे प्रभो, निजस्यात्मनः निजस्यात्मीयस्य वा कस्यचिन्महोत्सवे अतिशायिनि महे बहलीभवति सान्द्रे निबिडे निरन्तरं जायमाने सति असहजा वैरिण इवामी भूमीलोकवर्तिनो लोका मां तोरणं प्रतिपदं स्थाने स्थाने गृहद्वारि बहिस्तान्मार्गे वा निबध्नन्ति इत्यमुना प्रकारेण विद्यमानां मम दुःखमस्यास्तीति

दुःखी दुःखिनो भावो दुःखिता तामसुखवत्तां जहि व्यापादय । निवारयेति यावत् ॥ इति तोरणम् ॥

શ્લોકાર્થ

મૂલપ્રાસાદમાં તોરણ શોભે છે, તે જાણે આમ કહેવા માટે ઇચ્છતું ન હોય કે 'હે પ્રભો, કોઈપણ મહોત્સવ પ્રસંગે મારા વૈરી લોકો મને ઘરના દ્વાર આદિ સ્થાને બાંધે છે, તે માટે હે ભગવંત, આ મારી દુઃખી અવસ્થાને દૂર કરો. ॥ ૬૧ ॥

यदीयविभवैः पराजितजगत्रयस्पर्धिभिः
स्वकीयमुपदीकृतं विजितवैजयन्तेन किम् ।
दधार मणिमण्डपं किरणखण्डिताखण्डरु-
क्प्रचण्डरविमण्डलं वृषभतीर्थकृन्मन्दिरे ॥ ६२ ॥

वृषभतीर्थकृतो युगादिदेवस्य मन्दिरं कर्तृ : किरणैः प्रतिदिशं प्रसरज्ज्योतिर्दण्डैः खण्डितं तिरस्कृतमखण्डाभिरक्षताभिः क्वचिदप्यप्रतिहताभिः रुग्भिः प्रचण्डं दुरालोकं रवेर्भास्करस्य मण्डलं बिम्बं येन तादृशं मणिमण्डपं विविधरत्नघटितजनाश्रयं दधार धत्ते स्म । उत्प्रेक्ष्यते—पराजिताः पराभवं लम्भिता जगत्त्रय्यास्त्रैलोक्यस्य त्रिभुवनसंबन्धिनः स्पर्धिनस्तुल्यविभवत्वेन संघर्षणशीला यैस्तादृशैर्यदीयविभवैः ऋषभदेवप्रासादसंबन्धिभिर्विभ्रमैः शोभातिशयैर्विजितेन परिभवं नीतेन वैजयन्तेन इन्द्रप्रासादेन उपदीकृतं ढौकितं स्वकीयमात्मसंबन्धिनमर्थात्किं मणिमण्डपमिव ॥

શ્લોકાર્થ

ઋષભવિહારમાં, પ્રસરતાં એવાં પોતાનાં કિરણોથી અપ્રતિહત કાંતિવાળા પ્રચંડ સૂર્યને તિરસ્કૃત કર્યો છે તેવો મણિમંડપ શોભે છે, તે મંડપ જાણે ત્રણે જગતના વૈભવની સાથે સ્પર્ધા કરે તેવા પોતાના વૈભવથી પરાભવ પામેલા ઇંદ્રના વૈજયંત નામના પ્રાસાદે ભેટણારૂપે આપેલો આ મંડપ ન હોય તેવો શોભે છે. ॥ ૬૨ ॥

अनन्यशिवकन्यकां मनसि धर्मभूमीभृता
प्रदातुमिह काङ्क्षतोचितवराय कस्मैचन ।
स्वयंवरणमण्डपं मणिसुवर्णचित्रश्रिया-
श्रितः किमु विधापितः स्फुरति यन्महामण्डपः ॥ ६३ ॥

यस्य मुलप्रासादस्य महान् गगनाङ्गणालिङ्गी मण्डपः स्फुरति शोभते । उत्प्रेक्ष्यते—अनन्यामसाधारणीं सर्वातिशायिनीं शिवकन्यकां मुक्तिकुमारिकां कस्मैचनानिर्दिष्टनाम्ने उचिताय भव्यादिनामग्रोभृते योग्याय वराय प्रधानाय परिणयनकामाय पुरुषाय इह सिद्धशैले प्रदातुमिच्छता पाणिं ग्राहयितुं वाञ्छता धर्मनाम्ना भूमीभृता राज्ञा मणीनां रत्नानां चन्द्रकान्तादीनामुपलक्षणात्कर्केतनादीनां सुवर्णानां काञ्चनानां चित्राण्यालेख्यानि तेषां श्रिया अथ वा चित्रकारिण्या आश्चर्यविधायिन्या शोभयाश्रितः कलितः स्वयंवरणमण्डपः स्वयं स्वेच्छया, न तु पित्रादिपारतन्त्र्यात्, वरणमर्थात्स्वामीप्सितवरयितुः कण्ठपीठे वरमालाक्षेपणेन स्वीकरणं यत्र तादृशो विधापितः किमु शिल्पिना निर्मापित इव ॥

શ્લોકાર્થ

મૂલપ્રાસાદમાં ગગનચુંબી મંડપ શોભે છે; તે જાણે સર્વોત્કૃષ્ટ મુક્તિરૂપે કન્યાને કોઈ યોગ્ય વરની સાથે પાણિગ્રહણ કરાવવાને ઇચ્છતા ધર્મરાજાએ મણિ અને સુવર્ણની આશ્ચર્યકારી રચનાવાળો સ્વયંવર મંડપ કરાવ્યો ન હોય! ॥ ૬૩ ॥

अवेत्य कलितौकसं नभसि सिंहिकानन्दनं
वनान्मिलितुमागताः किमिह गोत्रहार्दादमी ।
यदाप्तगृहकंधरास्फुरदमानपञ्चाननाः
परां श्रियमशिश्रियन्नमृतकान्तिकान्तद्विषः ॥ ६४ ॥

यस्य विमलाचलशिखरिशेखरस्याप्तगृहस्य जैनप्रासादस्य कंधरायां शिखरोपत्यकायां स्फुरन्तो दृश्यमानाः शोभमाना वा अमानाः प्रमाणातीताः अतिबहवो ये पञ्चानना मृगेन्द्राः। 'यदनेककलौधकंधराहरिभिः कुक्षिगतीकृता इव' इति नैषधेऽपि। परां प्रकृष्टां श्रियं शोभामशिश्रियन् लभन्ते स्म। किंभूताः। अमृतकान्तिकान्ताश्चन्द्रमणयस्तेषां द्विषः श्वेतमविभ्रमवैरिणः। उत्प्रेक्ष्यते—नभसि आकाशे कलितौकसं निर्मितनिकेतनम्। गगनस्थायिनमित्यर्थः। सिंहिकानन्दनं स्वर्भाणुं केसरिणं वा अवेत्य ज्ञात्वा गोत्रस्य ज्ञातेर्हार्दात्। स्नेहला हि स्वजनाः स्वजनं प्रस्तावे मिलितुमायान्त्येवेति प्रथमव्यवहारतः वनात्स्वकाननात्सकाशात् अमी प्रत्यक्षलक्ष्याः पारीन्द्राः मिलितुं मिलनार्थमिह प्रासादोपरितनप्रदेशे आगताः समेता इव ॥

શ્લોકાર્થ

અનેક સિંહોથી સુશોભિત એવી શિખર ઉપરની ભૂમિ અતિશય શોભા ધારણ કરે છે; તે જાણે આકાશમાં રહેલા સિંહિકાનંદન કેશરીસિંહને (એક પક્ષે રાહુ) જાણીને જ્ઞાતિસ્નેહથી પ્રેરાઈને વનમાંથી મળવા માટે આવેલા સગોત્રીય સિંહો ન હોય! ॥ ૬૪॥

वने वसतिरेकिका जनुषि नः प्रसूतिः परि-
च्छदो न कदनं सदा पुनरनेकपानां हहा ।
जहीत्यसुखमाशु नः किमिति भाषितुं नाभिजं
भजन्ति गृहकंधरागतमृगेश्वराः श्रीजिनम् ॥६५॥

गृहकंधरायामर्थाज्जिनसदनशिखरोपत्यकायां गताः शिल्पेन स्थिताः मृगेश्वराः केसरिणः नाभेर्नाम्नो नृपाज्जायते स्म इति नाभिजः अथ च नाभेस्तुन्दकूपिकाया जायते स्मेति नारायणनाभिपुण्डरीकोत्पन्नं ब्रह्माणं श्रिया अतिशयलक्ष्म्या युक्तो जिनस्तीर्थकृत्तं तथा श्रिया समुद्रनन्दिन्या युतो जिनो नारायणस्तं भजन्ते सेवन्ते । इत्यमुना प्रकारेण नोऽस्माकमसुखं दुःखं जहि घातय । इति किम् । हे जगन्नाथ, नोऽस्माकं वसतिर्वासो वने न च नगरादौ । पुनर्जनुषि अखिलेऽप्यवतारे एकैव प्रसूतिः संतानमेकमेव नान्यत् । 'एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम्' इति वचनात् । पुनः परिच्छदः परिवारोऽपि न स्ववपुःसहायत्वमेव । पुनर्हहा इति खेदे । सदा सर्वकालमपि अनेकान्बहून् लोकान् पान्ति आजीविकाभिः रक्षयन्ति पालयन्तीत्यनेकपाः । 'बन्धनस्थोऽपि मातङ्गः परेषां मरणक्षमः' इति सूक्तवचनात् । सन्तो हस्तिनश्च तेषां कदनं व्यापादनं मारणम् । 'निर्ग्रन्थनं प्रमथनं कदनं निबर्हणम्' इति हैम्याम् । घातनाभिधानानि ॥ इति चैत्यकंधरामृगेन्द्राः ॥

શ્લોકાર્થ

જિનપ્રાસાદના શિખર ઉપર કોતરેલા સિંહો જાણે ભગવંતને આ પ્રમાણે કહેવા માટે આશ્રય કરીને રહ્યા ન હોય કે "વનવાસ, એકાકીપણુ, આખી જિંદગીમાં એક જ સંતાનનો જન્મ, અસહાય અને હાથીઓને કદર્થના કરવી, અમારાં આ દુઃખોને હે ભગવન, જલદીથી દૂર કરો!" ॥ ૬૫ ॥

युगादिजिनमन्दिरे शिखरमम्बराडम्बरं
विडम्बयति चण्डरुक्किरणमण्डलं वैभवैः ।
पुनर्निजसपक्षतामिव समीहमानो जिनं
भजन्नमरभूधरो भुवनकामितस्वस्तरुम् ॥ ६६ ॥

युगादिजिनः प्रथमतीर्थकरस्तस्य मन्दिरं गृहं प्रासादस्तत्राम्बरे आकाशे आडम्बरः शोभातिशयो यस्य तादृशं शिखरं शृङ्गं वैभवैः सुषमाभिः कृत्वा चण्डरुचः सूर्यस्य किरणमण्डलं ज्योतिःपुञ्जं विडम्बयति धिक्करोति अनुकरोति वा । यदुक्तम्—'विकलयति कलाकुशलं हसति शुचिं पण्डितं विडम्बयति । अधरयति धीरपुरुषं क्षणेन मकरध्वजो

देवः ॥' इति चम्पूकथायां विडम्बनार्थः । 'पुण्डरीकातपत्रस्तं विकसत्कासचामरः । ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥' इति रघौ । अनुकरणार्थोऽत्र । इत्यर्थद्वयमपि । उत्प्रेक्ष्यते—पुनर्द्वितीयवारमिन्द्रेण छिन्नपक्षत्वात् अपरवेलायां निजस्यात्मनः सपक्षतां पक्षयुक्तत्वम् । पूर्वं सर्वेऽपि पर्वताः सपक्षा आसन् । ततः स्वेच्छयोड्डीयोड्डीय यत्र तत्राप्यकाण्ड पवातर्किता आगत्य पतन्तः सन्तः पृथिवीमतीव व्याकुलीकुर्वन्ति स्म । ततः पृथिवी स्वर्लोके पुरंदरपुरो गत्वा मुत्करोति स्म । तदनु दम्भोलिपाणिना सादरं सस्नेहं पृष्टा सती लोचनयुगलगलद्बाष्पपयःप्लुवा सगद्गदस्वरं कथंकथमपि कथयामास । यत् 'मध्यमलोके समग्रा अपि गिरयः सपक्षत्वाद्यथाकाममुत्पत्योत्पत्य स्वरुचितस्थाने निपतन्तो मामतिभारभङ्गुरगात्रीं कुर्वाणाः खेदखिन्नमनस्कां विदधते । तस्मादहं तदतिगरिमोद्गारिस्फारभारासासहितया पातालमूलं प्रवेक्ष्यामि ।' इति वसुधावचनश्रवणानन्तरं संजातातिकोपेन पुरहूतेन स्वपाणिप्रज्वलज्ज्योतिर्ज्वालाकरालदम्भोलिना कृत्वा सर्वेषामपि पर्वतानां पक्षाः क्षणाच्छेदिताः-इति पुराणोक्तिः श्रूयते । अथ पुनः पक्षाभ्यां सहितत्वं समीहमानो वाञ्छन् भुवनानां तात्स्थ्यात्तद्व्यपदेशात्त्रिभुवनजनानां सुरासुरनराणां कामिते वाञ्छितप्रदाने स्वस्तरुं कल्पवृक्षं तादृशं नाभेयं देवं भजन् सेवमानः अमरभूधरो मेरुरिव ॥

શ્લોકાર્થ

જિનપ્રાસાદ ઉપર રહેલાં શિખરો પોતાના વૈભવથી પ્રચંડ એવા સૂર્યમંડળનો તિરસ્કાર કરે છે; તે શિખરો જાણે મેરૂપર્વત પુનઃ સપક્ષ (પાંખો સહિત) બનવાની ઇચ્છાથી જગતને ઇષ્ટ ફુલની સિદ્ધિ આપવા માટે સાક્ષાત્ કલ્પવૃક્ષ સમાન વિમલાચલની ઉપાસના કરતો ન હોય! (પુરાણમાં કહ્યું છે કે ' બધા જ પર્વતો પક્ષસહિત હતા, તેથી સ્વેચ્છાએ ઊડી ઊડીને પોતાના ઇષ્ટ સ્થાનમાં આવીને રહેતા હતા. પરંતુ પર્વતોના અતિભારથી દુઃખી થયેલી વસુધા (પૃથ્વી) સ્વર્ગમાં ઇંદ્ર પાસે ગઈ. ઇંદ્રે સ્નેહાળ દૃષ્ટિથી જોઈને પૂછ્યું, ત્યારે તે અશ્રુજલ વરસાવતી ગદ્ગદ સ્વરે બોલી કે " હે મહારાજ, મધ્યલોકના બધાય પર્વતો પાંખોસહિત હોવાને કારણે પોતાની મરજી મુજબ ઊડી ઊડીને જ્યાં ત્યાં પડે છે, તેથી તેઓનો અતિભાર સહી નહીં શકવાથી હું પાતાળમાં ચાલી જઈશ." વસુધાનાં આવાં વચન સાંભળીને ઇંદ્રે પોતાના જાજ્વલ્યમાન વજ્રથી ક્ષણ માત્રમાં બધાયે પર્વતોની પાંખો છેદી નાખી! આથી મેરૂ પર્વત સપક્ષ બનવાની ઇચ્છાથી જાણે વિમલાચલની આરાધના ન કરતો હોય! એમ કવિ કલ્પના કરે છે.) ॥ ૬૬ ॥

अवेत्य जगदीहितं प्रददतं कदम्बाचलं
द्विधापि वसुधातलेऽखिलमहाभयालम्भिनम् ।

दरेण धरवैरिणः किमु भजन्ति यं भूधरा
यदल्पशिखरच्छलाल्पिततनूलतालम्बिनः ॥ ६७ ॥

यस्य प्रासादस्य अल्पानि मूलशिखरापेक्षया लघूनि यानि शिखराणि शृङ्गाणि तेषां छलेन कपटेन अल्पिता अल्पाः कुर्वन्तीति अल्पयन्ति अल्प्यन्ते स्मेत्यल्पिताः अल्पाः कृताः। 'मृषा न चक्रेऽल्पितकल्पपादपः प्रणीय दारिद्र्यदरिद्रतां नृपः' इति नैषधे। यास्तनूलताः शरीरयष्टीरालम्बन्ते आश्रयन्ते इत्येवंशीला भूधराः पर्वताः कदम्बाचलं शत्रुंजयशैलम्। 'लोहिच्चउ तालज्झउ कयंवुत्ति' इति शत्रुंजयकल्पे कदम्ब इत्यभिधानम्, तथा एकचत्वारिंशदभिधानेष्वपि कदम्बाभिधास्तीति। यं कदम्बाचलं भजन्ते। उत्प्रेक्ष्यते—धराणां गिरीणां वैरिणः शत्रोरिन्द्रस्य दरेण किमु भयेनेव। किं कृत्वा। वसुधातले भूमण्डले द्विधापि द्वाभ्यां प्रकाराभ्याम् ऐहिकामुष्मिकभेदात् जगतां भुवनानामीहितमभीप्सितं प्रददत् प्रकर्षेण सर्वोत्कृष्टतया विश्राणयन्तम्। अर्थात्स्वसेवाकारिणं शत्रुंजयाद्रिमवेत्य ज्ञात्वा। तथा अखिलानां समस्तानां महाभयानां रोगगजमृगेन्द्रदवानलविषधरसंग्रामसमुद्रवैरशत्रुप्रभृतीनां प्रबलभीतीनामालम्भो व्यापादनमस्यास्तीति अर्थात्स्वाश्रितानां तादृशं वयमवेत्य शास्त्रवचसा लोकपरंपरया वा ज्ञात्वा ॥

श्लोकार्थ

મેરૂઆદિ પર્વતો પોતપોતાનાં શરીર સંકોચીને જાણે જિનપ્રાસાદનાં શિખરોરૂપે રહ્યા ન હોય! જગતને ઇહલૌકિક અને પારલૌકિક ઉભય પ્રકારની સિદ્ધિને આપનાર તેમજ ઇહલૌકિક અને પારલૌકિક સર્વે ભયોને દૂર કરનાર એવા કદંબગિરિને (શત્રુંજયનાં એકતાલીશ નામો પૈકી કદંબગિરિ પણ એક નામ છે) જાણીને પોતાના શત્રુ ઇન્દ્રના ભયથી બધાયે પર્વતો જાણે વિમલગિરિની ઉપાસના કરવા માટે આવેલા ન હોય! ॥ ६७ ॥

जगद्गिरिविजित्वरं महिमभिर्महीभृद्वरै-
रवेत्य भुवि भूधराभिनवसार्वभौमं नगम्।
स्वबालशिखरैरमुं किमु न सेवितुं प्रेषितैः
कुमारशिखरैर्बभे यदतितुङ्गशृङ्गाश्रयैः ॥ ६८ ॥

यदतितुङ्गे यस्य प्रासादस्य अतिशयेन गगनालिङ्गित्वेन अत्युच्चैस्तरे महति शृङ्गे मूलशिखरे आश्रयो निवासो येषाम्। मूलशृङ्गे लगन्ति अनेकानि अन्यानि अल्पानि शिखराणि

भवन्तीति प्रत्यक्षमपि लक्ष्यते। तादृशैः कुमारशिखरैर्लघुशृङ्गैः बभे शुशुभे। कुमारशब्दोऽत्र केवलं लघुत्वमेव वक्ति। यथा नैषधे—'रचयति रुचिः शोणीमेतां कुमारितरा रवेः। अत्र तु कुमारितरा रवेः। कुमारितरा प्रथमनिर्गतत्वेन लघ्वी रुचिः कान्तिः। तथात्रापि महच्छिखरापेक्षया लघूनि अत एव कुमाराणि शृङ्गाणि इति। उत्प्रेक्ष्यते—महीभृतां भरैः गिरीणां गणैः राज्ञां चक्रैश्च भुवि पृथिव्यां भूधराणां शैलानां भूपतीनां च मध्ये अभिनवं नवीनं प्रादुर्भूतं सार्वभौमं चक्रवर्तिनममुं नगं शत्रुंजयाचलमवेत्य विज्ञाय तं सेवितुमुपासितुं प्रेषितैः स्वबालशिखरैः किमु निजनिजडिम्भशृङ्गैरिव। राजानो हि चतुर्दशस्वप्नसूचितनवीनोत्पन्नचक्रवर्तिनं विज्ञाय स्वस्वकुमारनन्दनांस्तत्सेवार्थं प्रेषयन्तीति स्थितिः। यथा कल्पसूत्रव्याख्याने महावीरचरित्रे—'गजवृषभपञ्चननादिमचतुर्दशस्वप्नसूचितमहावीरदेवजन्म ज्ञात्वा श्रेणिकचण्डप्रद्योतादयः कुमाराः सेवार्थं स्वपितृभिः प्रहिताः। इति किम्। नगं महिमभिस्तुङ्गताभिः। यदुक्तम्—'सर्वेषामपि शैलानामुन्नतो विमलाचलः। यदारोहेण लोकाग्रं प्राप्यते बालकैरपि ॥' इति वचनात्तुङ्गिमा। माहात्म्यमस्य तु सर्वेभ्योऽभ्यधिकं प्रसिद्धमेवास्ति। जगत्सु विश्वेषु ये गिरयः पर्वताः पर्वतप्रायाः उच्चैस्तरत्वेनाभिमानितया वा तुङ्गा। यथा—'तं मानतुङ्गमवशात्समुपैति लक्ष्मीः' इति भक्तामरस्तवे। तेषां विजित्वरं जयनशीलम् ॥ इति शिखरम् ॥

શ્લોકાર્થ

ગગનચુંબી શિખરને આશ્રયીને રહેલાં નાનાં નાનાં શિખરો શોભે છે. તે જાણે જગતના પર્વતોનો વિજય કરનારા મહામહિમાવંત નૂતન ચક્રવર્તી એવા વિમલાચલને જાણીને પર્વતોના સમૂહે પોતાનાં બાલશિખરોને ગિરિચક્રવર્તી વિમલાચલની સેવા કરવા માટે જાણે મોકલ્યા ન હોય ! ॥ ૬૮ ॥

धनादि जगदीहितं प्रभवितास्मि दातुं पुनः
शिवादिकमलाकरं प्रणय मां प्रभो त्वामिव ।
इतीव जगदीश्वरं गदितुमुत्सुकीभावुकः
समेत्य सुमनोनिपो भजति चैत्यशृङ्गे स्थितः ॥ ६९ ॥

सुमनोनिपः कामकुम्भः समेत्य स्वर्गादागत्य चैत्यशृङ्गे प्रासादशिखरे स्थितस्तिष्ठन् सन् जगदीश्वरं त्रिभुवननायकं श्रीऋषभदेवं भजति उपास्ते। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण गदितुं कथयितुमुत्सुकीभावुकः उत्कण्ठीभवनशीलः सन्निव। इति किम्। हे प्रभो त्रैलोक्यनाथ, अहं धनादि द्रव्यभोज्यवस्त्राभरणादिकं जगदीहितं जनमनःकामितं दातुं प्रभवितास्मि समर्थो भवामि। पुनस्त्वं मां शिवादिकमलाकरं स्वर्गापवर्गप्रमुखलक्ष्मीकारकं प्रणय कुरु। कमिव। त्वामिव। यथा त्वां स्वःसिद्धिकमलाकारिणं निगदन्ति ॥

શ્લોકાર્થ

જિનપ્રાસાદના શિખર ઉપર રહેલો કળશ (કામકુંભ) જાણે યુગાદિદેવની ઉપાસના કરતો ન હોય! અર્થાત્ જાણે ભગવંતની પાસે આવી વિજ્ઞપ્તિ કરતો ન હોય કે "હે ભગવંત, જગતનાં જીવોને વસ્ત્ર, આભૂષણ આદિ ઇષ્ટવસ્તુને આપવામાટે તો હું સમર્થ છું પરંતુ આપની જેમ મને પણ સ્વર્ગાપવર્ગની લક્ષ્મીને આપનારો બનાવો!" ॥ ૬૯ ॥

विधास्यति विभोरहर्निशमुपास्तिमभ्येत्य यः
स मद्वदमृतस्फुरन्नुपरिसंस्थितिं लप्स्यते ।
विसृत्वरविनिःसरत्करभरैरिदं प्राणिनां
पुरः प्रवदतीव यत्कनकक्लृप्तकुम्भः स्वयम् ॥ ७० ॥

यस्य चैत्यस्य कनकेन काञ्चनेन क्लृप्तो रचितः कुम्भः कलशः विसृत्वरैः प्रसरणशीलैः विनिःसरद्भिर्बहिर्निर्गच्छद्भिः करभरैः किरणसमूहैःहस्तसंघातैश्च कृत्वा स्वयमात्मना प्राणिनां सर्वेषां जगज्जन्तूनां पुरः पुरस्तात् इदमेतस्मिन्नेव काव्ये कथ्यमानं प्रवदति प्रकर्षेण कथयतीव । इदं किम् । हे प्राणिनः, यो जनः अभ्येत्य भगवत्पार्श्वे समागत्य अहर्निशमहोरात्रं विभोः ऋषभदेवस्योपास्तिं सेवां विधास्यति करिष्यति स पुमान् अमृते मोक्षे स्फुरन् कर्मराहित्याज्ज्योतिर्मयत्वाद्दीप्यमानः सन् उपरि त्रिभुवनस्थाप्युपरितनप्रदेशे लोकाग्रे संस्थितिं निवासं लप्स्यते प्राप्स्यति । किंवत् । मद्वत् । यथाहं पार्थिवः कलशोऽहर्निशं विभुं सेवमानः अमृतेन पानीयेन स्फुरन् पूर्णत्वेन प्रकटीभवन् सर्वेषामपि चक्षुर्लक्ष्यः संपद्यमानः सन् उपरि जनमस्तकोपरि संस्थितिं लभे प्राप्नोमि ॥ इति चैत्यकलशः ॥

શ્લોકાર્થ

જિનપ્રાસાદ ઉપર રહેલો સુવર્ણકળશ પોતાનાં પ્રસરતાં કિરણોરૂપી હાથ વડે મનુષ્યોને જાણે આ પ્રમાણે કહેતો ન હોય કે 'હે પ્રાણીઓ! અમૃતથી પરિપૂર્ણ એવો હું જેમ મનુષ્યના મસ્તક ઉપર રહેવાની સ્થિતિ પામ્યો છું તેમ જે પ્રાણી ઋષભદેવ ભગવંતની નિરંતર ઉપાસના કરશે તે અમૃત-જન્મમરણરહિત બનીને લોકના અગ્રભાગ ઉપર સ્થિતિ કરશે.' ॥ ૭૦ ॥

विभाव्य भुवनत्रये स्वविभवाङ्कारव्रजा-
न्विजेतुमनसामुना किमु जिनेशितुः सद्मना ।
सपत्ननिवहस्मयाम्बुनिधिमाथमन्थाचलं
शिरःशिखरसंस्फुरन्निबिडदण्डरत्नं दधे ॥ ७१ ॥

चैत्यशिखरे दण्डो भातीति संबन्धः । उत्प्रेक्ष्यते—अमुना ऋषभकूटकमलामौलिचूडामणिना जिनेशितुर्वृषभदेवस्वामिनः सद्मना मन्दिरेण ऋषभचैत्येन शिरःशिखरे उपरितनशृङ्गे संस्फुरत् वज्ररत्ननिर्मितत्वात् दीप्यमानं वा निबिडं दृढमभेद्यं दण्डरत्नं दधे किमु धृतमिव । किंभूतम् । सपत्नानां वैरिणां निवहस्य गणस्य यः स्मयः अहंकारः स एवाम्बुनिधिः समुद्रः तस्य माथे मथने मन्थाचलं क्षुब्धपर्वतं मन्दरगिरिम् । 'पाथोधिमाथसमयोत्थितसिन्धुपुत्रीपत्पङ्कजार्पणम्' इति, तथा 'मन्थानगः स भुजगप्रभुवेष्टिघृष्टिः' इति द्वयमपि नैषधे । किंभूतेन सद्मना । त्रिजेतुमनसा पराभवितुकामेन । अर्थात्स्वस्पर्धितभुवनत्रये नाकिनागगेहमहीत्रितये स्वेषामात्मीयानां विभवानां शोभातिशयानामङ्कारांणां जैत्रप्रतिमल्लानां व्रजान समूहान्विभाव्य विलोक्य विज्ञाय वा । 'दूरं गौरगणैरहंकृतिभृतां जैत्राङ्कारे चरत' इति नैषधे ॥

श्लोकार्थ

ચૈત્યના શિખર ઉપર રહેલો દંડ શોભે છે. તે જાણે ત્રણે જગતના અહંકારી મલ્લોનો પરાભવ કરવાને ઇચ્છતા એવા ઋષભવિહારે પોતાના શિખર ઉપર શત્રુસમૂહના અહંકારરૂપી સમુદ્રનું મંથન કરવા માટે મેરૂસમાન દંડ ધારણ કર્યો ન હોય ! ॥ ७१ ॥

निभाल्य नलिनीधवं स्वविभवेन संस्पर्धितां
दधानमधिकं क्रुधोद्धुषितवर्ष्मणार्चिर्मिषात् ।
जिनाधिपतिवेश्मना सुरपथे स्वदण्डस्फुर-
त्करः परिबुभूषया द्विष इवैष ऊर्ध्वीकृतः ॥ ७२ ॥

निभाल्य नलिनीधवं दण्डो दीप्यते । जिनाधिपतेर्वृषभस्वामिनो वेश्मना मन्दिरेण विहारेण एष सर्वजनप्रत्यक्षः स्वस्यात्मनो यो दण्डः स एव स्फुरन् प्रकटीभवन्करो हस्तः द्विषो भास्वल्लक्षणवैरिणः परिबुभूषया चपेटामुष्टिप्रहारादिभिः पराभवितुमिच्छया सुरपथे आकाशे ऊर्ध्वीकृत उन्नतो विहित इव । किंभूतेन वेश्मना । अर्चिर्मिषात्सर्वतः स्फुरत्कान्तिकपटात् अधिकं यथा स्यात्तथा क्रुधा कोपेन कृत्वा उद्धुषितमुत्कण्टकितं प्रोच्चैर्भूतरोमराजि वर्ष्म शरीरं यस्य । किं कृत्वा । स्वेनात्मीयेन विभवेन शोभासमुदायेन सार्धं संस्पर्धितां सम्यक् मनसा वचसा कायेन च स्पर्धनशीलतां दधानं बिभ्राणं नलिनीधवम् । 'नलिनीप्रेमनिबद्धो मानसगमनाय सत्वरो हंसः । न च गच्छति न च तिष्ठति उभयरसव्याकुलीभूतः ॥' भास्करं निभाल्य दृष्ट्वा ॥ इति चैत्यशृङ्गदण्डः ॥

શ્લોકાર્થ

પોતાની સાથે સ્પર્ધા કરતા સૂર્યને જોઈને સ્ફુરાયમાન કાંતિના બ્હાને જાણે ક્રોધાતુર બનેલો જિનપ્રાસાદ રોમાંચ ધારણ કરતો ન હોય, તેમ પોતાના શત્રુ સૂર્યનો પરાભવ કરવા માટે જાણે દંડરૂપી હાથ ઊંચો કર્યો ન હોય ! ॥ ७२ ॥

विजित्वरविभूतिभिः प्रतिपदं परिस्पर्धिनो
विजित्य जिनसद्मना जगति वैजयन्तादिकान् ।
द्विषद्विजयबोधिकाध्रियत मूर्ध्नि मन्येऽमुना
विहारशिखरे मरुत्तरलवैजयन्ती व्यभात् ॥ ७३ ॥

विहारस्य ऋषभचैत्यस्य शिखरे उच्चभृङ्गे मरुता पवनवेगेन तरला चञ्चला अन्दोलायमाना वैजयन्ती महापताका व्यभाद्भासते स्म । तत्राहमेवं मन्ये विचारयामि । उत्प्रेक्ष्यते वा—अमुना सर्वप्रासादमूलभूतेन जिनगृहेण युगादिजिनचैत्येन प्रतिपदं पाताललोके स्वर्लोके भूलोके च स्थाने स्थाने क्रमं क्रमं वा । निजेनात्मना सह स्पर्धिनः स्पर्धाविधायिनः विरोधिनो वा जगति विश्वे वैजयन्त इन्द्रप्रासाद आदौ येषां ते । स्वार्थे के । आदिकास्तान्विजित्वरीभिः प्रतिस्पर्धिनां विशेषेण जयनशीलाभिः पुवद्भावे विभूतिभिः स्वश्रीभिर्विजित्य पराभूय द्विषतां सर्ववैरिणां विजयस्य पराभवनस्य बोधिकां ज्ञापयित्रीं परेषां कथनशीलां मूर्ध्नि निजमस्तके वैजयन्ती ध्वजोऽध्रियत धृतेव ॥

શ્લોકાર્થ

ઋષભવિહારના શિખર ઉપર પવનથી ચંચળ બનેલી મહાપતાકા (ધ્વજા) શોભે છે. હું માનું છું કે : 'સ્થાને સ્થાને રહેલા જગતમાં વૈજયંત આદિ પ્રાસાદોને પોતાના વિજયી વૈભવ વડે જીતીને, જિનપ્રાસાદે જાણે પોતાના મસ્તકે શત્રુ પર વિજય સૂચવનારી જયપતાકા ધારણ કરી ન હોય !' ॥ ७३ ॥

दिनं दिनमुदीत्वरद्युमणिचण्डिमाडम्बरो-
द्धुरप्रसमरप्रभाप्रकरतापसंतापितः ।
रसं रसितुमम्बराम्बुधिवधूप्रवाहान्तरे
दिवि प्रकटितो ध्वजः स्वरसनेव जैनौकसा ॥ ७४ ॥

ध्वजो राजते इति संबन्धः। जैनौकसा अर्हत्प्रासादेन भगवत्संबन्धिविहारेण अम्बरस्याकाशस्य या अम्बुधेः समुद्रस्य वधूः पत्नी नदी पताका गगनापगा स्वर्गङ्गा तस्याः प्रवाहस्य पयःपूरस्यान्तरे मध्ये रसं पानीयं रसितुं पातुम्। 'क्षारं जलं जलनिधे रसितुं क इच्छेत्' इति भक्तामरस्तोत्रे। दिवि आकाशे। उच्चैरित्यर्थः। उत्प्रेक्ष्यते—प्रकटिता स्फुटीकृता यस्माद्बहिर्विहिता ध्वजरूपा पताका काया स्वरसना आत्मजिह्वेव। कुतः कारणात् दिनं दिनम्। अत्र प्रातरध्याहारः कार्यः। प्रतिवासरम्। 'दिनेश्वरश्रीरुदयं दिने दिने'। अत्रापि सप्तमी वा। उदीत्वरस्योदयनशीलस्य द्युमणेर्भास्करस्य चण्डिमस्तीव्रताया आडम्बर आटोपो बाहुल्यं तेनोद्धुरा असह्यास्तथा प्रसृमरा प्रसरणशीला या प्रभाः कान्तयस्तासां प्रकरः सहस्रसंख्यत्वेन समूहस्तस्य तापः संज्वरः ऊष्मातिरेकः तेन संतापितः॥ इति पताका॥

श्लोकार्थ

रोज उदय पामता एवा सूर्यना प्रचंड तापथी असह्य अने विस्तार पामतां किरणोना ताप वडे संतप्त बनेला जिनप्रासादे आकाशगंगामां जलपान करवा माटे आकाशमां जाणे धजारूपी पोतानी जीभ प्रगट करी न होय! ॥ ७४ ॥

न कश्चिदुपलब्धिमान्न जनसंशयच्छेदकृ-
न्न कोऽपि च शिवंगमी जगति पूर्ववद्दृश्यते।
महोदयविधायकोऽर्हति निषेव्यतां सांप्रतं
मही महिमसंपदां तदयमेक एवाचलः॥ ७५॥
सदाकृतिवपुः पदं परिचरामि यस्य प्रभोः
प्रकाशितमिदं स्वयं जगति तेन मत्स्वामिना।
पटु प्रकटयाम्यहं गणित्रदस्य तीर्थस्य त-
त्प्रभावमतिशायिनं त्रिभुवनाद्धि चिन्त्येति किम्॥ ७६॥
जिनेन्द्रसदनाम्बरान्तरनुषङ्गिशृङ्गाङ्गणा-
निलप्रचलकेतनस्फुरदकुण्ठकण्ठीरवः।
पुरस्त्रिजगदङ्गिनामिति निजान्तिकावासभा-
ग्रणज्झणिति किङ्किणीक्रणमिषेण किं भाषते॥ ७७॥

जिनेन्द्रस्य मारुदेवस्य सदनं गृहम् ऋषभचैत्यं तस्याम्बरस्य गगनस्य अन्तर्मध्ये अनुषङ्गः संगमो मिलनमस्यास्तीति तादृशं शृङ्गाङ्गणं शिखरोपरितनप्रदेशस्तत्रानिलेन पवनेन

प्रचलं यत्केतनं ध्वजस्तत्र स्फुरत् अकुण्ठः अमन्दो दुर्धर्षो वा कण्ठीरवः केसरी स कर्ता। निजस्यात्मनः अन्तिके समीपे आवासं निरन्तरवसतिं भजन्तीति तादृश्यो रणज्झणिति शब्दं कुर्वाणाः किङ्किण्यो लघुघुर्घुरिकास्तासां क्वणस्य शब्दस्य मिषेण कपटेन त्रिजगदङ्गिनां सुरासुरनराणां पुरः किम्। उत्प्रेक्ष्यते—इत्यमुना प्रकारेण विचिन्त्य विचार्य विमृश्य विचारं कृत्वेव भाषते ब्रवीति। इति किम्। आकृतिराकार एव वपुः शरीरं यस्य तादृशः सन् अहं यस्य प्रभोर्महावीरस्य भगवतः पदं चरणं सदा सर्वकालं परिचरामि सेवे, तेन मत्स्वामिना मम प्रभुणा वीरेण स्वयमात्मनैवेदं पूर्वकाव्यप्रतिपादितं श्रीशत्रुंजयमाहात्म्यं जगति विश्वे। जगज्जनानामग्रे इत्यर्थः। प्रकाशितं प्रकटतया कथितम्। यस्मादिति गम्यं तस्मात्कारणादहं तच्चरणपरिचारकःअस्य मङ्गलतिभूमेस्तीर्थस्य लोकोत्तरपुण्यस्थानस्य प्रभावं महिमानं पटु स्पष्टं यथा स्यात्तथा प्रकटयामि प्रकटीकरोमि किंवत्। गणिवत्। यथा गणधरो भगवतार्थात्प्रतिपादितं सूत्रं पटु सहेतु युक्तिकं विस्तारयति, तथा श्रीमन्महावीरार्हत्प्रकाशितमहमपि विमलाचलस्याद्वैतमाहात्म्यं प्रकाशयामीत्यर्थः। इदं किम्। यद्यस्मात्कारणात् एतस्मिन्कलिकाले जगति विश्वेऽखिले। भरतक्षेत्रे इत्यर्थः। कश्चित्कोऽपि मुनिप्रमुखः उपलब्धिमान् मतिश्रुतावधिमनःपर्यवकेवलज्ञानयुक्तः पूर्ववच्चतुर्थारक इव न दृश्यते न चक्षुषा लक्ष्यते न च श्रवसा श्रूयते च। पुनर्जनानां भारतभूमिजन्मनां लोकानां संशयानां मानसिकानां शास्त्रसंबन्धिनां वा संदेहानां छेदकृन्निवारकः कोऽपि कश्चिदपि पूर्ववत्प्रदेशिराजस्य केशिगणधर इव नैव विभाव्यते नाकर्ण्यते च। च पुनरधुना कोऽपि कश्चनापि शिवंगमी चरमशरीरत्वेन केवलज्ञानमासाद्य मोक्षं गमिष्यतीति। 'यथा विदूराद्रिरदूरतांगमी' इति नैषधे। तादृशोऽपि लोचनाभ्यां न विलोक्यते नापि च श्रुतेर्गोचरीक्रियते। तत्तस्मात्करणात् सांप्रतं पञ्चमे दुःखमानाम्नि अरके लोकोक्त्या कलिकाले च महिमसंपदां मानातीतमाहात्म्यसंपत्तीनां मही स्थानमाधारः। तथा महोदयस्य राज्याद्वैताभ्युदयस्य मोक्षस्य च विधायकः। एकोऽद्वितीय एवायं न चापरः। अयं प्रत्यक्षलक्ष्यस्तथा निश्चयेनाचलः श्रीशत्रुंजयशैलः निषेव्यतां सेवनीयत्वमर्हति योग्यो भवति। सर्वेषामपि भव्यानामयमेव सेवाया उचितोऽस्तीत्यर्थः ॥ त्रिभिर्विशेषकम् ॥

શ્લોકાર્થ

ઋષભવિહારના ગગનચુંબી શિખર ઉપર પવનથી ચંચળ બનેલી ધ્વજામાં રહેલો દુર્ધર્ષ કેશરીસિંહ, પોતાની સમીપે રહેલી રણઝણ અવાજ કરતી ઘૂઘરીઓના બ્હાને ત્રણે જગતને જાણે આ પ્રમાણે કહેતો ન હોય કે 'હે પ્રાણીઓ, લાંછનરૂપ શરીરવાળો હું સિંહ પ્રભુ મહાવીરના ચરણની સેવા કરું છું, તે મારા ભગવાન મહાવીરે જગતના જીવોની આગળ જે કહેલું, જેમ ભગવંતે પ્રતિપાદન કરેલા અર્થને ગણધર સૂત્રથી કહે તેમ હું કહું છું કે "આ ભરતક્ષેત્રમાં મનુષ્યોના સંશય છેદનારા એવા કોઇ વિશિષ્ટ જ્ઞાની પુરુષ નથી તેમજ ચોથા આરાની જેમ કોઇ મોક્ષગામી જીવ નથી, તે માટે દુષમપંચમ

કાળમાં મહામહિમાવંત અને મોક્ષ પ્રાપ્ત કરાવી આપનાર એવો આ એક જ શત્રુંજય પર્વત છે કે જે સર્વ પ્રાણીઓએ સેવવા યોગ્ય છે.' ॥ ७५ ॥ ७६ ॥ ७७ ॥

स्वमौज्झ्य भुवि निर्वृतौ गतमवेत्य सिंहध्वजं
यियासुरनु तं स्वयं ह्यनिशसेविता स्नेहतः ।
इतः प्रचलितोऽम्बरोपगतचैत्यशृङ्गाध्वना
ध्वजाङ्कगतकेसरी कलयति स्म लक्ष्मीमिह ॥ ७८ ॥

इह मूलप्रासादस्य शिखरे ध्वजस्य पताकाया अङ्के उत्सङ्गे गतः प्राप्तः स्थितो वा केसरी मृगेन्द्रः लक्ष्मी शोभां कलयति भगवच्चरणे ध्वजे वा कृत्यैव न तु मूर्तिमान । अत एवोत्प्रेक्षणम् । उत्प्रेक्ष्यते—ह्यनिशमहोरात्रं सेवन्ते इत्येवंशीलः सेवी तस्य भावः सेविता तया सेवनशीलत्वेन यः स्नेहः प्रेमातिरेकः तेन कारणेन स्वयमात्मनापि तं भगवन्तमनु पश्चात्पृष्ठे वा यियासुर्गन्तुमिच्छुः किमु । इतो भूमिसकाशादम्बरमाकाशमुपगतं प्राप्तं यच्चैत्यस्य प्रासादस्य शृङ्गं शिखरं तस्याध्वना मार्गेण कृत्वा प्रचलितः किमु प्रस्थित इव । इति गर्भितोत्प्रेक्षा । किं कृत्वा । स्वमात्मानमर्थाल्लाञ्छनपञ्चाननं भुवि पृथिव्यामिमौज्झ्य मुक्त्वा च पुनः स्वयमात्मना निर्वृतावनन्तसुखस्थाने मोक्षे गतं यात्वा च निरवधिसंतिष्ठमानं सिंहध्वजं श्रीमन्महावीरदेवमवेत्य ज्ञात्वा ॥ इति पताकापञ्चाननः ॥

श्लोकार्थ

જિનપ્રાસાદના શિખર ઉપર રહેલી ધજાના મધ્ય ભાગમાં રહેલો સિંહ શોભે છે. તે જાણે, પોતાનો ત્યાગ કરીને મુક્તિમાં ગયેલા મહાવીર પરમાત્માને જાણીને લાંછનના બ્હાને નિરંતર સેવા કરતો તે સિંહ સ્નેહથી ભગવંતની પાછળ જવાને ઇચ્છતો જિન-પ્રાસાદના શિખરમાર્ગે જાણે પ્રયાણ કરતો ન હોય ! ॥ ७८ ॥

मृगाङ्ककरसंगमक्षरदमन्दपाथःप्लवै-
र्यदुच्चशिखरात्तमीमणिमणीगणैर्निर्मितात् ।
रजोभिरवगुण्ठितं प्रबलगन्धवाहव्रजै-
र्वपुः पवितुमात्मनो जिनगृहं निशि स्नाति किम् ॥ ७९ ॥

तमीमणिमणीनां चन्द्रकान्तनाम्नां रत्नानाम् । 'निशारत्नकरौ चन्द्रः' इति, तथा 'चन्द्रकान्तश्चन्द्रमणिः' इति द्वयमपि हैम्याम् । गर्भनिवहैर्निर्मिताच्छिष्पादितात् घटितात् प्रासादस्य उच्चाङ्गनसङ्गिनः शिखरात् मृगाङ्कस्य चन्द्रमसः कराः किरणास्तेषां संगमेन संपर्केण क्षरन्तो निःसरन्तो ये अमन्दा अविरलाः पाथसां पानीयानां प्लवाः पूराः । प्रवाहा इत्यर्थः । तैः कृत्वा । उत्प्रेक्ष्यते—जिनगृहं भगवत्प्रासादः निशि स्नाति किं स्नानं करोतीव । किंभूतम् । प्रबलैः प्रचण्डैर्गन्धवाहव्रजैर्महावातैः कर्तृभिः रजोभिरुड्डीनधूलीभिरवगुण्ठितं धूसरितं मलिनीकृतमात्मनः स्वस्य प्रासादसंबन्धिनो वपुः शरीरं पवितुं पवित्रीकर्तुम् । निर्मलं कर्तुमित्यर्थः ॥

શ્લોકાર્થ

ચન્દ્રકાન્તમણિઓથી બનેલાં ઊંચાં શિખરોમાંથી રાત્રિના સમયે ચન્દ્રકિરણોના સંપર્કથી ઝરતા પાણીના પ્રવાહ વડે, પ્રબળ પવનથી ઊડેલી ધૂળથી મલિન બનેલા જિન-મંદિરને પવિત્ર બનાવવા માટે જાણે સ્નાન કરાવતા ન હોય ! ॥ ૭૯ ॥

स्फुटस्फटिककल्पिता क्वचन जाह्नवीवावनी
क्वचिन्मरकताङ्किता स्थिरजला यमीवाजनि ।
कृतारुणमणीगणैः किमुत कुङ्कुमैरर्चिता
क्वचिद्विकचचम्पकैः परिचितेव चन्द्राञ्चिता ॥ ८० ॥

क्वचन कुत्रापि प्रदेशे अवनी प्रासादमेदिनी स्फुटं प्रकटं यथा स्यात्तथा स्फटिकैः श्वेतरत्नैः कल्पिता रचिता अजनि । उत्प्रेक्ष्यते—स्थिरं कथंचिद्दैवयोगाद्गुप्रमना स्थाना-भावाद्वा अप्रवहमानं जलं सलिलं यस्यास्तादृशी जाह्नवी गङ्गेव । पुनः क्वचित्प्रदेशे मरकतैः अश्मगर्भरत्नैर्नीलमणीभिरङ्किता केलिता भूरजनि सजाता । उत्प्रेक्ष्यते—स्थिर-जला केनचिद्देवेन दानवेनाकुतूहलात्कृतमप्रचलत्पयो यस्यास्तादृशी यमी यमुनेव । क्वचि-त्कुत्रचित्स्थाने अरुणमणीनां पद्मरागापराभिधानां रक्तरत्नानां गणैः पुञ्जैः कृता निर्मिता भूमिरजनि । उत्प्रेक्ष्यते—कुङ्कुमैः केसरैरर्चिता पूजितेव । पुनः क्वचित् क्वापि स्थानके च चन्द्रेण काञ्चनेन । 'तपनीयचामीकरचन्द्रभर्म' इति हैम्याम् । तथा 'चन्द्रोऽम्बुकाम्ययोः। स्वर्णे सुधांशौ कर्पूरे कंपिल्ले मेचकेऽपि च ॥' इत्यनेकार्थः । अञ्चिता सहिता भूमिका अजनि भवति स्म । उत्प्रेक्ष्यते—विकचचम्पकैर्विकचचम्पककुसुमोपचारैः परिचिता सहि-तेव ॥ इति शिखरपार्श्वप्रदेशाः ॥

શ્લોકાર્થ

કોઈ પ્રદેશમાં સ્ફટિકરત્નોથી બનાવેલી ભૂમિ શોભતી હતી, તે જાણે સ્થિર બનેલી ગંગા નદી ન હોય! ક્યાંક મરકતમણિથી રચાયેલી ભૂમિ શોભતી હતી. તે જાણે સ્થિર રહેલી યમુના ન હોય! ક્યાંક પદ્મરાગથી રચિત ભૂમિ તે જાણે કુંકુમ વડે પૂજન કરાયેલી ન હોય! તેમજ ક્યાંક સુવર્ણથી બનેલી ભૂમિ શોભતી હતી, તે જાણે વિકસ્વર ચંપકનાં પુષ્પો વડે અર્ચન કરાયેલી ન હોય! ॥ ८० ॥

सुरासुरनरस्फुरन्मिथुनचारुचित्रव्रजः
पुपोष सुषमां जिनावसथमण्डपस्यान्तरे ।
जगत्त्रयमिवागतं विमलशैलयात्राकृते
स्थितं किमतिभावतः पुनरिहार्हतः संनिधौ ॥ ८१ ॥

जिनावसथस्य ऋषभचैत्यस्य मण्डपस्य रङ्गमण्डपस्यान्तरे मध्ये सुरासुरनराणां देवदानवमानवानां स्फुरतां शोभां लभमानानां मिथुनानां दम्पतीसंबन्धियुमलानां चारूणि त्रिलोकमनोहराणि यानि चित्राणि आलेख्यानि तेषां व्रजः सुषमां सातिशायिशोभां पुपोष पुष्णाति स्म । उत्प्रेक्ष्यते—विमलशैलस्य श्रीशत्रुंजयाद्रेर्यात्राकृते यात्राकरणार्थमागतं स्वस्वस्थानात्समायातं सत् अतिभावतो वासनाधिक्यात्पुनरर्हतः श्रीऋषभदेवस्य संनिधौ समीपे किमु स्थितं निरन्तरमुषितं जगत्त्रयं त्रैलोक्यमिव ॥

શ્લોકાર્થ

જિનપ્રાસાદના મધ્યમંડપમાં ચિતરેલા દેવ, દાનવ અને માનવોનાં યુગલનાં સુંદર ચિત્રો શોભાને વધારે છે, તે જાણે ભક્તિભાવથી વિમલાચલની યાત્રા કરવા માટે ભગવંતની પાસે સમકાળે આવેલું ત્રણ જગત ન હોય! ॥ ८१ ॥

वरीतुममृताह्वयामिह पतिंवरां कन्यकां
स्वयंवरणमण्डपे किमुपजग्मिवांसः समम् ।
जिनेन्द्रगृहमण्डपे लसदनल्पशिल्पीकृताः
सुरासुरधरास्पृशा समुदया ददन्ते मुदम् ॥ ८२ ॥

जिनेन्द्रगृहस्य प्रासादस्य मण्डपे जनाश्रये लसन्ति परस्परं श्लिष्यन्ति क्रीडन्ति वा शोभमानानि वा । 'लस श्लेषणक्रीडनयोः' अयं धातुः शोभार्थेऽपि दृश्यते । तथा अनल्पानि बहूनि विविधजातीयानि वा शिल्पानि चित्रविज्ञानानि । त्रिष्वपि कर्मधारयः । लसदनल्पशिल्पानि कृता लसदनल्पशिल्पीकृताः तादृशाः सुरा देवाः, असुरा दानवाः, धरास्पृशो मनुष्यास्तेषां समुदाया गणा मुदं प्रमोदं ददन्ते यच्छन्ति । आनन्दयतीत्यर्थः । 'दद दाने' आत्मनेपदी । अत्र बहुवचनम् । उत्प्रेक्ष्यते—अमृतं मुक्तिस्तदेवाह्वयो नाम यस्याः । 'अथाह्वयोऽभिधा गोत्रं संज्ञानामधेयाः' इति हैम्याम् । तादृशीं पतिंवरां स्वेच्छया स्वाभिलषितयोग्यवरस्य वरयित्रीं स्वयंवरां कन्यकां कुमारिकाम् । कन्यैव पतिं वृणोति नान्येति रीतिनीतिधर्मः । इत्याशयाद्वरीतुं परिणेतुम् । अत्र तु मुक्तेः कनीत्वं कविसमयानुसारेणैव । केवलं स्वयंवरणमण्डपे समं समकालमेकसमय एव देवादनवमानवव्रजाः किमुपजग्मिवांसः समागता इव ॥

श्लोकार्थ

જિનમંદિરના મંડપમાં સુર, અસુર અને મનુષ્યોનાં મનમોહક ચિત્રો દરેકને આનંદ આપે છે. તે જાણે ત્રણે જગતના જીવો મુક્તિરૂપી સ્વયંવરા કન્યાને પરણવા માટે એકીસાથે સ્વયંવર મંડપમાં આવ્યા ન હોય ! ॥ ૮૨ ॥

भवच्चरणसेवनैरधिगता द्युलोकेन्दिरा
विनैव नरजन्मना दिश शिवश्रियं श्रीप्रभो ।
उपेत्य जिनमन्दिरान्तरमितीव विज्ञीप्सया
भजन्ति सुरसुभ्रुवः प्रभुमनन्यचित्रोपधेः ॥ ८३ ॥

जिनमन्दिरान्तः श्रीऋषभचैत्यमध्ये उपेत्य अर्थात्स्वर्गलोकादागत्य अनन्यानामसाधारणानां चित्राणामुपधेशालेख्यानां छलात्सुरसुभ्रुवः अप्सरसः । 'स्वःस्त्रीवध्वोऽप्सरसः' इति हैम्याम् । प्रभुं भगवन्तं भजन्ति सेवन्ते । उत्प्रेक्ष्यते – इत्यमुना प्रकारेण किं विज्ञीप्सया विज्ञप्तिं कर्तुमिच्छयेव । इति किम् । हे श्रिया चतुस्त्रिंशदुदयलक्ष्म्या त्रैलोक्याधिपत्यलक्ष्म्या वा लक्षितविभो स्वामिन् परमेष्ठिन्, भवच्चरणसेवनैः श्रीमत्पदपरिचरणैरस्माभिर्द्युलोकेन्दिरां स्वर्गलोकलक्ष्मीमधिगताः प्राप्ताः । अथ नरजन्म विना मनुष्यावतारं विनैव नोऽस्माकं पुराङ्गनानां शिवश्रियं मोक्षलक्ष्मीं सिद्धिसंपत्तिं दिश प्रदेहि ॥

श्લોકાર્થ

જિનમંદિરમાં આલેખેલાં અનુપમ ચિત્રોના બ્હાને સ્વર્ગમાંથી આવીને અપ્સરાઓ ભગવંતની સેવા કરે છે, અને જાણે આ પ્રકારે વિજ્ઞપ્તિ કરે છે કે 'હે પ્રભો, આપનાં ચરણની સેવાથી અમે સ્વર્ગલક્ષ્મી પ્રાપ્ત કરી, પરંતુ હવે મનુષ્યજન્મ લીધા વિના જ અમોને મોક્ષલક્ષ્મી આપો'! ॥ ૮૩ ॥

प्रयोजयति नः सदा स्वपदसाभिलाषीभव-
तपस्वितपसां व्ययीकृतिविधौ विभो जम्भभित् ।
इमां जहि विडम्बनां किमिति भाषितुं मण्डपे-
ऽथ वाप्सरस आगताः परिचरन्ति चित्रोपधेः ॥ ८४ ॥

हे विभो स्वामिन्, स्वस्यात्मनः पदे स्थाने इन्द्रैश्वर्यप्राप्तौ सहाभिलाषेण कामेन वर्तन्ते ये तादृशा भवन्तः संपद्यमाना ये तपस्विनस्तापसास्तेषां तपसां घोरानुष्ठानोपवासादिकष्टानां व्ययीकृतिविधौ नाशनिर्मापणप्रकारे जम्भभिद्वासवः सदा चतुर्ष्वपि युगेषु नः अस्मानप्सरसः प्रयोजयति प्रयुङ्क्ते प्रेषयति । तथा च इन्द्रपदप्राप्त्यभिलाषेण तपः कुर्वतस्तापसान् कष्टध्यानतपोभ्यः पातयितुं पुरंदरेण प्रेषिता अप्सरसः प्रेक्ष्य तद्रूपलावण्यमोहिता विस्मृतस्वतपोध्यानानुष्ठानास्ते ता एव कामयमानास्तद्भोगासक्तिभाजो भूताः सन्तस्ततः सर्वं स्वकीयं पुराचीर्णतपोमूलादेव हारयन्ति-इति परशासनकविसमयः । तत्कारणात् हे विभो त्रिभुवनजननाथ, त्वं नोऽस्माकमिति गम्यम् । इमां येषां तेषां बालयुववृद्धकृशाजातिजातिप्रमुखाणां तपसामङ्गसंगमाख्यमिषादप्सरसः सर्ववनिता उर्वशीमेनकाघृताचीरम्भादिकाः प्रासादमण्डपे आगताः सत्यः किमु प्रभुं परिचरन्ति भजन्तीव ॥ इति मण्डपमध्यचित्राणि ॥

શ્લોકાર્થ

'હે સ્વામિન્, ઇન્દ્રાસનની અભિલાષાથી તપશ્ચર્યા કરતા તાપસોનાં તપને ભ્રષ્ટ કરવા માટે ઇન્દ્ર અમારો પ્રયોગ કરે છે, તે માટે હે ભગવંત, અમારી તે વિડંબના દૂર કરો.' આવી પ્રાર્થના કરવા માટે જ જાણે ચિત્રના બ્હાને અપ્સરાઓ આવીને ભગવંતની સેવા કરતી ન હોય ! ॥ ૮૪ ॥

कुतूहलिकृतासितोपलतलोर्ध्वमध्या क्वचि-
न्महारजतनिर्मिता जिननिकेतनस्तम्भकाः ।
विचित्रसुरविभ्रमं प्रदधतः श्रियं बिभ्रते
तलोपरि विचालभाग्वनभृतः किमु स्वर्नगाः ॥८५॥

क्वचित्कुत्रचित्प्रदेशे महारजतैः काञ्चनैर्निर्मिता विरचिता जिननिकेतनस्य मूलचैत्यस्य स्तम्भकाः । पादपूरणे स्वार्थे कप्रत्ययः । स्तम्भाः एव स्तम्भकाः प्रासादमण्डपाधाधारस्थूणाः श्रियं शोभां बिभ्रते कलयन्ति । किंभूताः । स्वर्णघटितत्वेऽपि विशेषमाह— कुतूहलिभिः कैश्चित्कौतुकवद्भिः शिल्पिभिः कृतानि असितोपलानामिन्द्रनीलमणीनां तलं स्तम्भाधो विभागः ऊर्ध्वं स्तम्भोपरितनप्रदेशः मध्ये स्तम्भान्तराले तत्र प्रदेशत्रये । कर्मधारये । मध्यानि येषां ते । किं कुर्वन्तः । विशिष्टचित्ररूपाः सुरा देवा अथवा विचित्रा विविधजातीयाश्चतुर्निकायिका देवतास्तेषां विभ्रममन्तःकलितशिल्पत्वेन विलासं विभूषां भ्रान्तिं वा प्रदधतो धारयन्तः । उत्प्रेक्ष्यते—तलमधोवर्ती भूमिभागः भूमीप्रदेश एव विवक्षया न तु भूमध्यगो विभागः तथा उपरिशिखरोच्चचूलिका मध्ये स्तम्भविलासे एतावता मध्ये भागद्वयं तानि भजन्ति इति तलोपरि विचालभाञ्जि तादृशानि वनानि अधोभूमौ भद्रसालवनं शिखरचूलिकायां पाण्डुकवनं विचालभागद्वये तु नन्दनं सौमनसं चैत्याख्यानि चत्वारि काननानि बिभ्रतीति भृतः तादृशाः स्वर्नगा मेरुपर्वता इव । 'रत्नसानुः सुमेरुः स्वःस्वर्गिकाञ्चनतो गिरिः' इति हैम्याम् ॥

શ્લોકાર્થ

કૌતુકી શિલ્પીઓએ ઉપરના મધ્યભાગમાં ઇન્દ્રનીલમણિના બનાવેલા, દેવોને પણ વિભ્રમ પેદા કરનારા જિનમંદિરોના સુવર્ણમય સ્તંભો, શોભાને ધારણ કરે છે. તે સ્તંભો જાણે સ્તંભની નીચેના ભાગમાં ભદ્રશાલવન, તેના ઉપર શિખરની ચૂલિકા, તેના ઉપર પાંડુકવન અને વચલા બે ભાગમાં નંદન અને સૌમનસવનને ધારણ કરતા મેરૂપર્વતો ન હોય! તેવા શોભે છે. ॥ ૮૫ ॥

हरिर्य इह सेवकस्तव जिनेन्द्र सोऽस्मद्विष-
न्विधापय मिथस्ततस्त्वदमुना समं सौहृदम् ॥
इतीव गदितुं वृषध्वजजिनालयस्तम्भको-
पधेरखिलभूभृतः प्रभुमुपेत्य शीलन्त्यमी ॥ ८६ ॥

वृषो वृषभो ध्वजश्चिह्नं लाञ्छनं यस्य तादृशो जिनो युगादिदेवस्तस्यालयं गृहं ऋषभविहारस्तस्य स्तम्भका आधारस्थूणास्तेषामुपधेर्व्याजादमी प्रत्यक्षलक्ष्या मन्दरादयः अखिलाः समस्ताः भूभृतः पर्वता उपेत्य अत्र प्रासादे समागत्य प्रभु श्रीऋषभस्वामिनं शीलन्ति भजन्ति । उत्प्रेक्ष्यते—इत्यमुना प्रकारेण गदितुं कथयितुमिव । इति किम् । हे जिनेन्द्र युगादिप्रभो, इह जगति यो हरिरिन्द्रस्तव भवतः सेवकस्त्वत्पादपद्मसेवाविधातास्ते सोऽस्माकं द्विषन् शत्रुः पक्षच्छेदकर्तृत्वेन प्रबलप्रतिपक्षो वर्तते ततस्तस्मात्कारणात् हे प्रभो, त्वदमुना त्वद्भक्तिभाजा हरिणा सममस्माकं मिथः परस्परं सौहृदं मैत्र्यं सखिभावं विधापय कारय । महात्मना प्रभुणा च स्वयमन्तरा भूयः कृतः संधिः कदाचिदपि न विघटते इति वक्तुमिव ॥ इति प्रासादमध्यस्तम्भाः ॥

શ્લોકાર્થ

ઋષભવિહારના સ્તંભોના બ્હાને મેરૂઆદિ પર્વતો આવીને શ્રીઋષભદેવભગવંતની સેવા કરે છે. તે પર્વતો જાણે આ પ્રમાણે કહેવા માટે આવેલા ન હોય : ‘હે ભગવન્, જે ઇન્દ્ર આપનો સેવક છે તે અમારો શત્રુ છે! માટે હે પ્રભો, આપના ભક્ત ઇન્દ્રની સાથે અમારો પરસ્પર મૈત્રીભાવ સ્થાપન કરાવો’!॥૮૬॥

अनन्यगुणवाहिनीशितुरनन्तसातैकभूः
कृते तव निरीक्षितात्मज मया शिवस्मेरदृक् ।
तदेहि वृणु तां कनीमिति समेत्य वक्तुं पुरः
स्थितेव मरुदेव्यभात्करिवशांसमासेदुषी ॥ ८७ ॥

यस्मिन् प्रासादे करिणो हस्तिनो वशा पत्नी हस्तिनी । यद्यपि वशाशब्देन करिणी कथ्यते । ‘इभः करेणुर्गजोऽस्य स्त्री धेनुका वशापि च’ इति हैमीवचनात् । तथापि वशाशब्दो नार्यामिव प्रायो वर्तते । तत्कारणादेव मनुष्यजातिस्त्रीभ्रमनिवारणार्थं च करिवशेति प्रतिपादितम् । तस्या अंसं स्कन्धमासेदुषी आश्रितवती मरुदेवी नाभिनृपपत्नी ऋषभदेवजननी अभाद्बभौ । उत्प्रेक्ष्यते—इति वक्तुं निवेदयितुं समेत्य कुतश्चित्स्थानादागत्य पुरो युगादिदेवस्याग्रे तिष्ठति स्मेव । इति किम् । हे आत्मज औरसपुत्र, अनन्यानामसाधारणानां गुणानां शौर्यौदार्यधैर्यगाम्भीर्यशौण्डीर्यार्जवमार्दवादीनामीशितुर्भर्तुः समुद्रस्य तव भवतः कृते अर्थाय अनन्तानां प्रमाणातीतानां ज्ञातिवचनगोचरातिक्रान्तावसानानां सातानां महासुखानामेका अद्वितीया भूः स्थानं शिवस्मेरदृक् मुक्तिरूपा कामिनी । पाणिग्रहणकरणोत्सुकयात्वच्यतच्या ध्यानं विलोकयतीत्यत एव स्मेरदृक्त्वं प्रोक्तम् । मुक्तिमानिनी मया तज्जनन्या निरीक्षिता नितरां सर्वगुणाधारतया प्रथिता विलोकितास्ति । तत्तस्मात्कारणात् त्वं वृषभ, एहि त्वरितमागच्छ । आगत्य च तां निर्वृतिनाम्नीं कनीम्

अष्टादशकोटाकोटीसागरोपमप्रमितकालोऽभूत कोऽपि भारतीयक्षेत्रसत्कपुमान वृतो नास्ति, अत एव प्रौढां कुमारिकां वृणु वरय परिणयेति ॥

શ્લોકાર્થ

ઋષભવિહારમાં ભગવંતની સામે હાથી ઉપર આરૂઢ થયેલાં મરૂદેવા માતા શોભે છે. તે જાણે આ પ્રમાણે કહેવા માટે આવ્યાં ન હોય : "અસાધારણ ગુણોના સાગર એવા હે પુત્ર, મેં તારા માટે મુક્તિરૂપી કન્યા જોઇ, તે માટે હે ઋષભ, તું અહીં જલ્દી આવ; અને આવીને ગુણિયલ એવી મુક્તિરૂપી કન્યાની સાથે પાણિગ્રહણ કર. કારણ કે અઢાર કોટાકોટિ સાગરોપમ પ્રમાણ અસંખ્યકાળમાં ભરતક્ષેત્રના કોઇ માનવીએ તેની સાથે લગ્ન કર્યાં નથી. ॥ ८७ ॥

अयं श्रयति मां सदा तनय वाहनव्याजत-
स्तदुद्धरतमाममुं श्रितहितो महान्यद्भवेत् ।
इतीव गदितुं मुदा भगवतः पुरस्तस्थुषी
समेत्य मरुदेव्यसौ गजपतेरुतांसासिता ॥ ८८ ॥

असौ मूलप्रासादगर्भाग्रे दृश्यमाना मरुदेवी भगवन्माता उत गजपतेर्द्विपराजस्य अंसे स्कन्धे आसिता उपविष्टा सती समेत्य ऋषभाभ्यर्णेऽभ्यागत्य मुदा हर्षेण भगवतः स्वपुत्रस्य परमेष्ठिनः पुरोऽग्रे पुरस्तात् तस्थुषी स्थितवती । उत्प्रेक्ष्यते—इत्यमुना प्रकारेण गदितुं कथयितुमिव । इति किम् । हे तनय ऋषभदेव, अयं द्विपपतिर्गजेन्द्रो वाहनव्याजतो याननिभात्सदा सर्वदापि मां तव मातरं मरुदेवीं श्रयति सेवते । तत्तस्मात्कारणादमुं करीन्द्रं जगदुद्धरणधीर, उद्धरतमां सर्वथा सर्वप्रकारेण तिर्यक्त्वदूषितात्संसारान्मोचय । यद्यस्मात्कारणान्महानुत्तमः पुरुषः श्रिते स्वभक्तीभूते हितो वत्सलो भवेत् । निजस्य पुंसः समीहितमवश्यं करोत्येव । यदुक्तम्—'विहलं जो अवलंबइ आवय पडियं च जो समुद्धरइ । सरणागयं च रक्खइ तिसु तेहिं अलंकिया पुहवी ॥' तथा—'मरुदेवा मरुदेव्यपि' इति आकारान्तमीकारान्तं च नामद्वयं हेमनाममालावृत्तौ । तथा केचित्करिणीस्कन्धारूढा केचिच्च गजराजांसाध्याश्रितेति च प्रतिपादयन्ति । ततो द्वे अपि पृथगुत्प्रेक्षे इत्युतशब्दः ॥ इति गजस्कन्धाधिरूढा मरुदेवी ॥

શ્લોકાર્થ

હાથીના હોદ્દા ઉપર રહેલાં મરૂતદેવામાતા ભગવંતની આગળ જાણે આ પ્રમાણે કહેતાં ન હોય : 'હે પુત્ર ઋષભ, આ હાથી મારા વાહનરૂપે રહેલો છે તે માટે તેનો તિર્યંચ,

જાતિમાંથી ઉદ્ધાર કર, કારણ કે મહાપુરુષો શરણાગતવત્સલ હોય છે.' ॥ ८८ ॥

महोदयमृगीदृशा सह विनोदनिर्मित्सया
विलासमणिमन्दिरं विमलशैलचूलोपरि ।
अकारि वृषकेतुना स्वयमिवात्र नाभीभुवा
युगादिजिनसद्मनि श्रयति गर्भगेहः श्रियम् ॥ ८९ ॥

युगादिजिनसद्मनि विमलाचलमूलप्रासादे गर्भगेहः गर्भागारः श्रियं शोभां श्रयति । उत्प्रेक्ष्यते—वृषकेतुना जातोक्षध्वजेन ऋषभदेवेन कर्त्रा स्वयमात्मना अत्र विमलशैलस्य शत्रुंजयाद्रेश्चूलिकायां पर्वतोपरिविभागे अधित्यकोर्ध्वप्रदेशे नाभीभुवा सृष्टिकर्त्रा । विधातुः पार्श्वे इत्यर्थः । विलासार्थं क्रीडाकृते मणिमयं मन्दिरं रत्नमन्दिरमकारि कारितमिति । ण्यन्तप्रयोगः । कया । महोदयनाम्न्या मृगीदृशा सिद्धिवध्वा सह सार्धं विनोदस्य विविधविलासस्य निर्मित्सया निर्मातुं काङ्क्षया ॥

श्लोकार्थ

યુગાદિવિહારનો ગભારો શોભે છે તે જાણે મુક્તિરૂપી મૃગાક્ષી સાથે વિનોદ કરવાની ઇચ્છાથી સ્વયં બ્રહ્માએ વિમલાચલની ચૂલિકા ઉપર રત્નમય ક્રિડામંદિર બનાવ્યું ન હોય ! ॥ ८९ ॥

अनेकनरनिर्जरोरगपुरंदरोपासितं
सदःसदनमुन्नये विमलशैलभूमीभुजः ।
वृषाङ्कजिनवासवौकसि विचित्रतौर्यत्रिक-
प्रपञ्चपटुमण्डपे श्रियमुवाह गर्भालयः ॥ ९० ॥

वृषाङ्को युगादिदेव स एव जिनानां सामान्यकेवलिनां मध्ये वासवः पुरंदरस्तस्यौको मन्दिरं तस्मिन् गर्भालयो गर्भागारः श्रियं लक्ष्मीं शोभामुवाह धारयति स्म । किंभूते ओकसि । विशिष्टानि चित्राण्यालेख्यानि येषां विविधप्रकाराणि वा विशेषाश्चर्यकारकाणि वा तौर्यत्रिकाणि गीतनृत्यवादित्राणां त्रयाणि त्रित्वसंख्याकानि तेषां प्रपञ्चो विस्तारस्तेन पटुः प्रकटः स्पष्टभूतो मण्डपो यत्र तत् । तत्र गर्भागारवर्णने अहमेवमुन्नये विचारयामि । 'वितर्कः स्यादुन्नयनम्' इति हैम्याम् । विमलशैलः श्रीशत्रुंजयाद्रिः स एव भूमिभुक् राजा अथवा विमलनाम्नः शैलानां सर्वपर्वतानां भूमीभुजो राज्ञः सदःसदनं सभागृहमिव । 'नृपस्य नातिप्रमनाः सदोगृहम्' इति रघुवंशे । किंभूतं सदनम् । अनेके बहवो ये नराणां मनुष्याणां निर्जराणां देवानामुरगाणां नागानामुपलक्षणादसुराणां पुरंदरा इन्द्रास्तैरुपासितं सेवितम् ॥ इति गर्भागारः ॥

શ્લોકાર્થ

ઋષભવિહારમાં એવો મંડપ છે કે જેમાં આશ્ચર્યકારી ગીતો ગવાઈ રહ્યાં છે, વિવિધ પ્રકારનાં નૃત્યો થઈ રહ્યાં છે, અને અનેક વાજિંત્રો વાગી રહ્યાં છે, એવા મંડપમાં ગભારો અદ્વિતીય શોભાને ધારણ કરે છે; તે જાણે દેવેન્દ્ર, દાનવેન્દ્ર અને માનવેન્દ્ર વડે સેવાયેલું વિમલાચલરૂપી રાજાનું સભામંદિર ન હોય! ॥ ૯૦ ॥

सुरासुरनरेन्दिरादिमसमग्रकामप्रदा
कृताम्बुजभुवा लता ऋतुभुजामपूर्वा किमु ।
रसायनमिवान्तरामयजुषां च सम्यग्दृशां
दृशां किममृताञ्जनं वृषभमूर्तिरत्राबभौ ॥ ९१ ॥

अत्र मूलप्रासादगर्भागारे वृषभमूर्तिर्युगादिजिनप्रतिमा आबभौ शोभते स्म । उत्प्रेक्ष्यते—अम्बुजभुवा पद्मजन्मना जगत्सृष्टिविधायिना विधिना सुरासुरनराणां देवदानवमानवानामिन्दिरा आधिपत्यलक्ष्मीः आदौ प्रथमं येषां ते समग्राः सर्वेऽपि कामा मनसामभिलषितानि तान्प्रकर्षेणातिशयेन ददातीति तादृशी । अत एवापूर्वा नान्यसदृशी किंत्वसाधारणा ऋतुभुजां देवानां लता वीरुत् कल्पवल्लीव कृता किमु निर्मितेव । च पुनः आन्तरामयान् अन्तरा अष्टकर्माण्येव रोगास्तान् जुषन्ते भजन्ते तादृशानां पुरुषाणामन्तरङ्गरोगोच्छेदनाय रसायनं पारदरजतस्वर्णाद्यौषधपाचितं महाभैषजमिव विधिना विहितम् । अथवा सम्यग्दृशां सुदृष्टीनां भव्यानां दृशां नेत्राणां शीतलताकृते अमृताञ्जनं सुधासंबन्धि कज्जलमिव वेधसा सृष्टम् ॥

શ્લોકાર્થ

મૂળ ગભારામાં રહેલી, દેવ, દાનવ અને માનવોને અભિષ્ટ લક્ષ્મીને આપનારી એવી શ્રીઋષભદેવ પ્રભુની મૂર્તિ શોભે છે; તેમણે બ્રહ્માએ અપૂર્વ કલ્પવૃક્ષની લતા બનાવી ન હોય! અથવા જાણે આઠ કર્મોરૂપી વ્યાધિઓને નાબૂદ કરવા માટેનું રસાયન ન હોય! અથવા તો જાણે સમ્યક્દૃષ્ટિ જીવોનું અમૃતાંજન ન હોય! ॥ ૯૧ ॥

युगादिसमये यथा भुवनमुद्धृतं संसृते-
स्तथैव पुनरुद्धराम्यहमवद्यकाले कलौ ।
विचिन्त्य किमिदं हृदा वृषभकेतुरत्रात्मना-
वतीर्य कुरुते स्थितिं स्थिरतयात्ममूर्तिच्छलात् ॥ ९२ ॥

वृषभकेतुर्युगादिदेवः आत्मना स्वयमेवात्र शत्रुंजयमूलविहारे अवतीर्य मोक्षादागत्य आत्मनो निजस्य वृषभस्यैव मूर्तेः प्रतिमायाश्छलात्कपटात् स्थिरतया अव्यग्रचित्तत्वेन न तु गमनौत्सुक्येन स्थितिं निवासं कुरुते। उत्प्रेक्ष्यते—हृदा स्वमनसा कृत्वा इदं वक्ष्यमाणं किं विचिन्त्य विचार्यैव। इति किम्। यथा युगस्य लक्षणया चतुर्थारकस्यादेस्तृतीयारकस्य पर्यन्तसमयस्तस्मिन्प्रस्तावे संसृतेः संसारात्सकाशाद्भुवनं विश्वमुद्धृतं निस्तारितं पुनर्द्वितीयवारं तथा तेनैव प्रकारेणाहमृषभः अवद्यकाले प्रबलपापोपचितसमये कलौ कलियुगे पञ्चमारकेऽपि भुवनं जगदुद्धरामि संसारकारागारादुद्धृत्य सुखेन महानन्दपुरं प्रापयामीति ॥ इति ऋषभप्रतिमा ॥

श्लोकार्थ

'त्रीजा आराना अंते अने चोथा आराना प्रारंभे जेम में जगतनो संसारथी उद्धार कर्यो हतो तेम दुषम पांचमा आरामां पण जगतना जीवोनो उद्धार करुं." आ प्रकारनो हृदयमां विचार करीने जाणे ऋषभदेवप्रभु स्वयं मोक्षस्थानमांथी आवीने मूर्तिरूपे रह्या न होय! ॥ ९२ ॥

चतुष्कपृथिवीं ततः परिचरन्स विस्मेरिता-
रविन्दसवयोविलोचनयुगेन योगीश्वरः।
जगद्विजयिनीं जिनाधिपतिवेश्मलक्ष्मीं पिब-
न्हृदा त्रिजगदिन्दिरां करगतामिवामन्यत ॥ ९३ ॥

योगिनां मनोवचनकाययोगवतां वशीकृतेन्द्रियाणां वा ईश्वरः स्वामी स हीरविजयसूरिः हृदा स्वमनसा कृत्वा त्रिजगदिन्दिरां त्रैलोक्यलक्ष्मीं करगतां हस्तप्राप्तामिवामन्यत जानाति स्म। यथा कश्चित्पुमान् जगदाधिपत्यं कथमप्यधिगत्य परमानन्दं विन्दति तथा सूरीन्द्रोऽपि प्रासाददर्शनानन्तरमद्वैतां मुदमालोकयांचकार। स किं कुर्वन्। पिबन् सादरमवलोकयन्। काम्। जगद्विजयिनीं त्रिभुवनप्रासादपरम्पराविभवपराभविनीं जिनाधिपतिवेश्मनः ऋषभचैत्यस्य लक्ष्मीं शोभाम्। केन। विस्मेरत्वं संजातमस्मिन्निति विस्मेरितं सूर्येण विकासितं यदरविन्दं कमलं तस्य सवयसा मित्रेण। तत्तुल्येनेत्यर्थः। विलोचनयोर्नयनयोर्युगेन द्वन्द्वेन कृत्वा। पुनः स किं कुर्वन्। ततः प्राकारमध्ये आगमनानन्तरं चतुष्कपृथिवीं प्रासादाग्रेतनभूमिकाम् 'चउक' इति लोकप्रसिद्धाम्। 'नारीमनांसीव चतुष्कमन्तः' इति रघुवंशे। परिचरन् सेवमानः। प्रासादाग्रचतुष्के समेत इत्यर्थः ॥

શ્લોકાર્થ

ત્યાર પછી મંડપના ચોકમાં ઊભા રહીને જગદ્‌ગુરુએ વિશ્વવિખ્યાત જિનમંદિરની શોભા પોતાનાં વિકસ્વર નેત્રકમલ વડે જોઈને જાણે ત્રણ જગતની લક્ષ્મી હસ્તગત થઈ ન હોય, તેવા પ્રકારનો આનંદ અનુભવ્યો. ॥ ૯૩ ॥

जिनेन्द्रभवनं शिखोदयनभःपरीरम्भणं
व्रतिक्षितिशतक्रतुः स शमपद्मया संगतः।
प्रदक्षिणयितुं मुदारभत गीतिभिः सुभ्रुवां
सुमेरुमुडुमालयेव सममौषधीनायकः ॥ ९४ ॥

स व्रतिक्षितिशतक्रतुः हीरविजयसूरिराजः सुभ्रुवां स्त्रीणां गीतिभिर्मङ्गलगानैः समं जिनेन्द्रभवनं भगवत्प्रासादं मुदा हर्षेण प्रदक्षिणयितुं त्रिः प्रदक्षिणागोचरीकर्तुमारभत । प्रारब्धवानित्यर्थः । किंभूतो व्रतिपतिः । शमः शान्तिर्नाम तस्य वा पद्मा लक्ष्मीतया संगतः सहितः । किंभूतं जिनेन्द्रभवनम् । शिखायाः शिखरस्य उदयेन उच्छ्रायेन । 'उच्छेद उदयोच्छ्रायौ' इति हैम्याम् । उच्चत्वेन कृत्वा नभ आकाशं परीरम्भते आलिङ्गतीत्येवंशीलम् । भवनशब्दः पुंनपुंसकलिङ्गे । 'भवनभुवनयानोद्यानवातायनानि' इति लिङ्गानुशासने । तेन पुंलिङ्गविशेषणम् । क इव । ओषधीनां नायक इव । यथा औषधीनाथश्चन्द्र उडुमालया नक्षत्रश्रेण्या समं सुमेरुं स्वर्णाचलं प्रदक्षिणयति प्रदक्षिणीकृत्य भ्राम्यति दक्षिणपार्श्वे प्रणीय पर्यटति ॥

શ્લોકાર્થ

જેમ ચન્દ્ર નક્ષત્રમાલા સાથે મેરૂને પ્રદક્ષિણા આપે તેમ ઉપશમ લક્ષ્મીવાળા જગદ્‌ગુરુએ સ્ત્રીઓના મંગલગીતોની સાથે ગગનચુંબી જિનમંદિરને ઘણા ઉલ્લાસપૂર્વક પ્રદક્ષિણા આપી. ॥ ૯૪ ॥

स देवकुलिकान्तरे जिनपुरंदरान्संमदा-
दवन्दत तदा जिनाधिपतिकेतनस्याभितः।
मरुद्वसतिवत्ततः सुरपरम्परोपासिता
व्यलोकि विभुना पुरः प्रमुदितेन राजादनी ॥ ९५ ॥

तदा प्रदक्षिणादानन्दसरसस्सूरिर्जिनाधिपतिकेतनस्य मूलचैत्यस्याभितः परितश्चतुर्दिक्षु देवकुलिकानां लघुदेवगृहाणां 'देहरी' इति प्रसिद्धानामन्तरे मध्ये जिनपुरंदरान भगवत्प्रवरप्रतिमाः संमदादानन्दादवन्दत नमस्करोति स्म । ततः कतिचिद्देवकुलिकासु जिनबिम्बवन्दनानन्तरं प्रमुदितेन हृष्टमनसा विभुना गणस्वामिना गुरुणा पुरोऽग्रे राजादनी क्षीरिका 'रायणि' इति प्रसिद्धा । 'नवनवति पूर्ववारान् यस्मिन्समवसरद्युगादिजिनः । राजादनीतरुतले विमलगिरिरयं जयति तीर्थम् ॥' इति पूर्वसूरिकृतस्तुतौ । व्यलोकि दृष्टा । किंभूता । सुराणां चतुर्निकायिकदेवानां परम्पराभिः श्रेणीभिरुपासिता सेविता । केव । मरुतां भवनपतिव्यन्तरज्योतिष्कविमानिकानां वसतिर्निवासस्थानमिव । यथा मरुद्वसतिः सुरालीभिः परिशीलिता आस्ते ॥

श्लोकार्थ

त्यां मूलप्रासादनी चारेतरफ देवकुलिका(दहेरी)ओमां रहेलां जिनबिंबोने हर्षपूर्वक प्रणाम कर्या, त्यारपछी आचार्यदेवे अनेक देवोथी सेवायेला देवाधिष्ठ एवा "रायणवृक्ष" ने जोयुं. ॥ ९५ ॥

अवर्ध्यत स मौक्तिकै रजतहेमपुष्पव्रजै-
जगद्गुरुरिवाङ्गिभिः सुमनसां समूहैः श्रिता ।
गिरेरिव घनागमोन्नमदमन्दकान्दम्बिनी
ववर्ष पयसां भरैः शिरसि संघभर्तुश्च या ॥ ९६ ॥

या राजादनी अङ्गिभिर्यात्रिकसंघलोकैः सह मौक्तिकैर्मुक्ताफलैर्वर्तन्ते ये तादृशा रजतानां रूप्यसंबन्धिनां हेम्नां सुवर्णसंबन्धिनां पुष्पाणि कुसुमानि अथ वा रजतानि स्वर्णानि पुष्पाणि जलस्थलजातानि कमलमालतीप्रमुखाणि तेषां व्रजाः समूहाः तैरवर्ध्यत वर्धिता । क इव जगद्गुरुरिव । यथा तीर्थनाथः अङ्गिभिर्भव्यजनैः सुरासुरनरैर्मौक्तिककलितरजतमहारजतमयसुमैः स्वाभाविककुसुमैश्च वर्ध्यते । किंभूतानाम् । सुमनसां पुष्पाणां देवानां च । 'प्रतिशाखं प्रतिपत्रं प्रतिफलं देवैरधिष्ठिता' इति शत्रुंजयमाहात्म्ये । समूहैः श्रिता । जगद्गुरुरपि समवसरणे जानुप्रमाणपुष्पैश्चतुर्निकायनाकिनिकरैश्च सेवितः स्यात् । च पुनर्या संघभर्तुः संघपतेः शिरसि मस्तके पयसां क्षीरवृक्षत्वात्क्षीराणां भरैर्धाराभिर्ववर्ष वृष्टिं कृतवती । केव । घनागमोन्नमदमन्दकादम्बिनीव । यथा घनानां मेघानामागमे प्रावृट्समये । 'वर्षास्तपात्ययः प्रावृड्मेघात्कालागमौ क्षरिः' इति हैम्याम् । उन्नमन्ती जलभरैर्नम्रीभवन्ती तथा अमन्दा मिलदभ्राभ्रिकाभिर्बहला जायमाना कादम्बिनी मेघमाला गिरेः पर्वतस्य शिरसि शिखरे पानीयानां व्रजैर्वर्षति ॥

શ્લોકાર્થ

સંઘના માણસોએ સોનાચાંદીનાં પુષ્પો અને મોતીઓ વડે તીર્થંકર ભગવંતની જેમ રાયણવૃક્ષને વધાવ્યું. (રાયણવૃક્ષના પ્રત્યેક પાંદડા, શાખા અને પ્રત્યેક ફૂલો દેવાધિષ્ઠિત છે.) ત્યારે વર્ષાકાળમાં જેમ મેઘની ધારા જલવૃષ્ટિ કરે તેમ રાયણવૃક્ષે સંઘપતિના મસ્તકે દૂધની વૃષ્ટિ કરી. ॥ ૯૬ ॥

असावपि किमक्षयाजनि न सिद्धशैलाश्रया-
दनन्तयतिनः शिवश्रियमवापुरस्यास्तले ।
युगादिजिनपादुका किमधिदेवतास्या मरु-
द्गवीव विहितेहिता श्रियमुवाह राजादनी ॥ ९७ ॥

मन्त्रतन्त्रविद्यानां विविधाः सिद्धयो यस्य स सिद्ध उच्यते । तादृशश्चासौ शैलश्च शैलनामा कश्चित्सिद्धपुरुषः शत्रुंजयपर्वतश्च तस्याश्रयो नित्याङ्कस्थायुकत्वेन संश्रयस्तस्मात्कारणादसावपि राजादन्यपि । उत्प्रेक्ष्यते—अक्षया सर्वदैव विद्यमानत्वाद्वा क्षयरहिता किमजनि जातेव । पुनरस्या राजादन्यास्तले मूलसंनिधौ भूमिभागे अनन्ता अन्तातीता यतिनः साधवः । मत्वर्थीय इन्प्रत्ययः । 'ब्रह्मशर्मभरचाहयतीव' इति नैषधे । शिवं मोक्षमवापुर्लेभिरे । पुनस्यास्तले अधोभूमिभागे युगादिजिनपादुका ऋषभदेवपादद्वन्द्वप्रतिमा आस्ते । उत्प्रेक्ष्यते—अस्या राजादन्या अधिदेवता किमधिष्ठात्री देवीव । पुनर्या विहितं निष्पादितम् । पूरितमित्यर्थः । ऐहिकमिहलोकसंबन्धि पुत्रकलत्रवैभवादिकमामुष्मिकं परलोकसंबन्धि स्वर्गापवर्गादिमभीहितं यया तादृशीव वर्तते । केव । मरुद्गवीव । यथा कामधेनुः कृतजनाभिलषिता भवति तादृशी सा राजादनी शोभामुवाह वहते स्म ॥

શ્લોકાર્થ

જેની નીચે રહીને અનંતા શ્રમણો શિવલક્ષ્મીને વર્યા છે, તેવી રાયણ સિદ્ધાચલને આશ્રયીને રહેવાથી શું અક્ષય નહીં બની હોય! અર્થાત્ અક્ષય બનેલા રાયણવૃક્ષની નીચે યુગાદિદેવની પાદુકા શોભાને ધારણ કરે છે; તે જાણે દેવાધિષ્ઠિત કામધેનુ ન હોય! ॥ ૯૭ ॥

विहारमिव संमदादृव्रतिवसुंधरावासवः
प्रदक्षिणयति स्म तत्प्रथमतीर्थकृत्पादुकाम् ।
जिनाधिपमिवाध्वनि द्रुमपरम्परा तं तदा
ननाम किमु भक्तितः फलभरांच्च राजादनी ॥ ९८ ॥

व्रतिवसुंधरावासवो मुनीनां मध्ये मेदिनीन्द्रो राजा हीरसूरिर्विहारं जिनप्रासादमिव सा चासौ प्रथमतीर्थकृतो नाभेयदेवस्य पादुका च तत्पादप्रतिकृतिं प्रदक्षिणयति स्म प्रदक्षिणीचकार। च पुनस्तदा तस्मिन् सूरेः प्रदक्षिणादानावसरे फलानां सस्यानां भराद्भाराद्तिशयाद्वा राजादनी ननाम नम्रीबभूव। उत्प्रेक्ष्यते—भक्तितो गुरौ सेवासक्तिवशादिव नमति स्म। केव। द्रुमपरम्परेव। यथा पादपानां पटली अध्वनी भगवति विहारं कुर्वाणे सति मार्गे जिनाधिपं नमति तीर्थनाथं प्रति प्रह्वीभवति॥ इति राजादनी॥

श्लोकार्थ

જગદ્ગુરૂએ જિનમંદિરની જેમ યુગાદિદેવની પાદુકાને હર્ષપૂર્વક પ્રદક્ષિણા આપી ત્યારે જેમ તીર્થંકર ભગવંતને વિહારભૂમિમાં આવેલા વૃક્ષો નમસ્કાર કરે છે તેમ ફૂલોના ભારથી નમી ગયેલા રાયણવૃક્ષે જાણે આચાર્યદેવને ભક્તિપૂર્વક પ્રણામ કર્યા ન હોય! તેમ થઈ રહ્યું ॥ ૯૮ ॥

समीक्ष्य शिखिभोगिनौ स सखिवन्मिथः संगतौ
ततो यमिमतङ्गजो जिननिशीथिनीनायकान्।
जसूप्रथमठकुरप्रवररामजीकारितो-
ल्लसज्जिनविहारयोस्त्रिचतुरास्ययोर्नेमिवान्॥ ९९॥

ततो राजादनीऋषभपादुकाप्रदक्षिणाप्रणमनानन्तरं यमिमतङ्गजो वाचंयमकुञ्जरः सूरिर्जिननिशीथिनीनायकान् जिनचन्द्रबिम्बान् नेमिवान् नतिगोचरीचक्रिवान्। कयोः। जसू इति शब्दः प्रथमं पूर्वं यत्र तादृशठक्कुरः प्रतावता लोकप्रसिद्ध्या जसूठार इत्यभिधानः, तथा प्रवरो धर्मकर्मदातृतादिगुणप्रधानो यो रामजी नामा व्यवहारी ताभ्यां कारितयोः शिल्पिभिर्निर्मापितयोः। तथा उल्लसतो विविधरचनाचारुशोभाभिः स्फुरतोस्तादृशयोर्जिनविहारयोस्तीर्थकृत्प्रासादयोः। किंभूतयोः। त्रिचतुरास्ययोः त्रीणी तथा चत्वारि आस्यानि द्वाराणि ययोः। त्रिमुखचतुर्मुखयोरित्यर्थः। किं कृत्वा। समीक्ष्य दृग्गोचरीकृत्य। कौ शिखिभोगिनौ मयूरभुजंगमौ। किंभूतौ। मिथः परस्परं संगतौ मिलितौ। किंवत्। सखिवत् सखायाविव मित्रे इव॥

श्लोकार्थ

ત્યારપછી આચાર્યદેવે મિત્રની જેમ સાથે રહેલા સર્પ અને મયૂરને જોયા. અને ત્યાં રહેલા "જસુઠક્કર" અને "રામજી" નામના વ્યાપારીએ કરાવેલા ત્રિમુખ અને ચતુર્મુખ પ્રાસાદમાં રહેલાં જિનબિંબોને નમસ્કાર કર્યા. ॥ ૯૯ ॥

स भक्तमिव नाभिभूप्रभुपुरोऽनिशस्थायिनं
प्रणम्य गणधारिणं तदनु पुण्डरीकाभिधम् ।
जिनेन्द्र इव देशनासदनमादिदेवालयं
समं मनुजराजिभिः श्रमणपुंगवः प्राविशत् ॥ १०० ॥

श्रमणेषु साधुषु पुंगवः प्रधानः श्रेष्ठः । 'स्युरुत्तरपदे व्याघ्रपुंगवर्षभकुञ्जराः' इति हैम्याम् । तथा 'पुंगवो गवि भैषज्ये प्रधाने चोत्तरस्थितः' इत्यनेकार्थः । अथ वा श्रमणानां मध्ये पुंगवो वृषभो गणभारधुरंधरत्वात् सूरिर्मनुजराजिभिः भव्यलोकमालिकाभिः सममादिदेवालयमृषभप्रासादं प्राविशत्प्रविशति स्म । क इव । जिनेन्द्र इव । यथा तीर्थंकरः सुरासुरनरैः सार्धं देशनासदनं समवसरणं प्रविशति । किं कृत्वा । तदनु जसूठाररामजीसाहिविहारयोर्भगवद्बिम्बप्रणमनादनु पश्चात्पुण्डरीक इत्यभिधा नाम तादृशं गणधारिणमृषभजिनप्रथमगणधरम् । यदुक्तम्—'ऊसप्पिणीण पढमं सिद्धो इह पढमचक्किपढमसुउ । पढमजिणस्सपपढमो गणहीरीजच्छपुण्डरिउ ॥' इति शत्रुंजयकल्पे । प्रणम्य नमस्कृत्य । किंभूतम् । नाभिनाम्नः कुलकराभ्दूरुत्पत्तिर्यस्य तादृशो मारुदेवदेवः स एव प्रभुः स्वामी जगन्नायकस्तस्य पुरोऽग्रे दृग्गोचरे अनिशमहोरात्रं तिष्ठतीत्येवंशीलम् । कमिव । भक्तमिव । यथा सेवासक्तः पुमान् स्वामिपुरस्तान्नात्यासन्ने नातिदूरे तिष्ठति ॥

શ્લોકાર્થ

ત્યારબાદ નીરંતર ઋષભદેવભગવંતની આગળ રહેલા આ ઉત્સર્પિણીના પ્રથમસિદ્ધ પ્રથમચક્રવર્તીના પ્રથમપુત્ર અને પ્રથમતીર્થંકરનાં પ્રથમગણધર શ્રી પુંડરીક સ્વામિના દર્શન કરીને, જેમ સુરાસુરથી પરિવરેલા તીર્થંકરભગવંત સમવસરણની ભૂમિમાં પ્રવેશ કરે તેમ સંઘની સાથે આચાર્યદેવે મૂલપ્રાસાદ ઋષભવિહારમાં પ્રવેશ કર્યો. ॥ ૧૦૦ ॥

प्रणम्य जननीं जिनेशितुरिभांसमासेदुषीं
स गर्भभवने पुनः किमु न देवयुक्छन्दके ।
जिनं स्वयमिव स्थितं विकचनेत्रपत्रैः पिब-
न्नवाङ्मनसगोचरां मुदमविन्दत श्रीगुरुः ॥ १०१ ॥

स हीरविजयसूरिरिति नाम्ना प्रसिद्धः श्रिया गणभृल्लक्ष्म्या युक्तो गुरुस्तत्त्वज्ञः जैनश्राद्धानां धर्मोपदेष्टा जिनं श्रीऋषभतीर्थंकरं विकचैर्विस्त्रैर्नेत्रपत्रैः । पूज्यत्वाद्बहुत्वम् । नयनकमलदलैः पिबन् सादरमवलोकयन् सन् अवाङ्मनसयोर्न वचनचेतसोर्गोचरं विषयातीतम् । वाचा वक्तुं न शक्यते चेतसा च ज्ञातुं न पार्यते इत्यर्थः । तादृशीं मुदमानन्दमविन्दत प्राप्नोति स्म । किंभूतं जिनम् । स्थितं स्थितिं कृतवन्तम् । उत्प्रेक्ष्यते—स्वयमात्मनैव मोक्षादागत्यात्र तस्थिवांसमिव । क्व स्थितम् । गर्भभवने भवनस्य गर्भो गर्भभवनः । 'क्वचिदमा-

यन्तस्य परत्वम्' इति सूत्रेण भवनस्य परत्वम्। तस्मिन् गर्भागारे। उत्प्रेक्ष्यते—देवेत्यादिपदेन युनक्ति योगं प्राप्नोति संबन्धं लभते इति देवयुक् तादृशश्छन्दकः। स्वार्थे कः। एतावता देवच्छन्दकस्तस्मिन्निव। प्रागपि समवसरणे मध्ये प्राकारान्तर्देवच्छन्दक आसीत्, तत्र च सुखं तिष्ठन्नासमानः शयान आसीत्तद्वत्। किं कृत्वा मुदमविन्दत। जिनेशितुः श्रीवृषभध्वजस्य जननीं मातरं प्रणम्य मरुदेवीं प्रणामविषयीकृत्य। किं चक्षुषी। इभस्य गजराजस्य अंसं स्कन्धमासेदुषीमाश्रितवतीम्। आरूढामित्यर्थः यदुक्तं स्थानाङ्गे चतुर्थस्थानकचतुरन्तक्रियाधिकारे—'मरुदेवा हि स्थावरत्वेऽपि क्षीणप्रायकर्मत्वेनाल्पकर्मा अविद्यमानमानतपोवेदना च सिद्धा गजवराहरूढाया एवायुःसमाप्तौ सिद्धत्वात्।' इति ॥

શ્લોકાર્થ

હાથીના હોદ્દા ઉપર બેઠેલાં મરૂદેવામાતાને પ્રણામ કરીને, દેવછંદાની જેમ ગભારામાં બિરાજમાન સાક્ષાત્ ભગવંત જ ન હોય તેવી શ્રીઋષભદેવની પ્રતિમાને વિકસ્વર નેત્રકમલ વડે જોઈને, આચાર્યદેવે વચનાતીત અને કલ્પનાતીત આનંદ પ્રાપ્ત કર્યો. ॥ १०१ ॥

जिनाननिशीथिनीमणिनिरीक्षणप्रोल्लस-
　द्धृदन्तरमुदम्बुधिस्फुरदभङ्गभङ्गैरिव ।
स गौतमगणीन्द्रवच्चरममादिमं श्रीजिनं
　सुधामधुरिमाङ्कितैरभिनवैः स्तवैरस्तवीत् ॥ १०२ ॥

स सूरिरादिमं प्रथमं श्रीजिनमृषभं सुधावत् पीयूषैरिव मधुरिम्णा माधुर्येण अङ्कितैः कलितैस्तथा अभिनवैर्नवीनैः स्वयं विहितैः स्तवैः स्तोत्रैः अस्तवीत् तुष्टुवे। 'ष्टुञ् स्तुतौ' धातुरुभयपदी। किंवत्। गौतमवद्गणीन्द्रवत्। यथा गौतमनामा गणिनां साङ्गे प्रवचने अधीतानां मध्ये इन्द्रो गणधरश्चरमं श्रीजिनं महावीरं भगवन्तम् अथ वा शत्रुंजये यात्रार्थं समेतो जगच्चिन्तामणिः इति नमस्कारो नाभिनरिन्दमल्हार इति स्तवनमित्यादि प्रघोषान् स्तवैश्च स्तौति स्म। अथ स्तवैः। उत्प्रेक्ष्यते—जिनस्यादिदेवस्य आननं मुखं तदेव निशीथिनीमणिश्चन्द्रः। निशारत्नकरौ च चन्द्रः' इति हैम्याम्। तस्य निरीक्षणेन दर्शनेन प्रोल्लसन्नुद्वेलीभवन् यो हृदन्तरे मनोमध्ये मुदानन्दरूप एवाम्बुधिः समुद्रस्तस्य स्फुरन्तो विस्तरन्तो ये अभङ्गाः भङ्गाः कल्लोलास्तैरिव ॥

શ્લોકાર્થ

અને ગૌતમ ગણધરની જેમ આચાર્યદેવે સુધાસારિણી મધુર વાણીથી નવનવા સ્તોત્રો વડે યુગાદિજિનની ભક્તિભાવપૂર્વક સ્તુતિ કરી. તે સ્તુતિ જાણે જિનેશ્વરરૂપી

ચન્દ્રને જોવાથી ઉલ્લસિત બનેલા આનંદરૂપી સમુદ્રના ચિત્રવિચિત્ર તરંગો ન હોય ! ॥ ૧૦૨ ॥

जय त्रिदशशेखरोन्मिषितपुष्पमालागल-
न्मरन्दकणमण्डलीस्नपितपादपद्मद्वय ।
जयामृतनितम्बिनीहृदयतारहारो जग-
त्त्रयीजनसमीहितं त्रिदशसालवत्पूरयन् ॥ १०३ ॥

हे जिन, त्वं जय विजयस्व सर्वोत्कर्षेण प्रवर्तस्व। हे त्रिदशा देवास्तेषां शेखरा अवतंसाः। 'आपीडशेखरोत्तंसावतंसा शिरसः स्रजि' इति हैम्याम्। तेषामुन्मिषितानि विकसितानि यानि पुष्पानि कुसुमानि तेषां माला माल्यानि श्रेणयो वा ताभ्यो गलन्तो निष्पतन्तो ये मरन्दाः पुष्परसाः तेषां कणा बिन्दवस्तेषां मण्डलीभिः स्नपितं प्रक्षालितं धौतं पादौ चरणावेव पद्मौ कमलौ तयोर्द्वयं युगलं यस्य स तस्य संबोधनम्। पुनः हे जिन, त्वं जय। त्वं किंभूतः। अमृतं महानन्दस्तदेव नितम्बिनी दुर्वरारोहा महिला तस्या हृदये स्तनान्तरे उज्ज्वलः। अथ वा ताराणां निर्मलमौक्तिकानां हारो मुक्तावली। हारोपम इत्यर्थः। 'तारो निर्मलमौक्तिके' इत्यनेकार्थे। हे पूरयन् संपूर्णीकुर्वन् हे विश्राणयन्। संबोधने 'शत्रानशौ' इति प्रक्रियासूत्रेण संबोधने शतृप्रत्ययः। तथा च 'गतिस्तयोरेष जनस्तमर्दयन्' इति नैषधे संबोधनं पदं वृत्तौ व्याख्यातमस्ति। किंभूतः। जगतां विश्वेषां त्रयीनां स्वर्गपातालभूमीनां जनानामेतावता सुरासुरदानवमानवानां समीहितं मनसामभिलषितम्। किंवत्। त्रिदशसालवद्यथा कल्पद्रुमः सर्वेषां समीहितं पूरयति ॥

શ્લોકાર્થ

દેવોના મુગટોમાં રહેલી પુષ્પમાલાઓમાંથી અવતા રસસમૂહથી જેમનાં ચરણકમલે અભિષેક કરાયો છે, તેવા હે ભગવંત, આપ જયવંતા વર્તો. મુક્તિરૂપીના દેદીપ્યમાન હાર સમાન, તેમજ ત્રણે જગતનાં ઇચ્છિતને પૂરવામાં કલ્પવૃક્ષ સમાન એવા હે ભગવંત, આપ જયવંતા વર્તો. ॥ ૧૦૩ ॥

जयोल्लसितकेवलामलतमात्मदर्शोदरा-
नुबिम्बितजगत्त्रयाखिलपदार्थसार्थ प्रभो ।
जय त्रिभुवनाद्भुतातिशयपद्मिनीसद्मना
विनिद्रवनवीरुधा विटपित्रत्समालिङ्गित ॥ १०४॥

हे प्रभो स्वामिन्, हे उल्लसितमावरणापगमात्प्रकटीभावं प्राप्तं यत्केवलं लोकालोकप्रकाशनप्रगुणपञ्चमज्ञानम्। 'केवलं त्वेककृत्स्नयोः। निर्णीते कुहने ज्ञाने' इत्यनेकार्थः। तदेवामलतमः अतिशयेन विशुद्धो य आत्मदर्शो दर्पणस्तस्योदरे मध्ये अनुबिम्बिता प्रतिबिम्बयुक्ता जाताः संक्रान्ता नागलोकस्वर्लोकभूलोकानां त्रयस्याखिलाः समस्ताः पदार्था यावद्वस्तूनि तेषां सार्थाः समूहा यस्य तस्य संबोधने त्वं जय। हे समालिङ्गित सम्यक्प्रकारेण कृताश्लेषक, या त्रिभुवने त्रैलोक्येऽपि अद्भुताश्चर्यकारिणी अतिशयरूपा स्वाभाविका आजन्मजाताश्चत्वारस्तथा कर्मणां घाताज्जाता एकादश तथा देवनिर्मिता एकोनविंशतिः एवं चतुस्त्रिंशत्तदतिशयरूपा पद्मिनीसद्मा पद्मवासा लक्ष्मीः। पद्मिन्यां कमले सद्म गृहं यस्याः सा। एतावता। 'श्रीर्हरिप्रिया। पद्मवासा' इति हैम्याम्। तथा 'पद्मिनी योषिदन्तरे। अब्जेऽब्जिन्यां सरस्यां च' इत्यनेकार्थः। तया। किंवत्। विटपिवत्। यथा विटपी पादपः विनिद्रया विकसितया वनवीरुधा विपिनवल्लया समालिङ्ग्यते॥

श्लोकार्थ

જેમના કૈવલ્યજ્ઞાનરૂપી નિર્મલ આરિસામાં ત્રણે જગતના પદાર્થોનો સમૂહ પ્રતિબિંબિત થયો છે, એવા હે ભગવંત, આપ જયવંતા વર્તો. જેમ નવપલ્લવિત લતાઓ વડે વૃક્ષ શોભે તેમ જન્મજાત ચાર, ઘાતિકર્મના ક્ષયથી અગિયાર, અને દેવકૃત ઓગણીશ એમ ત્રણે જગતને આશ્ચર્યકારી ચોત્રીશ અતિશયરૂપી લક્ષ્મી વડે સુશોભિત એવા હે ભગવંત, આપ જયવંતા વર્તો. ॥ १०४ ॥

जय प्रकटयन्पथो रविरिवाथ मथ्नंस्तमः
कुदृग्भिरिव कौशिकैर्जगति दुर्निरीक्ष्यः पुनः।
गजेन्द्र इव वज्रिणः स्फुरदखण्डशौण्डीरिमा
मृगारिरिव निर्भयः परिभवन्कुरङ्गान्पुनः। ॥ १०५ ॥

हे ऋषभ, त्वं चिरंजय। किं कुर्वन् त्वम्। प्रकटयन्। कान्। पथो मार्गान्। धर्मकर्मसंबन्धिनः स्वर्गापवर्गनरकादिकान्वा। क इव। रविरिव भास्वानिव। यथा भास्करः पथो भुवो मार्गान् प्रकाशयति स्पष्टान् दर्शयति। अथ पुनः रविरिव तमोऽज्ञानं पापं वा ध्वान्तं च मथ्नन्निर्दलयन्। पुनः रविरिव कौशिकैर्घूकैरिव जगति विश्वे कुदृग्भिः कुपाक्षिकैः दुःखेन कष्टेन निरीक्षितुं द्रष्टुं शक्यः। पुनर्वज्रिणो वासवस्य गजेन्द्र इव ऐरावण इव। स्फुरन् स्फूर्तिं प्राप्नुवन् अखण्डः परैः सुरासुरनरैरप्रतिहतः शौण्डीरीमा पराक्रमो यस्य। पुनर्मृगारिरिव निर्भयो देवमनुजतिर्यक्कृतोपसर्गपरिषहादिभ्यो भीतिरहितः। पुनः कुरङ्गः कुमतकुदर्शनमिथ्यात्वादिषु रङ्गो रागो वासना येषां तान्। 'रङ्गः स्यान्नृत्तयुद्धयोः। रागे' इत्यनेकार्थः। मृगांश्च परिभवन्मथ्नन्॥

શ્લોકાર્થ

સૂર્યની જેમ સન્માર્ગને પ્રગટ કરનારા, અજ્ઞાનરૂપી અંધકારનો નાશ કરનારા, જગતમાં કુદૃષ્ટિઓરૂપી ઘૂવડો માટે દુર્લક્ષ્ય, ઇન્દ્રનાં ઐરાવણ હાથીની જેમ શૂરતાને ધારણ કરનારા, સિંહની જેમ નિર્ભય અને કુદૃષ્ટિઓરૂપી હરણિયાઓનો પરાભવ કરનારા એવા હે ભગવંત, આપ જયવંતા વર્તો. ॥ ૧૦૫ ॥

जयानिमिषसानुमानिव सुजातरूपः पुनः
प्रभञ्जनभरैः कथंचन न कम्प्रभावं भजन् ।
सुधांशुरिव बोधयन्कुवलयं विलासैर्गवां
समुल्लसितगौरिमा कलितशीतलेश्यः पुनः ॥ १०६ ॥

हे युगादिदेव, त्वं जय चिरं विजयवान भव त्रिभुवनोपकारं कुर्वाणः प्रवर्तस्व। किंभूतः। अनिमिषाणां देवानां सानुमान् शैलः सुमेरुरिव सुष्ठु शोभनं त्रैलोक्यातिशायि जातमुत्पन्नं प्रादुर्भूतं वा रूपं यस्य मेरौ तु प्रकृष्टं जातरूपं स्वर्णं यस्मिन्। पुनः किंभूतः। प्रकर्षेणातिशयेन भञ्जता उपमर्दनाव्याघातादिकारिण उपसर्गाः प्रतिकूलदेवादयो वा तेषां भरैर्गणैः कथंचन कम्प्रभावं कम्पनशीलतां कातरतया भग्नपरिणामतां न नैव भजन्। मेरुस्तु वातवेगैश्चाचलित्वं न भजते चालयितुमशक्यः। पुनः सुधांशुश्चन्द्र इव गवां विलासैः पञ्चत्रिंशद्गुणाकलितयोजनविस्तरवाचां चातुरीभिश्चन्द्रिकाप्रचारैश्च कुवलयं मेदिनीमण्डलं तत्र स्थायुकत्वेन उपलक्षणत्वाज्जगत्त्रयमपि उत्पलं च बोधयन् प्रतिबोधं प्रापयन् प्रतिबोध-कलितं कुर्वन् विकाशयंश्च। पुनः किंभूतः। समुल्लसितां स्फूर्तिमत्तां प्राप्तः चतुरलोचनपटुक-पेयतां प्राप्तो वा गौरिमेव विकचचम्पककाञ्चनवद्वपुःपीतिमा श्वेतिमा च यस्य। 'गौरः श्वेतपीतयोः' इत्यनेकार्थः पुनः किंभूतः कलिता धृता शीतलेश्या शीतलता च येन॥

શ્લોકાર્થ

જેમ સુવર્ણમય મેરૂપર્વત પ્રચંડ પવનવડે અકંપિત છે તેમ અનુકૂળ અને પ્રતિકૂળ ઉપસર્ગોરૂપી પવનવડે નિશ્ચલતાને ધારણ કરનારા, ચન્દ્ર જેમ કમલને વિકસિત કરે છે તેમ ધર્મદેશના દ્વારા ભવ્ય જીવો રૂપી કમલવનને વિકસિત (પ્રતિબોધ) કરનારા, દેદીપ્યમાન કંચનવર્ણીય દેહવાળા તેમજ શીતળતાને અર્પનારા એવા હે ભગવંત, આપ જયવંતા વર્તો. ॥ ૧૦૬ ॥

जय प्रशमयन्मनोभवभटं महाबोधिव-
त्कुदृक्कमलकाननोन्नमदकाण्डचण्डाम्बुदः ।
सलीलदलिताखिलप्रबलदोषदोषातमः-
स्फुरद्विमलकेवलाम्बुरुहबन्धुबिम्बोदयः ॥ १०७ ॥

हे नाभेय देव, त्वं जय चिरकालं जीयाः । किं कुर्वन् । प्रशमयन्निघ्नन् । 'प्रोज्ञासनं प्रशमनं प्रतिघातनं वधः' इति हैम्याम् । तथा 'वस्त्यति शमयति च दमयति च' इति क्रियाकलापे हिंसार्थे । कम् । मनोभवः कंदर्पः स एव भटः वीरस्तम् । किंवत् । महाबोधिवत् । यथा बुद्धः स्मरशूरं प्रशमयामास । 'बोधिसत्त्वो महाबोधः', तथा 'मारलोकरवर्जित' इति हैम्याम् । त्रिकमपि । पुनः किंभूतः । कुदृशः कुपाक्षिकाः अन्यदर्शनिन एव कमलकाननानि पद्मवनखण्डानि तेषु उन्नमन् साडम्बरीभवन् जलभरेण भवन् वा महीं स्पृशन्वा अकाण्डे अप्रस्तावे प्रावृषं विनैव चण्डः कठिनः मुशलप्रमाणजलधारावर्षी अम्बुदो मेघः। 'बालातपमिवाब्जानामकालजलदोदयः' इति रघौ । 'निद्राणपङ्कजधरसि जलदानेहसि' इति चम्पूकथायाम् । पुनः किंभूतः । सलीलं लीलासहितं यथा स्यात्तथा प्रयासं विनैव दलितानि विध्वस्तानि चूर्णीकृतानि अखिलानि समस्तान्यपि प्रबन्धप्रसवानि अष्टादशसंख्याकाः प्रबला अनुकूलबलत्वात्परैर्मोहमूढतया कातरीभूतैरन्यैर्मर्तुमशक्या दोषा दानान्तराय–लाभान्तराय–वीर्यान्तराय–भोगान्तराय – उपभोगान्तराय – हास्य–रतिअरति–भय–जुगुप्सा–शोक–काम–मिथ्यात्व–अज्ञान–निद्रा–अविरति–राग–द्वेषरूपा अपगुणा एव दोषातमांसि निशान्धकाराणि तैः कृत्वा स्फुरन्दीप्यमानो विमलो हिमाम्बुदापगमाच्छिशदः केवलमनन्यापेक्षं लोकालोकप्रकाशकारकमनुत्तरं पञ्चमज्ञानं तदेवाम्बुरुहबन्धोः कमलसुहृदो दिनकरस्य बिम्बोदयः प्रादुर्भावो यस्य ॥

શ્લોકાર્થ

બુદ્ધની જેમ કામદેવને શમાવનારા, કુદૃષ્ટિઓરૂપી કમલવનનો નાશ કરવામાં પ્રચંડ મેઘની વર્ષા સમાન, સમસ્ત દોષોરૂપી રાત્રિના અંધકારને લીલા-માત્રમાં નાશ કરી નાખનારા અને તેથી જ્ઞાનરૂપી સૂર્યનો જેમને ઉદય થયો છે તેવા, હે ભગવંત, આપ જયવંતા વર્તો. ॥ ૧૦૭ ॥

जयामृतविभूतिभाग्घन इवातिधीरध्वनि-
र्निरञ्जनतयोदितो जलजवद्विशुद्धाशयः ।
सुधारस इव प्रभो सकलजन्तुजीवातुको
भवाद्धवभृतोऽम्बुधेर्जगति पोतवत्तारयन् ॥ १०८ ॥

हे मारुदेवदेव, त्वं जय । त्वं किंभूतः । घन इव मेघवत् अमृतं निःश्रेयसं सलिलं च तस्य तेन वा विभूतिं संपत्तिं शोभां वा भजतीति । णिण्प्रत्यये भाक् । तथा अतिशयेन सर्वेभ्यश्चराचरेभ्योऽभ्यधिकतया धीरो देशनासमये गम्भीरो वा ध्वनिर्वाग्विलासो गर्जितं गर्जारवो यस्य । पुनः किंभूतः । जलजवत् शङ्ख इव । 'ततः प्रियोपात्तरसेऽधरोष्ठे निवेश्य दध्मौ जलजं कुमारः' इति रघुवंशे । निर्गतमञ्जनं रागद्वेषोपलेपो रजोवगुण्ठनं वा यस्मात्तस्य भा तत्त्वेनोदितः कथितः प्रादुर्भूतो वा । पुनः किंभूतः । जलजवत् शङ्खत्रिरेख इव विशुद्धा निष्पापो निर्मलश्च आशयो मनो मध्यं च यस्य सः । पुनः किंभूतः । सुधारसः पियूषमिव सकलानां त्रिभुवनभवनोदरवर्तिनां जन्तूनां प्राणिनां जीवातुको जीवनौषधम् । पुनः किंभूतः जगति विश्वे भवभृतो भविकजीवान् भवात्संसारात्तारयन् संसारपरपारवर्तिमुक्तिनगरीं प्रापयन् । किंवत् । पोतावत् । यथा पोतो यानपात्रमम्बुधेः समुद्रमध्याज्जनान् सांयात्रिकलोकान्निस्तारयति ॥

श्लोकार्थ

મેઘની જેમ અમૃત (મોક્ષ) રૂપી જલવડે પરિપૂર્ણ ધીર અને ગંભીર ધ્વનિવાળા, રાગદ્વેષરૂપી કર્મરજનાં નાશથી શંખની જેમ પ્રગટ થયું છે. નિરંજનપણુ જેમને, કમલની જેમ નિર્લેપ ચિત્તવૃત્તિવાળા, અમૃતની જેમ ત્રણે ભુવનના જીવો માટે સંજિવની ઔષધિ સમાન, તેમજ પાનપાત્રની જેમ ભવ્ય જીવોને અગાધ સંસારરૂપી સમુદ્રથી પાર કરનારા એવા હે ભગવંત, આપ જયવંતા વર્તો. ॥ ૧૦૮ ॥

जयेश इव कालभिच्छ्रितशिवश्च मृत्युंजयो
वहन्निरवलम्बतां गगनवत्पदं ज्योतिषाम् ।
युगादिसमये पुनर्जगदशेषसृष्टिं सृजन्
न्सरोजतनुजन्मवत्कलमराललीलागतिः ॥ १०९ ॥

हे सुरभीनन्दनकेतन जिन, त्वं जय सर्वेभ्योऽप्युत्कृष्टतया प्रवर्तस्व । त्वं किंभूतः । कालभित् कालं कलियुगं भिनत्तीति । क्विप्प्रत्यये । पुनः किंभूतः । श्रितं शिवं कल्याणं महानन्दश्च । पुनः किंभूतः । मृत्युं मरणं जयतीत जरामरणरहितत्वात्सिद्धत्वाच्च । क इव । ईश इव । यदा शंभुरपि कालनामानं दानवं भिनत्तीति । तथा श्रिता अर्धाङ्गीकृता शिवा पार्वती येन । तथा मृत्युंजयनाम लोके अनाद्यन्तत्वात् वर्तते । पुनः किं कुर्वन् । गगनवदाकाशवत् निर्गतः अवलम्ब आलार आश्रयो वा यस्मात्तस्य भावस्तत्तां वहन्धारयन् पुनर्ज्योतिषां तेजसां पुष्टधर्ति भामण्डलभावद्ग्रहनक्षत्रतारकाणां च पदं स्थानम् । पुनः किं कुर्वन् । सृजन् विदधत् । काम् । जगदशेषसृष्टिं जगतां भुवनजनानामशेषां समस्तां कुलशिल्पशिक्षकादिकां सर्गरचनाम् । क्व । युगस्यादौ सर्वलौकिकव्यवहारप्रक-

कटीकरणप्रथमसमये । पुनः किंभूतः । कलो मनोज्ञो यो मरालो राजहंसस्तद्वल्लीलया मन्थरत्वेन न त्वौत्सुक्येन त्वरिततया वा चापल्येन वा गतिर्गमनं यस्य । किंवत् । सरोजतनुजन्मवत् यथा पद्माङ्कजन्मा विधाता । 'पद्मनन्दनसुतारिरंसुता' इति नैषधे। युगानां कृतद्वापरत्रेताकलिनाम्नां कालविशेषणामादिसमये जगतां सुरासुरनरनारकतिरश्चां समग्रां गृहाट्टनगनगरादिकां सृष्टिं सृजति स्म । कलमरालेन कृत्वा क्रीडया गमनं यस्य हंसवाहनत्वात् ॥

શ્લોકાર્થ

કાલ નામના દૈત્યને ભેદનાર, જેમના અર્ધઅંગરૂપે પાર્વતી રહેલી છે, તેમજ જેમનું નામ મૃત્યુંજય છે, તેવા ઈશ્વરની જેમ કલિકાળને ભેદનારા, શિવલક્ષ્મીનો આશ્રય કરનારા, અને જન્મમરણથી રહિત, આકાશની જેમ નિરાલંબ, અને ગ્રહનક્ષત્રતારારૂપ જ્યોતિશ્ચક્રસમાન ભામંડલને ધારણ કરનારા અને બ્રહ્માની જેમ યુગની આદિમાં સમસ્ત લૌકિક વ્યવહારરૂપી સૃષ્ટિનું સર્જન કરનારા એવા હે ભગવંત, આપ જયવંતા વર્તો. ॥ ૧૦૯ ॥

शरत्समयपङ्कजाकर इव प्रसन्नाशयः
कुशेशयपलाशवन्निरुपलेपभावं भजन् ।
प्रमद्वरपदं दधन्न च कदापि भारुण्डव-
द्विशेषक इवालिकं विमलभूधरं भूषयन् ॥ ११० ॥

हे वृषभध्वज जिनेन्द्र, त्वं जयेति संबन्धः । त्वं किंभूतः । शरत्समयो जलवाहविरामकालस्तस्य तस्मिन्वा यः पङ्कजाकरस्तटाकः तद्वत् प्रसन्नः प्रसादोपेतः अच्छोऽनाविल आशयो हृदयं मध्यं यस्य । पुनः किं कुर्वन् । कुशेशयं कमलं तस्य पलाशं पत्रं तदिव निर्गत उपलेपः स सारामिष्वङ्गः लिम्पनं च यस्मात्तस्य भावस्तत्ताम् । निर्लेपतामित्यर्थः । भजन्नाश्रयन् । च पुनः कदापि कस्मिन्नपि समये भारुण्डवद्भारुण्डपक्षीव प्रमद्वरपदं प्रमादस्थानम् । प्रमत्ततामित्यर्थः । 'जनैव दधत मा भूः क्वापि प्रमद्वरः' इति पाण्डवचरित्रे । पुनः किंभूतः । विमलभूधरं शत्रुंजयशैलं भूषयन्नलंकुर्वन् । क इव । विशेषक इव । यथा तिलको ललाटं भूषयति ॥ इति हीरसूरिकृता ऋषभदेवस्तुतिः ॥

શ્લોકાર્થ

શરદઋતુના સરોવરની જેમ સ્વચ્છ આશયવાળા, કમલની જેમ નિર્લેપ, ભારંડપક્ષીની જેમ અપ્રમત, અને તિલકની જેમ શત્રુંજયના શણગાર એવા હે ભગવંત, આપ જયવંતા વર્તો. ॥ ૧૧૦ ॥

इत्यभिष्टुत्य सूरीश्वरः श्रीजिनं भालविन्यस्तहस्तद्वयाम्भोरुहः ।
इष्यशाखी फलाप्तेरिवामोदवान्प्राणमद्भूतलालम्बिमौलिस्थलः ॥ १११ ॥

भूतलं पृथ्वीपीठमालम्बते इत्येवंशीलं मौलिस्थलं मस्तकं यस्य तादृशः सन् सूरीश्वरो हीरविजयसूरिवासवः श्रीजिनमृषभदेवं प्राणमत्प्रणनाम नमस्करोति स्म । किं कृत्वा । भाले ललाटे विन्यस्तं स्थापितं हस्तयोर्द्वयं करयोर्युगलमेवाम्भोरुहं कमलं येन तादृशः सन् इति पूर्वोक्तकाव्यैरभिष्टुत्य स्तुतिं कृत्वा । किंभूतः सूरिः । फलाप्तेः श्रीशत्रुंजययात्रा-ऋषभदेवदर्शनादिरूपफलस्य प्राप्तेः सकाशादामोदवान् परमानन्दकन्दकन्दलितहृदयः । क इव । इष्यशाखीव । यथा वसन्ततरुर्भूतले मेदिनीमण्डले मिलन्त्यो मस्तकस्य शिखरस्य शाखा यस्य तादृशः फलानामुपलक्षणात्पल्लवपत्रकुसुमानां च लाभादामोदवान्परिमलकलितः प्रकर्षेण नमति ॥

શ્લોકાર્થ

જેમ વસંતવૃક્ષ ફલની પ્રાપ્તિથી પરિમલયુક્ત અને તેમ યુગાદિનાથનાં દર્શનરૂપ ફલથી પ્રમોદને ધારણ કરનારા આચાર્યદેવે લલાટપટે કરકમલને સ્થાપન કરી અને ભૂતળ-ને વિષે મસ્તક નમાવીને યુગાદિનાથને નમસ્કાર કર્યા. ॥ ૧૧૧ ॥

निववृते प्रमदेन्दिरयान्वितः स जिनगर्भगृहान्तरतस्ततः ।
चतुरिकोदरतोऽभिनवोढया वर इवामृतदीधितिवक्त्रया ॥ ११२ ॥

ततो जिनस्तुतिनुतिकरणानन्तरं स सूरिर्जिनस्य ऋषभदेवस्य यो गर्भगृहो गर्भा-गारस्तस्यान्तरतो मध्यान्निववृते निवृत्तः पश्चाद्वलते ।' निववृते स महार्णवरोधसः.' इति रघौ । बहिराजगामेत्यर्थः । किंलक्षणः । प्रमदेन्दिरया प्रमोदलक्ष्म्या अन्वितो युक्तः । क इव । वर इव । यथा वरयिता परिणेता अभिनवोढया तात्कालिकपरिणीतया अमृतदीधितिवक्त्रया चन्द्रमुख्या आह्लादकवदनया सहितः । चतुरिकोदरतः 'चउरी' इति प्रसिद्धाया मध्यतः गर्भान्निवर्तते बहिरागच्छति ॥

શ્લોકાર્થ

જેમ નવો પરણેલો પતિ, ચન્દ્રમુખી નવોઢાની સાથે ચોરીમાંથી બહાર આવે તેમ આચાર્યદેવ આનંદરૂપી લક્ષ્મીની સાથે ગભારામાંથી બહાર પધાર્યા. ॥ ૧૧૨ ॥

शांभवाद्बहिरुपेत्य सद्मनः पर्षदो वसुमतीपतेरिव ।
द्वारि धीसख इव प्रवेशने धर्मकृत्यविधये स आसितः ॥ ११३ ॥

स हीरसूरिः द्वारि प्रासादद्वारदेशे आसित उपविष्टः । कस्मै । धर्म्याणि धर्मसंबन्धीनि दीक्षोपस्थापनाव्रतोच्चारादीनि कृत्यानि कार्याणि तेषां विधिः शास्त्रोक्तप्रकारेण करणं तदर्थम् । क इव । यथा सचिवः प्रधानः धर्म्याणां न्यायव्यवहारोपलक्षितकार्याणां राज-प्रजासंबन्धिनां विधये प्रवेशने आसितो भवति । किं कृत्वा । शांभवात्तीर्थंकरसंबन्धिनः सद्मनः मन्दिराद्बहिर्बाह्यप्रदेशे उपेत्यागत्य । कस्या इव । पर्षद् इव । यथा धीसखो वसु-मतीपतेः पर्षदः सभाया बहिरेत्य सिंहद्वारे राजप्रजाकार्यार्थमुपविशति ॥

શ્લોકાર્થ

જેમ પ્રધાન, રાજ્ય અને પ્રજાનાં કાર્ય માટે રાજસભામાંથી બહાર આવીને સિંહદ્વારે બેસે તેમ આચાર્યદેવ દીક્ષા, વ્રતોચ્ચારણ આદિ ધર્મકાર્યને માટે જિનમંદિરમાંથી બહાર આવીને રંગમંડપમાં બેઠા. ॥ ૧૧૩ ॥

अदीक्षयत्तत्र स कांश्चिदिभ्यतनूभवान्गौतमवद्गणीन्द्रः ।
कांश्चित्ककुश्रेष्ठिमुखाङ्गभाजस्तुर्यव्रतोच्चारमकारयच्च ॥ ११४ ॥

तत्र प्रासादद्वारे गणिनामनूचानानामिन्द्रः पुरंदरः गणनायको वा कांश्चिदिभ्यतनू-भवान् व्यवहारिनन्दनानदीक्षयत्प्राव्राजयद्दीक्षां ददाति स्म । किंवत् । गौतमवत् । यथा गौतमस्वामी इभ्याद्यङ्गजान् दीक्षयति स्म । पुनः कांश्चित् अणहिल्लपाटकपत्तनसत्ककुनाम श्रेष्ठी प्रमुखो मुख्यो येषां तादृशानङ्गभाजो भव्यास्तुर्यव्रतं ब्रह्मचर्यं तस्योच्चारं प्रत्या-ख्यानमकारयत् ब्रह्मचर्यमुच्चारयेति स्म ॥

શ્લોકાર્થ

ગૌતમસ્વામિજીની જેમ શ્રીહીરવિજયસૂરિજીએ કોઈ શ્રેષ્ઠિપુત્રને પ્રવ્રજ્યા પ્રદાન કરી અને અણહિલ્લપુર પાટણના 'કકુ' નામના શ્રેષ્ઠિ આદિ અનેક ભવ્ય જીવોને બ્રહ્મ-ચર્યવ્રત ઉચ્ચરાવ્યું. ॥ ૧૧૪ ॥

पुण्डरीकान्तिकस्थास्नुरथोद्दिश्य वशीव सः ।
श्रीशत्रुंजयमाहात्म्यं वृषाङ्कवदभाषत ॥ ११५ ॥

अथ दीक्षादानानन्तरं पुण्डरीकनामा ऋषभदेवप्रथमभृत्तन्मूते रन्तिके समीपे तद्देवकुलिकामागत्य तत्पार्श्वे यत्र स्थास्नुस्तिष्ठतीति यशीऌ एतावता मूलप्रासादद्वारादुत्थाय पुण्डरीकमूर्तेः पार्श्वे आगत्योपविष्ट इत्यर्थः। तादृशो वशी जितेन्द्रियः सूरिस्त्रिशो यात्रिकलोकानुद्दिश्य श्रीशत्रुंजयमाहात्म्यं विमलाचलमहिमानमभाषत कथयति स्म। किंवत्। वृषाङ्कवत्। यथा ऋषभदेवः पूर्वं सिद्धशैलमाहात्म्यं भाषते स्म॥

શ્લોકાર્થ

ત્યાર પછી આચાર્યદેવ ત્યાંથી ઊઠીને પુંડરિક સ્વામીની પાસે આવીને બેઠા અને ત્યાં ઋષભદેવ સ્વામીની જેમ યાત્રિકોને ઉદ્દેશીને શત્રુંજયનું માહાત્મ્ય વર્ણવ્યું. ॥ ૧૧૫ ॥

यत्तीर्थेऽन्यत्र शुद्धाध्यवसितिविशदध्यानतः पूर्वकोट्या
प्राणी बध्नाति पुण्यं भवति भवभृतां तत्क्षणेनाप्यमुष्मिन्।
भेतव्यं पातकेभ्यो भुवि न भविजनैर्भेद्यनिर्भेददक्षे
क्ष्माभृत्यस्मिञ्शरण्ये पुनरहिमरुचीवान्धकारोत्करेभ्यः॥ ११६ ॥

अन्यत्र अपरस्मिंस्तीर्थे शुद्धा निष्पापा या अध्यवसितिरध्यवसायः शुभपरिणाम स्तेन कृत्वा यद्विशदं शुक्लध्यानं तस्मात्सप्ततिवर्षकोटिलक्षषट्पञ्चाशत्कोटिसहस्रवर्षमानपूर्वाणां कोट्या शतलक्षैः कृत्वा यत्पुण्यं शुभकर्म प्राणी बध्नाति जन्तुरुपार्जयति तत्पुण्यं तावत्प्रमाणं सुकृतममुष्मिन् शत्रुंजये तत्क्षणात्स यत्र क्षणस्तत्क्षणस्तस्मात्। तत्काल एवेत्यर्थः। अष्टादशनिमेषैरेका काष्ठा, द्वाभ्यां काष्ठाभ्यामेको लवः, पञ्चदशभिर्लवैरेका कला, द्वाभ्यां कलाभ्यामेको लेशः, पञ्चदशभिर्लेशैरेकः क्षणः, षड्भिः क्षणैरेका घटिका, द्वाभ्यां घटिकाभ्यां मुहूर्तम्, इत्यादिकालमानम्। भवभृतां भविनां भवति जायते। पुनर्भुवि पृथिव्यां शरणागतवज्रपञ्जरे अस्मिन् शत्रुंजयनाम्नि पर्वते पृथ्वीपतौ च सति भविजनैर्भविकलोकैरनन्तदुःखदातृत्वाद्वैरिभूतेभ्यः पातकेभ्यः कथंचित्प्रमादात्पापानि कृत्वा न नैव भेतव्यं न भयमानेयम्। किंभूते। भेद्यानि भेत्तुं योग्यानि दुःकर्माणि तेषां निर्भेदे घातने निवारणे दक्षे निपुणे। यदुक्तं शत्रुंजयमाहात्म्ये—'न भेतव्यं पातकेभ्यः प्रमादिभिः। श्रूयतामेकवेलं श्रीसिद्धक्षेत्रकथानकम्॥' कस्मिन्निव। अहिमरुचीव। यथा अभ्युदिते सहस्रकिरणे अन्धकाराणां ध्वान्तानां भयं नानीयते। हिमादन्या अहिमा उष्णा रुचः किरणा यस्य। यदुक्तं माघे—'उदयमहिमरश्मिर्याति शीतांशुरस्तं कुमुदवनमपश्रि श्रीमदम्भोजखण्डम्। त्यजति मदमुलूकः प्रीतिमांश्चक्रवाको हतविधिललितानां ही दुरन्तो विपाकः॥'

શ્લોકાર્થ

' અન્ય તીર્થોમાં ભવ્ય જીવો શુદ્ધ અધ્યવસાયથી પૂર્વ ક્રોડ વર્ષ પર્યંત જે પુણ્ય ઉપાર્જન કરે છે તે પુણ્ય શત્રુંજયની ભાવપૂર્વક કરેલી યાત્રાથી ક્ષણમાત્રમાં બાંધે છે. અને જેમ સૂર્યને અંધકારનો ભય હોતો નથી તેમ અનિકાચિત પાપકર્મોને ભેદવામાં દક્ષ, શરણાગતવત્સલ એવા શત્રુંજય તીર્થમાં ભવ્ય જીવોએ પૂર્વે કરેલાં પાપકર્મોથી ભય રાખવો નહીં. કારણ કે શત્રુંજયનાં દર્શન, વંદન અને સ્પર્શન–માત્રથી જ સર્વે પાપકર્મોનો ક્ષણમાત્રમાં નાશ થઈ જાય છે. ॥ ११६ ॥

अर्हद्देशनवेश्मनीव सततं संत्यज्यतेऽस्मिन्मिथः
पारीन्द्रद्विरदादिजन्मिनिवहैराजन्मविद्वेषिता ।
राज्ये नीतिमतः क्षितेरधिपतेर्व्राता इवोर्वीस्पृशां
सर्वे सन्त्यकुतोभया यदचलोत्सङ्गे पुनः स्थायुकाः ॥ ११७ ॥

भो भव्याः, अस्मिन् शत्रुंजये सततं निरन्तं पारीन्द्रद्विरदादिभिः सिंहहस्तिप्रमुखैः । आदिशब्दाद्याघ्रधेनुचित्रमृगमार्जारमूषकमयूरनागाद्यैः । अन्यैरपि बहुभिरङ्गिभिः प्राणिगणैर्मिथः परस्परं जन्म मर्यादीकृत्याजन्म अवतारमुत्पत्तिमारभ्य । मरणान्तं यावदित्यर्थः । आजन्मनो विद्वेषिता वैरिभावः संत्यज्यते मुच्यते । कस्मिन्निव । अर्हद्देशनवेश्मनीव । यथा जिनेन्द्रसमवसरणे सर्वैः प्राणिभिर्मिथो वैरं संत्यज्यते । यदुक्तम्—'सारङ्गीसिंहशावं स्पृशति सुतधिया नन्दिनी व्याघ्रपोतं मार्जारी हंसबालं प्रणयपरवशा केकिकान्ता भुजङ्गम् । वैराण्याजन्मजातान्यपि गलितमदा जन्तवोऽन्ये त्यजन्ति श्रित्वाश्याम्यैकरूढप्रशमितकलुषं योगिनं क्षीणमोहम् ॥' पुनर्यदचलोत्सङ्गे यस्य शत्रुंजयस्य पर्वतस्योत्सङ्गे क्रोडे स्थायुका वसनशीलाः सर्वे स्वपरजातीयाः प्राणिनः न विद्यते कुतश्चित्कस्मात्रापि भयं येषां ते अकुतोभया निर्भीका अज्ञातभयाह्वानाः सन्ति विद्यन्ते । कस्मिन्निव । राज्य इव । यथा नीतिमतो न्यायवतः क्षितेरधिपते राज्ञो राज्ये उर्वीस्पृशां मानवानां व्राताः समूहा अकुतोभया भवन्ति ॥

શ્લોકાર્થ

' હે ભવ્ય જીવો, શત્રુંજય પર્વત ઉપર રહેલા આજન્મ વૈરી વાઘ–સિંહ, સર્પ–મયૂર આદિ પરસ્પરના વિરોધી પ્રાણીઓ પણ વૈરભાવનો ત્યાગ કરે છે! ન્યાયી રાજાની પ્રજા જેમ નગરમાં નિર્ભયપણે રહે તેમ આ તીર્થમાં જીવોને ક્યાંયથી પણ ભય હોતો નથી, અર્થાત્ નિર્ભયપણે વસે છે. ॥ ११७ ॥

स्वर्णोदयार्बुदब्रह्मगिर्याद्यष्टशतोन्मितैः ।
सुतैरिवोत्तुङ्गशृङ्गैः परितः परिवारितः ॥ ११८ ॥

यः श्रीशत्रुंजयपर्वतः उत्तुङ्गैर्गगनावगाहिभिः शृङ्गैः शिखरैः परितः सर्वतश्चतुर्दिक्षु च परिवारः परिच्छेदः संजातोऽस्येति परिवारितः । परिवारयुक्तो जात इत्यर्थः । किंभूतैः शृङ्गैः । स्वर्णगिरिः-उदयगिरिः-अर्बुदगिरिः-ब्रह्मगिरिः एते चत्वारः शैला आदौ प्रथमं यस्य तादृशेन अष्टाभिरधिकेन शतेन उन्मितैः प्रमाणीकृतैः । उत्प्रेक्ष्यते—उच्चैः शिरोभिः अथ वा उत्प्राबल्येन तुङ्गेभ्योऽपि महद्भ्योऽपि तुङ्गैर्महद्भिः । 'तं मानतुङ्गमवशा समुपैति लक्ष्मीः' इति भक्तामरस्तवे । मानेन तुङ्गो महान् इति मानतुङ्गः । सुतैर्नन्दनैरिव परिवारकलितः ॥

श्लोकार्थ

'ચારે દિશામાં રહેલા સુવર્ણગિરિ, ઉદયગિરિ, અર્બુદગિરિ, અને બ્રહ્મગિરિ આદિ ગગનચૂંબી એકસોઆઠ શિખરોથી પરિવરેલો શત્રુંજય પર્વત શોભે છે, તે જાણે પોતાના પુત્રપૌત્રોથી પરિવરેલો ન હોય ! ॥ ૧૧૮ ॥

तीर्थमास्ते न विश्वेऽप्यदःसंनिभं विश्वकर्त्रेति रेखा किमेषा कृता ।
स्वर्गिणां निम्नगावत्पुनाना जनान्यत्र शत्रुंजये भाति कल्लोलिनी ॥ ११९ ॥

यत्र शत्रुंजये शैले शत्रुंजयनाम्नी कल्लोलिनी भाति नदी शोभते । किं कुर्वाणा । जनान् भविकलोकान् पुनाना पवित्रीकुर्वाणा । किंवत् । निम्नगावत् । यथा स्वर्गिणां देवानां निम्नगा गङ्गा परशासनलोकप्रसिद्ध्या लोकान्पुनीते । उत्प्रेक्ष्यते—त्रैलोक्येऽपि विश्वत्रयेऽपि अदःसंनिभम् अस्य विमलाद्रेः संनिभं तुल्यमन्यत्तीर्थं नास्ते लोकान् जगज्जनानिति वक्तुं वा विश्वकर्त्रा जगत्सृष्टिकारकेण विधिना एषा प्रत्यक्षलक्ष्या शत्रुंजया नदी किमु रेखा कृता विहितेव ॥

શ્લોકાર્થ

'ગંગાનદીની જેમ ભવ્ય જીવોને પવિત્ર કરતી શત્રુંજય પર્વતની "શત્રુંજયી" નદી શોભે છે; તે "ત્રણે લોકમાં વિમલાચલતીર્થ સમાન અન્ય કોઈ પણ તીર્થ નથી," આ પ્રમાણે કહેવા માટે જાણે બ્રહ્માએ નદીરૂપે રેખા બનાવી ન હોય ! ॥ ૧૧૯ ॥

केवलज्ञानितीर्थे शतीर्थे पुरा स्नात्रनिर्मित्सयेशानजम्भद्विषा ।
सिद्धसिन्धोर्मुदानायि यस्मिन्नसौ जह्नुनेव प्रवाहो नगेऽष्टापदे ॥ १२० ॥

पुरा पूर्वं गतचतुर्विंशत्यास्तृतीयारकस्यादिसमये केवलज्ञानिनामा प्रथमतीर्थकरस्तस्य तीर्थे शासने वारके वा तस्मिन् जिते विद्यमाने वा यस्मिन् शत्रुंजयनाम्नि नगे गिरौ प्रथमस्थापितप्रासादे स्नात्रनिर्मित्सया अर्थात्केवलज्ञानितीर्थकृन्मूर्तेरेव स्नात्रस्य कर्तुमिच्छया ईशाननाम्ना द्वितीयपदे लोकनायकेन जम्भद्विषा इन्द्रेण सिद्धसिन्धोर्वैताढ्यशैलान्तर्वर्तिन्या गङ्गाया मध्यादसौ शत्रुंजयाभिधाना सिन्धुरा नायता आनीता वा इत्येषा कथा शत्रुंजयमाहात्म्येऽस्तीति । केनेव । जह्नुव । यथा सगरचक्रिणः षष्टिसहस्रसुतेषु ज्येष्ठेन नन्दनेन अष्टापदाभिधाने नगे भूधरे अर्थात्काञ्चनप्रासादमणिमयप्रति मारक्षाकृते । दण्डरत्नकारितसहस्रयोजनोद्वेधकैलाशशैलपरितः खातिकाखातपूरणार्थमित्यर्थः । सिद्धसिन्धोः संनिधिवर्तिमन्दाकिन्या यत्र प्रवाहो दण्डरत्नेनैव पानीयोऽथ आनायि इत्येषामपि कथा शत्रुंजयमाहात्म्ये पवास्ते ॥

श्लोकार्थ

'અષ્ટાપદતીર્થની રક્ષા કરવા માટે સગર ચક્રવર્તીના જ્યેષ્ઠ પુત્ર જહ્નુ જેમ દંડરત્નથી ગંગાના પ્રવાહને લાવ્યો હતો, તેમ ગઈ ચોવીશીના પ્રથમ તીર્થંકર "કેવલજ્ઞાની"ના તીર્થ સમયે શત્રુંજય પર્વતના જિનપ્રાસાદમાં પ્રતિષ્ઠિત કરેલી કેવલજ્ઞાનીની મૂર્તિનો અભિષેક કરવા માટે ઇશાનેન્દ્રે વૈતાઢ્ય પર્વતમાં રહેલી ગંગાનદીના પ્રવાહને લઈ આવ્યો હતો, તે જ આ શત્રુંજયી નદી તરીકે પ્રસિદ્ધ છે. ॥ ૧૨૦ ॥

रसकूपीदिव्यौषधीसुवर्णमणिरत्नभूमिरेष गिरिः ।
शिव इव सकलाः सिद्धीः पुनर्दधानः श्रियं श्रयते ॥ १२१ ॥

एष शत्रुंजयाख्यो गिरिः पर्वतः श्रियमद्वैतवैभवत्वेन शोभां श्रयते धत्ते । किंभूतः । रसकूपीनां लोहताम्रादीनां हेमविधायकै रसैः परिपूर्णानां लघुकूपानां तथा दिव्यानां देवाधिष्ठातृत्वेन महाप्रभावाणामौषधीनां सुवर्णरजतकारकाष्ठमहाभयस्तम्भकरोगविनाशकनिधिद्रव्यादिदर्शकाखिलकामितकारकादीनां विविधजटिकानां सुवर्णानामुपलक्षणाद्रूप्यत्रपुसीसकताम्रलोहादीनां मणीनां चन्द्रकान्तादीनां रत्नानां कर्केतनप्रमुखाणां भूमिरर्थात्स्वर्णादिखनीनामुत्पत्तिस्थानम् । पुनः किं कुर्वाणः । सकलाः सर्वजातीयाः सिद्धीर्दधानो धारयन् धत्ते । दारणं तु युक्तमेव । यतः स्वस्मिन् स्वस्य वा यद्भवति तत्परस्मै दीयते परं

स्वस्मिन्नेव यन्न भवति तत्परस्मै कुतो दीयते । असौ तु पर्वतानो भव्यमानसानिशस्वाराधकानामैहिकामुष्मिकाः सर्वाः सिद्धिः प्रदत्ते । क इव धत्ते । शिव इव । यथा ईश्वरोऽखिला लघिमा – वशिता – ईशिता–प्राकाम्यं – महिमा – अणिमा - यत्रका–मात्रसायसायित्वं–प्राप्तिः इत्यष्टसिद्धीर्दधाति ॥

શ્લોકાર્થ

રસકુંપી (સુવર્ણ બનવવાના સિદ્ધરસની કુંપી), સુવર્ણ, મણિ અને રત્નોની જેમાં ખાણ છે તે શત્રુંજય પર્વત અદ્વિતીય શોભા ધારણ કરે છે. જેમ ઈશ્વર, અણિમા, લઘિમા, વશિતા, પ્રાકામ્ય, મહિમા, યત્રકામાવસાયિત્વ અને પ્રાપ્તિ આ આઠ સિદ્ધિઓ આપે છે તેમ શત્રુંજય પર્વત અનેક સિદ્ધિઓને ધારણ કરે છે અર્થાત્ આપે છે. (ધારણ કરવું તે જ યુક્ત છે કારણ કે જેની પાસે જે વસ્તુ હોય તે બીજાને આપી શકે છે, પોતાની પાસે ન હોય તે બીજાને ક્યાંથી આપે! સ્વયંસિદ્ધિઓને ધારણ કરે છે તે જ અન્યને આપે છે.) ॥ ૧૨૧ ॥

सूर्योद्यानं सुरेन्दोर्दिशि विपिनमिव स्वःसदां भाति यस्मि-
न्स्वर्गोद्यानं त्वपाच्यां दिशि गिरिकमलानीलचेलं किमेतत् ।
चन्द्रोद्यानं प्रतीच्यां विविधसुमभरैर्भूषितं भूषणैः किं
लक्ष्मीलीलाविलासं धनददिशि पुनः किं तदीयं निकुञ्जम् ॥ १२२ ॥

यस्मिन् शत्रुंजये सुरेन्दोरिन्द्रस्य दिशि पूर्वस्यां सूर्योद्यानं भाति । उत्प्रेक्ष्यते—स्वःसदां देवानां विपिनं काननं नन्दनवनमिव । पुनः अपाच्यां दक्षिणस्यां दिशि स्वर्गोद्यानं राजते । उत्प्रेक्ष्यते—गिरिकमलाया विमलाचललक्ष्म्याः नीलं मरकतच्छवि चेलं वस्त्रमिव । पुनः प्रतीच्यां पश्चिमायां दिशि चन्द्रोद्यानं भ्राजते । किंभूतम् । विविधानि नानाप्रकाराणि रक्तपीतनीलकृष्णश्वेतादिवर्णानि सुमानि पुष्पाणि तेषां भरैः समूहैर्भूषितं शोभितम् । उत्प्रेक्ष्यते—किंभूतैः । भूषणैराभरणैरिवालंकृतम् । पुनर्धनददिशि उत्तरस्यां लक्ष्मीलीलाविलासं नाम वनं शोभते । उत्प्रेक्ष्यते—तदीयमुत्तरदिक्पतेर्धनदस्य संबन्धि निकुञ्जमुद्यानं चैत्ररथं वनमिव । 'विमानं पुष्पकं चैत्ररथं वनं पुरी प्रभा' इति हैम्याम् । निकुञ्जशब्दः पुंनपुंसकलिङ्गयोः । इदं वर्णनमग्रेऽपि प्रोच्यमानं शत्रुंजयमाहात्म्यादितो ज्ञेयम् । अधुना तु तेषामलक्ष्यत्वेनेति ॥

શ્લોકાર્થ

શત્રુંજય પર્વતની પૂર્વ દિશામાં 'સૂર્યોદ્યાન' શોભે છે, તે જાણે દેવોનું નંદનવન ન હોય! દક્ષિણ દિશામાં 'સ્વર્ગોદ્યાન' શોભે છે, તે જાણે પર્વતની લક્ષ્મીનું નીલવસ્ત્ર

ન હોય ! પશ્ચિમ દિશામાં વિવિધ પ્રકારનાં પુષ્પોથી યુક્ત 'ચન્દ્રોદ્યાન' શોભે છે, તે જાણે પર્વતલક્ષ્મીનું તિલક ન હોય ! અને ઉત્તર દિશામાં 'લક્ષ્મીલીલાવિલાસ' નામનું ઉદ્યાન શોભે છે તે જાણે કુબેરનું ચૈત્રરથ ઉદ્યાન ન હોય ! ॥ ૧૨૨ ॥

राकामृगाङ्का इव यत्र पद्माकरा
रमां कांचन चिन्वते स्म।
कुण्डान्यखण्डान्यपि नागगेहात्पीयूष-
कुण्डानि किमुद्धृतानि ॥ १२३ ॥

यत्र शत्रुंजयते राकाणां यः सुपूर्णः षोडशकलाकलितश्चन्द्रो भवेत। 'राका पूर्णे निशाकरे' इति हैम्याम्। पूर्णिमासीनां मृगाङ्काश्चन्द्रा इवामृतपूरिताः पद्माकरास्तटाकाः कांचन वचनविषयातीतां रमां लक्ष्मीं चिन्वते पुष्णन्ति। पुनर्यत्र गिरौ अखण्डानि अभग्नानि अक्षतानि कुण्डानि ह्रदभेदा जलाशयविशेषाः शोभन्ते। उत्प्रेक्ष्यते—नागगेहात्पातालादुद्धृतानि गृहीत्वा आनीतानि किं पीयूषकुण्डानि अमृतकुण्डानीव। पाताले हि नव सुधाकुण्डानि सन्ति। यदुक्तं पञ्चमीस्तुतौ—'यात्वा देवाधिदेवागमदशमसुधाकुण्डमानन्दहेतुः' इत्यागमरूपं दशमं सुधाकुण्डम्। तथा नैषधवृत्तौ—'क्षितिं फणामण्डलै रक्षन्ति धारयन्तीति क्षितिरक्षिणो नागाः। यथा यत्कथाश्रवणात् पूर्वं फणिप्रभृतयो नवसुधानां कुण्डानां रक्षिता कुण्डानि नामृतरोऽभूवंस्तथा रक्षयन्ति' इति ॥

શ્લોકાર્થ

શત્રુંજયપર્વતમાં પૂર્ણિમાના ચન્દ્રની જેમ અમૃતથી ભરેલાં સરોવરો કોઈ અપૂર્વ શોભાની વૃદ્ધિ કરે છે, અને પર્વતમાં સ્થાને સ્થાને જલથી પરિપૂર્ણ જલકુંડો શોભે છે તે જાણે પાતાળમાંથી લાવેલા અમૃતના પાતાલકુંડો ન હોય ! ॥ ૧૨૩ ॥

कलितललितरङ्गत्तुङ्गतारङ्गसङ्गी-
मिलदलिकुलकेलीस्मेरदम्भोजपुञ्जः।
श्रियमयति तटाकश्चिल्लणाख्योऽत्र नन्दी-
सर इव दनुजारिश्रेणिभिः सेव्यमानम् ॥ १२४॥

अत्र शत्रुंजयशैले चिल्लण इति आख्या नाम यस्य तादृशः तटाकः श्रियं शोभामयति गच्छति। प्राप्नोतीत्यर्थः। किंभूतः। कलित ललितं गमनागमनादिविलासो यैस्तादृशाः तथा रङ्गन्तश्चलन्तस्तुङ्गा उच्चैस्तरा गगनावगाहिनस्तारङ्गाः कल्लोलसमूहाः। अत्र समूहार्थेऽण्प्रत्ययः। तथा 'वारंवार तारतरस्वरनिर्जितगङ्गातारङ्गम्' इति पद्मसुन्दरकृतभारतीस्तोत्रे। तेषां सङ्गोऽस्त्यस्यास्मिन्वा। पुनः किंभूतः। मिलन्तो मकरन्दपानार्थं लोलुपतया आगत्य एकत्रावस्थितिं कुर्वन्तो ये अलिनो भ्रमरास्तेषां कुलं सजातीयवृन्दानि। 'कुलं तेषां सजातीनाम्' इति हैम्याम्। तेषां केली क्रीडा यत्र तादृशः स्मेरन्विकाशं प्राप्नुवन्। 'स्मेरदम्भोजखण्डाभिः' इति पाण्डवचरित्रे। अम्भोजानां कमलानां पुञ्जो व्रजो यत्र। उत्प्रेक्ष्यते—नन्दीसर इव। यथा पूर्वोक्तविशेषणविशिष्टमिन्द्रसरोवरं श्रियं श्रयति। एतद्द्वयमपि किंभूतम्। दनुजानां दानवानामरयो वैरिणो देवास्तेषां श्रेणिभिर्धोरणीभिः सेव्यमानम्। मोक्षार्थं क्रीडार्थं च चिल्लणनन्दीसरसोर्विशेषणम् ॥

શ્લોકાર્થ

જેમાં ગમનાગમનના વિલાસથી ચંચલ બનેલા ઊંચા તરંગો છે, અને જેમાં મકરંદપાન કરવા માટે આવેલા લોલુપી ભ્રમરોનો સમૂહ છે તેવું દેવોથી સેવાયેલું 'ચિલ્લણ' નામનું તળાવ દેવોના નંદીશ્વર સરોવરની જેમ શોભે છે. ॥ ૧૨૪ ॥

क्वचिदुपरिकपर्दिप्राक्सरः पालिशालि
स्मितशिखरिशिखाग्रस्थायुकानेकपक्षि ।
विलसति विमलाद्रौ स्वां जडाधारभावा-
भ्युदितजगदकीर्तिं हन्तुमेत्द स्थितं किम् ॥ १२५ ॥

विमलाद्रौ शत्रुंजयशैले क्वचित्कुत्रापि स्थानके उपरि अधित्यकाप्रदेशे कपर्दि इति शब्दः प्राक् पूर्वं यस्य तादृशं सरो विलसति शोभते। किंभूतम्। पालौ सेतौ जलवारणके शालन्ते शोभन्ते इत्येवंशीलाः, तथा स्मिता विकसिताः कुसुमिताश्च ये शिखरिणः पादपास्तेषां शिखानां शाखानामग्रेषु उपरितनप्रदेशेषु स्थायुका वसनशीलास्तिष्ठन्तीत्येवंशीला उपविष्टा अनेके विविधजातीयाः पक्षिणो विहंगमा यत्र तत्। उत्प्रेक्ष्यते—स्वां स्वकीयां डलयोरैक्याद्भावप्रधाननिर्देशाच्च जलाधारत्वेन अथ वा भावप्रधानत्वेन विना जडानामाधारत्वेनाभ्युदितां प्रकटीभूतामुत्पन्नां वा जगति विश्वे अकीर्तिमपयशो हन्तुं किं निवारयितुमिवेत्यागत्य स्थितम् ॥

શ્લોકાર્થ

શત્રુંજયના કોઈ સ્થાનમાં સેતુ વડે સુશોભિત અને વિકસ્વર વૃક્ષોની શિખા ઉપર રહેલા પક્ષીઓના કોલાહલથી યુક્ત એવું 'કપર્દી' નામનું સરોવર શોભે છે, તે જાણે જલાધાર-(જડાધાર)રૂપ જગતમાં ફેલાયેલા પોતાના અપયશને દૂર કરવા માટે વિમલાચલની ઉપાસના કરતું ન હોય! તેવું શોભે છે. ॥ ૧૨૫ ॥

स्फुटमिव घटितानां वेधसा स्फाटिकानां
क्वचन खनिरपूर्वा तण्डुलानां विभाति।
उदयति किल दृष्टेः सादिमातुः पुरस्तादिव
शतधृतिपुत्र्याः केसराङ्कूरराजी ॥ १२६ ॥

शत्रुंजये क्वचन बहिःप्राकारप्रतोलीप्रवेशानन्तरमेव पुरो भूमौ स्फाटिकानां स्फटिकोपलमयानां तण्डुलानां चोक्षानामपूर्वा असाधारणा खनिराकरो विभाति। उत्प्रेक्ष्यते—वेधसा सृष्टिकर्त्रा घटितानामिव निष्पादितानामिव। कथम्। स्फुटं प्रकटं यथा स्यात्तथा। किलेति श्रूयते निश्चितं वा। यदेतदित्थमेव दृश्यते च। सा चोक्षकखनिरादिमातुः युगादिदेवजनन्या लोकेऽप्यादिमाता देवीविशेषा सैव मरुदेवा तस्या दृष्टेः पुरस्तादेवोदयति प्रादुर्भवति। केव। केसराङ्कूरराजीव। यथा शतधृतेर्ब्रह्मणः पुत्र्या नन्दिन्याः सरस्वत्या दृष्टेरग्रे कुङ्कुमप्ररोहमण्डली प्रादुर्भवति। काश्मीरजनपदे सरस्वतीदृष्टेः पुरो घुसृणमुद्गच्छति, अन्यत्र कुसुम्भक इति श्रूयतेऽद्यापि॥

શ્લોકાર્થ

શત્રુંજય પર્વતના કોઈ વિભાગમાં સ્ફટિકરત્નના ચોખાની અપૂર્વ ખાણ છે, તે જાણે બ્રહ્માએ બનાવેલી ન હોય! અથવા જેમ કાશ્મીરદેશમાં બ્રહ્મપુત્રી સરસ્વતીની દૃષ્ટિ આગળ કેશરકુંકુમની પંક્તિ પ્રગટ થાય છે તેમ મરૂદેવીમાતાની દૃષ્ટિ આગળ આ ચોખાની ખાણ પ્રગટ થઈ ન હોય! ॥ ૧૨૬ ॥

इदमभिलषितसिद्धीरैहिकामुष्मिकाद्या-
स्त्रिजगति ददतो मे के पुरो यूयमाध्वे

इति किमु सुरवृक्षानैहिकार्थान्ददानां-
स्तृणयति खगरावैर्यद्वटः सिद्धनामा ॥ १२७ ॥

सिद्ध इति नाम यस्य तादृशो यो वटः न्यग्रोधः यस्य शत्रुंजयस्य वटो यद्वटः प्लक्षः। 'सिद्धवड' इति प्रसिद्धः। स खगानां पक्षिणां रावैर्विरुतैः इह लोके भवा ऐहिकास्ते च ते अर्था अभिलाषास्तान्ददानान्पूरयतः सुरवृक्षान् कल्पद्रुमान् तृणयति तृणप्रायान् कुरुते। अवगणयतीत्यर्थः। उत्प्रेक्ष्यते—इति हेतोः किमु। इति किम्। त्रिजगति त्रैलोक्येऽपि। त्रिभुवनजनानामित्यर्थः। ऐहिका इहलोकसंबन्धिनीः आमुष्मिकाः परलोकसंबन्धिनीः हृदभिलषिता हृदयेन मनसा कामिताः सिद्धीर्ददतो यच्छतो मे मम पुरोऽग्रे भोः कल्पवृक्षाः यूयं के वराका आध्वे वर्तध्वे। अकिंचित्करत्वेन न केऽपीत्यर्थः॥

श्लोकार्थ

शत्रुंजयमां 'सिद्धवड' नामनुं वडवृक्ष शोभे छे, ते जाणे 'त्रणे जगतना ईहलौकिक अने पारलौकिक मनोरथोने पूर्ण करता एवा मारी आगळ तमे शुं मात्र छो!' आ प्रमाणे पोताना (वृक्ष) उपर रहेलां पक्षीओनां अवाजथी आ लोकसंबंधी ज मनोरथोने पूर्ण करनारां कल्पवृक्षोनी जाणे अवगणना करतुं न होय! अर्थात् कल्पवृक्षोने तृणप्रायः गणतुं न होय! तेवुं शोभे छे. ॥ १२७ ॥

यस्मिन्नित्थमशापि पात्रसलिलक्षेपात्क्रुधा साधुना
काकः कोऽपि कदापि मास्त्विह नगे जातप्रवेशः क्वचित्।
मातङ्गो महतामिवौकसि ततस्तत्राप्यभूदक्षयं
स्थाने तद्वचसाम्बु पद्मनदवद्विश्वैकमाहात्म्यभृत् ॥ १२८ ॥

यस्मिन्नगे विमलाद्रौ पात्रान्नालिकेरामत्रात् 'उलखो' इति प्रसिद्धात्सलिलस्य जलस्य क्षेपात्क्षेपणाल्लोकोक्त्या ढोलणात् क्रुधा कोपेन केनापि अनिर्दिष्टनाम्ना साधुना मुनिना कोऽपि स्वपात्रपानीयक्षेपकः काकः इत्थममुना प्रकारेणाशापि शप्तः। इत्थं कथम्। यदिह नगे अस्मिन् शत्रुंजये क्वचित्कुत्रापि शैलसंबन्धिनि प्रदेशे स्थानके कदापि कस्मिन्नपि प्रस्तावे कोऽपि कश्चिदपि त्वज्जातीयः काको वायसो जातो भूतः प्रवेशः समागमो यस्य तादृशो मा भूत् मास्ताम्। कोऽपि काको मात्रागच्छत्वित्यर्थः। क इव। मातङ्ग इव। यथा चाण्डालो महतामुत्तमजातीयानामोकसि गृहे जातप्रवेशो भवेत्। ततः शापदानानन्तरं मध्यंदिनदिनकरप्रसरत्करनिकरप्रबलतापोद्भूतप्रभूततृषाशुष्यन्मुखोष्ठतालुरसनात्याकुलबालवृद्धादिसंघजनात्यर्था-

भ्यर्थनोत्पन्नानुकम्पार्द्रीभवन्मनस्तया तद्वचसा तस्यैव साधोर्गिरा तत्रापि स्थाने तस्मिन्नेव पानीयक्षेपणप्रदेशे तीर्थातिशयप्रकटनार्थमक्षयं न विद्यते क्षयो रिक्तीभावो यस्य तादृशमम्बु पानीयमभूत् जातः। अधुनाप्यक्षीणमेव वारि वर्तते। 'उलखाझोल' इति नाम्ना प्रसिद्धमास्ते। किंवत् अक्षीणम्। पद्मनदवत्। यथा पद्महृदे अक्षयमम्बु वर्तते। किंभूतमम्बु। विश्वे त्रैलोक्येऽप्येकमद्वैतं माहात्म्यं महिमानं बिभर्तीति॥

શ્લોકાર્થ

પૂર્વે વિમલાચલ ઉપર તપશ્ચર્યા કરતા કોઈ સાધુએ પોતાના પાત્રમાંથી પાણી ઢાળી નાખનાર કાગડાને શાપ આપ્યો કે 'જેમ ઉત્તમ પુરુષોના ઘરમાં ચાંડાળનો પ્રવેશ દુઃશક્ય છે તેમ આ પવિત્ર પર્વત ઉપર તમારી કાકજાતિનો ક્યારેય પણ પ્રવેશ ના થાઓ.' આવો શાપ આપ્યા બાદ તૃષાતુર બનેલા યાત્રિકોની પ્રાર્થનાથી, સાધુમહારાજની વાણીથી જગતમાં તીર્થના માહાત્મ્યને પ્રગટ કરવા માટે જ જાણે તે જ સ્થાને અક્ષય (કદાપિ નાશ ના થાય) તેવું જલ પ્રગટ થયું; જગતને આશ્ચર્યકારી એવું તે જલ પદ્મહૃદની જેમ હજુ પણ અક્ષીણ જ છે, અને તે "ઉલખાઝોલ" તરીકે પ્રસિદ્ધ છે. ॥ ૧૨૮ ॥

महीपालभूभृन्मुखाणामिवैतन्नृणां
कुष्टकष्टादिनिर्घातनिष्णम् ।
मरुल्लोलकल्लोललीलायमानारविन्दव्रजं
सूर्यकुण्डं विभाति ॥ १२९ ॥

एतत्प्रत्यक्षं पार्श्ववर्ति सूर्यकुण्डं विभाति। किंभूतम्। मरुता वायुवेगेन लोलाश्चञ्चलीभूता ये कल्लोलास्तरङ्गास्तेषु लीलायमानो लीलया आचरन् अरविन्दानां कमलानां व्रजो यत्र। पुनः किंभूतम्। नृणां सर्वजनानां कुष्टान्यष्टादशजातीयमहारोगविशेषास्तेषां कष्टानि अङ्गादिगलनादिकृच्छ्राणितान्यादौ प्रथमं येषां तादृशानि शोकापत्प्रमुखदुःखानि तेषां निर्घातो मूलोच्छेदनं तत्र निष्णं निपुणम्। केषामिव। महीपालभूभृत्प्रमुखाणामिव। यथा साधितप्रतिहतखड्गाद्यनेकविद्यासिद्धस्य स्वयंवरपरिणीतगुणसुन्दरीभर्तुः रोगाकुल्येऽपि विजितप्रतिपक्षक्षमाभृल्लक्षस्य महीपालनाम्नो राज्ञः कुष्टकष्टनिर्भेदकमासीत्तथा परेषामपीति बोध्यम्। महीपालकथा तु शत्रुंजयमाहात्म्येऽस्तीति॥

શ્લોકાર્થ

પવનથી ચંચળ બનેલા તરંગો વડે ડોલતાં કમલોનો સમૂહ જેમાં છે તેવો 'સૂર્યકુંડ' શોભે છે; જે સૂર્યકુંડના જલથી ચન્દ્રહાસ ખડ્ગ આદિ વિદ્યાઓના સાધક અને સ્વયંવરા

ગુણસુંદરીના પતિ મહીપાળરાજાનો કુષ્ઠરોગ જેમ દૂર થયો હતો તેમ પ્રાણીઓના અઢાર જાતિના કોઢરોગ આદિ મહારોગો દૂર કરવામાં સમર્થ એવો સૂરજકુંડ શોભે છે. ॥ ૧૨૯ ॥

पुण्डरीकाचलोर्वीव महिमैकनिकेतनम् ।
राजादनी विभात्येषा मुषिताशेषकल्मषा ॥ १३० ॥

एषा प्रत्यक्षलक्ष्या राजादनी क्षारिका 'रायणि' इति प्रसिद्धा विभाति । किंभूता । मुषितानि मूलादुच्छिन्नानि अशेषाणि समस्तानि कल्मषाणि पापानि यया। पुनः किंभूता। महिम्नां माहात्म्यानामेकमद्वैतं निकेतनम् । केव । पुण्डरीकाचलस्य शत्रुंजयाद्रेरुर्वी भूमीव ॥

શ્લોકાર્થ

વિમલાચલની ભૂમિથી જેમ સમસ્ત પાપો દૂર થાય છે તેમ સર્વપાપોને દૂર કરનારી મહામહિમાવંત 'રાયણ' શોભે છે. ॥ ૧૩૦ ॥

ऐहिकामुष्मिकानल्पसंकल्पितान्यङ्गभाजां
सृजन्ती त्रिलोकीभुवाम् ।
वेधसा स्वर्गिणां गौरपूर्वेव या
निर्मिता राजते यत्र राजादनी ॥ १३१ ॥

यत्र शत्रुंजये राजादनी राजते । उत्प्रेक्ष्यते—या राजादनी वेधसा सृष्टिकर्त्रा अपूर्वा-स्वाभ्यः कामधेनुभ्यो लक्षणैरसाधारणा गौर्धेनुः कामदुघा निर्मिता निष्पादिता । किं कुर्वती । त्रिलोकीभुवां जगत्त्रितयजन्मनां अङ्गभाजां देहभाजां सुरासुरनराणां प्राणिनामैहिकानि इहलोकभवानि रोगापनयनसंपत्करणादिमानि आमुष्मिकाणि परलोकभवानि स्वर्गापवर्गा-दिकानि यान्यनल्पानि भूयांसि । समस्तानीत्यर्थः । संकल्पितानि मनःकामितानि । मनोरथा-नित्यर्थः । सृजन्ती कुर्वन्ती । संपूरयन्तीत्यर्थः ।

શ્લોકાર્થ

શત્રુંજય ઉપર રાયણવૃક્ષ શોભે છે, તે જાણે બ્રહ્માએ ત્રણે લોકનાં પ્રાણીઓના ઈહલૌકિક અને પારલૌકિક અસંખ્ય મનોરથો પૂર્ણ કરવા માટે કોઈ અપૂર્વ કામધેનુની નિષ્પત્તિ કરી ન હોય ! ॥ ૧૩૧ ॥

वर्षत्यसौ शिरसि संघपतेः पयोभि-
र्जम्भारिराजिरिव जन्ममहे जिनेन्दोः ।
मुक्त्यङ्गनां पुनरियं वयसीव रङ्गा-
त्पुंसानुषञ्जयति संगमकामुकेन ॥ १३२ ॥

असौ राजादनी संघपतेः संघनायकस्य 'संघवी' इति लोकप्रसिद्धस्य शिरसि मस्तके क्षीरवत्त्वेन पयोभिः क्षीरैर्वर्षति । जम्भारिराजिरिव । यथा जन्ममहे जननमहोत्सवे जम्भारीणामिन्द्राणां राजिः श्रेणीः जिनेन्दोः जिनचन्द्रस्य उत्तमाङ्गोपरि एककोटिषष्टिलक्षप्रमितपञ्चविंशयोजनोत्तुङ्गद्वादशयोजनपृथुलकलशयोजनोज्झितनालनिर्मुक्तविविधतीर्थोदकैर्वर्षति । पुनरियं राजादनी संगमकामुकेन मिलनाभिलाषुकेण पुंसा पुरुषेण सार्धं मुक्त्यङ्गनां सिद्धवधूमनुषञ्जयति संगमं कारयति । केव । वयसीव । यथा प्रियसखी संगमं कर्तुं काङ्क्षता मनोभिलषितेन केनचित्तरुणेन समं तत्तरुणाङ्गसंगमकृते सुचिरमुत्कण्ठितां स्वां सखीमनुषञ्जयति मेलयति ॥

श्लोकार्थ

જેમ ઇન્દ્રોની પંક્તિ જિનજન્મમહોત્સવ સમયે જિનેશ્વરભગવંતના મસ્તકે, પચ્ચીશ યોજન ઊંચા અને બાર યોજન વિસ્તારવાળા એવા એક ક્રોડ સાઠ લાખ કલશોની નાલ વડે તીર્થોદકને વરસાવે તેમ રાયણવૃક્ષ સંઘપતિના મસ્તક ઉપર ક્ષીર(દૂધ)ની વર્ષા કરે છે. જેમ પ્રિય સખી કામુકની સાથે સંગ કરાવે તેમ રાયણ મુક્તિરૂપી સ્ત્રીની સાથે સંગમ કરાવે છે. ॥ ૧૩૨ ॥

संप्राप्तः पूर्ववारान्नवनवतिमितानादिदेवस्तलेऽस्या-
स्तत्रार्चैवार्चनीयास्त्यसुरनरमरुत्पुंगवैः पादुकास्य ।
अश्यत्पर्णादिचूर्णैर्भुवनतनुभृतां भूतवेतालरक्षो-
यक्षाद्याशेषदोषानपहरति पुनर्या च रोगान्सुधेव ॥ १३३ ॥

अस्या राजादन्यास्तले अधःप्रदेशे मूलपार्श्वे छायायां वा नवनवत्या मितान्नेकोनशततप्रमाणीकृतान् पूर्ववारान् पूर्वाणां वर्षवासरसंख्याका वेला आदिदेवो वृषभस्वामी संप्राप्तः समवसृतः । यदुक्तम्—'नवनवतिपूर्ववारान् यस्मिन् समवसरद्युगादिजिनः । राजादनीतरुतले विमिलगिरिरियं जयति तीर्थम् ॥' इति पूर्वाचार्यप्रणीतस्तवे पुनस्तत्र राजादन्यास्तले अर्चैव

अर्हत्प्रतिमेव। अर्चाशब्देन पूर्वसूरभिः प्रतिमा प्रोक्तास्ति। यथा—'अवनितलगतानां कृत्रिमाकृत्रिमाणां वरभवनगतानां दिव्यवैमानिकानाम्। इह मनुजकृतानां देवराजार्चितानां जिनवरभवनानां भावतोऽर्चा नमामि॥' इति। अस्यादिदेवस्य पादुका पदप्रतिमा। पदद्वन्द्वप्रतिकृतिरित्यर्थः। अस्ति वर्तते। किंभूता। असुरा दानवा नरा मानवास्तथा मरुतो देवास्तेषां पुंगवैः प्रधानैरिन्द्रादिभिरर्चनीया पूजयितुं योग्या पूजिता च। पुनर्भ्रश्यतां स्वयं निपततां भूपीठे वातादिना न तु कराकर्षणादिना पर्णादीनां पल्लवपुष्पपत्रकलिकाफलशाखाछल्लिप्रमुखाणां चूर्णैः क्षोदैः कृत्वा भुवनतनुभृतां जगज्जनानां भूतवेताला देवविशेषा रक्षांसि रात्रिंचरा मनुष्याः सिद्धराक्षसादिविद्या देवजातीया वा इति द्विधा यक्षा वटवासिनस्ते आद्याः प्रथमा येषां ते पिशाचप्रेतव्यन्तरयोगिनीशाकिन्याद्यस्तेषामशेषाः समस्ता दोषा उपद्रवास्तान् या अपहरति निर्णाशयति। च पुनर्या रोगान् समस्तानप्यामयानपाकरोति। केव। सुधेव। यथा पीयूषां देवभोज्यं पीतं सन्निःशेषान् गदानपनयति॥

श्लोकार्थ

રાયણવૃક્ષની નીચે યુગાદિદેવ નવ્વાણુપૂર્વવાર સમવસર્યા હતા. રાયણની નીચે પ્રભુપ્રતિમાની જેમ ભગવંતની પાદુકા સુર, અસુર અને માનવો વડે પૂજનીય છે, તેમજ જમીન ઉપર રાયણવૃક્ષના પલ્લવ, પાંદડાં, શાખા, છાલ આદિના ચૂર્ણ વડે અમૃતની જેમ જગતના જીવોના ભૂત, પ્રેત, પિશાચ, યક્ષ, રાક્ષસ આદિના ઉપદ્રવો અને સમસ્ત પ્રકારના રોગો દૂર થઈ જાય છે. ॥ १३३ ॥

श्रीवाचंयमपञ्चकोटिकलितः श्रीपुण्डरीको गणी
चैत्र्यामत्र दिने महीमिव जयी सिद्धिं मुदासाधयत्।
यत्किंचित्क्रियते जनैरिह नगे दानोपवासादिकं
तत्स्यात्तेन दिनेऽत्र कोटिगुणितं दानं सुपात्रे यथा॥ १३४॥

श्रीभिर्ज्ञानदर्शनचारित्रलक्ष्मीभिर्वृता वाचंयमा महामुनयस्तेषां पञ्चसंख्याकाभिः कोटिभिः शतलक्षाभिः कलितः सहितः। तथा कोटिशब्दो ह्रस्वः स्त्रीलिङ्गवाचिवदाकारान्तः। यदुक्तम्—'कियती पञ्चसहस्री कियती लक्षा च कोटिरपि कीयति। कोदार्योन्नतमनसां रत्नवती वसुमती कियती॥' इति सूक्ते लक्षाशब्दः। तथा लिङ्गानुशासने—'मानो लक्षं माने वाच्यं लक्षशब्दः स्त्रीक्लीबलिङ्गयोः लक्षं लक्षा च' इति लिङ्गानुशासने। श्रिया प्रथमचक्रिप्रथमपुत्रप्रथमतीर्थकृत्प्रथमगणभृल्लक्ष्म्या युतः पुण्डरीकनामा गणी श्रीऋषभदेवचतुरशीतिगणभृत्सुमुख्यो गणधरः अत्र शत्रुंजयाद्रौ चैत्र्याम्। चैत्रेण मासेन युक्ता पौर्णमासी चैत्री-

त्युच्यते। चैत्रपौर्णमास्यामित्यर्थः। मुदा अनन्तानन्दसंदोहमेदुरतया मोक्षमसाधयत्साधयामास। मुक्तिं जगामेत्यर्थः। क इव। जयीव। यथा जयनशीलो राजा प्रमोदेन महीमासमुद्रान्तमेदिनीं साधयति। तत इह नगे श्रीशत्रुंजयपर्वते यत्किंचिद्दानोपवासादिकमत्र दिने अस्यां चैत्र्यां पूर्णिमायां जनैर्भविकलोकैः क्रियते विधीयते। तत्साधुसाध्वीविश्राणनोपवसनादिकमत्र चैत्रपूर्णिमावासरे एकस्मिन्नेवाहनि पञ्चकोटिमुनीनां मुक्तिगमनकारणेन कोटिभिः शतलक्षाभिः गुण्यते इति कोटिगुणितं स्यात्। किमिव। दानमिवा यथा सुपात्रे दानं कोटिगुणं भवेत्। यदुक्तम्—'दानपात्रमधमर्णमिहैकग्राहिकोटिगुणितं दिवि दायि' इति नैषधे॥

શ્લોકાર્થ

જેમ વિજયી રાજા પૃથ્વીને સાધે તેમ શત્રુંજય પર્વત ઉપર ચૈત્રીપૂર્ણિમાના દિવસે પાંચ ક્રોડ મુનિઓની સાથે પુંડરિક ગણધરે સિદ્ધિપદની સાધના કરી હતી. અર્થાત્ સિદ્ધિપદને વર્યા હતા. જેમ સુપાત્રમાં કરેલું દાન કોડગુણા ફલને આપે છે તેમ શત્રુંજય ઉપર ચૈત્રીપૂર્ણિમાના દિવસે કરેલાં તપ-જપ-દાન આદિ ધર્માનુષ્ઠાન કોડગુણા ફલને આપે છે. ॥ ૧૩૪ ॥

शाश्वताद्रिरिवानन्तसमयस्थायुकोऽस्त्ययम्।
कालक्रमात्पुनर्धत्ते शशीवोपचयक्षयौ॥ १३५॥

अयं शत्रुंजयाद्रिर्न विद्यते कदाप्यन्तोऽवसानं यस्य तावन्तं समयं कालं यावत्तिष्ठतीत्येवंशीलः स्थायुकः। क इव। शाश्वताद्रिरिव। यथा अनश्वरो मेरुप्रमुखशैलः। जातिवाचित्वादेकवचनम्। अनन्तं कालं यावत्स्थास्नुरास्ते। परमस्मिन् शत्रुंजये एकोऽयं विशेषः। कालक्रमादुत्सर्पिणी समयपरिपाट्या उपचयक्षयौ वृद्धिक्षीणभावौ असौ धत्ते। क इव। शशीव। यथा चन्द्रः शुक्लकृष्णपक्षक्रमादुपचयक्षीणते धत्ते। यथा शशी शुक्ले पक्षे वर्धते कृष्णे च हीयते, तथा शत्रुंजयोऽप्युत्सर्पिण्यां वृद्धिं भजते अवसर्पिण्यां क्षणं क्षयमयते। किं च यथा कलावान्कलामात्रमेवात्रशिष्यते तथा विमलाद्रिरपि सप्तहस्तप्रमाणो मुण्डकमानोऽवशिष्यते॥

શ્લોકાર્થ

શત્રુંજય પર્વત મેરૂની જેમ અનંતકાળપર્યંત રહેવાનો અર્થાત્ શાશ્વત છે. પરંતુ એક વિશેષતા છે કે ચન્દ્રની જેમ તેની પણ ક્ષયવૃદ્ધિ થાય છે. એટલે ઉત્સર્પિણીમાં વધતો જવાનો અને અવસર્પિણીમાં ઘટતો ઘટતો છેક છઠ્ઠા આરામાં સાત હાથ પ્રમાણનો રહેવાનો. ॥ ૧૩૫ ॥

तालध्वजढङ्काभिधकदम्बलौहित्यरैवताद्यचलाः ।
विलसन्महिमानोऽमी यत्प्रतिकाया इवाभान्ति ॥ १३६ ॥

अमी प्रत्यक्षाः संनिधौ निरीक्ष्यमाणाः तालध्वजः, तथा ढङ्क इत्यभिधा ययोस्तौ 'तस्ताझो ढंको' इति नाम्ना प्रसिद्धौ, तथा कदम्बः, तथा लौहित्यः, तथा रैवतस्य उज्जयन्तः कोलम्बो लोहिचो गिरिनारि इति नाम्ना लोकप्रसिद्धाः । एते पञ्चापि पर्वता आदौ कृत्वा येषां ते अचलाः 'टुंक' इति ख्याताः पर्वता यत्प्रतिकाया यस्य शत्रुंजयाद्रेः प्रतिबिम्बानीवाभान्ति आ सामस्त्येन शोभन्ते । किंभूताः । विलसन् त्रैलोक्ये स्फूर्तिमत्तां कलयन् महिमा माहात्म्यं येषामेते पञ्चापि गिरयः शत्रुंजयाद्रेर्मुख्यशिखराणि विमलाचलतुल्यमाहात्म्यानि सन्ति ॥

શ્લોકાર્થ

તાલધ્વજ, ઢંક, કદંબ, લૌહિત્ય અને રૈવત આદિ મહિમાવંત પર્વતો તે શત્રુંજયની ટુંકોરૂપે શોભે છે, જાણે તે શત્રુંજયનાં પ્રતિબિંબો ન હોય ! ॥ ૧૩૬ ॥

माहात्म्यमेतस्य समग्रमेकैकस्यापि
शृङ्गस्य कदापि वक्तुम् ।
प्रभुर्भवेत्कोऽपि तदाप्त एव
तरीतुमब्धेरिव वारि पोतः ॥ १३७ ॥

एतस्य शत्रुंजयस्य एकैकस्यापि शृङ्गस्य शिखरस्य समग्रं समस्तं माहात्म्यं महिमानं वक्तुं कथयितुं यदि चेत्कदापि कस्मिन्नपि समये कोऽपि पुमान् प्रभुः समर्थो भवेत्तदा स आप्तः सर्वज्ञ एव नान्यं सर्वज्ञं विना अस्य महिमानं भाषितुं कोऽपि नालम् । क इव । पोत इव । यथा अब्धेर्महार्णवस्य वारि पानीयं यदि कदाचित्कोऽपि तरीतुमलं तदा स पोतो यानपात्रमेव न तारकादिः ॥

શ્લોકાર્થ

જેમ સમુદ્ર તરવા માટે યાનપાત્ર સિવાય બીજું કોઈ સમર્થ નથી તેમ શત્રુંજયના એકેક શિખરનો મહિમા કહેવા માટે સર્વજ્ઞ સિવાય બીજું કોઈ સમર્થ નથી. ॥ ૧૩૭ ॥

तदत्र प्राप्यतेऽनल्पं यद्वस्तु क्वापि नाप्यते ।
मेरौ न सन्त्यदभ्राः किं दुःप्रापाः स्वर्द्रुमा मरौ ॥ १३८ ॥

अत्र शत्रुंजये तत्तत्प्रसिद्धमप्रसिद्धं वा निधिदर्शनकृतरजतकनककारिचित्रकमोहनवल्लीप्रमुखानेकौषधीरसकूपिकास्वर्णरत्नाकरादिकमनल्पं बहु । पदे पदे इत्यर्थः । वस्तु प्राप्यते लभ्यते भाग्यवद्भिः । अथ वा अत्र गिरौ बालवृद्धैरपि सिद्धिरासाद्यते । यदुक्तम्–'सर्वेषामपि शैलानामुन्नतो विमलाचलः । यदारोहेण लोकाग्रं प्राप्यते बालकैरपि ॥' इति पूर्वसूरिस्तवे । तत्किम् । यद्वस्तु अन्यत्रान्यस्मिन् स्थाने महायासोऽपि क्वापि कुत्रापि नाप्यते न लभ्यते । युक्तोऽयमर्थः—ये स्वर्द्रुमाः कल्पवृक्षा मरौ मरुस्थल्यां दुःप्रापाः । यदुक्तम्—'पातुं वाञ्छति चातकस्य रुदतो नेत्राम्बु यत्राम्बुदाश्छायामिच्छति निश्छदक्षितिरुहः प्रत्याशया धावताम् । अन्तर्गूढजलाशया श्रमजलं नेतुं नदी काङ्क्षति प्राप्तास्तं मरुनीवृतं वयमितो दूरेण वाराणसीम् ॥' इति मरुमण्डललक्षणम् । तत्र ये दुर्लभास्ते कल्पशाखिनो मेरौ सुवर्णाचले अदभ्रा गणनातीताः किं न सन्ति न विद्यन्ते अपि त्वसंख्या आसते ॥

શ્લોકાર્થ

રસકુંપિકા, ચિત્રાવેલ, સ્વર્ણ-રત્નની ખાણ આદિ કોઈ પણ વસ્તુ અન્ય કોઈ પણ સ્થાને પ્રાપ્ત થતી નથી તે શત્રુંજય પર્વતમાં સ્થાને સ્થાને અનર્ગલ પ્રાપ્ત છે. મરૂભૂમિમાં કલ્પવૃક્ષો દુષ્પ્રાપ્ય છે તો શું મેરૂપર્વત ઉપર સુપ્રાપ્ય નથી! અર્થાત્ હોય છે. ॥ ૧૩૮ ॥

षष्ठैः सप्तभिरष्टमाष्टमयुतैर्यस्मिन्कृतैर्निर्जलै-
　स्तार्तीयीकतया मिते किल भवे प्राप्नोति सिद्धिं सुधीः ।
यस्मिन्नार्षभिकारितां मणिमयीं मूर्तिं जिनेन्द्रोर्नम-
　स्कुर्वन्स्वर्णगुहागतामपि भवेदेकावतारी भवे ॥ १३९ ॥

किलेति पूर्वाचार्यपरम्परया श्रूयते बृहद्ग्रन्थेषु च दृश्यते । यस्मिन् शत्रुंजये तृतीय एव तार्तीयीकः । 'तीयादीकण् स्वार्थे वा वक्तव्यः' । तस्य भावस्तार्तीयीकता तया तार्तीयीकतया । यदुक्तम्—'तार्तीयीकतया मितोऽयमगमत्तस्य प्रबन्धे महाकाव्ये चारुणि नैषधीयचरिते सर्गो निसर्गोज्ज्वलः' इति नैषधे । मिते प्रमाणीकृते भवे जन्मनि सुधीर्धीमान् सिद्धिं मोक्षं प्राप्नोति । कैः । षष्ठैरुपवासद्वयमानैः 'छट्ठ' इति लोकप्रसिद्धैः । किंभूतैः । सप्तभिः सप्तसंख्याकैः मार्तण्डतुरगप्रमाणैः । पुनः किंभूतैः । अष्टमेन अष्टमनाम्ना उपोषणत्रिकेण 'अट्ठम' संज्ञेन प्रसिद्धेन युतैः सहितैः । पुनः किंभूतैः । कृतैर्विहितैः । कीदृशैः कृतैः । निर्जलैः पानीयरहितैः चतुर्विधाहार-

प्रत्याख्यानरूपैः । अत्र ये निर्जलान् सप्तषष्ठानष्टमं चाष्टमं कुर्वन्तीति ते तृतीये भवे मोक्षं यान्तीत्यर्थः । अपि पुनर्यस्मिन् शत्रुंजये आर्षभिणा ऋषभस्यापत्यमार्षभिर्भरतचक्रवर्ती तेन कारितां वार्धकिना निर्मापितां जिनेन्दोः स्वतातस्य ऋषभदेवस्यैव मूर्तिं प्रतिमां नमस्कुर्वन् प्रत्यक्षलक्ष्यीकृत्य प्रणमन् सन् भवे संसारे एक एव नापरोऽवतारो जन्म अस्यास्तीति एकावतारी भवेत्स्यात् । मूर्तिं किंभूताम् । मणिमयीं रत्नस्वरूपाम् । पुनः किंभूताम् । स्वर्णगुहागताम् ऋषभशिखरात्पश्चिमप्रदेशे स्वर्णनाम्न्यां गुहायां कंदरायां गतां प्राप्ताम् । आगमिष्यन्मन्दकालवशाल्लोलुपलोककृताशातनाभयादिन्द्रवचसा सगरचक्रिणा स्वर्णगुहायां स्वयं गुप्तीकृत्य स्थापितामित्यर्थः ॥

શ્લોકાર્થ

જે કોઈ મેધાવી પુરુષ, શત્રુંજય ઉપર છઠ્ઠ, અઠ્ઠમ અને સાત ઉપવાસ કરે છે તે ત્રીજે ભવે સિદ્ધિગતિને પામે છે. ઇન્દ્રના કહેવાથી સગર ચક્રવર્તીએ ઋષભશિખરના પશ્ચિમભાગમાં આવેલી સુવર્ણગુફામાં રાખેલી ભરત ચક્રવર્તીએ ભરાવેલી શ્રીઋષભદેવની રત્નની પ્રતિમાને જે કોઈ દર્શન વંદન અને નમસ્કાર કરે છે તે જરૂર એકાવતારી હોય છે. ॥ ૧૩૯ ॥

अत्रानन्तजिना अनन्तमुनिभिः सिद्धा विशुद्धाशया
ध्यानैर्वह्निभिरिन्धनप्रकरवन्निर्दह्य कर्मव्रजम् ।
सिद्धक्षेत्रमतो निगद्यत इदं चेदीहते मानसं सिद्धिं
वस्तदिह स्वयं वसति सा सत्संगमाकाङ्क्षिणी ॥ १४० ॥

अत्र शत्रुंजये शैले न विद्यतेऽन्तोऽवसानं येषां तादृशैर्मुनिभिः साधुभिः सार्धमनन्ताः प्रान्तातीताः कालस्यानन्त्याज्जिनास्तीर्थंकराः सिद्धाः मोक्षं प्राप्ताः । किंभूताः । विशुद्धो निर्मल आशयोऽध्यवसायः परिणामो येषां ते । किं कृत्वा । निर्दह्य नितरां ज्वालयित्वा । कम् । कर्मणां ज्ञानावरणीय–दर्शनावरणीय–मोहनीय–अन्तराय–वेदनीय–नाम–गोत्र–आयुः–प्रमुखानामनेकजातीयानां प्राचीनाचीर्णशुभाशुभपरिणतीनां व्रजं समूहम् । कैः । ध्यानैः धर्मशुक्लप्रणिधानैः कृत्वा । किंवत् । इन्धनप्रकरवत् । यथा वह्निभिर्हुताशनैः काष्ठकलापो निर्दह्यते । अतः अनन्तानन्तभेदभिन्ना नगरे गणपरिकलिततीर्थकृतां सिद्धिगमनकारणादिदमपि तीर्थं सिद्धक्षेत्रं निगद्यते कथ्यते । ततो भो भव्याः, चेद्यदि वो युष्माकं मानसं मनः सिद्धिं समीहते, तर्हि सा सिद्धिः स्वयमात्मनैव इह शत्रुंजये वसति वासं विधत्ते । किंभूता सा । सद्भिरुत्तमैः समं संगमं संयोगमा सामस्त्येन काङ्क्षतीत्येवंशीला ॥ इति शत्रुंजयाद्रिमाहात्म्यवर्णनम् ॥

શ્લોકાર્થ

શત્રુંજય ઉપર અનંતા તીર્થંકરો, વિશુદ્ધ આશયવાળા અનંતા મુનિઓ, શુક્લ ધ્યાનરૂપી અગ્નિ વડે ઇંધણના જેવાં કર્મોના સમૂહને ભસ્મિભૂત કરીને સિદ્ધિગતિને પામ્યા છે; તેથી તે જગતમાં 'સિદ્ધક્ષેત્ર' નામથી પ્રસિદ્ધ છે. તે માટે હે ભવ્યજીવો, તમો મોક્ષાભિલાષી હોય તો સત્પુરુષોના સંગને ઇચ્છતી મુક્તિ, સ્વયં સિદ્ધક્ષેત્રમાં આવીને વસી છે, માટે આ સિદ્ધાચલની ઉપાસનામાં તત્પર બનો'. ॥ ૧૪૦ ॥

इत्यद्वैतप्रभावं विमलशिखरिणो भाषमाणो विशिष्य
श्रीमत्प्राचीनसूरीश्वर इव भगवानङ्गभाजां समाजे ।
सिद्धक्षेत्रेऽवतस्थे कतिचन दिवसान्किं न सिद्धो भविष्णुः
स्वेन श्रीतीर्थभर्तुः पदपरिचरणानन्दसान्द्रो मुनीन्द्रः ॥ १४१ ॥

मुनीन्द्रो हीरविजयसूरिः कतिचन कियत्संख्याकान दिवसान यावत्सिद्धक्षेत्रे श्रीशत्रुंजयशैलोपरि विमलगिरिम् । 'उत्तिनिलउ सित्तुंजो सिद्धखित्तपुंडरीउ' इति शत्रुंजयकल्पेऽभिधानानि । अवतस्थे अवस्थितिं कृतवान । बाधकात्पुनः पुनश्चढितुमुत्तरीतुं शक्यभावात्तदधित्यकायामेव तस्थिवानित्यर्थः । उत्प्रेक्ष्यते—स्वेनात्मनापि सिद्धानां क्षेत्रत्वेन सिद्धो मुक्तात्मा भविष्णुर्न भवनशीलेन अपि तु काकूक्त्या सिद्धो भवितैव । अथ वा विद्यामन्त्रतन्त्रौषधीत्रिविधसिद्धिभिः कृत्वा सिद्धपुरुषो बुभूषुर्न अपि तु सर्वसिद्धिमान भवितुमिच्छुरेव । यद्यपि विद्यामन्त्रादीनां साधूनां प्रयोजनं नास्ति, तथापि कदाचिदपि समयानुसारेण प्रयोजनमपि भवेत । अथ वा पूर्वादिषु सर्वस्यापि सद्भावात ज्ञेयस्वरूपमपि सर्वं भवेत् । किंलक्षणो मुनीन्द्रः । श्रीभिस्त्रैलोक्यैश्वर्यलक्ष्मीभिः कलितस्य तीर्थभर्तुः ऋषभदेवस्य पदयोश्चरणयोः परिचरणा उपासना तया हेतुभूतया य आनन्दः परमाह्लादस्तेन सान्द्रो मेदुरः । स्निग्ध इत्यर्थः । किंभूतः पुनः । भगवान जगत्पूज्यः । पुनः किं कुर्वाणः । श्रीमान सातिशयज्ञानाश्चर्यकृल्लब्धिलक्ष्मीयुतः प्राचीनः प्राक्तनः सूरीश्वर इवाङ्गभाजां यात्रिकजनानां समाजे सभायां विमलशिखरिणः पुण्डरीकाद्रेरिति पूर्वव्यावर्णितप्रकारेण प्रभावं महिमानं विशिष्य विशेषप्रकारेण भाषमाणः प्रकाशयन ॥

શ્લોકાર્થ

સિદ્ધક્ષેત્રમાં ઋષભદેવ ભગવાનનાં દર્શનવંદનથી જેમનું મન આનંદમગ્ન બન્યું છે તે જગદ્ગુરુ હીરવિજયસૂરિજીએ યાત્રિકોની સભામાં પૂર્વાચાર્યની જેમ વિમલાચલનો અદ્ભુત

મહિમા વર્ણવતાં શત્રુંજય પર્વત ઉપર કેટલાક દિવસોની સ્થિરતા કરી. વૃદ્ધાવસ્થાના કારણે ચઢવા–ઊતરવાની તકલીફ હોવાથી પર્વત ઉપર જ વિશ્રામ કર્યો, તે જાણે આચાર્યદેવે સ્વયંસિદ્ધ બનવા માટે જ વિશ્રામ કર્યો ન હોય ! ॥ ૧૪૧ ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी च यं
श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते हीरयु-
क्सौभाग्याभिधहीरसूरिचरिते सर्गोऽभवत्षोडशः ॥ १४२ ॥

पण्डितदेवविमलगणिविरचिते हीरसौभाग्यनाम्नि महाकाव्ये षोडशानां संख्यापूरणः द्विरष्टसंख्यः सर्गोऽधिकारविशेषः अभवत्संजातः ॥

इति पण्डितसीहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां
स्वोपज्ञहीरसौभाग्यनाममहाकाव्यवृत्तौ संघागमनचैत्य-
परिपाटीपूर्वकयात्राकरनप्रासादादिवर्णशत्रुंजयमा-
हात्म्य प्रकाशनो नाम षोडशः सर्गः ।

શ્લોકાર્થ

વણિકકુલમાં ઇન્દ્ર સમાન શિવ નામના શ્રેષ્ઠિ અને સૌભાગ્યદેવીનાં જન્મજાત સુપુત્ર દેવવિમલગણિ કે જેઓ નિરંતર સરસ્વતીની (જ્ઞાનની) ઉપાસના કરવામાં તત્પર હતા અને સર્વમુનિઓમાં સિંહસમાન એવા સિંહવિમલગણિના પ્રથમ શિષ્યરૂપે પ્રસિદ્ધ હતા, તે દેવવિમલગણિએ જેમાં જગદ્‌ગુરુ શ્રી હીરવિજયસૂરિજીનો સવિસ્તર જીવનવૃત્તાંત આવે છે, તેવા '**હીરસૌભાગ્ય**' નામના મહાકાવ્યની સ્વોપજ્ઞટીકા સહિત રચના કરી. તે મહાકાવ્યનો સંઘના આગમનથી આરંભીને શત્રુંજયમાહાત્મ્યના વર્ણન સુધીનો આ સોળમો સર્ગ સમાપ્ત થયો. ॥ ૧૪૨ ॥

सप्तदशः सर्गः ।

अथ व्रतीन्द्रोऽभ्युदयं दधाने
बिम्बे नभस्यम्बुजबान्धवस्य ।
मूर्ध्नां धृते पूर्वदिशेव भद्रकुम्भे स
नाभेयजिनं ननाम ॥ १ ॥

अथ शत्रुंजये यात्रां कृत्वा कतिचिद्दिनान्यधित्यकायामेव स्थितेरनन्तरं सोऽकब्बरसाहिमाननीयो व्रतीन्द्रो हीरविजयसूरिः कदाचित्कस्मिन्नपि दिवसे गिरेरुत्तितीर्षुः नाभेयजिनं श्रीऋषभतीर्थनाथं ननाम प्रणमति स्म । कस्मिन् सति । नभसि गगनमण्डले अम्बुजबान्धवस्य सूर्यस्य बिम्बे मण्डले अभ्युदयं संमुखादुगमनं दधाने बिभ्राणे सति । प्रातःकाले सूर्येऽभ्युदिते सतीत्यर्थः । उत्प्रेक्ष्यते—पूर्वदिशा प्राचीहरिता स्वमस्तकेन कृत्वा धृते अधिरोपिते भद्रकुम्भे मङ्गलकलशे इव ॥

શ્લોકાર્થ

ત્યાર પછી ગગનમાં સૂર્યોદય થતાં હીરવિજયસૂરિજીએ યુગાદિદેવને નમસ્કાર કર્યા. જાણે પૂર્વદિશાએ પોતાના મસ્તકે મંગલકલશ ધારણ કર્યો ન હોય ! તેવો સૂર્ય લાગતો હતો. ॥ ૧ ॥

अन्याननन्यां मुदमादधानः
पुनर्व्यनंसीत्स जिनावनीन्द्रान् ।
शत्रुंजयाद्रेरिव भूषणेषु शेषेषु
चैत्येषु हिरण्मयेषु ॥ २ ॥

पुनरित्यपरार्थे । यथा ऋषभदेवं प्रणतवांस्तथैव अन्यानपरानपि जिनावनीन्द्रानर्हद्द्वारकान् स सूरिर्व्यनंसीत् विशेषेण नमस्यति स्म । स किं कुर्वाणः । अनन्यां न विद्यते अन्या अधिका अपरा अस्याः सकाशादित्यनन्यामसाधारणीं मुदं प्रीतिं प्रह्लादमादधानः कुर्वाणः । अथ वा आ सामस्त्येन मनोवाक्कायैर्दधानो बिभ्राणः । क्वचिच्च कुमारसंभवादिषु धरणार्थेऽप्यादधान इति दृश्यते । केषु । जिनराजान् व्यनंसीत् । शेषेषु । मूलचैत्यव्यतिरिक्तावशिष्टेषु चैत्येषु प्रासादेषु । किंभूतेषु चैत्येषु । हिरण्मयेषु काञ्चनरचितेषु । उत्प्रेक्ष्यते—शत्रुंजयाद्रेर्विमलाचलस्य भूषणेष्विव सुवर्णाभरणेष्विव ॥

શ્લોકાર્થ

અનન્ય આનંદ અનુભવતા જગદ્ગુરુએ શત્રુંજયના આભૂષણરૂપ બીજાં બીજાં સુવર્ણમય જિનચૈત્યોમાં રહેલા જિનેશ્વરભગવંતનાં બિંબોને નમસ્કાર કર્યા. ॥ ૨ ॥

शत्रुंजयोर्वीधरसार्वभौममौलेर्दधानो
विशदाशयत्वम् ।
अवातरन्निर्जरनिर्झरिण्या इव
प्रवाहो मिहिकाद्रिशृङ्गात् ॥ ३ ॥

स सूरिः शत्रुंजयनाम्नः उर्वीधराणां सर्वपर्वतानां सार्वभौमस्य चक्रवर्तिनः मौलेर्मस्तकात् । अधित्यकायाः सर्वोपरितनशिखरादित्यर्थः । अवातरत उत्तरति स्म । क इव । प्रवाह इव । यथा निर्जराणा देवानां निर्झरिण्या नद्या गङ्गायाः प्रवाहः पयोधारा मिहिकाद्रिशृङ्गात तुहिनाचलशिखरात हिममहीधरशृङ्गादवतरति । किंभूतः स प्रवाहश्च । विशदं विमलं निष्पापमुज्ज्वलं च आशयं मनोमध्यं च दधानो बिभ्राणः । हिमाद्रिरप्यचलचक्री ॥

શ્લોકાર્થ

હિમાચલના શિખર ઉપરથી જેમ દેવગંગાનો પ્રવાહ નીચે ઊતરે તેમ નિર્મળ આશયવાળા આચાર્યદેવ સર્વપર્વતોમાં ચક્રવર્તી જેવા શત્રુંજયપર્વત ઉપરથી નીચે ઊતર્યા. ॥૩॥

अलंकरोति स्म स पादलिप्तपुरं
पुरंध्रीगणगीयमानः ।
सहस्ररश्मेरिव रश्मिराशिरुदीयमान-
द्विजराजबिम्बम् ॥ ४ ॥

स हीरसूरिः पादलिप्तपुरं कथंचिद्गुरुवचनतः श्रावकीभवन्नानन्तरमवाप्तगगनाङ्गणविचरणप्रवणशक्तिप्रदायिपादलेपोऽष्टोत्तरशतभेषजसंतुष्टचेतसा अमृतयाराधितनागेन्द्रविश्राणितवरप्रसादाधिगतसततानेकजातीयौषधीसंदोहमाहात्म्येन सिद्धसहस्रलक्षकोटिवेधिस्वर्णरसेन नागार्जुनयोगिना उदयदतिभक्तिशक्तिवशंवदीभवन्मासेन स्वपादलिप्तगुरोर्नाम्ना वासितं पादलिप्ताभिधानं नगरम् अधुना तु 'पालीताणु' इति लोके प्रसिद्धम् अलंकरोति स्म भूषया

मास। किंभूतम्। पुरंध्रीणां विविधजनपदागतानां मृगाक्षीणाम्। पुरंध्रीशब्दो ह्रस्वो दीर्घोऽप्यस्ति। यथा नैषधे—'अखिलपुरपुरंध्रीनेत्रनीलोत्पलानि' इति। गणैर्वृन्दैर्गीयमानः गानगोचरीक्रियमाणः। क इव। रश्मिराशिरिव। यथा सहस्ररश्मेर्दिनकरस्य किरणनिकरः उदीयमानमभ्युदयं गच्छत् द्विजराजबिम्बं चन्द्रमण्डलमलंकुरुते। सहस्रकिरणात्किरणगणमादाय चन्द्रोऽभ्युदयतीति कविसमयः। 'पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः' इति रघुवंशे॥

श्लोकार्थ

જેમ સૂર્યનાં કિરણોનો સમૂહ ઉદય પામતા ચન્દ્રમંડળને શોભાવે (કવિશાસ્ત્રાનુસારે સૂર્યનાં કિરણો ગ્રહણ કરીને ચન્દ્રનો ઉદય થાય છે.) તેમ અનેક દેશોની સ્ત્રીઓ વડે ગવાતાં મંગલગીતોની સાથે આચાર્યદેવે પાદલિપ્તપુર(પાલીતાણા)ને અલંકૃત કર્યું. ॥ ૪ ॥

स प्रार्थितो द्वीपजनव्रजेन
स्वपत्तनं पावयितुं व्रतीन्द्रः।
चित्रादिना सारथिनेव केशी
वशीशिता श्वेतविकाभिधानम्॥ ५॥

स व्रतीन्द्रो हीरसूरिः द्वीपजनव्रजेन द्वीपबन्दिरसत्कसंघलोकनिकरेण स्वपत्तनं सामान्यतो नगराभिधानं पत्तनम्। यथा हैम्यां समुदितान्येव नगरनामानि—'नगरी पूः पुरीद्रङ्गं पत्तनं पुटभेदनम्' इति। विशेषतस्तु 'पत्तनं रत्नयोनिः' इति द्वीपाभिधानं निजनगरं पावयितुं पवित्रीकारयितुं प्रार्थितो याचितः। आगृहीत इत्यर्थः। क इव। केशीव। यथा चित्रमिति पदमादौ धुरि यस्य तेन चित्रादिना सारथिना श्रावस्त्यां नगर्यां राजकार्यार्थं गतेन तस्यैवोपदेशात् श्राद्धीभूतेन चित्रसारथिना केशीनामा वशीशिता मुनीन्द्रो गणधरः श्वेतविका इत्यभिधानं नाम यस्य तादृशं स्वपत्तनं पावयितुं पावनं निर्मापयितुं प्रार्थितः। आगृहीत इत्यर्थः॥

श्लोकार्थ

શ્રાવસ્તિનગરીમાં રાજકાર્ય માટે ગયેલા મંત્રી ચિત્રસારથિએ પોતાની નગરી શ્વેતાંબિકાને પાવન કરવા માટે કેશીગણધરને પ્રાર્થના કરી હતી તેમ દીવપત્તનના સંઘે આચાર્યદેવને પોતાનું નગર પવિત્ર કરવા માટે પ્રાર્થના કરી. ॥ ૫ ॥

निश्चिक्य चित्तेऽजयपार्श्वभर्तुर्यात्रां
स शत्रुंजयवद्व्रतीन्द्रः ।
कथंचिदप्याग्रहमस्य मेने
सेनेशवत्सोऽपि ततः प्रतस्थे ॥ ६ ॥

स यतीन्द्रो हीरसूरिः कथंचिन्महता कष्टेन अस्य द्वीपबन्दिरस्य संघस्याग्रहं मेने मानयति स्म । किं कृत्वा । अजयनाम्ना दशरथनृपपित्रा राज्ञा स्थापितस्याजयनाम्नः अधुना 'अझारा' इति प्रसिद्धस्य पार्श्वभर्तुः श्रीपार्श्वनाथस्य यात्रां प्रणमनं चित्ते स्वमनसि निश्चिक्य अवश्यं मया अजयपार्श्वनाथयात्रा कार्येति निश्चयं कृत्वा । किंवत् । शत्रुंजयवत् । यथा मया शत्रुंजययात्रा कृता, तथा अझारापार्श्वनाथस्य मया यात्रा कर्तव्येति विशेषः । अपि पुनः स सूरिरपि सेनेशवत्सेनापतिरिव राजेव वा ततः पादलिप्तपुरात्प्रतस्थे द्वीपबन्दिरं प्रति प्रचलति स्म ॥ इति पादलिप्तपुरात् द्वीपबन्दिरं प्रति प्रस्थानम् ॥

શ્લોકાર્થ

શત્રુંજયની યાત્રાની જેમ, દશરથરાજાના પિતા અજયપાલે પ્રતિષ્ઠિત કરેલા શ્રીઅજારા-પાર્શ્વનાથની યાત્રાનો મનોમન નિર્ણય કરીને, આચાર્યદેવે દીવબંદરના સંઘની વિજ્ઞપ્તિ માન્ય કરી અને સેનપતિની જેમ પરિવાર સહિત પાદલિપ્તપુરથી દીવબંદર તરફ વિહાર કર્યો. ॥ ૬ ॥

तत्प्रक्रमोपस्थितयात्रिकाणां
तदावलीभिर्ववले गिरीन्द्रात् ।
अम्भोधिवेलाभिरिवोपकण्ठ-
गिरेर्गभीरारवबन्धुराभिः ॥ ७ ॥

स चासौ प्रक्रमश्च प्रस्तावस्तत्प्रक्रमः शत्रुंजयाद्रियात्राकरणसमयः । 'वेला वारावसर प्रस्तावः प्रक्रमान्तरम्' इति हैम्याम् । तत्रोपस्थितानामागतानाम् । 'उपस्थिता शोणितपारणे' इति रघौ । तथा 'आगमने गमनार्थाः समभ्युपाङ्भ्यः पराः कथिताः । आपतति चोपतिष्ठत्युपनमति तथोपसीदति च ॥' इति क्रियाकलापे । यात्रिकाणां शत्रुंजययात्राकारकाणामावलीभिः श्रेणीभिस्तदा हीरसूरेर्द्वीपबन्दिरं प्रति प्रस्थानावसरे गिरीन्द्राद्विमलाचलाद्ववले

पश्चाद्व्याघुटितम्। स्वस्वपुरं प्रति प्रस्थितमित्यर्थः। काभिरिव। अम्भोधिवेलाभिरिव। यथा समुद्रस्य प्रवृद्धपयःकल्लोलमालाभिरुपकण्ठगिरेः समीपपर्वतात्पश्चाद्वलित्वा गम्यते। किंभूतः। गभीरैर्मधुरैरारवैस्तरङ्गध्वनितैर्बन्धुराभिर्मनोज्ञाभिः यात्रिकश्रेणिभिरपि श्रीशत्रुंजयाद्रिहीरसूरिमहिमगुणप्रशंसासंस्तवनादिगम्भीरनिनादैरभिरामाभिः॥

श्लोकार्थ

સમુદ્રની ભરતી જેમ સમીપવર્તી પર્વતથી પાછી ફરે તેમ યાત્રાર્થે આવેલા યાત્રિકો શ્રીશત્રુંજય અને આચાર્યદેવના મનોહર અને ગંભીર ગુણોત્કીર્તન કરતાં સૌ સૌના સ્થાને પાછા ફર્યા અર્થાત્ યાત્રિકો પોતપોતાના નગર તરફ ચાલ્યા ગયા. ॥ ७ ॥

मुहुः प्रसर्पन्पथि कण्ठपीठं
विभुज्य पारीन्द्र इवालुलोके।
उवाह सौहित्यमसौ न दर्श
दर्शं पुनः सिद्धधराधरं तम्॥ ८॥

असौ सूरिः पथि श्रीशत्रुंजयशैलसंबन्धिवर्तिमार्गे प्रसर्पन् प्रचलन् मुहुर्वारंवारं कण्ठपीठं गलकंदलं विभुज्य वक्रीकृत्य। 'गिरा विभुर्द्वारि विभुज्य कण्ठम्' इति नैषधे। आलुलोके। अर्थाद्विमलाचलं विलोकयति स्म। क इव। पारीन्द्र इव। यथा केसरी अग्रे गच्छन् मुहुः पश्चात्कण्ठं वलयित्वा विलोकते। पुनरन्यार्थे असौ सूरिस्तत्रैवालोक्यत्येऽप्यद्वैततीर्थतया प्रख्यातं पूर्वव्यावर्णितं वा सिद्धधराधरं शत्रुंजयाद्रिं दर्शं दर्शं पुनः पुनर्दृष्ट्वा दृष्ट्वा सौहित्यं तृप्तिं। 'तृप्तिः सौहित्यमाघ्राणः' इति हैम्याम्। न उवाह न वहते स्म न प्राप। सरागं सरणरणकं च लोचनाभ्यां सादरमवलोकयन्नेव तृप्तिं प्राप्नोति स्म॥

षड्भिः काव्यैः क्रियापदेषु सत्स्वपि सूरेर्मानसविकल्पानामेकार्थनिष्ठतया कुलकमेवावधीयते—

श्लोकार्थ

જેમ કેશરી સિંહ આગળ જતાં વારંવાર પાછું વળીને જુએ તેમ આચાર્યદેવ માર્ગમાં વિહાર કરતાં વારંવાર ડોક વાંકી કરીને અર્થાત્ પાછું વળીને શત્રુંજયતીર્થને જોતા હતા. વારંવાર જોવા છતાં પણ તૃપ્તિ પામતા નથી. ॥ ८ ॥

एतां धरित्रीं त्रिजगत्पवित्रीकर्त्रीं
सवित्रीमिव शर्मदात्रीम् ।
स्वजन्मभूमीमिव भूस्पृशो मे मोक्तुं
मनो नोत्सहते कथंचित् ॥ ९ ॥

एतां श्रीशत्रुंजयसंबन्धिनीं धरित्रीं पृथिवीं मोक्तुं विहातुं मे मम मनो मानसं कथंचित्केनापि प्रकारेण महता कष्टेन वा नोत्सहते नोत्साहं कुरुते न प्रगल्भते । नोद्यमं निर्मातीत्यर्थः । 'उत्साहः प्रगल्भता । अभियोगोद्यमौ प्रौढिः' इति हैम्याम् । इमां भूमीं मोक्तुं न शक्नोमीत्यर्थः । कामिव । स्वजन्मभूमीमिव । यथा भूस्पृशो मनुष्यस्य निजजन्मसंबन्धिनीमवनीं त्यक्तुं चेतो नोद्यच्छते । किंभूतां धरित्रीम् । त्रिजगतां तात्स्थ्यात्तद्व्यपदेशात्त्रैलोक्यलोकानां पवित्रीकर्त्रीं पावनीकारिकाम् । पुनः किंभूताम् । सवित्रीं जननीमिव । शर्मणां निःशेषसुखानां दात्रीं दायिकाम् ॥

શ્લોકાર્થ

(હવે છ શ્લોકો વડે આચાર્યદેવના માનસિક વિકલ્પો બતાવે છે)

જેમ કોઈ માણસ પોતાની જન્મભૂમિને છોડી જવાનું ઇચ્છે નહીં તેમ ત્રણે જગતને પવિત્ર કરનારી અને માતાની જેમ સર્વસુખોને આપનારી આ તીર્થભૂમિને છોડવા માટે કોઈ પણ પ્રકારે મારું મન માનતું નથી. ॥ ૯ ॥

कदम्बलौहित्यकदङ्कताल-
ध्वजादिकूटैः कटकैरिवैषः ।
सगर्वगन्धर्वगजेन्द्रगर्जैः श्रितोऽस्ति
शत्रुंजयभूधरेन्द्रः ॥ १० ॥

श्रीशत्रुंजयनामा भूधराणां पर्वतानां भूपानामिन्द्रः स्वामी त्रिभुवनभवनप्रवर्तमानसमस्तप्रशस्तमहातीर्थाधिराजत्वाच्चक्रवर्तित्वाच्च अस्ति विद्यते । साक्षात्प्रकारेण दृश्यते इत्यर्थः । किंभूतः । सगर्वा अद्भुतगीतकलाभिः पवनातिपातिगतिवेगातिशयवशेन साहंकाराः गन्धर्वाः देवगायनाः । गन्धर्वजातिदेवविशेषाः स्वर्णमणिमण्डितशिखरोदारकंदरोदरनिषण्णाः स्वशाशिमुखीसखा हाहादयः पारवासुरा यद्गुणान् गायन्तीत्यर्थः । तथा गन्धर्वा वन्यवाजिनश्च येषु शिखरेषु तथा गजेन्द्रा गन्धहस्तिनो भद्रादिजातिगजा वा तेषां गर्जा बृंहितानि सजलजलदधीरगम्भीरध्वनयो येषु तादृशैः कदम्बनामा तथा लौहित्याह्वस्तथा कदङ्काख्यस्तथा तालध्वजा-

भिधानाः शैलास्ते आदौ प्रथमं येषां तादृशैरष्टोत्तरशतमितैः कूटैः शिखरैः श्रितः सेवितः। उत्प्रेक्ष्यते—कटकैः सैन्यैरिव शत्रुंजयाभिधानः सार्वभौमोऽपि बलैः कलितो भवेत्। सैन्यैरपि साभिमानः तुरङ्गमगजगर्जोर्जितैः भूयते अथ वा कटकैरिवेत्यभिधेयम् ॥

શ્લોકાર્થ

જે પર્વતની ગુફાઓમાં અહંકાર સહિત ગંધર્વો ગીત ગાઈ રહ્યા છે, જે પર્વતમાં ગજેન્દ્રોની ગર્જનાઓ થાય જે, તેવા કદંબ, લૌહિત્ય, ઢંક અને તાલધ્વજ આદિ એક સો આઠ શિખરોરૂપી સૈન્યથી તીર્થાધિરાજ શત્રુંજય પર્વત સેવાયેલો છે. ॥ ૧૦ ॥

प्रपूज्य पुष्पैः किसलैः फलैश्च यो
वृक्षलक्षः क्षितिभृन्महेन्द्रः।
उपास्यते त्यक्तुमिवात्मवानस्पत्यं
गतिं वल्गुमिवाधिगन्तुम् ॥ ११ ॥

यो विमलाभिधानः क्षितिभृन्महेन्द्रः गिरिराजः वृक्षाणां द्रुमाणां लक्षैः शतसहस्रसंख्यैः उपास्यते सेव्यते। किं कृत्वा। प्रपूज्य प्रकर्षेण भावशुद्धा पूजयित्वा। कैः। पुष्पैः स्वकीयकुसुमैः। च पुनः कैः। किसलैः पल्लवैः। च पुनः फलैः आत्मीयशस्यैः। स्वजातीयप्रवालप्रप्रसूनफलैरभ्यर्च्येत्यर्थः। उत्प्रेक्ष्यते—स्ववानस्पत्यं निजां वनस्पतितां स्वकीयतरुभावम्। काष्ठत्वमिति यावत्। त्यक्तुं विहातुमम्। अथ पुनरुत्प्रेक्ष्यते—वल्गुं मनोहरां स्वर्गादिकां गतिमधिगन्तुं प्राप्तुमिव। 'अधिगत्य जगत्यधीश्वराद्थ मुक्तिं पुरुषोत्तममात्नतः' इति नैषधे। 'अधिगत्य प्राप्य' इति तद्वृत्तौ ॥

શ્લોકાર્થ

આ ગિરિરાજ પુષ્પો, પલ્લવો અને ફળોવાળાં લાખો વૃક્ષો દ્વારા પૂજિત છે, તે વૃક્ષો જાણે, પોતાના વનસ્પતિભાવનો ત્યાગ કરવા માટે અથવા તો જાણે સ્વર્ગાદિ સદ્ગતિ પ્રાપ્ત કરવા માટે શત્રુંજયની ઉપાસના કરતાં ન હોય ! ॥ ૧૧ ॥

एते मिथः प्रीतिपरीतचित्ताः
सिंहेभमुख्या अपि मुक्तवैराः।
तिर्यग्भवेऽपि स्पृहयेव सिद्धेः
सिद्धाचलेन्द्रं परिशीलयन्ति ॥ १२ ॥

एते प्रत्यक्षसूरिणा दृग्गोचरीक्रियमाणाः सिंहेभमुख्याः केसरिकुञ्जरादिकाः अर्थाद्वन-जीवाः सिद्धाचलेन्द्रं परिशीलयन्ति सेवन्ते शत्रुंजयपर्वतपुरंदरं तथा सिद्धो मन्त्रतन्त्रादि-सिद्धिमानचलेन्द्रनामा कोऽपि पुरुषस्तमपि सिद्ध्यभिलाषुकाः भजन्ते । किंभूताः । मिथः पर-स्परमाजन्मप्रतिबद्धमपि मुक्तं सर्वथापि मनोवाक्कायैस्त्यक्तं वैरं विरोधो यैः । अत एव पुनः किंभूताः । मिथोऽन्योन्यं प्रीत्या स्नेहेन परीतं व्याप्तं चित्तं मनो येषाम् । सिद्धानां तपस्विनां च प्रभावादिदमपि घटते । यदुक्तम्—'सिंही सारङ्गशावं स्पृशति सुतधिया द्वीपिनी तर्णकं गौर्मार्जारी मूषकार्भं रमयति नकुली व्यालबालं प्रमोदात् । मातङ्गी कुञ्जरारिं चटकशिशुमथो पत्त्रिणी यत्र सख्या आजन्मद्वेषिणोऽपि प्रदधति सखितां तीर्थराजप्रभावात् ॥' इति । उत्प्रेक्ष्यते—तिर्यग्भवेऽपि तिरश्चामप्यवतारे जन्मनि सिद्धेर्मोक्षस्य स्पृहया वाञ्छयेव एवमन्यापि सेवनं सिद्धेः काङ्क्षया ॥

શ્લોકાર્થ

વળી આ તીર્થમાં સિંહ, હાથી આદિ વન્ય પશુઓ પોતપોતાના જાતીય વેરનો ત્યાગ કરીને પરસ્પરના મૈત્રીભાવને વહન કરે છે. (કહ્યું છે કે આ ગિરિરાજના પ્રભાવથી સિંહણ મૃગબાળને પુત્રની જેમ સ્પર્શ કરે છે, વાઘણ ગાયના વછરડાને, બિલાડી ઊંદરને, નોળિયો સર્પને, હાથણી સિંહશિશુને, અને પાત્રિણી ચકલીના બચ્ચાને પ્રેમપૂર્વક રમાડે છે; આ રીતે જાતીય વેરનો ત્યાગ કરીને પરસ્પર મૈત્રીભાવથી પ્રેમપૂર્વક રહે છે.) તે પશુપક્ષીઓ જાણે પોતાના તિર્યંચભવમાં જ મુક્તિની ઝંખનાથી સિદ્ધાચલની ઉપાસના કરતાં ન હોય ! ॥૧૨॥

धात्रात्र विश्वाचलचारिमश्रीः
पिण्डीकृतैकत्र दिदृक्षतेव ।
इत्यूहमानेन गिरीन्द्रलक्ष्मीं
समीक्षमाणेन मुनीश्वरेण ॥ १३ ॥

शत्रुंजयोर्वीधरसंनिधाने शत्रुंजया
शैवलिनी न्यभालि ।
परांहसा स्वं मलिनं विभाव्य
पुत्रीव जह्नोः पवितुं समेता ॥ १४ ॥

मुनीश्वरेण हीरसूरिणा शत्रुंजयोर्वीधरस्य विमलाचलस्य संनिधाने समीपप्रदेशे शत्रुं-जया नाम्नी शैवलिनी नदी न्यभालि विलोकिता दृष्टा । उत्प्रेक्ष्यते—परांहसा समागतापरपा-

पीयोजनसंगमाज्जातपापेन मलिनं पातककलुषीकृतम् । यदुक्तम्—'महापातककल्लोकैर्नित्यस्नानविधानतः। मुक्त्वा पापं गतैः स्थानं तदादि मलिनास्म्यहम्॥' तदुपरि च गङ्गोक्तश्लोकः — 'परदारपरद्रव्यपरद्रोहपराङ्मुखः। गङ्गाप्याह कदाभ्येत्य मामयं पावयिष्यति ॥' इति परसमयोक्तानुसारेण परपातकागमनाद्गङ्गाया अपि मालिन्यं प्रसिद्धमास्ते तदुपरीयमुत्प्रेक्षा। स्वमात्मानं विभाव्य दृष्ट्वा । ज्ञात्वेत्यर्थः । तं पवितुं पवित्रीकर्तुं समागता जह्नोः पुत्री गङ्गेव । 'तीर्थे तोयव्यतिकरभवे जह्नुकन्यासरय्वोः' इति रघुवंशे । अथ वा 'मलिनीभविष्णु' इति पाठः । तत्र कल्मषेण कलुषीभवनशीलं स्वमात्मीयमात्मानं पावनीकर्तुम् । मुनीश्वरेण किं कुर्वाणेन । समीक्षमाणेन विलोकमानेन । काम् । गिरीन्द्रलक्ष्मीं वनकुण्डशिखराणां सुषमाम । पुनः किं कुर्वाणेन । इत्यमुना प्रकारेण ऊहमानेन वितर्कं कुर्वता । इति किम् । धात्रा सृष्टिकर्त्रा अत्र सौराष्ट्रमण्डले शत्रुंजयमूलधरित्र्यां वा विश्वेषां त्रयाणां सप्तानां चतुर्दशानां वा एकविंशतिसंख्याकानां वा जगताम् । 'भुवनानि निबध्नीयात्त्रीणि सप्तचतुर्दश' इति वाग्भटालंकारे । वृत्तौ एकविंशतिरपि । सर्वेषां वा चतुर्दशकोटीब्रह्माण्डाधिपतिः पार्वतीपतिः इति प्रसिद्धः । अचलानां पर्वतानां चारिमश्रीर्मनोज्ञत्वलक्ष्मीः पिण्डीकृता पुण्डरीकाचलरूपे पिण्डतां प्रापिता । उत्प्रेक्ष्यते—सर्वपर्वतानां श्रियमेकत्र पृथक् पृथक् अवतिष्ठमानामेकस्मिन्नेत्र स्थाने दिदृक्षता द्रष्टुमिच्छतेव पिण्डीकृता ॥ युग्मान्तर्भूतषट्कुलकं तुल्यम् । शत्रुंजयपर्वतात्प्रस्थानावसरे शत्रुंजयस्वरूपविचारणम् ॥

શ્લોકાર્થ

ગિરિરાજની લક્ષ્મીને જોતાં આચાર્યદેવે કલ્પના કરી કે 'બ્રહ્માએ જગતના પર્વતોની શોભા જોવાની ઇચ્છાથી સર્વે પર્વતોની શોભાને પિંડરૂપ બનાવીને, અહીંયા જ જાણે એકઠી કરી ન હોય ! શત્રુંજયની સમીપ રહેલી શત્રુંજયી નદીને જોઈ જાણે ગંગાનદી પાપી જીવોના સ્નાન કરવાથી મલિન બનેલા પોતાના પ્રવાહને પવિત્ર કરવા માટે શત્રુંજયની નિશ્રામાં આવીને વસી ન હોય ! ॥ ૧૩ ॥ ૧૪ ॥

पद्मानि यस्यां व्यलसन्मुखानि
पयःसुरीभिः प्रकटीकृतानि ।
अमानमाहात्म्यमहीधरेन्द्र-
दिदृक्षयेव स्मितनेत्रपत्त्रैः ॥ १५ ॥

यस्यां शत्रुंजयाभिधानतरङ्गिण्यां पद्मानि कमलानि व्यलसन् विभान्ति स्म । उत्प्रेक्ष्यते—अमानं प्रमाणातीतं माहात्म्यं महिमा यस्य तादृशस्य महीधरेन्द्रस्य शत्रुंजयशैलराजस्य

दिदृक्षया द्रष्टुमिच्छयेव पयःसुरीभिः जलदेवताभिः प्रकटीकृतानि जनलोचनगोचराणि निर्मितानि स्मितानि विकसितानि नेत्राणि नयनान्येव पत्त्राणि दलानि येषु तादृशानि स्ववदनानि निजमुखानीव ॥

શ્લોકાર્થ

શત્રુંજયીનદીમાં કમલો શોભે છે. તે જાણે પ્રમાણાતીત માહાત્મ્યવાળા શત્રુંજયપર્વતને જોવા માટે વિકસ્વર પત્રોરૂપી નેત્રોવાળા જલદેવતાનાં મુખો પ્રગટ થયાં ન હોય ? ॥ ૧૫ ॥

नेदृक्परं तीर्थमुदेति मुक्तिक्षेत्रं
त्रिलोक्यामपि तत्समीपे ।
शत्रुंजयासिन्धुमिषेण रेखाचिख्यास-
येतीव कृता विधात्रा ॥ १६ ॥

त्रिलोक्यां जगत्त्रये ईदृक् ईदृशं शत्रुंजयशैलसदृशं मुक्तिक्षेत्रं मोक्षगमनस्थानं नामाख्यानपूर्वकानन्तानन्तकोटिकोटिमिततीर्थकृद्गणधरसाधुगृहमेधिना सिद्धिसाधनपदम् अन्यतीर्थमतादृग्विधं नैवोदेति जागर्ति । विद्यते इत्यर्थः । उत्प्रेक्ष्यते—इत्यमुना प्रकारेणाचिख्यासया अर्थाज्जगत्पुर आख्यातुमिच्छयेव विधात्रा विश्वसृष्टिकर्त्रा तस्य शत्रुंजयस्य समीपे पार्श्वप्रदेशे शत्रुंजया नाम सिन्धुस्तस्या मिषेण कपटेन रेखा कृता चिह्नितेव । एतस्य तुल्यमपरं किमपि तीर्थं नास्तीत्यतोऽयमेव रेखाभाक् । तस्मादस्य पार्श्वे शत्रुंजया सरिद्रूपा रेखा कृतास्तीत्यर्थः ॥

શ્લોકાર્થ

'ત્રણે જગતમાં શત્રુંજયતીર્થ સમાન, અનંતાનંત તીર્થંકરો, ગણધરો અને મુનીશ્વરોને મુક્તિના સાધનરૂપ મુક્તિક્ષેત્ર અન્ય કોઈ સ્થળે નથી,' આ પ્રમાણે ત્રણે લોકમાં જાહેર કરવા માટે જાણે બ્રહ્માએ શત્રુંજયી નદીના બહાને 'રેખા' દોરી ન હોય ! ॥ ૧૬ ॥

पयःप्लवक्रीडदनेकपौरपुरंध्रिपुञ्जः
सरिति व्यराजत् ।
नमश्चिकीर्षुः श्रमणावनीन्दोः
पादाम्बुजं वारिसुरीभरः किम् ॥ १७ ॥

सरिति शत्रुंजयायां नद्यां पयसां पानीयानां प्लवे पूरे क्रीडन्तीनां जलक्रीडां कुर्वाणानामनेकानां विविधजातीयानां बहूनां वा पौराणां नागरिकलोकानां पुरंध्रीणां कामिनीनां पुञ्जो व्रजो व्यराजद्भाति स्म । उत्प्रेक्ष्यते—श्रमणानां साधूनां मध्येऽवनीन्दोः क्षोणीयचन्द्रस्य राज्ञः हीरसूरीश्वरस्य पादाम्बुजं चरणारविन्दं नमश्चिकीर्षुर्नमस्कर्तुमिच्छुः । 'तावदेव ऋषिरिन्द्रदिदृक्षुः' इन्द्रं द्रष्टुमिच्छुः इति नैषधे । वारिसुरीभरः किं जलदेवतासंदोह इव ॥

श्लोकार्थ

शत्रुंजयीनदीना प्रवाहમાં અનેક નગરનારીઓ જલક્રીડા કરતી શોભે છે. તે જાણે આચાર્યદેવના ચરણકમલને નમસ્કાર કરવા માટે આવેલી જલદેવીઓનો સમૂહ ન હોય! ॥ १७ ॥

पतिव्रतापीश्वरवार्धिभर्तृद्वयेति
कौलीनमपाचिकीर्षुः ।
शत्रुंजयं सेवितुमात्मनागान्मिषेण
यस्या हरशेखरेव ॥ १८ ॥

या सरित भातीति संबन्धः । उत्प्रेक्ष्यते—यस्याः शत्रुंजयाया नद्या मिषेण कपटेन आत्मना स्वकीयरूपेणैव शत्रुंजयं महातीर्थाधिराजं सेवितुं हरशेखरा गङ्गा इवागादागता । किं कर्तुमिच्छुः । इत्यमुना प्रकारेण कौलीनं स्वकीयापवादम् । 'जनप्रवादः कौलीनं विगानं वचनीयता' इति हैम्याम् । अपाचिकीर्षुः निराकर्तुमिच्छुः । इति किम् । स्वकान्तं विना परं पुमांसं मनसा वचसा कायेन स्वऽपि कदाचिदपि न कामयते इति सा पतिरेव व्रतं सतीत्वव्यञ्जको नियमः शीलं यस्याः सा पतिव्रता सती ईदृश्यतोऽपि सार्धाङ्गहारिपार्वतीतोऽपि अतिप्रेमाधिक्येन स्वशिरस्यारोपितापि मन्दाकिनी ईश्वरः शंभुः वार्धिः समुद्रः एतल्लक्षणं भर्तृद्वयं वल्लभद्वन्द्वं यस्याः सा द्वयोः पुरुषयोः पार्श्वे या वनिता व्रजति सा असती व्यभिचारिण्येव भवति सा सती सर्वथापि नोच्यते । अथ ईश्वरं भिक्षुकं मुक्त्वा समुद्रं रत्नाकरं भजते । तदियं पुंश्चली एव न पतिव्रता इति स्वनिन्दां निराकर्तुम् ॥

श्लोकार्थ

શત્રુંજયીનદીના બ્હાને તીર્થાધિરાજની ઉપાસના કરવા માટે જાણે ગંગાનદી આવી ન હોય! ગંગા, સ્વયં પતિવ્રતા સતી હોવા છતાં પણ ભિક્ષુક ઈશ્વરનો ત્યાગ કરીને સમુદ્રને સેવે છે. તેથી 'ઈશ્વર અને સમુદ્ર બે પતિ કરવાથી ગંગા સતી નહીં પરંતુ અસતી

છે,' લોકોમાં કહેવાતા પોતાના આવા અપવાદને દૂર કરવા માટે જાણે પવિત્ર શત્રુંજય તીર્થની ઉપાસના માટે આવી ન હોય ! ॥ ૧૮ ॥

या शान्तनूर्वीमघवाङ्गजानां
महामयापायवतां चतुर्णाम् ।
चिकित्सकीवात्र महीन्द्रमुक्ति-
श्रीसंगमेऽपि प्रतिभूरिवाभूत् ॥ १९ ॥

या शत्रुंजया नदी अत्र जगति महान्तः अतिशायिक्लेशापवादायशोविधायिनो ये आमयाः कुष्ठादिदुष्टरोगास्त एवापायाः कष्टानि विद्यन्ते येषां ते महामयापायवन्तस्तेषां चतुर्णां चतुःसंख्याकानां शान्तनुर्नामा इक्ष्वाकुवंशीय उर्वीमघवा महीमहेन्द्रस्तस्याङ्गजानां पुत्राणां चिकित्सकीवागदंकारिकेव अखिलव्याधिमूलोच्छेदकारिणीवाभूत जायते स्म । अपि पुनस्तेषां शान्तनुनन्दनानां महीन्द्रमुक्तिश्रीसंगमे राज्यलक्ष्मीस्तथा मोक्षलक्ष्मीस्तयोः संगमे मिलने अङ्गीकरणे प्रतिभूः साक्षिणीव संजाता । अयं संबन्धः शत्रुंजयामाहात्म्ये सविस्तरोऽस्तीति ॥

શ્લોકાર્થ

શત્રુંજયીનદી શાંતનુ રાજાના ચાર પુત્રોના મહારોગોને દૂર કરવા માટે વૈદ્યરૂપ બની હતી અને તે ચાર પુત્રોને રાજ્યલક્ષ્મી તથા મોક્ષલક્ષ્મી મેળવી અપવા માટે સાક્ષીરૂપ (દલાલરૂપ) બની હતી. ॥ ૧૯ ॥

तीर्थेषु पाथःप्रथितेषु गत्या
पृथक्पृथक्खिद्यति लोक एषः ।
शत्रुंजयेतीव विचिन्त्य
सर्वतीर्थावतारा विधिना व्यधायि ॥ २० ॥

सर्वेषां भूर्भुवःस्वस्त्रयीभवानां नदीनदीपतिकूपपुष्करिणीदीर्घिकाह्रदकुण्डतडागपुष्करप्रभृतीनां तीर्थानां पुण्यस्थानकानामवतारोऽवतरणमनुप्रवेशो यस्यां तादृशी शत्रुंजयानाम्नी निर्झरिणी विधिना प्रजापतिना व्यधायि विहिता । उत्प्रेक्ष्यते—इत्यग्रेत्र वृत्ते प्रोच्यमानं विचिन्त्य प्रजापतित्वात्स्वप्रजायाः खेदकारणं करुणया हृदये विचार्येव । इति किम् । यस्पाथःसु तदीयकुण्डसरःपुष्करप्रमुखेषु जलस्थानकेषु प्रथितेषु तीर्थतया विख्यातिं प्राप्तेषु सिद्धि-

साधनस्थानकेषु लोकप्रसिद्धेषु पृथक् पृथक् गत्वा इतस्ततः पर्यटनेन भिन्नभिन्नप्रदेशपरिभ्रमणेन कृत्वा एष मदुपक्रमलोको मध्यमलोकसंजातो जनः खिद्यति । पादचारित्वेन पर्यटने दुष्कर-दुःखितया खेदं प्राप्नोति इत्येष विमर्शः ॥

શ્લોકાર્થ

નદી, કુંડ, સરોવર, સમુદ્ર, પુષ્કરિણી આદિ ભિન્ન ભિન્ન લોકપ્રસિદ્ધ તીર્થોમાં આમ-તેમ ભટકવાથી દુખી થતા મધ્યલોકને વિચારીને, બ્રહ્માએ જાણે આ શત્રુંજયીનદીને સર્વતીર્થા-વતારરૂપે બનાવી ન હોય ! ॥ ૨૦ ॥

शत्रुंजयाद्रेर्महिमैकसिन्धो
सांनिध्यतोऽसावपि सिन्धुरासीत् ।
माहात्म्यभूमि किमु किं न
गङ्गासङ्गेन गङ्गीयति सिन्धुरन्या ॥ २१ ॥

महिम्नामद्वैतमाहात्म्यानामेकस्याद्वितीयस्य सिन्धोः समुद्रस्य विमलाद्रेः पुण्डरीकगिरेः सांनिध्यतः सामीप्यात्पार्श्वे स्थितया । उत्प्रेक्ष्यते—असौ शत्रुंजया सरिदपि माहात्म्यानाम-साधारणप्रभावाणां भूमिः स्थानं किमु आसीज्जातेव । दृष्टान्तेनार्थं स्पष्टयति—युक्तोऽयमर्थो वा । गङ्गासङ्गेन मन्दाकिनीसंपर्केण अन्या परा यमुनाप्रमुखा सिन्धुर्नदी किमिति वितर्के प्रश्ने वा नैव गङ्गीयति गङ्गेव वाचरति । अपि तु गङ्गेव भवति ॥

શ્લોકાર્થ

ગંગાનદીના સંગથી તો બીજી નદીઓ ગંગારૂપે ના બની પરંતુ મહિમાના સાગર વિમલાચલના સંગથી શત્રુંજયીનદી મહિમાના સ્થાનરૂપ કેમ બની ગઈ, તે એક આશ્ચર્ય-રૂપ છે ! ॥ ૨૧ ॥

उत्तीर्णवांस्तां सरितं व्रतीन्दुः
सिन्धुं सुराणामिव चक्रपाणिः ।
ईर्यापथिक्याश्च कृते तटे स्थाद्रष्टुं
क्षणं तामिव कल्मषघ्नीम् ॥ २२ ॥

व्रतीन्दुः साधुसुधाकरः सूरिः तां शत्रुंजयानाम्नीं नदीमुत्तीर्णवान् 'एकं पादं जले कृत्वा' इति सिद्धान्तोक्तविधिना उत्ततार । क इव । चक्रपाणिरिव । यथा नारायणो धातुकीखण्ड-भरतक्षेत्रमण्डनामरकाभिधराजधानीनायकं पाण्डुधात्रीपतिपुत्रकलत्रापहारकमर्धनरसिंहरूपेण पद्मोत्तरपृथिवीपतिं परिभूय द्रौपदीं चादाय षड्भी रथैः सुस्थितसुरानुभावाल्लवणार्णवमध्य-मगाह्य पूर्वोत्तीर्णपाण्डवाप्रतिहतवहनाभावात्सुराणां सिन्धुं देवनदीं गङ्गां स्वयमुत्तरति स्म । अत्रागमविधेः किमपि प्रयोजनं न, किं तु केवलं नद्युत्तरणमेवोपमानम् । च पुनः सूरिरीर्या-पथिक्या ईर्यापथिकीप्रतिक्रमणस्य कृते कार्याय तत्र शत्रुंजयसरित्तीरे क्षणंक्षणमात्रं तिष्ठति स्म । उत्प्रेक्ष्यते—कल्मषाणि पापानि हन्तीति कल्मषघ्नीं शत्रुंजयां द्रष्टुं दृग्गोचरीकर्तुं क्षणं तस्थि-वानिव । यतः सा पापहन्त्री ततस्तद्दर्शनमपवर्गजिगमिषया पापप्रहननोद्यतानां यतीनामप्यु-चितमेव दुरितघातसाधनत्वादिति ॥

શ્લોકાર્થ

જેમ વિષ્ણુએ ગંગાનદીને પાર કરી હતી (ધાતકીખંડના ભરતક્ષેત્રમાં રહેલી અપરકંકા નગરીનો રાજા પદ્મોત્તર પાંડવોની પત્ની દ્રૌપદીનું હરણ કરીને લઈ ગયેલો ત્યારે વિષ્ણુએ નરસિંહનું રૂપ કરીને પદ્મોત્તર રાજાનો પરાભવ કરી, દ્રૌપદીને છોડાવીને પાંડવોને સોંપી હતી. તે પછી લવણસમુદ્રના અધિષ્ઠાયક સુસ્થિતદેવના પ્રભાવથી છ રથો વડે લવણસમુદ્રને પાર કરીને પાંડવો એકલા પાછા આવી ગયા હતા, વાહનના અભાવે કૃષ્ણે પોતાની ભુજાઓ વડે ગંગાનદી પાર કરી હતી.) તેમ આચાર્યદેવે શત્રુંજયીનદીને પાર કરી. અર્થાત્ નદી ઊતર્યા, ત્યાર બાદ ઈર્યાપથિકી ક્રિયા કરવા માટે નદીકાંઠે ઊભા રહ્યા. તે જાણે પાપોનો નાશ કરનારી શત્રુંજયીનદીને ક્ષણવાર જોવા માટે ઊભા રહ્યા ન હોય ! ॥ ૨૨ ॥

पुंनागनारङ्गरसालप्रियालहन्तालतमालतालैः ।
कदम्बजम्बीरसनिम्बजम्बूसर्जार्जुनैरञ्जनवञ्जुलैश्च ॥ २३ ॥

कङ्केलिभिर्भूषिततीरभूमिर्यावन्मनोभीप्सितदानदक्षा ।
स्वःसालतायाः स्पृहयात्मनीव सर्वैर्द्रुमैः सिन्धुरुपास्यतेव ॥ २४ ॥

पुंनागाः सुरपर्णिकाः पादपविशेषाः, नारङ्गाः प्रसिद्धाः, रसालाः सहकाराः इक्षवोऽपि, साला असनाः, प्रियाला राजादनाः, हन्ताला नाम देशविशेषप्रसिद्धवृक्षाः, तमालास्तापिच्छाः, येषां तमालपत्राणि भवन्ति यत्पत्राणि पूर्वदेशे दक्षिणदेशे कर्णाभरणीभवन्ति वा । यदुक्तं नैषधे— 'श्रवणतमालदलाङ्कुरं शशिकुरङ्गमुखे सखि निक्षिप । किमपि तुन्दलितः स्थगयत्यमुं स यदि तेन तदुच्छ्वसिमि क्षणम् ॥' इति विरहावस्थायां चन्द्रोदये दमयन्तीवाक्यम् । तालास्ताडतरवो

गुर्जरेषु प्रसिद्धाः । दक्षिणदिशि च राजताला अपि भवन्ति येषां पत्रैः पुस्तकानि लिख्यन्ते तैः तथा कदम्बनीपा धाराकदम्बा धूलीकदम्बा वा । द्वये अपि चम्पूटिप्पनके प्रोक्ताः सन्ति । जम्बीराः प्रसिद्धाः । सह निम्बेन पिचुमन्देन 'नींबडा' इति प्रसिद्धेन वर्तन्ते यास्तादृश्यः, जम्बू श्यामफलाः प्रसिद्धाः । अथ वा निम्बजम्बूभिः सहितैः सर्जा देवदारवः । अर्जुनाः शास्त्रे देवविशेषे वार्बुदसमीपे च प्रसिद्धाः तैः, तथा अञ्जना वृक्षविशेषाः, वञ्जुला वानीराः, तथा कङ्केलयः अशोकाः केसरा नागकेसरा पतैर्वृक्षैर्या शत्रुंजया सरित् उपास्यते सर्वकालं सेव्यते । किंभूता । यावन्ति त्रैलोक्यलोकवर्तीनि सर्वजातीयानि वा मनसामभीप्सितानि कामितानि तेषां दाने प्रपूरणे दक्षा कुशला । कामितकामधेनुरित्यर्थः । उत्प्रेक्ष्यते—आत्मसुखेषु विषये स्वःसालतायाः कल्पद्रुमभावस्य स्पृहया वाञ्छया वृक्षलक्षैः संसेव्यते । कामितकामदुघां शत्रुंजयां सरितं संसेव्य वयं कल्पवृक्षभावं भजाम इतीच्छयैव ॥ युग्मम् ॥

श्लोकार्थ

શત્રુંજયીનદીના કિનારે રહેલાં રસાલ, સહકાર, ઈક્ષુ, સાલ, રાયણ, હંત્તાલ, તમાલ તાલ, જંબીર, લીમડા, અંજન, વંજુલ અશોક, નાગકેશર અને વડવૃક્ષ આદિ લાખો વૃક્ષો વડે ત્રણે લોકના જીવોને મનોવાંછિત આપનારી શત્રુંજયીનદી ત્રણે કાળ સેવાય છે. તે વૃક્ષો જાણે સ્વયં કલ્પવૃક્ષરૂપે બનવાની ઈચ્છાથી કામધેનુ જેવી શંત્રુજયીનદીની ઉપાસના કરતાં ન હોય ! ॥ ૨૩ ॥ ૨૪ ॥

कदा पुनर्दर्शनमस्य भावि
ध्यायन्निदं स्वीयहृदा मुनीन्दुः ।
तीर्थं स तीर्थेशमिव प्रणम्य
पथि प्रतस्थे प्रथितावदातः ॥ २५ ॥

स मुनिर्हीरसूरीन्द्रस्तीर्थेशं जिनमिव शत्रुंजयाद्रिं प्रणम्य ललाटघटितकुड्मलीकृतकरकमलो नमस्कृत्य पथि द्वीपोन्नतपुरपद्धतौ प्रतस्थे प्रचचाल । स किंलक्षणः । प्रथितो जगद्विख्यातोऽवदातः अकब्बरसाहिप्रतिबोधनलक्षणं चरितं यस्य । स किं कुर्वन् । इदमत्रैव वृत्ते प्रोच्यमानमेतत्स्वहृदा निजमनसा ध्यायन् चिन्तयन् । इदं किम् । यदस्य तीर्थाधिराजस्य पुनर्द्वितीयवारं कदा कस्मिन्काले मम दर्शनमवलोकनम् । यात्रा इत्यर्थः । भावि भविष्यति ॥

श्लोकार्थ

વિશ્વવિખ્યાત ચરિત્રવાળા આચાર્યદેવ તીર્થંકરભગવંતની જેમ તીર્થાધિરાજને વારંવાર નમસ્કાર કરતા અને 'હવે ફરીથી આ તીર્થદર્શનનો લાભ કયારે મલશે ?' આ પ્રમાણે મનમાં ચિંતન કરતા, તેમણે દીવબંદરના માર્ગે વિહાર કર્યો. ॥ ૨૫ ॥

मेरूनिव क्वापि सुवर्णवर्ण्यान्कुत्रापि
रौप्यानिव शर्वशैलान्।
अप्याश्मगर्भानिव विन्ध्यभूध्रान्सिद्धा-
द्रिकूटान्पथि दृष्टवान्सः ॥ २६ ॥

पथि मार्गे सिद्धाद्रेः पुण्डरीकपर्वतस्य कूटान् शिखराणि। कूटशब्दः पुंनपुंसकलिङ्गयोः। यथा—'ध्वजमलयजकूटाः कालकूटारकूटौ' इति लिङ्गानुशासने। दृष्टवान्पश्यति स्म। किंभूतान् कूटान्। क्वापि कुत्रापि प्रदेशे सुवर्णैः शोभनवर्णैर्वर्ण्यान् वर्णनीयान्। कानिव। मेरूनिव। मेरवः किंभूताः। सुवर्णैः काञ्चनैः वर्ण्याः प्रशस्याः। पुनः कुत्रापि स्थाने रौप्यान् रूप्याणामिमे रौप्याः। रजतमयानित्यर्थः। कानिव। शर्वशैलानिव। यथा कैलाशाः कलधौतस्वरूपा भवन्ति। 'रजताद्रिस्तु कैलाशः' इति हैम्याम्। अपि पुनः क्वचन भूभागे आश्मगर्भान् अश्मगर्भाणां हरिन्मणीनामिमे। मरकतमणिमयानित्यर्थः। कानिव। विन्ध्यभूध्रानिव। विन्ध्योपमानं श्यामवर्णत्वात्। श्यामनीलवर्णयोः शास्त्रेष्वैक्यमेव दृश्यते। यथा—'नीली विनीलं नभः'। तथा—'जसतणुकंतिकडप्पसिणिद्धउ। सोहइ फणमणिकिरणालिद्धउ नेत्रवजलहरतडिलयलंछिउ॥' इति। अत्र पार्श्वनाथो मरकतवर्णः, जलधरः श्यामवर्णः, अनयोरुपमेयोपमानता जाता इति॥ इति शत्रुंजयपरिसरभुवं विहायाग्रे प्रस्थानम्॥

श्लोकार्थ

मेरुनी जेम कोई सुवर्णमय, कैलासनी जेम कोई रूप्यमय अने विन्ध्याचलनी जेम कोई मरकतमणिमय एवा रस्तामां आवता शत्रुंजयपर्वतनां शिखरोने जोता आचार्यदेवे आगळ विहार कर्यो. ॥ २६ ॥

कुत्रापि बन्धूनिव नन्दनस्य निकुञ्जपुञ्जान्सुमनोभिरामान्।
वेणीरिव व्योमपयोधिपत्न्याः कूलंकषाः क्वापि विशुद्धवारः॥ २७॥

इवात्मदर्शान्धरणीन्दिरायाः क्वचित्तटाकांश्च पयःप्रपूर्णान्।
मित्राणि सुत्रामपुरः किमत्र श्रीवासवेश्मानि पुनः पुराणि॥ २८॥

हृल्लेखितामाकलयद्भिरात्मावतंसतां नेतुमिदं पदाब्जम्।
श्राद्धैरिवानेकजनैः प्रणम्यमानः स पश्यन्पुरतोऽजिहीत॥ २९॥

स प्रभुः सूरिः पुरतः शत्रुंजयाद्रिकूटानि निर्मुच्याग्रेतनमार्गे अजिहीत। 'ओहाङ् गतौ' धातुः। अद्यतनप्रयोगः। गच्छति स्म प्रचलितवान्। स किं क्रियमाणः। श्राद्धैः श्रावकैरिवा-

नेकैर्विविधजातीयैर्बहुभिर्वा जनैः सौराष्ट्रराष्ट्रजन्मभिर्लोकैः प्रणम्यमानो नमस्क्रियमाणः। जनैः किं कुर्वद्भिः। हृल्लेखा उत्कण्ठा अस्त्येषामिति हृल्लेखिन उत्कण्ठावन्तस्तेषां भावो हृल्लेखिता औत्सुक्यम्। 'रणरणकोत्कण्ठे आयल्लकारतीहृल्लेखोत्कलिके' इति हैम्याम्। आकलयद्भिर्बिभ्राणैः। किं कर्तुम्। इदं पदाब्जं सूरिचरणारविन्दमात्मनः स्वस्य अथान्मस्तके अवतंसतां शेखरत्वं नेतुं प्रापयितुम्। पुनः स किं कुर्वन्। पश्यन्विलोकयन्। कान्। कुत्रापि प्रदेशे निकुञ्जपुञ्जान् वनप्रकरान्। उत्प्रेक्ष्यते—नन्दनस्य मन्दराद्रिद्वितीयमेखलावर्तिवासववनस्य बन्धून् सोदरान् इव। तत्तुल्यानित्यर्थः। किंभूतान्। सुमनोभिर्विविधजातिकुसुमैरभिरामान् देवैश्च रमणीयान्। पुनः क्वापि भूमिभागे कूलंकषाः अभङ्गुरङ्गत्तुङ्गतरङ्गसंगमागाहप्रबलप्रसरत्पयः पूररंहोनिष्पातिततटीस्तटिनीः पश्यन्। उत्प्रेक्ष्यते—व्योमपयोधिपत्न्याः गगनापगायाः गङ्गायाः वेणीः प्रवाहानिव। 'प्रवाहः पुनरोघः स्याद्वेणीधारारयश्च' इति हैम्याम्। किंभूताः। विशुद्धवारः विशुद्धं निर्मलमुज्ज्वलं च वाः पानीयं यस्याम्। पुनः कान्। तटाकान् सरोवराणि पश्यन्। उत्प्रेक्ष्यते—धरणीन्दिराया भूमिश्रिय आत्मदर्शान्दर्पणानिव। किंभूतान्। पयोभिः पानीयैः प्रकर्षेण कण्ठं यावत्पूर्णान् निर्भरभृतान्। पुनः कानि पुराणि नगराणि पश्यन्। उत्प्रेक्ष्यते—अत्र मेदिनीमण्डले सौराष्ट्रमण्डले वा सुत्रामपुर इन्द्रनगरस्यामरावत्याः मित्राणीव। किंभूतानि पुराणि। श्रीवासवेश्मानि श्रीणां धनधान्यादिलक्ष्मीणां श्रियो हरिप्रियाया वा वासार्थं निवसनकृते मन्दिराणीव ॥ त्रिभिर्विशेषकम् ॥

श्लोकार्थ

કોઈ સ્થાનમાં જાણે સાક્ષાત્ નંદનવનના બંધુઓ હોય તેવાં મનોહર વનકુંજોને જોતા, જાણે આકાશગંગાનો પ્રવાહ હોય તેવી નદીઓને જોતા, પૃથ્વીરૂપી લક્ષ્મીના આરિસા હોય તેવા નિર્મલ જલથી પરિપૂર્ણ સરોવરોને જોતા, જાણે સ્વર્ગપુરીના મિત્રો હોય અથવા જાણે લક્ષ્મીને વસવા માટેનાં મંદિરો હોય તેવાં નગરોને જોતા તેમજ આચાર્યદેવના ચરણ-કમલને પોતાના મુગટરૂપે બનાવવાને ઇચ્છતા શ્રદ્ધાળુ સૌરાષ્ટ્રદેશવાસીઓ વડે નમસ્કાર કરાતા આચાર્યદેવ આગળ વિહાર કરતા હતા. ॥ ૨૭ ॥ ૨૮ ॥ ૨૯ ॥

क्रमद्वयीचङ्क्रमणक्रमेणातिक्रम्य
शक्रो व्रतिनां स मार्गम्।
वस्वोकसारावरजामिवात्राजया-
भिधानां पुरमाससाद ॥ ३० ॥

स व्रतिनां शक्रो मुनीन्द्रः हीरसूरिः अजय इत्यभिधानं यस्यास्तादृशीं पुरं नगरीमाससाद प्राप। उत्प्रेक्ष्यते—अत्र श्रीपोन्नतनगरोपकण्ठे भूपीठे वस्वोकसारायां धनदनगर्याः

अवरजां लघुभगिनीमिव । किं कृत्वा । क्रमद्वयी चरणयुगली । 'उच्चै राज्यप्रदानात्कलि कलुषमलक्षालनात्, तामसानामुच्छेदात्, त्रिदशपतिकरस्पर्शनात्, दर्शनस्य । हेतुत्वात्, सस्य स्वर्गाद्युदयफलपदस्वर्जनज्ञानभूत्वात् धत्ते नाभेयदेवप्रभुपदयुगलीगौरवं गौरिवेह ॥' इति श्रीसोमसुन्दरसूरिकृतस्तवे युगलीशब्दः । तया यच्चङ्क्रमणं चलनं तस्य क्रमेण परिपाट्या मार्ग पन्थानमतिक्रम्योल्लङ्घ्य ॥ इति मार्गोल्लङ्घनम् ॥

શ્લોકાર્થ

ચરણયુગલ વડે અનુક્રમે માર્ગે આગળે વધતા આચાર્યદેવે જાણે કુબેરની નગરી અલકાપુરીની લઘુભગિની ન હોય, તેવી દીવ અને ઉનાની મધ્યમાં આવેલી 'અજારા' નગરીને પવિત્ર કરી. ॥ ૩૦ ॥

तत्राजयोर्वीरमणस्य पिण्डीभवद्यशः
किं शशिजित्वरश्रि ।
सूरीन्दुरालोकयति स्म चैत्यम-
चिन्त्यमाहात्म्यजिनाङ्किताङ्कम् ॥ ३१ ॥

सूरीन्दुर्हीरसूरिसोमः तत्राजयपुरे चैत्यं प्रासादमालोकयति स्म ददर्श । किंभूतं चैत्यम् । अचिन्त्यं चिन्तयितुमशक्यं विचारगोचरातीतं माहात्म्यं प्रभावो यस्य तादृशेन जिनेनाजयपार्श्वनाथप्रतिमारूपेण अर्हता अङ्कितं कलित उत्सङ्गो मध्यं यस्य तत् । उत्प्रेक्ष्यते— चैत्यम् । अजयो नामा उर्वीरमणो राजा दशरथनृपस्य जनकस्तस्य । 'अधुनाजयभूपालभाग्येन यमिहागता' इति शत्रुंजयमाहात्म्ये । पिण्डीभवत्पिण्डतां प्राप्नुवद्यशः किं कीर्तिरिव । किंभूतं यशः । शशिनश्चन्द्रस्य जित्वरी जयनशीला श्रीः श्वेतिमलक्ष्मीर्यस्य ॥

શ્લોકાર્થ

ત્યાં આચાર્યદેવે અચિંત્ય મહિમાવાળા અજારાપાર્શ્વનાથની મૂર્તિ જેના મધ્યભાગમાં છે તેવા જિનપ્રાસાદને જોયો, તે જાણે દશરથરાજાના પિતા અજયપાળનો ચન્દ્રની શોભાને જીતી લે તેવો પિંડરૂપે બનેલો ઉજ્જ્વલ યશ ન હોય ! ॥ ૩૧ ॥

प्रीत्या प्रणत्याजयपार्श्वमत्राभिष्टुत्य वृत्रारिरिव व्रतीन्दुः ।
अकीर्तयत्क्वाप्युपविश्य तस्य माहात्म्यमिभ्यव्रजभूतां पुरस्तात् ॥ ३२ ॥

व्रतीन्दुर्वाचंयमचन्द्रमाः सूरिः कुत्रापि कुत्रापि स्थाने तद्देवगृहबहिर्धर्मशालायामुपविश्यासित्वा अङ्गभृतां भविकजन्तूनां पुरस्तादग्रे इत्यमुना प्रकारेणाग्रे वक्ष्यमाणं तस्याजयपार्श्वनाथबिम्बस्य माहात्म्यं प्रभावमकीर्तयत् विस्तारयति स्म। 'कीर्तण् यशसि विस्तारे' इति धातुः। उक्तवान्। किं कृत्वा। अत्र प्रासादे प्रीत्या प्रमोदेन। 'मुत्प्रीत्यामोदसंमदाः। आनन्दानन्दथू' इति हैम्याम्। अजयपार्श्वमजयपार्श्वनाथप्रतिमां प्रणत्य नमस्कृत्य। व्यवस्थितविकल्पत्वान्मितानिटां वा तुक्। 'आगम्यागत्य प्रणम्य प्रणत्य' इति प्रक्रियाकौमुद्याम्। च पुनः किं कृत्वा। अभिष्टुत्य स्तुत्वा। क इव। वृत्रारिरिव। यथा इन्द्रः शक्रः स्तवादिना जिनं स्तौति ॥

श्लोकार्थ

આચાર્યદેવે અજારાપાર્શ્વનાથને ભક્તિપૂર્વક પ્રણામ કરીને અને ઇન્દ્રની જેમ સ્તુતિ કરીને જિનચૈત્યની બહાર ધર્મશાળામાં બેસીને ભવ્યજીવોની આગળ પ્રગટ પ્રભાવ શ્રી અજારાપાર્શ્વનાથનો મહિમા વર્ણવ્યો. ॥ ૩૨ ॥

कश्चिन्महेभ्यो व्यवहर्तुमब्धिमध्याध्वना प्रास्थित सागराह्वः।
क्वास्त्यत्र पुत्री जलधेर्निभाल्य गृह्णाम्यहं तामिति किं वितर्क्य ॥ ३३ ॥

कश्चित्कोऽप्यज्ञातपूर्वस्वरूपः सागर इत्याह्वा नाम यस्य तादृशो महेभ्य इभप्रमाणं धनमस्तीति इभ्यस्ततोऽप्यधिकद्रव्यो महेभ्यो व्यवहारी व्यवहर्तुम्। 'जहालहोतहालोहो लहो लोहो पवड्ढई' इति वचनात्। अधिकधनाकाङ्क्षया व्यापारं कर्तुमब्धिमध्याध्वना समुद्रान्तरालयायिना मार्गेण प्रास्थित प्रस्थितवान्। समुद्रे यानपात्रे चटति स्मेत्यर्थः। उत्प्रेक्ष्यते—इति किं वितर्क्य विचारयित्वेव। इति किम्। यदत्राम्भोधेर्जलधेर्वारिराशेः पुत्री नन्दना लक्ष्मीः क्वास्ति कुत्र विद्यते निभाल्य सम्यङ्गिरीक्ष्य तां समुद्रसुतां श्रियमहं गृह्णामि ॥

શ્લોકાર્થ

કોઈ 'સાગર' નામના શ્રેષ્ઠિએ વ્યાપાર કરવા માટે સમુદ્રમાર્ગે પ્રયાણ કર્યું હતું, તે જાણે 'સમુદ્રની પુત્રી લક્ષ્મી ક્યાં છે, તેને શોધીને હું ગ્રહણ કરું !' આ પ્રમાણે વિચારીને જાણે સમુદ્રમાર્ગે પ્રયાણ કર્યું ન હોય ! ॥ ૩૩ ॥

दुर्दैवयोगाज्जलधौ ः जजृम्भे तदा कुतश्चिज्जलदस्तमोवत् ।
चिखेल योषेव तडित्तदङ्के जगर्ज मत्तेभ इवोत्कटं सः ॥ ३४ ॥

तदा तस्मिन् सागरव्यवहारिणः वारिधिमध्यगमनसमये दुर्दैवयोगादभाग्योदयात् प्रभावाज्जलधौ पयोधेरुपरि गगनभागे जलदोऽतिप्रबलपयोधरः कुतश्चित्कस्माच्चन स्थानादागत्य जजृम्भे नभोमण्डले परितः प्रससार । किंवत् । तमोवत् यथान्धकारं कुतश्चिद्गिरिगह्वरादिभ्य आगत्य जृम्भति द्यावाभूम्योः प्रसरति । पुनस्तस्य जलदस्याङ्के उत्सङ्गे मध्ये इत्यर्थः । तडिद्विद्युच्चिखेल चिक्रीड चमत्कारं कुरुते स्म । केव । योषेव । यथा वाणिनी नायिका स्वनायकाङ्के वैलायति । पुनः स जलदो मत्तेभ इव । वारुणीयायिमदोद्धतीभूतनूतगन्धसिन्धुर इव उत्कटं कर्णकटुकं यथा स्यात्तथा भैरवं जगर्ज गर्जारवं चकार ॥

श्लोकार्थ

તે વખતે દુર્ભાગ્યવશાત્ સમુદ્રમાં ભયંકર તોફાન થયું અને સ્ત્રીઓની જેમ વીજળીઓના વિલાસો થયા તેમજ મદોન્મત્ત હાથીની જેમ મેઘની ભયંકર ગર્જનાઓ સાથે વર્ષા થવા લાગી. ॥ ૩૪ ॥

ततोऽहिकान्तः परिवर्तवात इव प्रवृत्तः परितः पयोधौ ।
कपोतपोता इव तस्य पोता निपेतुरुत्पत्य नभस्यधस्तात् ॥ ३५॥

ततः प्रबलपयोधिपटलप्रसरणानन्तरं परिवर्तवातः कल्पान्तकालसंबन्धी समीरण इव । 'कल्पो युगान्तः कल्पान्तः संहारः प्रलयः क्षयः । संवर्तः परिवर्तश्च' इति हैम्याम् । अहिकान्तः प्रचण्डपवनः । 'वातोऽहिकान्तपवमानमरुत्प्रकम्पनाः' इत्यपि हैम्याम् । परितः समुद्रमध्ये सर्वत्र प्रवृत्तः प्रवर्तते स्म । प्रसरति स्मेत्यर्थः । ततः पवनप्रवृत्तेरनन्तरं तस्य सागरव्यवहारिणः पोता वहनानि नभसि उत्पत्य अत्युद्धटविकटप्रभञ्जनवंहिमरंहःसंदोहोच्छालितानि गगनाङ्गणान्तरुड्डीयोड्डीय अधस्तात्पुनः पयोधिमध्ये निपेतुः पतन्ति स्म । के इव । कपोतपोता इव । यथा पारावतपृथुका व्योमन्युड्डीयाधस्ताद्धरणीपीठे निपतन्ति ॥

श्लोकार्थ

ત્યારે સમુદ્રમાં કલ્પાંતકાળના પવનની જેમ ચારે બાજુ પ્રચંડ પવન પ્રગટ થયો, તેથી પારેવાંનાં બાળકોની જેમ યાનપાત્રો આકાશમાં ઊડી ઊડીને નીચે પડવા લાગ્યાં. ॥ ૩૫ ॥

रङ्गत्तरङ्गावलिरम्बुराशेरालम्बमानाम्बरमम्बुपूरैः ।
राजी गिरीणामिव तुङ्गिमानमाबिभ्रती प्रादुरभूत्तदानीम् ॥ ३६ ॥

तदानीं निखिलाम्बरमण्डलाखण्डाडम्बरितदुर्धरवारिधराविर्भवनादनुपरितः प्रवृत्त-परिवर्तप्रमानसमानामानाकाण्डप्रकटीभवत्प्रचण्डपवनप्रसरणसमये अम्बुराशेः समुद्रस्य रङ्गन्ती दशदिग्विभागेषु प्रचलन्ती तरङ्गाणां कल्लोलानामावलिः श्रेणिः प्रादुरभवत्प्रकटीभवति स्म । किं कुर्वाणा । अम्बुपूरैः पयःप्लवैः । जलभरैरित्यर्थः । कृत्वा अम्बरमाकाशमालम्बमाना आश्रयन्ती । प्रौढा पवनप्रोच्छलज्जलकल्लोलैर्जलधिव्योममण्डलावेकीभूताविव लक्ष्येते । किं कुर्वती तरङ्गावलिः । गिरीणां राजिः पर्वतानां पङ्क्तिरिव तुङ्गिमानमत्युच्चभावमाबिभ्रती धारयन्ती ॥

श्लोकार्थ

તે અવસરે સમુદ્રમાં પાણીના પૂર વડે આકાશમાર્ગનું અવલંબન કરતા ઊંચા ઊંચા પર્વતો જેવા ભયંકર જલતરંગો પ્રગટ થયા. ॥ ૩૬ ॥

पाठीनपीठाण्डजनक्रचक्रकुम्भीरपुञ्जैः प्रकटीभवद्भिः ।
वन्यैरिवारण्यमगण्यहिंस्रैर्भयानकोऽम्भोधिरभूत्तदास्य ॥ ३७ ॥

तदा तस्मिन्मेघागमप्रक्रमे तस्य सागरमहेभ्यस्य अम्भोधिः समुद्रो भयानको भयंकरो बभूव । कैः । प्रकटीभवद्भिः दृग्गोचरीभवद्भिः दृग्गोचरमागच्छद्भिः पाठीनपीठा मत्स्यविशेषा अण्डजाः सामान्यमत्स्याः नक्राश्चक्रास्तथा कुम्भीराणां पुञ्जा व्रजा मकरजातिविशेषास्तैः कृत्वा भीमम् । किमिव । अरण्यमिव । यथा वन्यैः काननजन्मभिः अगण्यैर्गणयितुमशक्यैर्गणनातीतैर्हिंस्रैः हिंसनशीलैः श्वापदैर्व्याघ्रसिंहाष्टापदादिकैर्जन्तुघातकसंततिभिरटवी भयकारिणी भवेत् ॥ इति जलदोदयः ॥

श्लोकार्थ

જેમ હિંસક અને શિકારી પશુઓથી જંગલ ભયાનક લાગે તેમ દ્રષ્ટિગોચર થતા મગરમચ્છો, સામાન્ય મત્સ્યો, નક્રચક્ર અને જલહસ્તિઓથી સાગરશ્રેષ્ઠિના માટે સમુદ્ર ભયાનક બની ગયો. ॥ ૩૭ ॥

क्रोधोद्धतं व्यालमिवोपयान्तं प्रकोपितं दुष्टमिवाथ चण्डम् ।
स सागरो भैरवसागरं तं द्रष्टुं न दृष्ट्यापि तदा शशाक ॥ ३८ ॥

स यानपात्रेण समुद्रमध्ये समेतः सागरनामा व्यवहारी यदा यस्मिन् समये तं स्फुरदमन्दमेदुरमुदिरमण्डलाकलितं प्रचण्डप्रभञ्जनप्रक्षुभ्यत्तयःप्रसरत्प्रतिदिगन्ततुङ्गतरङ्गभरं भैरवं भयावहं सागरं समुद्रं दृष्ट्यापि लोचनेनापि द्रष्टुं विलोकयितुं न शशाक नैव समर्थीबभूव । कमिव । व्यालमिव । यथा क्रोधेन कोपाटोपेन कृत्वा उद्धतमुत्कटं सुभटकोट्यापि कलयितुमाक्रमितुमशक्यं तथा उपयान्तं संमुखमागच्छन्तं व्यालं दुष्टगजं 'धुंनी' इति प्रसिद्धम् । अथ वा पूर्वोक्तविशेषणविशिष्टं गारुडिकैरपि कलयितुमशक्यं दुष्टसर्पमिव । अथ वा वन्यजीवैराक्रमितुमशक्यं श्वापदमिव । अथ वा चित्रकव्याघ्रादिभिरनाक्रमणीयं कण्ठीरवमिव । अथ वा गन्धसिन्धुरादिभिरनाकलनीयं शरभमिव । 'व्यालो दुष्टगजे सर्पे खले श्वापदसिंहयोः' इत्यनेकार्थः । अथ पुनः कमिव । प्रकोपितं केनापि प्रकारेण प्रकोपितं महाकोपं प्रापितम् । तथा चण्डं दुष्टाशयं दुर्दान्तिनं वा दुष्टं दुर्जनमिव ॥

श्लोकार्थ

સામે આવતા ક્રોધાતુર બનેલા મદોન્મત્ત હાથીની જેમ, અથવા દુષ્ટ સર્પની જેમ અથવા ક્રોધાતુર બનેલા દુર્જનની જેમ ભયંકર સાગર સાગરશ્રેષ્ઠિને જોવા માટે પણ દુઃશક્ય બની ગયો. અર્થાત્ તે અવસરે સમુદ્ર દુરાવલોકનીય બની ગયો. ॥ ૩૮ ॥

संवर्तवत्तत्र तदा स्वपोतलोकक्षयं प्रेक्षितुमक्षमः सन् ।
विलासवाप्यामिव वार्धिमध्ये यावत्स झम्पां प्रगुणः प्रदत्ते ॥ ३९ ॥

स सागरश्रेष्ठी यावत् यावत्प्रमाणेन समयेन प्रगुण उत्साहवान् सन् वस्त्राधञ्चलसंवरणेन बद्धकच्छो वा वार्धिमध्ये समुद्रान्तः झम्पां संपातपाटवम् । जले निपतनमित्यर्थः । प्रदत्ते । कस्यामिव । विलासवाप्यामिव । यथा कश्चिज्जलकेलिकरणप्रवणः क्रीडादीर्घिकायां झम्पां दत्ते । किंभूतः सन् समुद्रसलिले पतति । तदा तस्मिन्नेवोत्पातसमये तत्र क्षुब्धपयोधिमध्ये संवर्तवत्कल्पान्तकाल इव स्वपोतलोकानां जिनयात्रारूढानेकसांयात्रिकजनानां क्षयं संहारं प्रेक्षितुं स्वयमालोकितुमक्षमः असमर्थः सन् । मया कथं कथंचिन्मद्यानपात्रमध्येऽधिरोपिता एतावन्तो लोका एककालं प्रलयं लप्स्यन्ते । तदेतेषां मदाश्रितानां लोकानां क्षयमहमात्मदृष्ट्या द्रष्टुं नालमिति तत्प्रथममेव मर्तुकामो वारिजलधौ झम्पां प्रदत्ते इत्यर्थः ॥ इति सागरस्य सागरे पिपतिषा ॥

શ્લોકાર્થ

તે વખતે કલ્પાંતકાળની જેમ ક્ષુબ્ધ બનેલા સમુદ્રમાં પોતાનાં વહાણો અને તેમાં રહેલા માણસોનો નાશ થતો જોઈને 'અરે, મારાથી આ બધાંનો નાશ થતો કેવી રીતે જોવાશે !' આ પ્રમાણે તે સર્વેનો નાશ થતો જોવા માટે અસમર્થ સાગરશ્રેષ્ઠિ, જેમ જલક્રીડાના રસિકો વાવ-સરોવર આદિમાં ઝંપાપાત કરે તેમ સમુદ્રમાં ઝંપાપાત કરવા માટે તૈયાર થયો, તેટલામાં — ॥ ૩૯ ॥

कृष्टेव तद्भाग्यभरैस्तदाविर्भूयाभ्रमार्गेऽब्धिगभीररावा ।
पद्मावती वाचमिमामुवाच मा वत्स कार्षीरिह साहसं त्वम् ॥ ४० ॥

तदा तस्मिन् सागरव्यवहारिणः सागरमध्ये पतनसमये अभ्राणां मेघानां मार्गे वर्त्मनि अभ्र एव मार्गे गगनाध्वनि वा आविर्भूय प्रकटीभूत्वा पद्मावती पार्श्वनाथशासनाधिष्ठायिका यक्षिणी धरणेन्द्राग्रमहिषी वा अनयोरन्यतरा वा इमां वक्ष्यमाणां वाचं वाणीमुवाच वदति स्म । किंभूता । अब्धिवज्जलधिधीरध्वनितमिव गभीरो गम्भीरो रावो ध्वनिर्यस्याः । उत्प्रेक्ष्यते—तद्भाग्यभरैः सागरव्यवहारिणा प्राचीनाचीर्णमहासुकृतसंदोहैरिवाकृष्टा वा आकृष्यानीतेवात्र । इमां काम् । हे वत्स हे पुत्र सागरमहेभ्य, इहागाधपयोधिमध्ये साहसं झम्पालक्षणम् अतलस्पृग्जलमध्यनिपतनरूपं सत्त्वं मा कार्षीः । मा इति निषेधे । सर्वथा मा कुर्वीथाः । चिरं जीव । 'मा कार्षीत्कोऽपि पापानि मा च भूत्कोऽपि दुःखितः' इति हेमाचार्यकृतयोगशास्त्रे ॥

શ્લોકાર્થ

સાગરશ્રેષ્ઠિના પૂર્વકૃત પુણ્યથી આકર્ષાઈને આવી ન હોય તેમ શ્રીપાર્શ્વનાથની અધિષ્ઠાધિકા દેવી પદ્માવતી આકાશમાં પ્રગટ થઈ, અને સાગર જેવા ગંભીર સ્વરે બોલી : 'હે વત્સ, તું સાહસ ન કર.' ॥ ૪૦ ॥

मध्येऽम्बुधेरस्ति समस्तदुःखपाथोधिमन्थावनिभृत्प्रभावम् ।
निधानमम्भोनिधिमेखलाया इवान्तरे पार्श्वजिनेन्द्रबिम्बम् ॥ ४१ ॥

हे वत्स, मध्येऽम्बुधेः समुद्रसलिलान्तराले पार्श्वजिनेन्द्रस्य बिम्बं मूर्तिरस्ति विद्यते । किमिव । निधानमिव । यथा अम्भोनिधिमेखलायाः समुद्रः काञ्चीरूपो वृत्ताकारः परितो-

वर्तित्वाधस्यास्तादृश्याः क्षोण्या अन्तरे मध्ये रूप्यसुवर्णमणिमाणिक्यमण्डितं निधानं भवति। किंलक्षणं बिम्बं निधानं च। समस्तानि ऐहिकामुष्मिकाणि दुःखानि सकलानि दौस्थ्य-भृत्यभावादीनि क्लेशानि। यदुक्तं भर्तृहरिकाव्ये—'सेवाधर्मः परमगहनो योगिनामप्यगम्यः' इति। परलोके देवादिषु परप्रेष्यभावो महद्दुःखं तान्येव बहुत्वात्पयोधिः पारावारस्तस्य मन्थने विलोडने मन्थानतिभृत मन्दरगिरिस्तत्तुल्यः प्रभावो माहात्म्यं यस्य तत ॥

श्लोकार्थ

'હે વત્સ, જેમ સમુદ્રની મધ્યમાં નિધાન હોય તેમ દુઃખોરૂપી સમુદ્રનું મંથન કરવામાં મેરૂસમાન જેનો પ્રભાવ છે, તે શ્રીપાર્શ્વનાથ ભગવાનની પ્રતિમા સમુદ્રની મધ્યમાં છે.' ॥ ४१ ॥

जलात्तदानाय्य जनैः प्रपूज्य संस्थापितं स्वे वहने धनेश ।
उत्तालवातूलमिवार्कतूलं विघ्नं पुरैतद्धरति त्वदीयम् ॥ ४२ ॥

हे धनेश धनपते व्यवहारिन्, जनैर्निजनाविकलोकैर्जलाज्जलधिसलिलात् आनाय्याकर्ष-यित्वा पुनः प्रपूज्य प्रकर्षेण चन्दनसुमकर्पूरागुरुभिरभ्यर्च्य तन्मयोक्तम् श्रीपार्श्वबिम्बं स्वे आत्मीये अर्थात्त्वत्संबन्धिनि वहने यानपात्रे संस्थापितं सत् एतत्प्रत्यक्षमविरलजलदपटल-प्रचण्डपवनवेगवहनोड्डयनप्रवर्तनरूपं त्वदीयं तव संबन्धिनं विघ्नं प्रत्यूहव्यूहमनिसर्गोद्र-तोपसर्गं पुरा हरति अवश्यं हरिष्यतीति। 'यावत्पुरानिपातयोर्योगे भविष्यदर्थे वर्तमाना' इति सूत्रेणात्र पुरा हरति इति हरिष्यतीत्यर्थः प्रयोगः। तथा 'पुरैदमूर्ध्वं भवतीति वेधसा पदं किमस्याङ्कितमूर्ध्वरेखया' इति नैषधे। किमिव। अर्कतूलमिव। यथा उत्तालवातूलं त्वरिततरं प्रवर्तमान एव मानसमूहोऽर्कतूलं हरति उड्डीय क्वचिदपि क्षिपति तथैतत्त्वद्विघ्नं हरिष्यति ॥

श्लोकार्थ

'શ્રેષ્ઠિ, તે શ્રીપાર્શ્વનાથ ભગવાનની મૂર્તિને સમુદ્રમાંથી તારા માણુસો દ્વારા બહાર કઢાવીને કેશરચંદન આદિથી પૂજન કરીને તારા યાનપાત્રમાં સ્થાપન કરીશ તો જેમ પ્રચંડ પવનથી આકડાનું રૂ ઊડી જાય તેમ તારાં સર્વ વિઘ્નો ક્ષણુમાત્રમાં નાશ પામી જશે.' ॥ ४२ ॥

मोद्धाटयेः स्वस्तरुपत्त्रपेटां संप्रापयेर्द्वीपपुरं पुनस्ताम् ।
परस्य पृथ्व्या इव वासवस्य तत्राजयोर्वीशितुरर्पयेस्त्वम् ॥ ४३ ॥

हे वत्स हे सागरव्यवहारिन्, मयोक्तां पयोधिपयोमध्यवर्तिनीं स्वस्तरोः कल्पद्रुमस्य पत्राणां दलानाम् । स्वर्द्रुमपर्णैर्निर्मितामित्यर्थः । पेटां मञ्जुषां मोद्घाटयेः त्वं माविकाशी-कुर्याः । 'तुं म उघाडीश' इति लोकभाषा । पुनस्तां कल्पपादपपत्रपेटां द्वीपनाम्नि पुरे नगरे संप्रापयेः अनुद्घाटितद्वारकपाटामेव एनां द्वीपबन्दिरे त्व नयेः । गृहीत्वा यायाः इत्यर्थः । पुनस्तत्र द्वीपपुरे अर्थाद्दिग्जैत्रयात्रार्थं समेतस्याजयनाम्न उर्वीशितुः पृथ्वीपतेः राज्ञः अग्रे विश्राणयेः दद्याः । उत्प्रेक्ष्यते—पृथ्व्या भूमेः परस्य अन्यस्य वासवस्य पुरंदरस्येव एकः स्वर्गवासवो वर्तते अयमन्यो मेदिन्या वासव इव ॥

श्लोकार्थ

'हे वत्स, जेमां श्रीपार्श्वनाथ भगवाननी मूर्ति छे ते कल्पवृक्षनां पांदडांनी पेटी प्राप्त कर, परंतु ते पेटी उघाडीश नहीं, अने दीवबंदरमां दिग्विजय करवा माटे आवेला पृथ्वीना साक्षात् इन्द्र होय तेवा अजयपाळ राजाने अर्पण करजे.' ॥ ४३ ॥

उद्घाटय पेटां प्रकटां प्रणीय चित्रादिवल्लीमिव पार्श्वमूर्तिम् ।
छिनत्त्विदं स्नात्रजलाभिषेकाञ्शतं ससप्तोत्तरमङ्गरोगान् ॥ ४४ ॥

हे सागरेभ्य, अजयो नाम राजा इदं स्नात्रस्य अस्याः श्रीपार्श्वनाथमूर्तेः स्नात्रस्य स्नपनस्य जलस्य सलिलस्याभिषेकान्सिञ्चनान्सप्तसंख्या उत्तरे अग्रे यस्य तादृशं शतमेतावता सप्तोत्तरं शतमङ्गरोगान् स्वशरीरामयान् छिनत्तु निराकरोतु । 'स दिशः सकला जिष्णु-र्जयन्प्राग्भावकर्मणा । सप्तोत्तरशतेनाथ व्याधिना परिपीडितः ॥ आक्रामन्निति भूपालान् बलात्सौराष्ट्रमण्डलम् । क्रमात्प्रापद्खण्डाक्षखिण्डावनिमण्डनः ॥' इति शत्रुंजयमाहात्म्ये । किं कृत्वा । पेटां कल्पद्रुदलमण्डलघटितां मञ्जूषामुद्घाट्य द्राग्द्वयं विकाशीकृत्य । अपा-वृतद्वारां विधायेत्यर्थः । पुनश्चित्रमिति पदमादौ यस्यास्तादृशीं वल्लीमिव चित्रकवल्लीमिव 'चित्रावेलि' इति प्रसिद्धां द्रव्याद्यक्षयकारिकां पार्श्वमूर्तिं श्रीपार्श्वनाथप्रतिमां प्रकटां लोचन-गोचरां प्रणीय कृत्वा ॥ इति पञ्चाघत्यादेशः ॥

श्लोकार्थ

'हे सागरश्रेष्ठि, अजयराजा पेटी उघाडीने तेमां रहेली साक्षात् चित्रावेल समान श्रीपार्श्वप्रभुनी प्रतिमानां दर्शन करशे. ते मूर्तिना स्नात्रजलना सिंचनथी अजय राजाना शरीरमां रहेला एकसो ने सात रोगो दूर थशे.' आ प्रमाणे कहीने देवी अदृश्य थई गई. ॥ ४४ ॥

आसादितप्राणितवत्पुनः स्वं विदन्निशम्येति गिरं त्रिदश्याः ।
आनाययन्नीरधिनीरमध्याज्जनैः स्वपोते जिनमूर्तिपेटाम् ॥ ४५ ॥

स सागरव्यवहारी जनैः स्वनाविकलोकैः नीरधिनीरमध्यात्समुद्रसलिलान्तरालाज्जिनमूर्तिपेटां त्रयोविंशतितमभगवत्प्रतिमापवित्रितमध्यमञ्जूषां स्वपोते स्वयानपात्रमध्ये आनाययत्। किं कृत्वा । निशम्य श्रुत्वा । काम् । त्रिदश्या पद्मावत्या देवतायाः गिरं वाणीम्। स सागरः किं कुर्वन् । पुनर्द्वितीयवारमासादितं संप्राप्तं प्राणितं जीवितव्यं येन तद्वत्स्वमात्मानं विदन् जानन् ॥

श्लोकार्थ

જાણે ફરીથી નવજીવન પ્રાપ્ત કર્યું હોય તેમ પોતાની જાતને ધન્ય માનતા સાગરશ્રેષ્ઠિએ દેવી પદ્માવતીના વચનથી પોતાના માણસો દ્વારા જિનમૂર્તિની પેટી સમુદ્રમાંથી બહાર કઢાવી અને પોતાના વહાણમાં મગાવી લીધી. ત્યાર બાદ તરત જ સમુદ્ર શાંત થઈ ગયો. ॥ ૪૫ ॥

क्षणाददृश्योऽभवदिन्द्रजालमिवोपसर्गोऽथ प्रभोः प्रभावात् ।
चमत्कृतस्तत्प्रविलोक्य पेटामभ्यर्च्य भोगादि पुरो व्यधत्त ॥ ४६ ॥

अथ पोते पार्श्वनाथप्रतिमासमागमनानन्तरमुपसर्गो गर्जोर्जिततडिज्झात्कारितनूतजीमूतवातादिजनितोपद्रवः क्षणात्क्षणमात्राददृश्यो दृग्गोचरातीतः क्षणदृष्टनष्टः अजनिष्ट। कस्मात्प्रभोः प्रभावात् श्रीमत्पार्श्वनाथमाहात्म्यातिशयात् । किमिव। इन्द्रजालमिव। यथा कुहकं क्षणाददृश्यीभावं भजेत । 'इन्द्रजालं तु कुहकम' इति हैम्याम । स सागरधनी पेटां पार्श्वनाथप्रतिमासत्कमञ्जूषां चन्दनमृगमदघनसारादिभिरभ्यर्च्य पूजयित्वा पुरः पेटाया अग्रे भोगादि कृष्णागुरुकुन्दरुष्कतुरुष्काद्युत्क्षेपणमादिशब्दाद्बलिमाकुलादिकं च व्यधत्त विदधाति स्म। कृतवानित्यर्थः। स किंलक्षणः। चमत्कृतः जलदानिलाद्युपसर्गविलयादि विलोक्य स्वहृदये विस्मितः ॥ इत्यकाण्डोद्भूतोपसर्गप्रशरनम् ॥

श्लोकार्थ

પાર્શ્વનાથ ભગવાનની મૂર્તિના પ્રભાવથી સર્વપ્રકારના ઉપસર્ગો ઇન્દ્રજાળની જેમ અદૃશ્ય થઈ ગયા, તે જોઈને આશ્ચર્યચકિત બનેલા સાગરશ્રેષ્ઠિએ પેટીનું કેશરચંદન વડે પૂજન કરીને તેની આગળ કૃષ્ણાગુરુ ધૂપઘટા પ્રગટાવી. ॥ ૪૬ ॥

ततोऽनुकूलैः पवनैः पयोनिधौ प्रवर्तितस्तद्व्यवहारिपोतः ।
मत्तद्विपः सादिभिरध्वनीवालानं सुखं द्वीपपुरं प्रपेदे ॥ ४७ ॥

ततो विघ्नापगमनानन्तरं तद्व्यवहारिपोतः तस्य सागरनाम्नो व्यवहारिणो महेभ्यस्य पोतो यानपात्रं सुखं यथा स्यात्तथा द्वीपपुरं द्वीपनामनगरं प्रपेदे प्राप प्राप्तः द्वीपबन्दिरे सुखेनागतः । किंलक्षणः पोतः । पयोनिधौ स्वस्थीभूते समुद्रे अनुकूलैः सुखप्रवृत्तिकारिभिः पवनैर्वातैः प्रवर्तितः प्रेरितः । 'प्रेरणं प्रवर्तनम् । तत्र तुबादयः' इति सारस्वतव्याकरणम् । क इव । मत्तद्विप इव । यथा मदोद्धतो हस्ती सादिभिराधोरणैः अध्वनि मार्गे प्रवर्तितः सुखमालानं प्रपद्यते ॥

શ્લોકાર્થ

જેમ મહાવતો વડે પ્રેરાયેલો મદોન્મત્ત હાથી આલાનસ્તંભને સુખપૂર્વક પ્રાપ્ત કરે તેમ સમુદ્રમાં અનુકૂળ પવન વડે પ્રેરાયેલું સાગરશ્રેષ્ઠિનું વહાણ દીવબંદરે સુખપૂર્વક આવી પહોંચ્યું. ॥ ४७ ॥

उत्तीर्य तर्यीश्च बलिं विकीर्याप्येतामुपादाय सुतामिवाब्धेः ।
इहाह्वयन्किं हरितां महेन्द्रान्पार्श्वं प्रणन्तुं घनतूररावैः ॥ ४८ ॥

भजन्नृपाभ्यर्णमथार्णवीयं वस्तूपदीकृत्य निवेद्य वृत्तम् ।
पेटां डुढौके स्म पुरः क्षितीन्दोः रुजां चिकित्सामिव तां द्विधापि ॥ ४९ ॥

अथ द्वीपबन्दिरे समागमनानन्तरं स सागर आढ्यः क्षितीन्दोरजयगतीराजनिजानेः पुरः पुरस्तादग्रे पेटां कल्पपादपपूर्णनिर्मितां मञ्जूषां डुढौके प्राभृतीचकार । उत्प्रेक्ष्यते—द्विधापि द्वाभ्यां बाह्यान्तरङ्गलक्षणाभ्यामपि रुजामन्तरङ्गरोगाणामष्टकर्मणां बाह्यरोगाणां ज्वरादीनां चिकित्सां रुक्प्रतिक्रियामिव रोगापहारिणी औषधादिविधा । किं कृत्वा डुढौके । आर्णवीयमर्णवसंबन्धि पयोधिमध्यगतद्वीपोत्पन्नं वस्तु समुद्रान्तजातं च वस्तु मुक्ताफलादिकमुपदीकृत्य ढौकयित्वा । च पुनः वृत्तं पद्मावतीप्रकाशितश्रीपार्श्वप्रतिमाया यानपात्रान्तरानयनानन्तरं स्वोपसर्गगमनादिचरित्रं निवेद्य कथयित्वा । सागरः किं कुर्वन् । नृपाभ्यर्णमजयराजसमीपं भजन्नाश्रयन् । कैः । घनतूररावैः घनानामनेकजातीयानां तूराणां वादित्राणां रावैः शब्दैः । अथ वा शब्दाद्वैतीभावं विदधानैः सान्द्रैरातोद्यनादैः । उत्प्रेक्ष्यते—विविधवाद्यनादैरिह

श्रीपवन्दिरे पार्श्वे प्रणन्तुं भविष्यद्भयाभिधानपार्श्वनाथप्रतिमां नमस्कर्तुम् हरितां महेन्द्रान्दशदिक्पालकान् किमाह्वयन्नाकारयन्निव नृपान्तिकं श्रयन् । किं कृत्वा । तर्या वेडाया उत्तीर्य स्वयानपात्रादवतुह्य तीरभूमावागत्य । पुनर्बलिं दशदिक्षु कूरपूपिकाचणककुल्माषादिकं विकीर्य क्षिप्त्वा । अपि पुनरेतां पद्मावत्याः पूर्वं नृपार्थं प्रकाश्य प्रेषितां मञ्जूषामुपादाय गृहीत्वा । उत्प्रेक्ष्यते—अब्धेः समुद्रस्य सुतां नन्दिनीं लक्ष्मीमिवादाय ॥

श्लोकार्थ

ત્યાર પછી સાગરશ્રેષ્ઠિએ વહાણમાંથી ઊતરીને, સર્વ દિશાઓમાં બલિબાકળાને પ્રક્ષેપ કરીને, સમુદ્રપુત્રી લક્ષ્મીની જેમ પેટી લઈને મંગલવાજિંત્રોના નાદપૂર્વક (વાજિંત્રોના નાદથી જાણે દિક્પાળોને શ્રીપાર્શ્વનાથપ્રભુનાં દર્શન માટે બોલાવતા ન હોય!) રાજાની પાસે આવીને, મણિરત્નોનું ભેટણું ધરીને, સમુદ્રમાં થયેલું તોફાન અને પદ્માવતીદેવીએ કહ્યા મુજબનો સર્વ વૃત્તાંત નિવેદન કરીને, અજયરાજાની આગળ તે પેટી ભેટ ધરી. તે જાણે અજયરાજાના બાહ્ય અભ્યંતર રોગોને દૂર કરવા માટેની વિશિષ્ઠ ઔષધિ ન હોય! ॥ ૪૮ ॥ ૪૯ ॥

प्रणीय पूजां क्षितिपेन पूर्वं प्रोद्घाटितायाः प्रमदेन तस्याः ।
पार्श्वप्रभुः प्रादुरभूत्तमोभिद्भास्वानिव प्राग्गिरिकंदरायाः ॥ ५० ॥

तस्याः पेटायाः । पञ्चमीप्रयोगः । मञ्जूषामध्यात्पार्श्वप्रभुः श्रीपार्श्वस्वामिनः प्रतिमा प्रादुरभूत्प्रकटीभवति स्म । क इव । भास्वानिव । यथा प्राग्गिरिकंदरायाः पूर्वपर्वतगुहामध्यात् भास्करः प्रकटीभवति । किंभूतः । तमोभित् तमोऽज्ञानं पापं वा अन्धकारं च भिनत्ति विदारयति इति । तस्याः किंभूतायाः । क्षितिपेनाजयपृथ्वीपतिना प्रमदेन रोगविनाशकोपायत्वाज्जाविभगवद्बिम्बत्वात्महानन्दसंदोहपुलकितकाययष्टिना प्रोद्घाटितायाः स्वयमेव विकाशीकृतमनपिधानं विहितं वा द्वारं कपाटो वा यस्याः । किं कृत्वा । पूर्वं प्रथमं स्वयमात्मना चन्दनकर्पूरकस्तूरिकाकुसुमादिभिः कृष्णागुरुप्रमुखसुगन्धद्रव्योत्क्षेपपूर्वं पूजामर्चां प्रणीय विधाय ॥

श्लोकार्थ

આનંદિત બનેલા અજયરાજાએ બંધ પેટીનું કેશર–ચંદન–કપૂર આદિથી પૂજન કર્યું અને ધૂપ કર્યો, ત્યારે જેમ પૂર્વાચલની ગુફામાંથી અંધકારને ભેદનાર સૂર્ય પ્રગટ થાય તેમ પેટીમાંથી અજ્ઞાનરૂપી અંધકારને ભેદનાર શ્રીપાર્શ્વપ્રભુ સ્વયં પ્રગટ થયા. ॥ ૫૦ ॥

पार्श्वेशितुः स्नात्रजलाभिषेकात्कृतोऽजयोर्वीन्द्रतनूलतायाः ।
महामयोत्थः प्रशशाम तापो भूमेरिव ग्रीष्मभवोऽब्दवर्षात् ॥ ५१ ॥

ततो मञ्जूषामध्यात् श्रीपार्श्वनाथप्रतिमाप्रकटीभवनानन्तरं पार्श्वेशितुः पार्श्वप्रभुप्रतिमायाः स्नात्रजलस्य स्नपनसलिलस्य अभिषेकात्सिञ्चनात् अजयो नामा उर्वीन्द्रः वसुधासुधानाधीशः तस्य तनूलतायाः वपुर्यष्टेर्महान्तोऽत्युत्कृष्टा ये आमया कुष्ठज्वरादयो रोगास्तेभ्य उत्था उत्थानं यस्य तादृशस्तापो निदाघज्वरः प्रशशाम शान्ति प्राप्नोति स्म । कस्या इव । भूमेरिव । यथा पृथिव्या ग्रीष्मान्निदाघऋतोर्भवो जनितः संतापः अब्दवर्षान्मेघवर्षणात्प्रशाम्यति ॥

श्लोकार्थ

ग्रीष्मकाळना तापथी संतप्त थयेली भूमि मेघवर्षाथी जेम शांत थाय तेम श्रीपार्श्वप्रभुना स्नात्रजलनुं सिंचन करवाथी अजयराजाना शरीरमां महारोगोथी उत्पन्न थयेलो दाहज्वर शांत थई गयो. ॥ ५१ ॥

महामहः कोऽपि महीहिमांशौ प्रावर्ततानामयतामवाप्ते ।
मेने जनो यत्र निजं प्रपन्नस्वःप्राज्यसाम्राज्यमिव प्रमोदात् ॥ ५२ ॥

महीहिमांशौ अजयाभिधानवसुधासुधाकरे अनामयतां नीरोगतां समाधिं अवाप्ते प्राप्ते सति कोऽप्यद्भुतवैभवो महामहः अर्थाज्जनानामत्युत्सवः प्रावर्तत संजायते स्म । यत्र यस्मिन्नतिशायिनि उत्सवे प्रवर्तमाने सति जनस्तदजयराजपरिजनसेवकलोकः प्रमोदान्निजमात्मनं प्रपन्नमासादितं स्वः स्वर्गस्य प्राज्यं प्रभूतं साम्राज्यं मण्डलीकपदलक्षणाधिपत्यं येन तादृशं मेने मन्यते स्म जानीते स्म ॥

श्लोकार्थ

अजयराजा निरोगी बनवाथी प्रजाजनोए अपूर्व महोत्सव उजव्यो, ते उत्सवमां प्रजाजनोए जाणे पोताने स्वर्गनुं साम्राज्य प्राप्त थयुं होय तेटलो आनंद अनुभव्यो. ॥ ५२ ॥

तदोपतापप्रकरैर्वियुक्तः साकेतनेताभ्यधिकं दिदीपे ।
घनात्ययन्यक्कृतनीरवाहोपरोधनिर्मुक्त इवामृतांशुः ॥ ५३ ॥

तदा न केवलं सेवकलोकानां प्रमोदः समजनि, अपि पुनः पार्श्वनाथस्नात्रजलाभिषिञ्चनानन्तरमुपतापानां कुष्ठज्वरादिसप्तोत्तरशतरोगाणां प्रकरैर्वृन्दैः वियुक्तो विरहितः । 'आम आमय आकल्पमुपतापो गदः समाः' इति हैम्याम् । साकेतस्य कोशलानगर्या अयोध्याराजधान्या नेता अधिपतिरजयनृपोऽपि अधिकमतिशायितया दिदीपे शोभते स्म । क इव । अमृतांशुरिव । यथा घनात्ययेन शरत्कालेन न्यक्कृतो विध्वस्तो निराकृतो निर्वासितो यो नीरवाहो मेघस्तस्योपरोधः संरोधनं तस्मान्निर्मुक्तः पृथग्भूतश्चन्द्र आश्विनपूर्णिमाकौमुदीपतिरधिकं दीप्यते ॥ इत्यजयराजस्य रोगोपशमः ॥

શ્લોકાર્થ

જેમ શરદઋતુ વડે તિરસ્કૃત બનેલા મેઘથી નિર્મુક્ત બનેલો ચન્દ્ર શોભે તેમ રોગોના સંતાપથી રહિત બનેલા કોશલાધિપતિ અજયરાજા કોઈ અપૂર્વ કાંતિ વડે શોભવા લાગ્યા ॥ ૫૩ ॥

ततोऽजयाख्यं नगरं निवास्य पुरीमयोध्यामपरामिवात्र ।
केनापि सिद्धायतनं सुरेण मुक्तं किमस्मिंश्च विधाप्य चैत्यम् ॥ ५४ ॥

संस्थाप्य तं तत्र जिनेन्द्रबिम्बं सिद्धिश्रिया वोपयमं स्वकीयम् ।
काङ्क्षन्निव द्वादशसूर्यतेजा दत्त्वार्चितुं द्वादश शासनानि ॥ ५५ ॥

भूमीभुजां शेखरयञ्छिरःसु स्वाज्ञां सुमानामिव मालिकां सः ।
स्वर्गीव नीरोगतनुः क्रमेण स्वां राजधानीं पुनरध्युवास ॥ ५६ ॥

ततो रोगापगमनानन्तरं सः अजयभूपालः पुनर्देशसाधनानन्तरं द्वितीयवारं स्वामात्मीयां तातसंबन्धिनीं राजधानीमयोध्यानाम्नीं नगरीमध्युवास आश्रयति स्म । केन । क्रमेण पूर्वपश्चिमदक्षिणोत्तरदिग्वर्तिदेशसाधनामनस्यपरिपाट्या । स किंभूतः । स्वर्गी देव इव नीरोगतनुर्विविधामयरहितशरीरः । स किं कुर्वन् । भूमीभुजां वैताढ्यभूधरपर्यन्तचतुर्दिग्भूपान्मलमण्डलानां शिरःसु मौलिषु सुमानां मालिकामिव स्वां स्वकीयामाज्ञां शासनं शेखरयन्नवतंसी कुर्वन् मुकुटमिवापादयन् । 'आपीडशेखरोत्तंसावतंसाः शिरसः स्रजि' इति हैमीवचनात् । किं कृत्वा राजधानीमधिवसति स्म । अत्र रोगनिर्मुक्तिस्थाने कूपसमीपे अजय इति स्वनामसमाना आख्या अभिधानं यस्य तादृशं नगरं महत्पुरं निवास्य वासयित्वा संस्थाप्य । उत्प्रेक्ष्यते—अपरामन्यां द्वितीयामयोध्यां कोशलापुरीमिव स्वकुलक्रमायातां साकेतनीनाम्नीं राजधानीमिव । 'साकेतं कोशलायोध्या' इति हैम्याम् । च पुनरस्मिन्नजयनामनगरे चैत्यं

श्रीपार्श्वनाथप्रासादं विधाप्य शिल्पिभिर्निर्माप्य। उत्प्रेक्ष्यते—केनानिर्दिष्टनाम्ना सुरेण देवेन अस्मिन्नजयपुरे मुक्तं कुतश्चित्प्रदेशात्स्वयमानीय संस्थापितं सिद्धायतनं शाश्वतजिनचैत्यमिव । पुनः किं कृत्वा । तत्र स्वनिर्मापितप्रासादे तं पद्मावतीप्रकटितमाहात्म्यं सागरमहेभ्यमहामहानीतपार्श्वनाथं संस्थाप्योपवेशयित्वा । उत्प्रेक्ष्यते—सिद्धिश्रिया मोक्षलक्ष्म्या समं स्वकीयमात्मसंबन्धिनमुपयमं विवाहमिव संस्थाप्य स्थापयित्वा । 'पाणिग्रहणमुद्वाह उपायामयमावपि' इति हैम्याम् । उपयाम उपयमाविति शब्दद्वयं पुनरर्चितुं श्रीअजयपार्श्वनाथप्रतिमां पूजयितुं द्वादशसंख्याकानि शासनानि श्रीमान् दत्त्वा स्वेनार्पयित्वा । 'दीयतां दशलक्षाणि शासनानि चतुर्दश। हस्तन्यस्तचतुःश्लोको यद्वा गच्छतु गच्छतु ॥' इति । अथ धूतकेशागतसिद्धसेनदिवाकरागमनसमये पत्र अदृष्ट पवैकश्लोकप्रेषणे विक्रमार्कदानपत्रे दानश्लोके दानम् । तत्र दशसौवर्णकलक्षाणि शासनानि ग्रामाश्च दत्ताः । उत्प्रेक्ष्यते—द्वादशानां सूर्याणां तेजः प्रताप काङ्क्षन् वाञ्छन्निव । तेजःशब्देन प्रतापोऽप्युच्यते । यथा नैषधे—'एतस्योत्तरमद्य नः समजनि त्वत्तेजसां लङ्घने–' 'त्वत्प्रतापानामतिक्रमेण' तद्वृत्तिः ॥ त्रिभिर्विशेषकम् ॥ इत्यजयराजरोगापहारकाजयपार्श्वनाथप्रस्तावनम् ॥

શ્લોકાર્થ

તે પછી દેવની જેમ નિરોગી શરીરવાળા અજયરાજાએ, જાણે બીજી અયોધ્યા ન હોય તેવી પોતાના નામથી 'અજયા' (અજારા) નગરી વસાવી તે નગરીમાં જિનચૈત્યનું નિર્માણ કરાવ્યું. જાણે કોઈ દેવ સિદ્ધાયતન–શાશ્વતજિનચૈત્ય લઈ આવ્યો ન હોય ! અને તેમાં, જાણે પોતાનો મુક્તિરૂપી સ્ત્રી સાથે વિવાહ ન હોય તેવા ઉત્સવપૂર્વક શ્રીપાર્શ્વપ્રભુની મૂર્તિનું સ્થાપન કર્યું. જાણે અજયરાજા બાર સૂર્યનો પ્રતાપ ઇચ્છતો ન હોય તેમ તે પ્રભુની પૂજા માટે બાર ગામ ભેટ કર્યાં. અને બીજા રાજાઓના મસ્તકે પોતાની આજ્ઞા શિરોધાર્ય કરાવી. ॥ ૫૪ ॥ ૫૫ ॥ ૫૬॥

नाम्नैव तस्यावनिवल्लभस्य पार्श्वप्रभोस्तस्य बभूव नाम ।
तद्वासितस्येव पुरस्य वाराणस्या इवैतस्य निवासभूमेः ॥५७॥

तस्यावनिवल्लभस्य तस्य पुर्वकथितस्याजयस्य राज्ञो नाम्नैवाभिधानेनैव पार्श्वप्रभोः श्रीपार्श्वनाथस्य नाम बभूव। अजयपार्श्वनाथ इति संजातम् । कस्येव । तेनाजयराजेन वासितस्य निवेशितस्य स्थापितस्य अजयपुरमिव । किंभूतस्य । अजयपार्श्वनाथस्य निवासभूमेः स्थितिस्थानकस्य । कस्या इव । वाराणस्या इव। यथा वाराणसी भगवतः श्रीपार्श्वनाथस्य जन्मभूमित्वाद्वासस्थानम् ॥ इति पाठान्तरम् ॥

શ્લોકાર્થ

શ્રીપાર્શ્વનાથ પ્રભુની જન્મભૂમિ વારાણસીનગરી જેમ રાજધાની છે તેમ અજયરાજાની રાજધાની અજયપુરના નામથી ભગવંતનું પણ 'અજયપાર્શ્વનાથ' એટલે 'અજારાપાર્શ્વનાથ' નામ પ્રસિદ્ધ થયું. ॥ ૫૭ ॥

ध्यातोऽधुनाप्येष पयोधिमध्ये प्रयाति वाते प्रतिकूलभावम् ।
निर्विघ्नयन्पोत इवाङ्गभाजः प्रभुः सुखं लम्भयति प्रतीरम् ॥ ५८ ॥

भो भव्याः, अधुनापि पञ्चमारके अस्मिन्कलौ प्रवर्तमानेऽपि वा पयोधिमध्ये जलधिजलान्तराले ध्यातोऽर्थाल्लोकैर्ध्यानगोचरीकृतः स्मृतोऽपि वा वाते प्रचण्डपवने प्रतिकूलभावं प्रतिकूलतां याति गच्छति सति एष प्रभुरजयपार्श्वनाथः अङ्गभाजः पा नाथस्मरणप्रवणाः प्राणिनः निर्गता विलयं प्राप्ता विघ्नाः प्रत्यूहा येभ्यस्ते निर्विघ्नान्करोतीति । 'तत्करोति तदाचष्टे' इति प्रक्रियासूत्रेण ञिः । 'ञिडित्करणे' इति सारस्वते इति सारस्वतसूत्रेण ञिप्रत्ययः निर्विघ्नयति निर्विघ्नयतीति निर्विघ्नयन् । विघ्नरहितान्कुर्वन्नित्यर्थः । निरन्तरायान् सृजन् सुखं यथा स्यात्तथा कुशलेनेत्यर्थः । प्रतीरं तटभूमौ स्वस्ववेलाकूलावनौ लम्भयति प्रापयति । क इव । पोत इव । यथा निर्वहनान्वोहित्थरहितांस्तथाम्भोधिमध्ये पतिताञ्जनान् यानपात्रे स्वस्मिन्नधिरोप्य सुखेन तीरं नयति ॥

શ્લોકાર્થ

જેમ અનુકૂળ પવનથી વહાણુ નિર્વિઘ્નપણે સમુદ્ર પાર કરે તેમ હે ભવ્ય જીવો, હજુ પણ સમુદ્રમાં વંટોળ આદિ તોફાનો થતાં જે મનુષ્ય શ્રીઅજયપાર્શ્વનાથનું નામસ્મરણ કરે છે તે મનુષ્ય સહેલાઈથી સમુદ્રને તરી જાય છે. ॥ ૫૮ ॥

बहूदितैः किं भवदीयभाग्यैरारोपितस्तेन महीधनेन ।
सुपर्वशाखीव समीहितानि यच्छंश्चिरं नन्दतु पार्श्वनाथः ॥ ५९ ॥

भो भव्याः, किं बहूदितैः बहुभिरनल्पैरुदितैः कथितैः किमस्तु । एषोऽजयपार्श्वनाथः वो युष्माकं समीहितानि सम्यगैहिकानि पुत्रकलत्रद्रविणादीनि आमुष्मिकाणि स्वर्गापवर्गादिकानि कामितानि मनोरथान् यच्छन् पूरयन् चिरं बहुसमयमाकल्पान्तकालं यावन्नन्द

विजयवान् प्रवर्तताम् । किंभूतः । तेन महीधनेनाजयराजेन आरोपितः स्थापितः । उत्प्रेक्ष्यते— भवदीयभाग्यैः युष्मत्संबन्धिभिः सुकृतैः सुपर्वशाखी कल्पवृक्ष इवारोपितः ॥ इत्यजयपार्श्वनाथ-प्रबन्धः । विस्तरतस्त्वेतद्व्यतिकरः शत्रुंजयमाहात्म्यादवसेयः ॥

श्लोकार्थ

હે ભવ્ય જીવો, વધુ શું કહેવું ? પરંતુ અજયપાળરાજાએ સ્થાપના કરેલા શ્રીઅજારા-પાર્શ્વનાથ તમારા મનોરથોને કલ્પવૃક્ષની જેમ પૂર્ણ કરતા ચીરકાળ જયવંતા વર્તો, તે પ્રભુ જાણે તમારાં પુણ્યથી આકર્ષાઈને આવેલું કલ્પવૃક્ષ ન હોય ! ॥ ૫૯ ॥

तत्रोपदिश्येति जनान्मुमुक्षुक्षोणीऋभुक्षा क्षणमक्षिलक्ष्यम् ।
प्रणीय नत्वा च तमात्मना तत्पुरं पवित्रीकृतवान्स तद्वत् ॥ ६० ॥

स हीरविजयनामा मुमुक्षूणां मुनीनां मध्ये क्षोण्या भूमेः ऋभुक्षा इन्द्रः । सूरीन्द्र इत्यर्थः । तद्वदजयपार्श्वनाथ इव तत्पुरमजयपुरमधुना तु अजारग्रामः ग्रामनाम्ना च 'अजारो-पार्श्वनाथ' इति प्रसिद्धिः । आत्मना स्वेनैव पवित्रीकृतवान् पावनीचकार । किं कृत्वा । तत्र चैत्ये बहिःप्रदेशवर्तिन्यां धर्मशालायां जनान् भविकलोकान् प्रति इति पूर्वोक्तप्रकारेण अजयपार्श्वागमनादिवृत्तमुपदिश्य उपदेशं देशनां दत्त्वा च पुनः क्षणं क्षणमात्रं तं जिन-मक्ष्णोर्दृशोर्लक्ष्यं गोचरं प्रणीय निर्माय पुनस्तं पार्श्वनाथं नत्वा प्रणम्य ॥

श्लोकार्थ

મુનીન્દ્ર શ્રીહીરવિજયસૂરિજીએ આ પ્રમાણે ધર્મદેશના આપી અને ફરીથી ક્ષણમાત્ર ભગવંતનાં દર્શન–નમસ્કાર કરીને અજારાપાર્શ્વનાથની જેમ તેઓએ પણ અજયપુર(અજારા)–ને પવિત્ર કર્યું. ॥ ૬૦ ॥

द्वीपस्य संघोऽप्यखिलो मुनीन्दोरभ्यागमत्तत्र सहाङ्गनाभिः ।
माहात्म्यमद्वैतमवेत्य तस्य शुश्रूषया लेखगणः किमेषः ॥ ६१ ॥

तत्राजयपुरे अङ्गनाभिः स्वकीयपरकीयपुरं पुरंध्रीभिः सह सार्धमखिलोऽपि समस्तोऽपि द्वीपस्य द्वीपबन्दिरस्य संघः श्रावकसमुदायो मुनीन्दोर्हीरविजयसूरेरभ्यागमत्संमुखमाजगाम ।

उत्प्रेक्ष्यते—तस्य सूरीशितुः अद्वैतमनन्यमसाधारणं माहात्म्यं वाङ्मनसगोचरातीतं महिमानमवेत्य विज्ञाय शुश्रूषया सेवां कर्तुमिच्छया एष संघरूपो लेखगणः सुरसमूहः समेतः समागत इव ॥

શ્લોકાર્થ

અજયપુરમાં સ્ત્રીઓ સહિત દીવબંદરનો સંઘ આચાર્યદેવની સામે આવ્યો. સૂરીશ્વરના અસાધારણ માહાત્મ્યને જાણીને તેઓની સેવા કરવા માટે જાણે દેવદેવીઓનો સમૂહ સામે આવ્યો ન હોય! ॥ ૬૧ ॥

लोकंपृणान्वीक्ष्य गुणान्गणेन्दोः प्रीता प्रणीयागणितात्ममूर्तीः ।
नम्रागतस्त्रैणमिषेण लक्ष्मीर्नमस्यती स्तौति च गायतीव ॥ ६२ ॥

गणेन्दोः सूरेर्लोकंपृणान्विश्वाह्लादकान् गुणान् शमदममार्दवार्जवसंयमनिष्ठत्वादिकान् वीक्ष्य स्वदृग्गोचरीकृत्य प्रीता संतुष्टचित्ता सती नम्रं नमनशीलं तथा आगतं भगवद्वन्दनार्थमायातं यत्स्त्रैणं स्त्रीणां समूहः सीमन्तिनीसमुदायस्तस्य मिषेण कपटेन अगणिता गणनातीता आत्मनः स्वस्य मूर्तीः शरीराणि प्रणीय लक्ष्मीर्जलधिनन्दना । उत्प्रेक्ष्यते—नमस्यतीव अर्थाद्गणधरं नमस्करोतीव । च पुनः स्तौतीव स्तुतिगोचरीकरोतीव । च पुनर्गायतीव गानविषयीकरोतीव । वार्धेः सामीप्यात्तन्नन्दनाया आगमनमुचितमेव । पितुः पार्श्वे कदाचिदुत्कण्ठिता पुत्री मिलनार्थमागच्छतीति समुद्रे श्रिया सद्भावोऽप्युचित एव ॥ इति द्वीपबन्दिरे संघागमनम् ॥

શ્લોકાર્થ

વિશ્વવિખ્યાત આચાર્યદેવના જગદાહ્‌લાદક ગુણોને જોઈને વંદન કરવા માટે આવેલી સ્ત્રીઓ અત્યંત ખુશ થઈ. તે સ્ત્રીઓનાં બ્હાને જાણે પોતાનાં અગણિત રૂપો બનાવીને સમુદ્રપુત્રી લક્ષ્મીદેવી આચાર્યદેવને નમસ્કાર કરતી હતી, સ્તુતિ કરતી હતી અને મંગલગીતો ગાતી હતી. ॥ ૬૨ ॥

ततः प्रतस्थे प्रभुरुन्नताख्यं पुरं प्रति प्रीतमना मुनीन्द्रः ।
मेघागमे मानसमभ्रमार्गवहाप्रवाहादिव राजहंसः ॥ ६३ ॥

ततो द्वीपोन्नतदेवलपाटकसत्कसंघसमागमनानन्तरं हीरविजयसूरिः ततोऽजयपुरादुन्नतमित्याख्या नाम यस्य तादृशं पुरं प्रति प्रतस्थे। उन्नतनगराभिमुखं प्रचलति स्म। किंभूतः। प्रभुः सर्वधर्मकार्यकरणप्रवणः समर्थः। पुनः किंभूतः। प्रीतमनाः श्रीपार्श्वनाथयात्रया कृत्वा हृष्टमानसः। क इव। राजहंस इव। यथा मेघागमे अभ्रमार्गो मेघाध्वा गगनम्। 'सुराभ्रोडुमरुत्पथोऽम्बरम्,' तथा 'अभ्रं धूमयोनिस्तनयित्नुमेघाः' इति द्वयमपि हैम्याम्। तस्य वहा नदी। गङ्गेत्यर्थः। 'सिद्धस्वःस्वर्गिखापगाः। ऋषिकुल्या हेमवती' इत्यपि हैम्याम्। तथा 'सिन्धुः शैवलिनी वहा च ह्रदिनी स्रोतस्विनी निम्नगा' इत्यपि हैम्याम्। तस्याः प्रवाहाद्गङ्गापयःपूरान्मानसं नाम राजहंसनिवाससरोवरं प्रति प्रतिष्ठते। यदुक्तम्—'मेघागमं दिवि विभाव्य परापगाम्भःपूरागमैर्जलमथाविलमभ्रसिन्धोः। भातीति चेतसि विचिन्त्य च हंसमाला स्वं मानसं प्रति ततस्त्वरितं प्रतस्थे॥' इति। तथा 'गङ्गानीरमपि त्यजन्ति कलुषं ते राजहंसा वयम्' इत्यपि सूक्ते॥

अथ द्वीपोन्नतपुरादिसंघसंमुखागमनवर्णनप्रस्तावः—

श्लोकार्थ

જેમ વર્ષાઋતુમાં રાજહંસ, ગંગાના પ્રવાહ સમાન નિર્મલ માનસરોવર તરફ પ્રયાણ કરે તેમ શ્રીઅજારાપાર્શ્વનાથનાં દર્શન કરીને જેઓનું મન ખુશ થયું છે તે, સમર્થ-આચાર્યદેવે 'ઊના' નગર તરફ પ્રયાણ કર્યું. ॥ ૬૩ ॥

शिरोधृतश्वेतसुवर्णकुम्भाः काश्चिल्लसन्ति स्म विलासवत्यः।
श्यामादिवालक्ष्म्य इवोद्वहन्त्यः संपूर्णचन्द्राम्बुजबन्धुबिम्बान्॥ ६४॥

हीरसूरेः संमुखागमने काश्चिदनिर्दिष्टनामानः विलासवत्यः विलासो हंसहस्तिगमनादिकः शृङ्गारादिविभ्रमो वा विद्यते यासां ता लीलावत्यो वनिता लसन्ति शोभन्ते। किंभूताः। शिरसि स्वमौलौ धृता आरोपिताः श्वेता उज्ज्वलास्तथा सु शोभनो वर्णो येषाम्। अथ वा श्वेतानां रूप्याणाम्। 'स्याद्रूप्यं कलधौततारजतश्वेतानि' इति हैम्याम्। तथा सुवर्णानां काञ्चनानां कुम्भाः कलशा याभिस्ताः। उत्प्रेक्ष्यते—श्यामादिवालक्ष्म्य इव रजनीदिवसस्य श्रिय इव। किं कुर्वन्त्यः। उद्वहन्त्यः बिभ्रत्यः। कान्। संपूर्णा अखण्डाश्चन्द्रास्तथा अम्बुजबन्धवो भास्करास्तेषां बिम्बान्मण्डलान्। अखण्डचन्द्रमण्डलानादाय निशाश्रियः सूर्यमण्डलान् गृहीत्वा दिवसलक्ष्म्य इव भगवत्संमुखं समेता इत्यर्थः॥

શ્લોકાર્થ

મસ્તકે રૂપ્યમય અને સુવર્ણમય કુંભો ધારણ કરીને આચાર્યદેવની સન્મુખ આવેલી વિલાસવંતી સ્ત્રીઓ શોભતી હતી, તે જાણે સંપૂર્ણ ચન્દ્ર અને સૂર્યનાં બિંબોને ધારણ કરીને સન્મુખ આવેલી રાત્રિ અને દિવસની શોભા ન હોય ! ॥ ૬૪ ॥

अवाकिरन्काश्चन मुक्तिकाभिरभ्येत्य वाचंयमसार्वभौमम् ।
क्षीरोर्मयो मेरुमिव प्रमाथकालोच्छलद्भूरिपयःपृषद्भिः ॥ ६५ ॥

अभ्येत्य संमुखमागत्य काश्चन संघमध्यात्कियत्यः तं हीरविजयनामानं वाचंयमानां साधूनां सार्वभौमं चक्रवर्तिनं मुक्तिकाभिर्लघुमुक्ताफलैः । 'सिता वमन्त्यः खलु कीर्तिमुक्तिकाः' इति नैषधे । का इव । क्षीरोर्मय इव । यथा क्षीरसमुद्रवीचयः प्रकर्षेण सुरासुरादिभिः सर्वौजसा माथस्य मथनस्य काले समये उच्छलद्भिः उच्चैरुत्पतद्भिः तथा भूरिभिरनल्पैः पयःपृषद्भिः जलकणैर्मेरुं काञ्चनाचलम् । किं च परसमये मन्दरशब्देन मेरुर्नोच्यते किं तु मन्दरशब्देन इन्द्रकीलनामा शैलः । जैनमते तु मन्दरो मेरुरेव । मन्दरनामगिरिं वर्धयन्ति ॥

શ્લોકાર્થ

સમુદ્રનું મંથન કરતાં ક્ષીરસમુદ્રના ઊછળતા તરંગોનાં જલબિંદુઓ જેમ મેરૂપર્વતને વધાવે તેમ કેટલીક સ્ત્રીઓ સામે આવીને સૂરિચક્રવર્તીને સાચાં મોતીઓ વડે વધાવતી હતી. ॥ ૬૫ ॥

मुक्ताफलैः काश्चिदवाकिरंस्तं नवोपयन्तारमिवात्र लाजैः ।
सिद्धाद्रियात्रोद्भवपुण्यलक्ष्म्या नवोढयालंक्रियमाणपार्श्वः ॥ ६६ ॥

काश्चिदपराः सीमन्तिन्यः तं सूरिम् अत्र संघसंमुखागमनसमये मुक्ताफलैर्मौक्तिकैः अवाकिरन् वर्धयन्ति स्म । कमिव । नवोपयन्तारमिव । यथा अत्र भूमिभुवने देवलोके नागलोके देवासुराणां परिणयनाभावाद्भुवो ग्रहणम् । सद्यस्कपरिणेतारं वरं पुमांसं काश्चित्तद्वर्गसंबन्धिन्यो वर्णिन्यः लाजैरक्षतैर्वर्धयन्ति । किंभूतः सूरिः वरश्च । सिद्धाद्रेः शत्रुंजयशैलस्य यात्राया दर्शनस्पर्शनभावार्चाया उद्भव उत्पत्तिर्यस्यास्तादृश्या पुण्यलक्ष्म्या सुकृतश्रिया अलंक्रियमाणं भूष्यमाणं पार्श्वं जीवान्तिकं यस्य । परिणेतापि तत्कालपरिणीयतया अलंक्रियमाणवामाङ्कान्तिकः ॥ इदं तु पाठान्तरम् ॥

શ્લોકાર્થ

જેનો પાછળનો ભાગ નવોઢા સ્ત્રી વડે સુશોભિત છે તેવા નવપરિણીત વરને સુહાગણ સ્ત્રી અક્ષતોથી વધાવે તેમ સિદ્ધાચળની યાત્રાથી પ્રાપ્ત થયેલી પુણ્યલક્ષ્મી વડે અલંકૃત જીવનવાળા આચાર્યદેવને કેટલીક સ્ત્રીઓ મુક્તાફળો વડે વધાવતી હતી. ॥ ૬૬ ॥

गीतिं जगुर्नागरिकाः किरन्तीं सुधां सुधादीधितिमण्डलीवत् ।
यां श्रोत्रपत्रैर्विनिपीय चित्रार्पितैरिवाभूयत मार्गमार्गैः ॥ ६७ ॥

काश्चन नागरिका द्वीपोन्नतपुरपुरंध्र्यो गीतिं सूरिगुणगानं जगुर्गायन्ति स्म । किं कुर्वतीम् । गीतिं किरन्तीं विस्तारयन्तीम् अर्थात्कर्णयोर्वर्षन्तीम् । काम् । सुधाममृतम् । किंवत् । सुधादीधितिमण्डलीवत् । यथा आश्विनमाससंबन्धिराकामृगाङ्कमण्डलयः पीयूषं किरन्ति, तथा नागरिका कर्णामृतवर्षिणीं गीतिं गायन्ति । यां गीतिं श्रोत्रपत्रैः कर्णपर्णैः कृत्वा विनिपीय सादरं निशम्य मार्गस्य अजयोन्नतपुरयोरन्तरालाध्वनः मार्गैर्मृगगणैश्चित्रार्पितैरालेख्यस्थापितैर्लिखितैरिवाभूयत संजायते स्म ॥

શ્લોકાર્થ

કેટલીક સ્ત્રીઓ ચન્દ્રમંડળની જેમ સુધાવર્ષા મધુરી વાણી વડે આચાર્યદેવનાં ગુણગાન કરતી હતી અર્થાત્ ગુણોને ગાતી હતી. તે ગીતોને કાનોથી સાંભળીને માર્ગમાં રહેલાં મૃગો ચિત્રમાં આલેખન કરાયાં હોય તેવાં બની ગયાં. ॥ ૬૭ ॥

गजाधिरूढा व्यरुचन्कुमारा विभूषिता भूषणधोरणीभिः ।
प्रवालपुष्पावलिशालमानाः प्रस्थप्ररूढा इव बालसालाः ॥ ६८ ॥

भूषणानां मणिस्वर्णाभरणानां धोरणीभिः श्रेणीभिः विभूषिता अलंकृताङ्गाः । तथा गजाधिरूढाः सिन्धुरस्कन्धाध्यासिनः केचन कुमाराः व्यरुचन शुशुभिरे । उत्प्रेक्ष्यते—प्रवालानां पल्लवानां पुष्पाणां कुसुमानामावलीभिर्मालिकाभिः शालमानाः शोभमानाः प्रस्थेषु सानुषु प्ररूढा उद्गता बालसालाः लघुपादपा इव ॥

શ્લોકાર્થ

હાથી ઉપર આરૂઢ થયેલા વિવિધ પ્રકારનાં આભૂષણોથી સુશોભિત કુમારો શોભતા હતા; તે જાણે પર્વત ઉપર ઊગેલા પ્રવાલ અને પુષ્પોની પંક્તિ વડે શોભતા બાલવૃક્ષો ન હોય ! ॥ ६८ ॥

काश्चित्कुमार्यः शिबिकां श्रयन्त्यो माणिक्यभूषा वपुषा वहन्त्यः ।
कुतूहलाद् भूवलयं भजन्त्यो विमानयाना इव नाकिकन्याः ॥ ६९ ॥

काश्चित्कुमार्यो लघुकन्यकाः भान्ति तदवसरे शोभन्ते । किं कुर्वन्त्यः । शिबिकां याप्ययानं श्रयन्त्यः परिचरन्त्यः । शिबिकाधिरूढा इत्यर्थः । पुनः किं कुर्वन्त्यः । माणिक्यानां रत्नविशेषाणां भूषा अलंकारान् वपुषा स्वशरीरेण वहन्त्यो धारयन्त्यः । 'वृता विभूषामणिरश्मिकार्मुकैः' इति नैषधे । उत्प्रेक्ष्यते—कुतूहलात्कौतुकाद् भूवलयं मेदिनीमण्डलं भजन्त्यः सेवमाना आश्रयन्त्यः । विमानेन देवयानेन यानं गमनं यासां तादृश्यो नाकिकन्या देवकुमारिकाः इव । यथा इन्द्रस्य । 'तनयस्तु जयन्तः स्याज्जयदत्तो जयश्च सः । सुता जयन्ती तविषी ताविष्युच्चैःश्रवा हयः ॥' इति हैम्याम् ॥

શ્લોકાર્થ

શિબિકામાં બેઠેલી, મણિમાણેકનાં અલંકારોથી સુશોભિત કુમારિકાઓ શોભતી હતી, તે જાણે દેવવિમાનમાં બેસીને કુતૂહલથી પૃથ્વી ઉપર ફરવા માટે આવેલી દેવકુમારિકાઓ ન હોય ! ॥ ६९ ॥

गत्या जितोऽनेन किमभ्रकुम्भो द्रष्टुं तमीत्युत्सुकितोऽब्धिमध्यात् ।
किमीयिवानेष तदन्ववायः शृङ्गारितास्तत्र गजा विरेजुः ॥ ७० ॥

तत्र तस्मिन् संमुखागमनसमये शृङ्गारिताश्च शृङ्गारभूषणैर्ध्वजचामराद्याडम्बरैरलंकृताः गजा हस्तिनो विरेजुः शोभन्ते स्म । उत्प्रेक्ष्यते—इत्यमुना प्रकारेण इति हेतोर्वा तं सूरिं द्रष्टुं प्रेक्षितुमुत्सुकित उत्कण्ठितः सन् अब्धिमध्यात्समुद्रान्तरालादेव प्रत्यक्षं लक्ष्यमाणः तस्यैरावणस्य अन्ववायो गजघटारूपो वंशः किमीयिवान् आगत इव । ऐरावणस्य समुद्रमध्यादुत्पन्नविनिःसृतत्वेन तद्वंशस्यापि सद्भावः संभाव्यते यत्र । यदुक्तं नैषधेऽपि—'पयोनिलीनाभ्रमुकामुक्तावलीरदानन्तोरगपुच्छसच्छवीन्' इति । तथा समुद्रस्यापि अत्र सामीप्यादियमुत्प्रेक्षा

घटत एव । अथ प्रस्तुतम् । इति किम् । यदनेन सूरिणा गत्या पुरतो युगप्रमाणां धरणीं चक्षुषा प्रेक्षमाणा । ईर्यासमिति पूर्वकं मन्थरगमनेन अभ्रकुम्भी ऐरावणः । 'ऐरावणोऽभ्रमातङ्गाभ्रतुदन्ताकैसोदरे' इति हैम्याम् । किं कथं कया रीत्या जितोऽभिभूतः ॥

શ્લોકાર્થ

આચાર્યદેવના પ્રવેશમહોત્સવ સમયે અલંકારોથી શણગારેલા હાથીઓ શોભતા હતા. તે જાણે આચાર્યદેવને જોવા માટે સમુદ્રની મધ્યમાથી ઉત્સુકતાપૂર્વક આવેલા ઐરાવણહાથીના વંશજો ન હોય! અથવા, જાણે આચાર્યદેવની ગજગામિનીગ તેથી પરાભવ પામેલા ઐરાવણ હાથીનાં રૂપો આચાર્યની સેવા કરવા માટે આવેલાં ન હોય! ॥૭૦॥

पर्याणितास्तत्र तुरङ्गमास्ते रेजुर्जवाधःकृतवातवेगाः ।
यैर्निर्जिता भानुमतस्तुरङ्गा ह्रियेव नाद्यापि भुवं स्पृशन्ति ॥ ७१ ॥

तत्र संमुखागमनसमये ते तादृशा ये अग्रे स्वगुणोत्कर्षैरुत्प्रेक्षां प्रापिताः । अथ वा ते काम्बोजकामरूपकच्छसिन्धुदेशोद्भवा विविधजातीयाः प्रसिद्धास्तुरङ्गमाः अश्वाः । यदुक्तं प्राकृतवाक्ये—'ये गंगाजलनीअडा हरिअडा कालाकिहाडाघुरा साणीलिंघलसिंधू आकलहला कस्मीरियां कुंकुणा । टुंकेकानि अनेकत्रानिपिहुला पीठे पगे नीसला ते हेष्यन्नियकुं अरा जिमसुरा ते जीतुघरिवढा ॥' इति । पर्याणिताः पल्ययनकलिताः कृताः । 'पर्याणं तु पल्ययनः' इति हैम्याम् । रेजुः विभान्ति स्म । किंभूताः । जवेन मानसातिपातिगतिरंहसा अधःकृतो निरस्तो वातानां पवमानां वेगो रयो यैस्ते । ते के । यैस्तुरङ्गमैर्भानुमतो भास्वतस्तुरङ्गा वाजिनः निर्जिता गतित्वराभिः पराभूताः सन्तः । उत्प्रेक्ष्यते—अद्याप्यद्यतनं वर्तमानं वासरं प्रभृति यावन्मण्डयित्वा ह्रिया लज्जयेव कृत्वा भुवं क्षोणीं न स्पृशन्ति । लज्जिता हि स्वं मुखं दर्शयितुमनलंभूष्णवः पृथिव्यां नायान्तीत्यर्थः ॥

શ્લોકાર્થ

પોતાના વેગ વડે પવનના વેગનો તિરસ્કાર કરનારા કામરૂપ, કંબોજ, કચ્છ અને સિંધુ આદિ દેશોમાં ઉત્પન્ન થયેલા અને વિવિધ વર્ણના પલાણયુક્ત અશ્વો શોભતા હતા. તે અશ્વોના વેગથી પરાભવ પામેલા સૂર્યના અશ્વો (સપ્તાશ્વ) લજ્જાથી જાણે હજી પણ પૃથ્વી ઉપર આવતા નથી; અર્થાત્ લજ્જાથી પોતાનું મુખ દેખાડવા સમર્થ નહીં હોવાથી પૃથ્વી ઉપર આવતા નથી. તેવા પવનવેગી જાતવંત ઘોડાઓ આચાર્યદેવના સ્વાગતમાં શોભતા હતા. ॥ ૭૧ ॥

रथाङ्गभाजस्त्वरमाणतार्क्ष्याः सुजातरूपा घननन्दकाश्च ।
अम्भोजनाभा इव कामरामशोभाः शताङ्गाः शतशः प्रचेलुः ॥ ७२ ॥

शतशः शतसहस्रसंख्याकाः शताङ्गा रथाः । 'शताङ्गः स्यन्दनो रथः' इति हैम्याम् । प्रचेलुः सूरेरभिमुखं प्रचलन्ति स्म । उत्प्रेक्ष्यते—अम्भोजनाभाः कृष्णा इव । किंभूता रथाः कृष्णाश्च । रथाङ्गं रथपादं चक्रं 'पइडु' इति प्रसिद्धं सुदर्शनं चक्रं भजन्ति इति रथाङ्गभाजः । पुनः किंभूताः । त्वरमाणाः शीघ्रगामिनस्तार्क्ष्यास्तुरङ्गमा गरुडाश्च येषां ते । च पुनः किंभूताः । शोभनं जातरूपं सुवर्णः काञ्चनजटितत्वेन । पक्षे जातमुत्पन्नं रूपमतिशायिसुन्दरशरीराकारविशेषो येषाम् । पुनः किंभूताः । घनान्बहुजनानानन्दयन्ति प्रह्लादयन्ति । तथा घनो निबिडोऽपराप्रतिहतो नन्दकनामा खड्गो येषां ते । च पुनः किंभूताः । काममतिशयेन रामा मनोज्ञा शोभा येषां ते । तथा कामः प्रद्युम्नः रामो बलभद्रः ताभ्यां शोभा येषां ते ॥

श्लोकार्थ

कृष्णोना जेवा सेंकडो रथो आचार्यदेवना स्वागतमां शोभता हता. जेम रथने चक्र (पैडां) छे, कृष्णनी पासे सुदर्शन चक्र हतुं. रथोने जेम वेगवंत अश्वो जोडायेला छे, कृष्ण पण गरुडना वाहनवाळा हता. रथो सोनाना सोवाथी जेम सुंदर शोभावाळा छे, कृष्ण सुंदर रूपवाळा हता. जेम रथो घणा प्रेक्षकोने आनंद आपनारा छे, तेम कृष्ण अप्रतिहत खड्गवाळा हता. [मूळ श्लोकमां 'घननन्दकाश्च' छे, तेमां 'घन'नो अर्थ रथना पक्षे 'घणा' कर्यो अने कृष्णना पक्षे 'घन'नो अर्थ निबिड एटले के 'अप्रतिहत' कर्यो.] कृष्ण काम-प्रद्युम्न अने बलभद्र वडे शोभे छे, रथो शोभा वडे अत्यंत मनोहर छे. आम कृष्णोनी जेम रथो शोभे छे. ॥ ७२ ॥

तूरस्वरैश्चित्कृतिभी रथानां हयालिहेषागजगर्जितैश्च ।
नृणां स्तवादिध्वनितैर्व्रतीन्दोः श्लोकैरिवापूरि समग्रलोकः ॥ ७३ ॥

तूरस्वरैर्विविधवादित्रनिर्घोषैश्च पुनः रथानां स्यन्दनानां चित्कृतिभिस्त्वरितगमनावसरोद्भवचित्कृतिसंज्ञध्वनितविशेषैः च पुनर्हयानामश्वानामालिः श्रेणिस्तस्य ह्रेषाभिर्हिंसारव इति प्रसिद्धैः तथा गजानां मदोद्धतसिन्धुराणां गर्जितैर्बृंहितैस्तथा नृणां श्राद्धभाट्टगायनादिजनानां स्तवादिध्वनितैः स्तुतिच्छन्दोगानादिभणितिभिः कृत्वा समग्रोऽपि दशदिक्पर्यन्तं यावल्लोको भुवनमपूरि निर्भरं भृतः पूरितः । कैरिव । श्लोकैरिव । यथा व्रतीन्दोर्हीरसूरेर्यशोभिः समग्रोऽपि लोकः पूर्यते स्म । 'श्लोकः कीर्तिर्यशः' इति हैम्याम् ॥

श्લોકાર્થ

વાજિંત્રોના ધ્વનિથી, રથોના ચિત્કારોથી, અશ્વોના હેષારવથી, હાથીઓની મેઘાડંબર ગર્જનાઓથી, મનુષ્યોનાં સ્તુતિઆદિ મંગલગીતોથી અને આચાર્યદેવના ઉજ્જવલ યશથી સમગ્રલોક વ્યાપ્ત બની ગયો. ॥ ૭૩ ॥

स्त्रीभ्यस्तदा तद्गुणगायनीभ्यः पैञ्जूषपीयूषरसाभिषेकाम् ।
वाणीमधीत्याभ्यसितुं वनस्थाः शिष्या इवासन्कलकण्ठकान्ताः ॥ ७४ ॥

तस्य सूरेर्गुणान गायन्तीत्येवंशीलाभ्यः स्त्रीभ्यः पौरपुरंध्रीभ्यः सकाशात्तदा तस्मिन् संघागमनमहोत्सवव्यतिकरे पैञ्जूषयोः श्रोतृजनश्रवणयोः पीयूषरसस्य सुधानिस्यन्दस्य अभिषेकोऽभिषिञ्चनं तत्तुल्यां वाणीं वाग्विलासमधीत्य पठित्वा कलकण्ठकान्ताः कोकिलकामिन्यः । उत्प्रेक्ष्यते—अभ्यसितुं सम्यगभ्यासं विधातुमिव वनस्था वनवासिन्य आसन्निव संजाता इव । का इव के इव वा । शिष्या इव । यथा विनेयाः कुतश्चिद्गुरोः सकाशात्किमप्यधीत्य एकान्ते वनादिषु गत्वा स्थिता वा तदभ्यसन्ति ॥

શ્લોકાર્થ

તે અવસરે આચાર્યદેવના ગુણોને ગાતી નગરવાસી સ્ત્રીઓ પાસેથી અમૃતથી સિંચાયેલી કર્ણપ્રિય વાણીનો અભ્યાસ કરીને કોયલો શિષ્યોની જેમ વધુ અભ્યાસ કરવા માટે જાણે વનવાસી બની ગઈ હતી. ॥ ૭૪ ॥

ध्वनन्नफेरीसखभूरिभेरीभाङ्काररावैः प्रतिशब्दितेन ।
नन्तुं सवेशाम्बुधिशायिशौरिः प्रबोध्यते सूरिसमागमे किम् ॥ ७५ ॥

ध्वनन्त्यः शब्दायमाना नफेर्यः पित्तलमय्यः वदनेन वादनीया वाद्यविशेषाः प्रसिद्धाश्च ता एव सख्यः सहाया यासां तादृश्यो भूरयः शतशंख्याका भेर्यो दुन्दुभयस्तासां भाङ्काररावैः भाङ्कृतिध्वनिभिः कर्तृभिः प्रतिशब्दितेन अर्थात्संनिधिवर्तिसागरमध्यप्रतिनादितेन । 'पयोधिमध्यप्रतिनादमेदुरः' इति नैषधे । कृत्वा । उत्प्रेक्ष्यते—सवेशे समीपे योऽम्बुधिः समुद्रस्तत्र तन्मध्ये शेते इत्येवंशीलो यः शौरिर्नारायणः स सूरेरुन्नतपुरप्रवेशोत्सवे नन्तुमर्थात्सूरीन्द्रं नमस्कर्तुं किं प्रबोध्यते निर्निद्रीक्रियते जागर्यते इव ॥

શ્લોકાર્થ

અવાજ કરતી પિત્તળની નફેરીઓની જાણે સખી ન હોય તેવી ભેરીઓના ભાંકાર શબ્દો વડે સમુદ્રમાં પડેલા પડઘાથી જાણે સમુદ્રમાં શયન કરી રહેલા વિષ્ણુને, પ્રવેશ-મહોત્સવમાં આચાર્યદેવને નમસ્કાર કરવા માટે જાગ્રત કરાતા ન હોય ! ॥ ૭૫ ॥

तदाद्रिमध्यप्रतिशब्दसान्द्रैः स्मरध्वजौघध्वनिपूर्यमाणैः ।
प्रमोदमाद्यत्तुमुलैर्जनानां व्योमेव भूः शब्दगुणा किमासीत् ॥ ७६ ॥

तदा तस्मिन् सूरिप्रवेशोत्सवे जनानां संमुखागतसकललोकानां प्रमोदेन हर्षातिशयेन माद्यद्भिर्मदं प्राप्नुवद्भिस्तुमुलैरतिबहुलव्याकुलताकलितकोलाहलैः । अथ वा 'अध्व' धावत यात मुञ्चत पुरः पन्थानम्-' एवंविधचम्पूकथाकथितकेवलव्याकुलशब्दैः कृत्वा व्योमेव गगनमिव भूरपि पृथिव्यपि शब्द एव गुणो यस्यास्तादृशी किमासीज्जातेव । किंभूता । तुमुलैरद्रीणां समीपभाजां नन्दीवेलकप्रमुखाणां स्वभावतस्तु शत्रुंजयाचलशिखराणां परं कालानुभावाद्गिरिघटनाच्च दूरीभूतानां पर्वतानां मध्ये कंदरोदरे प्रतिशब्दाः प्रतिध्वनयस्तैः सान्द्रैर्निबिडीभूतैः । पुनः किंभूतैः । स्मरध्वजानां नानाविधवाद्यानाम् । 'तूर्यं तूरं स्मरध्वजः' इति हैम्याम् । ओघाः समूहास्तेषां ध्वनिभिर्नानाप्रकारप्रसरन्निर्घोषैः पूर्यमाणैः बहलीक्रियमाणैः ॥ इति द्वीपोन्नतपुरसंमुखागमनवर्णनम् ॥

શ્લોકાર્થ

પ્રવેશમહોત્સવ સમયે સમીપમાં રહેલા 'નંદીવેલ' આદિ પર્વતો (શત્રુંજયનાં શિખર)ની ગુફામાં પડેલા પડઘાઓથી, વાજિંત્રોના અવાજથી અને હર્ષિત બનેલા લોકોના કોલાહલથી પૃથ્વી આકાશની જેમ જાણે શબ્દગુણા બની ગઈ ! ॥ ૭૬ ॥

तदुत्सवे मूर्छति भूर्भुवःस्वस्त्रयीप्रसक्ति प्रदिशत्यपूर्वाम् ।
अलंचकार प्रभुरुन्नताख्यां पुरं हरिद्वारवतीमिवासौ ॥ ७७ ॥

प्रभुर्हीरविजयसूरिरुन्नतमिति आख्या नाम यस्यास्तादृशीं पुरं नगरीमलंचकार भूषयामास । क इव । हरिरिव । यथा नारायणो धनदनिर्मितां द्वारवतीं द्वारकां नगरीमलंकरोति । कस्मिन् सति । तदुत्सवे स चासावुत्सवश्च तदुत्सवः द्वीपोन्नतादिसंघप्रारब्धसूरिप्रवेशमहामहस्तस्मिन्मूर्च्छति वृद्धिमतिशायितां श्रयति प्राप्नुवति सति । किं कुर्वति तदुत्सवे । भूर्भुवः

स्वरूपया नागलोकनाकिलोकभूमिलोकानां त्रिकस्य अर्थात् त्रिजगज्जनानां प्रसत्तिं मनःप्रसन्नतां प्रमोदप्रकर्षं प्रदिशति प्रयच्छति ददाति ॥

श्लोकार्थ

જેમ વિષ્ણુએ દ્વારિકામાં મહામહોત્સવપૂર્વક પ્રવેશ કર્યો હતો તેમ ત્રણે જગતને આનંદદાયી પ્રવેશમહોત્સવ થતાં આચાર્યદેવે 'ઊના' નગરને અલંકૃત કર્યું. ॥ ७७ ॥

तस्मिन्नतेर्गोचरयांचकार चैत्येषु तीर्थाधिपतिं मुदा सः ।
कण्ठीरवः शैलगुहामिवाथानैषीद्विभूषां वसतिं व्रतीन्द्रः ॥ ७८ ॥

स हीरसूरिस्तस्मिन्नुन्नताभिधाननगरे चैत्येषु ऋषभदेवप्रमुखजिनप्रासादेषु तीर्थाधिपतिं जिनाधिराजप्रतिमां मुदा हर्षेण नतेः प्रणामस्य गोचरयांचकार विषयीकरोति स्म । नमस्कृतवानित्यर्थः । अथानन्तरं देववन्दनात्पश्चात् व्रतीन्द्रः सूरिः वसतिमुपाश्रयं विभूषां शोभामनैषीत्प्रापयति स्म । क इव । कण्ठीरव इव । यथा पारीन्द्रः शैलगुहां गिरिकंदरां विभूषां नयति ॥ इत्युपाश्रयागमनम् ॥

श्लोकार्थ

પ્રથમ ઋષભદેવ આદિનાં જિનચૈત્યોમાં ભગવંતની પ્રતિમાઓનાં ભક્તિપૂર્વક દર્શન-વંદન કરીને, જેમ સિંહ ગુફાને શોભાવે તેમ આચાર્યદેવે ઉપાશ્રયને શોભાવ્યો. ॥ ७८ ॥

ततः समुद्दिश्य महेभ्यसभ्यान्धर्मोपदेशं स वशी दिदेश ।
पीयूषवत्तेऽपि निपीय वत्सा इवावहन्संमदमेदुरत्वम् ॥ ७९ ॥

ततो वसतावुपाश्रये आगमनानन्तरं स वशी जितेन्द्रियः सूरिर्महेभ्या व्यवहारिणस्ते एव सभ्याः सदस्याः सभाजनास्तानुद्दिश्य उद्देशं कृत्वा धर्मोपदेशं धर्मदेशनां दिदेश ददाति स्म । तेऽपि महेभ्यसभ्याः पीयूषवत्सुधारसमिव निपीय पीत्वा तद्देशनां सादरं श्रुत्वा संमदैरानन्दैः कृत्वा मेदुरत्वं पुष्टतामवहन्दधते स्म । के इव । वत्सा इव । यथा गवां तर्णकाः पीयूषं स्वस्वमातुरूधोमध्यविनिःसरदभिनवं ततो दुग्धं पीत्वा प्रमोदादास्वाद्य मेदुरत्वमुपचयभावं वहन्ते । 'पीयूषोऽभिनवं पयः । पीयूषमपि' इति हैमीसूत्रवृत्त्याः ॥

શ્લોકાર્થ

ઉપાશ્રયમાં આવ્યા પછી શ્રેષ્ઠિઓની સભાને ઉદ્દેશીને જિતેન્દ્રિય આચાર્યદેવે ધર્મદેશના આપી. સુધાસારિણી ધર્મદેશના સાંભળીને શ્રાવકો વાછરડાની જેમ આનંદથી પુષ્ટિ પામ્યા અર્થાત્ આનંદિત બન્યા. ॥ ૭૯ ॥

क्षेत्रेष्विवाम्बूनि नभोम्बुवाहा द्युम्नांशुकान्यर्थिषु ते ववर्षुः ।
प्रभावनां श्रीफलपूगपूगैश्चक्रुस्ततो रूपकनाणकैश्च ॥ ८० ॥

ते सभ्यजनाः अर्थिषु तत्समयागतानेकयाचकविषयेषु द्युम्नांशुकानि द्रव्यवस्त्रादीनि ववर्षुः । प्रददुरित्यर्थः । क इव । नभोम्बुवाहा इव । यथा श्रावणमेघाः क्षेत्रेषु विषयेषु अम्बूनि पानीयानि वर्षन्ति । वर्षाऋतोरतिपूतत्वान्नभोमासोपादानम् । ततो याचकदानान्तरं श्रीफलानि नालिकेराणि तथा पूगानि क्रमुकाणि 'सोपारी' इति प्रसिद्धानि तेषां पूगैः समूहैः कृत्वा प्रभावनां संमुखागतानामुपाश्रयागतानां च सकलबालवृद्धजनानामनिवारितदानं ददते स्म । च पुनः रूपकाणां नाणकैर्ल्यारीमहमुंदीप्रमुखैः प्रभावनां व्यधुः ॥

શ્લોકાર્થ

જેમ શ્રાવણમાસનો મેઘ ખેતરો આદિ ભૂમિમાં જલવર્ષા કરે તેમ તે શ્રેષ્ઠિઓએ યાચકો ઉપર દ્રવ્ય અને વસ્ત્રોની વૃષ્ટિ કરી, અને શ્રીફળ, સોપારી તેમજ રૂપાનાણાંની પ્રભાવના કરી. ॥ ૮૦ ॥

अन्येऽपि संघाः पुरपत्तनेयोऽभ्येत्याभजन्सूरिसहस्ररश्मिम् ।
अश्वादिदानानि ददुर्महेन्द्रा इव प्रमोदाद्वयवादसान्द्राः ॥ ८१ ॥

अन्ये परेऽपि पुरपत्तनेभ्यः नवीननगरजीर्णदुर्गमङ्गलपुरवेलाकुलदेवपत्तनप्रमुखेभ्यो नगरेभ्यः संघाः श्राद्धवर्गा अभ्येत्यागत्य प्रमोदात्प्रभुपार्श्वे समेत्य सूरिषु सहस्ररश्मिं दिवाकरमभजन्संसेवन्ते स्म । पुनर्महेन्द्रा नृपा इव ते अश्वास्तुरङ्गा आदौ येषां तानि द्रव्यांशुकादीनि दानानि ददुर्ददते स्म । किंभूताः । प्रमोदानामानन्दानामद्वयवादेन असाधारणत्वेन सान्द्रा उपचिततनूलतिकाः ॥

શ્લોકાર્થ

બીજા પણ [જામનગર, જૂનાગઢ, માંગરોળ, વેરાવળ, પ્રભાસપાટણ આદિ] ગામોના સંઘો આવીને સૂર્યની જેમ આચાર્યભગવંતની ઉપાસના કરતા હતા અને અપૂર્વ આનંદથી પુષ્ટ બનેલા તેઓ રાજાઓની જેમ યાચકોને અશ્વ આદિનાં દાન આપતા હતા. ॥ ૮૧ ॥

आगृह्णतस्ताननुगृह्य लोकांस्तत्रांशुसंघोंऽशुमतीव तिष्ठन् ।
पर्जन्यकालोऽभ्रमिवोन्नताख्यं व्यातन्तनीदुन्नतिमत्पुरं सः ॥ ८२ ॥

स सूरिरुन्नताख्यं पुरम् उनानामनगरमुन्नतिमत् शोभासंपन्नमयं व्यातन्तनीद्वितनोति स्म विशेषेण कृतवान् । क इव । पर्जन्यकाल इव । यथा वर्षासमयः अभ्रं मेघमुन्नतिमत्सन्मुन्नतं नीरभरैर्नम्रीभूतं व्यातनुते । स किं कुर्वन् । तत्रोन्नतनगरे तिष्ठन् स्थितिं कुर्वन् । क इव । अंशुसंघ इव । यथा किरणगणोंऽशुमति भास्करे तिष्ठति । तत्र तिष्ठन् किं कृत्वा । तान् द्वीपोन्नतनगरसंबन्धिनो लोकान् श्राद्धजनाननुगृह्य तेषामुपरि अनुग्रहं कृत्वा । तान्किं कुर्वतः । आगृह्णतः श्रीपूज्या अस्मदुपरि प्रसादं प्रणीय अत्रैव चतुर्मासीं कुर्वन्तु इत्थमाग्रहं कुर्वतः ॥ इत्युन्नतनगरे चतुर्मास्यवस्थानम् ॥

શ્લોકાર્થ

ઊના નગરના સંઘના અતિ આગ્રહથી સંઘ ઉપર અનુગ્રહ કરીને, જેમ કિરણોનો સમૂહ સૂર્યમાં રહે તેમ આચાર્યદેવે ઊના નગરમાં ચાતુર્માસિક સ્થિરતા કરી અને જેમ વર્ષાકાળ મેઘને ઉન્નત બનાવે તેમ ઊનાનગરને ઉન્નતિવાળું બનાવ્યું. ॥ ૮૨ ॥

घोरामनुष्ठानविधां विधातुरुग्रं तपस्तेज उदीयते स्म ।
दोषालिमालम्भयतो व्रतीन्दोरिवोत्तराशां भजतो गभस्तेः ॥ ८३ ॥

व्रतीन्दोर्हीरसूरेरुग्रं परपाक्षिकैरसह्यं तपसां तेजो ज्योतिः प्रतापश्च उदीयते स्म प्रकटीबभूव । किंभूतस्य व्रतीन्दोः । घोरामपरेषां मन्दसत्त्वानां भयकरामनुष्ठानविधां क्रियाप्रकारं विधातुः विदधातीत्येवंशीलस्य । शीले तृन् कतुर्वा तृवुणौ । किं कुर्वतः । दोषाणामपगुणानां दान-लाभ-वीर्य-भोग-उपभोगाख्या नाम पञ्चान्तरायकर्माणि हास्यरति-अरति-भय-जुगुप्सा शोक-काम-मिथ्याज्ञान-निद्रा-विरति-राग-द्वेषा इत्येतेषामष्टादशसंख्याकानां दोषाणामालिं पङ्क्तिमालम्भयतो मूलादुच्छिन्दतो निघ्नतः । पुनः किंभूतस्य । उत्तरामग्रिमां मोक्षलक्षणामाशाम वाञ्छां भजतः श्रयतः । तेजः कस्येव । गभस्तेरिव । यथा उत्तराशां कौबेरीं दिशं

भजतः सेवमानस्य दिवसपतेरुग्रं जनैरसह्यं तपोवत्तेजः । अथ वा तपते संतापयति जनमथ ऊर्ध्वं चेति तपस्तादृशं तेजो ज्योतिः प्रतापो वा उदीयते प्रकटीभवति । किंभूतस्य । घोरां दैत्यैरसहनीयामनुष्ठीयते स्वबलवीर्यपुरुषाकारैः क्रियते इत्यनुष्ठानं किंचिदधृष्यमनधृष्यं वा कार्यादिनिर्माणं तस्य विधा प्रकारः एतावता मन्देहा नाम राक्षसास्तैः सार्धमुद्धतयुद्धक्रियां कर्म विदधाति करोतीत्येवंशीलस्य । यदुक्तं नैषधे प्रातर्वर्णने—'इह हि समयेषु व्रजन्त्युदवज्रता-मभिरविमुपस्थानोत्क्षिप्ता जलाञ्जलयः किल' अथ तद्वृत्तिः । अस्मिन्प्रातःसमयेऽवसरे सूर्य-मुद्दिश्य उपस्थानोत्क्षिप्ता उपासनायामुद्धृता जलाञ्जलयः उदवज्रतां जलरूपाशनित्वं प्रपद्यन्ते । एतावता 'आपो वज्रीभूत्वा तानि रक्षांसि मन्देहान् अरुणद्वीपे क्षिपन्ति' इति श्रुतेः । 'तिस्रः कोट्योऽर्धकोटी च मन्देहा नाम राक्षसाः । उदयन्तं सहस्रांशुमभ्ययुध्यन्त ते सदा ॥' इत्युक्तेः । अथ वा घोरां घूकान्धकारैः सोढुमशक्यामनुष्ठानविधां दिवसकिरणलक्षणां क्रियां कर्तुः । पुनः किं कुर्वतः । दोषाणां रात्रीणां धोरणीं घातयतो निर्णाशयतः । 'प्रवासनोद्वासनघात-निर्वासनानि संज्ञप्तिनिष्ठम्भहिंसानिर्वापणालम्भनिसूदनानि' इति हैम्याम् ॥

श्लोकार्थ

કાયર પુરુષને અશકય એવા ઘોર અનુષ્ઠાનવિધિને કરનારા, અઢાર દોષોની પંક્તિને મૂળથી ઉચ્છેદતા, અશ્રીમ મોક્ષરૂપ આશા રાખનારા, અને જેમ ઉત્તરદિશામાં આશ્રય કરનાર સૂર્યનો પ્રચંડ પ્રતાપ પ્રગટ થાય તેમ વ્રતધારીઓમાં ચન્દ્ર સમાન આચાર્યદેવનું ઉગ્ર તપઃતેજ પ્રગટ થયું. ॥ ८३ ॥

स्वश्राद्धसौधाहृतभक्तभोगाद्यभिग्रहान्साग्रहमग्रहीत्सः ।
श्रीबप्पभट्टिव्रतिशीतकान्तिरिव क्षितीन्द्रप्रतिबोधधुर्यः ॥ ८४ ॥

स सूरिः स्वश्राद्धानां निजश्रावकाणां तपापक्षीयगृहमेधिनां सौधाद्गेहादाहृतस्यानीतस्य भक्तस्य आहारस्य भोगो भोजनमादिर्येषां तादृक्षानभिग्रहान्निषेधरूपान्नियमान् भक्तं भक्तस्य नो कल्प्युत इत्यादिकान् प्रत्याख्यानविशेषान् साग्रहमपरैर्वाचकप्रज्ञांशसाधुभिरतिविज्ञप्तो-ऽपि निर्बन्धादग्रहीज्जग्राह । क इव । श्रीबप्पभट्टिव्रतिशीतकान्तिरिव । यथा श्रीआममहे-न्द्रप्रतिबोधविधायकबप्पभट्टिसूरिः स्वश्रावकनिकेतनानीतभक्तभोगनिषेधादिकानभिग्रहान् गृ-हीतवान् । किंभूतः । क्षितीन्द्रोऽकब्बरपातिसाहिरामनृपश्च । तस्य प्रतिबोधे स्वभक्तीकरणे धुर्यो धुरीणः । प्रतिबोधविधातेत्यर्थः ॥

શ્લોકાર્થ

આમરાજાને પ્રતિબોધ કરવામાં શ્રેષ્ઠ શ્રી બપ્પભટ્ટીસૂરિએ જેમ ભક્તના ઘરનાં આહાર-પાણીનો ત્યાગ કર્યો હતો તેમ અકબર બાદશાહને પ્રતિબોધ કરવામાં શ્રેષ્ઠ શ્રી હીરવિજય-

સૂરિએ ભક્તોનો અતિઆગ્રહ હોવા છતાં તેઓના ઘરનાં આહારપાણી નહીં લેવાનો અભિગ્રહ કર્યો. ॥ ૮૪ ॥

जिनं हृदम्भोजविलासराजहंसायमानं प्रणयन्कदाचित् ।
विधाय बाह्येन्द्रियमौनमुद्रां ध्यानं स योगीन्द्र इव व्यधत्त ॥ ८५ ॥

स सूरिः कदाचित्कस्मिन्नपि समये योगीन्द्रो मनोवचनकाययोगानां निरोधो विद्यते येषाम् । अथ वा यम-नियम-करण-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधि-लक्षणना-मभिरष्टभिरङ्गैर्योगोऽस्त्येषामिति वा योगिनस्तेषामिन्द्रः सर्वोत्कृष्टयोगिराजस्तद्वद्योगमार्गाधिरूढवद्ध्यानं कस्मिन्नपि चेतश्चिन्तिते विषये अेकप्रत्ययसंततिकरणं प्रणिधानं व्यधत्त चकार। किं कृत्वा । बाह्यानां स्पर्शन-रसन-घ्राण-नयन-श्रवणाख्यानां पञ्चानामिन्द्रियाणां मौनेन स्वस्वव्यापारनिषेधेन मुद्रां चित्तैकाग्र्यं विधाय । किं कुर्वन् । हृदम्भोजे हृदयकमलकर्णिकायां विलासे क्रीडाकरणे राजहंसमिवाचरन्तं जिनं वीतरागं प्रणयन् कुर्वन् ॥

શ્લોકાર્થ

આચાર્યમહારાજ, કમલવનમાં ક્રીડા કરતા રાજહંસની જેમ હૃદયકમલમાં જિનેશ્વર ભગવંતનું ધ્યાન કરતા; સ્પર્શ, રસના, ઘ્રાણ, ચક્ષુ અને શ્રોત્ર એ પાંચ ઇન્દ્રિયોનો રોધ કરીને યોગીન્દ્રની જેમ એકાગ્રચિત્તે પરમાત્મધ્યાનમાં લીન બની જતા હતા ॥ ૮૫ ॥

नीरन्ध्रपाथःपरिपूर्यमाणपर्जन्यपुञ्जोर्जितगर्जितं किम् ।
कदापि रुच्यश्चरणेन्दिरायाः स्वाध्यायसान्द्रध्वनितं दधार ॥ ८६ ॥

कदापि कस्मिन्नपि अवसरे अस्वाध्यायनिर्मुक्तत्रिकालवेलारहितसमये वा चरणेन्दिरायाश्चारित्रलक्ष्म्या रुच्यो भर्ता । 'त्रिवोढा रमणो भोक्ता रुच्यो वरयिता धवः' इति हैम्याम् । स्वाध्यायस्य पोच्चैःस्वरेण सिद्धान्तादिगणनरूपस्य सान्द्रं घोरगम्भीरं ध्वनितं दधार । ध्वनिं विधत्ते स्मेत्यर्थः । 'ध्वनिमाबभार' इत्यपि पाठः । बाढध्वनिना सिद्धान्ताद्यगणयदित्यर्थः । उत्प्रेक्ष्यते— नीरन्ध्रं सर्वतोऽपि निर्गतं रन्ध्रं छिद्रं रिक्तस्थानं यथा स्यात्तथा पाथोभिः पयोभिः परिपूर्यमाणस्य निर्भरं भ्रियमाणस्य पर्जन्यानां प्रावृषेण्यपयोवाहानां पुञ्जस्य घटाया ऊर्जितं प्रोद्दामं गर्जितं किं गर्जिरिव ॥ इत्यभिग्रहध्यानस्वाध्यायादि ॥

શ્લોકાર્થ

ચરિત્રલક્ષ્મીના સ્વામી આચાર્યદેવ કોઈ સમયે ગંભીર ધ્વનિથી સ્વાધ્યાય કરતા હતા, તે ધ્વનિ જાણે જલથી પરિપૂર્ણ મેઘનો ઉદ્દામ ગર્જારવ ન હોય ! ॥ ८६ ॥

तत्र प्रतिष्ठात्रितयीमतुच्छोत्सवोच्छलच्छेकमनःप्रमोदाम् ।
चक्रे मुनीन्द्रो भुवनत्रयस्याधिपत्यलक्ष्मीं स्पृहयन्निवान्तः ॥ ८७ ॥

तत्रोन्नतनगरे मुनीन्द्रो हीरसूरिः प्रतिष्ठात्रितयीं शतसहस्रशो भगवत्प्रतिमाप्रतिष्ठापनरूपाणां प्रतिष्ठानां त्रिकं चक्रे व्यधत्त । किंभूताम् । अतुच्छोऽत्यभ्यधिको यत्र उत्सवो महामहास्तेन उच्छलन्वर्धमानः छेकानां विदग्धानां मनसि स्वान्ते प्रमोदो हर्षो यस्याम् । उत्प्रेक्ष्यते—अन्तः स्वचित्ते भुवनत्रयस्य त्रैलोक्यस्याधिपत्यलक्ष्मीं राज्यश्रियं स्पृहयन् वाञ्छन्निव ॥

શ્લોકાર્થ

આચાર્યદેવે ઊના નગરમાં, જેમાં પંડિતપુરુષોનાં ચિત્તમાં આનંદ વધી રહ્યો છે તેવા વિશિષ્ઠ પ્રકારના મહોત્સવપૂર્વક ત્રણ પ્રતિષ્ઠામહોત્સવ કરાવીને જિનબિંબોની પ્રતિષ્ઠા કરાવી. તે જાણે અંતરમાં ત્રણ લોકની રાજ્યલક્ષ્મીની સ્પૃહા કરતા ન હોય ! ॥ ८७ ॥

उग्रं तपो धन्य इवानुतिष्ठन्नाद्यं चतुर्मासकमाततान ।
अपाटवात्किंचन काययष्टेः पुनर्द्वितीयं कुरुते स्म तस्मिन् ॥ ८८ ॥

स सूरिस्तस्मिन्नुन्नतनगरे आद्यं विमलाचलयात्रां कृत्वा तत्र गमनानन्तरं प्रथमं चतुर्मासकं वर्षारात्रमाततान करोति स्म । किं कुर्वन् । उग्रमत्युत्कटं घोरं षष्ठाष्टमादिममतिशायि विकृष्टं तपोऽनुतिष्ठन् विदधत् । क इव । धन्य इव । यथा काकन्दीसत्को द्वात्रिंशत्कनकोटीकामिनी द्वात्रिंशद्भूमिकप्रासादमोक्ता धन्यनामानगारः उग्रं षष्ठाचामाम्लनि अनुतिष्ठति स्म । पुनर्द्वितीयवारं काययष्टेः शरीरस्य किंचन किमपि अपाटवात्पटुत्वात्प्रबलरोगादिना मन्दत्वादिकारणात् द्वितीयं द्वयोः संख्यापूरणम् । कम् । चतुर्मासकं तस्मिन्नेवोन्नतपुरे कुरुते स्म ॥

अथ सूरेर्दीक्षादानदिनादारभ्य यत्किंचित्तपो विहितं तदुच्यते परिवारश्च—

શ્લોકાર્થ

કાકંદીનગરીના શ્રેષ્ઠિ ધન્યકુમાર, બત્રીસ કોટિ સુવર્ણ, બત્રીસ સ્ત્રીઓ, અને બત્રીસ માળના મહેલનો ત્યાગ કરીને દીક્ષિત બન્યા અને દીક્ષાદિવસથી જ છઠ્ઠ-છઠ્ઠના પારણે આયંબિલની ઉગ્ર તપશ્ચર્યા કરી હતી તેમ આચાર્યદેવે છઠ્ઠ—અઠ્ઠમ આદિ ઉગ્ર તપશ્ચર્યા કરતાં વર્ષાસંબંધી પ્રથમ ચાતુર્માસ પૂર્ણ કર્યું. અને શરીરની અસ્વસ્થતાના કારણે બીજું ચાતુર્માસ પણ ઊના નગરમાં કર્યું. ॥ ૮૮ ॥

अथ व्रतादानदिनात्तपो यत्तीव्रं व्रतीन्द्रेण विधीयते स्म ।
बभूव यस्तस्य परिच्छदश्च श्रीवीरवत्किंचिदिहोच्यते तत् ॥ ८९ ॥

अथेत्यधिकारान्तरकथनम् । तस्य व्रतस्य दीक्षाया आदानं ग्रहणं तस्य दिनाद्दिवसाद्दीक्षाग्रहणदिनं मर्यादीकृत्य व्रतीन्द्रेण हीरसूरिणा यत्किंचिदल्पमनल्पं वा तप एकाशनकादिकं तथा तीव्रं षष्ठाष्टमादिमं घोरं कठिनं विधीयते स्म कृतं च । पुनस्तस्य प्रभोर्यो यावत्संख्याकः परिच्छदः परिवारो बभूव संजातः । किंवत् । श्रीवीरवत् श्रीमन्महावीरदेवस्येव तपस्तथानुष्ठानादिकमासीत् । तत्किंचिदिह ग्रन्थे देशमात्रं यथाश्रुतं मया ग्रन्थकर्त्रोच्यते कथ्यते ॥

શ્લોકાર્થ

જેમ ભગવાન મહાવીરસ્વામીએ ઉગ્ર તપ કર્યું હતું તેમ હવે આચાર્યદેવે દીક્ષા-દિવસથી આરંભીને કરેલી તપશ્ચર્યા અને તેમના પરિવારનું યત્કિંચિત્ વર્ણન કરવામાં આવે છે. ॥ ૮૯ ॥

सूरीन्दुरेकाशनकं न यावज्जीवं जहौ न्यायमिव क्षितीन्द्रः ।
पञ्चापि चासौ विकृतीरहासीद्गुणान्स्मरस्येव पराङ्मुखः ॥ ९० ॥

सूरीन्दुर्मुनिचन्द्रो यावदिति यावन्तं समयं जीव्यते प्राणा धार्यन्ते इति यावज्जीवं संयमजन्म मर्यादीकृत्य एकवारमशनमेकाशनं सकृद्भोजनं वा यत्र । एकाशनके स्वार्थे कः । न नैव जहौ तत्याज । सकृदेव भुक्तवानित्यर्थः । क इव । क्षितीन्द्र इव । यथा धर्मप्रधानो

राजा न्यायं नीतिं न जहाति। च पुनरसौ सूरिः दधिदुग्धपक्वान्नतैलगुडघृताभिधाना पञ्चसंख्याका विक्रियते विकारयुक्तो जीवः क्रियते याभिरिति विकृतयः स्ता विकृतीरहासीद्-त्याक्षीन्मुञ्चति स्म। उत्प्रेक्ष्यते— स्मरस्य कंदर्पस्य पञ्चप्रमाणान् शब्दरूपगन्धरसस्पर्शा-भिधान् गुणान् पराबुभूषुः पराभवितुमिच्छुरिव ॥

श्लोकार्थ

જેમ ન્યાયી રાજા ન્યાયનો ત્યાગ ન કરે તેમ આચાર્ય શ્રી હીરવિજયસૂરિજીએ જીવનપર્યંત એકાસણાનો ત્યાગ કર્યો નહીં અર્થાત્ એકાસણાથી ઓછું તપ કર્યું નથી. દહીં, પકવાન્ન, તેલ, ગોળ, અને ઘી એ પાંચે વિગઈઓના તેઓ હમેશાં ત્યાગી હતા. તે જાણે કામદેવના સ્પર્શ, રસ, રૂપ, ગંધ અને શબ્દ એ પાંચ ગુણોનો પરાભવ કરવાનું ઇચ્છતા ન હોય ! ॥ ૯૦ ॥

द्रव्याणि वल्भावसरे व्रतीन्द्रः सदाददे द्वादश नाधिकानि ।
किं भावना पोषयितुं विशिष्य भवाब्धिपारप्रतिलम्भयित्रीः ॥ ९१ ॥

व्रतीन्द्रः सदा सर्वकालं सूरिपदप्राप्तिं मर्यादीकृत्य वल्भावसरे आहारकरणसमये द्वादश सूर्यसंख्ययैव द्रव्याणि धान्यानां नामग्राहं विकृतेस्त्वेकत्र शाकान्यपि नामग्राहं पानीयं च सर्वाण्यपि द्वादशान्तर्भावीनि आददे जग्राह नाधिकानि द्रव्याण्यग्रहीत। कदाचिदपीत्यर्थः। उत्प्रेक्ष्यते—अनित्यता-अशरणत्व-संसारत्व-एकत्व-अन्यत्व-अशुचित्व-आश्रव-संवर-निर्जरा-धर्म-लोक-बोधिसंज्ञा द्वादश भावनाः। पोषयितुं पुष्टाः कर्तुमिव। कथम्। विशिष्य विशेष-प्रकारेण कृत्वा। किंभूता भावनाः। भवः संसारः स एवाब्धिः समुद्रस्तस्य पारस्य परतीरस्य मोक्षवेलाकूलस्य लम्भयित्रीः प्रापयित्रीः। 'अन्यथा कथमदः प्रतिलम्भः' इति नैषधे। 'प्रति-लम्भः प्राप्तिः' इति तद्वृत्तौ॥

શ્લોકાર્થ

આચાર્યદેવે, સૂરિપદથી પ્રારંભીને આહાર કરવાના સમયે બાર દ્રવ્યથી અધિક દ્રવ્ય ગ્રહણ કર્યાં નહીં, તે જાણે સંસારસમુદ્રથી પાર ઉતારનારી અનિત્ય, અશરણ, સંસાર, એકત્વ, અન્યત્વ, અશુચિ, આશ્રવ, સંવર, નિર્જરા, ધર્મ લોક અને બોધિ એ બાર ભાવનાઓ પુષ્ટ કરવા માટે ન હોય ! ॥ ૯૧ ॥

प्रतिक्षितीन्द्रेण स सप्तपञ्चत्रिंशन्मिताः कातरितान्यसत्त्वाः ।
आहारदोषाः कृतपापपोषा द्वेष्या इव द्वेषजुषा निषिद्धाः ॥ ९२ ॥

प्रतिक्षितीन्द्रेण सूरिराजेन सह सप्तभिर्वर्तते । सप्तयुक्ता इत्यर्थः । तादृशाः पञ्चत्रिंशत् तैर्मिताः प्रमाणीकृताः । एतावता सप्तान्विताः पञ्चत्रिंशत् द्विचत्वारिंशद्भवन्ति । द्वाचत्वारिंशत्संख्याकाः । 'सोलस उग्गमदोसा सोलस उप्पायणाय दोसाय । दस एसणाइ दोसा मिलीय सव्वे विवायाला ॥' इति वचनात् । अथैतानेव पृथक् विवृणोति । श्राद्धश्राद्धीभ्यः षोडश दोषाः समुत्पद्यन्ते । तानेव दर्शयति—आध्यधर्मिक-औद्देशिक-पूतिकर्म-मिश्रकर्म-स्थापनाकर्म-प्राभृतिकर्म-प्रादुःकरण-क्रीतदोष-प्रामित्य—परावृत्तत्व-अभ्याहृत उद्भिन्नक-मालापक-आच्छेद्यक-अनिसृष्ट-अध्यवपूरकाः । अथ साधुसाध्वीभ्यः षोडश दोषा जायन्ते । तानेव दर्शयति—धात्रीदोष-दूतीदोष-निमित्तदोष-आजीवक-वनीपक-चिकित्सा-क्रोधदोष-मान-माया-लोभ-पूर्वसंस्तव-पश्चात्संस्तव-विद्यादोष-मन्त्रदोष-चूर्णदोष-योगदोषाः । अथैषणादोषा दश साधुश्राद्धेभ्यः समुत्पद्यन्ते । तानपि दर्शयति—शङ्कितदोष-म्रक्षितदोष-बहिर्निक्षिप्त-पिहितदोष-संहृतदोष-दायकदोष-उन्मिश्रदोष-अपरिणत-लिप्तदोष-छर्दितदोषाः । तथा प्रभोजनं कुर्वतां साधूनां प्रसङ्गात्पञ्च दोषा भवेयुः । तेऽप्युच्यन्ते—संयोजन अप्रमाण इङ्गाल-धूमसामान्य-अकारणदोषाः । केचित्सप्तचत्वारिंशदपि दोषान्प्रतिपादयन्ति । तस्मात्तेऽपि प्रोक्ताः । परं मौलास्तु द्विचत्वारिंशत्संख्याका एव । आहारस्य भोजनस्य दोषा अपगुणास्ते निषिद्धाः निवारिताः । एतावता सूरि(रयो) द्वाचत्वारिंशद्दोषनिर्मुक्तमाहारमभ्यवहरन्ति । किंभूता दोषाः । कातरं क्लीबं ततः शुद्धिविमुखं कुर्वन्तीति कातरयन्ति । कातरयन्ते स्मेति कातरिताः । 'तत्करोति तदाचष्टे' इति प्रक्रियासूत्रेण ञिप्रत्ययः । 'ञन्तन्तात् क्तः' इति क्तप्रत्ययः । ञिलोपे इट्प्रत्ययश्चेति सिद्धम् । उदाहरणं यथा नैषधे प्रथमकाव्ये—'नलः किंभूतः । सितच्छत्रितकीर्तिमण्डलः पूर्वोक्तयुक्तिरेव । सितं च छत्रं च सितच्छत्रं करोतीति सितच्छत्रयति सितच्छत्र्यते स्मेति सितच्छत्रिता कीर्तिमण्डले देशे येन' इति नरहर्याम । कातरीकृता हीनसत्त्वा विहिता अन्ये अपरे सत्त्वाः कर्मपरिणतिवशाच्चारित्रपालनासमर्थाः प्राणिनो यैस्ते । पुनः किंभूतां । कृतं निर्मितं पापस्य दुःकृतस्य पोषः पुष्टिर्यैः । पापोपचयकारिभिरित्यर्थः । केनेव निषिद्धाः । द्वेषजुषेव । यथा विरोधवता अतीववैरभाजा भूभुजा द्वेष्याः स्ववैरिणः पराक्रमेण निषिध्यन्ते मूलतोऽप्युच्छिद्यन्ते ॥

श्लोकार्थ

આચાર્યદેવ હીનસત્ત્વ કરનારા અને પાપોની પુષ્ટિ કરનારા એવા બેંતાલીસ દોષોથી રહિત નિર્દોષ આહાર હમેશાં ગ્રહણ કરતા હતા. (તે આ પ્રમાણે: આધાકર્મી, ઉદ્દેશિક, પૂતિકર્મ, મિશ્રકર્મ, સ્થાપનાકર્મ, પ્રાભૃતિકર્મ, પ્રાદુષ્કરણ, ક્રીત, પ્રામિત્ય, પરાવૃતત્વ,

અભ્યાહૃત, ઉદ્ભિનક, માલાપહત, આચ્છેદ્યક અનિસૃષ્ટ અને અધ્યવપૂરક એ સોળ ગૃહસ્થથી ઉત્પન્ન થયેલા; ધાત્રીદોષ, દૂતીદોષ, નિમિત્તદોષ, આજીવક, વનીપક, ચિકિત્સા, ક્રોધ, માન, માયા, લોભ, પૂર્વસંસ્તવ, પશ્ચાત્સંસ્તવ, વિદ્યાદોષ, મંત્રદોષ, ચૂર્ણદોષ, અને યોગદોષ એ સોળ સાધુસાધ્વીથી ઉત્પન્ન થયેલા; શંકિત, મક્ષિત, બહિર્નિક્ષિપ્ત, પિહિત, સંહૃત, દાયક, ઉન્મિશ્ર, અપરિણત, લિપ્તદોષ અને છર્દિતદોષ એ દશ ગૃહસ્થ અને સાધુ ઉભયથી ઉત્પન્ન થયેલા કુલ ૪૨ દોષ) જેમ શત્રુરાજા શત્રુઓનો મૂળમાંથી ઉચ્છેદ કરે તેમ આચાર્યદેવ આ ૪૨ દોષોનો મૂલથી જ નિષેધ કરતા હતા. વળી આહાર કરતી વખતે સંયોજના, અપ્રમાણ, ઈંગાલ, ધૂમ અને અકારણ આ માંડલીના પાંચ દોષો પણ સેવતા ન હતા. ॥ ९२ ॥

अंहोद्रुहामाभरणानि भिक्षोः किं द्वादशानां प्रतिमारमाणाम् ।
तपांसि यो द्वादशभेदभिन्नान्यपूपुषत्कायमशूशुषच्च ॥ ९३ ॥

यो भगवान् अनशन—मूनोदरिका-वृत्तिसंक्षेप-रसत्याग-काय क्ले-संलीनताः इति षड्विधं बाह्यं तपः । तथा प्रायश्चित्त—विनय-वैयावृत्य-स्वाध्यान-ध्याय-कायोत्सर्गाः इति षोढा आभ्यन्तरं तपः । षड् बाह्यानि षडाभ्यन्तराणीति द्वादशभिर्भेदैः प्रकारैः भिन्नानि पार्थक्यभाञ्जि तपांसि अपूपुषत् पुष्णाति स्म । उत्प्रेक्ष्यते—भिक्षोः साधोः प्रति अलेपाहारैक-भक्तपानसत्का प्रथमा एकमासस्य, द्वितीयाद्वि मास्याः, तृतीया त्रिमास्याः, चतुर्थी चतुर्मास्याः, पञ्चमी पञ्चमास्याः, षष्ठी षण्मास्याः, सप्तमी सप्तमास्याः । पूर्वविधिः सर्वास्वपि ग्राह्याः । अष्टमी सप्तरात्रिका । तत्र चतुर्विधाहारनिषेधकचतुर्थाः । तथा ग्रामाद्बहिः कायोत्सर्गकरणम् । नवमी सप्तरात्रिकी । उत्कटिकासनेन दण्डासनेनेवास्थानम् । दशमी सप्तरात्रिकी । साष्टम-भक्ता चतुर्विहारप्रत्याख्यानं च गोदुहिकासनेनावस्थानाम् । एकादशी एकरात्रिकीत्युच्यते । परमष्टमभक्तेन पूर्यते चतुर्विधाहारप्रत्याख्यानं च तृतीये दिने । ग्रामाद्बहिः कायोत्सर्गकरणम् । द्वादश्यपि ओकरात्रिकी । परं चतुर्विधाहारत्यागाष्टमभक्तेन पूर्यते तत्रानिमेषनेत्राभ्यां कायो-त्सर्गकरणम् । इत्थं सूत्रोक्तविधिविधानात्प्रतिमानां द्वादशसंख्याकानां प्रतिमारमाणां श्रमणा-नुष्ठानविशेषलक्ष्मीणामाभरणानीव भूषणानीवापूपुषत् । किंभूतानां प्रतिमारमाणाम् । अंहो-द्रुहामंहसां दुरन्तदुरितानां द्रुहां द्रोहकारिकाणां मूलादुच्छेदविधायकानां च पुनर्यो मुनीन्द्रः कायं स्वशरीरमशूशुषत् विकटोत्कटतपोभिः कृत्वा शोषयति स्म । कृशीकृतवानित्यर्थः ॥

શ્લોકાર્થ

આચાર્યદેવ અનશન, ઉણોદરિ, વૃતિસંક્ષેપ, રસત્યાગ, કાયક્લેશ અને સંલીનતા, એ બાહ્ય અને પ્રાયશ્ચિત્ત, વિનય, વૈયાવૃત્ય, સ્વાધ્યાય, ધ્યાન અને કાયોત્સર્ગ એ છ

અભ્યંતર, એમ બાર પ્રકારનાં તપ કરીને શરીરનું શોષણ કરતા હતા; એ તપ જાણે પાપકર્મોનો દ્રોહ કરનારી સાધુની બાર પ્રતિમાઓનાં આભરણો ન હોય ! ॥ ૯૩ ॥

गुरोः समीपे विजयादिदानवाचंयमेन्दोर्विधिना व्रतीन्द्रः ।
आलोचनां द्विर्ग्रहयांबभूव लोकद्वयस्येव विशुद्धये सः ॥ ९४ ॥

व्रतीन्द्रो हीरसूरिर्गुरोः स्वधर्माचार्यस्य तपस्यादातुर्वा विजय इति पदमादौ यस्य तादृशस्य दाननाम्न एतावता विजयदानसंज्ञस्य वाचंयमेन्दोः सूरेः समीपे पार्श्वे विधिना शास्त्रोक्तप्रकारेण द्विर्वारद्वयमालोचनां निःशल्यत्वेन निजाशेषपापप्रकाशनपूर्वकप्रायश्चित्तविशेषं ग्रहयांबभूव गृह्णाति स्म । 'गृह्णाति ग्रहयते लाति' इति क्रियाकलापे। उत्प्रेक्ष्यते—लोकयोरिहलोकपरलोकयोर्वर्तमानामुकभवयोर्द्वयस्य युगलस्य विशुद्धये निर्मलीकरणायेव ॥

શ્લોકાર્થ

હીરવિજયસૂરિજીએ પોતાના દીક્ષાગુરુ શ્રીવિજયદાનસૂરિજી પાસે, પોતાનાં સઘળાં પાપકર્મોને નિશલ્ય બનીને પ્રકાશવાપૂર્વક આલોક અને પરલોકની વિશુદ્ધિ માટે શાસ્ત્રોકતવિધિ પ્રમાણે બે વખત ભવઆલોચના લીધી હતી. ॥ ૯૪ ॥

उपोषणानां त्रिशतीं व्यतानीत्सूरीन्दुरालोचनयोर्द्वयोः सः ।
समीहमानो मनसाधिगन्तुं पदं त्रिलोकाग्रभवं किमेषः ॥ ९५ ॥

यः पातिसाहिसंमानितः स जगद्विख्यात एष प्रत्यक्षलक्ष्योऽस्मदादीनां दृग्गोचरीभवन् सूरीन्दुर्हीरसूरिचन्द्रो द्वयोरुभयोरालोचनयोर्द्विर्वारविहितदुःकृतालोचनप्रायश्चित्तयोरुपोषणानामुपवसनानां त्रिशतीं त्रयाणां शतानां समाहारस्त्रिशती तां सर्वाग्रेणेति संभाव्यते । व्यतानीत्करोति स्म । उत्प्रेक्ष्यते—त्रिलोकस्य । 'त्रिलोकनाथेन सता मखद्विषः' इति रघौ । 'त्रिलोकनाथास्त्रिलोकपूज्यास्त्रिलोकेश्वरा इति बृहच्छान्तौ । त्रैलोक्यस्याग्रे उपरितनप्रदेशे भवमुत्पन्नं यत्पदं यत्स्थानं मनसा अधिगन्तुं प्राप्तुं मोक्षस्थानं लब्धुमधिगत्य प्राप्येत्यर्थः' इति तद्वृत्तिः । मनसा स्वचित्तेन कृत्वा समीहमान एव वाञ्छन्निव ॥

શ્લોકાર્થ

ત્રણ લોકના અગ્રભાગે રહેલા મોક્ષને પ્રાપ્ત કરવાની ઇચ્છાવાળા જગદ્ગુરુએ બે વખતની ભવઆલોચનામાં આવેલા ત્રણસો ઉપવાસ કર્યા હતા. ॥ ૯૫ ॥

षष्ठात्सपादां द्विशतीं शमीन्द्रो व्यातन्तनीति स्म स नीतिचन्द्रः ।
साग्रेऽपि गव्यूतिशतद्वये स्वमाहात्म्यमिच्छञ्जिनवत्किमुर्व्याम् ॥ ९६ ॥

शमीन्द्रः शमवतां साधूनां मध्ये इन्द्रः पुरंदरो द्वयोरलोचनयोस्तथा अन्येऽपि सर्वे भूपतयः सपादां द्विशतीं पञ्चविंशत्यधिकशतद्वयीं षष्ठानामुपवासद्वयलक्षणानां व्यातन्तनीति स्म कृतवान् । स किंलक्षणः । नीतौ न्याये चन्द्रः । अथ वा 'सान्द्र' इति पाठः । दृढ अतिशायिन्यायविधाता । तत्र विषये वयमेवं विद्मः । उत्प्रेक्ष्यते वा—गव्यूतीनां क्रोशानां साग्रे पञ्चविंशत्यधिके शतद्वये । सपादक्रोशशतद्वयप्रमाणे इत्यर्थः । इति हैमनाममालानुगतव्याख्यानम् । 'तस्यां यथा साग्रे च गव्यूतिशतद्वये -' इति । जिनवत्तीर्थकरस्येव स्वस्य माहात्म्यं निजस्य सप्तानामीतीनां प्रशमनरूपादिकं महिमानमुर्व्यां पृथिव्यां किमिच्छन् काङ्क्षन्निव ॥

શ્લોકાર્થ

જેમ તીર્થંકર ભગવંત જ્યાં વિચરે ત્યાં બસો પચ્ચીસ કોશમાં દરેક જાતના ઉપદ્રવોના શમનરૂપ માહાત્મ્ય વિસ્તરે છે તેમ પૃથ્વી ઉપર જાણે પોતાના માહાત્મ્યને વિસ્તારવા માટે ન હોય તેમ ન્યાયચન્દ્ર આચાર્યદેવે ૨૨૫ છઠ્ઠ (બે ઉપવાસ) કર્યા હતા. ॥ ૯૬ ॥

द्वासप्ततिं सूरिसहस्ररश्मिः स्म निर्मिमीते पुनरष्टमानाम् ।
विद्मश्चतुर्विंशतिकात्रिकस्य प्रसत्तिमाधातुमना जिनानाम् ॥ ९७ ॥

सूरिषु सहस्ररश्मिः अधिकप्रतापत्वेन भानुमाली पुनर्द्वयोरालोचनयोरन्येषां च अष्टमानामुपवासत्रिकलक्षणानां द्वासप्ततिं निर्मिमीते स्म कृतवान् । उत्प्रेक्ष्यते—चतुर्विंशतिकानामतीतानागतवर्तमानरूपाणां त्रिकस्य त्रितयस्य जिनानां तीर्थकृताम् । चतुर्विंशतिस्त्रिभिर्गुणिता सती द्विसप्ततिर्भवेत् । एतावता द्वासप्ततिमिताईद्भट्टारकाणाम् । केवलज्ञानि-निर्वाणि-सागर-महायशः-विमल-सर्वानुभूति-श्रीधर-दत्त-दामोदर-सुतेजः-स्वामि-मुनिसुव्रत-सुमति-शिवगति-अस्ताघ-नमि-अनिल-यशोधर-कृतार्थ-जिनेश्वर-शुद्धमति-शिवंकर-स्यन्दन-संप्रतिनामान एतेऽतीतचतुर्विंशतिजिनाः । ऋषभ-अजित-शंभव-अभिनन्दन-सुमति-पद्मप्रभ-सुपार्श्व-चन्द्रप्रभ-सुविधि-शीतल-श्रेयांस-वासुपूज्य-विमल-अनन्त-धर्म-शान्ति-कुन्थु-अर-मल्लि-मुनिसुव्रत-नमि-नेमि-पार्श्व-वर्धमानाभिधाः एते वर्तमानचतुर्विंशतितीर्थकराः । पद्मनाथ-सुरदेव-सुपार्श्वक-स्वयंप्रभ-सर्वानुभूति-देवश्रुत-उदय-पेढाल-पोट्टिल-शतकीर्ति-सुव्रत-असम-निष्कषाय-निष्पुलाक-निर्मम-चित्रगुप्त-समाधि-संवर-यशोधर-विजय-मल्ल-देव-अनन्तवीर्य-भद्रकृत्संज्ञा एते त्वनागतचतुर्विंशतिरर्हन्तः । एतेषां चतुर्विंशतित्रितयजिनानां प्रसत्तिं स्वविषये प्रसन्नभावमाधातुमनाः कर्तुकाम इव विद्म इत्यर्थेऽत्र ॥

શ્લોકાર્થ

સૂર્ય સમાન તેજસ્વી આચાર્યદેવે ૭૨ અઠ્ઠમ (ત્રણ ઉપવાસ) કર્યા હતા. તે જાણે અતીત, અનાગત અને વર્તમાન એમ ત્રણ ચોવીસી તીર્થંકર ભગવંતોની પ્રસન્નતા પ્રાપ્ત કરવા માટે ન હોય ! (કેવલજ્ઞાની, નિર્વાણી, સાગર મહાયશ, વિમલ, સર્વાનુભૂતિ, શ્રીધર, દત્ત, દામોદર, સુતેજ, સ્વામિ, મુનિસુવ્રત, સુમતિ, શિવગતિ, અસ્તાઘ, નમિ, અનિલ, યશોધર, કૃતાર્થ, જિનેશ્વર, શુદ્ધમતી, વિવેક, સ્યંદન અને સંપ્રતિ **આ અતીત ચોવીસી** ! ઋષભ, અજિત, સંભવ, અભિનંદન, સુમતિ, પદ્મપ્રભ, સુપાર્શ્વ, ચન્દ્રપ્રભ, સુવિધિ, શીતળ, શ્રેયાંસ, વાસુપૂજ્ય, વિમલ, અનંત, ધર્મ, શાંતિ, કુંથુ, અર, મલ્લી, મુનિસુવ્રત, નમી, નેમનાથ, પાર્શ્વ અને વર્ધમાન **આ વર્તમાન ચોવીસી**. પદ્મનાભ, સુરદેવ, સુપાર્શ્વક, સ્વયંપ્રભ, સર્વાનુભૂતિ, દેવશ્રુત, ઉદય, પેઢાળ, પોટ્ટીલ, શતકીર્તિ, સુવ્રત, અમમ, નિષ્કષાય, નિષ્પુલાક, નિર્મમ, ચિત્રગુપ્ત, સમાધિ; સંવર, યશોધર, વિજય, મલ્લ, દેવ, અનંતવીર્ય અને ભદ્રકૃત્ **આ અનાગત (ભાવિ) ચોવીસી**. ॥ ૯૭ ॥

चक्रे य आचाम्लसहस्रयुग्मं स्वयं जिनं स्तोतुमवेक्षितुं वा ।
पृथक्सहस्रे रसनेक्षणानां त्रिदूमः फणीन्दोरिव लिप्समानः ॥ ९८ ॥

यो भगवान् आचाम्लानां सहस्रस्य दशशत्या युग्मं द्वन्द्वं चक्रे विंशतिशतीं विधत्ते स तत्र विषये वयमेव विज्ञो जानीमः । उत्प्रेक्ष्यते वा—जिनं वीतरागं स्वयमात्मनैव स्तोतुं स्तवनगोचरीकर्तुं पुनरवेक्षितुं विलोचनविषयं विधातुं द्रष्टुं रसनेक्षणानां जिह्वानयनानां पृथक्पृथक् सहस्रे लिप्समानः काङ्क्षन्निव । भगवन्तं स्तोतुं रसनानां द्विसहस्रं तथा अनिमेषं विलोकयितुं लोचनानां विंशतिशतीमीहमान इव । केषामिव । फणीन्द्रो रसनेक्षणानामिव । यथा शेषनागस्य रसनानां तथा ईक्षणानां सहस्रे स्तः । तस्य नागराजस्य सहस्रफणत्वेन द्विजिह्वत्वेन द्विनेत्रत्वेन सहस्रफणेषु रसज्ञानां नयनानां च द्विसंख्याभाक्त्वेन द्विसहस्री स्यात् । तथा चम्पूकथायाम्—'यस्यास्मिन्नुरगप्रभोरिव भवेज्जिह्वासहस्रद्वयम्' इति ॥

શ્લોકાર્થ

આચાર્યદેવે બે હજાર આયંબિલની તપશ્ચર્યા કરી હતી. જેમ શેષનાગને જીભ અને નયન મળીને બે હજાર ફણા થાય તેમ જિનેશ્વર ભગવંતની સ્તુતિ કરવા માટે આચાર્યદેવ

એક હજાર જીભ અને જિનેશ્વરનાં દર્શન માટે એક હજાર નેત્ર એમ કુલ બે હજાર મેળવવા માટે બે હજાર આયંબિલ કર્યા ન હોય ! ॥ ૯૮ ॥

आचाम्लकैर्विंशतिसंमितानि यः स्थानकान्यातनुते स्म सूरिः ।
निजस्य विंशत्यसमाधिपूर्वस्थानान्यपाकर्तुमना इवैषः ॥ ९९ ॥

यः सूरिराचाम्लकैराचाम्लनामतपोविशेषैः कृत्वा विंशतिसंख्यया संमितानि प्रमाणीकृतानि स्थानकानि—'अर्हति सिद्धे प्रवचनसूरि स्थविरेषु वाचके साधौ । ज्ञाने भक्तिर्दर्शनशुद्धिः सद्विनयसंपन्नाः ॥ संध्याद्वयेऽप्यवश्यावश्यककरणेन शुद्धचारित्रम् । ब्रह्मव्रतधारिवशः क्रियारताः पूर्णपौषधतः ॥ नवतपसा च तपस्वी सुसंविभागेन गोतमस्वामी । वैयावृत्त्येन जिनाः समताभावाच्च चारित्रम् ॥ ज्ञानं नूतनपठनात्संघार्चाविरचितैः श्रुतज्ञानम् । जिनशासनोन्नतिकृतेस्तीर्थं त्वेभिभवेदर्हन् ॥' एतदभिधानानि विंशतिस्थानकानि आतनुते स्म विदधे । उत्प्रेक्ष्यते—निजस्यात्मनः विंशतिसंख्याकानि असमाधिरिति पदं पूर्वं येषां तादृशानि स्थानानि । तानि यथा—अतित्वरितं प्रचलति, अप्रमार्ज्य स्थानकं कुरुते, दुःप्रमार्ज्य स्थानकं कुरुते, अन्यजनैः सह नारदवत्क्लेशं कारयति, पीठशय्यापट्टकादीनि अधिकानि रक्षयति, आचार्योपाध्यायरत्नाधिकानां संमुखं वक्ति, स्थविरादीन् घातयति, भूतानि विनाशयति, पुनः पुनः क्रोधं कुरुते, सदैव क्रोधतो भाषयितुमपि न शक्यते, पृष्ठे गुणवता विरुद्धं भाषते, मुहुर्मुहुर्निश्चयभाषां भाषते, अधिकरणान्युदीरयति, अकाले स्वाध्यायं कुरुते, अस्थण्डिलात्स्थण्डिलं गच्छन् पादौ न प्रमार्जयति स्वयं च खण्डितहस्ताभ्यां विहरति, अकाले दीर्घं बाढस्वरेण भाषते, स्वयं निःप्रयोजनं क्लेशं कुरुते, गच्छभेदं स्वयं करोति परांश्च कारयति परेषां, यावद्भास्वानुदयत्यस्तमयति च तावद्भुङ्क्ते, अशुद्धमानमप्याहारं न मुञ्चति, एवंविधानि विंशत्यसमाधिस्थानकानि अपाकर्तुमना निराकर्तुकाम इवैषः ॥

શ્લોકાર્થ

આચાર્યદેવે આયંબિલની તપશ્ચર્યા દ્વારા વિશસ્થાનકતપની આરાધના કરી. જલ્દી જલ્દી ચાલે, પ્રમાર્જ્યા વિના બેસે, સારી રીતે પ્રમાર્જના કરે નહીં, નારદની જેમ બીજાઓ સાથે ક્લેશ કરાવે, પીઠશયન આદિ અધિક ઉપકરણ રાખે, આચાર્ય ઉપાધ્યાય આદિ વડિલોની સામે બોલે, સ્થવીરોને મારે, જીવોનો નાશ કરે, વારંવાર ક્રોધ કરે, ક્રોધથી અબોલી લે, ગુણવાન પુરુષોની નિંદા કરે, વારંવાર નિશ્ચયભાષા બોલે, અધિકરણોને પ્રગટ કરે, અકાળે સ્વાધ્યાય કરે, એક ગામથી બીજે ગામ જતાં પગની પ્રમાર્જના કરે નહીં, અકાળે મોટા સ્વરે બોલે, સ્વયં નિષ્પ્રયોજન ક્લેશ કરે, ગચ્છભેદ સ્વયં કરે અને બીજાને

કરાવે, સૂર્યોદય થતાં જ અને સૂર્યાસ્ત થતાં સુધી આહાર કરે અને અશુદ્ધ આહારનો ત્યાગ ન કરે — આ ૨૦ અસમાધિ સ્થાનકનું નિરાકરણ કરવાની ઇચ્છાથી જાણે આચાર્યદેવે વિંશસ્થાનક તપની આરાધના કરી ન હોય ॥ ૯૯ ॥

चक्रे पुनर्निर्विकृतीः सहस्रे द्वे सूरिरद्वैतधृतिं दधानः ।
किं संसृतिं निर्विकृतिं विधातुं हृषीकपङ्क्तिं किमुत स्वकीयाम् ॥ १०० ॥

सूरिः पुनर्यथा चाम्लानि तथैव द्वे सहस्रे सहस्रयोर्द्वयीमेतावता विंशतिशतीं दधि-दुग्ध-पक्वान्न-तैल-गुड-घृतरूपषड्विकृतिपरित्यागरूपा निर्विकृतीस्तपोग्रहविशेषांश्चक्रे कृतवान । किंलक्षणः । धृतिं रसनारसलाम्पट्यपरित्यागमयीं संतोषं दधानो बिभ्राणः । उत्प्रेक्ष्यते—संसृतिं संसारं भूयो भूयो दोषोत्पादकत्वेन अनन्तजन्ममरणोपचयकारणलक्षणा विकृतिर्विकारस्तद्रहिताम् । विरलामित्यर्थः । कर्तुं विधातुमिव । उताथ वा स्वकीयां स्वात्मसंबन्धिनीं हृषीकपङ्क्तिमिन्द्रियश्रेणीम् । पञ्चाक्षीमित्यर्थः । निर्विकृतिं विकारविकलां स्पर्शन-रसन-घ्राण-नयन-श्रवणानामिन्द्रियाणां स्पर्श-प्रसर-गन्ध-रूप-शब्देषु प्रवृत्तिकरणलक्षणेषु तत्तद्व्यापारेषु मन्दीभवनान्निवृत्तिकारिकां कर्तुमिव वा ॥

શ્લોકાર્થ

પાંચ ઇન્દ્રિયોનું દમન કરવા માટે અદ્વિતીય ધૃતિને ધારણ કરતાં આચાર્યદેવે વિગઈઓનાં ત્યાગપૂર્વક બે હજાર આયંબિલ કર્યાં હતાં; તે જાણે આચાર્યદેવે સંસારને પણ નિર્વિકાર બનાવવા માટે કર્યાં ન હોય ! ॥ ૧૦૦ ॥

स एकदन्तिस्फुरदेकसिक्थमुखानि तीव्राणि तपांसि चक्रे ।
प्रभुः प्रणेतुं स्पृहयन्निवैकभवामनन्तामपि संसृतिं स्वाम् ॥ १०१ ॥

स सूरिरेकदन्तिरेकस्मिन्धारके पात्रे । यत्रानवच्छिन्नं पानीयान्नादिकं पतेत्सा एकदन्तिरुच्यते । यस्मिंश्चैकमेव सिक्थं भुज्यते नान्यत्तदेकसिक्थमेकदन्त्या स्फुरद्दीप्यमानम् । युक्तमित्यर्थः । एकसिक्थं तत्प्रमुखमाद्यं येषु तादृशानि तीव्राणि अतिकठिनानि तपांसि चक्रे विनिर्मितवान । उत्प्रेक्ष्यते—अनन्तां स्वभावपरिणामेन न विद्यते अन्तोऽवसानं यस्यास्तादृशीं स्वां स्वकीयां संसृतिं संसारमेक एव भवोऽवतारो यस्यास्त्यादृशीं प्रणेतुं निर्मातुं स्पृहयन्निव ॥

શ્લોકાર્થ

જાણે પોતાના અનંત સંસારને એકભવરૂપે બનાવવા માટે ઇચ્છતા ન હોય તેમ આચાર્યદેવ જેમાં એક દાણો જ લેવાય તેવી 'એકદત્તી' રૂપ ઉગ્રતપશ્ચર્યા કરતા હતા. ॥૧૦૧॥

उपोषणानामपुषत्सहस्रत्रयं स तस्योपरि षट्शतीं च।
सरोजजन्मा धरणीधरेन्द्रं सुधाशनानामिव चारुचूलाम् ॥ १०२ ॥

स सूरिरुपोषणानामुपवासानां सहस्राणां दशशतीनां त्रयं त्रिकं त्रिसहस्रीमपूपुषत पुष्णाति स्म। चकारेत्यर्थः। च पुनस्तस्य सहस्रत्रयस्य उपरि षट्शतीं षट्शतानि उपवासान् चकार। क इव। सरोजजन्मेव। यथा कमलभूर्ब्रह्मा सुधाशनानां देवानां धरणीधरेन्द्रं मेरुं व्यधात्। पुनस्तस्योपरि चार्वीं प्रकृष्टां चूलां विधत्ते स्म। यद्यपि धरणीधरेन्द्र इति नाम्ना मेरुरायातस्तथापि धरणीधरेन्द्रो हिमाद्रिरप्युच्यते। तस्यापि नगाधिराजत्वं वर्तते। परं तस्मिन् चूला नास्ति, तन्निरासार्थं सुधाशनानामित्युक्तम्। सुराद्रिर्मेरुरेव नापरः॥

શ્લોકાર્થ

જેમ બ્રહ્માએ મેરૂપર્વત બનાવીને તેના ઉપર ચૂલિકા બનાવી તેમ હીરવિજયસૂરિજીએ ત્રણ હજાર ઉપર છસો (૩૬૦૦) ઉપવાસ કર્યા હતા. ॥ ૧૦૨ ॥

एकाशनाचाम्लयुतैर्यतीन्दुरुपोषणैर्निर्गलितान्तरायम्।
त्रयोदश व्यातनुते स्म मासाञ्शिक्षामिव स्वीयगुरोस्तपोऽसौ ॥ १०३ ॥

असौ यतीन्दुः सूरिः स्वीयगुरोः विजयदानसूरेः तपोऽनुष्ठानविशेषं व्यातनुते स्म निर्ममे। कान्। मासान्। त्रिंशद्वासरान्यावत्। किंभूतान् मासान्। त्रयोदश विश्वेदेवप्रमितान् त्रयोदशसंख्याकान्। कथम्। निर्गलितान्तरायं विगतविगतविघ्नम्। कैःकैः। उपोषणैरुपवासैः। किंभूतैः एकाशनाचाम्लयुतैः प्रथममुपवासः, तत एकाशनकमेकभक्तम्, तत आचाम्लं केवलं जलेन रुक्षान्नाशनम्, पुनरुपवासः, अनया रीत्या निर्विघ्नं त्रयोदशमासीं यावद्विजयदानसूरेस्तपो विदधे। उत्प्रेक्ष्यते—स्वीयगुरोरासेवनाग्रहणादिकां शिक्षामिवातनुते स्म॥

શ્લોકાર્થ

આચાર્યદેવે પોતાના ગુરુ શ્રીવિજયદાનસૂરીશ્વરજીના નિમિત્તે ઉપવાસ, એકાસણું, આયંબિલ, પછી ઉપવાસ, એકાસણુ, આયંબિલ પછી ઉપવાસ, એકાસણુ અને આયંબિલ આ રીતે સતત તેર માસ સુધી તપ કર્યું હતું. તે જાણે પોતાના ગુરુદેવની ગ્રહણશિક્ષા અને આસેવનશિક્ષાને વિસ્તારવા માટે ન હોય ! ॥ ૧૦૩ ॥

त्रिधा समाराद्धुमनाः समग्रज्ञानानि चैकादशयुग्ममासान् ।
तपांसि तीव्राणि चकार योगैः परीषहाञ्जेतुमिवेहमानः ॥ १०४ ॥

स सूरिरेकादशानां युग्मं येषु । एकादश द्वाभ्यां गुणिता द्वाविंशतिर्जाता । तादृशान्मासान् द्वाविंशतिमासान्यावद्योगैरङ्गोपाङ्गादिसूत्राणां योगवहनैः कृत्वा तीव्राण्युपवासाः चाम्लादिरूपाणि तपांसि चकार कृतवान् । किं कर्तुमनाः । त्रिधा त्रिभिर्मनोवाक्कायलक्षणैः कृत्वा समग्राणि मतिश्रुतावधिमनःपर्यवकेवललक्षणानि पञ्चापि ज्ञानानि समाराद्धुमनाः सम्यगाराधयितुंकामः । उत्प्रेक्ष्यते—क्षुधा–तृषा–शीत–उष्ण–दंशमशक–अचेल–अरति–स्त्री–चर्या–निषधा–शय्या–आक्रोश–वध–याचन–अलाभ–रोग–तृण–मल–सत्कार–प्रज्ञा–अज्ञान–सम्यक्त्व रूपान् द्वाविंशतिसंख्याकान् परीषहान् जेतुमीहमान इव ॥

શ્લોકાર્થ

આચાર્યદેવે અગિયાર અંગ અને ઉપાંગઆદિ સમ્યક્જ્ઞાનની આરાધના માટે યોગોદ્‌વહનપૂર્વક બાવીસ માસ સુધી સતત આયંબિલની ઉગ્ર તપશ્ચર્યા કરી હતી, તે જાણે બાવીસ પરીષહોને જીતવા માટે કરી ન હોય ॥ ૧૦૪ ॥

उग्रैस्तपोभिर्द्युनिशं त्रिमासीं यत्सूरिमन्त्रं विधिनाराराध ।
श्रीशासनाधित्रिदशैर्वशीन्द्रः स्वयं स्वयंभूरिव सेव्यमानः ॥ १०५ ॥

यो वशीन्द्रो योगीश्वरः उग्रैः पारणकेष्वाचाम्लयुक्तैश्चतुर्थषष्ठाष्टमादिरूपैस्तपोभिरभिग्रहविशेषैः कृत्वा त्रिमासीं मासत्रयीं यावत् द्युनिशमहोरात्रं सूरिमन्त्रमाचार्यपदस्थापनगोतमविद्यां विधिना सम्यक् तत्कल्पशास्त्रपूर्वाचार्यप्रोक्तप्रकारेणाराराध साधयति स्म । किं

क्रियमाणः। स्वयंभूर्जिनेन्द्र इव श्रिया युक्तैरनेकदेवदेवीवृन्दाधिपत्यकलितैः शासनस्य जिनमतस्याधित्रिदशैरधिष्ठायिकैर्देवैर्वाग्वादिनी-त्रिभुवनस्वामिनी-श्रीदेवी-यक्षराज-गणिपिटक-प्रमुखसुरासुरैः स्वयमात्मना सेव्यमान उपास्यमानः ॥

श्लोकार्थ

શ્રી જિતશાસનના અધિષ્ઠાયકો વાગ્વાદિની, ત્રિભુવનસ્વામિની, શ્રીદેવી, યક્ષરાજ અને ગણિપિટક આદિ સુરાસુરો વડે સેવાતા શ્રીતીર્થંકર ભગવંતની જેમ સુરાસુર વડે સેવાતા જગદ્ગુરુએ આયંબિલ, ઉપવાસ, છઠ્ઠ, અઠ્ઠમઆદિ ઉગ્ર તપશ્ચર્યા નિરંતર ત્રણ માસ સુધી કરીને સૂરિમંત્રની વિધિપૂર્વક આરાધના કરી હતી. ॥ १०५ ॥

सूरीन्दुरेकाग्रमनाश्चतस्रः स्वाध्यायकोटीर्गणयांबभूव ।
निर्वेदिताशेषशरीरभाजां चतुर्गतानामिव जैत्रमन्त्रान् ॥ १०६ ॥

सूरीन्दुरेकाग्रमेकतानं मनश्चेतो यस्या व्यग्रान्तःकरणः सन् स्वाध्यायानां सिद्धान्तप्रकरण-परिवर्तन-गणन-चिन्तनरूपाणां चतस्रः चतुःसंख्याकाः कोटीः शतीशतसहस्राणां गणयांबभूव गणयति स्म । उत्प्रेक्ष्यते—निर्वेदं खेदं प्रापिता नीता अशेषाः संसारवर्तिनः समस्ताः शरीरभाजः प्राणिनो याभिस्तादृशीनां नरकतिर्यङ्मनुष्यदेवलक्षणानां चतसृणां गतीनां जैत्रान् जयनशीलान्मन्त्रानिव गणयांचकार ॥

श्लोकार्थ

આચાર્યદેવે એકાગ્ર ચિત્તથી ચાર ક્રોડ ગાથા શ્લોકઆદિનો સ્વાધ્યાય કર્યો હતો; તે શ્લોકો જાણે સંસારથી નિર્વેદ પામેલા ભવ્ય જીવોની ચાર ગતિને છેદવા માટેના મંત્રો ન હોય ! ॥ १०६ ॥

ग्रन्थावलीं निर्मितवान्विशुद्धां निजां मनोवृत्तिमिव व्रतीन्द्रः ।
अदीक्षयद्यः शतशो वशीशः शिष्यानस्वशिष्यीकृतशक्रसूरिः ॥ १०७ ॥

यो व्रतीन्द्रो ग्रन्थावलीं शास्त्रश्रेणीमशुद्धां विशुद्धां कूटवर्णविरहितां निर्मितवान् शोधयामास । कामिव । निजामात्मीयां मनोवृत्तिमिव स्वान्तव्यापृतिमिव विशुद्धां निष्पापां

निर्मितवान् । पुनर्यो वशीशः जितेन्द्रियेन्द्रः योगिजम्भारातिः शतशः शतसंख्याकान् शिष्यान् विनेयान् अदीक्षयत् दीक्षां ग्राहयति स्म। किंभूतः । शिष्यीकृतो बुद्ध्या शास्त्रपरिज्ञानेन च निजान्तेवासिविहितः शक्रसूरिः पुरंदराचार्यः बृहस्पतिर्येन । 'ईदृशीं गिरमुदीर्य बिडौजाः जोषमासनविशिष्य बभाषे । नात्र चित्रमभिधाकुशलत्वे शैशवावधि गुरुर्गुरुरस्य' ॥ इति सूरेरातपस्यासमयं तपःक्रियानुष्ठानादिवर्णनम् ॥

श्लोकार्थ

આચાર્યદેવે પોતાની વિશુદ્ધ મનોવૃત્તિની જેમ કેટલાક નવ ગ્રંથોનું સર્જન અને પ્રાચીન ગ્રંથોનું સંશોધન કર્યું હતું. પોતાની પ્રતિભાશકિતથી જેમણે બૃહસ્પતિને શિષ્યરૂપે બનાવ્યો છે તેવા આચાર્યદેવે સેંકડો શિષ્યોને પ્રવ્રજ્યા પ્રદાન (દીક્ષા) કર્યું હતું ॥ ૧૦૭ ॥

यत्पण्डिताः सार्धशतं बभूवुः संप्राप्तसिद्धान्तपयोधिपाराः ।
दिवेर्ष्ययैकं धिषणं दधत्या वागीश्वराः किं विधृता धरित्र्या ॥ १०८ ॥

यस्य सूरेः पण्डिताः प्रज्ञांशपदधारिणः सार्धशतमेकपञ्चाशदुत्तरं शतं संख्या येषां तादृशा बभूवुः संजाताः । किंभूता । संप्राप्तोऽधिगतः सिद्धान्तस्यागमस्य उपलक्षणात् स्वसमयपरसमयप्रवर्तमानशास्त्रसंदोहस्वरूपस्य पयोधेः समुद्रस्य पारो यैस्ते । उत्प्रेक्ष्यते— एकमेव धिषणं बृहस्पतिम् । 'वाचस्पतिर्द्वादशार्चिर्धिषणः फाल्गुनीभवः' इति हैम्याम् । दधत्या धारयन्त्या दिवा स्वर्लोकेन अमरावत्या वा सममीर्ष्यया स्पर्धया धरित्र्या धरित्रीभुवा सार्धशतं वागीश्वराः सुराचार्या विधृताः किं ध्रियन्ते स्म इव ॥

श्लोकार्थ

સિદ્ધાંતરૂપી સમુદ્રનો પાર પામનારા અર્થાત્ સ્વપરશાસ્ત્રના પારગામી એવા પંડિતપદ-(પંન્યાસપદ)ને ધારણ કરનારા પચાસ (૫૦) શિષ્યો હતા. તે જાણે સ્વર્ગલોકની સાથે સ્પર્ધા કરતી પૃથ્વીએ પચાસ બૃહસ્પતિઓ ધારણ કર્યા ન હોય ! ॥ ૧૦૮ ॥

समाभवन्वाचकवारणेन्द्रा यस्योल्लसद्वाग्लहरीविलासाः ।
गाम्भीर्यभाजो गुणरत्नपूर्णास्तरङ्गिणीनामिव जीवितेशाः ॥ १०९ ॥

यस्य भट्टारकस्य सप्तसंख्याका वाचकेषु उपाध्यायेषु विषये कुमतिमतप्रबलबलाविदलनेन वारणेन्द्राः कुञ्जरराजाः अभवन् संजायन्ते स्म। के इव। तरङ्गिणीनां जीवितेशा इव। यथा नदीनां नाथाः सप्तसंख्याका भवन्ति। यदुक्तं हैम्याम्—'द्वीपान्तरैरसंख्यास्ते सप्तैवैते तु लौकिकाः' इति द्वये अपि। किंभूताः। उल्लसन्तः स्फुरन्तो वाचो वाण्य एव लहर्यः कल्लोलास्तेषां विलासा विभ्रमा वैचित्र्यो येषु येषां वा। पुनः किंविशिष्टाः। गाम्भीर्यं गम्भीरिमाणमलब्धमध्यत्वं भजन्तीति। पुनः कथंभूताः। गुणा एव रत्नानि मणयस्तैः पूर्णा निर्भरभृताः ॥

श्लोकार्थ

આચાર્યદેવની ઉપાધ્યાયપદવીને ધારણ કરનારા સાત શિષ્યો હતા. તે સ્ફુરાયમાન વાણીરૂપી તરંગોની જેમાં વિચિત્રતા છે (અથાત્ વાક્પટુ), ગંભીરતાને ધારણ કરનારા અને ગુણોરૂપી રત્નો વડે પરિપૂર્ણ એવા સાત સમુદ્ર સમાન સાત ઉપાધ્યાયો હતા. ॥ ૧૦૯ ॥

क्षमां दधानस्य च गौरिमाणं पदाब्जभृङ्गायितचक्रिणश्च ।
द्वे यस्य जाते यतिनां सहस्रे विलोचनानामिव भोगिभर्तुः ॥ ११० ॥

यस्य सूरेर्यतिनां साधूनाम्। 'ब्रह्मशर्मभरचारुयतीव' इति नैषधे। अतो यतिशब्द इकारान्तो नकारान्तश्च। द्वे सहस्रे विंशतिशती जाते। कस्येव। भोगिभर्तुरिव। यथा नागराजस्य विलोचनानां चक्षुषां द्वे सहस्रे स्तः सहस्रफणत्वात्। किंभूतस्य यस्य भोगिभर्तुश्च। क्षमां क्षान्तिं सर्वसहतां धरित्रीं दधानस्य बिभ्राणस्य। च पुनर्गौरिमाणं सुवर्णवर्णतां श्वेतिमानं च। 'गौरः श्वेतपीतयोः' इत्यनेकार्थः। पुनः किंभूतस्य। पदाब्जयोश्चरणारविन्दयोः भृङ्गायिता भ्रमरवदाचरिताश्चक्रिणः चक्रवर्तिनो महाराजा नागाश्च यस्य। 'दर्वीकरः कञ्चुकिचक्रिगूढपात्' इति हैम्यां गुरुनागेन्द्रयोर्विशेषणानि ॥

श्लोकार्थ

જેમ શેષનાગને હજાર ફણા હોવાથી બે હજાર નેત્રો છે તેમ આચાર્યદેવને બે હજાર સાધુઓનો પરિવાર હતો. તે સાધુઓ ક્ષમાશીલ, કંચનવર્ણીય કાયાવાળા અને જેમના ચરણકમલે રાજામહારાજાઓ ભ્રમરરૂપે બન્યા હતા તેવા સમર્થ બે હજાર સાધુઓનો પરિવાર હતો. ॥ ૧૧૦ ॥

शीलं परिष्कारमिवोद्वहन्त्यः सर्वानुवादा इव चन्दनायाः ।
यस्याप्तवाङ्मानसराजहंस्यः साध्व्यो बभूवुस्त्रिशतीमिताश्च ॥ १११ ॥

यस्य सूरेस्त्रयाणां शतानां समाहारस्त्रिशती त्रीणि शतानि तया मिताः प्रमाणीकृताः साध्व्यो यतिन्यो बभूवुः संजाताः । किंभूताः । आप्तानां तीर्थकृतां वाग्वाणी सिद्धान्तः । 'आप्तोक्तिः समयागमौ' इति हैमीवचनात् । सैव मानसं राजहंसनिवाससरस्तत्र खेलने राजहंस्यः । सिद्धान्तस्वाध्यायध्यानपरा इत्यर्थः । किं कुर्वन्त्यः । उद्वहन्त्यः उत्प्राबल्येन वहन्त्यो धारयन्त्यः । किम् । शीलं त्रिधापि ब्रह्मचर्यम् । कमिव । परिष्कारमिव आभरणमिव । 'परिष्काराभरणे च' इति हैम्याम् । उत्प्रेक्ष्यते—चन्दनायाः चन्दनबालायाः सर्वानुवादा इव सर्वशीलागमादिकमनुवदन्ति अनुकुर्वन्तीति । चन्दनातुल्या इत्यर्थः ॥

श्लोकार्थ

શીલરૂપી અલંકારને ધારણ કરતી, તીર્થંકર ભગવંતનાં શાસ્ત્રોરૂપી માનસરોવરમાં રાજહંસી સમાન, સ્વાધ્યાય-ધ્યાનમાં તત્પર તેમજ આર્યાચંદનબાળાની તુલનાને ધારણ કરતી ત્રણસો સાધ્વીઓ આચાર્યદેવની નિશ્રામાં હતી. ॥ ૧૧૧ ॥

व्रजे यतीनां विजयाद्यसेनप्रभोर्ददौ सूरिपदं य एकम् ।
नक्षत्रताराग्रहमण्डलेऽपि वेधा यथा राजपदं सुधांशोः ॥ ११२ ॥

यः सूरिर्यतीनां व्रजे श्रमणानां गणे सत्यपि विजय इति पदमाद्यं प्रथमं यत्र तादृशः सेन एतावता विजयसेननामा प्रभुर्मुनिः स्वामी तस्य नान्यस्य एकं सूरिपदमाचार्यपदं ददौ दत्तवान् । यथा इवार्थे । क इव । वेधा इव । यथा ब्रह्मा जैनमते नक्षत्राणामष्टाविंशतिसंख्यानां ताराणां षट्षष्टिसहस्रकोटिकोटयस्तथा पञ्चसप्ततिकोटय एतावत्प्रमाणानां तारकाणां तथा ग्रहाणामष्टाशीतिप्रमितानां कलिकालनाम्नि पञ्चमारके नराणामल्पायुष्काल्पबलानामेव सूर्यादिकानां मण्डले समूहे सत्यपि सुधांशोश्चन्द्रस्यैव एकं राजपदं दत्तवान ॥ इति परिवारः ॥

श्लोकार्थ

બ્રહ્માએ નક્ષત્ર, ગ્રહ અને તારાઓના સમૂહમાં જેમ એક ચન્દ્રને જ રાજપદ અર્પણ કર્યું તેમ આચાર્યદેવે વિશાળ સાધુસમુદાયમાં એક વિજયસેનસૂરિજીને જ આચાર્યપદ અર્પણ કર્યું હતું. અર્થાત્ એક જ આચાર્ય હતા. ॥ ૧૧૨ ॥

यस्योपदेशाद्बहवो विहाराः संजज्ञिरे मन्दिरचैत्ययुक्ताः ।
त्वष्ट्रा क्षितौ वस्तुमिवामृतस्वःश्रीभिर्व्यधाप्यन्त विलाससौधाः ॥ ११३ ॥

यस्य प्रभोरुपदेशाद्बहवोऽनल्पसंख्याका विहारा जिनप्रासादाः संजज्ञिरे । किंभूताः । मन्दिरचैत्ययुक्ताः गृहदेवतालयसहिताः । 'देहरासर' इति प्रसिद्धिः । एतावता गृहचैत्यान्यप्येकान्यासन् । उत्प्रेक्ष्यते—अमृतस्वःश्रीभिरपवर्गस्वर्गलक्ष्मीभिः कर्त्रीभिः क्षितौ भूमण्डले वस्तुं निवासं कर्तुं त्वष्ट्रा विश्वकर्मणा कर्त्रा विलाससौधा लीलागृहा व्यधाप्यन्त कारिता इव ॥

श्लोकार्थ

આચાર્યદેવના ઉપદેશથી સેંકડો જિનમંદિરો બંધાવાયાં; તે જાણે બ્રહ્માએ પૃથ્વી ઉપર સ્વર્ગ અને અપવર્ગની લક્ષ્મીને વસવા માટેનાં ક્રીડાગૃહો બનાવ્યાં ન હોય ! ॥ ૧૧૩ ॥

पञ्चाशदर्हत्प्रतिमाप्रतिष्ठाः प्रभुः पृथिव्यामनुतिष्ठति स्म ।
दिशश्चतस्रोऽप्यपुनाद्विहारैः प्रभाप्रसारैरिव भानुमाली ॥ ११४ ॥

प्रभुः सूरिः अर्हत्प्रतिमानां शतसहस्रसंख्याकानां जिनबिम्बानां प्रतिष्ठा वासक्षेपाञ्जनशलाकादिकादिक्रियाभिः प्रतिष्ठापनानि पञ्चाशत्संख्याकाः पृथिव्यां गुर्जरसौराष्ट्रमरुमेदपाटलाटमेवातकुशावर्तादि मण्डलभूमण्डलमध्ये अनुतिष्ठति स्म कृतवान् । पुनश्चतस्रश्चतुःसंख्याकाः पूर्वपश्चिमदक्षिणोत्तरसंज्ञा दिशो हरितो विहारैः स्वविचरणैः कृत्वा अपुनात् पवित्रीचकार । क इव । भानुमालीव । यथा भास्वान् प्रभाप्रसारैः स्वकिरणविस्तारैः कृत्वा चतस्रोऽपि दिशः पुनीते ॥

श्लोकार्थ

આચાર્યદેવે સેંકડો હજારોની સંખ્યામાં જિનબિંબોની 'અંજનશલાકા' વિધિ કરી, અને ગુર્જર, સૌરાષ્ટ્ર, મારવાડ, મેવાડ, મહારાષ્ટ્ર આદિ દેશોમાં પચાસ જિનચૈત્યોની પ્રતિષ્ઠાવિધિ કરી. જેમ સૂર્યનાં કિરણોનો વિસ્તાર ચારે દિશાને પવિત્ર કરે તેમ આચાર્યદેવે પોતાના વિહારથી ચારે દિશાઓને પવિત્ર કરી હતી. ॥ ૧૧૪ ॥

यस्मिन्पुनाने भुवमर्बुदाद्रिसमेतसिद्धाचलरैवतेषु ।
संघाधिपाः पाण्डववच्छतानि त्रीणि त्रिकेणाभ्यधिकान्यभूवन् ॥ ११५ ॥

यस्मिन् सूरिशक्रे भुवं पृथिवीपीठं पुनाने पवित्रीकुर्वाणे सति अर्बुदाद्रिः हिमाचल-नन्दनगिरिः वृषभदेववासुपूज्यारिष्टनेमिमहावीरवर्जं विंशतितीर्थकृतां निर्वाणभूमाकल्याणकपावनीकृतं संमेताचलः शत्रुंजयो विमलाचलः रैवतो गिरिनारगिरिः एतत्प्रमुखेषु तीर्थेषु पाण्डववत्पाण्डुनन्दना इव त्रिकेण त्रयेणाधिकानि त्र्युत्तराणि त्रीणि शतानि संघाधिपाः संघपतयः अभूवन् समजायन्त ॥

શ્લોકાર્થ

આચાર્યદેવે પોતાના વિહારથી પૃથ્વીને પાવન કરતાં અર્બુદાચલ, સિદ્ધાચલ અને સમેતશિખર આદિ તીર્થોના, પાંડવોની જેમ ત્રણસો ને ત્રણ (૩૦૩) સંઘપતિઓ બનાવ્યા. અર્થાત્ તેઓના ઉપદેશથી તેટલા સંઘ નીકળ્યા. ॥ ૧૧૫ ॥

आत्मा भृतो येन जिनेश्वराद्रितीर्थादियात्रोद्भवपूर्णपुण्यैः ।
प्राक्श्रृङ्गिशृङ्गागमनोद्गतांशुभारैरिवाम्भोरुहिणीवरेण ॥ ११६ ॥

येन भगवता जिनेश्वराद्रिः शत्रुंजयशैलः । 'पञ्चाशदादौ किल मूलभूमेर्दशोर्ध्वभूमेरपि विस्तरोऽस्य । उच्चत्वमष्टौ तु योजनानि मानं वदन्तीह जिनेश्वराद्रेः ॥' इति नगरपुराणोक्तमन्तर्वाच्यान्तर्गतमत्र लिपीकृतमस्ति । स एव तीर्थः सिद्धिगमनस्थानम् । तीर्थशब्दः पुंनपुंसकलिङ्गे । स एव तदेव वा आदौ येषां तेषां यात्रा दर्शनं स्पर्शनं तदर्हतां द्रव्यभावस्तवार्चनातपोविधानादिकाः क्रियास्ताभ्यः उद्भव उत्पत्तिर्येषां तादृशैः पूर्णैरन्यूनैः पुण्यैः सुकृतैः कृत्वा आत्मा स्वप्राणी भृतः संपूरितः । केनेव । अम्भोरुहिणीवरेणेव । यथा भानुमालिना प्राक्शृङ्गी पूर्वाचलः तस्य शृङ्गे शिखरे आगमनेनोपगमनेन उद्गताः प्रकटीभूताः अंशुभाराः किरणनिकराः सहस्रसंख्यकराः ऋतुभरात्षोडशशतकरा अपि यैस्तैः आत्मा भ्रियते । उदयानन्तरमेव किरणबाहुल्यदर्शनादिशयमुत्प्रेक्षोपमा वा ॥

શ્લોકાર્થ

જેમ સૂર્ય પૂર્વાચલના શિખર ઉપર પ્રગટ થયેલાં કિરણોના સમૂહથી સ્વયં ભરાય તેમ અચાર્યદેવ શ્રીશત્રુંજય આદિ તીર્થોની યાત્રા કરવાથી ઉત્પન્ન થયેલા સંપૂર્ણ પુણ્ય વડે સ્વયં ઓતપ્રોત થયા, અર્થાત્ પુણ્યથી પરિપૂર્ણ બન્યા. ॥ ૧૧૬ ॥

धात्रीं पवित्रां सृजतोऽस्य पादन्यासे दुकूलान्यभ्रियन्त भव्यैः ।
तीर्थाधिराजस्य चतुर्निकायसुरैरिव स्वर्णसरोरुहाणि ॥ ११७ ॥

धात्रीं वसुंधरां पवित्रां पावनां सृजतः कुर्वतः पादचारेण चरतः अस्य सूरेः पादन्यासे चरणयुगलस्थापनस्थाने प्रायो बाहुल्येन भव्यैः श्राद्धवर्गैः दुकूलानि क्षौमानि विविधदेशवासांसि वा अध्रियन्त पादाधः स्थाप्यन्ते स्म । कस्येव । तीर्थाधिराजस्येव । यथा धरित्रीं पवित्रां विदधानस्य भूमण्डले विहारं कुर्वतः श्रीभगवतश्चतुर्निकायसुरैः भवनपति-व्यन्तर-ज्योतिष्क-विमानवासि देवैः स्वर्णसरोरुहाणि कनककमलानि पादन्यासे चरणारविन्दयोस्तले विधीयन्ते ॥

श्लोकार्थ

જેમ ભૂમંડલ ઉપર વિહાર કરતા શ્રી તીર્થંકર ભગવંતોના ચરણકમલની નીચે ચાર નિકાયના દેવો નવ સુવર્ણ કમલોને સ્થાપન કરતા હતા તેમ પૃથ્વીતલને પવિત્ર કરતા આચાર્યદેવના ચરણકમલને સ્થાપન કરવાના સ્થાને ભાવિકો રેશમી વસ્ત્રો પાથરતા હતા. ॥ ૧૧૭ ॥

स्तम्भादितीर्थे जलदागमेऽस्मिन्स्थिते कदाचिद्भविकव्रजेन ।
कोटिर्व्ययेऽसृज्यत टङ्ककानां श्रीविक्रमाम्भोरुहबन्धुनेव ॥ ११८ ॥

कदाचित्कस्मिन्नपि जलदागमे वर्षाकाले स्तम्भ इति पदमादौ यस्य तादृशे तीर्थे स्तम्भतीर्थे 'खंभाति' इति लोकप्रसिद्धनामनि अस्मिन् मुनीन्द्रे चतुर्मासीमासीने सति भविकव्रजेन अर्थात् स्तम्भतीर्थादिसंघलोकनिकरेण टङ्ककानां गुर्जरजनपदप्रसिद्धानां नाणकविशेषाणां कोटिरेका कोटिर्व्यये दानेऽसृज्यत व्ययीक्रियते स्म । केनेव । श्रीविक्रमाम्भोरुहबन्धुनेव । यथा श्रीमद्विक्रमादित्येन एकस्मिन् वारके दाने वा कोटिः कनकटङ्ककानाम् । सुवर्णकानामित्यर्थः । दाने दीयमाना आसीत् । प्रतिश्लोकं काव्यं गाथां च प्रायो जनानां कोटिर्दातासीत्, न न्यूनमधिकं बहु ॥

श्लोकार्थ

રાજા વિક્રમાદિત્ય એક વખતના દાનમાં એક ક્રોડ સોનૈયાનું દાન કરતા હતા, તેમ આચાર્યદેવના ખંભાતના ચાતુર્માસમાં ખંભાતના સંઘે એક ક્રોડ ટંક(ગુજરાતમાં પ્રસિદ્ધ નાણું)નો વ્યય કર્યો હતો. ॥ ૧૧૮ ॥

प्रेक्ष्य प्रियं शक्रवशा अहिल्यासक्तं क्षितावक्षमया किमेताः ।
मृगीदृशो न्युञ्छनकानि यस्य प्रायो व्यधू रूपकनाणकेन ॥ ११९ ॥

मृगीदृशो निखिलमेदिनीमण्डलसम्बन्धिमृगलोचना प्रायो बाहुल्येन यस्य प्रभोर्न्युञ्छनकानि निर्मित्सतानि रूपकनाणकेन। जातिवाचित्वेनैकवचनम्। रजतसंबन्धिमहमुंदीत्यारिका-आसेरो-मुद्दफरिका-रूपकादिकेन उपलक्षणादभिरामिकासुवर्णकाद्येनापि व्यधुः कुर्वन्ति स्म। मृगीदृश उत्प्रेक्ष्यन्ते—प्रियं भर्तारं शक्रमहिल्यायां गौतमर्षिपत्न्यां तपस्विन्यामासक्तं भोगलम्पटीभूतं प्रेक्ष्य दृग्गोचरीकृत्य अक्षमया अस्मात्सर्वोत्तमरूपलावण्यसौभाग्यवपुर्विभवशीलशालीनीर्विहाय वल्कलेमुञ्जदोरिकाजटादिरूपविकरालां तापसीमसौ सेवते इति भर्तरि विषये रुषा ईर्ष्यया क्षितौ क्षोण्यां किमेताः शक्रवशा इन्द्राण्य इवायाताः ॥ इति माहात्म्यम् ॥

શ્લોકાર્થ

દેશદેશની સ્ત્રીઓ આચાર્યદેવને પ્રાયઃ રૂપાનાણા વડે ન્યુંછના (ઓવારણ) કરતી હતી. તે સ્ત્રીઓ જાણે, પોતાના પતિ ઇન્દ્રને, સૌંદર્યશાલિની એવી પોતાની ઇન્દ્રાણીઓનો ત્યાગ કરીને ગૌતમઋષિની પત્ની તાપસી અહલ્યામાં આસક્ત થયેલો જોઈને, સહન નહીં કરી શકવાથી જાણે સાક્ષાત્ ઇન્દ્રાણીઓ આચાર્યદેવ પાસે આવેલી ન હોય ! ॥ ૧૧૯ ॥

पुरीमपापामिव पञ्चवक्त्रध्वजो जिनेन्द्रः पुनरुन्नताह्वाम् ।
कृत्वा पवित्रां चरणारविन्दै श्चक्रे चतुर्मासकमन्तिमं स ॥ १२० ॥*

स जिनेन्द्रः सूरिरन्तिममायुरपेक्षया चरमं चतुर्मासकं तत्र चक्रे कृतवान्। किं कृत्वा। अजयपुरदेवलपाटकादिषु विहारैः कृत्वा। पुनरपरवारमुन्नत इत्याह्वा नाम यस्यास्तादृशीं पुरीं नगरीं चरणारविन्दैः निजपादपद्मैः पवित्रां पावनीं कृत्वा। क इव। पञ्चवक्त्रध्वज इव। यथा केसरिकेतनो महावीरो जिनानां सामान्यकेवलिनां मध्ये तीर्थाधिपत्वादिन्द्रः पुरंदरः अपापां पुरीं स्वीयपदपङ्कजैः पवित्रीकृत्यान्तिमं पश्चिमं चतुर्मासकं कृतवान् ॥

શ્લોકાર્થ

સામાન્ય કેવલીઓમાં ઇન્દ્ર સમાન ભગવાન મહાવીરે પૃથ્વીતલને પવિત્ર કરીને અંતિમ ચાતુર્માસ 'અપાપા'પુરીમાં કર્યું હતું તેમ શ્રી હીરવિજયસૂરિજીએ, અજયપુર દેલવાડા આદિ નગરોને પોતાનાં ચરણકમલ વડે પવિત્ર કરીને અંતિમ ચાતુર્માસ 'ઊના' નગરમાં કર્યું. ॥ ૧૨૦ ॥

* પાછળથી ઉમેરેલ છે.

[वाचंयमेन्दुर्निजमायुरल्पं] विदांचकाराथ हृदा तदानीम् ।
स्वेनोपचेतुं पुनरेष पुण्यमगण्यमैच्छद्द्रविणं धनीव ॥ १२१ ॥

अथ चतुर्मासकस्थितेरनन्तरं तदानीं तस्मिन् प्रस्तावे तच्चतुर्मासक एव वाचंयमेन्दुर्हीरविजयसूरिः हृदा कुशाग्राग्रिममतज्ञानवता हृदयेन कृत्वा निजमात्मीयमायुर्जीवितकालमल्पं स्तोकं विदांचकार अज्ञासीत् ज्ञातवान् । पुनरित्यन्योक्तिः । एष सूरिः स्वेनात्मना अगण्यमपरिमितं स्वर्गापवर्गसाधकं पुण्यं सुकृतमुपचेतुं पुष्टं कर्तुमैच्छद्वाञ्छति स्म । क इव । धनीव । यथा व्यवहारी अगण्यं गणयितुमशक्यं गणितं द्रविणं धनमुपचेतुमिच्छति ॥

શ્લોકાર્થ

છેલ્લા ચાતુર્માસમાં જ આચાર્યદેવે કુશાગ્રબુદ્ધિથી પોતાના અલ્પ આયુષ્યને જાણી લીધું હતું. તેથી જેમ વ્યવહારી અગણિત દ્રવ્યને એકઠું કરવા ઇચ્છે તેમ આચાર્યદેવ પણ જાણે પોતાનું અપરિમિત પુણ્ય એકઠું કરવા ઇચ્છતા હતા. ॥ ૧૨૧ ॥

संलेखनां तत्र तपोविचित्रां स वृत्रशत्रुर्व्रतिनां वितेने ।
विधित्सयेवोत्सुकितोऽन्तरात्मशुद्धेर्बहिःस्नानमिवाङ्गशुद्धेः ॥ १२२ ॥

तत्रोन्नतनगरे स व्रतिनां वृत्रशत्रुर्वाचंयमवासवो हीरविजयसूरिस्तपोभिरेकाशननिर्विकृतिकाचाम्लचतुर्थषष्ठाष्टमादिभिः कृत्वा विचित्रां नानाविधां संलिख्यन्ते संतक्ष्यन्ते तुच्छीक्रियन्ते स्वकर्माण्यनयेति संलेखना तपोनुष्ठानविशेषस्तां वितेने करोति स्म । उत्प्रेक्ष्यते—अन्तरात्मनो जीवस्य शुद्धेर्निर्मलतायाः कर्मराहित्यस्य विधित्सया कर्तुमिच्छया उत्सुकित उत्कण्ठित इव । किमिव । बहिःस्नानमिव । यथा कश्चिदङ्गस्य बाह्यशरीरस्य शुद्धेर्विशुद्धताया विधित्सया विधातुमिच्छयोत्सुकितो बहिःस्नानं जलादिभिस्त्वङ्मलापहसेवनं वितनुते ॥ इति संलेखना ॥

શ્લોકાર્થ

જેમ કોઈ માણસ શરીરની શુદ્ધિ માટે સ્નાન કરવાને ઇચ્છે તેમ આચાર્યદેવે અંતરઆત્માની શુદ્ધિ માટે આયંબિલ, ઉપવાસ, છઠ્ઠ, અઠ્ઠમ આદિ તપશ્ચર્યા દ્વારા સંલેખના કરી. ॥ ૧૨૨ ॥

प्राचीनसूरीन्द्र इव प्रणीय संलेखनामेष विशिष्य सूरिः ।
आराधनां प्रारभतेति शान्तरसारविन्दैकविलासहंसः ॥ १२३ ॥

एष सूरिः इत्यग्रे वक्ष्यमाणप्रकारेण आराध्यन्ते सर्वव्यापारपरित्यागेन पुराकृतदुष्कृतमिथ्यादुष्कृतप्रदानेन च त्रिधापि अर्हदादयः सेव्यन्ते यस्यां सा आराधना तां प्रारभत प्रारब्धवान् । किंभूतः । शान्तनामा नवमो रसः उपशमलक्षणः स एवारविन्दं विकसितकमलं तत्रैकोऽद्वितीयो विलासः क्रीडा तत्राद्वितखेलनविषये हंसो राजमरालः हंसोपमः आराधनां प्रारभत । किं कृत्वा । प्राचीनसूरीन्द्रो वज्रस्वामीप्रमुखपूर्वाचार्य इति विशेषप्रकारेण प्राकृतेभ्यस्तपोभ्योऽत्यभ्यधिकविषयां दुष्करतपोविशेषरूपां संलेखनां कृत्वा ॥

શ્લોકાર્થ

વજ્રસ્વામી આદિ પૂર્વાચાર્યોની જેમ શાંત સુધારસરૂપી કમલવનમાં ક્રીડા કરી રહેલા રાજહંસ સમાન શ્રીહીરવિજયસૂરિજીએ વિશેષ પ્રકારની સંલેખના કરીને હવે અંતિમ આરાધના કરવાનો પ્રારંભ કર્યો. ॥ ૧૨૩ ॥

अम्भोजनाभा इव ये त्रिलोक्याः सिषेविरे नीरधिनन्दनाभिः ।
भूता भविष्यन्ति वसन्ति सार्वास्ते मे शरण्याः शरणीभवन्तु ॥ १२४ ॥

ते सर्वे सार्वास्तीर्थंकरा अशरणाः शरणा भवन्त्विति शरणीभवन्तु त्राणाय जायन्ताम् । कस्य । मे मम संसारभीरुः तस्य । किंभूताः । शरण्याः शरणागतवत्सलाः । पुनः किंभूताः अतीतायामुत्सर्पिण्यां केवलज्ञानिप्रमुखाः अथ वा अस्यामेवावसर्पिण्यामत्र भरतक्षेत्रे ऋषभदेवादिकाः पञ्चमारकापेक्षया चातुर्थारके पूर्वजातत्वादतीता एवोच्यन्ते । अनन्ताः संजाताः पुनर्ये भविष्यन्ति । अनागतकाले पद्मनाभादिमा उत्पत्स्यन्ते पुनर्ये सन्ति सीमंधरस्वामिप्रमुखा इदानींतने काले विहरमाना विद्यन्ते । यत्तदोर्नित्याभिसंबन्धात्ते के । ये सार्वा अम्भोजनाभा नारायणा इव । 'यत्क्रमाब्जकिणो वा' इति जिनशतके बहुत्वम् । त्रिलोक्या जगत्त्रयस्य नीरधिनन्दनाभिर्लक्ष्मीभिः सिषेविरे सेविताः ॥

શ્લોકાર્થ

'જેમ વિષ્ણુ લક્ષ્મીથી સેવાય તેમ ત્રણે લોકની લક્ષ્મીથી સેવાતા, ભૂત, ભવિષ્ય અને વર્તમાનકાળના જીવોના શરણાગત વત્સલ એવા અનંતા તીર્થંકર ભગવંતો અશરણ એવા મને શરણરૂપે થાઓ.' ॥ ૧૨૪ ॥

यैरन्तरे ध्यानधनंजयस्य प्रज्वाल्य दुःकर्ममलं विशुद्ध ।
असर्जि जाम्बूनदवन्निजात्मा ते सन्तु सिद्धाः शरणं शरण्याः ॥ १२५ ॥

ते सिद्धा मुक्तात्मानो निर्वाणं प्राप्ताः सत्त्वाः शरणमर्थान्मम त्राणाः सन्तु भवन्तु संसाराद्रक्षका भवन्तु । किंभूताः । शरण्याः शरणे साधवः । 'तत्र साधौ हिते च यः' इति यप्रत्ययः । ते के । यैः सिद्धैर्ध्यानं तदेव धनंजयो वह्निस्तस्यान्तरे मध्ये दुष्टानि दुरन्ताधिव्याधिदुर्गतिरूपविपाककारित्वादशुभानि नृशंसानि कर्माणि तान्येव मलं किट्टं तं प्रज्वाल्य भस्मीकृत्य निजस्यात्मन आत्मा जीवो विशुद्धो निर्मलः कर्मरहितः असर्जि सृष्टः कृतः । किंवत् । जाम्बूनदवत् । यथा दृषदादेर्मलं कृशानुना प्रज्वाल्य सुवर्णं सृज्यते ॥

શ્લોકાર્થ

'ધ્યાનરૂપી અગ્નિમાં દુષ્કર્મોરૂપી મળને ભસ્મીભૂત કરીને અગ્નિની જેમ પોતાના આત્માને જેમણે વિશુદ્ધ બનાવ્યો છે તે શરણ્ય સિદ્ધ ભગવંતો મને શરણરૂપે થાઓ.' ॥ ૧૨૫ ॥

वितन्वते ये भ्रमरा इवात्मवृत्तिं स्मरं घ्नन्ति च शंभुवद्ये ।
ते साधवः स्युः शरणं तपस्याधुरं धुरीणा इव धारयन्तः ॥ १२६ ॥

ते साधवः श्रमणाः । ममेति शेषः । शरणं स्युर्भवेयुः । किंभूताः । धुरीणा धौरेयकाः वृषभा इव । तपस्याधुरं दीक्षायाः सर्वात्मना समग्रं क्रियाकलापादिप्रकारकरणरूपधुर्वी धारयन्तः बिभ्रतः । ये साधवो भ्रमरा मधुकरा इव आत्मवृत्तिं निजजीविकां माधुकरीं वृत्तिं वितन्वते कुर्वते । च पुनर्ये शंभुवदीश्वर इव जगद्विडम्बकं स्मरं घ्नन्ति मदनं व्यापादयन्ति ॥

શ્લોકાર્થ

જે ઋષભની જેમ સંયમરૂપી ધુરાને ધારણ કરે છે, ભ્રમરની જેમ માધુકરી ભિક્ષા વૃત્તિને કરે છે તેમજ ઈશ્વરની જેમ કામદેવને હણે છે, એવા સાધુભગવંતો મને શરણરૂપે થાઓ.' ॥ ૧૨૬ ॥

मज्जज्जनस्यास्ति करावलम्ब इवातिभीमे भववारिधौ यः ।
भूयात्स धर्मः शरणं सुधांशुः सुधामिवान्तः करुणां दधानः ॥ १२७ ॥

स धर्मः शरणं भवभीतस्य मम रक्षको भूयात् । किंभूतः । अन्तर्मध्ये करुणां सर्वतत्त्वेषु कृपां दधानः । अजिनाज्ञापूर्वकदयामयो धर्म इत्यर्थः । क इव । सुधांशुरिव । यथा चन्द्रो मध्ये निजमण्डलान्तराले सुधाममृतं धत्ते । यो धर्मः अतिभीमे अतिशयेन भीतिकारिणि भववारिधौ संसारसमुद्रे मज्जज्जनस्य ब्रुडतो लोकस्य करावलम्बो हस्तावलम्बनमिवास्ति । हस्ते गृहीत्वा कर्षतीत्यर्थः । यथा कश्चिदगाधजलनिधिमज्जन्तं कंचिज्जन्तु हस्ताभ्यां गाढमाधाय बहिः कर्षति तद्वदास्ते ॥ इत्यर्हत्सिद्धसाधुधर्माणां चतुर्णां शरणम् ॥

श्लोकार्थ

'अतिभयंकर संसाररूपी समुद्रमां डूबता जीवोने माटे हस्तावलंबनरूप, तेमज चन्द्र जेम मध्यमां अमृतने धारण करे छे तेम मध्यमां करुणा(दया)ने धारण करे छे ते धर्म मने शरणरूपे थाओ.' ॥ १२७ ॥

ज्ञाने ममाष्टौ समयादिकातीचाराः प्रमादा इव शुद्धधर्मे ।
शङ्कादिका अष्ट च दर्शनेऽतीचारा मदा देहभृतीव जाताः ॥ १२८ ॥

कर्माणि जन्ताविव ये ममातीचाराः पुनर्मातृगताश्चरित्रे ।
मिथ्यासतां ते बहुगर्हवाचो व्याहारवन्मे निखिला इदानीम् ॥ १२९ ॥

ये ममाष्टौ अष्टसंख्याकाः ज्ञाने ज्ञानाचारे अतीचाराः संजाताः । किंभूताः । समयः कालः आदौ येषां कालविनयबहुमानोपधानहीननिह्नवव्यञ्जनार्थतदुभयहीना एतेऽष्ट ज्ञानातीचाराः । के इव । प्रमादा इव । यथा शुद्धे जिनभाषिते धर्मे मद्य-विषय-क्रोध-मान-माया-लोभ-निद्रा-विकथानामानोऽष्टप्रमादाः स्युर्धर्मविषयेऽमी प्रमादा भविनां भवेयुः । च पुनर्ये मम दर्शने सम्यक्त्वे दर्शनाचारे शङ्का-आकाङ्क्षा-विचिकित्सा-मूढदृष्टता-अनुपम-बृंहणा-अस्थिरीकरण-असाधर्मिकवात्सल्य-अप्रभावना इत्यभिधाना अष्टौ अष्टप्रमाणा अतीचाराः संपन्नाः । के इव । यथा जने जाति-कुल-बल-ज्ञान-ऐश्वर्य-रूप-तपो-लब्धिरूपा अष्टौ मदा भवन्ति । पुनर्ये चरित्रे चारित्राचारे अनिर्यासमिति-अभाषासमिति-अनेषणासमिति-अनादाननिक्षेपासमिति-अपारिष्ठापनिकासमिति-अमानागुप्ति-अवचनगुप्ति-अकायगुप्तिः इति संज्ञा मातृगता अष्ट प्रवचनमातृसंबन्धिनोऽतीचारा जाताः । कानीव । कर्माणीव । यथा जन्तौ प्राणिनिविषये ज्ञानावरणीय-दर्शनावरणीय-मोहनीय-वेदनीय-अन्तराय-नाम-गोत्र-आयुः इत्यष्टौ कर्माणि जायन्ते । सांसारिके जीवे इति शेषः । ते निखिलाः सर्वेऽपि चतुर्विंशतिरतीचाराः इदानीमस्मिन्नायुरन्तसमये मम ते ममातीचारा मिथ्या मृषा आसतां भवन्तु ।

क्रियत् । व्याहारवत् । यथा बहुगर्ह्यवाचो वाचालस्य । 'स्याज्जल्पाकस्तु वाचालो वाचाटो बहुगर्ह्यवाक्' इति हैम्याम् व्याहारा वचांसि मिथ्या जायन्ते । 'व्याहारो भाषितं वचः' इत्यपि हैम्याम् ॥ युग्मम् ॥

શ્લોકાર્થ

'મદ્ય, વિષય, ક્રોધ, માન, માયા, લોભ, નિદ્રા અને લોભ–આઠ પ્રમાદસ્થાનો; અકાલ, અવિનય, અબહુમાન, અનુપધાન, નિહ્નવન, વ્યંજન, અર્થ, તદુભયમાં વિપરીતતા–એ આઠ જ્ઞાનાચારના અતિચારો; જાતિ, કુલ, બળ, જ્ઞાન, ઐશ્વર્ય, રૂપ, તપ અને લબ્ધિ–એ આઠ મદો; શંકા, કાંક્ષા, વિચિકિત્સા, મૂઢ દૃષ્ટિ, અનુપબૃંહણા, અસ્થિરીકરણ, સ્વામિવાત્સલ્યનો અભાવ અને અપ્રભાવના–એ આઠ દર્શનાચારના અતિચારો; જ્ઞાનાવરણીય, દર્શનાવરણીય, વેદનીય, મોહનીય, આયુ, નામ, ગોત્ર અને અંતરાય–એ આઠ કર્મો; ઈર્યાસિમિતિ, ભાષાસમિતિ, એષણાસમિતિ, આદાનભંડમત્તનિક્ષેપણાસમિતિ, પારિષ્ઠાપનિકાસમિતિ, મનગુપ્તિ, વચનગુપ્તિ અને કાયગુપ્તિ–એ આઠ ચારિત્રાચારનું ઉલ્લંઘન—આમ કુલ ચોવીશ અતિચારો દુર્જન માણસના વચનની જેમ મિથ્યા થાઓ.' ॥ ૧૨૮ ॥ ૧૨૯ ॥

तपःसु ये द्वादशभेदभिन्नेष्वहर्मणीनामिव मण्डलेषु ।
वीर्येऽभवन्येऽत्र भवे ममातीचारप्रचाराश्च मृषासतां मे ॥ १३० ॥

द्वादशभिर्भेदैः प्रकारैः भिन्नेषु पृथक्पृथग्भूतेषु । अनशनम्, ऊनोदरिका, वृत्तिसंक्षेपः, रसत्यागः, कायक्लेशः, संलीनता, इति षड्विधं बाह्यतपः । तथा प्रायश्चित्तम्, विनयः, वैयावृत्यम्, स्वाध्यायः, ध्यानम्, कायोत्सर्गश्च इति षड्विधं बाह्यतपः । संभूय द्वादशप्रकारेषु तपःसु तपआचारेषु समये अतीचाराणां प्रचारा विस्तारा लगनानि वा अभवन् तपःसु । उत्प्रेक्ष्यते—द्वादशभेदभिन्नेषु द्वादशसंख्येषु अहर्मणीनां सूर्याणां मण्डलेषु बिम्बेष्विव । यथा भास्कराणां तेजो दुःसहं तथैव तपसामपि । तथा च यथा कर्मणां प्रभावस्तथा तपसामपीति । च पुनरत्र भवे अस्मिन् जन्मनि उपलक्षणादन्यस्मिन्नपि भवे ये मम वीर्ये वीर्याचारविषये अतीचारा अभवन् ते अतीचारा मे मम मृषा मिथ्या आसतां भवन्तु । सर्वेषामप्यतीचाराणां मम मिथ्यादुःकृतमस्त्वित्यर्थः ॥ इति पञ्चज्ञानाचारादिपञ्चाचारातीचारालोचनम् ॥

શ્લોકાર્થ

'બાર સૂર્યની જેમ અનશન, ઉણોદરી, વૃત્તિસંક્ષેપ, રસત્યાગ, કાયક્લેશ અને સંલીનતા એ છ બાહ્યતપ; પ્રાયશ્ચિત્ત, વિનય, વૈયાવચ્ચ, સ્વાધ્યાય, ધ્યાન અને કાયોત્સર્ગ

એ છ અભ્યંતરતપ: કુલ બાર પ્રકારનાં તપમાં લાગેલા અતિચારો તેમજ આજન્મ અને જન્માંતરમાં લાગેલા વીર્યાચારના અતિચારો–તે સર્વે અતિચારો મિથ્યા થાઓ. ॥ ૧૩૦ ॥

एकेन्द्रिया भूजलवह्निवायुवनान्यहन्यन्त मयाङ्गिनो ये ।
विभ्राम्यता भूरिभवेषु कर्मवशेन देशेष्विव दैशिकेन ॥ १३१ ॥

ये भुवः पृथिवीकायिका, जलान्यप्कायिका वह्नयस्तेजस्कायिका वायवो वायुकायिका वनानि वनस्पतिकायिका एकं स्पर्शनं शरीरं तल्लक्षणमिन्द्रियम् हृषीकं येषां ते एकेन्द्रिया अङ्गिनः पूर्वोक्ताः पञ्च स्थावराः प्राणिनः मया अहन्यन्त हताः । अत्र भवे अन्यत्र भवे वा इति शेषः । मया किं कुर्वता । कर्मणां ज्ञानावरणीयादीनामष्टसंख्याकानां वशेनायत्तत्वेन भूरिष्वनन्तेषु भवेष्ववतारेषु विभ्राम्यता विशेषेण एकद्वित्रिचतुःपञ्चेन्द्रियसंज्ञ्यसंज्ञित्वेन चतुरशीतिलक्षजीवयोनिषु भ्रमणं कुर्वता । केनेव । दैशिकेनेव । यथा पान्थेन कर्मणा स्वपरकार्याणां वशेनाधीनतया देशेषु विविधजनपदेषु पर्यटनं प्रणीयते ॥

શ્લોકાર્થ

'જેમ મુસાફર કાર્યવશાત્ દેશવિદેશમાં ભ્રમણ કરે તેમ કર્માધીન એવા મારા આત્માએ અનંત ભવચક્રમાં ભ્રમણ કરતાં પૃથ્વી, જલ, અગ્નિ, પવન અને વનસ્પતિ એ પાંચે સ્થાવરોની જે કોઈ વિરાધના કરી હોય તે મારું પાપ મિથ્યા થાઓ. ॥ ૧૩૧ ॥

संध्ये दिनानामिव जन्मिनां द्वे येषां हृषीके भवतो हतास्ते ।
मया जलौकःकृमिशुक्तिशङ्खमुखाः प्रमादैकवशंवदेन ॥ १३२ ॥

येषां जन्मिनां जन्तूनां द्वे द्विसंख्ये हृषीके स्पर्शनरसनलक्षणे शरीरजिह्वारूपे इन्द्रिये भवतः । केषामिव । दिनानामिव । यथा दिवसानां द्वे संध्ये दिनाननदिवसावसानलक्षणे पितृस्वौ स्याताम् । 'संध्या तु पितृसूः' इति हैम्याम् । ते जलौकसो जलसर्पिण्यः कृमयः कीटका गण्डोलका वा शुक्तयो मुक्तास्फोटाः । 'मुक्तास्फोटोऽब्धिमण्डूकी शुक्तिः' इति हैम्याम् । मुक्ताफलोत्पत्तिभुवोऽन्या वा । शङ्खाः कम्बवः ते मुखा मुखे वा आदौ येषां तादृशा द्वीन्द्रिया जीवा मया हता विरोधिताः । किंभूतेन मया । प्रमादोऽनवधानता तस्य एकमद्वितीयतया वशंवदेनाधीनेन । प्रमादिना इत्यर्थः ॥

શ્લોકાર્થ

'પ્રમાદને આધીન બનેલા મારા જીવે શંખ, પોરા, કીડા, અળસિયાઆદિ સ્પર્શેન્દ્રિય, રસનેન્દ્રિયરૂપ બે ઇન્દ્રિય જીવોની વિરાધના કરી હોય, તે મારું પાપ મિથ્યા થાઓ.' ॥ ૧૩૨ ॥

विशां वयांसीव भवन्ति येषां त्रीणीन्द्रियाणीह शरीरभाजाम् ।
गोपालिकामत्कुणकीटिकाद्या व्यापादितास्ते तु मया कथंचित् ॥ १३३ ॥

येषां शरीरभाजां जीवानामिह संसारे जगति वा तिर्यग्गतौ वा त्रीणि स्पर्शनं शरीरं रसनं जिह्वा घ्राणं नासिकालक्षणानि त्रिसंख्याकानि इन्द्रियाणि करणानि भवन्ति । कानीव । वयांसीव । यथा विशां मनुष्याणां त्रीणि बाल्ययौवनवार्धक्यलक्षणानि वयांस्यवस्थाविशेषाः स्युः । ते गोपालिका धनेडिकानि धान्यकीटका मत्कुणकाः कीटिकाश्च प्रसिद्धाः ते आद्याः पूर्वं येषां तादृशास्त्रीन्द्रिया जन्तवो देहिनो मया कथंचित्केनचन प्रकारेण जानता अजानता वा प्रमादिना सता व्यापादिताः ॥

શ્લોકાર્થ

'મનુષ્યની બાલ્યાવસ્થા, યુવાવસ્થા અને વૃદ્ધાવસ્થા–ત્રણ અવસ્થાની જેમ ધનેડા, માંકણ, કીડી આદિ સ્પર્શના, રસના, ઘ્રાણરૂપ તે ઇન્દ્રિયજીવોની વિરાધના કરી હોય, તે મારું પાપ મિથ્યા થાઓ.' ॥ ૧૩૩ ॥

चत्वारि येषां पुनरिन्द्रियाणि नाभीभवस्येव मुखानि सन्ति ।
ते मक्षिकाभ्रङ्गपतङ्गकर्णकीटोर्णनाभप्रमुखा हताश्च ॥ १३४ ॥

पुनर्येषामसुमतां चत्वारि स्पर्शनरसनघ्राणनयनलक्षणानि शरीरजिह्वानासिकालोचनरूपाणि चतुःसंख्याकानि इन्द्रियाणि अक्षाणि सन्ति । कानीव । मुखानीव । यथा नाभीभवस्य ब्रह्मणः । 'नाभीमथैष श्लथवाससोऽस्याः' इति नैषधे दीर्घोऽपि नाभिशब्दः । प्राची-अपाची-प्रतीची-उदीचीलक्षणचतुर्दिक्संमुखानि वर्तन्ते । शक्रेण षष्टिसहस्रवर्षकृततपःप्रभावात्स्वपदाभिकवेधसस्तपोभ्रंशं विधातुं प्रहिताप्सरोभिश्चतुर्दिक्प्रारब्धाखण्डताण्डवाडम्बरविलोकनकौतुकोत्कण्ठितचेताश्चतुर्दिक्षु चत्वारि वदनानि विदधाति स्मेति शीलतरङ्गिण्याम् । ते मक्षिका मधुवननीलसामान्याः प्रसिद्धाः । यदुक्तम्—'सरघा मधुमक्षिका । वर्वणा मक्षिका

नीली पुत्तिका च पतङ्गिका ॥ वनमक्षिका तु दंशो दंशी तज्जातिरल्पिका। तैलाटी वरटी गन्धोली' इति हैम्याम् । भृङ्गा भ्रमराः, पतङ्गाः शलभाः 'टीड' इति लोके प्रसिद्धाः, कर्ण-कीटाः शतपद्यः खर्जूरकाः, ऊर्णनाभाः जालकारकाः 'कालियावडा' इति प्रसिद्धाः, ते प्रमुखा आदिमा येषु तादृशाश्चतुरिन्द्रियाः पुनर्मया हता व्यापादिताः ॥

श्लोकार्थ

'બ્રહ્માના ચાર મુખની જેમ (તે ચારમુખ કેમ ! ઇન્દ્રપદની અભિલાષાથી તપ કરી રહેલા બ્રહ્માના સાઠ હજાર વર્ષના તપને નષ્ટ કરવા માટે ઇન્દ્રે મોકલેલી અપ્સરાઓએ ચારે દિશામાં કરેલાં નૃત્યને ચારે દિશામાં જોવા માટે ઉત્સુક બનેલા બ્રહ્માએ પોતાનાં ચાર મુખ બનાવ્યાં હતાં.) સ્પર્શન, ઘ્રાણ, રસન, અને ચક્ષુ આ ચાર ઇન્દ્રિયોવાળા (માખી, મચ્છર, ભ્રમર, પતંગિયા, ખજૂરા આદિ) ચઉરિન્દ્રિયજીવોની હિંસા થઈ હોય, તે મારું પાપ મિથ્યા થાઓ.' ॥ ૧૩૪ ॥

महाव्रतानीव मुनीश्वराणां पञ्चेन्द्रियाणीह भवन्ति येषाम् ।
पापर्धिकेनेव महीचरास्ते संप्रापिताः प्रेतपतेर्निकेतम् ॥ १३५ ॥

इह जगति संसारे वा येषां जन्तूनां पञ्च स्पर्शनरसनघ्राणचक्षुःश्रवणलक्षणानि शरीर-जिह्वानासिकानयनकर्णरूपाणि पञ्चसंख्याकानीन्द्रियाणि भवन्ति । कानीव । महाव्रतानीव । यथा मुनीश्वराणां साधुसिन्धुराणां महान्ति कातरैरल्पसत्त्वैः सत्त्वैः मेरुवद्दुर्द्धर्तुमशक्यानि सर्वप्राणातिपातविरमण- सर्वमृषावादविरमण-सर्वादत्तादानविरमण-सर्वमैथुनविरमण-सर्व-परिग्रहविरमणलक्षणानि व्रतानि नियमविशेषाः पञ्च भवन्ति । ते च पञ्चेन्द्रियास्त्रिविधाः सन्ति । एके स्थलचराः, एके जलचराः, तृतीयाः खेचराः। तानेव प्रतिपादयति—महीचरा गोमहिषाजमृगशशशम्बरादिकाः स्थलचराः पञ्चेन्द्रिया जीवा मया भवान्तरे प्रेतपतेर्यमस्य निकेतं मन्दिरं संप्रापिता गमिताः । केनेव । पापर्धिकेनेव । यथा आखेटिकेन लुब्धकेन मृगाद्याः पञ्चेन्द्रियाः सत्त्वाः कृतान्तनिकेतनं नीयन्ते ॥

श्लोकार्थ

'સાધુનાં પાંચ મહાવ્રતોની જેમ ગાય, ભેંસ, મૃગ આદિ સ્પર્શન, રસન, ઘ્રાણ, ચક્ષુ અને શ્રોત્રરૂપ પંચેન્દ્રિયજીવોને શિકારીની જેમ યમસદન પહોંચાડ્યા હોય, અર્થાત્ હણ્યા હોય, તે મારું પાપ મિથ્યા થાઓ.' ॥ ૧૩૫ ॥

जीवान्तिकेनेव वियद्विहारा आलेख्यशेषत्वमवापितास्ते ।
कैवर्तकेनेव पयश्चरास्ते कथासु शेषत्वमवापिताश्च ॥ १३६ ॥

जीवान्तिकः शाकुनिको विहंगमघातुकः तेनेव वियति आकाशे विहारो विहरणं गतिर्येषां ते खचराः । कलविङ्ककुर्कुटशुकसारिकाकाककपिञ्जलचाषखञ्जनशिखण्डिकपोताद्याः पञ्चेन्द्रिया जीवा आलेख्ये चित्रे शेषत्वमवशिष्टतां न तु प्राणेनतामवापिता मारिताः । तथा कैवर्तकेनेव धीवरेणेव पयश्चरा जलचारिणो जीवास्ते पञ्चेन्द्रिया मत्स्यनक्रचक्रपाठीनपीठग्राहमकराद्याः कथासु वार्तासु आख्यानसंबन्धेषु शेषत्वमवशिष्टतामवापिता लम्भिताः । निहता इत्यर्थः । हिंसायां सर्वत्र जन्मान्तरापादनम् । अस्मिन् जन्मनि तु संयतत्वात्तदभाव एवेति तात्पर्यम् ॥

श्लोकार्थ

'હિંસક મનુષ્યની જેમ શુક, સારિકા, મયૂર આદિ ખેચરજીવોને ચિત્રની જેમ નિષ્પ્રાણ કર્યા હોય તેમજ મત્સ્ય, નક્રચક્ર આદિ જલચરજીવોની જન્માંતરમાં પણ હિંસા કરી હોય, તે મારું પાપ મિથ્યા થાઓ.' ॥ ૧૩૬ ॥

अर्हन्निदेशोदितसान्द्रचन्द्रचन्द्रातपोद्वेलकृपापयोधौ ।
मीनायमानेन मुनीन्दुनेव स्वात्मेव नामानि गणोऽङ्गभाजाम् ॥ १३७ ॥

पुनर्मया अङ्गभाजां प्राणिनां गणः समूहः स्वात्मेव निजजीव इव नामानि न गणितः । इदमपि प्राग्जन्मापेक्षयैव नास्मिञ्जन्मनीति शेषः । तदेव वक्ति—केनेव । मुनीन्दुनेव । यथा वैराग्यरङ्गतरङ्गितात्मना साधुसुधाकरेण अन्यतनूमन्निकरः निजजीवसदृशो गण्यते । किंभूतेन । मुनीन्दुना अर्हतां सर्वतीर्थकृतां निदेश आज्ञा स एवोदित उदयं प्राप्तः सान्द्रस्नेहलोऽमृतवर्षी आश्विनपूर्णिमासंबन्धी चन्द्रः अखण्डमण्डलेन्दुस्तस्य चन्द्रातपश्चन्द्रिका तेनोद्वेलो वेलामुल्लङ्घ्य यात उद्वेल उत्कण्ठितो यः कृपारूपः पयोधिस्तत्र मीनो मत्स्य इवाचरितस्तेन । दयार्द्रहृदयेनेत्यर्थः ॥ इति प्रथमव्रते प्राक्कृतजीवहिंसालोचनम् ॥

શ્લોકાર્થ

'જિનેશ્વર ભગવંતની આજ્ઞારૂપી શરદપૂર્ણિમાના ચન્દ્રથી ઉત્કંઠિત બનેલા કૃપારૂપી સમુદ્રમાં મત્સ્યની જેમ આચરણ કરતા અર્થાત્ દયાર્દ્ર હૃદયવાળા મુનીન્દ્રની જેમ

મેં સર્વ પ્રાણીઓને પોતાના આત્માની જેમ ન ગણ્યા હોય, તે મારું પાપ મિથ્યા થાઓ'. ॥ ૧૩૭ ॥

अमर्षणेनेव रुषा हसेन वैहासिकेनेव च भीरुणेव।
भयेन लोभेन च गृध्नुनेव मया यदप्यल्पमजल्प्यलीकम् ॥ १३८ ॥

यन्मया इह भवे परभवे वा यदल्पं स्तोकमप्यलीकं मिथ्यावाक्यमजल्पि भाषितम्। कया। रुषा रोषेण। केनेव। अमर्षणेनेव क्रोधनेनेव। यथा क्रोधातुरेण क्रोधेनालीकं जल्प्यते। पुनः केन। हसेन हास्येन। केनेव। वैहासिकेनेव। यथा स्वभावातिभीरुकेण मृषा भाष्यते। च पुनः केन। लोभेन तृष्णया। केनेव। गृध्नुनेव। यथा लोलुभेन लोभाभिभूतेनासत्यं निगद्यते ॥ इति द्वितीयव्रते मृषावादालोचनम् ॥

શ્લોકાર્થ

'મેં આ ભવ કે પરભવમાં ક્રોધી માણસની જેમ ક્રોધથી, વિદૂષકની જેમ હાસ્યથી, ડરપોકની જેમ ભયથી, અને લોભાન્ધ મનુષ્યની જેમ લોભથી અલ્પ પણ મિથ્યા ભાષા બોલી હોય, તે મારું પાપ મિથ્યા થાઓ'. ॥ ૧૩૮ ॥

स्वथं परेषां परिमोषिणेव मया कथंचिद्यददत्तमात्तम्।
प्रयोजने सत्यपि यत्तृणाद्यं क्वचिद्विनादेशमुपाददे च ॥ १३९ ॥

यन्मया कथंचित्केनापि प्रकारेण अदत्तं केनापि स्वामिना अविश्राणितं परेषामन्येषामृक्थं द्रविणं धनमात्तं गृहीतम्। केनेव। परिमोषिणेव। यथा तस्करेणादत्तं परद्रव्यमादीयते। च पुनः प्रयोजने कार्ये सत्यपि विद्यमानेऽपि कृत्ये आदेशं स्वाम्यस्वामिनोर्वा अनुज्ञां विना तृणाद्यं तृणशलाकाप्रमुखं क्वचित्कुत्रापि स्थाने उपाददे जगृहे स्वयं स्वीकृतम् ॥ इति तृतीयव्रते अदत्तादानालोचनम् ॥

શ્લોકાર્થ

'મેં ચોરની જેમ કંઈ પણ પારકું દ્રવ્ય ગ્રહણ કર્યું હોય, પ્રયોજન પડવાથી માલિકની આજ્ઞા લીધા સિવાય તૃણ શલાકાઆદિ કંઈ પણ વસ્તુ ગ્રહણ કરી હોય, તે મારું પાપ મિથ્યા થાઓ.' ॥ ૧૩૯ ॥

मरुन्मृगाक्ष्या मरुतेव दिव्यं नार्या नरेणेव च मानवीयम् ।
मया तिरश्चेव पुनस्तिरश्च्या तैरश्चमाचर्यत मैथुनं यत् ॥ १४० ॥

मरुन्मृगाक्ष्या देवाङ्गनया समं दिव्यं देवतासंबन्धि यन्मया मैथुनमाचर्यत भोगः कृतः । केनेव । मरुतेव । यथा चतुर्निकायादिदेवेन देव्या सार्धं निधुवनं विधीयते । पुनर्नार्या मनुष्ययोषिता साकं मानवीयं मानवसंबन्धि मैथुनं कामकेलिराचर्यत आचीर्णा । केनेव । नरेणेव । यथा नरेण नार्या समं कन्दर्पक्रीडा क्रियते । पुनस्तिरश्चा तिर्यग्जातीयया स्त्रिया सम्रा तैरश्चयं तिर्यक्संबन्धि मैथुनं ग्राम्यधर्म आचर्यत विहितम् । केनेव । तिरश्चेव । यथा तिर्यग्जातीयेन पुरुषेण तिरश्चा समं मैथुनं पशुक्रिया क्रियते । सर्वत्र इह भवेऽन्ये भवेऽपीति योज्यम् ॥ इति चतुर्थव्रते मैथुनालोचनम् ॥

શ્લોકાર્થ

'દેવની જેમ દેવાંગનાની સાથે, પુરુષની જેમ મનુષ્ય-સ્ત્રીની સાથે, તિર્યંચપશુની જેમ તિર્યંચસ્ત્રીની સાથે આ ભવ કે પરભવમાં મૈથુનક્રીડા કરી હોય, તે મારું પાપ મિથ્યા થાઓ.' ॥ ૧૪૦ ॥

सखीमिव स्वःशिवपद्मधाम्नोर्निरीहतां मुग्धतया विहाय ।
दूतीमिवादृत्य च दुर्गतीनामृद्धिं मयादायि परिग्रहो यत् ॥ १४१ ॥

यन्मया परिग्रहो धनधान्यद्विपदचतुष्पदादिक आदायि स्वीकृतः । किं कृत्वा । स्वःशिवपद्मधाम्नोः स्वर्गापवर्गलक्ष्म्योः सखीं वयस्यामिव निरीहतां निःस्पृहभावं विहाय विमुच्य । कया । मुग्धतया मौग्ध्येनाज्ञानेन । च पुनर्दुर्गतीनां दुष्टानां महाधिव्याधिविधात्रीणां नारकतिर्यक्कुदेवकुमनुजलक्षणानां गतीनां दूतीमाकारणसंदेशहारिकामिव ऋद्धिं प्राप्ताप्राप्तेषु वस्तुषु सर्वेष्वैहलौकिकपदार्थेष्वासक्तिमादृत्याङ्गीकृत्य । तस्यामादरपरिभूयेत्यर्थः ॥ इति पञ्चमव्रते परिग्रहालोचनम् ॥

શ્લોકાર્થ

'સ્વર્ગ અને અપવર્ગની લક્ષ્મીની સખી સમાન નિસ્પૃહતાનો ત્યાગ કરીને અજ્ઞાનતાથી દુર્ગતિની દૂતીસમાન આસક્તિનો આદર કરીને, ધન-ધાન્ય આદિ કંઈપણ પરિગ્રહ મેં રાખ્યો હોય તે મારું પાપ મિથ્યા થાઓ.' ॥ ૧૪૧ ॥

मरुद्रुमान्मेरुरिवेन्द्रियाणि प्राणीव बाणानिव पञ्चबाणः ।
मुखान्यथा पञ्चमुखश्च सम्यङ्नाधारयं पञ्चमहाव्रतान्यत् ॥ १४२ ॥

यदहं पञ्चमहाव्रतान मेरूपमान्नियमविशेषान्। व्रतशब्दः पुंनपुंसके । सम्यक् त्रिकरशुद्धा नाधारयं न धृतवान । क इव । मेरुरिव । यथा काञ्चनाचलः कल्पपारिजातमन्दारहरिचन्दनसंतानाभिधानान्पञ्चसंख्याकान्मरुद्रुमान कल्पवृक्षान धारयति । पुनः क इव । प्राणीव । यथा जन्तुः शरीररसनानासिकानयनश्रवणलक्षणानि पञ्चेन्द्रियाणि धत्ते । पुनः क इव । पञ्चबाण इव। यथा मदनः संमोहन–उन्माद-तापन-शोषण-मारण-इति नाम्नः । तथा क्वचित् 'दिट्ठीहिं दिट्ठिपसरो दिट्ठिपसारणभाव अणुराओ । अणुरायण विनेहो बाणा मयणस्सा पञ्चेव ॥' एतेऽपि पञ्च बाणाः प्रोच्यन्ते । पञ्चप्रमाणान्बाणान सायकान्दधाति । पुनः क इव । पञ्चमुख इव । अत्र यथा इवार्थे। यथा नीलकण्ठः कण्ठीरवो वा पञ्चमुखान धरति । मुखशब्दोऽपि पुंनपुंसके । एवं यथा मेरुमनुष्यमदनपारीन्द्रपिनाकिनः कल्पद्रुमेन्द्रियमार्गणमुखानि धारयन्ति तथा अहं पञ्च महाव्रतान्नाधारयमित्यर्थः ॥ इति पञ्चव्रताधारणलोचनम् ॥

શ્લોકાર્થ

'જેમ મેરુપર્વત કલ્પ, પારિજાત, મંદાર, હરિચંદ અને સંતાન એ પાંચ કલ્પવૃક્ષોને ધારણ કરે છે; પ્રાણી જેમ સ્પર્શ, રસના, ઘ્રાણ, ચક્ષુ અને શ્રોત્ર એ પાંચ ઇન્દ્રિયોને ધારણ કરે છે; કામદેવ સંમોહન, ઉન્માદ, તાપન, શોષણ અને મરણ એ પાંચ બાણોને ધારણ કરે છે અને મહાદેવ જેમ પાંચ મુખને ધારણ કરે છે તેમ મેં ધારણ કરેલાં પાંચ મહાવ્રતોમાં કંઈપણ વિપરિત આચરણ કર્યું હોય તે મારું પાપ મિથ્યા થાઓ ' ॥ ૧૪૨ ॥

निशाचरेणेव निशाशनं यन्मया कथंचित्प्रविधीयते स्म ।
कौसीद्यमाद्यन्मनसेव किंचिच्छैथिल्यमालम्ब्यत यत्क्रियासु ॥ १४३ ॥

मया कथंचित्केनचिन्मिथ्याज्ञानमूढतादिप्रकारेण निशाचरेणेव राक्षसेनेव निशाशनं रात्रिभोजनं प्रविधीयते स्म । पुनर्यत्क्रियासु चारित्रानुष्ठानकरणेषु शैथिल्यं शिथिलता किंचित्कृतं किंचिन्न कृतं किंचिदिष्यते किंचिच्च क्रियते इत्याद्यं श्लथत्वमालम्ब्यत । केनेव । कौसीद्येनालस्येन माद्यदुन्मत्तीभवन्मनश्चेतो यस्य तादृशेन पुंसेव। यथा अलसेन सर्वं कार्यं श्लथीक्रियते ॥ इति षष्ठव्रते रात्रिभोजनक्रियाशैथिल्यालोचनम् ॥

શ્લોકાર્થ

'રાક્ષસની જેમ ક્યારેય પણ રાત્રિભોજન કર્યું હોય, આળસુ માણસની જેમ પ્રતિક્રમણ-આદિ ક્રિયાઓમાં કંઇ પણ શિથિલતા આચરી હોય, તે મારું પાપ મિથ્યા થાઓ.' ।। ૧૪૩ ।।

प्रमादभाजा नियमा मया ये बभञ्जिरे भ्रान्तिभृता भवेषु ।
छायाद्रुमं गण्डगलन्मदान्धं भविष्णुनेवोद्धुरसिन्धुरेण ॥ १४४ ॥

प्रमादमालस्यं शिथिलतां वा अनवधानतां वा मन्दभावं वा भजतीति प्रमद्वरेण प्रमत्ततायुक्तेन मया नियमा अभिग्रहविशेषा बभञ्जिरे भग्नाः गृहीत्वा मुक्ताः किंभूतेन मया । भवेषु कर्मवैचित्र्यान्नानाविधजन्मपरम्परासु भ्रान्तिं भ्रमणीं बिभर्तीति भ्राम्यतेत्यर्थः । केनेव । उद्धुरसिन्धुरेणेव । यथा गण्डयोः कपोलस्थलयोर्गलद्भिरनवरतनिष्पतद्भिर्मदैः दानवारिभिरन्धं भविष्णुनागतनयनीभवनशीलेन विचेतनीभावुकेन मदुदोद्धुरसिन्धुरेण उन्मादोत्कटकरटिना गम्भीरवेदिद्विरदेन छायया उपलक्षितास्तरवो येषां कदाचिदपि परावृत्तिं न भजते, पूर्वस्यां पश्चिमायां दक्षिणस्यामुत्तरस्यां च नायाति, यथास्थानमवस्थितैव तिष्ठति । अथ वा पल्लवपत्रपुष्पफलप्रमुखसुषमाविभूषितास्ते छायाद्रुमा भज्यन्ते ॥ इति सर्वनियमोपरोधनालोचनम् ॥

શ્લોકાર્થ

'મદના ઉન્માદથી અંધ બનેલો મદાંધ હાથી જેમ નવપલ્લવિત વૃક્ષોને ભાંગે તેમ સંસારચક્રમાં ભ્રમણ કરતા એવા મેં પ્રમાદવશાત્ જે કોઈ નિયમો તોડયાં હોય, ભાંગ્યા હોય તે મારું પાપ મિથ્યા થાઓ.' ।। ૧૪૪ ।।

अपेक्षया पञ्चमहाव्रतानां स्वर्भूधराणामिव भूधरेषु ।
अणुव्वहर्बन्धुमितव्रतेषु मया विराद्धं गृहमेधिना यत् ॥ १४५ ॥

गृहमेधिना गृहस्थेन सता मया यदहर्बन्धवः सूर्या द्वादशादित्याः तैर्मितानि प्रमाणीकृतानि व्रतानि द्वादशव्रतानि । स्थूलप्राणातिपातविरमणम्, स्थूलमृषावादविरमणम्, स्थूलादत्तादानविरणम्, स्वदारसंतोषपरस्त्रीविधवावेश्याकन्याभिगमनादिविरमणम्, इच्छा-परिग्रहःपरिमाणम्, सर्वदिग्गमनादिविरमणं प्रमाणं च, भोगोपभोगप्रमाणम्, अनर्थदण्डविरमणम्, सामायककरणम्, प्रतिदिनं निशां च देशावकासिकं दिगवकाशकरणम्, पर्वादिषु पोष-

धौपवासविधानम्, अतिथिसंविभागविधानम्, इत्यभिधानेषु गृहस्थानां पञ्चाणुव्रतानि। त्रीणि गुणव्रतानि। चत्वारि शिक्षाव्रतानि। इति द्वादशसु व्रतेषु यत्किंचिन्मया विराद्धम् अतिक्रम-व्यतिक्रम-अतीचार-अनाचाराचरणादिना विराधना कृता। किंभूतानाम्। पञ्चानां महाव्रतानामपेक्षया। पञ्चमहाव्रतेषु हि सर्वथैव सर्वेभ्योऽपि प्रोक्तवस्तुभ्यो विरमणम्। द्वादशव्रतेषु तु देशत एव न सर्वतः। इत्यपेक्षया अणुषु ह्रस्वेषु लघुषु। केष्विव। भूधरेष्विव यथा स्वभूधराणां मेरूणां लक्षयोजनप्रमाणत्वेन महत्त्वं महत्त्वाच्च बहुवचनम्। अपेक्षया अपरेषु भूधरेष्वणुत्वं लघुत्वं सुदर्शनमेरुं विना केऽप्यपि गिरिषु लक्षयोजनप्रमाणता नास्ति ॥

શ્લોકાર્થ

'પર્વતોની અપેક્ષાએ મેરૂપર્વત મહાન છે તેમ વ્રતોની અપેક્ષાએ પાંચ મહાવ્રત મહાન છે, પાંચ મહાવ્રતોની અપેક્ષાએ અણુવ્રતો-સ્થૂલપ્રાણાતિપાતવિરમણ, સ્થૂલમૃષાવાદ વિરમણ, સ્થૂલ અદત્તાદાનવિરમણ, સ્થૂલ મૈથુનવિરમણ, સ્થૂલ પરિગ્રહવિરમણ, દિક્પરિમાણ, ભોગોપભોગપરિમાણ, અનર્થદંડવિરમણ, સામાયિક, દેશાવગાસિક, પૌષધોપવાસ અને અતિથિસંવિભાગ એ બાર વ્રતોની ગૃહસ્થીપણામાં જે કાંઈ વિરાધના થઈ હોય, તે મારું પાપ મિથ્યા થાઓ.' ॥ ૧૪૫ ॥

संसाधकेषु त्रिदिवापवर्गदुर्गस्य योगेष्विह योगिनेव ।
वीर्यं प्रयुक्तं न मया कथंचित्प्रमादमन्दीकृतमानसेन ॥ १४६ ॥

इह भवे मया योगेषु यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारणा-ध्यान-समाधिनामाष्टाङ्गवत्सु योगेषु। अथ वा मनोयोग-वचोयोग-काययोगलक्षणेषु त्रिविधेषु। अथ वा सत्यमनोयोग-असत्यमनोयोग-मिश्रमनोयोग- सत्यासत्यमनोयोग-सत्यवचनयोग-असत्यवचनकाययोग-मिश्रवचनयोग- सत्यासत्यवचनयोग-औदारिककाययोग-औदारिकमिश्रकाययोग-विक्रियकाययोग-वैक्रियमिश्रकाययोग-आहारकाययोग-आहारमिश्रकाययोग-कर्मणयोग इत्यपि मनोवाक्कायैः कृत्वा पञ्चदशधापि योगा योजनानि। युज्यन्ते धावनवल्गनक्रियासु व्यापार्यतेऽसाविति वा युज्यन्ते संबध्यन्ते वल्गनक्रियया जीव एभिरिति वा व्युत्पत्तिमात्रं योगो वीर्यं शक्तिः। उत्साह इति यावत्। योगेषु मोक्षप्राप्तिकरणीभूतेषु ध्यानविशेषेषु च मया वीर्यं पुरुषकारो न प्रयुक्तः सम्यगुद्यमो न विहितः। केनेव। योगिनेव। यथा योगभाजा आसन्नोत्पत्स्यमानकेवलज्ञानेन क्षपकश्रेणिमारूढेन योगेषु यत्नः क्रियते। किंभूतेषु योगेषु। त्रिदिवं स्वर्लोकस्तदुक्तोऽपवर्गो मोक्षः स एव दुर्गः दुःखेन गम्यते प्राप्यते गृह्यते वा पर्वतादिविषमस्थानस्थकोट्टस्तस्य संसाधकेषु आत्मायत्तीकारकेषु मया कथंचित् गुर्वादिप्रेरणया

पञ्चेन्द्रियपाटवशरीरसामर्थ्यसहायकरणसामग्र्यपि प्रमादेन अनवधानतया आलस्येन वा मन्दीकृतं क्रियानुष्ठानकरणेषु कुण्ठीकृतं मानसं मनो येन यस्य वा ॥

श्लोकार्थ

'સ્વર્ગ અને અપવર્ગના સાધક યમ, નિયમ, આસન, પ્રાણાયામ, પ્રત્યાહાર, ધારણા, ધ્યાન અને સમાધિ એ આઠ યોગોમાં, શુભ મનોયોગ, શુભ વચનયોગ અને શુભ કાયયોગમાં અથવા મોક્ષ પ્રાપ્ત કરાવી આપનારા બીજા પણ શુભ યોગોમાં યોગીપુરુષોની જેમ ગુરુ આદિની પ્રેરણા હોવા છતાં પણ મેં પ્રમોદવશ શિથિલતાથી પુરુષાર્થને કર્યો હોય તે મારું પાપ મિથ્યા થાઓ.' ॥ ૧૪૬ ॥

एतद्यदन्यच्च मयार्जि पापमस्मिन्भवेऽन्येषु पुनर्भवेषु ।
अधर्मिणानर्थ इव त्रिधापि निन्दामि सम्यक्तदहं समग्रम् ॥ १४७ ॥

अस्मिन् वर्तमाने भवे जन्मनि पुनरन्येष्वतिक्रान्तेष्वनन्तेषु भवेष्ववतारेषु मया प्राप्तावस्थास्थायुकेन एतत्पूर्वोक्तमन्यदितरद्विस्मृतमविस्मृतं वा यत्पापं दुष्कृतमार्जि उपार्जितं स्यात्। केनेव। अधर्मिणेव। यथा अधर्मकारिणा पापिना पुंसा अनर्थः परघातपरदारगमनपरद्रव्यापहारादिरुत्पातः क्रियते तत्समग्रं सर्वमपि पापं दुष्कृतं त्रिधापि मनोवाक्कायैरपि त्रिकरणशुद्ध्या इदानीं निन्दामि आत्मसाक्षिकं गर्हामि देवगुरुसाक्षिकं व्युत्सृजामि ॥ 'एकेन्द्रियाः–'(१७।१३१) इत्यत आरभ्य 'एतद्यत्–'(१७।१४७) इति पर्यन्तं निन्दनादिना सप्तदशभिः कुलकम् ॥

श्लोकार्थ

'પાપી પુરુષની જેમ આ ભવ કે પરભવમાં મારા વડે જાણતાં અજાણતાં જે કાંઈ પાપકર્મ આચરાયું હોય, તે પાપકર્મને હું મન વચન અને કાયાથી આત્મસાક્ષીએ નિંદુ છું, દેવગુરુની સાક્ષીએ ગર્હા કરું છું અને તે મારા પાપકર્મને વોસિરાવું છું.' ॥ ૧૪૭ ॥

अष्टादशाब्रह्मवदंहसां तु स्थानानि यान्याचरितानि पूर्वम् ।
तान्यप्यशेषाणि मृषा भवन्तु क्षणाद्यथा द्यूतकृतां वचांसि ॥ १४८ ॥

तु पुनरष्टादशसंख्याकानि अंहसां पापानां स्थानानि प्राणातिपात-मृषावाद-अदत्तादान-मैथुन-परिग्रह-क्रोध-मान-माया-लोभ-राग-द्वेष-कलह-अत्याख्यान-पैशुन्य-रत्यरति-परपरीवाद-मायामृषा-मिथ्यात्वशल्य इत्यष्टादश पापस्थानानि। पूर्वमस्मात्प्रस्तावान्मयाचरितानि यानि स्वयंकृतानि परैर्वा कारितानि अष्टादशसंख्याकानि। किंवत्। अब्रह्मवत्। यथा मनसौदारिकाब्रह्म न करोमि, वचसौदारिकाब्रह्म न करोमि, कायेनौदारिकाब्रह्म न करोमि, मनसौदारिकाब्रह्म न कारयामि, वचसौदारिकाब्रह्म न कारयामि, कायेनौदारिकाब्रह्म न कारयामि, मनसौदारिकाब्रह्म नानुमोदे, वचसौदारिकाब्रह्म नानुमोदे, कायेनौदारिकाब्रह्म नानुमोदे, इत्यौदारिकेन मनोवाक्कायैः करणकारणानुमोदनैर्नव भेदाः। तथैव वैक्रियेण समनया रीत्या नव भेदा भवन्ति। संघीभूय सर्वेऽप्यष्टादश जाताः। एवमष्टादश ब्रह्मस्थानानि। अथ तान्यशेषाणि समस्तान्यपि अष्टादश पापस्थानानि क्षणान्निमेषमात्रादपि मृषा मिथ्या भवन्तु। कानीव। वचांसीव। यथा द्यूतकृतां दौरोदरिकाणां वचनानि क्षणान्मिथ्या भवन्ति॥

શ્લોકાર્થ

'અઢાર પ્રકારનાં અબ્રહ્મનાં સ્થાનની જેમ મારા વડે પ્રાણાતિપાત, મૃષાવાદ, અદત્તાદાન, મૈથુન, પરિગ્રહ, ક્રોધ, માન, માયા, લોભ, રાગ, દ્વેષ, કલહ, અભ્યાખ્યાન, પૈશુન્ય, રતિ-અરતિ, પરપરિવાદ, માયામૃષાવાદ અને મિથ્યાત્વશલ્ય-આ અઢાર પાપસ્થાનકોનું આચરણ થયું હોય તે સર્વે પાપસ્થાનકો જુગારીનાં વચનની જેમ ક્ષણમાત્રમાં મિથ્યા થાઓ.' ॥ ૧૪૮ ॥

कोपं हृदः शल्यमिव प्रहाय सत्त्वानशेषान्क्षमयामि सम्यक्।
मयार्दिताः प्रागिह वैरिणेव क्षाम्यन्तु ते मय्यनुदीतवैराः॥ १४९॥

एतस्यामवस्थायामहमशेषान् समस्तान् सप्त लक्षाः पृथ्वीकाययोनयः, सप्त लक्षाः अप्काययोनयः, सप्त लक्षाः तेजस्काययोनयः, दश लक्षाः प्रत्येकवनस्पतिकाययोनयः, चतुर्दश लक्षाः अनन्तवनस्पतिकाययोनयः, द्वे लक्षे द्वीन्द्रियाणां योनयः, द्वे लक्षे त्रीन्द्रिययोनयः, द्वे लक्षे चतुरिन्द्रिययोनय, चतस्रो लक्षाः पञ्चेन्द्रियतिरश्चां योनयः, चतस्रो लक्षाः नारकाणां योनयः, चतस्रो लक्षाः देवानां योनयः, चतुर्दश लक्षा मनुष्याणां योनयः। एवं सर्वा अपि संमिलिताः सन्त्यश्चतुरशीतिलक्षजीवयोनयो भवन्ति। एतांश्चतुरशीतिलक्षयोनिसत्कान् सत्त्वान् जीवान् सम्यक् मनोवाक्कायैः कृत्वा क्षमयामि पादयोर्लगित्वा ममापराधं तितिक्षे विनयामि। किं कृत्वा। हृदः हृदयात्कोपं क्रोधं प्रहाय संत्यज्य। किमिव। शल्यमिव। यथा केनापि प्रकारेण

केनचिद्वैरिणा परमवैरेण कृत्वा हृदि विषये निक्षिप्तमायसशस्त्रं नाराचं वा शङ्कुं वा काष्ठघटितकीलिकां वा उद्ध्रियते। तथा ये सत्त्वा मया प्राग् जन्मनि इहास्मिन् भवे वा वैरिणेव शत्रुणेव अर्दिताः पीडिताः ते सर्वे मां क्षाम्यन्तु मयिविषये क्षमां कुर्वन्तु। उपशाम्यन्त्वित्यर्थः। किंभूताः। अनुदीतवैराः मयि विषये अप्रकटितविरोधाः मुक्तविद्वेषाः क्षाम्यन्तु॥

શ્લોકાર્થ

'સાત લાખ પૃથ્વીકાય, સાત લાખ અપકાય, સાત લાખ તેઉકાય, સાત લાખ વાયુકાય, દસ લાખ પ્રત્યેક વનસ્પતિકાય, ચૌદ લાખ સાધારણ વનસ્પતિકાય, બે લાખ બેઈન્દ્રિય, બે લાખ તેઈન્દ્રિય, બે લાખ ચઉરિન્દ્રિય, ચાર લાખ દેવતા, ચાર લાખ નારકી,અને ચૌદ લાખ મનુષ્ય—આ ચોરાસી લાખ યોનિમાં રહેલા સર્વ જીવો પ્રત્યે મારા વડે આ ભવ કે પરભવમાં કંઈપણ અપરાધ થયો હોય તે સર્વ જીવોને હું ત્રિવિધે ત્રિવિધે ખમાવું છું, અને શત્રુ જેવા મારા વડે દુઃખ પામેલા તે સર્વ જીવો મારા પ્રત્યે વૈરભાવનો ત્યાગ કરીને મને ક્ષમા આપો, અર્થાત્ મારા ઉપર ઉપશાંત થાઓ.' ॥ ૧૪૯ ॥

मैत्री मम स्वेष्विव सर्वसत्त्वेष्वास्तां क्षितिस्वर्बलिवेश्मजेषु।
धर्मोऽर्जितो वैभववन्मया यस्तं प्रीतचेता अनुमोदयामि॥ १५०॥

क्षितिः भूलोकः, स्वर्देवलोकः, बलिवेश्म पाताललोकः, तेषु जायन्ते स्मेति क्षितिस्वर्बलिवेश्मजास्तेषु त्रिजगज्जन्मसु सर्वतिर्यङ्नरनागासुरव्यन्तरज्योतिर्वैमानिकनाकिनामसकलसत्त्वेषु समस्तजन्तुजातेषु विषये मम मैत्री सखिता आस्ताम्। केष्विव। स्वेष्विव। यथा आत्मीयजनेषु सख्यं स्यात्। अथवा 'मैत्री मम स्वैरिव सर्वसत्त्वैरास्तां क्षितिस्वर्बलिवेश्मजातैः' इति पाठः। तत्र स्वर्बलिवेश्मजातैः सर्वसत्त्वैः सार्धं स्वैरिव मम मैत्री अस्तु। पूर्वपाठस्तु 'मित्ती मे सव्वभूएसु' इति प्रतिक्रमसूत्रानुसारेण। अथ पुनरर्थः—यो मया वैभववत् संपत्तिरिव धर्मोऽर्जितः संचितः। प्रीतचेताः हृष्टमनाः सन् तं धर्मं पुण्यं सुकृतमनुमोदयामि प्रशंसामि॥

શ્લોકાર્થ

'સ્વર્ગલોક, મૃત્યુલોક અને પાતાળલોકમાં રહેલા સર્વ જીવો પ્રત્યે આત્મીયજનની જેમ મારો મૈત્રીભાવ બન્યો રહો અને હર્ષપૂર્વક મારા વડે જે કાંઈ પણ ધર્મ વૈભવની જેમ ઉપાર્જન કરાયો હોય તેની હું ભૂરિભૂરિ અનુમોદના કરું છું.' ॥ ૧૫૦ ॥

वृन्दं द्रुमाणामिव पुष्पकालाद्यस्मादृतेऽन्यद्विफलं व्रतादि ।
शुभः स भावोऽस्तु ममापवर्गमार्गानुलग्नाङ्गभृतां सहायः ॥ १५१ ॥

यस्मात् शुभभावादृते विना अन्यदितरद्व्रतादि सर्वं नियमब्रह्मचर्यादिपालनप्रमुखं सकलमपि विफलं वन्ध्यमेव । किमिव । वृन्दमिव । यथा पुष्पकालाद्वसन्तसमयादृते समस्तं द्रुमाणां पादपानां वृन्दं कदम्बकं निष्फलं भवेत् । स शुभो भावो ममास्तु निर्मलपरिमाणो मम भवतु । किंभूतः । अपवर्गो मोक्षः अर्थान्नगरं तस्य मार्गः पन्थाः तत्रानुलग्नास्तमनुप्रस्थिता येऽङ्गभृतो भव्यजनास्तेषां सहायः ॥

શ્લોકાર્થ

'જેમ વસંતઋતુ સિવાય વૃક્ષસમૂહ નિષ્ફળ બને છે તેમ શુભભાવ વિના મેં જે કાંઈ વ્રતનિયમને નિષ્ફળ બનાવ્યાં હોય તો મોક્ષમાર્ગે પ્રયાણ કરી રહેલા પથિકોને સહાયક એવો 'શુભભાવ' મને પ્રાપ્ત થાઓ.' ॥ ૧૫૧ ॥

भुक्तेन येनात्र कदाचिदात्मा न दारुणा वह्निमिवाप तृप्तिम् ।
शिवंगमीव स्वजनानुषङ्गं कृत्स्नं तमाहारमहं जहामि ॥ १५२ ॥

अहं तं त्रिजगत्प्रसिद्धं यच्छब्दसंबद्धं च कृत्स्नम् अशनपानखादिमस्वादिमरूपं सर्वजातीयं चतुर्विधाहारं जहामि । अत्र पानशब्देनापरपानकादि गृह्यते । जलमुत्कलं त्यजामि । क इव । शिवंगमीव । यथा मोक्षं गमिष्यतीत्येवंशीलो नीरागः पुमान् सर्वस्वजनानां निजकुटुम्बानामनुषङ्गं निजपरिजनवर्गस्य संबन्धं जहाति । स कः । अत्र जगति संसारे वा येनाहारेण भुक्तेन भक्षितेन कृत्वा कदाचित्कस्मिन्नप्यतीतानागतवर्तमानलक्षणे काले आत्मा जीवस्तृप्तिं संतोषं नाप न लेभे । क इव । वह्निरिव । यथा दारुणा काष्ठेन । जातावेकवचनम् । हुताशो न तृप्यति । यदुक्तम्—'नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः' इति ॥

શ્લોકાર્થ

'જેમ ઈંધણથી અગ્નિ શાંત થાય નહીં તેમ અનંતકાળમાં આહારના પુદ્ગલોથી મારો આત્મા તૃપ્તિ પામ્યો નથી; તો જેમ મોક્ષગામી આત્મા સર્વ સ્વજનોના સંગનો

ત્યાગ કરે છે તેમ અશન, પાન, ખાદિમ અને સ્વાદિમ એ ચારે પ્રકારના આહારનો હું ત્યાગ કરું છું, અર્થાત્ ચારે આહારના પ્રત્યાખ્યાન કરું છું.' ॥ ૧૫૨ ॥

सद्मास्ति यः पद्ममिवाष्टसिद्धिश्रीणां जगत्कल्पितकल्पसालः ।
अलीव पद्मे रमतां मदीये चित्ते चिरं श्रीपरमेष्ठिमन्त्रः ॥ १५३ ॥

स श्रीपरमेष्ठिमन्त्रः श्रीमन्नमस्कारश्चिरमासंसारं यावन्मदीये चित्ते रमतां मम मानसे हंसवत्खेलतु । क इव । अलीव । यथा भृङ्गो भ्रमरः पद्मे विकसितकमले सुचिरं रमते । स कः । यः श्रीनमस्कारः अष्टानाम् अणिमा-वशिता-ईशित्व-प्राकाम्य-महिमा-लघिमा-कामावसायित्व-प्राप्तिः इत्यभिधानामपरासां वा मनःकल्पितामामष्टानां महासिद्धीनामेव श्रीणां लक्ष्मीणां पद्ममिव स्मेरत्कमलमिव सद्म वासस्थानमस्ति । पद्मवासेति लक्ष्म्या अभिधानत्वात् । परमेष्ठिमन्त्रो जगतां त्रिभुवनजनानां कल्पितेषु कामितेषु कल्पसालः वाञ्छितसंपूरणे कल्पद्रुमोऽस्ति ॥

શ્લોકાર્થ

'જગતના જીવોના મનોરથોને પૂર્ણ કરવામાં કલ્પવૃક્ષ સમાન તેમજ અણિમા આદિ આઠ સિદ્ધિઓરૂપી લક્ષ્મીનાં કમલરૂપ વાસસ્થાન, એવો 'શ્રીપરમેષ્ઠીમંત્ર' (નમસ્કાર-મહામંત્ર) જેમ કમલમાં ભ્રમર રહે તેમ મારા ચિત્તમાં તે મંત્ર નિરંતર રમ્યા કરો.' ॥ ૧૫૩ ॥

वाध्रीणसस्येव विषाणमेको वर्तेत मे कश्चन वर्ततेऽन्यः ।
पुनर्धरित्र्या इव वृत्रशत्रुः कस्यापि न स्यामहमत्र विश्वे ॥ १५४ ॥

अत्र विश्वे अस्मिञ्जगति अहमेको वर्ते । किमिव । विषाणमिव । यथा वाध्रीणसस्य खड्गिनः गण्डको वन्यजीवविशेषजीवविशेषं तस्य विषाणं शृङ्गमेकमेव भवति । यदुक्तं कल्पसूत्रे—'खग्गिसिगमिवएगगे' इति । तथा मे मम कश्चन कोऽप्यन्यः परो न वर्तते नास्ति । पुनरत्र भुवने अहं कस्यापि न स्यां भवेयम् । अहं कस्यापि नास्मीत्यर्थः । क इव । वृत्रशत्रुरिव । यथा धरित्र्या भूमेः शक्रो राजा कस्यापि न स्यान्न भवेत् । 'काके शौक्ल्यं द्यूतकारेषु सत्यं सर्पे क्षान्तिः स्त्रीषु कामोपशान्तिः । क्लीवे धैर्यं मद्यपे तत्त्वचिन्ता राजा मित्रं केन दृष्टं श्रुतं वा ॥' इति वचनात् ॥

શ્લોકાર્થ

'ખડ્ગી નામના પશુને જેમ એક જ શીંગડું હોય છે, તેમ જગતમાં હું એક જ છું, મારું કોઈ નથી. જેમ પૃથ્વી ઉપર રાજા કોઈનો નથી તેમ જગતમાં હું કોઇનો નથી. (કાગડામાં શ્વેતતા, જુગારીમાં સત્યભાષા, સર્પમાં ક્ષમા, સ્ત્રીઓમાં કામનો ઉપશમ, નપુંસકમાં ધૈર્યતા, દારુડિયામાં તત્ત્વચિંતન તેમ રાજામાં મૈત્રીભાવ પ્રાયઃ જોવામાં આવતો નથી.' ॥ ૧૫૪ ॥

भवेन्मदीयेन्द्रियमन्दिरस्य यदि प्रमादोऽवसरेऽत्र दैवात् ।
त्रिधापि देहादिममात्मनाहं परिग्रहं बाह्यमिव त्यजामि ॥ १५५ ॥

यदि अत्रावसरे अस्मिन् प्रस्तावे दैवात्कर्मयोगादायुःकर्मणस्त्रुटेः क्षयान्मदीयेन्द्रियमन्दिरस्य मत्संबन्धिनः शरीरस्य । 'जुहाव यन्मन्दिरमिन्द्रियाणाम्' इति नैषधे । प्रमादो नाम जीवेन समं वियोगो भवेत् । मरणं स्यादित्यर्थः । तदाहमात्मना स्वयमेव देहादिमं कायप्रमुखमन्तरङ्गपरिग्रहं क्रोधमानमायालोभादिपरीवारोपध्यादिकं सर्वमपि त्रिधा मनोवाक्कायैः कृत्वा त्रिकरणशुद्ध्यै त्यजामि मुञ्चामि । कमिव । बाह्यमिव । यथा बहिर्भवो बाह्यः स चासौ परिग्रहश्च पुत्रकलत्रभ्रातृधनधान्यादिपरिग्रहः सर्वस्त्यक्तोऽस्ति, तथा वपुराद्यपि व्युत्सृजामीति ॥ इत्याराधनाविधानम् ॥

શ્લોકાર્થ

આ અવસરે આયુષ્યકર્મના ક્ષયથી ઇન્દ્રિયોના ઘરરૂપ શરીરનો મારા આત્માથી વિયોગ થશે, અર્થાત્ મૃત્યુ આવે તે પહેલાં જ જેમ ધન, ધાન્ય, કુટુંબ આદિ બાહ્ય પરિગ્રહનો ત્યાગ કર્યો હતો તેમ આ શરીરનો અને કામ, ક્રોધ, લોભ આદિ અંતરંગ પરિગ્રહનો પણ હું ત્યાગ કરું છું.' ॥ ૧૫૫ ॥

शमी शमीगर्भमिवैकतानमना दधानः प्रणिधानमन्तः ।
अर्हत्समक्षं दशमी दशम्यां व्यधाद्विधिज्ञोऽनशनं शमीशः ॥ १५६ ॥

शमिनां प्रशमवतां योगिनामीशः स्वामी यतिपतिर्दशम्यां तिथौ यावज्जीवं त्रिविधाहारपरित्यागरूपमनशनं व्यधाच्चकार । कथम् अर्हत्समक्षं भगवत्प्रत्यक्षं प्रति पुरस्तात्प्रत्या-

ध्यानोच्चारपूर्वम् । दशमी वर्षीयान् प्रान्तावस्थावस्थितान्। 'निशि दशमितामालिङ्गन्त्यां विबोधविधित्सुभिः' इति नैषधे । निशाया अवसानसमये दशमितेति पदं दृश्यते । पुनः किंभूतः । विधिज्ञः शास्त्रोक्तप्रकारवेत्ता प्रान्तसमये अनशनं विहितं विलोक्यते इति वा विधिः । किं कुर्वाणः । अन्तर्मनोमध्ये प्रणिधानं पञ्चपरमेष्ठिध्यानं दधानो बिभ्राणः । किंलक्षणः सन् । एकतानं लयानुगं मनो मानसं यस्य तादृशः सन् । कमिव । शमीगर्भमिव। यथा शमीद्रुमः खेजडिकाभिधानपादपः शमीगर्भं पावकमन्तर्धत्ते । 'अर्चिः शमीगर्भतमोघ्नशुक्राः' इति हैम्यामग्निनामसु । तथा 'शमीमिवाभ्यन्तरलीनपावकाम्' इति रघौ ॥

શ્લોકાર્થ

જેમ શમી (ખીજડાનું) વૃક્ષ મધ્યમાં અગ્નિ ધારણ કરે તેમ હૃદયમાં એકાગ્રચિત્તથી પરમેષ્ઠી મહામંત્રનું ધ્યાન કરતાં, વિધિના જાણકાર શ્રી હીરવિજયસૂરિજીએ ભાદરવા સુદ દશમના પ્રભાત સમયે અરિહંત ભગવંતની સાક્ષીએ અનશન સ્વીકાર્યું. ॥ ૧૫૬ ॥

अथ सप्तभिः कुलकं प्रारभ्यते—

भोक्तुं भुवं द्यां च समं मघोनो द्वितीयरूपादिव विक्रमार्कात् ।
नेत्रत्रिनेत्राननकेकियानवक्त्रत्रियामापतिसंमितेऽब्दे ॥ १५७ ॥

तत्र पञ्चमीमक्षमालां गणयितुमारभतेति संबन्धः। आदित एव काव्यानि पृथक् पृथक् व्याख्यायन्ते। नेत्रे द्वे चक्षुषी, त्रिनेत्रस्येश्वरस्याननानि मुखानि पञ्च। 'पञ्चमुखोऽष्टमूर्तिः' इति हैमीवचनात् पञ्चसंख्याकानि वदनानि, तथा केकियानस्य मयूरवाहनस्य स्वामिकार्तिकस्य वदनानि वक्त्राणि षट् । षण्मुखत्वात् । तथा त्रियामापतिश्चन्द्रः एकः । एभिः पदार्थैः संमिते सम्यक्प्रमाणीकृते अब्दे वर्षे। कस्मात् । विक्रमार्कात् विक्रमादित्यनाम्नो नृपात् । उत्प्रेक्ष्यते—मघोन इन्द्रस्य द्वितीयरूपादिव अपरशरीरादिव । किं कर्तुम् । द्यां देवलोकं च पुनर्भुवं भूमण्डलं समं सार्धमेककालं भोक्तुं पालयितुं भुक्तिविषयीकर्तुं वा । एतावता विक्रमार्कात् द्विपञ्चाशदधिकषोडशशतप्रमाणे वर्षे संवत् १६५२ वर्षे इत्युक्तम् ॥

શ્લોકાર્થ

નેત્ર (૨), ઈશ્વરમુખ (૫), કાર્તિકસ્વામીનાં મુખ (૬)અને ચંદ્ર (૧) એટલે વિક્રમ સંવત ૧૬૫૨ વર્ષ, જાણે ઇન્દ્રના બીજા રૂપથી સ્વર્ગ અને પૃથ્વીનો સમકાળે ભોગવટો કરવા માટે આ વર્ષ ન હોય. ॥ ૧૫૭ ॥

नभस्यमासस्य नमत्पयोदकदम्बकाडम्बरिणो नभोवत् ।
प्रभोः प्रभावादिव शुभ्रितायां तिथौ सुरद्वेषिनिषूदनस्य ॥ १५८ ॥

सुराणां देवानां द्वेषिणो वैरिणो दानवाः । 'असुरा दितिदनुजाः पातालौकःसुरारयः' इति हैम्याम्। तेषां निषूदनस्य उच्छेदकस्य हरेः। 'दैत्यारिश्च पुराणश्च सुपर्णस्ताक्ष्यध्वजः' इति हैम्याम्। तिथौ दिवसे एकादशीदिने। किंभूतायां तिथौ। शुभ्रितायामुज्ज्वलीभूतायाम्। अर्थाच्चन्द्रमसश्चन्द्रिकाभिर्धवलितायाम् तिथिशब्दः पुंस्त्रीलिङ्गे। उत्प्रेक्ष्यते—प्रभोर्हीरविजयसूरेः प्रभावान्महिम्नो माहात्म्यात्। शुभ्रितायामिव। तिथिः कस्य। नभस्यमासस्य नभस्यो भाद्रपदसंज्ञो मासस्तस्य। 'श्रावणिकोऽनभस्यः प्रोष्ठभाद्रपदः पदः' इति हैम्याम्। किंभूतस्य। नमन्तः पयोभरैर्नम्रीभवन्तो भूमौ लगन्तो ये पयोदा मेघास्तेषां कदम्बकानि पटलानि तेषामाडम्बरः आटोपः अस्यस्मिंस्तस्य किंवत्। नभोवत् श्रावणमासस्येव। श्रावणभाद्रपदमासौ वर्षा ऋतुः। यथा श्रावणे तथा भाद्रपदे यथा भाद्रपदे तथा श्रावणे मेघः स्यादिति। तथा 'नभोनभस्यत्वमलम्भयद्दृशौ' इति नैषधे। सैवनावसरे दमयन्त्याः स्वदृशौ श्रावणभाद्रपदीकृते। अयं तु वर्षाऋतुत्वान्मासस्वभावः। एकादशी तु स्वभावेनोज्ज्वला। तत्रेयमुत्प्रेक्षा। अथवा नभोवद्गगनस्येव। यथा प्रावृट्काले नभो व्योम घनघनाघनमण्डलाडम्बरितं भवेत् ॥ एतावता भाद्रपदमाससितैकादशीतिथौ निशासमये ॥

શ્લોકાર્થ

શ્રાવણ માસની જેમ જે મહિનામાં જલથી પરિપૂર્ણ મેઘના આડંબર છે, તે ભાદરવા માસની વિષ્ણુ તિથિ (એકાદશી) જાણે આચાર્યદેવના પ્રભાવથી ઉજ્જ્વલ બની ગઇ ન હોય! અર્થાત્ સુદી એકાદશીની રાત્રિએ- ॥ ૧૫૮ ॥

कान्ते तमीनामुदिते मुनीन्दोस्तत्पक्रमे वक्त्रदिदृक्षयेव ।
स्फुरत्सु तारेषु गुरोः पथीव यातुर्दिवं क्षिप्तसुमेषु देवैः ॥ १५९ ॥

पुनस्तमीनां रात्रीणां कान्ते वल्लभे चन्द्रे उदिते सति उदयं प्राप्ते सति। उत्प्रेक्ष्यते—तत्पक्रमे तस्मिन्नवसरे अनशनिनो मुनीन्दोर्हीरविजयसूरेर्वक्त्रस्य वदनस्य दिदृक्षया द्रष्टुमिच्छयेव। पुनस्तारेषु उपलक्षणाद्ग्रहनक्षत्रतारकेषु स्फुरत्सु दीप्यमानेषु झगज्झगिति कुर्वत्सु। उत्प्रेक्ष्यते—दिवं स्वर्गलोकं यास्यति गमिष्यतीत्येवंशीलस्य यातुर्गुरोर्हीरसूरेः पथि मार्गे देवैः क्षिप्तेषु विकीर्णेषु सुमेषु पुष्पेष्विव पुष्पप्रकरेष्विव ॥ घनोपरोधनिर्मुक्तग्रहनक्षत्रतारकलितकौमुदीकान्तोदये जाते ॥

શ્લોકાર્થ

જાણે આચાર્યદેવનું મુખ જોવા માટે આવ્યો ન હોય તેમ ચન્દ્રનો ઉદય થયો. અને સ્વર્ગમાં જતા આચાર્યદેવના માર્ગમાં જાણે દેવોએ પુષ્પોનો સમૂહ પાથર્યો ન હોય ! તેવા દેદીપ્યમાન તારાઓ ઝગઝગાટ કરતા હતા. ॥ ૧૫૯ ॥

महेभ्यवत्संनिधिशालमानानाकार्य कार्यज्ञतयानगारान् ।
तदैहिकामुष्मिकसर्वशर्मनिर्माणदक्षाः प्रवितीर्य शिक्षाः ॥ १६० ॥

एवंविधे व्यतिकरे सति । किं कृत्वा । कार्ये जातावसरे कृत्याकृत्यविधिं जानातीति कार्यज्ञस्तस्य भावस्तया शिक्षाप्रदानादिषु निपुणत्वेन संनिधौ समीपे शालमानान् शोभमानान् । किंवत् । महेभ्यवत् यथा महाव्यवहारिणः सद्भिर्विद्यमानै रत्नादिभिः शोभमानैर्वा निधिभिर्निधानैः शालन्ते राजन्ते तान् तादृशाननगारान् निजपारिपार्श्वकान्मुनीनाकार्याहूय पुनस्तेषामाकारितयतीनामैहिकानीहलोकसंबन्धीनि आमुष्मिकाणि परलोकसंबन्धीनि सर्वाणि समस्तानि शर्माणि सुखानि तेषां निर्माणे करणे दक्षाः कुशलाः शिक्षा अनुशास्तीः प्रवितीर्य दत्त्वा ॥

શ્લોકાર્થ

તે અવસરે કૃત્યાકૃત્યના જાણકાર શ્રેષ્ઠિની જેમ આચાર્યદેવે સમીપવર્તી સાધુઓને બોલાવીને ઈહલોક અને પરલોકના સર્વસુખોને આપનારી હિતશિક્ષા આપી. ॥ ૧૬૦ ॥

अहो युवाभ्यां विजयादिसेनव्रतिक्षितीन्द्रान्प्रति वाच्यमेतत् ।
युष्माकमङ्केऽस्ति गणोऽखिलोऽपि स शासनीयः शिशुवत्स्वकीयः ॥ १६१ ॥

अहो इति संबोधने । विमलहर्षसोमवाचकौ युवाभ्यां संभूय विजय इति पदमादौ यस्य तादृशः सन् एतावता विजयसेननाम्नः व्रतिक्षितीन्द्रान साधुवसुधाधिपान् प्रति एतद्वक्ष्यमाणं वाच्यं कथनीयम् । तदेवोच्यते—अखिलोऽपि समस्तोऽपि गणस्तपागच्छो युष्माकं श्रीमतामङ्के उत्सङ्गेऽस्ति वर्तते । स तपागच्छश्रमणगणः शासनीयः सम्यक् पालनीयः । किंवत् । शिशुवत् । यथा स्वकीयो बालः पाल्यते । गणः किंभूतः । स्वकीयो गुरुपरम्परया आगतः । आत्मीयः अथ श्रीमदीयः ॥

શ્લોકાર્થ

વિમલહર્ષ ઉપાધ્યાય અને સોમવિજય ઉપાધ્યાયને કહ્યું કે વાચકેન્દ્રો, તમારે વિજયસેનસૂરિજીને આ પ્રમાણે કહેવું કે 'આ સમસ્ત તપાગચ્છ તમારા ખોળે રહેલો છે, તો તેનું પોતાના પુત્રની જેમ સમ્યક્પ્રકારે પાલન કરવું.' ॥ ૧૬૧ ॥

श्रीवाचकेन्द्रौ विमलादिहर्षसोमादिराजद्विजयाभिधानौ ।
सदाश्रवौ स्वौ सचिवाविवाथ संयोज्य वाचेति निजं मुखाब्जम् ॥ १६२ ॥

अथ पुनः किं कृत्वा । विमल इति पदमादौ यस्य तादृशो हर्षः, तथा सोम इति पदमादौ यस्य स सोमादिः, तेन राजत् शोभमानं विजय इति पदं यस्य एतावता विमलहर्ष-सोमविजय इत्यभिधाने ययोस्तौ । किंभूतौ । श्रीवाचकेन्द्रौ श्रीमदुपाध्यायाधिराजौ प्रति इति पूर्वोक्तेन गणशासनलक्षणविजयसेनसूरिशिक्षाप्रदानरूपप्रकरणवाचा वाण्या समं निज मुखाब्ज वदनकमलं संयोज्य योजयित्वा उक्त्वेत्यर्थः। उत्प्रेक्ष्यते-वाचकौ स्वौ सचिवाविव आत्मीयामात्याविव। किंभूतौ । सदा सर्वदा कालमाश्रवौ वचनस्थितौ निजकथनकारकौ ॥

શ્લોકાર્થ

આ પ્રમાણે પોતાના મંત્રીસમાન નિરંતર ગુર્વાજ્ઞાને આધીન એવા વિમલહર્ષ ઉપાધ્યાય અને સોમવિજય ઉપાધ્યાયને કહીને– ॥ ૧૬૨ ॥

प्रणीय पूर्णाश्चतुरक्षमालाश्चतुर्गतीनामिव वारयित्रीः ।
गन्तुं गतिं पञ्चमिकामिवाथो स पञ्चमीं प्रारभताक्षमालाम् ॥ १६३ ॥

पुनः किं कृत्वा । चतुरक्षमालाश्चतस्रो जपमालिकाः पूर्णाः समाप्तिं प्राप्ताः संपूर्णाः संजाताः प्रणीय कृत्वा आदितो गणयित्वा । उत्प्रेक्ष्यते—चतसृणां नरकतिर्यङ्नरसुरलक्षणानां गतीनां कुत्सितानां स्थानकानां वारयित्रीर्निषेधिका इव । अथो पुनः स सूरिः पञ्चमीं पञ्चानां संख्यापूरणीमक्षमालां प्रारभत । गणयितुमिति शेषः । उत्प्रेक्ष्यते—पञ्चमिकां पञ्चानां गतीनां पूरणीं पूरकां गतिमनन्तसुखावासलक्षणां गतिं गन्तुं यातुमिव ॥ सप्तभिः कुलकम् ॥

શ્લોકાર્થ

ચાર ગતિઓને નિષેધ કરનારી એવી નમસ્કાર મહામંત્રની ચાર માળા ગણીને પાંચમી માળા ગણવાનો પ્રારંભ કર્યો. તે પાંચમી માળા જાણે પોતાને પાંચમી ગતિ-મોક્ષગતિ પ્રાપ્ત કરાવવા માટે ન હોય. ॥ ૧૬૩ ॥

अथोन्नताख्यस्य पुरस्य पार्श्वे ग्रामे सपद्मे सरसीरुहीव ।
समुद्रशायीव युतोऽङ्गजेन द्विजाग्रणीः कोऽपि बभूव भट्टः ॥ १६४ ॥

अथापराधिकारे एतस्मिन् समये च कोऽपि कश्चिदनिर्दिष्टनामा भट्टः । स्वयमध्येतुः पराध्यापयितुश्च विप्रद्विजस्य भट्ट इति नामोच्यते । स भट्टो बभूव । किंलक्षणः । द्विजाग्रणीर्ब्राह्मणमुख्यः । पुनः किंभूतः । अङ्गजेन स्वनन्दनेन युतः । क इव । समुद्रशायीव । 'दाशार्हः पुरुषोत्तमोऽब्धिशयनः' इति हैम्याम् । यथा नारायणः अङ्गजेन लक्ष्मीतनुजेन प्रद्युम्नेन सहितः कमनः । 'कलाकेलिरनन्यजोऽङ्गजः' इत्यपि हैम्याम् । भट्टः कुत्रस्थाने । उन्नत इत्याख्या नाम यस्य तादृशस्य पुरस्य पार्श्वे समीपभाजि क्वापि संनिधिवर्तिनि ग्रामे । किंभूते । सपद्मे सह पद्मया लक्ष्म्या वर्तते यः सः । कस्मिन्निव । सरसीरुहीव । यथा कमलं लक्ष्मीकलितं भवेत् ॥

શ્લોકાર્થ

કમલસહિત સરોવરની જેમ ઊના નગરની પાસેના કોઈ ગામમાં જેમ કામદેવ સહિત વિષ્ણુ શોભે છે તેમ પુત્ર સહિત કોઈ શ્રેષ્ઠ બ્રાહ્મણ રહેતો હતો. ॥ ૧૬૪ ॥

दिव्यं विमानं पवमानमार्गे नक्तं दृशा बिम्बमिवैन्दवीयम् ।
सनन्दनो मन्दिरचन्द्रशालामालम्बमानः स विलोकते स्म ॥ १६५ ॥

स भट्टो नक्तं प्रथमरात्रिसमये दृशा स्वलोचनेन पवमानमार्गे गगनाङ्गणे दिव्यं देवतासंबन्धि विमानं देवानां गमनागमनासनयानं विलोकते स्म दृष्टवान् । उत्प्रेक्ष्यते—ऐन्दवीयं चन्द्रसंबन्धि बिम्बं मण्डलमिव । किंभूतो भट्टः । सनन्दनः तत्रावसरे पुत्रयुक्तः स्वाङ्गजेन सहोपविष्टोऽस्ति । किं कुर्वाणः मन्दिरस्य स्वगृहस्य चन्द्रशालां शिरोगृहमुपरितनभूमिकामालम्बमान आश्रयन ॥

શ્લોકાર્થ

પુત્ર સહિત તે બ્રાહ્મણ પોતાના ઘરની અગાસીમાં બેઠો હતો ત્યારે તેણે રાત્રિના પ્રારંભે આકાશમાર્ગે જતા દેવવિમાનને જોયું, તે દેવવિમાન ચન્દ્રમંડળની જેમ દેદીપ્યમાન તેજપૂંજ હતું. ॥ ૧૬૫ ॥

परस्परं वार्तयतां सुराणां तदा नराणामिव देवमार्गे।
इदं तदन्तर्ध्वनितं तमायां शुश्राव स श्रोत्रपुटेन भट्टः॥ १६६॥

स पूर्वकथितो भट्टस्तमायां रजन्यां श्रोत्रपुटेन निजश्रवणपुटकेन इदमग्रे प्रोच्यमान तस्य विमानस्यान्तर्मध्ये ध्वनितं शब्दं शुश्राव आकर्णयामास। केषाम्। सुराणां देवानाम्। किं कुर्वताम्। परस्परं मिथो वार्तयतां किंवदन्तीं कुर्वताम्। क्व। देवमार्गे आकाशे। कदा। तदा सूरेर्निर्वाणसमये। केषामिव। नराणामिव। यथा मानवा अन्योन्यं वार्तयन्ति तथा वार्तयतां मनुष्याणां शब्दः श्रूयते॥

શ્લોકાર્થ

આકાશમાર્ગે જતા તે દેવવિમાનમાં બેઠેલા અને મનુષ્યની જેમ પરસ્પર વાર્તા કરતા એવા દેવોને અને દેવોનો વાર્તાલાપ તે બ્રાહ્મણે સાંભળ્યો. ॥ ૧૬૬ ॥

सौमङ्गलाद्या इव नाभिसूनोर्वक्त्रं व्रतीन्दोरिह जीवतोऽस्य।
विलोकयामश्च यथा कृतार्थाः स्यामः सुरास्तत्त्वरितं चरन्तु॥ १६७॥

यद्यस्मात्कारणादिहोन्नतनगरे इह सूरिभवे वा जीवतः प्राणान्धारयतोऽस्य व्रतीन्दोरेतस्यैव हीरविजयसूरेः वक्त्रं वदनं विलोकयामः पश्यामः। के इव। सौमङ्गलाद्या इव। यथा स्वनिर्वाणसमयमवसायानशनं निर्मातुमष्टापदपर्वते निवेदिते समवसृतस्य नाभिसूनोः श्रीऋषभदेवस्य अष्टापदाद्रिरक्षकैर्भरतचक्रिणः पुरस्तात्तदुदन्ते जीवतो भगवतः पितुः पितामहस्य स्वामिनो वदनारविन्दं विलोकयाम इति कृत्वा गलद्बहुलबाष्पप्लवप्लावितविलोचनयुगला भरतचक्रितदङ्गजप्रमुखा इक्ष्वाकुवंशोद्भवा बहवो जना ओजायमाना अष्टापदाचलं प्रचेलुः-इति शत्रुंजयमाहात्म्ये विस्तारोऽस्ति। पुनर्यथा येन प्रकारेण सूरिवक्त्रवीक्षणवि-

धिना कृतार्थाः कृतकृत्याः स्यामो भवामः। तत्तस्मात्कारणात् हे भ्रातरः सुराः देवाः, त्वरितं शीघ्रतरं चरन्तु प्रचलन्तु ॥

શ્લોકાર્થ

'ભરત ચક્રવર્તીએ જેમ અષ્ટાપદ પર્વત ઉપર નિર્વાણ સમય પહેલાં જેમ ઋષભ દેવ ભગવંતના મુખકમલનાં દર્શન કર્યાં હતાં, તેમ હે દેવો, આપણે જલ્દી ચાલો, જીવંત આચાર્યદેવના મુખકમલને જોઈને આપણે કૃતાર્થ બનીએ.' ॥ ૧૬૭ ॥

एवं सुराणां वदतां तदानीं क्षणाददृश्यं तदभूद्विमानम् ।
सौदामिनीमण्डलमम्बुदानामिवातिगर्जा सृजतां गभीराम् ॥ १६८ ॥

तदानीं तस्मिन्नेव वार्ताकरणसमये एवममुना पूर्वोक्तप्रकारेण वदतां परस्परं वार्तयतां प्रवृत्तिं विदधतां सतां सुराणां देवानां तद्ब्रुद्धेन तत्स्वयं दृष्टया दृष्टं विमानं क्षणान्निमेषमात्रादवृश्यं दृष्टेरगोचरमभूदजायत । किमिव । सौदामिनीमण्डलमिव । यथा गभीरां मन्द्रामतिशयेन गर्जारवं सृजतां कुर्वतां सतामम्बुदानां जलदानां विद्युद्वितानं क्षणाददृश्यं दृगगोचरातीतं भवति ॥ इत्युन्नतपुरपार्श्वग्रामस्थभट्टस्य दिव्यविमानदर्शनम् ॥

શ્લોકાર્થ

ગંભીર ગર્જારવ કરતા મેઘની મધ્યમાં જેમ વીજળી ક્ષણમાત્રમાં અદૃશ્ય થઈ જાય તેમ આ પ્રમાણે પરસ્પર વાર્તા કરતા દેવો અને વિમાન ક્ષણમાત્રમાં અદૃશ્ય થઈ ગયા. આ રીતે પુત્રસહિત બ્રાહ્મણે દિવ્ય વિમાન જોયું અને દેવવાણીને સાંભળી. ॥ ૧૬૮ ॥

सूरिस्ततः संश्रयति स्म शुक्लध्यानं दधानः स सुधाशसौधम् ।
काङ्क्षन्महानंदपुरे प्रयातुं प्राक्तस्य मार्गस्य दिदृक्षयेव ॥ १६९ ॥

ततो विमानागमनानन्तरं सूरिर्हीरविजयसूरिः सुधाममृतमश्नन्ति भजन्तीति सुधाशा देवास्तेषां सौधं गृहम् । देवलोकमित्यर्थः । संश्रयति स्म भजते स्म । स्वर्गं गत इत्यर्थः । किं कुर्वाणः । शुक्लध्यानं दधानः धारयन् । ध्यायन्नित्यर्थः । उत्प्रेक्ष्यते--महानन्दपुरे मोक्षनगरे प्रयातुं गन्तुं काङ्क्षन् सन् प्राक् पूर्वं तस्य मोक्षनगरस्य मार्गस्य समीचीनताशालितस्य मार्गस्य पथो दिदृक्षया द्रष्टुमिच्छया । अथ वा कीदृक् प्रध्वरो वा वक्रो वा

विषमो वा, कथं कया रीत्या गन्तव्यमित्यादिदर्शनेच्छया इव ॥ इति हीरविजयसूरिगुरोः स्वर्गमनम् ॥

શ્લોકાર્થ

વિમાનના આગમન બાદ તરત જ શુક્લધ્યાન ધ્યાતા જગદ્ગુરુ શ્રી હીરવિજયસૂરિજીએ સ્વર્ગલોકનો આશ્રય કર્યો. (વિક્રમ સંવત ૧૬૫૨ ના ભાદરવા સુદ એકાદશીની રાત્રિના પ્રથમ પહોરમાં આચાર્યદેવનું સ્વર્ગગમન થયું.) જાણે મોક્ષનગરમાં જવા પૂર્વે માર્ગનું નિરીક્ષણ કરવા માટે આચાર્યદેવ સ્વર્ગમાં ગયા ન હોય! ॥ ૧૬૯ ॥

अस्तं गभस्तेरिव कोकलोकः शोकाकुलो बाष्पजलाविलाक्षः ।
श्रुत्वा गुरोः स्वर्गमनं निशायां जनव्रजो द्वीपपुरादुपागात् ॥ १७० ॥

जनव्रजः श्राद्धवर्गो निशायां रजन्यामेव त्वरितं द्वीपपुराद्द्वीपबन्दिरादुपागादुन्नतपुरे समेतः । किं कृत्वा । निशायामेकादशीरजन्यां गुरोः सूरेः स्वर्गमनं देवलोके पादावधारणं श्रुत्वा आकर्ण्य । किंलक्षणो जनः । बाष्पजलैर्दुःखनिपतन्नयनाश्रुसलिलैराविले व्याप्ते अक्षिणी नेत्रे यस्य । पुनः किंभूतः । शोकेन खेदेन आकुलः उत्पिञ्जलः । क इव । कोकलोक इव । यथा गभस्तेर्भास्करस्यास्तं द्वीपान्तरगमनं श्रुत्वा चक्रवाकचक्रं शोकाकुलं बाष्पजलाविलाक्षं भवेत । 'आलोकतालोकमुलूकलोकः' इति नैषधे । उलूकलोकस्तथा कोकलोकः । तथा 'आकाशे सावकाशे तमसि समभिते कोकलोके सशोके' इति नाटककाव्ये ॥

શ્લોકાર્થ

જેમ સૂર્યનો અસ્ત થવાથી ચક્રવાકનો સમૂહ શોકાતુર બની જાય તેમ આચાર્યદેવના સ્વર્ગગમનના સમાચાર સાંભળીને, શોકાતુર બનેલો અને આંસુઓથી પરિપૂર્ણ નેત્રોવાળો દીવબંદરનો શ્રાવકસંઘ એકાદશીની રાત્રિએ જ ઊનાનગરમાં આવી ગયો. ॥ ૧૭૦ ॥

ल्यारीसहस्रद्वयसंगृहीतकथीपकाख्यादिमदिव्यवस्त्रैः ।
श्राद्धा व्यधुर्मण्डपिकां मुनीन्दोरिवाप्तभर्तुः शिबिकां महेन्द्राः ॥ १७१

शलाककाराणां त्रिपुटीकृतानां कलधौतमयानां ल्यारिका इति नाम्नां नाणकविशेषाणां सहस्रद्वयेन विंशतिशत्या व्ययेन संगृहीतैरानीतैः कथीपका इत्याख्या नामविशेषा येषाम्

'कथीपो' इति प्रसिद्धाः । ते आदिमाः प्रथमा येषां तादृशैर्दिव्यैर्देवदुकूलोपमैर्वस्त्रैः कृत्वा श्राद्धा द्वीपोन्नतपुरश्रावकाः मुनीन्द्रोर्हीरसूरेर्मण्डपिकां 'मांडवी' इति प्रसिद्धां व्यधुश्चक्रिरे । के इव । महेन्द्रा इव । यथा पुरंदरा आप्तभर्तुः तीर्थंकरस्य शिबिकां याप्ययानं विदधते ॥

श्લोકार्थ

જેમ ઇન્દ્રો તીર્થંકર ભગવંતની શિબિકા બનાવે તેમ બે હજાર રૂપાનાણા વડે ખરીદેલા કથીપાઆદિ દિવ્ય વસ્ત્રોથી શ્રાવકોએ આચાર્યદેવના દેહ માટે માંડવી બનાવી. ॥ ૧૭૧ ॥

ते ल्यारिकाभिर्व्रतिपस्य सार्धसहस्रयुग्मप्रमिताभिरङ्गम् ।
अपूपुजन्भक्तिभरोल्लसन्तो जिनेशितुर्मूर्तिमिव प्रसूनैः ॥ १७२ ॥

ते श्राद्धाः सहार्धेनवर्तते तत्सार्धम्, सहस्रयोर्दशशत्योर्युग्मं युगलम्, सार्धं च तत्सहस्रयुग्मं च । तेन प्रमिताभिः प्रमाणं प्रापिताभिः पञ्चविंशतिशतप्रमाणाभिर्ल्यारिकाभिः कृत्वा व्रतिपस्य सूरेः अङ्गं शरीरमपूपुजन्नर्चयन्ति स्म । कामिव । मूर्तिमिव । यथा श्राद्धा जिनेशितुस्तीर्थकरस्य प्रतिमां प्रसूनैः कुसुमैः पूजयन्ति । किंभूता । भक्तेः सेवासक्तेः भरेणातिशयेनोल्लसन्तः रोमाञ्चकञ्चुकीभवन्तः ॥

શ્લોકાર્થ

જેમ પુષ્પોથી જિનેશ્વર ભગવંતની મૂર્તિની પૂજા કરાય તેમ ભક્તિભરથી ઉલ્લસિત બનેલા શ્રાવકોએ સવા બે હજારની લ્યારી(રૂપાનાણા)થી આચાર્યદેવની અંગપૂજા કરી. ॥ ૧૭૨ ॥

नभोनभस्याविव निःसरद्भिः पयःप्रवाहैर्नयने वितन्वन् ।
यावज्जनो मण्डपिकाममुष्यालंकारयामास शरीरयष्ट्या ॥ १७३ ॥

जनः श्राद्धलोकः यावद्यावता समयेन अथवा यस्मिन् समये अमुष्य स्वर्गतस्य सूरेः शरीरयष्ट्या तनूलतया कृत्वा मण्डपिकामलंकारयामास भूषयति स्म । वसनाद्यैर्भूषितायां मण्डपिकायां सूरिशरीरं शाययति स्मेत्यर्थः । जनः किं कुर्वन् । नयने स्वनेत्रे नभोनभस्याविव श्रावणभाद्रपदाविव वितन्वन् विदधत् । कैः । निःसरद्भिर्दुःखप्रकर्षा विरलधारनिवहनिःसरद्भिः पयःप्रवाहैर्बाष्पजलप्लवैः ॥

શ્લોકાર્થ

શ્રાવણ અને ભાદરવાની જેમ આંખોમાંથી ચોધાર આંસુઓ વરસાવતો શ્રાવકવર્ગ આચાર્યદેવના શરીરને માંડવીમાં પધરાવે છે તેટલામાં– ॥ ૧૭૩ ॥

विमानघण्टापटुनादसान्द्रध्वनत्सुघोषेव गभीररावा ।
घण्टावली तावददृश्यमानाप्यध्वानितादिध्वनदभ्रमार्गे ॥ १७४ ॥

तावता समयेन तस्मिन् समये वा अध्वानिताः कैश्चनापि मानवैरवादिताः कैरपि जनमनुष्यैरताड्यमानापि स्वयमेवादृश्यमाना नापि केषांचिच्चक्षुर्गोचरे भवन्ती तादृशी घण्टानामत्र मण्डले देवगृहे वादनवाद्यविशेषाणां द्वीपवन्दिरादौ च घटिकायामादिमानविशेषकृत्ये वादनीयानां 'घांट' इति प्रसिद्धनाम्नाम् आवली श्रेणी अदिध्वनत् गाढं शब्दायते स्म । क्व । अभ्रमार्गे मेघाध्वनि व्योमाङ्गणे । किंभूता । गभीरो मन्द्रो रावो ध्वनिर्यस्याः । केव । विमानानां सौधर्मदेवलोकसंबन्धिनां द्वात्रिंशल्लक्षैर्मितानां देवनिवसनकृते नगरूपाणां घण्टानामेकसमयध्वनन्महद्घण्टिकानां पटुभिरतिपञ्चविषयसुखसंलीनतया किमप्यन्यत्कृत्याकृत्येष्वदत्तावधानानां देवानां स्वस्वामिकार्यनिर्माणप्रगुणीकारणप्रवणैः नादैः निःस्वाणैः प्रकटध्वनिभिः सान्द्रध्वनत् बहलीभूतशब्दायमाना सुघोषा घण्टेव ॥ इति मण्डपिकाकरणसूरिशरीरशायनम् ॥

શ્લોકાર્થ

સ્વર્ગલોકમાં રહેલા ગાઢ અને ગંભીર અવાજવાળા સુઘોષાઘંટાની અવાજની જેમ આકાશમાં અદૃશ્યપણે ગંભીર અવાજવાળા ઘંટાઓના ઘંટારવો થવા લાગ્યા અને પુષ્પવૃષ્ટિ થઈ. ॥ ૧૭૪ ॥

वाद्योघमाद्यन्निनदैर्जिनस्येवामुष्य निर्वाणमहं प्रणेतुम् ।
किमाह्वयन्तस्त्रिदशानशेषानादाय तां श्राद्धजनाः प्रचेलुः ॥ १७५ ॥

श्राद्धजनाः श्रावकव्रजाः तां मण्डपिकामादाय स्कन्धेषु समधिरोप्य प्रचेलुः संस्कारभूमिं प्रति प्रचलन्ति स्म । उत्प्रेक्ष्यते—वाद्यौघानां वादित्रसंदोहानां माद्यद्भिर्बहलीभवद्भिर्निनदैः शब्दैः कृत्वा अशेषान् सर्वानपि महेन्द्रप्रमुखान् त्रिदशान् देवान् किमाह्वयन्त

आकारयन्त इव । किं कर्तुम् । अमुष्य सूरेर्जिनस्य तीर्थकरस्येव निर्वाणमहं परलोकगमनमहोत्सवं प्रणेतुं विधातुम् ॥

શ્લોકાર્થ

શ્રાવકવર્ગ માંડવીને ખભા ઉપર ઉપાડીને અગ્નિસંસ્કારભૂમિ તરફ ચાલ્યા. વાજિંત્રોના પ્રગાઢ અવાજથી તીર્થંકરભગવંતની જેમ આચાર્યદેવનો નિર્વાણમહોત્સવ ઊજવવા માટે જાણે સર્વે દેવોને બોલાવાતા ન હોય. ॥ ૧૭૫ ॥

ध्वजव्रजैरुर्जितसांध्यरागोपयुक्तवद्विष्णुपदं सृजन्तः ।
आदाय तां मण्डपिकां मुनीन्दोः संस्कारभूमीमनयज्जनास्ते ॥ १७६ ॥

ते जना द्वीपोन्नतनगरश्राद्धलोका मुनीन्दोर्हीरसूरेर्मण्डपिकामादाय गृहीत्वा संस्कारस्य परलोकोपगतशरीरिशरीरस्य कृशानुना संस्कृतिकरणस्य भूमीं स्थानकमगमन गच्छन्ति अनयन प्रापयन्ति स्म वा । किं कुर्वन्तः । सृजन्तः विदधतः । किम् । विष्णुपदं हरिचरणमाकाशम् । किंवत् । ऊर्जितेन प्रबलेन संध्यायां दिवसावसाने भवः सांध्यः स चासौ रागश्च सायंतन संध्यासंबन्धिरक्तिम्णा युक्तवत्कलितमिव । कैः । ध्वजव्रजैः पताकाप्रकारैः । विविधवर्णवैजयन्तीराजिभिः संध्यायामनेके नीलपीतरक्तादिका रङ्गा भवेयुः ॥

શ્લોકાર્થ

વિચિત્ર પ્રકારની ધજાઓના સમૂહથી આકાશને સંધ્યાના રંગની જેમ કરતા દીવબંદરના અને ઊનાનગરનાં લોકો આચાર્યદેવના દેહને માંડવીમાં ગ્રહણ કરીને, અગ્નિસંસ્કાર કરવાની ભૂમિ ઉપર લઈ ગયા . ॥ ૧૭૬ ॥

महीन्दिरायाः शिरसीव नीलमणीप्रणीतातपवारणस्य ।
रसालसालस्य तलेऽखिलास्ते स्वांसस्थलान्मण्डपिकाममुञ्चन् ॥ १७७ ॥

अखिलाः समस्ता अपि श्राद्धजना द्वीपोन्नतपुरलोकाः स्वांसस्थलान्निजस्कन्धदेशात् । आत्मीयस्कन्धेभ्य इत्यर्थः । रसालसालस्य सहकारमहीरुहस्य तले अधःप्रदेशभूमौ मण्डपिकाममुञ्चन् शुद्धधरणीमण्डले स्थापयन्ति स्म । कथंभूतस्य रसालसालस्य । नीलमणीप्रणीतातपवारणस्य.......... । उत्प्रेक्ष्यते—महीन्दिरायाः...... ....॥

શ્લોકાર્થ

સર્વે શ્રાવકોએ પોતાના ખભા ઉપરથી ઉતારીને માંડવીને આમ્રવૃક્ષની નીચે મૂકી. તે આમ્રવૃક્ષ જાણે પૃથ્વીરૂપી લક્ષ્મીના મસ્તક ઉપર નીલમણિથી બનાવેલું છત્ર ન હોય. ॥ १७७ ॥

संस्कारोपस्करमथ तत्रानिन्युर्जना गतोत्साहाः ।
चन्दनदलिकादिममिव गीर्वाणाः सार्वनिर्वाणे ॥ १७८ ॥

अथ संस्कारभूमौ मण्डपिकाया आनयनानन्तरं गतोत्साहाः शिथिलोद्यमा उद्यमरहिताः । 'उत्साहः प्रगल्भता । अभियोगोद्यमौ प्रौढिः' इति हैम्याम् । जनास्तत्र संस्कारोचितसहकारतरुसमीपभूमौ संस्कारोपस्करं सूरिशरीरसंस्कारकरणसमुदायमानिन्युरानयन्ति स्म । संस्कारोपस्करं किंभूतम् । चन्दनदलिकादिमं श्रीखण्डकाष्ठप्रमुखम् । क इव । गीर्वाणा इव । यथा देवा विगतोद्यमाः सन्तः सार्वस्य जिनस्य निर्वाणे सिद्धिविधाने तदर्हत्तमसंस्कारोपस्करं मेरुभूमेश्चन्दनादिकमानयन्ति ॥

શ્લોકાર્થ

તીર્થંકર ભગવંતના નિર્વાણમાં નિરુત્સાહી બનેલા દેવો જેમ ચંદન વગેરે લાવે તેમ નિરુત્સાહી શોકાતુર બનેલા શ્રાવકો ચંદનનાં લાકડાં આદિ અગ્નિસંસ્કારનો સામાન લાવ્યા. ॥ १७८ ॥

व्यालानुषङ्गवशतो वसतेर्वनान्ते
पुष्पश्रिया फलभरैरपि वन्ध्यभावात् ।
आगान्मुमूर्षुरतिदुःखगणेन गन्ध
सारः किमत्र तिथिसंख्यमणप्रमाण ॥ १७९ ॥

अत्र संस्कारभूमौ तिथीनां पञ्चदशकमेवादिनां संख्या मानं येषां तादृशानां चत्वारिंशत्सेरप्रमाणानां मणानां मानविशेषाणां प्रमाणं यस्य । पञ्चदशमणा इत्यर्थः । गन्धसारश्चन्दन आगात् । उत्प्रेक्ष्यते—अतिदुःखगणेन अत्यभ्यधिकानां हृदयंतुदानां दुःखानामसातानां

गणेन भरेण कृत्वा मुमूर्षुर्मर्तुमिच्छुरिव । दुःखं कुतः । व्यालानां दुष्टद्विजिह्वानामनुषङ्गस्य सर्वदा सङ्गस्य वशात आयतत्वात् । पुनः कस्य । वनानामन्ते काननानां प्रान्ते मध्ये वा वसतेर्निवासात च । अपि पुनः पुष्पश्रिया कुसुमलक्ष्म्या अथ च पुष्पवद्दशदिक्षु विकसन्त्या व्यापारव्यवहारैः सर्वत्र जनस्थलदेशेषु विस्तृतया इन्दिरया समृद्ध्या । अपि पुनः फलानां सस्यानां पुत्रपौत्रादीनां भरैर्द्वारिकाप्राप्तयादववंशवद्वृन्दैर्वन्ध्यभावान्मोघत्वात् । 'यद्यपि चन्दनविटपी विधिना फलपुष्पवर्जितो विहितः । निजवपुषैव परेषां तथापि संतापमपनयति ॥' इति सूक्तवचनात् । इत्यादिकारणात्संजातमुमूर्षा ॥

श्लोकार्थ

અગ્નિસંસ્કારભૂમિમાં પંદર મણ ચંદન લાવવામાં આવ્યું; તે જાણે સર્પોના સંગને વશ બનેલા, વનવાસ અને પુષ્પોની શોભાના તથા ફૂલસમૂહના વન્ધ્યત્વ પામેલા અને તેથી અત્યંત દુઃખી બનેલા ચંદન જાણે મરવા માટે આવ્યાં ન હોય . ॥ १७९ ॥

घृतमिव पितृनिधनभवोऽगुरुद्रवस्तत्र पञ्चसेरमितः ।
सुहृदिव सस्नेहोऽगुरुरप्यानीतो मणत्रितयः ॥ १८० ॥

तत्र संस्कारोपस्करे संस्कारभूमौ वा अगुरुद्रवः 'चूओ' इति प्रसिद्धनामा पञ्चभिः सेरैर्मितः प्रमाणीकृतः पञ्चसेर आनीतः । किंभूतः । पितुर्गुरोर्निधनात् मरणात निदाघादेव उत्पत्तिर्यस्य । किमिव । घृतमिव । यथा आज्यं पितुर्दध्नो मथनान्नाशात् अथ वा मृक्षणस्य विनाशात्तापनगालनात्संजातम्, तथा चूआकोऽपि तातस्य कृष्णागुरोर्गालादुत्पन्नः । अपि पुनः सुहृदिव सखेव सह स्नेहेन प्रेम्णा चूआनामतैलद्रवेण च युक्तः कलितः । मणानां त्रितयं त्रिकं यस्य तादृशोऽगुरुः काकतुण्डः समानीतः ॥

श्लोकार्थ

અગ્નિસંસ્કાર માટે પાંચ શેર ચૂઓ લાવવામાં આવ્યો, અને જેમ પોતાના પિતા દહીંના નાશથી ઘી ઉત્પન્ન થાય તેમ પિતા કૃષ્ણાગુરુધૂપના ઓગળવાથી 'ચૂઆ' તરીકે પ્રસિદ્ધ થએલા એવા સ્નેહાળ મિત્ર ચૂઆને મળવા માટે આવ્યો ન હોય તેમ ત્રણ મણ અગુરુધૂપ લાવવામાં આવ્યો. ॥ १८० ॥

श्यामत्वमात्मपितृघातजपातकं च
गौरीशविग्रहहुताशनसेवनाभिः ।

सारङ्गनाभिनिवहः प्रणिहन्तुकाम-
स्तत्राजगाम किमु सेरयुगप्रमाणः ॥ १८१ ॥

सारङ्गनाभिनिवहः कस्तूरीप्रकरः सेरयोर्युगं द्वन्द्वं प्रमाणं यस्य स सेरयुगप्रमाणः तत्रो-पस्करे संस्कारभूमौ वा आजगाम आगच्छति स्म । उत्प्रेक्ष्यते—श्यामत्वमात्मकालिमानं च पुनः पितुः कस्तूरिकामृगस्य घातान्मारणाज्जातमुत्पन्नं पातकं दुष्कृतं गौरीशस्य पार्वतीभर्तुः शिवस्य विग्रहः शरीरं यो हुताशनः कृशानुस्तस्य सेवनाभिर्भक्तिभिः परिचर्याभिः । 'क्षिति-जलपवनहुताशनयजमानाकाशसोमसूर्याख्याः । अष्टौ शिवमूर्तयः' इति वचनात् वह्निसेवा-भिरग्निमध्ये प्रवेशैः प्रणिहन्तुकामः किमु निवारयितुमिच्छुरिव ॥

श्लोकार्थ

એ શેર કસ્તૂરી લાવવામાં આવી. તે જાણે એક શ્યામતા અને બીજું પોતાના પિતા કસ્તૂરીમૃગની હત્યાથી ઉત્પન્ન થએલા પાપને દૂર કરવા માટે, ઈશ્વરના શરીરરૂપી અગ્નિમાં પ્રવેશ કરવાને ઇચ્છતો કસ્તૂરીનો સમૂહ ન હોય. ॥ ૧૮૧ ॥

दिवं गतस्यापि विभोरमुष्य श्लोकस्त्रिलोक्यामपि पोस्फुरीति ।
विवक्षयेतीव पुरो नराणामागात्त्रिसेरीप्रमितः सिताभ्रः ॥ १८२ ॥

त्रयाणां सेराणां समाहारस्त्रिसेरी तया प्रमितः प्रमाणीकृतः सेरत्रयमानः सिताभ्रः कर्पूरः समागात् । उत्प्रेक्ष्यते—नाराणां समग्रजनानां पुरोऽग्रे इति विवक्षया वक्तुमिच्छयेव । इति किम् दिवं गतस्यापि स्वर्गं यातस्यापि अमुष्य विभोः गुरोः श्लोको यशस्त्रिलोक्यामपि पोस्फुरीति जगत्त्रयेऽपि स्फूर्तिमियर्ति इति हेतोस्त्रिसेरीमितः ॥ इति संस्कारोपस्करमेलन-मानयनं च ॥

શ્લોકાર્થ

તેમજ ત્રણ શેર કર્પૂર લાવવામાં આવ્યું; તે જાણે 'સ્વર્ગમાં ગયેલા આચાર્ય-દેવનો યશ, ત્રણે લોકમાં સ્ફુરાયમાન છે, આ પ્રમાણે માણસોને કહેવા માટે જાણે આવ્યો ન હોય. ॥ ૧૮૨ ॥

ज्योतिःकुमारा इव तीर्थभर्तुः प्रज्वाल्य पूर्वं ज्वलनं चितायाम् ।
सूरेः शरीरस्य शरीरिणस्ते संस्कारमातन्वत चन्दनाद्यैः ॥ १८३ ॥

ते शरीरिणः श्राद्धजनाः सूरेः शरीरस्य चन्दनाद्यैः श्रीखण्डागुरुचूआककर्पूरकस्तूरिकाभिः कृत्वा । संस्कारं वह्निना संस्करणं भस्मसान्निधानमातन्वत चक्रुः । किं कृत्वा । पूर्वं प्रथमं चितायां ज्वलनमग्निं प्रज्वाल्य संधुक्ष्योद्दीप्य वा । क इव । ज्योतिःकुमारा इव । यथा अग्निकुमारास्तीर्थभर्तुश्चितायां पुरं प्रवृत्तादेशा नयननिःपतद्बहलबाष्पप्लवाः पुर्वज्वलनं प्रज्वालयन्ति ॥

श्लोकार्थ

જેમ અગ્નિકુમાર દેવો તીર્થંકર ભગવંતના શરીરનો અગ્નિસંસ્કાર કરે તેમ ચોધાર આંસુ વહાવતા શ્રાવકોએ પ્રથમ અગ્નિ પ્રગટાવીને ચંદન, ચૂઆ, કપૂર અને કસ્તૂરીઆદિ દ્રવ્યો વડે આચાર્યદેવના શરીરનો અગ્નિસંસ્કાર કર્યો. ॥ ૧૮૩ ॥

सप्तसहस्राः सर्वाः संभूय ल्यारिका इह व्ययिताः ।
सप्तापि दुर्गतीरिव निषेद्धुमेतैः समुत्सुकितै ॥ १८४ ॥

तैः श्राद्धैः पूजादीनां वस्त्रादीनां सर्वाः समस्ता अपि संभूय मेलयित्वा इह सूरिशरीरसंस्कारसमये सप्तसहस्रप्रमाणा ल्यारिका व्ययिता व्ययीकृताः । उत्प्रेक्ष्यते—सप्तसंख्या अपि दुर्गतीः नरकान्निषेद्धुं निवारयितुं समुत्सुकितैरुत्कण्ठितैरिव ॥ इति सूरिशरीरसंस्कारकरणम् ॥

श्लोकार्थ

શ્રાવકોએ અગ્નિસંસ્કારમાં ચંદન, વસ્ત્રઆદિ બધું મળીને સાત હજાર લ્યારી-(રૂપાનાણું)નો વ્યય કર્યો. જાણે શ્રાવકો સાત પ્રકારની નરકરૂપ દુર્ગતિને નિવારવાને માટે ઉત્સાહિત બન્યા ન હોય. ॥ ૧૮૪ ॥

चैत्ये श्रीफलतन्दुलाञ्जिनपुरस्ते ढौकयित्वा ततः
संस्तुत्य प्रणिपत्य भक्तिभरिता जग्मुर्गृहानात्मनाम् ।

गीर्वाणा इव वासवप्रभृतयो नन्दीश्वरेऽष्टाहिकां
निर्मायानुसमेतयौवतयुता निर्वाणकल्याणके ॥ १८५ ॥

ते समस्ता अपि संस्कारकारिणः उपलक्षणात्परेऽपि द्वीपोन्नतादिनगरश्राद्धकास्ततः संस्कारकरणानन्तरं चैत्ये जिनप्रासादे श्रीजिनपुरस्तीर्थकृत्प्रतिमानां पुरस्तात् श्रीफलानि नालिकेराणि तथा तन्दुलाश्चोक्षा उपलक्षणादपरगोधूमयुगंधरीप्रमुखधान्यश्रेणीं ढौकयित्वा ततस्तदनन्तरं च संस्तुत्याष्टस्तुतिभिर्देववन्दनां विधाय मध्ये अजितशान्तिस्तवं प्रान्ते च बृहच्छान्तिप्रमुखस्तुतिं कृत्वा ततस्तस्मादनु पश्चात् प्रणिपत्य । प्रणामस्तु भक्तिसेवातः । अत एव कारणात्ते किंभूताः । भक्तिभरिताः सेवासक्त्या व्याप्ताः सन्तो नमस्यित्वा आत्मनां स्वेषां स्वेषां गृहान् जग्मुर्गताः । ते किंभूताः । अनु पश्चात् देवगृहागमनानन्तरं समेतं समागतं यद्यौवतं युवतीसमूहस्तेन युताः सहिताः । के इव । गीर्वाणा इव यथा वासवप्रभृतयः पुरंदरप्रमुखाश्चतुर्निकायामराः निर्वाणनाम्नि तीर्थकृतां मोक्षगमनाभिधाने कल्याणकसमये नन्दीश्वरेऽष्टमद्वीपे अष्टाहिकां स्वस्वजनरतिकरदधिमुखप्रमुखपर्वतप्रासादेष्वष्टाहिकामष्टवासरीं यावन्महोत्सवमतिशायिनं महं निर्माय आत्मनां नगरभवनज्योतिर्विमानान् वानव्यन्तरभवनवासिज्योतिष्कविमानवासिनश्चतुर्निकायिकाः सर्वे सुरा गच्छन्ति । तेऽपि किंविशिष्टाः । अनु पश्चात्पृष्ठे समेतं समायातं यद्यौवतं स्वस्वनिकायकामिनीकदम्बकं तेन कलिताः ॥ इति सूरिनिर्वाणप्रस्तावनम् ॥

શ્લોકાર્થ

જેમ તીર્થંકરભગવંતના નિર્વાણકલ્યાણકમાં આવેલા ઇન્દ્રઆદિ દેવદેવીઓ નંદીશ્વર દ્વીપમાં અષ્ટાહ્નિકામહોત્સવ કરીને, પોતપોતાના સ્થાને જાય તેમ આચાર્યદેવના અગ્નિસંસ્કાર કરીને સર્વે શ્રાવકશ્રાવિકાઓ જિનમંદિરમાં ભગવંતની પ્રતિમા આગળ શ્રીફળ અને અક્ષત આદિ ધાન્ય મૂકીને ભક્તિપૂર્વક નમસ્કાર તેમજ દેવવંદનરૂપ સ્તુતિને કરીને આચાર્યદેવના ગુણો સંભારતાં સૌ પોતપોતાના સ્થાને ગયાં. ॥ ૧૮૫ ॥

तस्मिन्नेव निशावसानसमये दिव्यश्रियं संश्रय-
न्साहिश्रीमदकब्बरावनिपतेः श्रीहीरसूरीश्वरः ।
प्राग्वाग्बद्ध इवाभ्युपेत्य सविधे प्राचीनरूपाश्रितो
मित्रस्येव निजं द्युलोकगमनं प्राक्स्नेहतः प्रोचिवान् ॥ १८६ ॥

श्रीपार्श्वदेवलोकलक्ष्म्या कलितो हीरविजयनामा सूरीणामाचार्यभट्टारकाणां मध्ये इन्द्रे इशिता ऐश्वर्यवान् भवतीति ईश्वरः प्राक् स्नेहतः प्राचीनमिलनसंजातप्रीतिप्रकर्षात् या-

निसाहेः श्रीमतश्चतुर्दिगन्तदेशाधिपत्यहस्त्यश्वरथपदातिपुरनगरग्रामकोट्टहेमरूप्यमणिमौक्तिकप्रमुखाशेषसंपच्छालिनः अकब्बरनाम्नोऽवनिपते राज्ञः निजमात्मीयं द्युलोकगमनं स्वर्लोके यानं प्रोचिवान् । कस्येव । मित्रस्येव । यथा प्रियसुहृदः स्वेप्सितग्रामनगरादिगमनं प्रोच्यते । किं कृत्वा । अभ्युपेत्य समेत्य । क । सविधे समीपे अर्थात् साहेः पार्श्वे । क इव । प्राग्वाग्बद्ध इव । यथा कश्चित्सुरः प्राक् पूर्वजन्मनि दत्तया वाचा बद्धो नियन्त्रितः कस्यचित्पार्श्वं समायाति । कदाभ्युपेतः । तस्मिन्नेव निशावसानसमये । यस्यां निशायां स्वर्लोकमलंकृतवान् तस्या एव निशाया अवसानं प्रान्तः स एव समयः कालः पाश्चात्य-रात्रिप्रस्तावे समेत्य । प्रोक्तवानित्यर्थः । । किंविशिष्टः सूरिः । प्राचीनेन हीरसूरिसंबन्धिनो रूपेणाश्रितः वपुषा तत्स्वरूपेणैव वर्तमानः दृश्यमानः । च पुनः किंलक्षणः । दिव्यां दिविभवां देवतासंबन्धिनीं श्रियं वपुःशोभां संश्रयन् भजन् ॥ इति पातिसाहेः स्वप्ने स्वस्य स्वर्लोकगमनकथनम् ॥

श्लोकार्थ

તે જ સ્વર્ગગમનની રાત્રિના એ દિવ્ય શોભાને ધારણ કરતા પૂર્વેના હીરવિજયસૂરિના રૂપમાં આચાર્યદેવે વચનથી બંધાયેલા દેવની જેમ, અકબરબાદશાહ પાસે જઈને મિત્રની જેમ પોતાનો સ્વર્ગવાસ કહ્યો. ॥ ૧૮૬ ॥

तन्मूर्तिसंस्कृतिपदे सुरसृष्टनाट्य-
माळोक्य तीर्थ इव नागरनैगमेन ।
तत्संनिधिस्थकृषिरक्षणदीक्षितेन
प्रातः पुरीजनपुरस्तदुदीर्यते स्म ॥ १८७ ॥

नागरजातीयेन नैगमेन वणिजा प्रातस्त्रयोदशीवासरस्य विभाते दिवसप्रारम्भसमये पुरीजनानामुन्नतनगरलोकानां पुरोऽग्रे तन्नाटकदर्शनादिकमुदीर्यते स्म प्रोवाच । किं कृत्वा । तस्य सूरेर्मूर्तेः शरीरस्य संस्कृतिपदे संस्कारकरणस्थानके नक्तं सुरसृष्टं देवैर्निर्मितं नाट्यं नाटकमालोक्य दृष्ट्वा तस्मिन्निव तीर्थे इव । यथा शत्रुंजयादितीर्थभूमौ सुरकृतं ताण्डवम् । केनचिद्भाग्यवता इति शेषः । विलोक्यते । किंभूतेन नागरनैगमेन । तस्य सूरिशरीरसंस्करणस्थानकस्य संनिधौ समीपे तिष्ठतीति तादृशी कृषिः कर्षणं तस्या रक्षणे पालने दीक्षितेन गृहीतप्रतिज्ञेन । नक्तं कृषिरक्षकेणेत्यर्थः । स्वस्य धान्यस्य वा ॥ इति नागरनैगमस्य नक्तं नाटकदर्शनकथनम् ॥

શ્લોકાર્થ

શત્રુંજયઆદિ તીર્થસ્થાનોમાં જેમ દેવો નાટયારંભ કરે છે તેમ તે રાત્રિએ દેવોએ નાટયારંભ કર્યો ! તેરસની પ્રભાતે આચાર્યદેવના અગ્નિસંસ્કારના સ્થાનની નજીકમાં ખેતરનું રક્ષણ કરનારા નાગરજાતિના વણિકોએ ઊનાનગરમાં આવીને નગરજનોની આગળ નાટયારંભનો સર્વવૃત્તાંત કહ્યો. ॥ ૧૮૭ ॥

दिव्यविमानविलोकनवार्तां पुनरेत्य सत्यवाग्विप्रः ।
न्यगदन्नगरजनानां स्वप्नविदां स्वप्नमिव पुरतः ॥ १८८ ॥

सत्या अवितथा वाग्वाणी यस्य तादृशो विप्रः पूर्वप्रोक्तभट्टः पुनरेत्यागत्योन्नतनगरे समेत्य नगरजनानां पुरतः अग्रे दिव्यविमानविलोकनवार्ता यन्मया नक्तं हीरविजयसूरि-निर्वाणगमनरजनीप्रथमचतुर्घटिकासमये दिव्यविमानं देवतासंबन्धि यानं निजनयनाभ्यां दृष्टं तन्मध्ये च देवानां 'हीरविजयसूरिवदनं विलोकयामस्त्वरितं चलन्तु' इति वार्तापि श्रवणाभ्यां श्रुता चेति न्यगदद्वदति स्म । कमिव । स्वप्नमिव । यथा कोऽपि स्वप्नद्रष्टा पुमान् स्वप्नविदां स्वप्नाध्यायपाठकानां पुरतः स्वस्वप्नं निगदति॥ इति विमानदर्शनवार्ताकथनम् ॥

શ્લોકાર્થ

જેમ સ્વપ્નદ્રષ્ટા પુરુષ સ્વપ્નપાઠકની આગળ પોતાનું સ્વપ્ન કહે તેમ સત્યવાદી એવા તે બ્રાહ્મણે ઊનાનગરમાં આવીને નગરજનોની આગળ દિવ્ય વિમાન અને દિવ્ય વાર્તાલાપ કહી બતાવ્યો. (મેં જે રાત્રિમાં આચાર્યદેવનું સ્વર્ગગમન થયું તેની ચાર ઘડી પહેલાં દિવ્ય વિમાનને મારી સગી આંખે જોયું, અને "હીરસૂરિજીનું મુખકમલ જોવા જલ્દી ચાલો" આવી તેમાં રહેલા દેવોની વાણી સાંભળી.) ॥ ૧૮૮ ॥

तस्यामेव त्रियामायां स माकन्दो वसन्तवत् ।
पूर्वं मञ्जरितोऽनल्पैः फलैः संपूरितस्ततः ॥ १८९ ॥

यदधोभूमिभागे सूरिशरीरं संस्कृतं स एव माकन्दः सहकारतरुस्तस्यामेव गुरुगात्र-संस्कारकरणदिवसस्यैव त्रियामायां विभावर्यामेव पूर्वं प्रथमसमये एव मञ्जरितः मञ्जरीभिः कलिकाभिः कलितो जातः ततो मञ्जरीणां 'मउर' इति प्रसिद्धानां पूरणात्सकलमञ्जरीः

संख्यातीतैः फलैराम्ररसस्यैः संपूरितः पूरणीभूतः। यथा पत्राण्यपि चक्षुषा नेक्षन्ते तथा फलावलीभिरलंकृतो जातः ॥

શ્લોકાર્થ

જે શુષ્ક આમ્રવૃક્ષ નીચે આચાર્યદેવના અગ્નિસંસ્કાર કરવામાં આવ્યો હતો તે આમ્રવૃક્ષ તે જ રાત્રિના પ્રથમ પ્રહરમાં જ વસંતઋતુની જેમ ફળોથી લચી પડ્યું અર્થાત્ નવપલ્લવિત બન્યું. (પહેલા આ આમ્રવૃક્ષ ઉપર પત્ર-પુષ્પ આદિ કંઈ પણ દેખાતું ન હતું.) ॥ ૧૮૯ ॥

चित्रीयमाणैश्चित्तान्तर्यात्रायामिव यात्रिकैः ।
समाजग्मे समं तत्र नागरैर्नागरीसखैः ॥ १९० ॥

तत्र हीरसूरिशरीरसंस्कारस्थाने सहकारसालसमीपे नागरीसखैः पौरपुरंध्रीपरंपरापरीतैर्नागरैर्नगरलोकैः सममेककालं तदाम्रमञ्जरीसहकारिकाप्रादुर्भावश्रवणानन्तरमेवानु पश्चात्समाजग्मे समागतम् । कैरिव । यात्रिकैरिव । यथा यात्राकारकैर्लोकैः यात्रायां शत्रुंजयादितीर्थयात्राकृते चैत्रीपूर्णिमादिवासरे । किंभूतैः । चित्तान्तर्मनोमध्ये चित्रीयमाणैराश्चर्यं विस्मयं प्राप्नुवद्भिः । मञ्जरीफलदर्शनादिति शेषः ॥

શ્લોકાર્થ

જેમ યાત્રિકો શત્રુંજય આદિ તીર્થોની યાત્રા કરવા માટે જાય તેમ હૃદયમાં આશ્ચર્ય પામતાં નગરવાસી નરનારીઓ એકીસાથે તે આમ્રવૃક્ષને જોવા માટે ગયા. ॥ ૧૯૦ ॥

शेषा इव त्रिभुवनाधिपतेः प्रमोदा-
ल्लोकाः सहैव जगृहुः सहकारिकास्ताः ।
प्रास्थापयन्पुनरकब्बरपातिसाहे-
रद्वैतविस्मयकरीरुपदा इवैताः ॥ १९१ ॥

ते लोकाः श्रावका अपरेऽपि च नगरग्रामलोका यवनाश्च सहैव समकालमागत्य गुरुमाहात्म्यादेककालोत्पन्नास्ताः मञ्जरीः सहकारिकाश्च 'कइरी' इति प्रसिद्धाः जगृहुर्गृह्णन्ति ।

कस्मात् । प्रमोदात् हर्षात् । का इव । शेषा इव । यथा त्रिभुवनाधिपतेः त्रैलोक्यनायकस्य परमेश्वरस्य शेषाः 'सेख' इति प्रसिद्धाः गृह्यन्ते । पुनस्ते तन्नगराधिपयवना अकब्बरपातिसाहेरेताः सहकारिकाः प्रास्थापयन प्रेषयामासुः । किंभूताः । अद्वैतं न विद्यते द्वैतं द्वितयं यत्र तदद्वैतमसाधारणं मनस्यसामान्यं विस्मयकाश्चर्यं चित्रं कुर्वन्तीति ता अद्वैतविस्मयकरीः । उत्प्रेक्ष्यते—उपदा ढौकनिका इव । अथ चोपमानम् । का इव । उपदा इव प्राभृतानीव । 'भेट' इति प्रसिद्धाः ॥ इति माकन्दस्य फलनं तत्फलग्रहणं साहेः प्रेषणं च ॥

શ્લોકાર્થ

જૈન અને જૈનેતરો સર્વલોકો સાથે આવીને, એ વૃક્ષનાં ફળો જાણે પરમાત્માની શેષ ન હોય, તેમ તે આમ્રફળને હર્ષપૂર્વક ગ્રહણ કરતા હતા; અને તે આમ્રફળો જાણે કોઈ અદ્વિતીય આશ્ચર્યકારી ભેટ ન હોય તેમ અકબરબાદશાહને પણ મોકલ્યાં ॥ १९१ ॥

लाडकीति प्रिया यस्य मूर्ता श्रीरिव वेश्मनि ।
स्वर्गवी किमुत स्वर्गाद्भूमण्डलमुपागता ॥ १९२ ॥

स द्वीपबन्दिरश्रेष्ठी मेघनामा परीक्षकः ।
आर्षभिर्वृषभस्येव सूरेः स्तूपमकारयत् ॥ १९३ ॥

मेघनामा परीक्षकः मेघपारिखनामा सूरेर्हीरविजयव्रतीन्द्रस्य स्तूपमकारयत्कारयामास । क इव । आर्षभिरिव । यथा ऋषभस्यापत्यं नन्दनः आर्षभिर्भरतचक्री वृषभस्य ऋषभदेवस्य अष्टापदपर्वते ऋषभदेवदेहसंस्कारस्थाने स्तूपं कारितवान, तथा वृषभस्वामिप्रतिमां च तथा भ्रातॄणां नवनवतिप्रतिमां च आत्मप्रतिमां च स्तूपशतं च मा कश्चिदाक्रमणं करिष्यतीति तत्रैकं भगवतः स्तूपं शेषाण्येकोनशभ्रातॄणाम्—इति हारिभद्र्यां मलयगिर्यां चावश्यवृत्तौ । किंभूतः । द्वीपबन्दिरस्य । यत्र द्वीपान्तरेभ्यो यानपात्राः समायान्ति तेषु यान्ति च तद्बन्दिरमित्युच्यते । द्वीपनाम्नो नगरस्य श्रेष्ठी नगरमध्ये मुख्यपदभाक् । स कः । यस्य लाडकी नाम्नी प्रिया पत्नी वर्तते । उत्प्रेक्ष्यते—वेश्मनि मेघपरीक्षकसौधे मूर्ता मूर्तिमती लाडकीशरीरिणी श्रीर्लक्ष्मीरिव । उताथवा असौ लाडकीरूपा स्वर्गाद्देवलोकाद्भूमण्डले पृथिवीपीठे उपागता समायाता स्वर्गवी कामधेनुरिव ॥ युग्मम् ॥

શ્લોકાર્થ

ભરતચક્રવર્તીએ અષ્ટાપદપર્વત ઉપર પોતાના પિતા શ્રી ઋષભદેવ તેમજ પોતાના નવ્વાણુ ભાઈઓને અગ્નિસંસ્કારના સ્થાને 'આ પવિત્ર ભૂમિને કોઈ ઉલ્લંઘન ના કરે' તે માટે જેમ સો સ્તૂપો કરાવ્યા હતા, તેમ દીવબંદરના નગરશેઠ 'મેઘ' પરીખે આચાર્યદેવના અગ્નિસંસ્કારના સ્થાને સ્તૂપ કરાવ્યો અને આચાર્યદેવની ચરણપાદુકાની સ્થાપના કરી. તે મેઘશ્રેષ્ઠીને 'લાડકી' નામની પ્રિયા હતી; તે જાણે મેઘશ્રેષ્ઠીના ઘરની ગૃહલક્ષ્મી ન હોય! અથવા તો સ્વર્ગમાં પૃથ્વીમંડળમાંથી ઊતરી આવેલી સાક્ષાત્ કામધેનુ ન હોય. ॥ ૧૯૨ ॥ ॥૧૯૩ ॥

आकृष्टा इव तिष्ठन्तः प्रभावैस्तत्प्रभोरिह ।
अर्हन्मूर्तेरिवैतस्य सुराः सांनिध्यमादधुः ॥ १९४ ॥

सुरा देवास्तस्य गुरुपादुकापवित्रीकृतस्तूपस्य सांनिध्यं संनिधितां पार्श्ववर्तिकताम् । आराधकानां कामितपूरकतामिति यावत् । आदधुश्चक्रुः । लोकरक्षासमीहितपूरणादिकं सांनिध्यं विदधते । कस्या इव । अर्हन्मूर्तेरिव । यथा भगवत्प्रतिमायाः सुराः सांनिध्यं कुर्वते । सुराः किं कुर्वन्तः । तिष्ठन्तः । कुत्र । इह सूरिस्तूपे । उत्प्रेक्ष्यते--तस्य प्रभोः हीरसूरेः प्रभावैर्माहात्म्यैराकृष्टा इव आकृष्यानीता इव ॥

શ્લોકાર્થ

જેમ જિનેશ્વર ભગવંતની પ્રતિમાને દેવોનું સાન્નિધ્ય હોય છે તેમ આચાર્યદેવની ચરણપાદુકા વડે અલંકૃત સ્તૂપનું દેવો સાંન્નિધ્ય કરતા હતા; તે દેવો જાણે આચાર્યદેવના પ્રભાવથી આકર્ષાઈને આવ્યા ન હોય. ॥ ૧૯૪ ॥

तत्रार्चितुं स्तूपमकब्बरेण समीपभूमी कियती वितीर्णा ।
सिद्धाचले सिद्धनृपेण नाभिभवं यथा द्वादश संनिवेशाः ॥ १९५ ॥

तत्रोन्नतनगरसीमभूमीमण्डले स्तूपं तात्स्थ्यात्तद्व्यपदेशात्सूरिपादुकां गुरुपादुकाधिष्ठानमर्चितुं पूजयितुमकब्बरेण पातिसाहिना कियती कियत्प्रमाणा द्वाविंशतिबीघाप्रमिता । क्षेत्रादिषु मानविशेषे बीघा इत्युच्यन्ते । ते च सौराष्ट्रगुर्जरजनपदेषु प्रसिद्धाः । समीपस्य

अर्थात्स्तूपस्य पार्श्ववर्तिनी भूमी वितीर्णा प्रदत्ता । केनेव । सिद्धनृपेणेव । अत्र यथा सिद्धाचले श्रीशत्रुंजयपर्वते नाभिभवं श्रीऋषभदेवमर्चितुं सिद्धराजजयसिंहदेवेन समीपभूमौ विमलाचलसमीपवर्तिनो द्वादश संनिवेशा ग्रामा वितीर्यन्ते स्म । 'देवकपत्तने स्वनिर्मापितप्रासादपूर्णीभवनानन्तरं सोमेश्वरयात्रानिमित्तप्रस्थितेनाध्वनि स्वसार्धं समानीतमाननीयश्रीहेमचन्द्रसूरीन्द्रेणाधमार्गागतान्तातीततीर्थकृन्मुनिजनसिद्धिगमनक्षेत्रादिमाहात्म्यकथनादत्युन्नतरागेण प्रच्छन्नमागत्य विमलगिरियात्रां विधायादिदेवपूजाकृते द्वादश ग्रामान्दत्त्वा स्वानीकमलंकृतवान् ।' इति कुमारपालप्रबन्धचरित्रादिषु प्रोक्तमस्तीति ॥

શ્લોકાર્થ

શ્રીહેમચન્દ્રાચાર્યજી પાસેથી શત્રુંજયમાહાત્મ્ય સાંભળીને અને ભગવંતના દર્શન પ્રભાવિત બનેલા ગુર્જરપતિ સિદ્ધરાજ જયસિંહ રાજાએ શ્રીશત્રુંજય ઉપર શ્રીયુગાદિદેવની પૂજા માટે જેમ બાર ગામ આપ્યાં હતાં તેમ અકબરબાદશાહે આચાર્યદેવના સ્તૂપની પૂજા માટે સ્તૂપની સમીપમાં આવેલી બાર વીઘાં જમીન આપી. ॥ ૧૯૫ ॥

माकन्दमोचाबकुलप्रियालकङ्केल्लिकुन्दादितरूपयुक्तम् ।
तस्याभितोऽभूत्सुमनोद्रुमाङ्कं वनं सुमेरोरिव भद्रसालम् ॥ १९६ ॥

तस्य स्तूपस्याभितः परितो वनं काननमभूत् । किंभूतं वनम् । माकन्दाः सहकाराः, मोचाः कदल्यः, बकुलाः केसराः 'बउलसिरी' इति प्रसिद्धाः, प्रियाला राजादनाः, कङ्केल्लयः अशोकाः, कुन्दा मुचकुन्दाः, ते आदौ येषां तादृशैस्तरुभिर्द्रुमैः उपयुक्तम् । किमिव । भद्रसालमिव । यथा सुमेरोः सुवर्णाचलस्याभितः परितो भूमौ भद्रसालं नाम वनमभूत् । किंभूतम् । सुमनोद्रुमाः कल्पवृक्षाः अङ्के उत्सङ्गे मध्ये यस्य । तथा माकन्दादिपादपैः कलितं च । स्तूपवनं तु अर्थात्किंभूतम् । सुमनोभिः कुसुमैरुपलक्षणात्पत्रपल्लवकलैर्ललिता द्रुमाः पूर्वोक्ता इतरे च तरवः अङ्के मध्ये यस्य तत् ॥

શ્લોકાર્થ

જેમ મેરૂપર્વતની ચારે બાજુ કલ્પવૃક્ષોથી સુશોભિત 'ભદ્રશાલ' નામનું વન છે, તેમ સ્તૂપની ચારેબાજુ આમ્ર, કદલી, બકુલ, અશોક, રાયણ અને મચકુંદ આદિ વૃક્ષોથી સુશોભિત એવું વન છે. ॥ ૧૯૬ ॥

अन्वतिष्ठंश्चतुर्दिग्विभागागता यात्रिकास्तत्र यात्रां जिनेन्द्राद्रिवत् ।
कामिकस्वर्गिणेवामुना कामितं पूर्यतेऽन्यच्च सेवासु हेवाकिनाम् ॥ १९७ ॥

चतसृणां चतुःसंख्याकानां पूर्वा-दक्षिणा-पश्चिमा-उत्तरानाम्नां दिशां हरितां विभागेभ्यः प्रदेशेभ्यः आगताः आयाता यात्रिका यात्राकारका जनास्तत्र स्तूपे यात्रां प्रभुपादुकाप्रणतिलक्षणामन्वतिष्ठन्कुर्वन्ति स्म । किंवत् । जिनेन्द्राद्रिवत् । यथा शत्रुंजयशैले यात्रिकजनो यात्रां करोति । 'मानं वदन्तीह जिनेश्वराद्रेः' इदं काव्यं पूर्वेलिखितमस्ति पुराणान्तर्गतं च । पुनरन्यदपि अमुना गुरुपादुकाङ्कितस्तूपेन सेवासु स्वसेवनाकरणेषु हेवाकिनां हेवा स्वभावः स एव शीलमस्त्येषामिति हेवाकिनस्तेषां भक्तिभरनिर्भरभावानां यात्रिकजनानां कामितं वाञ्छितं पूर्यते पूर्णीक्रियते । केनेव । कामिकस्वर्गिणेव । यथा कामितपूरकेण गीर्वाणी भक्तकामितं पूर्यते ॥ इति स्तूपकरणतन्माहात्म्यं च ॥

શ્લોકાર્થ

શત્રુંજયતીર્થની જેમ સ્તૂપની યાત્રા કરવા માટે ચારે દિશાથી અહંપૂર્વિકાન્યાયે ભાવિકો આવવા લાગ્યા. અને જેઓ ભક્તિપૂર્વક યાત્રા કરતા તેઓના મનોરથો દેવોની જેમ સફળ થતા. ॥ ૧૯૭ ॥

तत्प्रक्रमे विजयसेनविभुर्हमांऊ-
सूनुं पृणन्सदसि लाभपुरे बभूव ।
धर्मावनीप्रियतमं पुरि लक्षणाढ्य-
वत्यामिव व्रतिपुरंदरबप्पभट्टिः ॥ १९८ ॥

तत्प्रक्रमे तस्मिन् हीरविजयसूरेरुन्नतनगरे द्वितीयचतुर्मासकरणावसरे विजयसेननामा विभुर्गच्छपतिर्लाभपुरे 'लाहोर' इति प्रसिद्धे नगरे बभूव । किं कुर्वन् । सदसि सभायां सर्वसामन्ताद्यनेकपार्षद्यभूषितपर्षन्मध्ये हमांऊसूनुमकब्बरपातिसाहिं पृणन् संतुष्टिमुत्पादयन् । क इव । बप्पभट्टिरिव । यथा व्रतिषु साधुषु पुरंदरो वासवो बप्पभट्टिनामा सूरिः सदसि धर्मनामा अवनी गौडजनपदमेदिनी तस्याः प्रियतमं भर्तारं धर्मनृपतिं प्रीणन् लक्षणा इति पदमाद्यं यस्यां तादृशी वती एतावता लक्षणावती गौडमण्डलमण्डनं नृपराजधान्यां लक्षणावतीनामनगर्यां भवति स्म ॥

શ્લોકાર્થ

શરીરની અસ્વસ્થતાને કારણે હીરવિજયસૂરિજીને બીજું ચોમાસું ઊનાનગરમાં રહેવું પડ્યું ત્યારે વિજયસેનસૂરિજી લાહોરમાં અકબરબાદશાહની રાજસભાને ધર્મગોષ્ઠિ દ્વારા

ખૂશ કરતા હતા, જેમ ગૌડદેશની લક્ષણાવતીનગરીના ધર્મરાજાની રાજસભામાં બપ્પભટ્ટીસૂરિજી હતા તેમ વિજયસેનસૂરિજી લાહોરની રાજસભામાં શોભતા હતા. ॥ ૧૯૮ ॥

वादे वादिगणान्विजित्य समरे दैत्यानिव श्रीपतिः
कीर्तिस्तम्भमिवात्मनो नृपपुरः संस्थाप्य धर्मं पुनः ।
श्यामीकृत्य मुखान्यशेषकुदृशां पूषेव काकद्विषां
सूरिः कारयति स्म भूमिवलये स्वीयां जयोद्घोषणाम् ॥ १९९ ॥

सूरिर्विजयसेनाचार्यः भूमिवलये अखिलक्षोणीमण्डले स्वीयामात्मीयां जयोद्घोषणां कारयति स्म सर्ववादिवृन्दविजयढक्कां वादयति स्म । किं कृत्वा । नृपपुरः पातिसाहेरग्रे आत्मनो निजस्य प्रत्यर्थिभूतानां वादिनां पण्डितंमन्यानां गणान् वादे युक्तिप्रतियुक्तिस्थापनसमये विजित्य सर्वानपि पराभूय कैश्चित्कुमतिभिः कौशिकैरिव रवेस्तस्योदयमसहिष्णुभिः अतिद्विष्टतया बहुद्रविणप्रदानपूर्वकं विभेदातीव प्रेरितान् त्रिषष्ट्यधिकत्रिशतीमितद्विजातीन्निरुत्तरीकृत्य । क इव । श्रीपतिरिव । यथा कृष्णः समरे दैत्यान्दानवान्विजयते स्म । पुनः किं कृत्वा । नृपपुरः पातिसाहेः पुरस्तात् आत्मनो निजस्य धर्मं निजकीयजैनधर्मं संस्थाप्य जगति जैन एव धर्मः सत्यो नान्य इति स्थापयित्वा । कमिव । कीर्तिस्तम्भमिव । यथा कश्चिद्विजयी राजा रिपून्निर्जित्य स्वकीर्तिस्तम्भं स्थापयति । पुनः किं कृत्वा । अशेषकुदृशां समस्तपरवादिनां मुखानि श्यामीकृत्य सकलकुपाक्षिकान् कृष्णमुखान्निर्माय । क इव । पूषेव । यथा भानुमान् काकद्विषां कौशिकानां श्यामानि वक्त्राणि कुरुते ॥ इति वादे विजयसेनसूरिविजयः ॥

શ્લોકાર્થ

જેમ વિષ્ણુએ રણસંગ્રામમાં દૈત્યોને જીત્યા હતા તેમ વિજયસેનસૂરિજીએ અકબરબાદશાહની રાજસભામાં વાદવિવાદમાં અનેક જાતના વાદીઓને જીતીને રાજા સમક્ષ કીર્તિસ્તંભની જેમ જૈનધર્મની સ્થાપના કરી અર્થાત્ જૈનધર્મની સિદ્ધિ કરીને, જેમ સૂર્ય ઘુવડોના મુખને શ્યામ કરે તેમ સમસ્ત કુવાદીઓનાં મુખને શ્યામ બનાવી, જગતમાં પોતાની જયઘોષણા કરાવી, અર્થાત્ જૈનધર્મનો જયજયકાર કરાવ્યો. ॥ ૧૯૯ ॥

तस्य स्फुरन्मानमकब्बरेण प्रीत्या स्फुरन्मानमिवार्पयित्वा ।
स बन्धुवत्स्वीयजनैरुपेतः संप्रेषितो हीरगुरोः समीपे ॥ २०० ॥

स विजयसेनसूरिः बन्धुवत् भ्रातेव स्वीयजनैरात्मीयमनुजैरुपेतः सहितः सन् गुरोः स्वर्गगमनात्प्राक्समये हीरगुरोः समीपे संप्रेषितः पातिसाहिना प्रहितः। किं कृत्वा। प्रस्थापितः स्फुरद्दीप्यमानं जगच्चेतश्चमत्कारकारि मानं संमानमिव स्फुरन्मानम् महिषीमहिषगोवृषभा एते चत्वारोऽपि कदापि केनापि न हन्तव्याः तथा केनापि मदाज्ञावशवर्तिना मत्सेवकेन जना बन्दीकर्तव्या न नैवावश्यम् इति स्वहस्तमुद्राङ्कितलेखमर्पयित्वा। कस्य। तस्य विजयसेनसूरेः। कया। प्रीत्या स्नेहेन प्रमोदेन वा॥ इति साहिना विजयसेनसूरेर्गुरुसमीपे प्रेषणम्॥

શ્લોકાર્થ

અકબરબાદશાહે વિજયસેનસૂરિજીને ભેંસ, પાડા, ગાય અને વૃષભ આ ચારની સદંતર હત્યા કરવાના નિષેધરૂપ, તેમજ 'મારો કોઈ પણ સેવક કોઈ પણ નિરપરાધી માણસને બંદી બનાવે નહીં' તેવા બે ફરમાનપત્ર સન્માનપૂર્વક અર્પણ કરીને, પોતાના બંધુની જેમ વિજયસેનસૂરિજીને હીરવિજયસૂરિજી પાસે મોકલ્યા. ॥ ૨૦૦ ॥

सोऽप्याकर्णितहीरसूरिमघवाङ्गापाटवः संचर-
न्यावद्गुर्जरदेशलक्ष्मितिलकं संप्राप्तवान्पत्तनम्।
संतप्तत्रपुराशिसिञ्चनमिव श्रुत्योरशर्मावहं
स्वर्लोकोपगमं गुरोर्गणधरस्तावत्समाकर्णयत्॥ २०१॥

सोऽपि विजयसेनसूरिरपि तावद्गुरोः हीरसूरेः स्वर्लोकोपगमं देवलोके पादावधारणं समाकर्णयत् सम्यक् सत्यत्वेन श्रुतवान्। स किंभूतः। गणधरो गुरावुपरते स एव गच्छधारकः। किम्। श्रुत्योः श्रवणयोर्बहुजनस्य मिथ्यादृशामपि अशर्मावहं दुःखविधायकम्। किमिव। संतप्तानामुष्णीकृतानां रसीभूतानां च त्रपुणां राशिव्रजस्तस्य सिञ्चनं निर्भरतया मध्येऽभिषेचनमिव। तावत्किम्। यावत्सोऽपि सूरिरपि आकर्णितं लोकप्रवृत्तिपरम्परया लेखोदन्तागमनेन श्रुतं हीरसूरिमघोनः श्रीहीरविजयसूरीन्द्रस्याङ्गे शरीरे अपाटवं रोगादिभिरपटुतामसमाधिर्येन। अत एव संचरन्ननवच्छिन्नप्रयाणैश्चतुर्मासकमध्येऽपि त्वरितरं पथि प्रतिष्ठमानः प्रचलन् सन् गुर्जरदेशस्य तिलके लक्ष्मितिवकोपमानं पत्तनमणहिल्लपाटकपुटभेदनं यावतां कालेन यस्मिन् समये वा संप्रातवान्। यावता पत्तने समेत इत्यर्थः॥

શ્લોકાર્થ

વિજયસેનસૂરિજીએ પણ લોકોના મુખે પૂજ્ય ગુરુદેવ શ્રીહીરવિજયસૂરિજીની નાદુરસ્તતબિયતના સમાચાર સાંભળીને ચોમાસાના કાળમાં પણ અવિચ્છિન્ન પ્રયાણ કરતા અનુક્રમે

ગુર્જરદેશની લક્ષ્મીના તિલકસમાન અણહિલ્લપુરપાટણમાં પધાર્યા અને પધારતાની સાથે કાનમાં તપાવેલું સીસું રેડાયા જેવા આચાર્યદેવના અત્યંત દુઃખદાયી એવા સ્વર્ગવાસના સમાચાર સાંભળ્યા. ॥ ૨૦૧ ॥

श्रुत्वा तद्वज्राहत इवाभवद्बाष्पपूर्णनयनयुगः ।
एष पुनर्दुःखादिदमजीगदद्गद्गदध्वनितः ॥ २०२ ॥

एषः विजयसेनसूरिः तद्गुरोः स्वर्लोकगमनं श्रुत्वाकर्ण्य बाष्पैरश्रुजलैः पूर्णं निर्भरभृतं नयनयुगं लोचनद्वन्द्वं यस्य तादृशः सन् वज्रेण पुरंदरदम्भोलिना उरसि वक्षसि वा आहतस्ताडित इवाभवत्संजातः । पुनः श्रवणानन्तरमेष सूरिः दुःखादसातोदयाद्गद्गदः अपटुरस्पष्टाक्षरमुपविष्टकण्ठपीठं वा यत्र तादृक् ध्वनितं शब्दो यस्य तादृशः सन्निदमग्रे वक्ष्यमाणमजीगदद्वदति स्म ॥

શ્લોકાર્થ

વિજયસેનસૂરિજીએ ગુરુદેવનું સ્વર્ગગમન સાંભળીને તેમની બન્ને આંખો આંસુઓથી છલકાઈ ગઈ અને વજ્રનો આઘાત અનુભવતા દુઃખથી ગદ્ગદ સ્વરે વિલાપ કરવા લાગ્યા. ॥ ૨૦૨ ॥

उच्छिन्नः सुरभूरुहोऽप्यपगता स्वर्धामधेनुः पुन-
र्भग्नः कामघटो मणिः सुमनसां चूर्णीबभूव क्षणात् ।
दग्धा चित्रलता गतः शकलतां हा दक्षिणावर्तभृ-
त्कम्बुः स्वर्गिगृहं गते त्वयि गुरौ श्रीहीरसूरीश्वरः ॥ २०३ ॥

हे श्रिया गणलक्ष्म्या शोभया वा युक्त हीरविजयसूरीश्वरगुरो, त्वयि श्रीमति स्वर्गिणां देवानां गृहं गते देवलोकं प्राप्ते सति अत्र जगति सुरभूरुह उच्छिन्न उच्छेदं प्राप्तः पुनर्न भविता । हा इति खेदे । सर्वत्र योज्यम् । अपि पुनः स्वर्धामानो देवास्तेषां धेनुः गौः । कामधेनुरित्यर्थः । अपगता मृता । 'व्यापन्नोऽपगतो मृतः' इति हैम्याम् । हा इति खेदे । कामघटः कामकुम्भो भग्नः विकरीभूतः । पुनर्हा दक्षिणदेशे आवर्तं वलयाकारं बिभर्तीति तादृशः कम्बुः दक्षिणावर्तशङ्खः शकलतां खण्डभावं गतः प्राप्तवान् ॥

શ્લોકાર્થ

અરેરે ગુરુદેવ, આપના જવાથી આ વિશ્વમાં કલ્પવૃક્ષનો ઉચ્છેદ થઈ ગયો. હાય, કામધેનુ મરી ગઈ, કામકુંભ ભાંગીને ભુક્કો થઈ ગયો, હા હા, દક્ષિણાવર્તશંખના ટુકડે ટુકડા થઈ ગયા. ॥ ૨૦૩ ॥

हा हा भूधनबोधनैकविबुध श्रीसूरिचूडामणे
हा सिद्धान्तसमुद्रमन्दरगिरे हा शासनाहर्मणे ।
हा हा यौक्तिकवाक्पुरंदरगुरो वैराग्यवारांनिधे
हा कारुण्यनिधे विधेर्वशतया त्वं कुत्र यातः प्रभो ॥ २०४ ॥

हा हा इति पुनः पुनः खेदवाक्ये। यथा नाचराजकविकृतायां भोजमुञ्जराजादिप्रतिमानां पुरो दुःखोद्गारस्तुतौ 'हा हा हालनितान्तकान्तकवितालंकार हा मा ·····क्षोणीनायकमुञ्जपुञ्जयशसां हा भोज भूवल्लभ' इत्यादि। हे भूधनस्य राज्ञः मुद्गलपातिसाहेरकब्बरस्य बोधने प्रतिबोधविधाने एकविबुध अद्वैतनैपुण्यवान । तथा श्रिया ज्ञानवैराग्यप्रतिरूपादिलक्ष्मीकलिता ये सूरयो भट्टारकास्तेषां चूडामणे। हा इति दुःखबाहुल्यात्पुनर्हाशब्दोच्चारणम् । हे सिद्धान्तः समग्रजैनागमः स एव दुरवगाहत्वाद्बहुत्वाच्च समुद्रस्तस्यावगाहने मध्यप्रवेशनागाधतापरिच्छेदपरिच्छेदरहस्यामृतग्रहणे मन्दरगिरे। पुनर्हा शासनं जैनदर्शनं तत्राहर्मणे सहस्रकिरण। पुनर्हा इत्यनन्यसामान्यदुःखशोके। यौक्तिका सम्यक्तिद्धान्तानुगतकुमतनिराकरणादियुक्त्या उपेता। अथ वा परकृतपूर्वपक्षनिराकरणैकप्रगल्भा या सिद्धान्तरूपा सिद्धान्त उत्तरपक्षः प्रतिपक्षकृतपूर्वपक्षनिरुत्तरीकरणं संदेहनिराकरणं च। यथा 'अनुरूपमिदं निरूपयन्नथ सर्वेष्वपि पूर्वपक्षताम्। युवसु व्यपनेतुमक्षमस्त्वयि सिद्धान्तधियं न्यवेशयम् ॥' इति नैषधे। यौक्तिका चासौ वाक् तत्र पुरंदरगुरो वाचस्पते। पाठान्तरे सैद्धान्तिकवाक् इति। तथा वैराग्यं संसारविरक्ततायाः वारांनिधे समुद्र। हा इति शोचने। कारुण्यस्य कृपाया निधे निधान। एतानि सर्वाण्यपि संबोधनानि। विधेर्दैवस्य वशतया आयत्तत्वात् हे प्रभो, त्वं कुत्र कस्मिन् स्थाने। अस्मान्प्रियविनेयान्मुक्त्वेत्यध्याहार्यम्। यातोऽसि गतवानसि ॥

શ્લોકાર્થ

અકબર જેવા મોગલ સમ્રાટને પ્રતિબોધ કરવામાં અદ્વિતીય નિપુણતા ધારણ કરનારા એવા હે ગુરુદેવ, સૂરીશ્વરોમાં મુગટસમાન, સિદ્ધાંતરૂપી સમુદ્રનું મંથન કરવામાં મેરૂસમાન હે ગુરુદેવ, જૈનશાસનમાં સૂર્યસમાન તેમજ યુક્તિપ્રયુક્તિયુક્ત વાણીમાં સુરગુરુસમાન એવા

હે ગુરુદેવ, હે વૈરાગ્યવારિધિ, હે કરૂણાનિધિ પ્રભો, દુષ્ટ વિધિને વશ થઈને તમે અમને મૂકીને ક્યાં ચાલ્યા ગયા? શું અમ શિષ્યો ઉપર જરા પણ દયા ના આવી. ॥ २०४ ॥

अद्यास्तं गतवान्सहस्रकिरणश्चन्द्रोऽपि तन्द्रां गतः
शुष्कः क्षीरनिधिर्विधेर्विलासितैर्मेरुर्विलीनः पुनः ।
भूमौ श्रीजिनसार्वभौमविभवभ्राजिष्णुतां बिभ्रति
श्रीसूरीश्वरहीरहीरविजये गीर्वाणगेहं गते ॥ २०५ ॥

भूमौ निखिले मेदिनीमण्डले जिनाः सामान्यकेवलिनस्तेषां सार्वभौमाश्चक्रवर्तिनस्तीर्थंकरास्तद्वद्विभवो महिमामाहात्म्यलक्ष्मीस्तेन भ्राजिष्णुतां शोभनशीलताम् । 'तित्थयरसमोसूरी' इति वचनात् । बिभ्रति धारयति श्रिया सूरिलक्ष्म्या युक्ता ये सूरय आचार्यास्तेषामीश्वराः स्वामिनः भट्टारकाः । एकेषां भट्टारकाणां बहवः सूरिपदधारिणो भवेयुरिति अतिशोभाभाजो वा भट्टारकास्तेषु हीरे रत्नमुख्यायमाने नायकमणौ 'नगीना' इति प्रसिद्धे हीरविजयसूरीन्द्रे गीर्वाणगेहं स्वर्गं गते सति एवंविधः समयः संजातः । अथ वा एत्रं ज्ञायते अस्मद्विधैः । अद्येव सहस्रकिरणः सूर्योऽस्तं गतवान् जिनशासनदिवाकरोऽस्तमितः । तथा चन्द्रोऽपि सुधाकरोऽपि तन्द्रां निद्रां प्रमादम् । अत्र दीर्घनिद्रामित्यर्थः । गतः । 'जइ मेहु जप्पमाओ इमस्स देहस्स इमाइ रयणीए' इति संस्तारकविधिवचनात् । तथा 'तन्द्रा निद्राप्रमादयोः' इत्यनेकार्थतिलके । सर्वेषामप्याह्लादकत्वेन जिनशासनचन्द्रः कायधर्ममुपेतः । पुनरद्य क्षीरनिधिः दुग्धार्णवः शुष्कः शोषं प्राप्तः । असाधारणसिद्धान्तरहस्यक्षीरसमुद्रो निर्नीरीभूतः । कैः । विधेर्दैवस्य विलसितैर्विजृम्भितैर्दैवनिर्माणैः । एतत्पदमत्र काव्ये चतुर्ष्वप्यर्थेषु योज्यम् । पुनर्मेरुर्लक्षयोजनमितो मन्दरगिरिर्विलीनो गलित्वा गतो विलयं क्षयं वा प्राप्तः । माहात्म्यमेरुपर्वतोऽपि विलीय गतः ॥

શ્લોકાર્થ

આ દુનિયામાં તીર્થંકરભગવંતની જેમ મહિમાની શોભા ધારણ કરતા જગદ્ગુરુ હીરલા શ્રી હીરવિજયસૂરિજીનું સ્વર્ગગમન થતાં ખરેખર, આ દુનિયામાંથી સૂર્ય અસ્ત થઈ ગયો, ચન્દ્ર નિસ્તેજ બની ગયો, ક્ષીરસમુદ્ર શોષાઈ ગયો, અને મેરૂપર્વત ઓગળી ગયો. ખરેખર! આ બધી દુષ્ટ વિધિની જ લીલા છે. ॥ २०५ ॥

गर्जन्ति प्रतिमन्दिरं प्रमुदिता मिथ्यादृशः कौशिकाः
श्रीमत्संघसरोजकाननमिदं म्लानिं च धत्तेऽधुना ।
संप्राप्तप्रसराः स्फुरन्ति परितो नक्तंचरा दुर्दृशो
यातेऽस्तं गवि हीरसूरितरणौ स्फूर्तिं तमः शीलति ॥ २०६ ॥

गवि पृथिव्यां गगने च हीरसूरिर्हीरविजयसूरिरेव तरणिः सहस्रकिरणस्तस्मिन्नस्तं निधनं द्वीपान्तरं च। यदुक्तं सूक्तम्—'तेजोवसाने व्रजति द्वीपान्तरमहर्मणिः' इति। याते प्राप्ते सति प्रतिमन्दिरं गृहं गृहं प्रति प्रमुदिताः प्रमोदं प्राप्ताः सन्तः कौशिकाः घूका इवेति गर्भितोपमा। उत्प्रेक्ष्यते वा—उलूका इव। मिथ्यादृशो मिथ्यात्वभाजो गर्जन्ति गर्जारवं कुर्वते। यदथास्मन्मतोच्छेदकः कोऽपि नास्तित्यु(?)नाटयन्ति। च पुनरधुना इदानींतनसमये इदं प्रत्यक्षं श्रीमच्चरणारविन्दचञ्चरीकोपमं श्रीमत्पञ्चमहाव्रताणुव्रतप्रमुखगुणलक्ष्मीकलितं शोभायुक्तं वा साधुसाध्वीश्रावकश्राविकारूपचातुर्वर्ण्यसंघः स एव सरोजकाननं कमलवनं म्लानिं संकोचं धत्तेऽश्नुते विच्छायीभूतमास्ते। पुनः संप्राप्तप्रसरा आसादितावकाशा लब्धप्रस्तावा नक्तंचरा राक्षसा इव चौरा इव वा कदाचारा दुर्दृशो दुष्टदर्शनाः कुपाक्षिकाः कुमतानि परितश्चतुर्दिक्षु प्रसरन्ति सर्वतो भ्राम्यन्ति। पुनस्तमः शोकोऽज्ञानं पापं च। 'तमो गुणोऽपि ध्वान्तं तमः शोके तमिस्रे च। गुणभेदे विध्वान्तं पापे च' इत्यनेकार्थतिलके। स्फूर्तिं बलवत्तां प्रकटीभावं च शीलति भजते। रजनीविलसितमासीदिति श्रीमत्सु सत्सु चतुर्थारक एव केवलं संजातोऽभूत्, अधुना पुनः पञ्चमारकः प्रादुरासीदिति ॥ इति विजयसेनसूरेर्गुरौ दिवं गते खेदवाक्यानि ॥

શ્લોકાર્થ

અરે, હીરસૂરિરૂપી સૂર્ય અસ્ત થવાથી ચારે દિશામાં ઘોર અંધકાર છવાઈ ગયો. મિથ્યા દૃષ્ટિરૂપ ઘુવડો હર્ષિત થઈને પ્રત્યેક ઘરમાં ગર્જારવ કરવાના. હવે ચતુર્વિધસંઘરૂપી કમલવન કરમાઈ જશે. અને ચારે તરફ દુર્વાદિઓરૂપી રાક્ષસોનો ઉપદ્રવ પ્રગટ થવાનો. ॥ ૨૦૬ ॥

कातर्यमुत्सृज्य विधाय धैर्यं दुःखं तनूकृत्य स कृत्यविज्ञः ।
गणं गणेन्द्रो गुणिनां वरेण्यः प्राचीनसूरीन्द्र इवावति स्म ॥ २०७

स गणेन्द्रो विजयसेनगणनायकः प्राचीनसूरीन्द्रः पूर्वाचार्य इव गणं तपागच्छम् अवति स्म पालयामास। किंभूतः। गुणिनां गुणवतां वरेण्यः श्रेष्ठः। किं कृत्वा। कातर्यं कातरत्वं

श्रीगुरुविरहेण विधुरीभावमुत्सृज्य त्यक्त्वा । च पुनः किं कृत्वा । धैर्यं धीरभावं विधाय आलम्ब्य । पुनर्दुःखं गुरुविरहासादितं तनूकृत्य स्वल्पं प्रणीय । किंभूतः । कृत्येषु धर्मादिकार्येषु विज्ञप्रतुरः ॥

શ્લોકાર્થ

ઘણા કાળ સુધી આ રીતે વિલાપ કરી, કાયરતાનો ત્યાગ કરી, સ્વસ્થ બની, ધૈર્યતાનું અવલંબન કરી અને ગુરુવિરહનું દુઃખ ઓછું કરીને કૃત્યાકૃત્યના જાણકાર, ગુણીજનોમાં શ્રેષ્ઠ એવા ગચ્છાધિપતિ શ્રી વિજયસેનસૂરિજી પૂર્વાચાર્યની જેમ તપાગચ્છનું પાલન કરવા લાગ્યા. ॥ ૨૦૭ ॥

श्रीसूरिहीरविजये भजति द्युलोक-
मभ्युदगते विजयसेनगणावनीन्द्रे ।
प्रीतिं जना दधति शीतरुचौ प्रयाते
क्षेत्रान्तरं समुदितेंऽशुमतीव कोकाः ॥ २०८ ॥

श्रिया युक्तः सूरिर्हीरविजय एतावता हीरविजयसूरिवरे द्युलोकं स्वर्गं भजति तथा विजयसेननाम्नि गणावनीन्द्रे गणनायके अभ्युदगते उदयं भजमाने सति जना भविक-लोकाः प्रीतिं धर्मस्नेहं प्रमोदं वा दधति बिभ्रति । के इव । यथा शीतरुचौ चन्द्रे क्षेत्रा-न्तरमन्यक्षेत्रं पश्चिममहाविदेहक्षेत्रं प्रयाते । तथा अंशुमति भानुमालिनि समुदिते सति कोकाः चक्रवाकाः प्रीतिं परस्परवियोगापगमादानं दधते ॥

શ્લોકાર્થ

ચન્દ્રનું ક્ષેત્રાન્તર થવાથી સૂર્યનો ઉદય થતાં જેમ ચકવાકો આનંદ પામે તેમ શ્રી હીરવિજયસૂરિજીનું સ્વર્ગગમન થવા છતાં વિજયસેનસૂરિજીનો અભ્યુદય થવાથી ભાવિકો અત્યંત આનંદ માનવા લાગ્યા. ॥ ૨૦૮ ॥

तत्पट्टोदयभूधरभास्वान्श्रीविजयदेवसूरीन्द्रः ।
भजते तपगणराज्यश्रियमुर्वीसार्वभौम इव ॥ २०९ ॥

तस्य विजयसेनसूरेः पट्टः पदं स पयोदयभूधर उदयाचलस्तत्र भास्वान् सहस्रकिरणः श्रिया तपागणलक्ष्म्यान्वितो विजयदेवसूरीन्द्रः अधुना इदानींतनसमये वृत्तिविधानावसरे तपगणस्य तपागच्छस्य राज्यश्रियं भजते । क इव । उर्वीसार्वभौम इव । यथा चक्रवर्ती उर्वीं भजते पालयति ॥

શ્લોકાર્થ

શ્રી વિજયસેનસૂરિજીની પાટરૂપી પૂર્વાચલ ઉપર સૂર્યસમાન શ્રી વિજયદેવસૂરિજી ચક્રવર્તીની જેમ તપાગચ્છની લક્ષ્મીને ધારણ કરનારા બન્યા. ॥ २०९ ॥

सीहगिरेरिव वज्रस्वामी तस्यैष पट्टपयोधिविधुः ।
श्रीविजयदेवसूरिक्षोणीन्द्रः पर्वतायुः स्यात् ॥ २१० ॥

श्रीसीहगिरिसूरेरिव श्रीमान् वज्रस्वामी तस्य विजयसेनसूरेः पट्टं पट्टः स एव पयोधिः समुद्रः तदुल्लासविधाने विधुः शारदीनशर्वरीश्वरयिता एष सकलकुवलयप्रतिबोधविधायकः श्रीमान् सर्वत्र शोभाविभ्राजिष्णुः विजयदेवसूरिः पर्वतायुः पर्वतानां महागिरीणामिवासंख्यवर्षायुस्तस्याद्भवतात् ॥

શ્લોકાર્થ

જેમ શ્રી સિંહગીરીની પાટે શ્રી વજ્રસ્વામી થયા હતા તેમ શ્રી વિજયસેનસૂરિજીની પાટરૂપી સમુદ્રને ઉલ્લસિત કરવામાં ચન્દ્રસમાન શ્રી વિજયદેવસૂરિજી પર્વતાયુ થાઓ, અર્થાત્ દીર્ઘાયુ બનો. ॥ २१० ॥

अथाशीर्वचनम्—

यावन्मार्तण्डमुख्यग्रहगणकलितो भूभृतां चक्रवर्ती
प्रीतिं पीयूषपूरैः सृजति जनदृशां शार्वरीसार्वभौमः ।
यावत्पाथोजपाणिर्हरिदलसदृशामास्यपद्मप्रकाशी
यावद्भूपीठभारं भजति निजफणामण्डलैः कुण्डलीन्द्रः ॥ २११ ॥

तावदिति काव्यसंबन्धोऽग्रे वक्ष्यते । यावन्तं समयं भूभृतां सर्वपर्वतानां सर्वोन्नतत्वात् लक्षयोजनमितत्वात्तीर्थंकृतां जन्माभिषेकस्थानत्वाच्च परशासनेऽपि ' विषमक्षादमरा-

त्रिरागताम्' इत्युक्तत्वेन स्वर्गाधारत्वाच्च चक्रवर्ती सुमेरुः । अथ वा 'सातकुम्भावनीभृत्' इति पाठः । सुवर्णाचलो वर्तते । किंभूतः । मार्तण्डो भास्करो मुख्योऽग्रणीः प्रधानो येषु तादृशाः ग्रहाः सोममङ्गलाद्या अष्टाशीतिसंख्या उपलक्षणान्नक्षत्रतारकास्तेषां गणाः समूहास्तैः कलितो युक्तः । तथा यावन्तमनेहसं शर्वरीसार्वभौमश्चन्द्रमाः । किंभूतः । जनदृशां लोकलोचनानां पीयूषपूरैः सुधारसप्रसरैः प्रीतिं सृजति । प्रीणातीत्यर्थः । तथा यावत्पाथोजपाणिः सहस्रकिरणो विद्यते । किंभूतः । हरितो दिश एवालसदृशो मृगाक्ष्यस्तासामास्यानि मुखान्येव पद्मानि विकाशयतीत्येवंशीलः । तथा यावत्कुण्डलीन्द्रो नागराजः शेषनागः भूपीठभारं मेदिनीमण्डलभारं भजति । वहतीत्यर्थः । कैः । निजैरात्मीयैः फणामण्डलः सहस्रफणैः ॥

श्लोकार्थ

જ્યાં સુધી સૂર્ય આદિ ગ્રહોના સમૂહથી યુક્ત મેરૂપર્વત છે. જ્યાં સુધી ચન્દ્ર પોતાના અમૃતરસથી મનુષ્યોની દૃષ્ટિને આનંદ આપે છે, જ્યાં સુધી સૂર્ય દિગાંગનાઓના મુખકમલને વિકસિત કરે છે, તેમજ જ્યાં સુધી શેષનાગ પોતાની હજાર ફણા વડે પૃથ્વીના ભારને વહન કરે છે. ॥ ૨૧૧ ॥

यावज्जम्भारिधूमध्वजजलजसुहृत्सूनुरक्षःस्रवन्ती-
कान्तावासाहिकान्तत्रिनयनसखयः पार्वतीशा दिगीशाः ।
यावत्पाथोधिपृथ्वीधरगुरुगुरुतां बिभ्रती रत्नगर्भा
जन्तून्यावत्पुनाति त्रिभुवनभवनान्भारती विश्वभर्तुः ॥ २१२ ॥

यावन्तं कालं जम्भारिः पुरंदरः, धूमध्वजो वह्निः, जलजानां पद्मानां सुहृन्मित्रं भास्वान्, तस्य सूनुर्नन्दनो यमः, रक्षो नैर्ऋतिः, स्रवन्तीकान्तो नदीपतिः समुद्रः तत्र वासो वेश्म यस्य सोऽर्णवमन्दिरो वरुणः, अहिकान्तो वायुः, त्रिनयनस्य सखया मित्रमीशसखो धनदः, पार्वत्या गौर्या ईशो वल्लभः शंभुः । 'दण्डधरोऽर्कसूनुः', तथा 'वरुणस्त्वर्णवमन्दिरः प्रचेताः', तथा 'वातोऽहिकान्तपवमानमरुत्प्रकम्पनाः', तथा 'पशुप्रमथभूतोमापतिः', एतानि सत्यार्थप्युक्तपदानि हैम्याम् । एते सर्वेऽपि दिगीशा दिक्पाला वर्तन्ते । तथा यावद्रत्नगर्भा भूरास्ते । किं कुर्वती । पाथोधीनां सर्वसमुद्राणां तथा यावद्वसुधावलयवर्तिनां पृथ्वीधराणां मेरुप्रमुखपर्वतानां च गुरुमतिशायिनीं गुरुतां गरिमाणं भारभरं बिभ्रती धारयन्ती । तथा यावद्विश्वभर्तुस्त्रैलोक्यनायकस्य तीर्थंकरस्य भारती सिद्धान्तरूपा वाणी त्रिभुवनभवनान् स्वर्गपातालभूमिषु गृहाणि येषां तादृशान्नाकिनागनागराञ्जन्तून् प्राणिनः पुनाति पवित्रयति तारयति ॥

શ્લોકાર્થ

જ્યાં સુધી ઇન્દ્ર, અગ્નિ, સૂર્ય, યમ, રક્ષ, નૈઋતિ, વરુણ, વાયુ, કુબેર અને ઈશ્વર એ દિક્પાળો જગતમાં વિદ્યમાન છે, જ્યાં સુધી સર્વ સમુદ્રો અને સર્વપર્વતોના ભારને વહન કરનારી પૃથ્વી વિદ્યમાન છે, અને જ્યાં સુધી તીર્થંકરભગવંતની સિદ્ધાંતરૂપ વાણી ત્રણે જગતના જીવોને પવિત્ર કરે છે. ॥ ૨૧૨ ॥

स्थेमानं गाहमानो बलमथनपथे यावदौत्तानपादि-
यावत्कल्लोलमालाविलिखितदिविषत्पद्धतिः सिन्धुकान्तः ।
यावत्सिद्धस्रवन्तीतपनतनुरुहाभारतीसंगमश्च
श्रीमत्पार्श्वप्रसादाज्जगति विजयतां हीसौभाग्यकाव्यम् ॥ २१३ ॥

यावत्समयं बलमथनपथे गगनाङ्गणे उत्तानपादस्य राज्ञोऽपत्यमौत्तानपादिः ध्रुवः स्थेमानमतिशयेन स्थिरतां गाहते अवलम्बते । च पुनर्यावत् कल्लोलमालाभिस्तरङ्गराजीभिः विलिखिता स्पृष्टा व्याप्ता दिविषदां देवानां पद्धतिर्मार्गो व्योम येन तादृशः सिन्धुकान्तः । तथा च पुनर्यावत्सिद्धस्रवन्ती गङ्गा, तथा तपनतनुरुहा सूर्यपुत्री यमुना, तथा भारती सरस्वती, तासां तिसृणां संगमो वर्तते । तावन्त समयं श्रीमतस्त्रैलोक्यलक्ष्मीकलितस्य पार्श्वस्य श्रीपार्श्वनाथस्यार्थात् श्रीमच्चिन्तामणिपार्श्वनाथस्य प्रसादाज्जगति महीमण्डले इदं हीरसौभाग्यं काव्यं विजयतां सर्वोत्कृष्टत्वेन प्रवर्तताम् ॥ इति ग्रन्थावसाने श्रीमत्पार्श्व इति मङ्गलाभिधानम् ॥

શ્લોકાર્થ

જ્યાં સુધી આકાશમાં ઉત્તાનપાદરાજાનો પુત્ર ધ્રુવ (ધ્રુવનો તારો) આકાશમાં સ્થિરતા કરીને રહેલો છે, જ્યાં સુધી તરંગોની પંક્તિઓથી આકાશમાર્ગ વ્યાપ્ત છે તેવો સમુદ્ર વિદ્યમાન છે, અને જ્યાં સુધી ગંગા, યમુના અને સરસ્વતી એ ત્રિવેણીના સંગમનું અસ્તિત્વ છે ત્યાં સુધી શ્રીચિંતામણિ પાર્શ્વનાથ ભગવાનના અચિંત્યપ્રભાવથી જગતમાં આ "**હીરસૌભાગ્ય મહાકાવ્ય**" વિશેષ પ્રકારે જયવંતુ વર્તો. ॥ ૨૧૩ ॥

यं प्रासूत शिवाह्वसाधुमघवा सौभाग्यदेवी पुनः
श्रीमत्कोविदसिंहसीहविमलान्तेवासिनामग्रिमम् ।
तद्ब्राह्मीक्रमसेविदेवविमलव्यावर्णिते संमदा-
त्सर्गः सप्तदशो बभूव चरिते श्रीहीरसूरिप्रभोः ॥ २१४ ॥

अत्र हीर सौभाग्यनामकाव्ये संमदादानन्दाद्देवविमलेन व्यावर्णिते श्रीहीरसूरिप्रभोः श्रीहीरविजयसूरीश्वरस्य चरिते गुणोत्कीर्तनरूपे चरित्रे सप्तदशः सर्गो बभूव संजातः ॥

इति पण्डितश्रीसींहविमलगणिशिष्यपण्डितदेवविमलगणिविरचितायां स्वोपज्ञहीरसौभाग्यकाव्यवृत्तौ श्रीशत्रुंजयोत्तरणप्रस्थानशत्रुंजयासिन्धूत्तरणाजयपार्श्वनाथयात्राकरणतद्भागमागतमहिमवर्णनद्वीपसंघसंमुखागमनोन्नतनगरपवित्रीकरणसंलेखनाराधनाविराधनाविधानानशनपूर्वकस्वर्लोकगमनविजयसेनसूरिगणैश्वर्यकथनविजयदेवसूरिपुरंदरसंप्रतिराज्यप्रवर्तनो नाम सप्तदशः सर्गः ॥

શ્લોકાર્થ

ઉપસંહાર–

વણિકકુલમાં ઇન્દ્રસમાન 'શિવ' નામના શ્રેષ્ઠિ અને સૌભાગ્યદેવીના જન્મજાતસુપુત્ર **દેવવિમલગણી** કે જેઓ નિરંતર સરસ્વતીદેવીની અર્થાત્ જ્ઞાનની ઉપાસના કરવામાં તત્પર અને સર્વ મુનિઓમાં સિંહસમાન સિંહવિમલગણીના પ્રથમ શિષ્યરૂપે પ્રસિદ્ધ હતા, તે દેવવિમલગણીએ જેમાં જગદ્ગુરુ શ્રીહીરવિજયસૂરિજીનું સવિસ્તર જીવન-ચરિત્ર આવે છે, એવા 'હીરસૌભાગ્ય' નામના મહાકાવ્યની સ્વોપજ્ઞ ટીકા સહિત રચના કરી. તે મહાકાવ્યનો શ્રી શત્રુંજયતીર્થની યાત્રાથી આરંભીને શ્રી વિજયદેવસૂરિજીના શાસનપર્યંતનો આ સત્તરમો સર્ગ સમાપ્ત થયો; એની સાથે શ્રીહીરવિજયસૂરિજીના ગુણોત્કીર્તનરૂપ જીવન-ચરિત્ર પણ સમાપ્ત થયું. ॥ ૨૧૪ ॥

*

શુભં ભવતુ

કલ્યાણમસ્તુ

ભદ્રં દિશ

*

प्रशस्तिसूत्रम्

श्रीपतिरिव संपद्भिः श्रीपतिनामा विशारदेन्दुरभूत् ।
दिक्कुम्भिवद्बभूवुर्यस्याष्टौ पण्डितोत्तंसाः ॥ १ ॥

પ્રશસ્તિસૂત્રમ્

જ્ઞાન ધ્યાનની સંપત્તિથી ધનદ સમાન, વિચક્ષણ વિબુધ, પંડિત શિરોમણિ એવા 'શ્રીપતિ' નામના શ્રમણપુંગવ હતા, જેઓને આઠ દિગ્ગજસમાન આઠ પ્રૌઢ પંડિત-શ્રેષ્ઠ શિષ્યો હતા. ॥ ૧ ॥

वैराग्यैर्लब्धिभिरपि भाग्यैः सौभाग्यवैभवैरधिकैः ।
यस्य समो न परोऽभूद्भानोरिव कोऽपि तेजोभिः ॥ २ ॥

વિરક્ત વારિધિ અને ભાગ્યસૌભાગ્યના ભંડાર એવા તે શ્રમણપુંગવથી અધિક જગતમાં કોણ હોઈ શકે ! શું પ્રતાપનિધિ એવા સૂર્યથી અધિક તેજસ્વી અન્ય કોણ હોઈ શકે ? ॥ ૨ ॥

यन्मनुजशिष्यवृषभस्त्रिजगद्विद्वत्पुरंदरः समभूत् ।
चतुरास्यः कविरगणितयद्गुणगणनाचिकीरासीत् ॥ ३ ॥

ત્રણે જગતના વિદ્વાનોમાં ઇન્દ્રસમાન તે સૂરિપુંગવના ધુરંધર શિષ્ય હતા. તે શ્રમણપુંગવના અગણિત ગુણોને ગણવા માટે ચતુર્મુખી બ્રહ્મા પણ સમર્થ થઈ શકે નહીં, અર્થાત્ ગુણોના ભંડાર હતા. ॥ ૩ ॥

श्रीमज्जर्गिपविबुधो जम्बुरिव शीललीलया जज्ञे ।
यत्तपसस्तेजोरविरसासहिर्गगन इव गतवान् ॥ ४ ॥

તેઓની પરંપરામાં નૈષ્ઠિક બ્રહ્મચર્ય શિરોમણિ જંબૂસ્વામી સમાન "જગર્ષિ" નામના શ્રમણપંડિત થયા. જેઓનાં તપતેજને નહીં સહી શકવાથી જ જાણે સૂર્ય ગગન-મંડલમાં ચાલ્યો ગયો ન હોય ! ॥ ૪ ॥

षट्कायानामिव यो विराधनाः प्रोज्झति स्म षड्विकृतीः ।
निर्विकृतिकान्यशेषाण्यपि विजहौ दुःकृतानीव ॥ ५ ॥

જેઓએ ષટ્કાયની વિરાધનાની જેમ છ વિગઈઓનો અને દુષ્કૃત્યોની જેમ નિર્વિકૃતિઓ(મેવા, મિષ્ટાન્ન, ફળ આદિ)નો પણ સદંતર ત્યાગ કર્યો હતો. અર્થાત્ હંમેશ છઠના પારણે આયંબિલ કરતા હતા. ॥ ૫ ॥

यावज्जीवं गौतम इव षष्ठैः पारणां विभुर्विदधे ।
पुनरेकस्मिन्स्थाने भक्तजले विरचयांचक्रे ॥ ६ ॥

વળી તે જગર્ષિમુનિવર ગૌતમસ્વામીની જેમ યાવજ્જીવન છઠને પારણે છઠ કરતા હતા. પરંતુ એટલી વિશેષતા કે તે મુનિવર ઠામ પાણી અને ઠામ ચૌવિહાર કરતા હતા. (એક જ સ્થળે બેસીને આહારપાણી કરતા હતા.) ॥ ૬ ॥

लुम्पाकैर्लुण्टाकैरिव लुण्ठितनिखिलबोधिबीजधनम् ।
व्याप्तं तद्वर्गेण च तमोगुणेनेव भूतपतिम् ॥ ७ ॥
सौराष्ट्रजनपदं यः प्रतिबोधितवाननन्यमहिमनिधिः ।
वज्रस्वामी सौगतजनैर्यथा बौद्धधरणिधवम् ॥ ८ ॥ (युग्मम्)

લુંપાકગચ્છરૂપી લુંટારાઓ વડે જેમનું બોધિબીજરૂપી ધન લુંટાયું છે તેવા સૌરાષ્ટ્રદેશને તમોગુણી ઈશ્વરની જેમ લુંપાકગચ્છીઓએ ભ્રમિત બનાવી દીધો છે એવા દેશવાસીઓને મહાપ્રભાવશાળી જગર્ષિમહારાજે પ્રતિબોધ કરી શુદ્ધ ધર્મમાં સ્થિર કર્યા. જેમ બૌદ્ધાનુયાયીઓ વડે બૌદ્ધધર્મી બનેલા બૌદ્ધરાજાને વજ્રસ્વામીએ પ્રતિબોધ પમાડ્યો હતો તેમ જગર્ષિમહારાજે લુંપાકમતાનુયાયીઓને પ્રતિબોધ પમાડ્યો હતો. ॥ ૭ ॥ ૮ ॥

प्रस्रवणममृतमिव गदगणान्गुरोः शमयति स्म मूर्तिमताम् ।
देवा अपि यत्सेवां भक्ता इव कुर्वते तपसा ॥ ९ ॥

જે ગુરુનું પ્રસ્રવણ (મૂત્ર) પણ અમૃતની જેમ ભયંકર રોગોના સમૂહને શમાવતું હતું, વળી જેઓના તપતેજથી આકર્ષાઈને દેવો પણ આવીને ભક્તજનની જેમ નિરંતર ઉપાસના કરતા હતા. ॥ ૯ ॥

नृपमालदेवपृष्ठे प्रविष्टवान्यद्विवाददरितमनाः ।
योधपुरे किल पार्श्वादिमचन्द्रो वाचकः सुचिरम् ॥ १० ॥

વાદીઓના વાદને દૂર કરવામાં દત્તચિત્ત એવા "પાર્શ્વચન્દ્ર" નામના ઉપાધ્યાયને યોધપુરના માલદેવરાજાની રાજસભામાં આદરપૂર્વક પ્રવેશ મળતો હતો. ॥ ૧૦ ॥

विष्णोः श्रीरवि हृदये रमते स्मैकादशाङ्गि(ङ्ग)कायस्य ।
भेजुरनेके मुनयोऽप्युपकारिणमिव गणाधीशम् ॥ ११ ॥

વિષ્ણુના હૃદયમાં જેમ લક્ષ્મી રમે તેમ જેઓનાં હૃદયમાં અગિયાર અંગરૂપી લક્ષ્મી ક્રીડા કરી રહી છે તેવા ગણાધીશ જગર્ષિસૂરિની અનેક મુનિઓ ખૂબ જ બહુમાનપૂર્વક ઉપાસના કરતા હતા. ॥ ૧૧ ॥

श्रीसीहविमलवि बुधस्तस्य विनेयोऽजनिष्ट शिष्टबुधः ।
यद्धिषणाजितधिषणोऽध्येतुं दिवि कविसमीपेऽगात् ॥ १२ ॥

તે જગર્ષિસૂરિના વિનયી, પંડિતશ્રેષ્ઠ એવા 'સિંહવિમલગણી' નામના શિષ્ય હતા, જે સિંહવિમલગણીની પ્રતિભાશક્તિથી પરાભવ પામેલો સુરગુરુ, તેથી જ જાણે સ્વર્ગમાં શુક્રની પાસે અભ્યાસ કરવા માટે ગયો ન હોય. ॥ ૧૨ ॥

यो गौतमनामानं सभासमक्षं जिगाय वादीन्द्रम् ।
श्रीदेवसूरिरिविरिव कुमुदादिमचन्द्रदिग्वसनम् ॥ १३ ॥

વાદી દેવસૂરિની જેમ સિંહવિમલગણીએ ગૌતમરાજાની રાજસભામાં દિગંબર કુમુદચન્દ્ર નામના સમર્થ વાદીને પરાસ્ત કર્યો હતો. ॥ ૧૩ ॥

नारायणदुर्गाद्या भूमीन्द्रा येन रञ्जिताः स्वर्गे ।
राजसिंहदेवमुख्या हेमादिमचन्द्रगुरुणेव ॥ १४ ॥

જેમ હેમચન્દ્રાચાર્યે સિદ્ધરાજ જયસિંહ, કુમારપાલ આદિ રાજાઓને પ્રતિબોધ કર્યો હતો તેમ સિંહવિમલગણીએ પણ નારાયણદુર્ગ આદિ રાજાઓને પ્રતિબોધ કરી પુણ્ય-પાપ-પરલોક આદિ તાત્ત્વિક વિષયમાં અનુરક્ત બનાવ્યા હતા. ॥ ૧૪ ॥

यश्चन्द्रभाणसंज्ञं कायस्थं मण्डलीकमिव भूमौ ।
निजभक्तं शिष्यमिव प्रणीतवान्वचनचातुर्यात् ॥ १५ ॥

તેમજ માંડલિક રાજા ચન્દ્રભાણુ નામના કાયસ્થને પણ પોતાના વાક્ચાતુર્ય વડે પ્રતિબોધ કરી વિનયી શિષ્યની જેમ પોતાનો મિત્ર બનાવ્યો હતો. ॥ ૧૫ ॥

मिथ्यात्वं मनसो निरस्य विलसद्वाचां विलासैर्निजै-
स्तस्मिन्स्थापयति स्म धर्ममनघं स्थानादिसिंहस्य यः ।
दाघं घोरनिदाघघर्मघटितं प्रावृट्पयोदव्रजो
दृष्टीनां पटलैरिवामृतरसं भूमण्डलस्यान्तरा ॥ १६ ॥

ગ્રીષ્મઋતુમાં તીવ્ર તાપથી સંતાપ પામેલા વિશ્વને વર્ષાઋતુની અવિરત જલધારા અમૃતરસની જેમ સિંચન કરી પૃથ્વીમંડલને શીતળતા અર્પે તેમ સિંહવિમલગણીએ પોતાની આગવી વાણીથી થાનસિંહના હૃદયરૂપી મંદિરમાં મિથ્યાત્વને દૂર કરી અમૂલ્ય એવા જૈનધર્મની સ્થાપના કરી હતી. ॥ ૧૬ ॥

जिनवृषभसमवसरणप्रकरं यः कारयांचकार जनैः ।
सूर्याभदेव इव निजयज्ञाभ्यवहारनिवहेन ॥ १७ ॥

સૂર્યાભદેવે પોતાના સેવક દેવો પાસે જેમ ભગવંતના સમવસરણની રચના કરાવી હતી તેમ સિંહવિમલગણીએ ભાવુકો પાસે શ્રીઋષભદેવસ્વામીના સમવસરણની રચના કરાવી હતી. ॥ ૧૭ ॥

योऽर्चा भागवतीया भविकप्रकरेण कारयांचक्रे ।
आर्यसुहस्तिव्रतिपतिरिव संप्रति वसुमतीविधुना ॥ १८ ॥

આર્યસુહસ્તિ મહારાજે સંપ્રતિરાજા પાસે જેમ જિનેન્દ્રપૂજામહોત્સવ કરાવ્યો હતો તેમ સિંહવિમલગણીએ ભાવુકો પાસે જિનેન્દ્રપૂજામહોત્સવ કરાવ્યો હતો. ॥ ૧૮ ॥

तच्चरणकमलमानससद्मोपमविबुधदेवविमलेन ।
निरमायि काव्यमेतत्प्रमोदतो हीरसौभाग्यम् ॥ १९ ॥

તે શ્રી સિંહવિમલગણીનાં ચરણકમલરૂપી માનસરોવરમાં હંસસમાન તેઓના વિનયી શિષ્ય શ્રી દેવવિમલગણીએ અતિ હર્ષપૂર્વક આ '**હીરસૌભાગ્ય**' નામના મહાકાવ્યની રચના કરી. ॥ ૧૯ ॥

तस्य स एव व्यदधात्सुखावबोधाभिधां पुनर्वृत्तिम् ।
श्रीहेमचन्द्रगुरुरिव निजनिर्मितनाममालायाः ॥ २० ॥

શ્રી હેમચન્દ્રાચાર્યે જેમ પોતાની બનાવેલી નામમાલા ઉપર સ્વોપજ્ઞટીકા બનાવી છે તેમ દેવવિમલગણીએ પણ સ્વયંનિર્મિત હીરસૌભાગ્ય ઉપર 'સુખાવબોધ' નામની સ્વોપજ્ઞટીકા બનાવી. ॥ ૨૦ ॥

कल्याणविजयवाचकवासवशिष्येण काव्यमिदमखिलम् ।
समशोध्यत धनविजयाभिधवाचकवसुमतीपतिना ॥ २१ ॥

શ્રી કલ્યાણવિજય ઉપાધ્યાયના શિષ્ય વાચકેન્દ્ર શ્રીધનવિજય ઉપાધ્યાયે આ સમસ્ત મહાકાવ્યનું સાંગોપાંગ સંશોધન કર્યું છે. ॥ ૨૧ ॥

इति ग्रन्थप्रशस्तिः सम्पूर्णा ।

॥ शुभं भूयात् ॥

यत्किंचिदप्यवद्यं भवेदिहानुग्रहं प्रणीय मयि ।
संशोध्यं तद्विबुधैः साधिमसुखगुणमणीनिधिभिः ॥ २२ ॥

સ્વોપજ્ઞ ટીકા સહિત આ મહાકાવ્યમાં જે કાંઈ પણ ક્ષતિ (અશુદ્ધિ) રહી ગઈ હોય તેનું ગુણરત્નાકર એવા પંડિત પુરુષોએ મારા પર અનુગ્રહ કરી સંશોધન કરવું. ॥ ૨૨ ॥

*

શુભં ભૂયાત્

શ્રીરસ્તુ

સ્વસ્તિરસ્તુ

ભદ્રં દિશ

*